University of Mysore

Oriental Library Publications

SANSKRIT SERIES No. 75

अद्वैतसिद्धिः

गुरुचन्द्रिकाख्यव्याख्यासमलङ्कृता

प्रथमसम्पुटम्

THE ADVAITASIDDHI

WITH THE

GURUCHANDRIKA

Vol. I

EDITED BY

D. SRINIVASACHAR, M.A.

Professor of Sanskrit, Maharaja's College and Curator, Govt. Oriental Library, Mysore

AND (THE LATE) PANDIT

G. VENKATANARASIMHA SASTRY

First Resident Pandit, Govt. Oriental Library, Mysore

MYSORE

PRINTED AT THE GOVERNMENT BRANCH PRESS

1933

भू मि का

विदितमेव यत् सिद्धान्तबिन्दुवेदान्तकल्पलतिकादिग्रन्थरचना-प्रकटीकृतमहामेधाविभवैः तत्रभवद्भिर्मधुसूदनसरस्वतीभिः परिच्छेदचतुष्टयात्मकमद्वैतसिद्धिनामकं न्यायामृतखण्डनपरं ग्रन्थरत्नं निरमायीति। यदीयोक्तिसुधार्णवं व्याख्यातुमुपक्रान्ताः सुगृहीतनामधेया ब्रह्मानन्दसरस्वत्यः[1] अद्वैतसिद्धिकर्तृविषय एवं वदन्ति—

मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती।
वेत्ति पारं सरस्वत्या मधुसूदनसरस्वती॥ इति॥

अस्या अद्वैतसिद्धेः खण्डनपरं तरङ्गिण्याख्यमतिगम्भीरं ग्रन्थरत्नं द्वैतमतीयविपश्चित्प्रवराः श्रीमन्तो रामाचार्या रचयामासुः॥

तरङ्गिणीखण्डनपरां लघुचन्द्रिकाख्यां व्याख्यामद्वैतसिद्धेः श्रीमन्तो ब्रह्मानन्दसरस्वत्यः प्रणिन्युः[2]। यदाहुः—"तद्बुद्ध्याय तरङ्गिणीप्रववृते या तामिडां स व्यधाद्ब्रह्मानन्दयतिः" इत्यादि। इयं लघुचन्द्रिका विट्ठलेशोपाध्यायकृतव्याख्यालङ्कृता महामहोपाध्यायेत्यादि-

[1] अस्मदीयप्राच्यकोशागारग्रन्थमालायां प्रकटीकृतस्य तर्कताण्डवग्रन्थस्योपोद्घाते (-३ पु) न्यायामृतकाराणां कालः क्रैस्तीयं षोडशशतकमिति शासनसम्पादितो निर्णय इत्युक्तः। तत्कालीनास्तरङ्गिणीकाराः। तरङ्गिणीखण्डनकारास्ततोऽर्वाचीनाः॥

[2] 'सूत्रमुक्तावल्यामस्माभिर्व्याख्याता' (ल-चं-७४४ पु), 'विस्तरेण चेदं बिन्दुटीकायामुक्तम्' (ल-चं-५५८ पु), इत्यादिप्रमाणैः ग्रन्थस्यास्य कर्तारो ब्रह्मानन्दसरस्वत्य इति निर्णीयते। एतदनुरोधेनैतद्ग्रन्थान्ते लिखिते—

महानुभावधौरेयशिवरामाख्यवर्णिनः।
एतद्ग्रन्थस्य कर्तारो लेखकाः केवलं वयम्॥

इति श्लोके 'कर्तार' इत्यादिपदं स्वाहङ्कारपरिजिहीर्षया शिवरामवर्णिष्वादरातिशयेन च प्रयुक्तमित्युत्पश्यामः॥

बिरुदाङ्कितैः श्रीयुतैः—अनन्तकृष्णशास्त्रिभिः स्वविरचितया भूमिकया सहिता निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशिता । अद्वैतसिद्धिमधिकृत्य वक्तव्या बहवो विषयास्तत्रैव भूमिकायां द्रष्टव्याः ॥

तरङ्गिणीखण्डनपरो गुरुचन्द्रिकाख्यो महानयं ग्रन्थः लघुचन्द्रिकाकर्तृभिरेव पूर्वं[1] विरचितः । एतावता कालेन कुत्राप्यमुद्रितोयं सम्मुद्रणीय इति कृतप्रयत्नैरस्मत्प्राच्यकोशागाराधिकारिभिः चत्वार आदर्शाः समुपयुक्ताः—

१. तेष्वेकः, श्रीमन्महीशूरास्थानधर्माधिकारिणां विद्याविशारदेत्यादिबिरुदाङ्कितानां कुणिगल्—रामशास्त्रिणां सविधात् ।

२. द्वितीयः[2], शृङ्गेरीवास्तव्यानां विदुषां वि. एस्. रामचन्द्रशास्त्रिणां सविधात् ।

३. तृतीयः, मद्रपुरीस्थकोशागाराच्चासादितः ।

४. चतुर्थः, अस्मदीयकोशागारस्थ एव ।

आदर्शपुस्तकदानेन मुद्रणाय महदुपकृतवतामुदारहृदयानामुपकारभारं वहामः ।

अयं चास्य ग्रन्थस्य (आगमबाधोद्धारान्तः) प्रथमो भागः । प्रकाशयिष्यते चाचिरादेवावशिष्टः प्रथमपरिच्छेदान्तो द्वितीयोऽपि भागः॥

ग्रन्थस्यास्य शोधनादिविषये पूर्वाश्रमे इदानींच बहूपकृतवद्भ्यः कूड्लिशृङ्गेरिश्रीवालुकेश्वरभारतीस्वामिभ्यो नतितातिं समर्पयाम इति शम्॥

———

[1] "संक्षिप्तचन्द्रिकार्थेन" (ल-चं-२ पु), "विस्तरस्तु बृहच्चन्द्रिकायां द्रष्टव्यः" (ल-च-५२६ पु), इत्यादि ग्रन्थकृदुक्तप्रमाणैरयं ग्रन्थो लघुचन्द्रिकायाः पूर्वं रचित इति ज्ञायते ॥

[2] अयं चादर्शः ४२८ पृष्ठानां मुद्रणानन्तरमासादितः । एतदनुरोधेन तावत्सु पाठान्तराणि परिशिष्टे प्रदर्शितानि ।

प्रथमसम्पुटगतानां विषयाणां अनुक्रमणिका

	विषयः			पृष्ठसंख्या
1	मङ्गळाचरणम्	....	....	1— 2
2	विप्रतिपत्तिवाक्यस्य विचाराङ्गत्वम्		....	3— 5
3	पक्षतावच्छेदकविचारः	....	...	5— 24
4	प्रपञ्चमिथ्यात्वनिरूपणम्	....	....	24— 52
5	द्वितीयमिथ्यात्वनिरूपणम्	....	....	52— 86
6	तृतीयमिथ्यात्वनिरूपणम्	....	....	86—103
7	चतुर्थमिथ्यात्वनिरूपणम्	....	....	104—106
8	पञ्चममिथ्यात्वनिरूपणम्	....	....	106—109
9	मिथ्यात्वामिथ्यात्वनिरूपणम्	....	....	110—120
10	दृश्यत्वनिरुक्तिः	....	....	120—148
11	जडत्वनिरुक्तिः	....	....	148—164
12	परिच्छिन्नत्वनिरुक्तिः	....	....	164—179
13	अंशित्वविचारः	....	....	180—191
14	सोपाधित्वभङ्गः	....	....	192—203
15	आभाससाम्यभङ्गः	....	....	203—205
16	प्रत्यक्षबाधोद्धारः	....	....	206—250
17	प्रत्यक्षप्राबल्यभङ्गः	....	....	250—283
18	प्रत्यक्षस्योपजीव्यत्वभङ्गः	....	....	283—295
19	प्रत्यक्षस्यानुमानबाध्यत्वविचारः		....	295—304
20	आगमबाध्यत्वविचारः	....	....	304—329
21	अपच्छेदन्यायवैषम्यभङ्गः	....	....	329—337
22	शैत्यानुमितिसाम्यभङ्गः	....	...	337—345
23	प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकनिरूपणम्		....	346—356
24	भाविबाधोपपत्तिः	....	....	356—380
25	विश्वसत्यत्वानुमानभङ्गः	....	....	380—422
26	मिथ्यात्वे विशेषतोऽनुमानानि		....	422—442
27	आगमबाधोद्धारः	....	....	442—503

पाठान्तराणि

पुटम्	पङ्क्तिः	यथास्थितपाठः	पाठान्तरम्
4	9	विशेषधी	विशेषणधी
5	8	समयघटकत्व	समयविज्ञत्व
6	15	प्रमातरिक्तस्था	प्रमासंस्था
8	17	ध्यासाभावान्य	ध्यासान्य
14	2	विशेष्यता	प्रकारता
16	11	विशेष्यता	विशेषणता
	19	तादौ	तादेः
18	12	त्म्योपलक्षित	त्म्याश्रय
	24	त्यादि	त्यादेः
20	18	र्गस्येद	र्गेद
27	11	घटाभिन्नं	घटादिमदभिन्नं
	14	घट	घटवत्
28	14	ताकत्वेन	तानिरूपकत्वेन
29	2	बन्धक	बध्य
32	9-10	घटो	घटत्वो
33	17	टधीभि	टभि
54	12	विशेषो	विशेष्यो
59	24	अपोक्षतां	अपेक्षितं
62	21	तद्व्यक्ति-न्ना	तद्व्यक्तिभिन्ना
63	2	क्यस्य सं	क्यसं
85	2	उक्ताविरोध	उक्तविरोधि
97	14	न व्या	व्या
107	11	ववन्न	ववद्धर्मभेदान्न

पुटम्	पङ्क्तिः	यथास्थितपाठः	पाठान्तरम्
118	12	न च ना	येना
	24	कल्पितेन प्रपञ्चाभा-	निर्विकल्पकधीवेद्यम् ।
119	1	वत्वेन	
123	18	साक्षिणा	साक्षिणो
125	15	उपहितत्वा	उपहिते तत्वा
129	11	जनन	जनना
132	17	ब्रह्मभिन्नवि	ब्रह्मवि
144	22	कारेऽपि	काराविद्यानिवृत्तावपि
150	16	विशिष्टचि	विशिष्टरूपेण चि
151	21	रूपे स्व	रूपस्व
156	18	अव्याप्य	व्याप्य
	19	प्रत्य	अप्रत्य
		अवच्छिन्न	अनवच्छिन्न
157	6	वृत्तिभिन्न	भिन्नवृत्ति
180	19	मन्मते	तन्मते
187	17	युक्तः	अयुक्तः
189	16-17	तर्कसत्वात्	तर्काभावात्
203	24	मानेनैक्य	मानैक्य
210	14	तत्सम्बद्धे दे	तदसम्बद्धदे
225	12	तथाच गो	तथाच विनिगमनाविर- हेण गो
227	21	व्यापकत्वपक्षे	विपरीतज्ञानोत्तरप्रत्यक्षे
229	21	तु अन	तु नास्ति, अनुमित्यादौ आन
243	13	तद्रू	तत्तद्रू
246	19	ज्ञान	ज्ञाना
250	19	त्वात् सि	त्वासि
254	12	तथा	तया
260	8	विह्येनेन	विध्येतेन
	16	सत्यं न	सत्यं त्वगादिसंवादि सत्यं न

पुटम्	पङ्क्तिः	यथास्थितपाठः	पाठान्तरम्
262	8	चक्षुः	मनश्चक्षुः
269	4	त्यत्राचि	त्यन्यत्र वि
	6	विषयान्यत्र	विषयादन्यत्र
279	6	विषयायाश्च	विषयत्वाच्च
296	14	मासस	मासचोदनास
298	9	प्रमाणयन्ति	प्रणयन्ति
301	17	श्रुतेरन्यमानापे	श्रुतिकल्पमानापे
302	12	स्यो	स्वो
306	24	र्थसम्भ	र्थासम्भ
315	21	त्युक्तम्	ति युक्तम्
318	8	सम्बन्ध	सम्बन्धि
322	17	वाक्यता	वाक्यार्थता
327	2	वाभावात्	वासम्भवात्
336	13	मानान्तर	मानान्तरा
349	22	वरण	वरणा
362	4	धीत्युक्तम्	धि युक्तम्
		स्वरूपत्वात्	स्वरूपभेदरूपत्वात्
364	18	चाकाश	वाकाश
371	22	बाधक	नाबाधक
373	18	धीरूपे श	धीरूपश
375	19	रूपत्व	रूपस्य
377	18	त्वादि	त्वासि
377	21	स्वविषयाविषयक	स्वविषयक
382	18	प्रकारधी	प्रकारकधीविरोधि
383	22	धीप्रकारव्याव	व्याव
391	23	ताया	तया
409	6	रूपेण	रूपेण वर्तते, एकरूपेण
412	19	तदज्ञान	तत्तदज्ञान
413	18	प्रमायाः	प्रमया
414	15	ब्रह्मणो–तद	ब्रह्मणोऽधिष्ठानत्वात्तत्र तद

पुटम्	पङ्क्तिः	यथास्थितपाठः	पाठान्तरम्
414	18-19	भ्रमस्य-न व्य	भ्रमस्य स्वाव्यवहितो-त्तरानुमितित्वावच्छिन्नं प्रति कारणत्वेऽपि तादृशकारणत्वाभावा-द्धेत्वभावादेव न व्यभि-
419	19	तदवयवा	तत्तदवयवा
420	16	भाववं	भाव
422	9	तद्वृत्ति	तद्वद्वृत्ति
425	8	त्वम् न	त्वं परमते किमप्येक-त्वं न
426	9	स्व	स्वा
	10	स्व	स्वा
428	23	नाश	नाशा

शुद्धाशुद्धपत्रिका

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
1	3	नैन्द	नन्दै
5	20	बाध्यो	बाधयो
9	2	स एव	तदेव
	9	त्यनु	त्यननु
10	23	मेवे	मेवचे
13	21	ताभिन्न	त्वावच्छिन्न
14	8	ज्ञानेन	ज्ञाने
21	4	इदमादिना	इदमादिता
22	21	त्याद्युक्तं	त्यादि
25		सद्रूपव	सद्रूपत्वव
26	5	तादृगभे	तादृग्भे
28	18	मित	पित
29	14	त्मनो	त्मको
	16	त्वाभ्यां इति वा	त्वाभ्यामिवा
30	3	वृत्ति	वृत्त्य
	4	त्र त	त्रात
	23	प्रमा	प्रमात्वस्य स्वतस्त्वेन तत्र प्रयोजकाकल्पनात् प्रमा
31	6	युक्ते भे	युक्तेर्भे
	14	न च घ	स च घ
32	15	घटभाव	घटाभाव
33	2	त्वास	त्वस
36	23	तादात्म्य	तत्तादात्म्य
37	14	त्म्यसम्ब	त्म्ये सम्ब

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
39	9	निर्वाहः	न निर्वाहः
	20	सदित्ये	सदित्यत्रे
	21	वाच्छि	वावच्छि
40	9	नन्तरप्र	नन्तरं प्र
43	16	निर्धर्मिक	निर्धर्मक
47	25	असिद्धी	असद्धी
50	17	कार इति	कार इत्यपर इति
50	18	ज्ञानयो	ज्ञानायो
53	8	घटव	घटाद्यव
54	4	तत्प्रतियोगिनः प्रा	तत्प्रतियोगिनोऽप्रा
	13	प्रकारके	प्रकारते
55	4	नानु	नभ्रमानु
56	10	बाध	बोध
	19	.	निश्चयः । "बाधनात् । मिथ्यात्वनिश्चयात् । तथाच स्वसमानाधिकरणः स्वान्यूनसत्ताको योऽत्यन्ताभावस्तत्प्रतियोगित्वं मिथ्यात्वम् । प्रातिभासिकनिष्ठं यत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्, यच्च स्वसमानाधिकरणाप्रतिभासिकात्यन्ताभावप्रतियोगित्वं ब्रह्मावृत्ति 'तयोरन्यतरत्वं मिथ्यात्वमिति निष्कर्षः । पूर्णानन्दनिष्ठस्य पूर्णानन्दसम्बन्धिमनआदिनिष्ठव्यावहारिकात्यन्ताभावप्रतियोगित्वरूपस्य मिथ्यात्वरूपत्वाभावात् ब्रह्मावृत्तीति । शुक्तिरूप्यादेर्व्यावहारिकोऽत्यन्ताभावस्तु व्यावहारिकं तत्समानाधिकरणं तदत्यन्ताभावमङ्गीकृत्यैव मिथ्याकार्यः" । इति त्रुटितम् ।

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
59	2	मर्देन, पा	मर्देन पा
	20	विरोधत्व	विरोधित्व
60	3	तद्धीः त	तद्धीत
	4	वशा त	वशात्त
63	23		दोषः, विशेष्यताव्यक्तेः स्वरूपत एव निवेशेन बाध्यत्वादेरनिवेशात् इति त्रुटितम्
64	13	दृष्ट	दुष्ट

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
67	16		न दोषः । इदं व्यावहारि-
करजतमिति संस्कारस्य प्रयोजकत्वात् ।			इति त्रुटितम्
68	7	कारज्ञा	काज्ञा
	8	तत्ता	तत्तत्ता
72	9	कनि	के नि
89	16	द्वया	द्वय
96	10	निविष्ट	नि विशिष्ट
98	14	कार्ययोः ध्वं	कार्यध्वं
104	4	पूर्ववद्वै	पूर्ववै
105	3	मत्र	मत्र
106	15	प्रमाणत्वं	प्रमात्वं
	16	बाधित	तुच्छबाधित
107	16	सर्वमेव	सर्वं मेय
117	3	विनाऽख्या	विना ख्या
	6	र्यादिदू	र्याद्
118	6	रूपशू	रूपं, शू
119	23	अविद्यया न इ	अविद्यया इति
121	25	त्वेन वा	त्वेनाज्ञातत्वेन वा
124	22	त्वभावो	त्वाभावो
131	7	वृत्तिवि	वृत्तिर्वि
135	22	दित्यर्थः	दीत्यर्थः
136	9	विद्यादौ	बिन्द्वादौ
138	10	विषयक	विषय
139	22	घटितत्य	घटितस्येत्य
144	7	विषयाव	विषयताव
	23	ज्ञानस्य	अज्ञानस्य
145	22	क्तिजा	क्तजा
147	9	न वह्नया	वह्नया
148	17	कल्पने ना	कल्पनेना
151	3	घटज्ञा	घटाज्ञा
152	6	प्रकाश	प्रकाश्य

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
152	7	त्वं । अर्थो	त्वं। प्रकाशत्वं अर्थो
153	21	जकाविद्यो	जकाविद्यो
154	7	अन्या	जन्या
	12	पि स	प्यस
155	22	कत्वं तद	कत्वतद
157	11	निवेशस	निवेशास
160	1	त्वरूपे	स्वरूपे
162	9	त्यत्रो	त्यन्यत्रो
171	7	दूरदो	दूरत्वदो
172	16	पदक	पादक
173	5	तदात्म्या	तादात्म्या
174	1	दूरदो	दूरत्वदो
180	4	एतेनो	एतेन स्वो
	22	भाव	भावा
181	9	कमिति	क इति
182	10	समवेतस्य	समवेतत्वस्य
	21	आद्यो	आद्ये तदु
183	10	प्रतियोगि	प्रतियोगी
186	10	ज्ञानभिन्न	ज्ञानाभिन्न
	16	वत्सु	वस्तु
188	14	निश्चयत्वात्	निश्चयात्
193	2	वत्, सा	वत्सा
194	7	साध्या	साध्य
197	1	साधनत्वात्	साधनात्
	10	साध्याव्या	साध्यव्या
198	5	पक्षेतर	पक्षेतरत्व
	11	पक्षस्येव	पक्षस्यैव
199	15	विषयाव	विषयताव
	18	त्वेन । तत्र	त्वेन तत्र
205	7	णप्रवृत्तेःतद्विषय	णाप्रवृत्तेः प्रमाविषय
207	9	तात्विकस्य	तात्विकत्वस्य

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
213	4	दिक्स	दिकस
225	11		प्रसक्तम् । तज्ज्ञानत्वादि-

कमपि तद्व्यक्तिस्वरूपं न स्वरूपतोऽवच्छेदकतावच्छेदकत्वेन सर्व-सम्मतम् । इति त्रुटितम्

229	13	दघट इ	दकघट इ
232	2	विषयैव	विषयतैव
	20	त्वादधि	त्वाधि
233	15	ज्ञानं	ज्ञाने
234	8	दिति	दीति
	16	तदुक्त	तदुक्तौ
237	1	तत्रेव	तत्रैव
	18	ज्ञानस्य	ज्ञानत्वस्य
238	8	गित्वयोः	गित्वानुयोगित्वयोः
240	14	यादृश	तादृश
241	2	मानवि	मानत्वावि
246	15	कालवा	कालावा
	20	त्वमेव । तदुक्त	त्वमेव तत् । उक्त
249	7	तद्भिन्न	न तद्भिन्न
	9	बोध	ववोध
250	2	लिङ्ग	लिङ्गं
251	21	उपादाना	उपपादना
252	23	एव सर्वत्र सम्भवतीति स एव- इति त्रुटितम्	
254	17	प्राक् सत्वं ; अत	प्राक्सत्वमत
256	23	आरात्	कारात्
	24	स्थापि	स्यापि
259	1	क्वीचत्प्र	क्वच प्र
	18	त्वाचप्र	क्वच प्र
	23	गम्	गमम्
260	16	सत्यं, त्वगादिसंवादि सत्यं इति त्रुटितम्	
264	20	स्तूचितः	स्सूचितः
265	8	पारदै	पारदौ

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
265	14	कल्प	कल्पि
267	7	सामान्य	सामान्यस्य
	8	लक्षणया	लक्षणाया
	15	अत अतुव्य	अतोऽतुल्य
	23	न 'देव	'न देव
268	7	नाम न होमा	नामनहोमा
	24	विद्य	विध्य
269	4	त्राचि	त्र वि
	6	स्वारसिके	स्वारसिकी
270	14	पूर्वरू	पूर्वत्वरू
	22	अर्थवादक	अर्थवाद
271	5	स्य यु	स्यायु
	18	बहिर्ध	वर्हिर्ध
	19	लब्ध	बद्ध
	20	लब्ध	बद्ध
	21	लिङ्ग	अङ्ग
272	2	इत्यस्य	इत्यत्रत्यस्य
	14	मद्रं	मन्द्रं
	22	धर्मा	धर्माः
275	7	मिंयत	म्रियत
276	5	तस्य	कस्य
	22	सत	तत
279	9	वृत्तः, यो	वृत्तियो
	20	क्तिशे	क्तं शे
280	6	विषयया वा	विषयावा
282	18	रदै	रद्धै
	21	दक्षि	दीक्ष
283	3	क्षित	क्षिता
284	20	ज्ञात	ज्ञान
	22	वत्वम् । श	वत्वश
288	9	इति ;	इति, चेन्न ;

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
294	20	विषयप्रा	विषये प्रा
296	1	नैन्द्र	नेन्द्र
	15	यद्ब्राह्मणानि पञ्च हवींषि तद्रा	एतद्ब्राह्मणानि पञ्च हवींषि यद्रा
298	14	तादशद्धि	द्वादशद्धि
	16	सवनीया	सवनीयाः
	18	ऋीतः	ऋीत
299	6	वर्णीका	वर्णिका
	19	सूत्रोक्तोच्छे	सूत्रे उक्तोच्छे
302	1	वाध्यते वह्नयै	वाध्यत्वे वह्नयौ
	7	त्वेन	त्वेन न
303	16	पूर्वकखण्ड	पूर्वकाखण्ड
	17	त्यवे	यत्वे
304	15	जन्याप्र	जन्यप्र
	21	दपि प्र	दविप्र
306	6	कम् । त	कं त
	12	ग्निरा	ग्नेरा
	16	तनार्थ	तनेऽर्थ
	24	नाभास	नाभ्यास
307	13	द्धेर्वि	द्धे वि
	20	रूढत्वात् ; त	रूढत्वात्त
308	2	रूपेऽर्थे । तत्	रूपेऽर्थे तत् ।
	21	दिस्तु	देस्तु
310	12	रमिति कर	रम्, इतिकर
	21	इति	अमी
311	1	वप्रा	वाप्रा
	17	र्यानु	र्यस्यानु
	19	वत्रूप	त्वरूप
	22	मेत्या	म इत्या
312	20	त्वम् । ग्ये	त्वं ग्ये
314	3	दौ लोके, सोरोदीदित्यादौ इति त्रुटितम्	

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
316	23	पि बोधितस्य इति त्रुटितम्	
	24	कृत	कृत्य
318	10	मुख्या	अमुख्या
319	15	रूपमुख्या	रूपममुख्या
	20	तद्दोष	न दोष
320	3	लक्षणक	लक्षक
321	4	परम	किंतु परम
	8	तराप्रा	तरप्रा
323	4	नैव नामुख्यत्वमत्रै-वादि	नैवामुख्यार्थत्वं न त्वादि
325	6	दातुरुप	दात्रुप
326	1	वृत्तिवा	वति वा
		वाक्याति	वाक्यार्थाति
	16	मानान्तर	मानान्तरा
327	21	धात्वर्थ	तथात्व
328	8	कता	कवाक्यता
329	22	द्येन	द्ये न
330	19	प्रवृत्ति	प्रवृत्त
331	19	यदा	यद्वा
332	9	दक्षिणयोः	दाक्षिणायोः
	14	दिक्षिणा	दिदक्षिणा
333	11	पञ्चमे । दर्शे	पञ्चमेदर्शे
	19	दृष्टा	अदृष्टा
334	1	अथेत	यथेत
	6	प्रयोगस्य	प्रयोगस्थ
	13	निमित्तेऽ	निमित्ते
	24	यज्जातं	तज्जातं
335	11	रि दृश्यते ।	रि । दृश्यते च
	19	बाध्य	अबाध्य
336	1	न्तर	न्तरा-
	20	यद्यपि	यदपि

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
338	19	न व्या	न तद्या
341	5	तार्थवा	तार्थकार्थवा
	10	वपद	व तत्पद
342	12	जीव्यात्	जीव्या
	15	तथा	न तथा
347	8	ण्यापरि	ण्यपरि
348	3	कस्यपि	कस्यापि
351	25	श्रुत	श्रुते
352	2	विषयया	विषया
362	11	मान् इत्यादिबुद्धिसत्वे घटो न इति त्रुटितम्	
363	23	क्ष्यत्वं वृत्तिज्ञानाधीनविषयत्वं-इति त्रुटितम्	
364	4	यथाहि	यत्रहि
	6	मपि मनु	मपि यदा मनु
365	6	धर्म	धार्मि
	9	णज्ञा	णाज्ञा
371	5	णं फ	णफ
	6	मिति	मपि
374	23	स्वरूपक्रिया	स्वक्रिया
375	25	कमिॉत	कत्वमिति
377	8	रनु	रननु
378	10	विषयः	विषयैः
382	6	मतवा	मतावा
	17	दित्युक्तम्	दित्थमुक्तम्
383	4	पृथ	अर्थगतं पृथ
	6	जन्यं कृति	जन्यकृत्य
	19	कारस्य ह	कारह
387	14	ससम्भ	सासम्भ
		णघटि	णाघटि
		च्छे	च्छेद्
389	1	ब्रह्म वि	ब्रह्मवि
	2	त्रह्म वि	ब्रह्मवि

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
390	15	व्यावृत्त्य	वृत्त्य
391	4	भावाधि करण	अभावाधि करणत्व
	8	न्यत्वाभा	न्याभा
	19	भिन्नाव	भिन्नानव
393	3	साध्य	साध्या
	4	हेतु	हेत्व
	7	त्वात् । सा	त्वात् सा
	9	त्वात् । अ	त्वाद्
	10	न भवतः	भ्रमौ भवतः
	11	स्येव	स्यैव
394	3	मिथ्यात्वेनैव	मिथ्यात्वेनैव
	6	स्यात्	स्यात् । न ;
	12	विषयका	विषयः का
	18	ज्ञानत्व	ज्ञानवत्व
395	2	तत्र व्यभिचारात् । अथ तत्र इति त्रुटितम्	
	7	अर्थने	अर्थेने
396	9	ननु	ननु ज्ञाने
397	7	व्यापक	व्याप्य
	18	कसि	कत्वसि
398	6	कल्पेन	कत्वेन
	8	विषयभा	विषयत्वभा
399	2	क्षण्या,	क्षण्या
404	5	तदा	चेदा
	17	त्वे प्रा	त्वेऽप्रा
405	16	त्व	त्वं
428	3	भावव	भाव
	13	पकं	पकत्वं
431	16	रूपकं	रूपकत्वं
448	6	तथादे	तदादे
460	4	ज्ञानादा	ज्ञानदा

सव्याख्या अद्वैतसिद्धिः.

अ द्वै त सि द्धि : .

मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः ।
मिथ्याबन्धविधूननेन परमानैन्दकृतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥
श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानाम् ।
स्पर्शेन निर्धूततमोरजोभ्यः पादोत्थितेभ्योस्तु नमो रजोभ्यः॥
बहुभिर्विहिता बुधैः परार्थं
विजयन्तेऽमितविस्तृता निबन्धाः ।
मम तु श्रम एष नूनमात्मंभरितां भावयितुं भविष्यतीह ॥
श्रद्धाधनेन मुनिना मधुसूदनेन
संगृह्य शास्त्रनिचयं रचिताऽतियत्नात् ।
बोधाय वादिविजयाय च सत्वराणां
अद्वैतसिद्धिरियमस्तु मुदे बुधानाम् ॥

तत्राद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम् । उपपादनं च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवतीति तदुभयं वादजल्पवितण्डानामन्यतमां कथामाश्रित्य सम्पादनीयम् । तत्र विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वात् मध्यस्थेनादौ विप्रतिपत्तिः प्रदर्शनीया। यद्यपि

विप्रतिपत्तिजन्यसंशयस्य न पक्षतासम्पादकतया उपयोगः, सिषाधयिषाविरहसहकृतसाधकमानाभावरूपायास्तस्याः संशयाघटितत्वात् । अन्यथा श्रुत्यात्मनिश्चयवतोऽनुमित्सया तदनुमानं न स्यात् वाद्यादीनां निश्चयवत्त्वेन संशयासम्भवादाहार्यसंशयस्यातिप्रसंजकत्वाच्च । नापि विप्रतिपत्तेः स्वरूपत एव पक्षप्रतिपक्षपरिग्रहफलतया उपयोगः, त्वयेदं साधनीयमनेनेदं दूषणीयमित्यादिमध्यस्थवाक्यादापि तल्लाभेन

गुरुचन्द्रिका.

सदनन्ताचिदानन्दे जगती यत्र जायते ।
रजतादीव शुक्त्यादौ तदेवाहं परा गतिः ॥
तत्त्वं वेदय वेदगं नरहरे नैषोऽधिकारीति चेत्
स्तम्भादाविरभूः कुतोऽसुरतमश्चण्डांशुतामाश्रितः ।
द्रोहेणापि न ते स्मरत्ययमतो नेहानुकम्पेति चेत्
तत्किं त्वं न तदीश यद्यदनिशं स्नेहादितस्स्मर्यते ॥
सरस्वती[1] स्वामिमहा सरस्वती[2] सरस्वती[3] स्वामिमहा सरस्वति[4]।
निस्सार्य सारस्वतसारिकार्यं सारस्वतः सारसतर्करत्नम् ॥
श्रीनारायणतीर्थ श्रीपरमानन्दपादयोः ।
ब्रह्मानन्दयतिर्नत्वा तनोत्यद्वैतचन्द्रिकाम् ॥
सारस्वतसमुद्रेकश्चन्द्रिकायाः परं फलम् ।
प्रासङ्गिकतया ध्वान्तपराभूतिरपि ध्रुवा ॥
कुमुद्वतीर्बोधयामि सारस्वतसरस्वतीः ।
महदामोदमोदाय चित्त[5]चन्द्रिकयाऽनया ॥

---

[1] मधुसूदनसरस्वती. [2] नदी. [3] वाणी. [4] समुद्रे. [5] पाठान्तरं (चित्र.)

विप्रतिपत्तिवैयर्थ्यात् । तथापि विप्रतिपत्तिजन्यसंशयस्यानुमित्यनङ्गत्वेऽपि व्युदसनीयतया विचाराङ्गत्वमस्येव तादृशसंशयं प्रति विप्रतिपत्तेः क्वचिन्निश्चयादिप्रतिबन्धादजनकत्वेऽपि

अनुमित्यनङ्गत्वे अनुमितिं प्रत्युक्तरीत्या प्रयोजकत्वाभावे । व्युदसनीयतया विचारप्रयुक्ताभावप्रतियोगितया । विचाराङ्गत्वं विचारप्रवृत्तिप्रयोजकज्ञानविषये फले प्रतियोगितया विशेषणत्वम् । मिथ्यात्वसंशयाभावरूपफलं ज्ञात्वा तदुद्देशेन विचारे प्रवर्तत इत्यर्थः । पञ्चावयवसपरिकरन्यायरूपविचाराभावे हि मिथ्यात्वस्य अनिश्चयात्संशयः । ततश्च सन्दिग्धाद्वैततात्पर्यसंशयरूपाद्दोषादेकमेवाद्वितीयमित्यादिवेदान्तवाक्यादपि संशय एव जायते न निश्चयरूपाद्वैतासिद्धिः । ततश्च तत्त्वमस्यादिवाक्यादपि नाद्वैतब्रह्मणि जीवैक्यनिश्चयः, अद्वैतब्रह्मण एवानिश्चयात् । यद्वा—अस्तूक्तवाक्यान्निश्चय एव, प्रत्यक्षस्यैव संशयत्वात् । तथापि वियदादिप्रपञ्चमिथ्यात्वसंशये तद्विरोधिब्रह्मात्मैक्येऽपि मिथ्यात्वसंशयः । ततः औचित्यावर्जितो मिथ्याविषयकत्वरूपाप्रमात्वस्य तत्त्वमस्यादिवाक्यजे उक्तैक्यज्ञाने संशयः । तथाच निश्चयरूपस्याप्रमात्वेन अग्राह्यस्य वा उक्तैक्यज्ञानस्येष्टस्य विरोधितया, सुखविरोधितया सुखविरोधिनीव, प्रपञ्चमिथ्यात्वसंशये द्वेषो, द्विष्टाभावतया च तदभाव इष्टः । मिथ्यात्वनिश्चयद्वारा तत्प्रयोजकतया च विचार इष्टः । यद्वा व्युदसनीयतयेति इष्टतावच्छेदकीभूतभेदप्रतियोगितयेत्यर्थः । संशयान्यमिथ्यात्वज्ञानत्वं हि इष्टतावच्छेदकं उक्तैक्यज्ञानरूपेष्टविरोधिमिथ्यात्वसंशयाविरोधितावच्छेदकत्वेन सुखविरोधि विरोधितावच्छेदकतद्गृहत्वादिवत् सर्वदा विप्रतिपत्तिरावश्यकी तां विना संशयस्य अनुत्पत्तौ विशेषणस्य संशयस्य ज्ञानाभावे संशयाभावरूपफलज्ञानाभावेन तदुद्देशेन प्रवृत्त्यसम्भवादिति भावः ।

स्वरूपयोग्यत्वात् बाध्यादीनां च निश्चयवत्त्वनियमाभावात्। निश्चितौ हि वादं कुरुत इत्याभिमानिकनिश्चयाभिप्रायं परपक्षमालम्ब्याप्यहंकारिणो विपरीतनिश्चयवतो जल्पादौ प्रवृत्तिदर्शनात्। तस्मात् समयबन्धादिवत्स्वकर्तव्यनिर्वाहाय मध्यस्थेन विप्रतिपत्तिः प्रदर्शनीयैव। तत्र मिथ्यात्वे विप्रतिपत्तिः—

स्वरूपयोग्यत्वादिति। "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थानाच्च विशेषापेक्षो विमर्शस्संशयः" इति न्यायसूत्रस्य साधारणधर्मरूपसमानधर्मस्य असाधारणधर्मरूपानेकधर्मस्य वा ज्ञानात् विप्रतिपत्तिवाक्याद्वा विशेषधीरूपोपलब्धेः बाधाभावरूपानुपलब्धेरितरकोटिव्याप्यादर्शनरूपाव्यवस्थानाच्च धर्मिज्ञानरूपविशेषापेक्षो विरुद्धनानाकोटिज्ञानरूपविमर्शः संशय इति व्याख्याने संशयो विप्रतिपत्त्यादिजन्य इति यथाश्रुतार्थमाश्रित्येदम्। विप्रतिपत्त्यादिप्रयोज्यः स इत्यर्थे तु विशेषणधीविधया संशयस्वरूपयोग्यकोटिद्वयोपस्थितिजनकपदघटतत्वादित्यर्थः। तथाच यत्र विप्रतिपत्तेः संशयस्य जननद्वारा न ज्ञापकत्वं तत्र सम्बन्धितया संशयस्मारकतया उपयोग इति भावः। बाध्यादीनामिति। तथाच वादिनोर्मध्यस्थस्य च निश्चये तदन्येषां सभापत्यादीनां संशयापसरणं फलम्। तेषामपि निश्चये त्वाह—तस्मादिति। समयः सिद्धान्तस्तस्य बन्धो विचाराश्रयतया नियमः एतन्मत एव त्वया वाच्यमित्याकारः। स्वकर्तव्येति—कथकसम्प्रदायानुल्लङ्घनरूपेत्यादिः, विचारे प्रवृत्तिस्तु विजयादिफलेनेति भावः।

प्रलपितमिह मन्दैर्मन्दधीबन्धुबन्धं[1]
श्रुतसमितसमाजे मन्दमन्दाक्षदक्षम्।

---

[1] बद्धं (पा)

ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा, पारमार्थिकत्वाकारेणोक्तनिषेधप्रतियोगि न वेति ।

कथमथ कथयामो दूषितं[1] तत्तथापि
स्मितमितकुतुकार्थानर्थतश्श्रावयामः ॥

अत्रोक्तं वाद्यादीनां विशेषदर्शनात्क्वापि संशयं प्रत्यनुपधायकत्वात्स्वरूपयोग्यैव विप्रतिपत्तिः । वाद्यादीनां विशेषदर्शनं च कथापूर्वं समयघटकत्वज्ञापकपरीक्षादिना सिद्धम् । परपक्षमालम्ब्य अहंकारिणः प्रवृत्तिः ख्यात्याद्यर्था । व्युदसनीयतया सभ्यादेः संशयोऽपेक्षितोपि वादिनोः प्रत्येककोट्युक्तिभ्यां भविष्यति, किं विप्रतिपत्त्येति । तत्र वाद्यादेः निश्चये त्वया शपथेन निर्णीतेप्यन्यत्र संशयोपधानसम्भवेन स्वरूपयोग्यत्वाक्षतेः कथापूर्वभापातपरीक्षया निश्चयानुमितावपि निश्चयानावश्यकत्वात् । स्वरूपसन्निश्चयो हि विरोधी, न तु तस्य ज्ञानम् । क्वचित्ख्यात्याद्यर्था प्रवृत्तिस्तु मयापि सम्मता । सभ्येषु संशयस्य विप्रतिपत्तिं विना उक्तिस्तु व्यर्था । न हि संशयोऽपेक्षितः, अपितूक्तरीत्या प्रवृत्तिप्रयोजकफलविशेषणतया तद्धीः । सा च कथाप्रवृत्तेः पूर्वं वादिनोर्विप्रतिपत्त्यैवोक्तरीत्या सम्भवति, सभ्यानामपि निश्चये वादिभ्यां निश्चितेऽपि विजयाद्यर्थमेव तयोः प्रवृत्तिरित्युक्तं, वादकथायामेव तत्त्वनिर्णयफलनियमात् । **ब्रह्मप्रमातिरिक्ताबाध्यत्वे** इति । तादृशबाध्यत्वं तादृशबाध्ययोग्यत्वं पल्लवाज्ञानतत्कार्यान्यतरत्वम् । तेन न ब्रह्मप्रमापूर्वमबाधितप्रातिभासिकविशेषे सिद्धसाधनतादवस्थ्यम् । पल्लवाज्ञानानङ्गीकारे तु प्रातिभासिकान्यत्वमेव सत्यन्तार्थः । तुच्छब्रह्मणोः बाधासिद्धिवारणायान्यविशेषणे । यत्तु

---

[1] दूषणं

अत्रच पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धे रुद्देश्यत्वात् पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति मते

ब्रह्मत्वतुच्छत्वावच्छेदेन साध्यहेत्वोरभावधीः अन्यपक्षतावच्छेदकावच्छेदेन साध्यहेतुज्ञानं न विरुणद्धीति न बाधासिद्धी, किंतु अनुमितेर्भ्रमत्वं स्यात् । अतोऽन्यविशेषणे इति, तत्तुच्छम् । अवच्छेदकावच्छेदेन अनुमितेरुद्देश्यतायां सत्यन्ताभावेन[1] पक्षतावच्छेदकीभूतेतरविशेषणद्वयान्यतरावच्छेदेनानुमितौ तत्सामानाधिकरण्येन ब्रह्मतुच्छयोः साध्यहेत्वभावधियोर्विरोधित्वेन बाधासिद्ध्योरावश्यकत्वात् । पक्षतावच्छेदकसामानाधिकरण्येन अनुमितेरुद्देश्यत्वे तु अबाध्यत्वान्तमेव पक्षतावच्छेदकम् । अन्यथा वियदादावेव सामानाधिकरण्येनानुमितेः प्रमात्वसम्भवात् भ्रमत्ववारणस्यापि उक्तविशेषणफलत्वासम्भवात् । यदपि शुक्त्यादिज्ञानमपि ब्रह्मप्रमेति शुक्तिरजतादौ सिद्धसाधनम् । शुद्धं ब्रह्म न विषय इति मते वियदादेरपि ब्रह्मप्रमान्यबाध्यत्वात् पक्षालाभश्च । अतः सप्रकारकेति ब्रह्मप्रमातरिक्तस्थानीयं वाच्यमिति । तदपि तुच्छम्, शुक्त्यादिज्ञानस्य शुक्त्याद्यवच्छिन्नचिद्विषयकत्वेऽपि शुद्धचिदविषयकत्वात् । अन्यथा हि ब्रह्मप्रमान्यबाध्यत्वाप्रसिद्धिरेव वाच्या स्यात्, न सिद्धसाधनम् । ब्रह्मप्रमापदेन ब्रह्मान्याविषयकोक्तौ सिद्धसाधनाभावाच्च । शुद्धं ब्रह्म न विषय इति मतेऽपि वृत्त्युपहितब्रह्मान्याविषयकस्योक्तावदोषात् । किंच नायं स इति भेदादेः सोयमित्यादिनिष्प्रकारकेण बाध्यत्वात्तव कथं न सिद्धसाधनम् । यद्यपि शुक्तिरजतादौ सिद्धसाधनं वाच्यम् न तार्किकेण नाप्यानन्दतीर्थीयेन । तेन तत्रासद्विलक्षणत्वानङ्गीकारेण अर्हतैनैव तद्वारणात्, सदसद्विलक्षणत्वादिसाध्यस्य

[1] भावेऽपि

शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतराबाध्यत्वं पक्षविशेषणम्। यदि पुनः पक्षतावच्छेदकावच्छेदेनैव साध्यसिद्धिरुद्देश्या, तदैकदेशे साध्यसिद्धावपि सिद्धसाधनाभावात् तद्वारकं विशेषणमनुपादेयम्। इतरविशेषणद्वयं तु तुच्छे ब्रह्मणि च

तेन तत्रानङ्गीकाराच्च। तथापि भास्करादिभिः शुक्त्यादौ सत्यरजतादि जायत इत्यङ्गीकारात् तदनुयायिना केनचिद्बाधदर्शनान्मिथ्येति वक्तुं शक्यमिति तं प्रति विप्रतिपत्तौ अबाध्यत्वान्त देयम्। यत्तु भास्कराद्यन्यैराकांक्षिते प्रयोजने तेन रूपेण विशिष्टे साध्यसिद्धिः प्रयोजनं वाच्यमिति तन्न, तेन रूपेण विशिष्टे साध्यं साधयसि कुत इत्याकांक्षायां उक्तप्रयोजनोक्तेः सचेतसामनुचितत्वात्। तुच्छ इति। नचानिर्वाच्ये सत इव सत्यपि तुच्छस्य संसर्गतया आरोपसम्भवात् सत्त्वेन प्रतीत्यर्हं तुच्छमपीति वाच्यम्। परस्पराध्यासानुरोधेन अनिर्वाच्ये सत्तादात्म्याध्यासेऽपि तुच्छतादात्म्यस्य सति आरोपे मानाभावात्सत्तुच्छमित्यप्रतीतेः। एतत् ज्ञापयितुमेव सदभिन्नमित्यनुक्त्वा तत्समानार्थकमप्यर्हान्तमुक्तम्। अथानिर्वाच्येऽपि कुतस्सत्तादात्म्यम्, तद्विना सच्चिद्भास्यत्वानुपपत्तेरितिचेत्, तर्हि तत्रापि तदनन्तरमेवं तत्रापीत्यनवस्था। स्वरूपसम्बन्धेन भास्यत्वोपपादनं तु सर्वत्र समामितिचेत् अत्र ब्रूमः—ज्ञानाकाररजतादौ शुक्त्यादिगतेदंत्वादिसंसर्गाध्यास इति केचित् बौद्धाः, इदंत्वादिविशिष्टे रजतादिसंसर्गाध्यास इत्यन्यथाख्यातिवादिनः केचित्। तयोः मतयोः ज्ञानाद्याकाररजताद्यंशस्य अप्रामाणिकत्वेऽपि तत्स्वीकृतयोः रजतामिदं इदं रजतमित्याद्याकारयोः वक्ष्यमाणरीत्या भिन्नविषयकत्वादिमतोः अविनिगम्यत्वात्। रजतादिसंसर्गमात्रे अध्यस्ते रजतादेरपरोक्षत्वायोगात्। इदमादेश्च स्वाकारवृत्तिनिर्गमेनापरोक्ष्यस्य सम्भ-

वात्, तत्संसर्गस्य रजतादेश्चाध्यास आवश्यकः । तथाचानुभवस्य इदं रजतमित्यादेर्विनिगन्तुमशक्यत्वादुभयाध्यासत्वसिद्धावप्यननुभूयमानस्य तुच्छे सत्तादात्म्यस्य सति तुच्छतादात्म्यस्य वाऽध्यासो न प्रामाणिकः ॥

यत्तु नेदं रजतमित्यस्य रजततन्निष्ठेदंत्वसंसर्गयोः बाधकत्वे गौरवात् रजतबाधकत्वं नेति रजतं नाध्यस्यत इति विनिगमकं भामत्यामुक्तम् । तदौपनिषदं प्रति, नतु रजतसंसर्गमात्राध्यासवादिनं प्रति । तेन रजतादाविदन्त्वसंसर्गाध्यासानभ्युपगमात् अनध्यस्तबाधकत्वमभ्युपेत्य दूषणे, इदन्त्वादिधर्मस्य परंपरया ज्ञानाकारे साक्षात्तद्धर्मे वा बाधकत्वमभ्युपेत्य तन्मतेऽपि दूषणसम्भवात् । न च 'रजतमिदं इदं रजतं' इत्याद्युभयाकारसर्वभ्रमाणामिदंत्वादिसंसर्गाध्यासेनैव उपपत्तावितमादितादात्म्यं नाध्यस्यतामिति वाच्यम् । भ्रममात्रस्य उभयाकारतायाः धर्मसंसर्गस्य धर्मितादात्म्यस्य वाऽध्यास इत्यस्याविनिगम्यत्वात् । भ्रमकाले इदन्त्वादिमद्भेदस्यापि रजतादावावृतत्वात् । अन्यथा इदंत्वादिसंसर्गाध्यासस्याप्यसंभवात् । तस्यानावृतत्वे तु धर्मप्रतिबिम्बाध्यासस्यैवाङ्गीकारात् तस्यैव विशेषदर्शनाविरोधित्वात् । एतदभिप्रायेणैव भामत्यादौ धर्मितादात्म्याध्यासलौहित्यप्रतिबिम्बाध्यासाभावान्यतरनियमो धर्माध्यासस्य उक्तः । एवंच घटस्सन्नित्यादौ सदादिसंसर्गस्येव सदादितादात्म्यस्यापि घटादावध्यासः । न च भ्रममात्रस्य द्व्याकारतैव नेति वाच्यम् इदं रजतं रजतमिदं, द्रव्यं रूपादिमत्, अहं सुखादिमान-नित्यप्रेमास्पदं इत्यादिरूपेण द्व्याकारत्वस्यानुभाविकत्वात् । रजतत्वादिविशिष्टस्यैव प्रातीतिकस्योत्पत्त्या तत्रेदंत्वद्रव्यत्वरूपादेरात्मनि सुखानित्यत्वादेरहंकारे प्रेमास्पदत्वादेः संसर्गाध्यासावश्यकत्वात् । अथ घटस्सन्नित्यादौ घटादेरेवाध्यासः नतु तत्र सत्तादात्म्यस्य, द्व्याकारता तु अविद्यानिष्ठसत्तादात्म्यस्य अविद्यापरिणामेऽपि सत्त्वादितिचेत् न, घटा-

दिरविद्यापरिणामः तत्र सत्तादात्म्यमविद्यागतं भाति, अनाविद्यकमेव वा घटादौ सत्तादात्म्यमविद्यापरिणामे जायते तत् स एव अविद्यायामपि भातीत्यविनिगम्यत्वात्। 'मायां तु प्रकृति' मित्यादिश्रुतेः सत्तादात्म्यविशिष्टं जन्यमात्रं मायोपादानकमित्यर्थसम्भवात् पञ्चमप्रकार [1] निवृत्तेः कार्यत्वेन तदवच्छेदेनाविद्यापरिणामत्वसम्भवात् तादात्म्यत्वरूपाखण्डधर्मावच्छेदेन तत्सम्भवात्। अज्ञानतत्सम्बन्धादौ जन्यनिष्ठसत्तादात्म्येनोपपत्तेः। न चाविद्यानिष्ठस्य सत्तादात्म्यस्य घटादौ भाने अन्यथाख्यात्यापत्तिः। एकमेव तादात्म्यम् सर्वत्रानादित्युक्तिस्तु तुच्छा, घटादिः तत्तादात्म्यं च नष्टमित्यनुभवात्। अन्यथा समवायैकत्वं सिद्धान्ते दुष्टं न स्यात्। अतः अविद्यातादात्म्यमपि घटादावङ्गीकृत्य स्वाश्रयतादात्म्यसंम्बन्धेन सत्तादात्म्यं सन् घट इत्यादौ भातीति मयोच्यते, त्वया तु घटादितादात्म्यमविद्यायामङ्गीकृत्य घटादिस्थं सत्तादात्म्यमुक्तसंबन्धेन सत् अज्ञानमित्यादौ भातीति यद्युच्यते तदा घटादौ सत्तादात्म्यानामविद्यायां घटादितादात्म्यानां च अनन्तानामङ्गीकारादौरवमिति वाच्यम्। सत्तादात्म्यं घटादिस्थं कारणत्वसम्बन्धेन अविद्यायां भातीति अविद्यानिष्ठघटादितादात्म्यानां मया अनङ्गीकारात्। तर्ह्यविद्यास्थं सत्तादात्म्यं स्वाश्रयकार्यत्वसम्बन्धेन अविद्याकार्यमात्रे ममापि भातीति नाविद्यातादात्म्यं घटादौ मयाऽप्युच्यत इति चेत् न। उक्ततादात्म्यं विना अविद्याकार्यत्वस्यैव घटादावसम्भवेन तव तदावश्यकत्वात्। तर्हि तवापि सत्तादात्म्यस्य अविद्यायां तादात्म्यमनंतमावश्यकमिति चेन्न। तादात्म्यस्याविद्यायां तादात्म्यान्तराननुभवेन स्वरूपमात्रं सम्बन्धः तादात्म्यभिन्नस्य तु स्वरूपातिरिक्त एव सम्ब-

---

[1] ब्रह्मस्वरूपेति, तदतिरिक्ता सतीति, असतीति, सदसद्विलक्षणेति, अन्येति च पञ्चप्रकारा मुक्तिः.

बाधवारणायादरणीयमेव । प्रत्येकं वा विप्रतिपत्तिः—विय-

न्धोऽनुभवानुरोधात् । स्वस्य स्वप्रतियोगिकसम्बन्धत्वमनुपपन्नत्वादनिर्वाच्यं परं इत्यस्य त्वयाप्यङ्गीकारात् । अन्यथा सदविद्ययोः कपालघटयोश्च स्वरूपं सम्बन्ध इत्युक्त्वा तादात्म्यमात्रं कुतो नापलप्यते । किंचैवमप्येकाकारप्रतीतेः क्वचित्साक्षात् क्वचित्परम्परासम्बन्धो विषय इत्ययुक्तम् । अन्यथा सत्ताद्रव्यत्वादिजात्या सदाकारतोपपत्तौ सत्तादात्म्यवैयर्थ्यात् । इदं रजतमित्यादौ इदमादितादात्म्यबुद्धेः देहादौ प्रेमास्पदत्वानित्यत्वचेतनत्वादिबुद्धेरुक्तरीत्या कथमप्युपपादनासम्भवाच्च । अथेदमादितादात्म्यं न तत्र भाति किंत्विदमाद्यवच्छिन्नमविद्यानिष्ठं सत्तादात्म्यम् । नचैवमपि घटस्सन् अज्ञानं सदित्यादिबुद्धिषु साक्षात् परम्परासम्बन्धभेदेन एकाकारताविरोधः । सत्तादात्म्यवत् तादात्म्यस्य सत्तादात्म्यतदाश्रयकार्यत्वान्यतरस्य वा सर्वत्र विषयताभ्युपगमात् । एवंच तुच्छे तदभावेन प्रकृतसङ्गतावपि तादात्म्यं घटशुक्तिरजतादौ सदिदमादेर्जायत इत्यौपनिषदोक्तिव्याघात इति चेन्न । अविद्यानिष्ठस्य सत्तादात्म्यस्य रजतादाविदमादिसम्बन्धतया भानासम्भवात् । न हि रजतमिदमिति धीर्विशेष्यविशेषणयोः परम्परासम्बन्धमवगाहते, अपितु तादृशप्रमेव साक्षात्सम्बन्धं, अन्यथा तद्विषयकप्रवृत्त्यादिकार्याणां ततोनुपपत्तेः । एवमप्युक्ततादात्म्यमात्रेण द्व्याकारत्वानिर्वाहाच्च । अविद्यानिष्ठोक्ततादात्म्यस्य तत्परिणामे रजतादौ भानेन रजतमिदमित्याद्याकारस्य निर्वाहेऽपि इदं रजतमित्याद्याकारस्य न निर्वाह इति द्व्याकारतानुरोधेन रजताद्यवच्छिन्नस्य इदमादितादात्म्यस्य उत्पत्तेः आवश्यकत्वात् । न च तदपि तादात्म्यमविद्यागतमेवेत्यनादीति वाच्यम्, इदं न जानामीतिवत् रजतं न जानामीत्यनुभवस्य अभावात् । रजतं रज्जमेवेति न जानामीति धीस्तु रजतादिप्रयोजकाज्ञानमवगाहते, अन्यथा इतिशब्दोल्लेख-

न्मिथ्या न वा पृथिवी मिथ्या न वेति। एवं वियदादेः

वैयर्थ्यात्। न च रजताद्यवच्छिन्नस्येदमादितादात्म्यस्य उपादानं रजताद्यवच्छिन्नसत्तादात्म्यकमज्ञानमवश्यं वाच्यम्। तथाचाज्ञाननिष्ठैनैव तादात्म्येन ह्याकारत्वादुक्तधियोऽपि तदेव विषयो निर्णीयते। इतिशब्दस्तु रजतादिप्रत्येकावच्छिन्नत्वलाभायेति वाच्यम्। इदमादिनिष्ठसत्तादात्म्यं प्रतीत्य तदन्यथानुपपत्त्या कल्प्येनाज्ञाननिष्ठतादात्म्येनेदमादिनिष्ठस्य तस्यापलापे उपजीव्यविरोधात् उक्तधियोऽपि सन्दिग्धार्थत्वात्। न च द्वयोर्द्वयंशेन [1]विशेष्यत्वादेव ह्याकारता न तु विषयभेदो भूतलं घटवत् घटो भूतलीय इतिवदिति वाच्यम्। विषयाभेदेऽपि ज्ञानवैलक्षण्ये पृथग्विषयलोपापत्त्या साकारवादापत्तेः। भूतलावच्छिन्नघटसम्बन्धस्य घटावच्छिन्नभूतलसम्बन्धस्य च विषयस्यैव दृष्टान्ते भेदाद्विशेष्यावच्छिन्नविशेषणसम्बन्धस्य प्रमायामपि वक्ष्यमाणरीत्या भानात्, विशिष्टस्यातिरेकाच्च घटभूतलसंयोगा इति समूहालम्बने तस्याविषयत्वात्, सिद्धान्ते तथैवाङ्गिकाराच्च। अपिच अनुव्यवसायमात्रस्य मिथो अवच्छेद्यावच्छेदकभावापन्नविशेष्यताप्रकारतोभयग्राहकत्वं तार्किकादिभिरुच्यते, तथाच विशेष्यतावच्छिन्नप्रकारत्वं, प्रकारतावच्छिन्नविशेष्यत्वं चेत्याकारद्वयं सविशेष्यकज्ञानमात्रे भ्रमत्वेनास्मदभिमते निर्विवादमेव। इयांस्तु विशेषः—यत् मन्मते वक्ष्यमाणरीत्या तादृशी ह्याकारता चैतन्यनिष्ठा, चैतन्यग्राह्या च, चैतन्याभेदारोपात् जन्यज्ञाने व्यवह्रियते। तन्मते तु जन्यज्ञाननिष्ठानुव्यवसायग्राह्येति। तथाचोक्ताकारद्वयं भिन्नविषयघटितमित्यपि प्रामाणिकम्। तथाहि भ्रमस्थले परेषामिव नास्माकमुभयविशेष्यकं जन्यज्ञानं धर्मिधर्मयोरेकैकमात्रविषयकयोः ज्ञानद्वयांगीकारेणापि

---

[1] द्वयंशे.

प्रत्येकं पक्षत्वेऽपि न घटादौ सन्दिग्धानैकान्तिकता, पक्षसम-

भ्रमकारणत्वेन पराभिमतयोरिवै कैक [1]विशेष्यकजन्यज्ञानस्याप्यनङ्गीकारात् उभयविषयकैकज्ञानोत्पत्तिपक्षेऽपि तत्र संसर्गविषयकत्वानङ्गीकारेण एकस्याप्यविशेष्यत्वात् पक्षान्तर इव तत्पक्षेऽपि संसर्गस्य साक्षिभास्यत्वौचित्यात्। संसर्गतदुपहितेदमादिरजतादिष्वविद्यावृत्तिविषयतानामाकाराख्यानां वक्ष्यमाणरीत्या स्वीकारेऽपि मिथोवच्छेद्यावच्छेदकभावे मानाभावात् भ्रमत्वेनैव पल्लवाविद्याकार्यत्वस्य वक्ष्यमाणत्वेनैकविषयतावच्छिन्नान्यविषयताकभ्रमत्वेन अकार्यत्वात् इदं रजतादितादात्म्याकारधीत्वादिनैव संस्कारादिकारणत्वादहं सुखीत्यादौ वृत्त्यनङ्गीकारेण चिद्वृतेनैव विशेष्यतावच्छिन्नप्रकारत्वेन तदनुभवस्य निर्वाह्यत्वेन सर्वत्र तथैव सम्भवात्। वृत्तौ तत्स्वीकारे मानाभावात्। नित्यज्ञानं च यद्यप्युभयविशेष्यकं, अवच्छेदकीभूतो हि चिच्चैत्यसम्बन्धो विशेष्यता, अत एव सौषुप्तानुभवो निर्विशेष्यकत्वात् निर्विकल्पकः, अज्ञोऽहमित्यादिस्तु सविशेष्यकत्वात् तदन्यः, तथापि पूर्वसिद्ध इदमादिचित्सम्बन्धो रजतादिचित्सम्बन्धेऽवच्छेदकतया अवच्छेद्यतया च न भातुमर्हति, मूलावच्छेदेन संयोगी, संयोगावच्छेदेन मूलीत्यननुभवात्। तद्विलक्षणावच्छेदकत्वे प्रकृते मानाभावात्। अत एव परेषां विशेष्यताप्रकारतयोः मिथोऽवच्छेद्यावच्छेदकत्वं स्वकपोलकल्पितम्। न चाविनिगम्यत्वात् तथा, मूले संयोगीत्यादाविव अनुभवस्यैव विनिगमकत्वात्। अतो द्वितीय इदमादिचित्सम्बन्धो जायमानो अवच्छेद्यतयैव भासत इत्यावश्यकम्। तदुपादानाज्ञानं तु भ्रमकाले रजतादिचित्सम्बन्धावच्छेदेन न चितं सम्बध्नाति रजतं न जानामीत्यननुभवात्[2]। नापि पूर्व[3] भ्रमकाले अज्ञानसम्बन्धस्याननु-

[1] रिवाक्कैक. [2] त्याद्यननुभवात् [3] पूर्वं भ्रम

त्वात् घटादेः । तथाहि पक्षे साध्यसन्देहस्यानुगुणत्वात् पक्ष-

भवात् अभावेन भिन्नकालावच्छिन्नयोरवच्छेद्यावच्छेदकभावासम्भवात् । अतः पूर्वसिद्धेदमादिचित्सम्बन्धावच्छेदेनैव तां सम्बध्नाति । अतो रजतं न जानामीत्यादेर्नापत्तिः । ननु भ्रमस्थले रजताद्य[1]वच्छिन्नतादात्म्येन[2] कथं रजतमिदमित्याकारः । न हि प्रमास्थलीयतदाकारतः स विलक्षण इति चेन्न । प्रमास्थलेऽपि तादृशतादात्म्येनैव तदाकारस्वीकारादावश्यकेन रजतादिसम्बन्धावच्छिन्नेन इदमादितादात्म्येन चिन्निष्ठेनैव रजतमिदमित्याद्याकारोपपत्तौ रजतादिनिष्ठस्येदमादितादात्म्यस्य कल्पने गौरवात् । तदवच्छिन्नस्यैव तत्र सम्बन्धत्वसम्भवात् । तथाच विशेष्यविशेषणयोः परस्परावच्छिन्नं चिन्निष्ठं परस्परतादात्म्यं अवश्यमभ्युपेयम् यत्तदेव भ्रमप्रमास्थानीय[3] द्व्याकारताघटकं, तस्मान्न उक्तसिद्धान्तव्याघातः । न वा तुच्छे सत्तादात्म्यम् । न च विशेषणचित्सम्बन्धरूपायाः प्रकारतायाः संसर्गात् भेदेनानुभवात्तार्किकादिभिः तथा स्वीकाराच्च तदभेदानुपपत्तिरिति वाच्यम् । सिद्धान्ते हि प्राभाकरादीनामिव इदं रजतं जानामीत्यादिरेव विशिष्टबुद्धेराकारः, साक्षिण एव तत्तद्वृत्त्यवच्छिन्नस्य भ्रमप्रमात्वात् तत्र विशेष्यतावच्छिन्नत्वेनैव प्रकारता अनुभूयते न तु संसर्गभिन्नत्वेनापि । प्रत्युत तादात्म्येन इदं रजतं जानामीत्यादौ तादात्म्याभिन्नत्वेनैव प्रकारता अनुभूयते । अत्र संयोगेन घटं जानामीत्यादावपि भूतलादिसंयोगस्य प्रकारतैव घटादौ सम्बन्धः । यदि च तत्र तादात्म्यादिनिष्ठसांसर्गिकविषयताभिन्नत्वेनैव प्रकारत्वानुभव इत्याग्रहः; तदास्ताम् । तथा द्रव्यत्वाद्यवच्छिन्नस्य यदिदमादितादात्म्यादिकं तदीयं यद्भ्रमपूर्वसिद्धसांसर्गिकविषयत्वं तदवच्छेदेन प्रकारतारूपतादात्म्यसम्बन्धेन रजतादेरु-

[1] आदिना तादात्म्यपरिग्रहः [2] भ्रमकालोत्पन्नेदंतादात्म्येन [3] सामान्यीय

भिन्न एव तस्य दूषणत्वं वाच्यम्। अत एवोक्तं "साध्या-

त्पत्त्या इदं रजतमित्याद्याकारस्येव रजतादिविशेष्यतावच्छेदेन इदंतादात्म्यादेः सांसर्गिकविषयत्वसम्बन्धेनोत्पत्त्या रजतमिदमित्याद्याकारस्यापि निर्वाहः। एवं च रजतभ्रमस्थले रजतं तत्प्रकारतावच्छिन्नसंसर्गता इदं तादात्म्यं च उत्पद्यन्ते इति भावः। न च रजतत्वाद्यवच्छिन्नप्रकारताया व्यावहारिकरजतावच्छिन्नचित्तादात्म्यरूपायाः इदंतादात्म्यचित्सम्बन्धावच्छेदेन भ्रमपूर्वमसिद्धत्वेन तस्या अप्युत्पत्तिर्वाच्या, तथा च गौरवं, तद्बाधापत्तिश्च, न च सेष्टा। न हि ज्ञानेन रजतादिप्रकारता बाध्यते, किन्तु विशेष्ये विशेषणं तत्सम्बन्धो वेति वाच्यम्, घटत्वाद्यवच्छिन्नप्रकारतायाः पूर्वमसिद्धत्वेपि कपालादितादात्म्यविषयत्वावच्छिन्नपूर्वसिद्धप्रकारतायाः घटाद्युत्पत्तिकाले घटत्वाद्यवच्छिन्नत्वस्यैव उक्तविषयतावच्छिन्नपूर्वसिद्धप्रकारतायाः रजताद्युत्पत्तिकाले रजतत्वाद्यवच्छिन्नत्वस्य सम्पत्तेः। एवंच पूर्वसिद्धप्रकारतैव रजतसंसृष्टा उक्ताकारनिर्वाहिकेति भावः। रजतादिचित्सम्बन्धस्य रजतत्वादिचित्सम्बन्धरूपप्रकारतावच्छिन्नत्वात् यद्यपि विषयादिनिष्ठदोषस्य स्वाश्रये शुक्त्यादौ अवच्छेदकतासम्बन्धेन रजतादिकं प्रति हेतुत्वम्। तथापि उक्तविषयत्वावच्छिन्नप्रकारता बाधाभावादिप्रयोज्या। नन्वेवं प्रकारतावच्छिन्नोक्तविषयत्वस्यापि पूर्वसिद्धस्यैव बाधाभावनियम्यत्वसम्भवादुक्ताकारद्वयनिर्वाहाय उक्ततादात्म्यादेरुत्पत्तिः व्यर्था। यद्येनावच्छिद्यते तेन तन्नावच्छिद्यत इति नियमे तु मानस्याभावः[1]। भावे वा रजतादिप्रतियोगिकतादात्म्याद्युत्पत्त्याऽपि तत्सिद्ध्या शुक्त्यादिप्रतियोगिकतादात्म्याद्युत्पत्तिरविनिगम्या। एतेनाकारयोः भेदार्थमिदमादितादात्म्योत्पत्तिरावश्यकी। न हि विषयतयोः मिथोवच्छिन्नत्वेन आरोपो भिद्यते,

---

[1] मानाभावः.

भावनिश्चयवति हेतुसन्देह एव सन्दिग्धानैकान्तिकता" इति । पक्षत्वं तु साध्यसन्देहवत्त्वं साध्यगोचरसाधकमानाभाववत्त्वं वा ।

किन्तु विषयभेदादित्युक्तमित्यपास्तम् । रजतादितादात्म्योत्पत्त्यापि विषयभेदसम्भवात् । अथात्र रजते पटपवनसंयोग इत्यादिप्रतीत्या प्रातीतिकरजताद्यवच्छिन्नस्य संयोगादेः स्वीकारात्तस्य चान्यावच्छिन्नत्ववारणाय अवच्छेदकतासम्बन्धेन तदवच्छिन्नं प्रति तद्रजतादेः हेतुत्वात् स्वोत्पत्तिक्षणोत्पन्ने शुक्त्यादिप्रतियोगिकतादात्म्ये अवच्छेदकत्वासम्भवात् शुक्त्याद्यवच्छेदेनैव रजतादितादात्म्यादेरुत्पत्तिरिति विनिगमकं, तर्हि रजतादिविशेष्यताया एवास्त्ववच्छेदकत्वं न तु रजतादेः, यत्सम्बद्धो यत्रावच्छेदकः तत्तत्रावच्छेदकमिति नियमे मानाभावात् । तथाचोक्तो विनिगमकाभावः स्थिरः । रजतादितादात्म्यस्योत्पत्तौ तस्येदंविशेष्यतावच्छिन्नस्य भानेन, इदं रजतमित्याकारस्य पूर्वसिद्धया रजतादिविशेष्यतया अवच्छिन्नस्य पूर्वसिद्धस्येदंतादात्म्यविषयत्वस्य भानात्, रजतमिदमित्याकारस्य सम्भवेन भिन्नविषयघटिताकारयोर्निर्वाहात् तदनुरोधेन रजतादेः इदमादेर्वा तादात्म्यमुत्पद्यत इत्यत्र विनिगमकाभावादिति चेन्न । रजतादिप्रतियोगिकतादात्म्यादेरुत्पत्त्यङ्गीकारे तादात्म्येन घटादिभ्रमस्थले घटादिप्रतियोगिकतादात्म्यस्य काष्ठादावुत्पत्त्या तादात्म्येन घटादेः काष्ठादावुत्पत्त्यावश्यकत्वात् । तेन सम्बन्धेन तदुत्पत्तिकारणतायां कपालतत्संयोगादिनिष्ठायां व्यभिचारात् । कपालादिविशिष्टघटत्वादिना व्यावहारिकतादात्म्यसम्बन्धेन वा कपालादिकार्यत्वे च गौरवात् । नचेदं रजतमित्याद्याकारे रजतादिप्रतियोगिकतादात्म्यस्य भानादुक्तव्यभिचारतादवस्थ्यमिति वाच्यम् । द्रव्यत्वाद्यवच्छिन्नशुक्त्यादिप्रतियोगिकतादात्म्यभानस्यैव तत्रोक्तत्वेन रजतादिप्र-

एतच्च घटादिसाधारणम्। अत एव तत्रापि सन्दिग्धानैकान्ति-

तियोगिकतादात्म्यस्याभानादुक्तविषयत्वावच्छिन्नरजतादिप्रकारतामात्रभानेन उक्ताकारसम्भवात्। न हि परमतेऽपि उक्ताकारे तदनुव्यवसाये वा रजतादिप्रतियोगिकतादात्म्यं भातीति नियमः। न च तादात्म्यसम्बन्धेन द्रव्यत्वादिविशिष्टे घटादावपि घटत्वाद्यवच्छिन्नस्य उत्पत्त्या केवलतादात्म्येन कार्यत्वे व्यभिचारापत्त्या कपालादिनिष्ठतादात्म्येनैव घटादेः कपालादिकार्यत्वान्नोक्तदोष इति वाच्यम्। तथाप्याधारताविशेषादिसम्बन्धेन संयोगत्वरूपत्वदुःखत्वाद्यवच्छिन्नं प्रति द्रव्यत्वरूपत्वपापत्वादिना हेतुत्वस्य कुसत्वात्तदवच्छिन्नप्रकारताकभ्रमस्थले उक्तरीत्या व्यभिचारस्य दुर्वारत्वात्। न चेदं संयोगवदित्यादिभ्रमस्थले संयोगादिविशेष्यतावच्छेदेन इदमाधेयत्वस्येवेदंविशेष्यतावच्छेदेन संयोगाद्याधारत्वस्योत्पत्तिः सम्भवति, तादृशाधारत्वसांसर्गिकविषयत्वस्य इदंविशेष्यतावच्छिन्नत्वेनैवोक्ताकारसम्भवेन उक्ताधारत्वस्य इदमनुयोगिकत्वाभावेनाधारतासम्बन्धेन संयोगादिकं प्रति द्रव्यत्वादिना हेतुत्वे व्यभिचाराभावादिति वाच्यम्। विशेष्यावच्छिन्नस्य विशेषणसम्बन्धस्यैव प्रमाभ्रमयोः विशेष्यानुयोगिकत्वमित्यस्योक्तत्वात्। आधारताविशेषेण चिति संयोगत्वाद्यवच्छिन्नोत्पत्त्या व्यभिचारावश्यकत्वात् इदंतादात्म्यादिसंसर्गस्य मिथ्याभूतस्य भ्रमस्थले उत्पत्तौ साधकत्वात्। यद्यपि रजतादौ प्रतियोगितया अनुयोगितया वा सम्बन्धेन उक्ततादात्म्यस्य न भ्रमे प्रसक्तिः, तथापि स्वविषयतावच्छेदकप्रकारतावत्त्वसम्बन्धस्य[1] प्रसक्त्या तेन सम्बन्धेन बाधः सम्भवत्येव। न च मिथ्याभूतरजतादिसंसृष्टतया तस्य मिथ्यात्वमनुभूयते न तु स्वत इति वाच्यम्। रजतादेर्मि-

[1] संबन्धेन.

कत्वं न दोषः । पक्षसमत्वोक्तिस्तु प्रतिज्ञाविषयत्वाभावमात्रेण ।

थ्याभूतसाक्षात्क्रियमाणेदंतादात्म्यादिसंसृष्टतया मिथ्याभूतत्वसाक्षात्क्रियमाणत्वयोः वक्तुं शक्यतया विनिगमकाभावात् । मिथ्यात्वसाक्षात्क्रियमाणत्वे साक्षात्सम्बन्धेन प्रतीयेते इति तु तादात्म्येऽपि समानम् । अथ रजताद्यनुत्पत्तौ मिथ्यातादात्म्योत्पत्त्या न भ्रमाकारनिर्वाहः । रजतादिप्रकारताया व्यावहारिकरजताद्यवच्छिन्नचिन्निष्ठायाः शुक्त्याद्यवच्छिन्नचिन्निष्ठोक्ततादात्म्यविषयतावच्छिन्नत्वासम्भवात् । अत एव परोक्षभ्रमस्थले स्फटिकादौ लौहित्यादिभ्रमस्थले चान्यथाख्यातिवादो न विचारसहः । तत्तच्चित्यावच्छिन्नचित्सम्बद्धरूपाणां विषयतानां मिथोऽवाच्छिन्नत्वासम्भवादिति चेन्न ; उत्पद्यमानमिथ्यातादात्म्यस्याघटमानघटकत्वात् तदुपादानाज्ञानस्य शुक्तिव्यावहारिकरजताद्युभयावच्छिन्नचिदाश्रितत्वतदुभयभेदावच्छिन्नचिद्विषयकत्वाभ्यां व्यावहारिकरजतादिव्यापकत्वाच्च । अतएव प्रातीतिकरजतादौ व्यावहारिकरजतादेस्तादात्म्यारोपः प्राचीनसम्मतत्वेन द्वितीये मिथ्यात्वलक्षणे मूले वक्ष्यते । एवंच "अध्यस्तमेव हि परिस्फुरति भ्रमेषु नान्यत्कथंचन परिस्फुरति भ्रमेषु" इति संक्षेपशारीरकोक्तिः विजयते । विशेषणसंसर्गयोरिव संसर्गप्रतियोगित्वोपहितस्य विशेष्यस्यापि भ्रमकालोत्पत्त्या बाधकालावच्छेदेन बाध्यत्वात् । न च भ्रमपूर्वमेवेदमादेः सिद्धत्वेनोत्पत्त्यसम्भव इति वाच्यम् ; उक्तोपहितस्येदमादेः पूर्वसिद्धेदमादितो भिन्नत्वात् । या यदुत्पत्तिसामग्री सा तदुपाहितोत्पत्तिसामग्रीति व्याप्त्या पूर्वसिद्धेदमादिगतदोषादिसामग्र्या रजतादितत्तादात्म्यतत्प्रतियोगिकत्वोपहितानामुत्पत्तिसम्भवात् । अथोक्तोपहितस्य पूर्वसिद्धेदमादिना तादात्म्यस्य वाच्यतया तस्याप्युक्तोपहिततादात्म्यं मिथ्यैवाभात् न पूर्वसिद्धेदमादौ कदापि तदस्तीति बाधा-

न च तर्हि प्रतिज्ञाविषयत्वमेव पक्षत्वम् । स्वार्थानुमाने तद-

दिना अध्यस्तत्वेन उत्पत्तिर्वाच्या । एवं तदुपहितान्तरतत्तादात्म्यान्तराणामुत्पत्तिरिति चेन्न, तादात्म्यस्येव तदुपहितस्यापि तादात्म्यान्तरानङ्गीकारात्स्वोपधायकतादात्म्यस्यैव स्वंप्रति संबन्धत्वात् । तथा च तादात्म्यादिसम्बन्धावच्छिन्नप्रतियोगिताकरजताद्यभावेन तद्व्याप्येन च विशिष्टं यत्तदवच्छिन्नचिद्विषयताकाज्ञानाधारतावच्छेदकत्वं स्वप्रकारतावच्छिन्नसांसर्गिकविषयतावच्छिन्नविशेष्यतावत्तादात्म्यसम्बन्धेन रजतादेः रजतत्वादिप्रकारतावच्छिन्ना या स्वीयसांसर्गिकविषयता तदवच्छिन्नविशेष्यतावत्तादात्म्यसम्बन्धेन रजतत्वादिसंसर्गस्य प्रतियोगितासम्बन्धेन तादात्म्यादेः तादात्म्येन तदुपहितस्य चोत्पत्तौ हेतुः । पल्लवाज्ञानतादात्म्याश्रयनिष्ठेनाकारताख्यविषयतासम्बन्धेन भ्रमं प्रति स्वाव्यवहितपूर्वकालवृत्तित्वं स्वतादाम्योपलक्षितवृत्तिविषयत्वं चेत्युभयसम्बन्धेन विषयविशिष्टं पल्लवाज्ञानं भ्रमभिन्नो यः स्वतादात्म्याश्रयः तद्वृत्तिविषयतासम्बन्धेन हेतुः । अज्ञानानिष्ठेन तादात्म्यसम्बन्धेन कार्यत्वावच्छिन्नं प्रत्यज्ञानमुपादानम् । व्यावहारिककार्यजनने त्वज्ञानस्य नोक्तविशेषसामग्रीत्वं, किन्तु दण्डकपालादिरूपस्य इदमाद्याकारमनोवृत्तिकाले साक्षिसम्बन्धात् भानप्रसक्त्या इदं न जानामीत्यनुभवेन च शुक्त्याद्यवच्छिन्नचिद्विषयताकाज्ञानाधारतावच्छेदकत्वस्य सत्त्वे कदाचिद्दोषाभावेन भ्रमानुत्पत्त्या तत्तद्दोषविशिष्टकार्यं प्रति तत्तद्दोषाणामपि हेतुत्वम् । तदुक्तं विवरणे— "अविद्यैव वा अस्तु दोषनिमित्तसहिता रजताद्याकारेण तदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिणो विषयः" इति । नेदं रजतमित्यादेः रजतभेदव्याप्यशुक्तित्ववादित्यादेर्वा अप्रामाण्यज्ञानाविषयानाहार्यनिश्चयस्य शुक्तित्वं रजतभेदव्याप्यमित्याकारकस्य इयं शुक्तिरित्यादितादृशनिश्चय-

भावात्। एवं विप्रतिपत्तौ प्राचां प्रयोगाः—विमतं मिथ्या कालीनोद्बुद्धसंस्कारस्य वा सत्त्वे इदमादावुक्तावच्छेदकत्वे मानाभावात्। भ्रमपुष्कलकारणसत्त्वे तत्त्वज्ञानानुदय इति विवरणोक्तेश्च न रजतादेरुत्पत्तिः। तार्किकादिमते तु उक्तनिश्चयत्वाद्यवच्छिन्नाभावत्वेन रजतादिविशिष्टबुद्धौ हेतुत्वे महागौरवम्। मन्मते तु प्रमात्मकविशिष्टबुद्धावपि न बाधस्य प्रतिबन्धकता। तत्सामग्र्याः प्रतिबन्धकत्वेनावश्यकेनोपपत्तेः। प्रतिबन्धकत्वाभिमतकालीनकारणे शक्त्य[1]-स्वीकारेण उपपत्त्या कुत्रापि कार्ये प्रतिबन्धकास्वीकाराच्च। प्रतिबन्धकाभावस्येव शाक्तेर्नित्यत्वेऽप्यव्याप्यवृत्तित्वसम्भवात्। न चाज्ञानस्यानादित्वादुक्तावच्छेदकत्वस्याप्यनादित्वेनोक्तनिश्चयादिसत्त्वेऽपि तत्सम्भवतीति वाच्यम्; उक्तनिश्चयत्वाद्यवच्छिन्नाभावस्येव तस्याप्युक्तनिश्चयकालानवच्छिन्नस्वभावत्वात्। चिच्चेत्यतादात्म्यस्यैव मुख्यविषयतात्वेऽपि आकारतास्थगौणविषयतायाः मनोऽविद्यापरिणामवृत्तिविशेषान् प्रति सम्बन्धत्वं भ्रमत्वं च। प्रातिभासिकाकारकाविद्यावृत्तिगतो जातिविशेषो भ्रान्तं मयेत्याद्यनुभवेन उक्तकार्यतावच्छेदकत्वेन च सिद्धः। भ्रमजनकदोषात्तस्यावृतत्वाच्च बाधात्पूर्वं सः भ्रमेषु न गृह्यते प्रमात्वं चारोप्यते। तादात्म्यसम्बन्धेन भ्रमोत्पत्तिपूर्वं नाज्ञाने तत्परिणामवैशिष्ट्यम्। अतः स्वतादात्म्योपलक्षितवृत्तिविषयतानिवेशः। तत्सम्बन्धेन च रजतादिभाविकार्यस्याप्यज्ञाने सत्त्वमस्तीत्यनागतघटादौ ज्ञायमानघटत्वादिरूपसामान्यलक्षणसन्निकर्षस्य स्वसमवायवृत्तिविषयतासम्बन्धेन सत्त्वमिव युज्यते। उक्तविषयतामात्रसम्बन्धेन भ्रमाव्यवहितपूर्वक्षणपूर्वमपि कार्यस्याज्ञाने सत्त्वात्तदव्यवहितोत्तरक्षणे भ्रमोत्पत्तिस्स्यात्। अतोऽव्यवहितपूर्वत्वनिवेशः। भ्रमस्य स्वास्मिन्नविषयता अत्यन्ताभेदे सम्बन्धविरहात्। नापि विद्यमानभ्रमस्य ग्रहणाय भ्रमा-

[1] शक्ति.

दृश्यत्वात्, जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवदिति ।

न्तरं स्वीक्रियते, साक्षिग्राह्यत्वात् । तत्कार्यस्य संस्कारादेः स्वविषय इव स्वास्मिन्नपि भ्रमणैकेनैव सम्भवात् गौरवेण भ्रमान्तरास्वीकारात् । अतो भ्रमभिन्नेति विशेषणम् । पल्लवाज्ञानानङ्गीकारपक्षे तु विषयेत्यस्य स्थाने तादात्म्याश्रयेत्यस्योत्तरं च प्रातिभासिकेति वाच्यम् । पल्लवेति च न वाच्यम् । प्रातिभासिकत्वं च सर्वदृश्यमिथ्यात्वनिश्चयपूर्वं मिथ्यात्वेन निश्चितत्वं, जातिविशेषो वा । रजतादिभेदतद्व्याप्ययोरेकस्य इदमादौ निश्चयेऽपि अपरविशिष्टविषयकाज्ञानस्य सत्त्वात्, तदापि रजताद्यध्यासोत्पत्तिस्स्यात्, अतः उभयविशिष्टविषयकाज्ञानाधारतावच्छेदकत्वयोः समुच्चितयोः हेतुत्वलाभायोभयोः निवेशः । उक्ताधारतावच्छेदकत्वं स्वरूपसम्बन्धेन, उक्ताधारतैव वा स्वावच्छेदकत्वसम्बन्धेन उक्ताज्ञानमेव वा स्वाधारतावच्छेदकत्वसम्बन्धेन हेतुः । एवं येन सम्बन्धेनोक्ताधारतावच्छेदकतायामिदंत्वादेरवच्छेदकता तत्सम्बन्धावाच्छिन्नस्वावच्छेदकतासम्बन्धेन उक्ताधारतावच्छेदकत्वं प्रतियोगितासम्बन्धेन तज्जातीयसंसर्गे हेतुः । रजते इदंत्वस्य संसर्गो मिथ्यैव अभात्, न कदापि सं तत्रास्तीति बाधात् । एवमिदमादिविषयकत्वस्य संसर्गः तद्वतः तादात्म्यं च रजतादिभ्रमावच्छेदेनोक्तभ्रमधर्मस्य रजतादिविषयकत्वादेः संसर्गस्येदमादिप्रमावच्छेदेनारोप्यते । न च रजतविषयकत्वस्येव रजतादौ रजतत्वादेरिव च उक्तोपहितेदमादिविषयकत्वस्य व्यावहारिकत्वात् रजतादिभ्रमे इदंविषयकत्वं नास्तीति बाधाभावाच्च नेदमादिविषयकत्वारोप इति वाच्यम्; व्यावहारिकं यदिदमादि तद्विषयकत्वसंसर्गस्य रजतादिभ्रमे प्रतीयमानस्य अव्यावहारिकत्वात् । इदं रजतमिति यज्ज्ञानं तन्मिथ्यैवेति प्रत्ययस्य रजतविषयकत्वे मिथ्यात्वासम्भवेन तदुपहित-

ज्ञानमिथ्यात्वावगाहनेऽपि इदंविषयकत्वविशिष्टज्ञानमिथ्यत्वावगाहनेऽपि बाधकाभावात् । शुक्त्यवच्छिन्नाचिद्विषयकाज्ञानाधारतावच्छेदकत्वस्य व्यावहारिकेदमादाविव तदाकारमनोवृत्तावपि सत्त्वात् शुक्तित्वे इदमादिना तादात्म्यतद्धर्मयोरिवोक्तवृत्तितादात्म्यतद्धर्मयोरारोपौचित्याच्च । न च विशिष्टविषयकत्वस्य उक्तवृत्तावसत्त्वेऽपि शुक्तित्वाद्युपहितविषयकत्वस्य सत्त्वात् तादृशविशेषविशिष्टावच्छिन्नचिद्विषयकाज्ञानाधारतावच्छेदकत्वमेव उक्तवृत्तेर्युक्तम्, इष्टापत्तौ च शुक्त्याद्यवच्छिन्नचिद्विषयकाज्ञानस्यैव इदमादिकं तद्विषयकमनोवृत्तिश्चेति द्वयमाधारतावच्छेदकमिति मूलाद्युक्तिर्विरुद्धेति वाच्यम्; इदमादिविषयकत्वेन ज्ञायमानवृत्तौ शुक्तिविषकत्वेनाज्ञानस्य शुक्तित्वादिविशिष्टाज्ञान एव पर्यवसानात् । अत्र तत्त्वं[1]प्रातीतिकतादात्म्योपहितेदमादिविषयकत्वविशिष्टावच्छिन्नचिदाधारताकस्य रजतभ्रमत्वविशिष्टावच्छिन्नचिद्विषयताकाज्ञानस्य अवश्यं वाच्यतया तेन चेदं ज्ञानं रजतप्रमेति भ्रमजननादिदं रजतं प्रमिनोमीति साक्षिप्रत्ययोपपत्तेः उक्तबाधकप्रतीतेः स्वज्ञानमात्रांशे मिथ्यात्वविषयकत्वसम्भवात् । व्यावहारिकेदमादिविषयकत्वसंसर्गस्य रजतादिभ्रमेष्वारोपे मानाभावः । न च सति स्फटिकाद्यवच्छिन्ने लौहित्यादेरिव तुच्छस्यापि सम्बन्धोऽध्यस्यतामिति वाच्यम्; आस्तिकनास्तिकयोः सत्तुच्छामिति प्रतीत्यभावेन तादृशाध्यासतत्सामग्र्योः अकल्पनात्, 'वस्तुशून्यो विकल्पः' इति पातञ्जलोक्त्या तुच्छधीरूपविकल्पस्य सदविषयकत्वनिर्णयात्, कथंचित्कल्पनमपि तुच्छप्रतियोगिकतादात्म्यत्वेन, न तु सत्प्रतियोगिकतादात्म्यत्वेन, तद्विशिष्टं चार्हान्तार्थः । तुच्छावच्छेदेन च सत्प्रतियोगिकतादात्म्योत्पत्तेरसम्भवः । तुच्छस्य चित्सम्बन्धाभावेन चिति जायमानोक्ततादात्म्येऽवच्छेदकत्वासम्भवात्तुच्छव्यवहारप्रयोजकतया वि-

[1] 'अत्र तत्त्वं' इति स्थाने 'ननु' इत्येव कोशान्तरे.

नात्रावयवेष्वाग्रहः। अत्र स्वनियामकनियतया विप्रतिपत्त्या

कल्परूपवृत्तिस्वीकारेऽपि चित्सम्बन्धासम्भवात्। ननु सन्निष्ठया सद्भिन्ननिष्ठया च प्रतियोगितया सम्बन्धेन तादात्म्यं प्रत्याश्रयत्वेन तदवच्छेदकत्वेन च सम्बन्धेन अविद्यायाः कारणत्वात्, लौहित्यादिप्रतियोगिकतादात्म्ये च जपादिसन्निधानस्य विशिष्य कारणत्वात्, प्रतियोगितासम्बन्धेन सति इदमादौ लौहित्यादावेवास्तु तादात्म्यं न तुच्छेऽवच्छेदकतासम्बन्धेन तु स्यात्। तेन सम्बन्धेन तत्प्रति स्वप्रतियोगितावच्छेदकावच्छिन्नभेदस्य कारणत्वात्। अन्यथा रजताद्यवच्छेदेनैव स्वावच्छेदेनापीदमादितादात्म्यमुत्पद्येत, तस्य तुच्छेऽपि सत्त्वादिति चेन्न तुच्छे निर्धर्मकत्वेन उक्तभेदस्याप्यसत्त्वात्। तादात्म्यान्यस्वकार्यनिष्ठेन विषयत्वसम्बन्धेन अविद्याया एव तत्र हेतुत्वात्। अन्यथा स्वपरिणाम्यविद्यापरिणामाभिन्नेऽपि तादात्म्योत्पत्त्यापत्तेः रजतादौ तदुत्पत्तिपूर्वमपि उक्तविषयतासम्बन्धेन अविद्यायाः सम्भवात् तदुत्पत्तिकाले तादात्म्योत्पत्तिः। तादात्म्येऽपि तादात्म्यान्तरोत्पत्तिवारणाय स्वकार्यस्य तादात्म्यान्यत्वं विशेषणम्। यद्यपि तुच्छस्य सत्तादात्म्यावच्छेदकत्वेऽपि प्रकृते न दोषः। स्वरूपसम्बन्धेन सत्तादात्म्यवत्त्वस्यैवार्हान्तार्थत्वात्। अवच्छेदकतया तद्वत्त्वोक्तौ चितः सत्तादात्म्यानवच्छेदकत्वेन अर्हांतेनैव वारणात्। चिद्भिन्नमित्यस्य वैयर्थ्यापातात्। स्वरूपसम्बन्धेन सत्तादात्म्यवत्त्वं च सदाकारधीविषयेषु वर्तते, न तुच्छे, तथापि वस्तुस्थितिरेवोक्ता। अत एवोक्तं निश्चितसाध्याभावेत्याद्युक्तं प्राचीननैयायिकैः। नवीनैस्तु दधित्यादौ यद्यपि शक्त्यादिसाधकानुमाने पक्षीयव्यभिचारसंशयोप्यनुकूलतर्काभावे दोषत्वेनोक्तः; तथापि प्रकृते अनुकूलतर्काणां वक्ष्यमाणत्वान्न दोष इति भावः। **स्वनियामकनियतयेति**—स्वं विप्रतिपत्तिः, नियामिका जनिका यस्य तेन

लघुभूतया पक्षतावच्छेदो न विरुद्धः। समयबन्धादिना व्यवधानात् तस्यानुमानकालासत्त्वेपि उपलक्षणतया पक्षतावच्छेदकत्वम्। यद्वा विप्रतिपत्तिविषयतावच्छेदकमेव पक्षतावच्छेदकम्। प्राचां

विशेषण[1] नियतया स्वेतरस्माद्व्यावर्तितया। ननु विशिष्टार्थविशेषधीजनकत्वेन विप्रतिपत्तिर्निवेशे विशिष्टघटकविशेष्यतावच्छेदकरूपेणैव पक्षता अस्तु लाघवात् तत्राह—लघुभूतयेति। तद्व्यक्तित्वरूपलघुरूपावच्छिन्नयेत्यर्थः। तथाच तद्व्यक्तित्वेनैव निवेश्याया विप्रतिपत्तेरुक्तधीजनकत्वं परिचायकमिति भावः। यत्तु धर्मविशेषे ग्रहाधीनग्रहापि विप्रतिपत्तिः पक्षतावच्छेदिका, न तु धर्मविशेषः, लघुपक्षहेतुघटितपरामर्शादिरूपप्रमाणस्वरूपलाघवात्। अतएव सावयवत्वं क्षितेः सकर्तृकत्वं प्रति न हेतुः, किन्तु तेनानुमितं कार्यत्वमिति, तन्न; प्रथमोपस्थितत्वलाघवस्य धर्मिविशेषे सत्त्वात्। द्रव्यसमवेतद्रव्यत्वरूपे सावयवत्वे तत्सत्वेऽपि गुरुधर्मो न हेतुतावच्छेदक इति मते तत्र हेतुत्वानङ्गीकारात्। अतएव धर्मविशेष एव पक्षतावच्छेदक इति मूले वक्ष्यते। नन्वनुमितिकाले सतः पक्षतावच्छेदकस्य समकालत्वं साध्ये भातीति पक्षतावच्छेदककालावच्छिन्नस्यैव साध्यस्य सिद्ध्या अर्थान्तरम्। न चानुमानकालासत्या एव व्यक्तेः तद्व्यक्तित्वेन पक्षतावच्छेदकत्वात्, साध्ये उक्तकालावच्छिन्नत्वस्य बाधकाले भानासम्भवाच्च न दोष इति वाच्यम्; तद्व्यक्तित्वाश्रयपरिचायकं यद्धर्मवद्विशेषकत्वं वाच्यं तस्यैव पक्षतावच्छेदकत्वौचित्यात्। साध्यं न तद्व्यक्तिकालावच्छिन्नमित्यादिबाधाभावे अर्थान्तरानुद्धाराच्चेत्यत आह—यद्वेति। यत्तु विप्रतिपत्तिर्न पक्षतावच्छेदिका अनुमानकाले असत्याः विशेषणत्वासम्भवेन विशेष्यतावच्छेदककालावच्छि-

---

[1] पा. बोधविशेषण.

प्रयोगेष्वपि विमतमिति पदं विप्रतिपत्तिविषयतावच्छेदकावच्छिन्नाभिप्रायेणेत्यदोषः। ननु किमिदं मिथ्यात्वं साध्यते, "न तावत् मिथ्याशब्दोऽनिर्वचनीयतावचनः" इति पञ्चपादिकावचनात् सदसदनधिकरणत्वरूपमनिर्वाच्यत्वम्। तद्धि किं असत्त्वविशिष्टसत्त्वाभावः, उत सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं धर्मद्वयम्, आहोस्वित् सत्त्वात्यन्ताभाववत्त्वे[1] सति असत्त्वात्यन्ताभावरूपं विशिष्टम्। नाद्यः; सत्त्वमात्राधारे जगत्यसत्त्वविशिष्टसत्त्वानभ्युपगमात् विशिष्टाभावसाधने सिद्धसा-

---

न्त्वेन विधेयावगाहनस्यौत्सर्गिकस्य भङ्गापत्तेः, अतएव न संशयविषयत्वरूपा विमतिः तथा, किन्तूक्तविमतिप्रकारकधीविशेष्यतेति, तत्तुच्छम्। स्वरूपयोग्यत्वेनास्मन्मूलोक्तविप्रतिपत्तिर्हि न वाक्यम्। तस्य अतत्त्वात्, किन्तु तद्धीः, साच विमतिधिया तुल्या, व्यापारानुबन्धितद्विशेष्यतायाः प्रपञ्चे सत्त्वेन पक्षतावच्छेदकत्वसम्भवात्। औत्सर्गिकं च सति बाधे व्याहतमेव। अन्यथा तदौत्सर्गिकमेव न स्यात्। किंचास्माकं समयबन्धादिवत् विप्रतिपत्तेरावश्यकत्वात् परामर्शकाले वाक्यस्मृतिरूपविप्रतिपत्तेरप्यावश्यकत्वात् पक्षतावच्छेदकत्वसम्भवः। तव तु संशयधीः कुतः, कथंचित्तत्सामग्रीकल्पने विप्रतिपत्तिसामग्री कुतो न कल्प्यते। अस्मदुक्तदूषणेन ग्रस्ता ते विमतिधीरपि, धीमात्रशून्यप्रलयावच्छेदेन मिथ्यात्वादिसिद्ध्यापत्तेः। **अदोष इति**। विप्रतिपत्तिमात्रस्य पक्षतावच्छेदकत्वे ब्रह्मतुच्छयोः बाधासिद्धौ। घटादियत्किञ्चिद्विशेष्यकविप्रतिपत्तेः पक्षतावच्छेदकत्वे सर्वप्रपञ्चमिथ्यात्वासिद्धिरिति दोषाः नेत्यर्थः। **किमसत्त्वेत्यादि**। विशिष्टप्रतियोगिकाभावत्वेन, अभावद्वयत्वेन, एकाभावसमानाधिक-

---

[1] भावत्वे,

धनात्। न द्वितीयः; सत्त्वासत्त्वयोरेकाभावे अपरसत्त्वावश्यकत्वेन व्याघातात् निर्धर्मकब्रह्मवत् सत्त्वासत्त्वराहित्येपि सद्रूपत्वेन अमिथ्यात्वोपपत्त्या अर्थान्तराच्च, शुक्तिरूप्ये अबाध्यत्वरूपसत्त्वव्यतिरेकस्य सत्त्वेन बाध्यत्वरूपासत्त्वस्य व्यतिरेकासिद्ध्या साध्यवैकल्याच्च। अतएव न तृतीयः; पूर्ववत् व्याघातात् अर्थान्तरात् साध्यवैकल्याच्च इति चेत्, मैवम्। सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयाविवक्षायां दोषाभावात्। न च व्याहतिः। सा हि सत्त्वासत्त्वयोः परस्परविरहरूपतया वा, परस्पराविरहव्यापकतया वा, परस्परविरहव्याप्यतया वा। तत्र नाद्यः; तदनङ्गीकारात्। तथाह्यत्र त्रिकालाबाध्यत्वरूपसत्त्वव्यतिरेको नासत्त्वम्, किन्तु क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वम्, तद्व्यतिरेकश्च साध्यत्वेन विवक्षितः। तथाच त्रिकालबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वरूपं साध्यं पर्यवसितम्। एवंच सति न शुक्तिरूप्ये साध्यवैकल्यमपि, बाध्यत्वरूपासत्त्वव्यतिरेकस्य साध्याप्रवेशात्। नापि व्याघातः परस्परविरहरूपत्वाभावात्। अतएव न द्वितीयोऽपि; सत्त्वाभाववति शुक्तिरूप्ये विवक्षितासत्त्वव्यतिरेकस्य विद्यमानत्वेन व्यभिचारात्। नापि तृतीयः; तस्य व्याघाताप्रयोजकत्वात् गोत्वाश्वत्वयोः परस्परविरहव्याप्यत्वेऽपि तदभावयोरुष्ट्रादावेकत्र सहोपलम्भात्। यच्च निर्धर्मकस्य ब्रह्मणः सत्त्वराहित्येऽपि सद्रूपवत्प्रपञ्चस्य सद्रूप-

रणापराभावत्वेन, विकल्पाः। अतश्शब्दार्थं विवृणोति **पूर्ववदिति**। **नाद्यः** इत्यादिना परस्परविरहरूपत्वमात्रं निषिध्यते। तेनैव हेतुना व्याघाताभावमाह—**नापि व्याघात** इत्यादि।

त्वेन अभिध्यात्वोपपत्त्या अर्थान्तरमुक्तम्, तन्न; एकेनैव सर्वानुगतेन सर्वत्र सत्प्रतीत्युपपत्तौ ब्रह्मवत् प्रपञ्चस्य प्रत्येकं सत्स्वभावताकल्पने मानाभावात्, अनुगतव्यवहाराभावप्रसङ्गाच्च। सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं वा साध्यम्। तथाचोभयात्मकत्वे अन्यतरात्मकत्वे वा तादृगभेदासम्भवेन ताभ्यामर्थान्तरानवकाशः। न च असत्त्वव्यतिरेकांशस्यासद्भेदस्य च प्रपञ्चे सिद्धत्वेनांशतः सिद्धसाधनमिति वाच्यम्; "गुणादिकं

सत्स्वभावता सच्छब्देनाभिलप्यमानधीविषयता। **अनुगतव्यवहारेति**। ननु सदाकारबुद्धौ सत्ता द्रव्यत्वं मूर्तत्वं वा जातिर्विषयः। गुणादौ तस्यास्सामानाधिकरण्यादिः सम्बन्धः। त्वन्मतेऽपि हि सत्स्वरूपस्य नैकं तादात्म्यं समवायैकत्वदूषणात्। न च तादात्म्यत्वेनानुगतो मे सम्बन्ध इति वाच्यम्; तादात्म्यं सदित्यत्र तदसम्भवात्। एकरूपेण सम्बन्धत्वानुयोगित्वयोः असम्भवादिति चेन्न; समवायस्सन्नित्यादौ तवेव ममापि तत्र तत्सम्भवात्। तत्र विभिन्नरूपेण त्वया तयोरङ्गीकारे ममापि सदाकारप्रतीतेः सम्बन्धांशेऽप्यनुगताकारत्वाय तादात्म्यत्वरूपेण सम्बन्धेऽपि तदतिरिक्तरूपेणानुयोगित्वसम्भवात्। एकरूपेण सम्बन्धं प्रत्यनुयोगित्वप्रतियोगित्वयोरेव मया अनङ्गीकारात्। तादात्म्यत्वेनैव मम अनुयोगित्वसम्भवाच्च। अतएव सद्ब्रह्मेत्येव मे व्यवहारः, न तु सत्सादिति। अथवा सत्स्वरूपप्रतियोगिकं तादात्म्यमेव सत्तास्वरूपसंम्बन्धेन सदाकारधीविषयः, तादात्म्यं सदित्यत्रापि केवलोपहिततादात्म्ययोः स्वरूपं सम्बन्धः, तादात्म्ये तादात्म्यान्तरास्वीकारात्। तादात्म्यभिन्नयोरेव केवलोपहितयोः तादात्म्यस्वीकारात्। अतस्सदाकारबुद्धौ नानुगतसम्बन्धहानिः। सत्ता सतीति तु न मे व्यवहारः। **गुणादिकमित्यादि**। समानाधिकृत-

गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वात्" इति भेदाभे-

त्वात् गुणादौ गुण्यादिभेदधीप्रतिबन्धकप्रमाविषयत्वात् । तथाच यो यद्विशिष्टप्रतियोगिकभेदधीप्रतिबन्धकप्रमाविषयः सः तद्भेदाभेदवानिति व्याप्तिः । निष्कर्षस्तु—यो धर्मो यद्धर्मवदवच्छिन्नप्रतियोगिताकभेदप्रकारतानिरूपितस्वावच्छिन्नविशेष्यताकज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावत्संयोगाद्यसंसर्गकप्रमादिविषयः स तद्धर्मावच्छिन्नप्रतियोगिताकभेदाभेदानुयोगितावच्छेदकतावद्व्यवानिति सामान्यतो व्याप्तौ घटत्वादिमदवच्छिन्नप्रतियोगिताकभेदप्रकारतानिरूपितस्वावच्छिन्नविशेष्यताकज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताश्रयप्रमाविषयो द्रव्यत्वादिः । यथा घटत्वाद्यवच्छिन्नप्रतियोगिताकभेदाभेदोभयानुयोगितावच्छेदक इति दृष्टान्तः । द्रव्यं घटाभिन्नं नेत्याद्याकारकं घटत्वादिमदवच्छिन्नप्रतियोगिताकभेदप्रकारतानिरूपितद्रव्यत्वाद्यवच्छिन्नविशेष्यताकभ्रमं प्रति प्रतिबन्धिकायां द्रव्यं घट इत्यादिप्रमायां द्रव्यत्वादेर्विषयत्वात् घटो न घटाभिन्न इत्यादिज्ञानस्य आहार्यत्वेन अप्रतिबध्यत्वात् स्वपदयद्धर्मपदाभ्यां घटत्वादेरेकस्य धर्तुमशक्यत्वात् द्रव्यत्वादेरिव स्वपदेन घटत्वादेरेव यद्धर्मपदेन धारणं तेन घटत्वादेः स्वावच्छिन्नप्रतियोगिताकभेदाभेदोभयानुयोगितावच्छेदकत्वाभावेऽपि न व्यभिचारः । न च द्रव्यत्वावच्छिन्ने घटत्वावच्छिन्नभेदोऽसिद्ध इति वाच्यम् ; विशिष्टकेवलयोः भेदवादिना तार्किकादिना केवलघटे द्रव्यत्वविशिष्टघटत्वादिना भेदस्वीकारात्, विशिष्टघटो घट इत्यादिप्रतीतेरभेदस्वीकाराच्च, विशिष्टघटकेवलयोः भेदास्वीकारे संयोगविशेषवतो भेदाभेदयोर्वृक्षादौ तार्किकादिभिस्स्वीकारेण तत्रैव दृष्टान्तत्वसम्भवाच्च । भेदधीप्रतिबन्धकाभेदभ्रमविषययोः घटपटयोरभेदाभावात्प्रमेति स्वविशेषणीभूतयावदंशे भ्रमाभिन्नार्थकम् । तेनोक्तभ्रमस्य घटत्वाद्यंशे प्रमात्वेऽपि न दोषः ।

प्रमात्वं च बाधाभावात् सिद्धम् । संयोगेन घटवतो भिन्नं भूतलमित्यादिधीप्रतिबन्धकप्रमाविषये भूतलादौ घटाद्यभेदाभावात् असंसर्गान्तं यद्धर्मावच्छिन्ने यद्धर्मविशिष्टसंयोगाद्यविषयार्थकम् । न च नीलादिविशिष्टप्रतियोगिकभेदप्रकारकघटादिविशेष्यकज्ञानं प्रति प्रमायाः प्रतिबन्धकत्वस्य घटादौ नीलादिगुणविशिष्टप्रतियोगिताकाभेदविषयत्वावच्छिन्नत्वेनोक्तप्रतिबन्धकत्वे उक्ता[1]भेदसिद्धेरुपपादकत्वेऽपि न घटादौ नीलादिगुणाभेदसिद्धिस्तथेति अप्रयोजकत्वामिति वाच्यम् ; गुणगुण्याद्योरभेदान्यसम्बन्धासिद्ध्या अभेदसम्बन्धेन गुणादिविशिष्टप्रतियोगिकगुण्यादिनिष्ठाभेदस्योक्तप्रतिबन्धकत्वोपपादकत्वात् । आधाराधेयत्वस्य लोकैरननुभवात् । न ह्यस्ति धीर्घटे नीलः कपाले घट इति । अपितु घटो नीलः कपालं घट इत्यादि । अतएवेहेति प्रत्ययहेतुः समवायस्तयोः सम्बन्ध इति कणादादिमतमनुभवविरोधात् हेयम् । किंच घटो न नील इत्यादिज्ञानं प्रति घटविशेष्यतानिरूपिताभेदसंसर्गतानिरूपितनीलादिगुणप्रकारताकत्वेन प्रतिबन्धकत्वं मया वाच्यम् । नीलो घट इति धियो नीलगुणघटाभेदविषयकत्वस्य मयाऽङ्गीकारात् । नीलादिगुणविशिष्टनिष्ठोक्तप्रकारताकत्वेन तु त्वया वाच्यमिति ते गौरवम् । अथ ममापि समवायेन नीलादिप्रकारतानिरूपितघटादिविशेष्यताकत्वेन तदिति चेत्तर्हि व्यर्थमभेदान्यनामकरणम् । यत्र यद्विशिष्टभेदज्ञानं प्रति यत्सम्बन्धेन त्वदभिमतसमवायान्यसंयोगाद्यविषयिका तयोर्विशिष्टप्रमाप्रतिबन्धिका स एव हि तयोरभेदः घटो द्रव्यमित्यादिप्रमायां त्वयाऽपि तथाऽङ्गीकारात् । एवंच घटो न नील इत्यादिज्ञाने नीलगुणाविशिष्टप्रतियोगिकभेदस्य त्वद्रीत्या विषयत्वेऽपि तत्र नीलगुणाभिन्नप्रतियोगिकभेदत्वेनैव विषयत्वं स्वीक्रियते । तथा सति हि तज्ज्ञानं यत्रोक्तभेदप्रकारकं तत्र नीलगुणाभेद-

[1] उक्त.

ज्ञानस्य तत्पूर्वमभावनियमेन तत्र नीलगुणभेदप्रकारकत्वसम्भवेन तद्रूपेणैव प्रतिबन्धकत्वं कल्प्यत इति लाघवम्। तादृशानुमित्यादेरप्युक्तप्रकारकत्वेन नीलाभिन्नप्रतियोगिकभेदव्याप्यपरामर्शादिकार्यत्वसम्भवात्। किंच गुणगुण्याद्योः समवायस्वीकारे तदन्तर्भावेणापि ज्ञानयोः प्रतिबध्यप्रतिबन्धकत्वं कल्प्यमिति ते गौरवम्। तादात्म्यान्तर्भावेण तु तत्त्वापि कुत्रापि कुण्ठम्। एवं नीलगुणादिकं प्रति तद्व्यधिकरणतद्भेदत्वेन मे हेतुत्वम्, तव तु समवायावच्छिन्ननीलादिप्रतियोगिताकतादृशात्यन्ताभावत्वेनेति गौरवम्। घटो रूपमित्यादिकं तु लोकैरनुभूयत एव। पटे रूपमित्यादिकं तु काणादादिमतवासनाविलासः। उक्तं हि भामत्यां 'उभयथा च दोषात्' इति सूत्रे 'अनुभूयते हि पृथिव्यादिकं गन्धाद्यात्मकं लोकैः' इति। पुराणवचनान्यपि—

आकाशं शब्दमात्रं तत्स्पर्शमात्रं समाविशेत्।
द्विगुणस्तु ततो वायुः शब्दस्पर्शात्मनो भवेत्॥

इत्यादीनि। एवमनुभवागमसिद्धं गुणगुण्याद्योरभिन्नत्वं वैशेषिकैरशक्यापह्नवमिति। मास्तां वा रूपत्वघटत्वादिभ्यां आत्मत्वदेहत्वाभ्यां इति वा भेदः। किन्तु भेदस्स एव च घटो रूपवानित्यादिबुद्धौ सम्बन्धः, घटत्वपटत्वादिभ्यां भेदस्तु घटपटयोर्न सम्बन्धः अबाधितप्रत्ययाभावात्। अथवा रूपत्वघटत्वादिभ्यां तादात्म्यस्य वृत्तिनियामकत्वस्वीकारात् तदवच्छिन्नाकारैव उक्तबुद्धौ सम्बन्धः, न तु तदेव घटो न रूपमिति बुद्धौ, तस्याः प्रतिबन्धकतापत्तेः। नचातिरिक्ताधारताकल्पने गौरवमिति वाच्यम्, समवायपक्षेऽपि तदावश्यकत्वात्। समवायस्यैवाधारतारूपत्वे तु रूपं घटवदिति बुद्ध्यापत्तेः; तत्र च तादात्म्याख्यसम्बन्धे समवायत्वरूपोऽखण्डधर्मो न कल्प्यते कुत्राप्यकुण्ठत्वात्, किन्तु तादात्म्यत्वरूपः द्रव्यघटाद्योस्ता-

दात्म्ये कृप्तत्वात्। यद्वा घटादौ रूपादेः प्रतियोगितारूपादौ घटादेरनुयोगितासम्बन्धः घटस्य रूपमिति प्रतीतेः घटादौ तदभावस्य तदभावे च घटादेः वृत्तिनियामकयोस्तयोः कृप्तत्वात्। संयोगवदेकत्र वृत्तिनियामकस्याप्यपरत्र तत्त्वसम्भवात्। यद्वा घटरूपाद्योरिव घटादितदभावयोरपि तन्निष्ठभेद एव सम्बन्धः सम्बन्धत्वेन कृप्तत्वादिति दिक्॥

"गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"

इत्यादेस्तु नामान्तराविशेषणं शुक्लादिपदं पुंसि, नामान्तरविशेषणं तु तत्समानलिङ्गमित्यादिरर्थः, यथाश्रुतार्थत्वे शुक्लं रूपमित्यादेरसाधुत्वापत्तेः। अत एवाधारत्वानियामकोपि गगनादिसंयोगवदभेदान्यएव सम्बन्धोस्त्वित्यपि निरस्तम्। आधारत्वानियामकत्वाविशेषेऽपि क्रियाजन्यत्वादिना संयोगत्वस्येव भेदधीप्रतिबन्धकधीविषयत्वेन अभेदत्वस्य सिद्धेः। अथैवमपि भेदांशसिद्धौ कस्तर्कः? उच्यते—भेदं विना न सम्बन्धः घटो घट इति विशिष्टानुभवस्य लोकानामभावात्। न च घटो घटवानिति लोकैरनुभवात्संसर्गप्रतियोग्यनुयोगिनोः तद्व्यक्तित्वाभ्यामेव भेदोपेक्षित इति प्रतियोग्यनुयोगितावच्छेदकान्तर्भावेन भेदसिद्धौ न तर्क इति वाच्यम्; घटो द्रव्यमित्यादौ तद्व्यक्तित्वाभ्यामपि प्रतियोग्यनुयोगिनोः भेदाभावेन घटो घटवानित्यादिस्थलेऽपि भिन्नरूपेणैव लोके संसर्गप्रतियोग्यनुयोगितयोः स्वीकारात्। प्रतियोग्यनुयोगितावच्छेदकरूपाभ्यां भेदाग्रहे संसर्गाग्रहात् भेदभ्रमे संसर्गभ्रमाच्च भेदज्ञानस्य संसर्गज्ञानकारणत्वे आवश्यके घटो द्रव्यमित्यादौ कारणीभूतभेदज्ञानस्य भ्रमत्वे तत्प्रयोजकानन्तदोषकल्पनापेक्षया प्रमात्वकल्पनस्यैव युक्तत्वात्। प्रमात्वाकल्पनेऽपि सिद्धान्ते प्रातिभासिकभेदसिद्धेरनपायात्। नचैवं सिद्धान्ते घटो घट इत्यादिधीरपि स्यात् प्रातीतिकभेदसम्भवादिति वाच्यं, तत्र भेदाकारवृत्तेः

आहार्यत्वेन ज्ञानत्वस्यास्वीकारेण स्वीकारेऽप्यनाहार्यस्यैव हेतुत्वेन उक्तहेत्वभावेन उक्तबुद्ध्यनुत्पादात्। न च भेदस्य प्रातीतिकत्वेन व्यवहारकालेऽपि बाधात् तदा तद्घटितं कपालं घट इत्यादिधीप्रमात्वं न व्यवह्रियेतेति वाच्यं, इष्टत्वात्। तदा घटत्वकपालत्वजात्योरप्यैक्यज्ञानेन उक्तबुद्धेरनुत्पादाच्च। संयोगविशेषवत्कपालत्वरूपेण घटत्वेनोक्तधीरप्युक्तयुक्तेः भेदज्ञानमपेक्षत एव, संसर्गप्रतियोग्यनुयोगितावच्छेदकयोः भेदस्यावश्यकत्वात्। यदिचैकरूपेणापि संयोगादिसंसर्गप्रतियोग्यनुयोगितेत्याग्रहः, तथापि अभेदसंसर्गं प्रति तथा नैव। वस्तुतस्तद्घटे स्वकीयसंयोगादिसत्त्वेऽपि तद्घटः तद्घटीय इति प्रत्ययाभावात् तद्व्यक्तिभिन्नवृत्तिसंयोगादिरेव तद्व्यक्तिसम्बन्धः। अतः घटो द्रव्यमित्यादौ अभेदसम्बन्धस्थले तद्व्यक्तेः स्वतो भेदाभावात् द्रव्यत्वघटत्वादिरूपाभ्यामौपाधिको भेदोऽवश्यं वाच्यः। अतएव घटाभावे घटो नास्तीत्यादावपि एकत्वविशिष्टघटाभावत्वकेवलघटाभावत्वाभ्यां भेदात्सम्बन्धः। नच प्रतियोग्यनुयोगिभावः सम्बन्धनियामकः। न च घटाभावो घटाभाववानित्यादौ विद्यमानोपि तद्घटस्तद्घटीय इत्यादौ नास्त्यननुभवादिति वाच्यम्, घटो द्रव्यमित्यादौ प्रतियोग्यनुयोगिनोः स्वतोभेदाभावस्थले औपाधिकभेदान्यप्रतियोग्यनुयोगित्वकल्पने गौरवात्। तथाच तद्घटे स्वकीयसंयोगादिसत्त्वेऽपि तद्घटस्तद्घटीय इति धीप्रमात्वाभावाद्विशेषणभेदमात्रस्य विशेष्यगततया प्रमात्वनियामकत्वासम्भवाच्च। विशेषणतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणसंयोगादिरूपस्य तद्घटसम्बन्धस्याश्रये संयोगादिसम्बन्धेन तद्घटप्रकारकज्ञानत्वं संयोगादिसम्बन्धेन तद्घटप्रमात्वमित्येवंरीत्या प्रमात्वं तार्किकादिभिर्निर्वाच्यम्। नचैवं तद्घटस्तद्घटीय इत्यादेः प्रमात्वं दुर्वारं द्रव्यत्वादिविशिष्टे तद्घटत्वावच्छिन्नभेदसत्त्वादिति वाच्यम्, द्रव्यत्वादिविशिष्टस्य तद्घटत्वाद्युपहितान्यत्वेन अविशेष्यत्वात् विशेष्यी-

भूततद्घटे तद्भेदाभावात् । न च विशेष्यतावच्छेदकविशेषणतावच्छेदकयोः भेद एव प्रमात्वघटकोस्त्विति वाच्यम्, अनवच्छिन्नविशेष्यताकप्रमायां तदसम्भवात् । अथानवच्छिन्नविशेषणताकप्रमायां त्वदुक्तिरपि न सम्भवतीति चेत् सत्यं, तथापि विशेष्यीभूता विशेषणीभूता च या व्यक्तिः तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदघटितं तद्व्यक्तिप्रमात्वमित्येकोक्तिः सम्भवत्येव । न च सा अनादरणीयेति वाच्यम् एकजातीयप्रमात्वस्य प्रमामात्रे व्यवहारात् । अन्यथा व्याप्त्यादिलक्षणेष्वव्याप्त्युपन्यासस्य प्रलापत्वापत्तेः । एवञ्च घटत्वाद्युपहितनानाव्यक्तिविशेषणस्थले तत्तद्व्यक्तित्वावच्छिन्नभेदघटितामिव तद्घटोपहितमात्राविशेषणस्थलेऽपि तद्व्यक्तित्वावच्छिन्नभेदघटितप्रमात्वमुक्तम् । भेदस्य च विशेष्यीभूततद्घटे विरहात् तद्घटस्तद्घटीय इत्यादेर्न प्रमात्वम् । तथाचाभेदसम्बन्धस्थले तार्किकादेर्विशेषणविशेष्ययो भेदाङ्गीकार आवश्यकः । अन्यथा घटो नीलो द्रव्यं घट इत्यादिधीप्रमात्वासम्भवात् । अतएव घटाभावो घटाभाववानित्यादावपि एकत्वादिविशिष्टघटाभावत्वकेवलघटभावत्वाभ्यां भेदस्वीकारेणैव निर्वाहः । न च नीलघटादिव्यक्त्योरुक्तरीत्या भेदसिद्धावपि नीलत्वघटत्वादिव्यक्त्योः प्रतियोगितानुयोगितावच्छेदकत्वासिद्ध्या उक्तानुमानानिर्वाह इति वाच्यम्, उक्तरीत्या तत्तन्नीलव्यक्तित्वतत्तद्घटव्यक्तित्वानां येषु भेदेषु प्रतियोगितानुयोगितावच्छेदकत्वं सिद्धं तेषु नीलत्वघटत्वादीनां प्रतियोगितानुयोगितावच्छेदकत्वावश्यकत्वात्, यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति व्याप्तेः विशेषाभावकूटस्यैव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वरूपेण सामान्याभावत्वेन व्यवस्थाप्यत्वाच्च, न च तत्प्रतियोगिकतत्सम्बन्धानुयोगिनि तत्सम्बन्धेन तत्प्रकारकधीत्वं तत्सम्बन्धेन तत्प्रमात्वमिति वाच्यम्, दूषितत्वात् । किंच सम्बन्धप्रतियोगितानुयोगितयोः तद्घटादिस्वरूपत्वे येन संयोगेन तद्घटतत्पटयो-

र्मिथो विशिष्टप्रमा तेन तद्घटस्तद्घटीय इति प्रमापत्तितादवस्थ्यं, तत्संयोगस्य तद्घटप्रतियोग्यनुयोगित्वासत्त्वात्। तयोस्तदतिरिक्तत्वकल्पने च गौरवम्। मन्मते द्रव्यत्वघटत्वादिभ्यां भेदस्य कल्प्यत्वे यः भूतलघटयोः[1] भेदः कृप्तः स एव। न च तत्सबन्धीया तदभिन्ना या प्रतियोगिता तन्निरूपितानुयोगितारूपे तत्संबन्धेन तत्प्रकारकधीत्वं तत्संबन्धेन तत्प्रमात्वं पटात्मकप्रतियोगितानिरूपितानुयोगितारूपे तद्घटे स्वप्रमात्ववारणाय तदभिन्नेति तत्तद्विशेषणाभिन्नपरमिति वाच्यम्, तथापि हि द्रव्यं घट इति धीरिव द्रव्यं द्रव्यमिति धीरपि प्रमा स्यात्। द्रव्याभिन्नघटात्मकप्रतियोगितानिरूपितानुयोगिताया द्रव्यस्वरूपत्वात्। न हि मन्मत इव त्वन्मते द्रव्यघटयोर्भेदः, त्वयौपाधिकभेदास्वीकारात्। न च द्रव्यत्वघटत्वादिभ्यां भेदप्रतियोग्यनुयोगिभावोऽपि त्वन्मते अतिरिक्तः कल्प्यत इति गौरवमिति वाच्यम्, त्वन्मते सर्वत्र प्रतियोगित्वानुयोगित्वयोः अतिरिक्तयोः कल्प्यत्वात् भेदप्रतियोगितानुयोगितयोः स्वावच्छेदकधर्मस्वरूपत्वाच्च। नच मन्मतेऽपि यत्र स्वाभाविको भेदस्तत्र भेदेनैव निर्वाहः यत्र तु द्रव्यत्वघटत्वादिभ्यां औपाधिको भेदस्त्वयोच्यते तत्रैवातिरिक्तयोस्तयोः कल्प्यत्वमिति वाच्यम्। एवं सति तद्घट. तद्घटीय इत्यादिधीप्रमात्वं तद्घटधीभिन्नवृत्तिसंयोगादिघटितम्, तादात्म्येन प्रमात्वं तु सम्बन्धप्रतियोग्यनुयोगित्वघटितमिति वैरूप्यं स्यात्। तत्प्रतियोगिकभेदेति नाम विहाय तत्प्रतियोगितानिरूपितसम्बन्धानुयोगितेति नाम त्वया कृतमिति पर्यवसानाच्च। एतदभिप्रायेणैव 'यथा च तत्राभेदः' इत्यादि वक्ष्यति। तस्माद्ययोरभेदसम्बन्धः तयोर्भेदः सर्वैरपि वाच्यः, विशिष्टकेवलार्द्धोर्भेदं विना तज्ज्ञानादीनां मिथो वैलक्षण्यासिद्धेः। भेदज्ञानस्य विशिष्टधीमात्रहेतुत्वात् प्रमात्वस्य भेदघटितत्वाच्च। अथवा समानाधिकृतत्वादाधा-

[1] घटार्द्धोः

रतावच्छेदकतानवच्छेदकरूपावच्छिन्नत्वसम्बन्धेन गुण्याद्यंशे प्रमाप्रकारत्वात्। तथाच यो यदवच्छिन्नविशेष्यतानिरूपितोक्तरूपावच्छिन्नसंसर्गतानिरूपितप्रमाप्रकारतावच्छेदकः स तदवच्छिन्नानुयोगिताकभेदाभेदोभयप्रतियोगितावच्छेदक इति व्याप्तिः। न चाप्रयोजकत्वं, नीलो घट इत्यादावाधारतावच्छेदकतानवच्छेदकरूपेणैव सम्बन्धस्योक्तयुक्तिभिःसिद्धया तादात्म्यजातीयस्य घटो द्रव्यमित्यादौ कल्पस्य तादृशत्वेन उपपत्तावतिरिक्तसमवायकल्पने गौरवात्। गुणादीत्यादिना क्रियावयवजातिविशिष्टांशानां गुण्यादित्यादिना च तद्वतां ग्रहणम्। न च कुण्डलत्वादेः कनकत्वाद्यवच्छिन्नप्रतियोगिताकभेदाभेदानुयोगितावच्छेदकत्वे—

कार्यात्मना तु नानात्वमभेदः कारणात्मना।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा॥

इति भामत्युक्तभेदाभेदवादिकारिकया कारणतावच्छेदकरूपेणाभेदस्यैव कार्यतावच्छेदकरूपेण भेदस्यैवोक्तया विरोध इति वाच्यम्, तया कटककुण्डलयोः कटकत्वकुण्डलत्वाभ्यामत्यन्तभेदः कटकत्वकनकत्वाभ्यां तु भेदाभेदावित्यस्मदनुकूलस्यैवोक्तत्वात्। तथाहि—कार्यात्मना तु कटकत्वकुण्डलत्वादिरूपैः कार्यमात्रधर्मैरेव नानात्वं, कारणात्मना—कारणगतधर्मेण। कार्यात्मना त्वित्यनुषज्यते अभेदोऽपि। तथाच कारणगतधर्मकार्यमात्रगतधर्माभ्यां तु अभेदोपीत्यर्थ इति व्याख्या संभवति। भेदाभेदवादिना त्रिदण्ड्यादिना ब्रह्मरूपज्ञानप्रपञ्चरूपज्ञेययोरभेदोक्तेर्व्यभिचारः[1]। व्यभिचारादिस्तु न सम्बन्धः। संबन्धोपि न धूमादिप्रकारतावह्न्यादिविशेष्यताभ्यां निरूपितसांसर्गिकविषयताकः। दृष्टान्तस्तु पूर्ववत्। येन द्रव्यत्वघटत्वाभ्यां न भेद उच्यते तं प्रत्युक्तयुक्तिभिः तस्य प्रसाध्यत्वात्।

[1] न व्यभिचारः.

तदुक्तं शारीरकसंक्षेपे—

अविरुद्धविशेषणद्वये प्रभवत्वेऽपि विशिष्टयोर्द्वयोः ।
घटते न यदैकता तदा सुतरां तद्विपरीतरूपयोः ॥

इति । एकता—अभेदः[1] । यत्तु भिन्नाभ्यामेकधर्मिबोधकत्वरूपशाब्दसामानाधिकरण्यघटितहेतुना भेदाभेदसिद्धिरिति परिमळादावुक्तं तस्याप्युक्तरीतौ तात्पर्यम् । यथाश्रुते भेदासिद्धेः[2] पूर्वमुक्त हेतोरसिद्धेः भेदांशसाधकतर्कानुत्थापकत्वेन अप्रयोजकत्वाच्च । ननु भेदाभेदयोरेकत्र युगपन्न ग्रहणं तद्धियोर्मिथो विरोधित्वात् युगपदुभयानुभवबलाद्गुणगुण्यादिस्थले तदनङ्गीकारे प्रथमोक्तहेत्वसिद्धिः । न चैकस्यैवैकदा ग्रहणं अविनिगम्यत्वात्; द्वयोः ग्राहकसन्निकर्षाद्यविशेषात् । सामानाधिकरण्यप्रत्यये व्यक्त्योर्भेदाभेदौ चकास्त इत्यादिभामतीविरोधाच्चेति चेन्न । प्रत्यक्षे मिथस्समानाधिकरणत्वेन तयोः युगपद्ग्राहेऽप्यन्यतरविरोधितया एकतरस्य शाब्दादिबुद्धेः प्रतिबन्धकत्वसम्भवात् । एकांशधीप्रतिबन्धकदोषसत्त्वे तद्विरोधितया अन्यांशप्रत्यक्षेऽपि तत्सम्भवात् । अन्यतरसमानाधिकरणत्वेन अज्ञायमानतद्विषयकज्ञानत्वमेव तद्विरोधितया तज्ज्ञानत्वम् । तेन न प्रमात्वघटितहेत्वसिद्धिः अव्याप्यवृत्तिस्थले सर्वैरपि तथा वाच्यत्वात् । भामत्युक्तिरसति दोषे । अत एवात्यन्ताभेदे अन्यतरस्य भामत्यां द्विरवभासमात्रं दूषणमुक्तम् । न तु भेदानुभवविरोधः, भेदानुभवस्य त्वन्मतेऽप्यसार्वत्रिकत्वात् । अन्यतरस्याभिन्नस्य धर्मिणो द्वाभ्यां रूपाभ्यामवभासमात्रं न त्वेकरूपावच्छिन्ने अपररूपावच्छिन्नस्य विशिष्टधीः, अत्यन्ताभेदे सम्बन्धासम्भवादिति तदर्थः । अथैवमपि भावाभावावेकत्र कथम्? नचावच्छेदकभेदेनैव तौ साध्याविति वाच्यम्, एकावच्छेदेन तत्साधकयुक्तेरेवोक्तत्वात् । भामत्यादौ तन्मतस्य विरोधोक्त्या दूषणासङ्गतेः । मणिकारैरपि

[1] अत्यन्ताभेदः. [2] अभेदसिद्धेः.

"न चैवं भेदाभेदः" इत्यनेन तन्मतमापाद्य अवच्छेदकभेदेन स्वमते तन्मतवैलक्षण्यस्योक्तत्वाच्चेति चेन्न । सामान्यतो विरोधेऽपि हि अव्याप्यवृत्तिस्थले अवच्छेदकभेदेनैव प्रकृते तदभेदेनापि तयोरेकत्र सम्भवः, धीबलस्याविशेषात् । तदुक्तं भामत्यां—"विरुद्धमिति नः क्व सम्प्रत्ययो यन्न प्रामाणिकम्" इति । तदेतत्सर्वं सिद्धान्ते अनुकूलम् । परं तु एकत्र शुक्तिरजतत्वयोः प्रतीतिसत्वेऽपि तद्बलाबलपरीक्षया तदुचिततत्सत्ताभ्युपगमात् भेदाभेदावपि भिन्नसत्ताकौ तत्राप्यभेदसम्बन्धत्वाद्यन्यथानुपपत्त्यैव भेदस्य कल्प्यत्वात् व्यावहारदशायामेव विशेषदर्शनबाध्यत्वाच्च । भेदः प्रातिभासिकः, तदुपजीव्योऽभेदो व्यावहारिकः । न च कार्यकारणभाव एव भेदोपजीव्य इति वाच्यम् । स एव तथेत्यपरिविशेषात्, कार्यकारणभावस्यापि प्रतीयमानतादात्म्यघटितान्वयव्यतिरेकग्रहोपजविकत्वात्, सांख्यादिमते वक्ष्यमाणरीत्या तस्यैवाभावाच्च । अत एवाभेदोपादानाभेदकल्पनेति भामत्यामभेदस्योपजीव्यत्वेनोपादानमस्याम् । सा तथा । अत एव ब्रह्मप्रपञ्चयोरपि भेदाभेदौ । तथैवोक्तं परिमळादौ । यत्तु भिन्नयोरभिन्नसत्ताकत्वमेव सिद्धान्ते सामानाधिकरण्यधीमात्रविषयः गुणगुण्याद्योर्मिळितत्वेन स्वोपहितसत्ताभेदकत्वाभावादित्याश्रमस्वाम्यादिभिरुक्तम्, तत्रेदं चिन्त्यम्—सत्ताप्रतियोगिकभेदशून्यत्वं न कुत्रापि सत्तायामिति तत्प्रवेशे अप्रसिद्धिः । घटपटाद्यवच्छिन्नसर्वसत्तानुगतसत्तात्वावच्छिन्नभेदशून्यत्वं कपालतन्त्वाद्यवच्छिन्नसत्तास्वस्तीति तत्प्रवेशे पटः कपाल इत्यादिव्यवहारापत्तिः । तत्कपालादिरूपविशेषणीभूतव्यक्तितादात्म्यवत् सत्तात्वावच्छिन्नभेदशून्यसत्तायाः विषयत्वे घटस्सन्नित्यादौ तदसम्भवः, विशेषणीभूतमहासत्तायां सम्बन्धत्वेन वाच्यायां तस्यामेव तादात्म्याभावात् घटावच्छिन्नसत्तातो भेदसत्त्वाच्च । अथ घटाद्यवच्छिन्नं सत्त्वमेव तत्र घटादौ महासत्तायाः सम्बन्धः न तु स्वात्यन्ताभिन्ना सैवेति

चेन्न, अवच्छिन्नसत्तात्वापेक्षया महासत्ताव्यक्तितादात्म्यवत् सत्तात्वस्य गुरुत्वेन अनवच्छेदकत्वादप्रसिद्धिः। अथायं घट इत्यादौ घटत्वादिजातेरिव महासत्ताया अपि स्वरूपत एव निवेशः न तु तद्व्यक्तित्वेन; तथाच महासत्तातादात्म्यमवच्छेदकतानिरूपकत्वरूपेणावच्छिन्नत्वेन सममिति चेत्. तथापि घटः कपाल इत्यादौ तत्कपालत्वादिघटितं घटस्सन्नयं घट इत्यादौ च विशेषणस्वरूपमात्रघटितमिति सर्वत्र विशेषणस्य तद्व्यक्तित्वेनाघटकत्वात्। सम्बन्धवैरूप्यं गुरोरवच्छेदकत्वस्य वैरूप्यस्य वा अङ्गीकारेऽपि अवच्छिन्नसत्ता सतीति न स्यात्; अवच्छिन्नसत्तायामवच्छिन्नसत्तान्तराभावात्। अथावच्छिन्नसत्ता स्वाश्रितेऽपि सम्बन्ध इति चेन्न; सम्बन्धान्तरसम्भवे तस्या एव तस्यास्सम्बन्धत्वस्यायुक्तत्वात्, महासत्तातादात्म्यस्यावच्छिन्नसत्तायामावश्यकत्वात् चिद्रूपमहासत्तायाश्चेत्यमात्रे तादात्म्यस्य त्वयाऽपि वाच्यत्वात्। अन्यथा तत्तद्विशेषणतादात्म्यवत् सत्तेत्यादिपूर्वोक्तासङ्गतेः वैरूप्यभङ्गस्य सर्वत्र कल्पिततादात्म्यसम्बन्धत्वाङ्गीकारेणापि सम्भवात्। अथ कपालघटाद्योः तादात्म्यं न क्लृप्तम्। अवच्छिन्नसत्ता तु क्लृप्तेति चेन्न; कपालाद्यवच्छिन्नचिति घटादेः घटाद्यवच्छिन्नचिति कपालादेश्च तादात्म्यस्याप्यन्योन्याध्यासानुरोधेन क्लृप्तत्वात्। तस्य च स्वरूपसम्बन्धेन चितीवावच्छेदकतया घटादावपि सत्त्वात्। एतेनावच्छिन्नसत्तायाः तद्व्यक्तित्वेन सर्वत्र सम्बन्धत्वान्न वैरूप्यमित्यपास्तम्। सत्तादात्म्यं सदिति तु सत्तादात्म्यं सत्सदित्यादिवत् नाभ्युपेयते। किंचोद्भूतरूपत्वादिना कारणत्वादेः नीलो घट इत्याकारकधीत्वादिना प्रतिबन्धकत्वादेश्चासम्भवः। एकजातीयसम्बन्धासम्भवात्। मन्मते च तादात्म्यत्वरूपाखण्डधर्माङ्गीकारेण तत्सम्भवात्। न च स धर्मोऽवच्छिन्नसत्तायामेवेति वाच्यम्। अवच्छिन्नसत्तायाः स्वासम्भवेन अवच्छिन्नसत्ता सतीति प्रतीत्यसम्भवस्योक्तत्वात्।

अपिच तद्रूपस्य तद्घट इव तदीयरसादावपि कुतो न प्रमा तत्र तत्सत्ताव्यक्तित्वेन न सम्बन्धताप्रतीत्यभावादिति चेन्न ; प्रतीतेरेवापाद्यत्वात् । कदाचिद्दोषात्तदुत्पत्तेः तद्रसो न नील इत्यस्य भ्रमत्वापत्तेश्च । एवं सन्मनः सद्भूतलमित्यादिवत् सुखं मनो घटो भूतलमित्याद्यपि स्यात् । सिद्धान्ते वृत्तिरूपेण परिणतमनसो घटादेश्च मेळने तदुपहितसत्तयोरिव मिळितभूतलघटाद्युपहितसत्तयोरैक्यावश्यकत्वात् । एवं घटो मन इत्याद्यपि आपादनीयं, मन्मते तद्रसावच्छेदेन तद्रूपतादात्म्यानङ्गीकारात् सुखाद्यवच्छेदेन मनआधेयतासंसर्गाध्यासस्यैव स्वीकारेण मनआदितादात्म्याभावात् मनःपरिणामत्वादिरूपेण सुखादौ मनआदितादात्म्याध्यासस्वीकारात् । मनःपरिणामो मन एवेत्यादिव्यवहारस्य 'एतत्सर्वं मन एव' इत्यादि श्रुतेश्चोपपत्तेः । अथ तादात्म्यं स्वरूपसम्बन्धेन स्वाश्रये सम्बन्धो नावच्छेदकत्वेनेति न घटादौ कपालादेस्तादात्म्यं सम्बन्ध इति चेन्न, अविनिगम्यत्वात् । कपालादिकार्यत्वस्य घटादौ प्रतिबन्धकधीविषयत्वस्य च नीलो घट इत्यादौ तादात्म्येनैव वाच्यत्वात् । सत्कार्यत्वस्य सन् घट इत्यादिप्रतिबन्धकधीविषयत्वस्य च तादात्म्येनैव क्लृप्तत्वात् । न च कपालादिकं प्रति तत्तादात्म्यं प्रतीव घटादेरवच्छेदकत्वादवच्छेदकत्वमेवास्तु तादात्म्यस्थानीयमिति वाच्यं ; परस्पराध्यासानुरोधेन घटादेः कपालादितादात्म्यं प्रत्यवच्छेदकत्वेऽपि कपालादिकं प्रति अवच्छेदकत्वे मानाभावात् । सद्घटाद्योर्मिथो विशिष्टबुद्ध्यनिर्वाहाच्च । घटादेः सत्सम्बधावच्छेदकत्वेऽपि सद्रूपाधिकरणं प्रत्यनवच्छेदकत्वात् सत्सम्बन्धस्य घटादावच्छेदकत्वेऽपि सतो नावच्छेदकत्वं, किन्तु अवच्छेदकतावच्छेदकत्वं, घटादिस्तु चिद्धास्यतानियामकः चिन्निष्ठः स्वसम्बन्ध इव सत्सम्बन्धे अवच्छेदकः बाधकाभावात् । न चावच्छिन्नस्य सत्सम्बन्धस्यावच्छेदकत्वासम्भवात् सदेवावच्छेदकामिति

दवादिप्रयोगे तार्किकाद्यङ्गीकृतस्य भिन्नत्वस्य सिद्धावपि उद्देश्यप्रतीत्यसिद्धेः यथा न सिद्धसाधनं तथा प्रकृतेऽपि मिळितप्रतीतेरुद्देश्यत्वान्न सिद्धसाधनम्। यथा तत्वाभेदे घटः कुम्भ इति सामानाधिकरण्यप्रतीतेरदर्शनेन मिळितसिद्धिरुद्देश्या तथा प्रकृतेऽपि सत्त्वरहिते तुच्छे दृश्यत्वादर्शनेन मिलितस्य

व्याच्यम्। घटादिना अनवच्छिन्नस्य तदुपादानकपालादिनिष्ठस्य सत्सम्बन्धस्यैव घटादाववच्छेदकत्वमित्युक्तत्वात्। अन्यथा अधिकरणस्य सतोऽवच्छेदकत्वासम्भवात्। किंचाविद्याद्यनादिद्रव्यसतोरवच्छेद्यावच्छेदकत्वस्य कथमपि विरहात् तत्र विशिष्टबुद्धेः तथापि निर्वाहः। तत्र हि घटादिनिष्ठसत्सम्बन्धं प्रति अवच्छेदकत्वात् सत्प्रत्यवच्छेदकत्वमज्ञानस्य शङ्कितुं शक्यम्। सतोऽवच्छेद्यघटकत्वात्। अज्ञानं प्रति तु सतोऽवच्छेँदकत्वं शङ्कितुमप्यशक्यम्, द्वितीयमिथ्यात्वलक्षणे वक्ष्यमाणरीत्या सत्सम्बन्धस्य कस्याप्यज्ञानं प्रत्यनवच्छेदकत्वेन अवच्छेदकघटकत्वस्य सति दूरापास्तत्वात्। अत एव सद्विशेष्यकाज्ञानप्रकारकधीवृत्तिरूपा न तु चिद्रूपेति तत्र वक्ष्यते। यदि च तत्रैव वक्ष्यमाणं सत्सम्बन्धस्याज्ञानावच्छेदकत्वपक्षमालम्बसे तदा सतोऽधिकरणत्वादेव नावच्छेदकत्वमित्येव गतिः। तस्मादभिन्नसत्तासमानाधिकरणबुद्धिविषयः सम्बन्ध इति वृद्धोक्तेरभिन्ना सत्ता यत इति व्युत्पत्त्या तदात्मता तत्र सम्बन्ध इत्येवार्थः। अस्तु वा अवच्छिन्नसत्तैव तादात्म्याश्रयः अवच्छिन्नसत्ता सतीत्यत्र तु तादात्म्यं सदित्येव विशेष्यमेव सम्बन्धः। यथाच घटतादात्म्यप्रतियोगिता नीलत्वादिनैवाच्छिद्यते न तु रूपत्वादिना, घटो रूपमित्यप्रत्ययात्; तथा रूपतादात्म्यप्रतियोगिता घटगुणत्वादिना अवच्छिद्यते, रूपं घटगुण इति प्रत्ययात्; न तु रसत्वादिना रूपं रस इत्यप्रत्ययादिति दिक्। **मिळितस्य**

तत्प्रयोजकतया मिलितसिद्धिरुद्देश्येति समानम्। अत एव सत्त्वात्यन्ताभाववत्त्वे सत्यसत्त्वात्यन्ताभावरूपं विशिष्टं साध्यमित्यपि साधु। न च मिलितस्य विशिष्टस्य वा साध्यत्वे तस्य कुत्राप्यप्रसिद्ध्या अप्रसिद्धविशेषणत्वं, प्रत्येकं सिद्ध्या

तत्प्रयोजकतयेति। ननु मिलितस्य हेतूपपादकत्वेऽपि प्रत्येकरूपेण सिद्धिः किमिति नोद्देश्या, यदि भिन्नं स्यात्तदा[1] समानाधिकृतं न स्यादित्यादेरिव यदि सत् स्यात् तदा दृश्यं न स्यात् इत्यादेरपि प्रत्येकरूपेण व्याप्तिग्राहकस्य तर्कस्य सम्भवात्। न च लाघवान्मिलितरूपेणैकैवानुमितिरुद्देश्येति वाच्यम्। न्यायप्रयोगानन्तरप्रत्येकांशाप्रयोजकशङ्कानिरासकतर्कोत्थापनक्रमेण प्रत्येकानुमित्योरुत्पादेन मिळितानुमितिलाघवानुभवात्[2]। पश्चान्मिलितानुमितिस्वीकारे प्रत्युत गौरवादिति चेन्न। प्रत्येकानुमित्योरुत्पादेऽपि न तत्र प्रकृतन्यायवाक्यतात्पर्यं, गौरवात्। किन्तु मिळितानुमितावेकस्यामिति न्यायवाक्यतात्पर्यविषयत्वरूपोद्देश्यता मिळितानुमितेरेवेति भावात्। पक्षहेत्वोरेकत्वे प्रत्येकन्यायप्रयोगस्य गुरुत्वादशक्तिरव्यापकत्वाच्च। न चैवमपि प्रत्येकावच्छिन्नविधेयताकानुमितिरेव उद्देश्याऽस्तु भिन्नाभिन्नं सदसन्नेत्यादिघटितप्रयोगसम्भवे भेदाभेदोभयवदित्यादिघटितप्रयोगे गौरवादिति वाच्यम्; येन रूपेणानुमितिविधेयता तेन रूपेण सिद्धिः प्रतिबन्धिका, समूहालम्बनाऽप्यनुमितिः प्रतिबध्या। अत एव वाङ्मनसे अनित्ये इत्यनुमितौ वाङ्मात्रे सिद्धिरपि प्रतिबन्धिकेति मते तदसम्भवात्। भेदोऽभेदश्च प्रकृतहेतूपपादक इत्यादिधीविषयत्वरूपोभयत्वेन साध्यनिर्देशस्य सामान्यतः प्रत्येकांशसाधकतर्कसूचन[3]फलकत्वात्। पश्चात् प्रतिवादिना प्रत्येकांशाप्रयोजकत्वे शङ्किते सूचिता एव मया प्रत्येकसाधकतर्कास्त्वया

---

[1] न स्यात्तदा. [2] लाघवासंभवात्. [3] सूचक.

मिलितस्य विशिष्टस्य वा साधने, शशशृङ्गयोः प्रत्येकं प्रसिद्ध्या शशीयशृङ्गसाधनमपि स्यादिति वाच्यम् । तथाविधप्रसिद्धेः शुक्तिरूप्य एवोक्तत्वात् । न च निर्धर्मकत्वात् ब्रह्मणः सत्त्वासत्त्वरूपधर्मद्वयशून्यत्वेन तत्रातिव्याप्तिः ;

तु न बुद्धा इति परकीयाशक्तिख्यापनस्य तत्रापि प्रयोजकत्वात् । वादकथायामपि सामान्यविशेषाभ्यां सुखबोधनस्यैव प्रयोजनत्वात् । **शशीयशृङ्गसाधनमिति**—शशीयत्वविशिष्टशृङ्गस्य साधनं शशीय-शृङ्गयोरुभयत्वेन तादात्म्येन साधनं वा अर्थः । तेन मिलितसाधनेऽपि दूषणलाभः । **धर्मद्वयशून्यत्वेनेति**—यद्यपि ब्रह्मणः सत्त्वमबाध्यत्वो-पलक्षितं तत्स्वरूपमेव, तदन्यत्वे तस्य मिथ्यात्वात् ब्रह्म वस्तुगत्या सत्यं न स्यात् । "प्राणो वै सत्यं, तेषामेष सत्यः, नित्यो नित्यानां चेतनश्चेतनानां, अणोरणीयान् महतो महीयान्" इत्यादिभिः श्रुतिभिः व्यवहारकालाबाध्यत्वरूपप्रपञ्चसत्यत्वापेक्षया अबाध्यत्वाद्युपलक्षितस्वरू-पात्मकत्वेन ब्रह्मसत्त्वादेरुत्कर्षोक्तेः । पञ्चीकरणशारीरकतत्संक्षेपादौ ब्रह्मणो नित्यत्वादिस्वभावस्योक्तेश्च[1] । तथाच सत्त्वं न ब्रह्मणो धर्मः प्रपञ्चस्य तु सुतरां न धर्म इति सत्त्वासत्त्वरूपधर्मद्वयेत्याद्यतिव्याप्ति-ग्रन्थासङ्गतिः । न च स्वरूपस्यापि स्वस्मिन्नभावात् धर्मेत्यस्य चाविव-क्षितत्वात् नोक्तासङ्गतिरिति वाच्यम् ; धर्मद्वयशून्यत्वेनेत्यत्र निर्धर्मक-त्वादिति हेत्वसङ्गतेः । तथापि तादृशसत्त्वादेराधारत्वं तादात्म्यं वा ब्रह्मणि कल्पितमवश्यं वाच्यम् । अन्यथा उक्तश्रुतिभिः सत्त्वादेः ब्रह्मधर्मत्वोक्तेरसङ्गतेः । अतएव ब्रह्मणो निर्धर्मकत्वात्तद्धर्माध्यासानु-पपत्तिमाशङ्क्य "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते" इत्युक्तं पञ्चपाद्याम् ।

---

[1] स्वभावत्वोक्तेश्च.

सद्रूपत्वेन ब्रह्मणः तदत्यन्ताभावानधिकरणत्वात्

तत्र चकारात् सत्यत्वशुद्धत्वविभुत्वादीनां ग्रहणम्। एवं च सत्त्वाद्युक्तसम्बन्धश्च उपहित एव वर्तते न तु शुद्ध इति तत्र तदभाव एव; उपहितत्तादात्म्येऽपि शुद्धो न सत्त्वादिधर्मक इत्याशयेनातिव्याप्त्युक्तिः[1]। न चैवमभावोपि स्वोपहिते न तु शुद्ध इति वाच्यम्; भावाभावयोरेकस्यावश्यकत्वं अन्यथा निर्धर्मकत्वानुपपत्तिश्चेत्यभिमानात्। **सद्रूपत्वेनेति**। उक्तसत्त्वसम्बन्धवत्प्रतियोगिकतादात्म्येनेत्यर्थः। उक्तसम्बन्धस्य स्वोपहित एव सत्त्वेऽपि तत्तादात्म्यं शुद्धे अस्त्येव शुद्धाशुद्धयोस्तादात्म्याङ्गीकारात्। अन्यथा शुद्धस्याशुद्धोपरागेण भानासम्भवेन संसारकाले स्वप्रकाशत्वं न स्यात्। न हि शुद्धस्य तदा पृथक् भानमस्ति। तथाच सति 'तमेव भान्तमनुभाति सर्वम्' इति शुद्धप्रतिपादकश्रुतेः 'अनुकृतेस्तस्य च' इति सूत्रस्य चानुपपत्तिः। **तदभावेति**। उक्ततादात्म्याभावेत्यर्थः। तथाचोक्ततादात्म्याभाव एव निवेश्यः न तु सत्त्वाभाव इति भावः। न चोक्ततादात्म्यस्य कल्पितत्वेन शुद्धे तदभावोपीति वाच्यम्; प्रतियोगिव्यधिकरणस्योक्ताभावस्य निवेशात्। ननूक्तसत्त्वसम्बन्धोपहितब्रह्मण एव आकाशाद्युपादानत्वात्। सत्त्वोपहितकपालादेः घटाद्युपादानत्वाच्च प्रपञ्चेऽप्युक्ततादात्म्यसत्त्वान्नोक्ताभाव इत्यव्याप्तिः, न च प्रपञ्चे स्वोपहित एवोक्ततादात्म्यमिति तदनुपहितसाधारणप्रपञ्चे अव्याप्त्युक्तिः न युक्ता, सत्त्वानुपहितस्यैव कपालादेरुपादानत्वेन घटादितादात्म्यात् घटादौ न तद्वारापि सत्त्वोपहिततादात्म्यमिति वाच्यम्। 'केवलो निर्गुणः' इत्यादिश्रुत्या धर्माभावेऽपि कैवल्ये केवलं ब्रह्मास्ति न तु धर्मोपहितमित्यन्वयव्यतिरेकाभ्यां स्वोपहित एव ब्रह्मणि धर्म इति युक्त्या

[1] उपहितत्तादात्म्यात् शुद्धेऽपि सत्त्वादिधर्मकत्वव्यवहार इत्याशयेनातिव्याप्त्युक्तिः,

निर्धर्मकत्वेनैवाभावरूपधर्मानधिकरणत्वाच्चेति

च शुद्धे ब्रह्मण्येव धर्मानङ्गीकारात् । प्रपञ्चमात्रस्य सत्त्वादिप्रतीतेः तत्र तदावश्यकत्वादिति चेन्न; स्वाभाविकस्य सत्त्वसम्बन्धस्य उपहितकेवलभावेन तादात्म्यस्य च निवेश्यत्वात्, प्रपञ्चे च सदधिष्ठानतादात्म्यप्रयुक्तस्यैव सत्त्वसम्बन्धस्य सत्त्वात्, सत्त्वोपहितब्रह्मणः तादात्म्यस्य प्रपञ्चे सत्त्वेऽपि उक्तब्रह्मकेवलरूपत्वाभावात् । नन्वेवं सत्त्वानुपहितानिष्ठस्य सत्त्वोपहिततादात्म्यस्याभावः पर्यवसन्नः तथाच सिद्धसाधनम्, ब्रह्मण एव सत्त्वानुपहितत्वेन प्रपञ्चे तूक्ताभावस्य माध्वादिभिः स्वीकारादिति चेन्न; मन्मते चित्तादात्म्यस्य दृश्यमात्रे स्वीकारेणाबाध्यत्वोपलक्षितस्वरूपतादात्म्यवत्त्वरूपस्य सत्त्वोपहितत्वस्य दृश्यमात्रे सत्त्वेपि तन्मते घटादौ जन्यज्ञानाविषयत्वमात्रस्वीकारेण चित्तादात्म्यास्वीकारात् । अबाध्ये दृश्यतादात्म्यस्वीकारेऽपि तदुपहितघटादितोऽन्यस्य केवलघटादेः स्वीकारादुक्ततादात्म्यानुपहितनिष्ठस्योक्ततादात्म्यस्य केवलघटादौ सत्त्वेन तदभावस्य पक्षतावच्छेदकावच्छेदेनासिद्धत्वादिति दिक् ॥

यदि च निर्धर्मिकमिन्न एव भावाभावयोरन्यतरानियमः तुच्छे तदन्यतरादर्शनात् धर्माभावाश्रयतादात्म्यादेव निर्धर्मकत्वस्य केवलश्रुत्यादौ व्यवहारादिति सूक्ष्मं पश्यसि, तदा अतिव्याप्तिस्तु भ्रान्त्यैवेत्याशयेनाह—**निर्धर्मकत्वेनैवेति** । यदि च शुद्धेऽप्यस्ति धर्मः, तद्वदभेदस्येव तस्यापि कल्पितस्य सत्त्वे बाधकाभावात् श्रुत्यादिनापि परमार्थतो न तत्र धर्म इति प्रतिपादनसम्भवात् अन्यथा तत्रात्यन्तासत्त्वबोधने प्रतीतिविरोधात् । तथाच ब्रह्मणो धर्मत्वेन प्रतीयमानस्य सर्वस्य अभाववत्त्वेन सत्त्वस्याप्यभावादतिव्याप्तिरिति शङ्कितुर्भावः । तथापि सद्रूपत्वेनेत्यस्य अबाध्यस्वरूपत्वेनेत्यर्थः । **तदभावेति** ।

अबाध्यत्वरूपसत्त्वाभावाविरोधीत्यर्थः । अबाध्यत्वरूपप्रतियोगिव्यधिकरणसत्त्वाभावेति यावत् । बाध्यवृत्तिस्सत्वाभाव इति तु निष्कर्षः । बाध्यत्वं च ज्ञानजन्यध्वंसप्रतियोगित्वं ज्ञानात्मकध्वंसप्रतियोगित्वादिकं वा प्रकृते ग्राह्यम् । तेन प्रपञ्चे सत्त्वाभावस्य औपाधिकसत्त्वसम्बन्धसमानाधिकरणत्वेऽपि न दोषः । न वा बाध्यवृत्त्यभावस्यैव लक्षणत्वापत्त्या शेषवैयर्थ्यं, उक्तबाध्यवृत्त्यभावस्य ज्ञानप्रागभावादावपि[1] सत्त्वात् तत्र सिद्धसाधनापत्तेः । वस्तुतो ब्रह्मान्यत्वमेव बाध्यत्वं वाच्यम् । अन्यथा ह्यसत्वाभाववैयर्थ्यम् । अथवा निर्धर्मकत्वेनैवाभावरूपधर्मानधिकरणत्वादिति निर्धर्मकत्वज्ञानज्ञाप्यादभावरूपधर्मस्यापि ब्रह्मणि बाधादित्यर्थः । तथाच धर्मिसमानसत्ताकस्य सत्त्वाभावस्य आश्रयत्वं प्रकृते वाच्यम् । धर्मिसमानसत्ताकस्य असत्वाभावस्याश्रयत्वं तु लक्षणान्तरम् । तदुभयमपि प्रपञ्च एवेति भावः । दृश्यमात्रं ब्रह्मणि नास्तीति बाधकेन प्रपञ्चतद्धर्मयोः बाधनात् स्वबाधकबाध्यस्य सत्त्वाभावस्य असत्त्वाभावस्य च अधिकरणत्वमेव प्रकृते वाच्यम् । यत्राधिकरणत्वं स्थाप्यं तदेव स्वमिति तु निष्कर्षः । ननूक्तादात्म्येन[2] रूपेणाभावोऽप्रसिद्धः, सिद्धान्ते तूक्तादात्म्यस्य ब्रह्ममात्रनिष्ठतया लाघवेन व्यक्तित्वस्यैव प्रतियोगितावच्छेदकत्वात्, तत्तादात्म्यव्यक्तित्वरूपायाः तादात्म्यमात्रविषयकधिय एव तद्व्यक्तित्वेन विषयतया प्रतियोगितावच्छेदकत्वात् । तथैवाभावनिवेशे च सिद्धसाधनमुक्तादात्म्यमात्रविषयकधीवृत्त्युभयावृत्तिधर्मनिष्ठानवच्छिन्ना च प्रतियोगितावच्छेदकतावच्छेदकता यस्य तादृशाभावत्वेन तत्तद्धीविषयतादात्म्याभावत्वपर्यवसितेन निवेशेऽपि सिद्धसाधनम् । दृश्यानां चालनीयन्यायेन मिथस्तादात्म्याभावात् । एवमबाध्यत्वोपलक्षितस्वरूपत्वमुक्तस्वरूपमात्रधीः तादृशत्वेनाभावोऽप्रसिद्धः उक्तधीवृत्त्युभयावृत्तिधर्मनिष्ठावच्छिन्ना च प्रतियो

[1] ज्ञानतत्सामग्र्यन्यतरजन्यध्वंसप्रतियोगिनि, [2] तादात्म्यत्व.

गितावच्छेदकतावच्छेदकता यस्य तादृशाभावत्वेन तद्धीव्यक्तित्वावच्छिन्नाभावत्वेन वा निवेशेऽपि सिद्धसाधनं; आद्ये प्रपञ्चस्य सत्त्वेऽपि[1] ज्ञानाविषयज्ञानस्वरूपत्वमादायार्थान्तरं, ज्ञानानां ज्ञानविषयत्ववादिप्राभाकरमते ज्ञानेषु चांशतः सिद्धसाधनमिति चेन्न; उक्तादात्म्यत्वव्यापकविषयताकं उक्तादात्म्यत्वव्यापकं विषयत्वं वा यत्तद्वृत्त्युभयावृत्तिधर्मनिष्ठेत्यादेरबाध्यत्वव्यापकाविषयताकं अबाध्यत्वव्यापकं विषयत्वं वा यत्तद्वृत्त्युभयावृत्तिधर्मानिष्ठेत्यादेश्च निर्दोषत्वात्। उक्तविषयता च शुद्धचिति सत्त्वोपहितचितस्तादात्म्यमित्याकारकज्ञानीया अबाध्यस्वरूपमित्याकारकज्ञानीया च अस्माकं, परेषां चोक्तादात्म्यं सर्वं प्रमेयमित्याकारकज्ञानीया अबाध्यस्वरूपं सर्वं मेयमित्याकारकज्ञानीया च, तादृशश्च प्रपञ्चे, नाभावः परेषामिति न सिद्धसाधनम्। ज्ञानेषु इच्छाविषयत्वस्य[2] सर्वैरङ्गीकारात्। ज्ञानाविषयज्ञानरूपतया स्वीकार्यतादात्म्यादिप्रपञ्चेऽपि उक्तादात्म्यत्वव्यापकस्येच्छादिविषयत्वस्य अवश्यं स्वीकाराच्च न चरमोक्ते अर्थान्तरसिद्धसाधने। घटादितादात्म्यविषयकवृत्तिधर्मत्वेन तत्तद्व्यक्तित्वावाच्छिन्ना प्रतियोगितावच्छेदकता यस्य तादृशाभावस्य पटादौ सत्त्वात् सिद्धसाधनम्। अतोऽनवच्छिन्नेति। उक्तविषयताकत्वादिना सिद्धान्ते न प्रतियोगितावच्छेदकता, किन्तु तत्तद्व्यक्तित्वेन, चिन्मात्रनिष्ठोक्तादात्म्यनिष्ठप्रतियोगितासमनियतस्य तत्तद्व्यक्तित्ववत एव लघुत्वात्। तन्निवेशे च सिद्धसाधनम्। उक्तादात्म्यं सर्वं प्रमेयमित्याकारकधियो ब्रह्मविषयकत्वेन अवच्छेदकतया निवेशे सिद्धसाधनम्। तादृशधीसामान्याभावे निवेशिते अप्रसिद्धिः। सिद्धान्ते उक्तसामान्यापेक्षया लघोस्तत्तद्धीव्यक्तित्ववत एव अवच्छेदकत्वात्। परमतेऽप्यबाध्यविषयकत्वादेरेव तदपेक्षया लघुत्वेनावच्छेदकत्वात्। अतो निष्ठान्तं व्यापकत्वादिकं च।

---

[1] सत्यत्वेऽपि. [2] ज्ञानेच्छाविषयत्वस्य.

दिक् ॥

इति सदसद्विलक्षणत्वरूपप्रथममिथ्यात्वविचारः.

मिथ्यात्वासम्पादकाभावादिघटितं साध्यसामानाधिकरण्यावच्छेदकरूप-व्याप्तिनिरूपकत्वादिरूपं वा । अवच्छेदकत्वादिकं चाखण्डमेव मिश्रादिसम्मतम् । तेन सर्वत्र सर्वाभावसत्त्वात् न व्यापकत्वादि दुर्वचम् । लौकिकव्यवहारोपयुक्ताभावस्य तदीयविशेषणतासम्बन्धानामन्यतमत्वाद्यसाधारणरूपेण वा निवेशात्, उक्तावच्छेदकत्वस्य अभावाद्यघटितत्वाच्च । उक्ततादात्म्यं सर्वं मेयमित्याकारया कयाचिद्धिया तत्तद्व्यक्तित्वेन अवच्छिन्नप्रतियोगिताकः । शुद्धब्रह्मणि धर्माङ्गीकारे तु शुद्धब्रह्मनिष्ठायाः अबाध्यत्वव्यापकविषयतायाः तद्व्यक्तित्वावाच्छिन्नप्रतियोगिताकोऽभावः प्रवेश्य इति तु वस्तुगतिः । व्यापकत्वादीनिवेशे प्रयोजनाभावात् । गुरोरवच्छेदकत्वे तु न काऽप्यनुपपत्तिरित्याद्यभिप्रेत्याह—**दिगिति** ॥

नन्वसत्त्वं[1] सत्त्वेनाप्रतीयमानत्वं, सत्त्वेन प्रतीयमानत्वं च स्वरूपसम्बन्धेन या सत्तादात्म्यप्रकारता तन्निरूपितविशेष्यत्वम् । अस्ति च तादात्म्ये तादात्म्यवति तत्र दृश्ये च स्वरूपसम्बन्धेन सत्तादात्म्यस्य प्रकारता । न च ब्रह्मण्युक्तविशेष्यत्वाभावादेव वारणसम्भवे सत्त्वाभावोपादानं व्यर्थमिति वाच्यम् । सत्सत्प्रतियोगिकतादात्म्यवदिति प्रत्ययाभावेऽपि वस्तुगत्या सतो यत्तादात्म्यं तद्वत्सादिति प्रतीतेः । वस्तुगत्या सतो यत्तादात्म्यं तत्प्रकारतानिरूपितविशेष्यत्वस्य ब्रह्मण्यपि सत्त्वादिति त्वया अभिप्रेतम् । तदयुक्तम्—असत्त्वं हि सत्त्वेनाप्रतीयमानत्वम् । असच्चेन्न सत्त्वेन प्रतीयेतेत्यादिना त्वयैव तस्य सत्त्वेनाप्रतीयमानत्वे प्रयोजकत्वोक्तेः । इष्टापत्त्यादिना स्वस्यैव स्वंप्रत्या-

[1] यत्त्वसत्त्वं.

पादकत्वरूपप्रयोजकत्वासम्भवात्। उक्तासत्त्वस्य अभावसाधनं च व्यर्थम्। न चासद्वैलक्षण्यसिद्धये तदिति वाच्यम्, तस्यासत्साधारण्यात्। 'तद्धैक आहुः असदेवेदमग्र आसीत्' इत्यादिश्रुत्याऽसतः सत्त्वेन प्रतीत्यनुवादात्। न चासत इव तादृशप्रतीतेरनुवादो न सत्तासम्पादक इति वाच्यम्। असद्वादिनस्तादृशप्रतीतिमन्तः इति श्रुत्या प्रतिपादनेन तत्सत्त्वसिद्धेः। न चोक्तश्रुत्या सदेवेत्यादिश्रुत्यर्थस्याभावधीरेवानूद्यते नोक्तप्रतीतिरिति वाच्यम्। उक्ताभावस्याप्यसत्त्वेन तत्रासीदित्यनेन सत्त्वप्रतीतिलाभादिति, तत्तुच्छम्। 'असच्चेन्न प्रतीयेत' इत्यत्राप्रतीतिरपरोक्षाध्यासाभिप्रायेण यद्यापरोक्ष्याभावरूपा तदा तस्याः सत्त्वेन अप्रतीयमानत्वेनापादने किंचिन्न बाधकम्। यदि चाध्यासमात्राभिप्रायेण सा सत्त्वेनाप्रतीतिरूपा तदापादकं सत्त्वविषयबुद्ध्यविषयत्वरूपं सत्त्वप्रतीत्यनर्हत्वमिति न दोषः। उक्तश्रुत्या च सत्त्वेनासिद्धिर्नानूद्यते[1] एक इत्यनेन बौद्धानामेवोक्तेः। तन्मते 'तस्मादसतस्सज्जायते' इत्याद्यनुपपत्तेः, कथं नु खल्वित्यादिश्रुतिदूष्यत्वस्य त्वन्मते त्वया अनङ्गीकाराच्च। अन्ये च नासत्ख्यातिवादिनः। पतञ्जलिनाऽप्यसद्ज्ञानं सदविषयकमुक्तं 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति सूत्रे। बौद्धाश्च न सत्त्वेनासद्धीमन्तः। तन्मते अर्थक्रियाकारित्वरूपसत्त्वस्य असति शशविषाणादौ बाधात्। किंच आहुरित्यनेन वचनस्य सत्त्वेनासद्विषयकत्वं लब्धं, तच्च स्वजन्यधीद्वारेति शाब्दधियस्सत्त्वेनासद्विषयकत्वं वाच्यम्। न च तत्सम्भवति, आहार्यमात्रनिष्ठस्य तस्यानाहार्यस्वभावशाब्दज्ञानावृत्तित्वात्। न हि सवह्निर्निर्वह्निरित्याहेत्युक्तेराहार्यप्रतीतिर्लभ्यते। किन्तूक्तशब्दमात्रं वचनकर्मतया लभ्यते; शाब्दाहार्यस्वीकारेऽपि पूर्वपक्षतया न तदुपन्यासो युज्यते। न हि सवह्निर्निर्वह्निरित्याहेति पूर्वपक्षीकृत्य तद्दूषणाय

[1] सत्त्वेन असिद्धीर्नानूद्य बोध्यते. इति पा.

सच्चेतसो यतन्ते । एवंच उक्तश्रुतेः सदेवेत्यादिश्रुत्यर्थाभावबुद्ध्यनुवादकत्वमेव । तच्च सदेवेत्यादिना यत्र यद्विधेयकधीर्जनिता तत्र तदभावबुद्ध्यनुवादकत्वम् । न चासदेवेत्यत्र नञ्समासगतत्वात्तदसम्भव इति वाच्यम् । 'अ मा नो ना प्रतिषेधवाचकाः' इति शाब्दिकोक्तेः अकारस्सम्बोधने अधिक्षेपे निषेधे चेत्यव्ययवृत्त्यादावुक्तेश्च अकारस्य स्वतो निषेधवाचकत्वसम्भवेन नञ्विकारत्वाभावेन समासानन्तर्गतत्वात् । नचैवमपि सदित्यस्य विशेष्यवाचकत्वात् तत्सङ्गतैवकारेण इदमात्मकसतोऽन्यन्नासीदिति बोधादकारेण तादृशसदन्यदासीदिति बोधः । तथाच सत्त्वेनासतो धीरागतैवेति वाच्यम् । 'असदेवेदमग्र आसीत्, तत्सदासीत्' इति श्रुतौ 'असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्' इति सूत्रेणासच्छब्दस्य अव्याकृतार्थकत्वनिर्णयादव्याकृतादन्यत् नासीत् अव्याकृतमासीत् तच्च सदिति व्याकृते अग्रकालासत्त्वमव्याकृते अग्रकालसत्त्वं सदात्मकत्वं च विधीयते । तत्राग्रकाले सत्त्वं स्थितिमात्रमिति भ्रमः असच्छब्देन च तुच्छोक्त्या आसीदिति विरुद्धमिति भ्रमश्च स्यात् अतोऽबाध्यस्वरूपसदात्मकत्वं पृथग्विधेयम् । तत्सदासीदित्यग्रकालीनाबाध्यस्वरूपसत्तात्पर्यग्राहकमात्रं वा प्रामार्थत्वात् । तथाच तदेकवाक्यतया असदेवेत्यादिश्रुतावपि अव्याकृतपदोपसंहारादव्याकृते अग्रकालीनसत्ता अद्वितीयश्रुतावधिकोक्तावपि अव्याकृतव्याकृतयोरग्रकालसत्त्वादभावविधायकत्वाविशेषादसदेवेत्येवकारेणोक्ताभावस्य व्याकृते निषेद्धुमशक्यत्वात् अव्याकृते उक्तसत्ताभावबोधनमात्रस्वीकारात् सत्त्वेनासद्धीर्दूरापास्ता । यदि च सत एव विशेष्यत्वं, तथाऽपि उक्तश्रुत्या 'आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत्' इति व्याकृतार्थकमिषत्पदयुक्तश्रुत्या च एकवाक्यत्वात् सदन्यत् व्याकृतं नासीदित्येवकारेण बोधेप्युक्तव्याकृतमासी-

दित्येवकारेण न बोधो बाधात् किन्तु सदग्रे नासीदिति । न च तावता नः क्षतिः । यदि चात्मा वा इदमित्यादिवाक्यस्य तद्ब्राष्योक्तरीत्या अखण्डसत्स्वरूपमात्रप्रतिपादकत्वं पदान्तरसामानाधिकरण्यं च बाधायामग्रादिकं च न विवक्षितं, तथाच तदेकवाक्यतया सदेवेत्यादेरपि तथात्वं तथाप्यसदेवेत्यादेरुक्त एवार्थः । यदि च तुच्छस्य पदानभिधेयत्वादसतो वाक्यार्थानिवेशेऽपि नञ्युक्तवाक्यस्य तदयुक्तवाक्यार्थधीविरोधित्वमानुभाविकमिति सार्थकत्वात् प्रामाण्यमिति छान्दोग्यभाष्यरीतिराश्रीयते तथाप्यसतस्सत्त्वेन धीर्दूरापास्तैव । ननु बौद्धैः शशविषाणादेरर्थक्रियाकारित्वं नोच्यते कार्यप्रागभावस्य तूच्यते अन्यथा 'तस्मादसतः सज्जायते' इत्यत्र 'कथमसतस्सज्जायेत' इत्याक्षेपस्य 'नासतो दृष्टत्वात्' इत्याद्यसत्कारणत्वनिरासकसूत्राणां चानुपपत्तिः । न चाबाध्यस्वरूपसत्त्वेन प्रतीयमानत्वस्यैव मिथ्यात्वशरीरे निवेशादर्थक्रियाकारित्वस्यासत्यङ्गीकारेऽपि न क्षतिरिति वाच्यम् ; अर्थक्रियाकारिण एवाबाध्यस्वरूपत्वनियमस्य माध्यमिकान्यबौद्धैरङ्गीकारादिति चेन्न । उक्तश्रुतिसन्दर्भो हि इत्थं व्याक्रियते—यतोऽव्याकृतमुक्तसत्त्वाभाववत् सदग्रे नासीदिति वा तस्मादसतः सज्जायते सतस्सन्न जायते अग्रे इत्यनुषङ्गात् पश्चात् सतः कारणत्वेऽपि न क्षतिः, कुतस्तु खलु सोम्यैवं स्यात् उक्तसत्त्वाभावः किं प्रयोज्यः व्याकृताभावस्याग्रे नाशकसामग्रीप्रयुक्तत्वेऽपि सत्त्वाभावस्य न तदिति भावः । कार्यमात्रे सदन्वयात्कथं न कारणं सदित्याशयेनाह—कथमसतस्सज्जायेतेति । सतस्सन्न जायत इति नेत्यर्थः । अथवा अग्रे सदुत्पत्तौ कारणाङ्गीकारे असदेव [1]कारणं स्यादित्यापत्त्यभिप्रायकं तस्मादित्यादि । कुतस्त्वित्यादि तूक्तार्थम् । कारणं विनैवाग्रे कार्याङ्गीकारे समानेऽपि पश्चात् कार्ये कारणाङ्गीकारतदभावाभ्यां 'तद्धैक आहुः' इति श्रुत्युक्तवादस्वभाववादयोर्भेदः । अतः

[1] सदेव.

पञ्चपाद्यादौ तयोः पृथगुपन्यस्य दूषणेऽपि न क्षतिः । उक्तसूत्रं तु स्थिरस्य कारणत्वानङ्गीकारे असदेव कारणं स्यादित्यापाद्य दूषणपरम् । अतएव तत्सूत्रस्थ स्थिर[1] मनुयायिकारणमनभ्युपगच्छतां वैनाशिकानामभावाद्भावोत्पत्तिरित्यापद्येत । दर्शयन्ति चाभावाद्भावोत्पत्तिं 'नानुपमृद्य प्रादुर्भावात्' इति भाष्ये। अस्थिरात्कार्यमिच्छन्तोऽर्थादभावात् भावमाहुरुक्तमेतत् इत्यादि भामती । बौद्धैरभावस्यार्थक्रियाकारित्वानभ्युपगमात् कथमभावाद्भावोत्पत्तिस्तत्सिद्धान्तत्वेनानूद्य निरस्यते । तत्राह—अस्थिरादिति । आपाद्यानुवादोऽयमिति वदिष्यन् क्षणिकस्य कारणत्वासम्भवमाह—उक्तमेतदित्यादिनेति । तत्र कल्पतरुः—यत्तु अभावात्[2] पुनर्नाचेतनत्वादेव कार्योत्पत्तेरनुपपत्तिः अपितु निरुपाख्यत्वादिति; पञ्चपादिकावाक्येन च निरुपाख्योपादानता जगतः सदन्वयादिति विवरणम् । तत्त्वदीपने निरुपाख्यकारणवादिनं प्रति निरुपाख्यत्वादिति हेत्वसम्भवादाहेत्यवतारितं, तदपि यदि निरुपाख्यं कारणं वदेत्तदा उक्तहेत्वसम्भव इत्यभिप्रायकम् । अतएव शून्यमित्यपर इति भाष्ये सुषुप्ते विज्ञानलेशस्याप्यभावात् अकस्मादेवाहमिति धीसमुदायस्योत्थाने दर्शनादकारणस्य कादाचित्कस्य परमार्थवस्तुत्वाभावात् असदवभास एवाहंकार इति टीका, विषयावभासाभावात् निरालम्बनज्ञानयोगादुत्थितेन स्मर्यमाण[3] विज्ञानत्वाच्च सुषुप्तौ विज्ञानाभावः । किंच सविकल्पकस्य स्वविषयविपरीतनिर्विकल्पकालम्बनत्ववदुत्थानकालीनसत्प्रत्ययोपि स्वविषयविपरीतशून्यालम्बनः । तदेतदाह—सुषुप्त इति । अकस्मादिति उत्थानप्रत्ययस्य पूर्व[4] प्रत्ययशून्यतया कारणशून्यतेति भाव इति तत्र विवरणम् । आलम्बनत्वमुत्तरत्वं, अतएव जन्मादिसूत्रे सर्वकार्यमभावपुरस्सरमनुपलभ्यमानपूर्वावस्थत्वात्, यन्नैवं तन्नैवं यथा परकीयात्मेति । विवरणे अभाव-

[1] आस्थिर. [2] भावात्. [3] अस्मर्यमाण. [4] सर्व.

पूर्वकत्वमेवानुमितं न त्वभावजन्यत्वमिति । यदिच केनचित् असत्सत्त्वेन प्रतीयेत तदा सत्तादात्म्यसत्त्वान्यतरवत्त्वमपरोक्षत्वं वा सत्त्वेन प्रतीयमानत्वशब्दार्थः । प्रतीयमानेत्यस्य प्राप्यमानार्थकत्वात् अपरोक्षत्वस्यापि सत्त्वरूपत्वादुक्तार्थपर्यवसानात् । अस्ति च सत्तादात्म्यं स्वभिन्ने तत्त्वं च तत्रातीन्द्रियमपि ईश्वरापरोक्षमेव । न चासत्तथा कस्यापि सम्मतम् । तस्मात् शुक्तिरजतादेः तादृशस्याप्यसादिति व्यवहारो न परस्य युक्तः सत्त्वासत्त्वयोः परस्परात्यन्ताभावरूपत्वोक्तिरपि परस्य न युक्ता, सर्वदेशकालीयात्यन्ताभावप्रतियोगित्वरूपासत्त्वस्य हि भावत्वेन असत्त्वात्यन्ताभावः[1] सत्त्वं वाच्यम् । तथाच त्वन्मते अत्यन्ताभावस्य असन्मात्रप्रतियोगिकत्वस्वीकारेणासत्त्वस्य अत्यन्तासत्त्वापत्तिः । न च तार्किकादिमते तयोर्मिथो विरहत्वोक्तिरिति वाच्यं, स्वमते मिथो विरहत्वेन व्याघातोक्त्यसङ्गतेः । वक्ष्यति व्यासतीर्थः—मया त्रिकालसर्वदेशीयनिषेधाप्रतियोगित्वप्रतियोगित्वे सत्वासत्वे इति स्वीकारादित्यादि । एवं मिथ्यात्वलक्षणे सद्भेदनिवेशेऽप्युक्तैव रीतिः । यत्तु सत्त्वासत्त्वयोरभावसाधनेऽपि ब्रह्मवत् जगत्सद्रूपं स्यात् सद्रूपत्वेन प्रमितत्वाविशेषात् अनेकसद्रूपकल्पनापत्तिरूपः तर्कोऽपि नोक्तप्रमितत्वापवादकः । अन्यथा प्रातीतिकोपि सत्तासम्बन्धो जगति न स्यात्, सत्तास्वरूपस्यैव लाघवेनानङ्गीकारसम्भवादिति जगच्छून्यं स्यादिति । सदसद्भेदादिनिवेशे तु व्याघातसाध्यवैकल्यादिति तन्मुख्यमस्तीत्युक्तम् । ब्रह्मणो बाधाभावेन सद्रूपत्वसिद्धावपि जगतो बाधे सन्देहेन विप्रतिपत्त्यधीनेन तदसिद्धः । अतएव तत्र सत्ताधीः न प्रमा संसर्गखण्डनयुक्तिभिः, संसृष्टधीमात्रस्य अप्रमात्वनिश्चयात् । तर्हि ब्रह्मणोपि सत्तासंसर्गधीरप्रमेति चेदेवमेव । तथापि ब्रह्मस्वरूपस्य अबाध्यत्वोपलक्षितत्वमविवादम् । न च तत्रापि बाधावतारः, बाधसाक्षित्वेन व्याघातात् ।

[1] सत्त्वात्यन्ताभावः.

द्वितीयमिथ्यात्वलक्षणम्

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं वा मिथ्या-

व्याघातसाध्यवैकल्यादिकं तु परस्परविरहत्वानङ्गीकारादेव परिहृतम् । तत्तद्बुद्ध्यभाव एव सत्त्वाभावः तद्भेद एव सद्भेद इत्युक्तरीत्या एकैव तादृशी उक्तिः अग्नौ शलभीकृता ॥

'नेह नानास्ति' इति श्रुत्यर्थे विवदमानं प्रति तन्निर्णयाय साध्यान्तरमाह—**प्रतिपन्नेत्यादि** । प्रतिपन्नोपाधिः स्वप्रकारकधीविशेष्योपाधिः । नन्वविद्योपहितचिद्रूपां धियमादाय अविद्याश्रये शुद्धचिति नाविद्याप्रकारकधीविशेष्यत्वं सम्भवति, यो हि चिच्चेत्यसम्बन्धः यस्य चिच्चेत्यसम्बन्धस्य अवच्छेदकः सः तं प्रकारतारूपं प्रति विशेष्यता न वाऽविद्याचित्सम्बन्धंप्रति स कोऽपि तथा । न चाज्ञोऽहमहमज्ञ इति परस्पराध्यासात् अहङ्कारचित्सम्बधोऽज्ञानचित्सम्बन्धावच्छेदक इति वाच्यम् । अज्ञानचित्सम्बन्धावच्छेदेन अहंकाराध्यासेऽपि अहंकारचित्सम्बन्धावच्छेदेन अज्ञानसम्बन्धाध्यासासम्भवादधिष्ठानस्याधारतावच्छेदकस्य चैव सम्बन्धाध्यासो हि आरोप्यचित्सम्बन्धावच्छेदेन स्वीक्रियत इत्युक्तम्[1] । अज्ञानं तु नाधिष्ठानं न वाऽऽधारतावच्छेदकमिति चेन्न; तथा सति अज्ञानसम्बन्धोप्यहंकारसम्बन्धावच्छेदको न स्यात् । अज्ञानाधारतावच्छेदकत्वस्यैवारोप्यसम्बन्धावच्छेदकत्वे नियामकत्वात् । न चेष्टापत्तिरिति वाच्यम्; अज्ञानविशिष्टे अहंकाराध्यासस्य पञ्चपाद्यादौ सिद्धान्तबिन्दौ चोक्तत्वात् । अथ प्रातीतिकारोप्यसम्बन्धावच्छेदकत्वं प्रत्येवोक्तावच्छेदकत्वस्य नियामकत्वात्तदभावेऽपि अज्ञानस्य[2] व्यावहारिकाहंकारसम्बन्धावच्छेदक-

[1] इति युक्तम्. [2] अज्ञानसम्बन्धस्य.

त्वमुपपद्यते । अतएव कपालादिसम्बन्धावच्छेदेन घटादिसम्बन्धोपि चित्युपपद्यते । स्वेतरकारणकूटविशिष्टं यत्परिणाम्युपादानं तस्त्वाधिकरणक्षणाव्यवहितोत्तरक्षणावच्छेदेन स्वावच्छेदेन च चित्सम्बन्धस्वपरिणामकं भवतीति व्याप्तेः । न च तत्र मानाभावः । मूले संयोग इतिवत् कपाले घटं साक्षात्करोमीति विशेष्यतारूप एकसम्बन्धावच्छिन्नस्य प्रकारतारूपापरसम्बन्धस्यानुभवादिति ब्रूषे, तर्हि उक्तोपादानमुक्तावच्छेदेन चित्सम्बद्धो यः स्वपरिणामस्तदवच्छेदेन चित्सम्बद्धस्वतादात्म्यकं भवतीति व्याप्तेः । अन्यथा घटवच्छेदेन कपालादितादात्म्योत्पत्त्यनुपपत्तेः घटं कपालं साक्षात्करोमीति प्रत्ययस्योक्तादात्म्यविषयकस्यापलापापत्तेः । अहंकारावच्छेदेन चित्सम्बन्धमज्ञानतादात्म्यमपि स्वीक्रियताम् । प्रतियोगितासम्बन्धेन तादात्म्यं प्रत्यज्ञानाश्रयत्वतदवच्छेदकत्वयोरिव परिणामाव्यवहितपूर्ववृत्तिपरिणामित्वस्यापि प्रयोजकतया उत्पद्यमानस्य कपालादितादात्म्यस्य घटाद्यवच्छेदेनेव अज्ञानतादात्म्यस्य अहंकारादिकार्यमात्रावच्छेदक[1] चित्सम्बन्धसम्भवात् । न चैवमेकचित्यहंकाराज्ञानयोः सम्बन्धादहमज्ञ इति धीः, न त्वहंकारविशिष्टे अज्ञानसम्बन्धात् । अन्यथा अहमनुभवामीति धीरहङ्कारविशिष्टे अनुभूतिसम्बन्धादित्यपि स्यादिति विवरणोक्तिर्विरुद्धेति वाच्यम् । तस्यानवच्छिन्नमनाद्यपि तादात्म्यमज्ञानस्य चित्यस्ति भावाकारत्वेन[2] अज्ञानस्य तमआदिवदाश्रितत्वनियमात् । अहंकाराद्यवच्छिन्नचिदाश्रितेन तेनाहंकारादिजननासम्भवात् । मुखमात्राश्रितस्य दर्पणादेर्बिम्बप्रतिबिम्बीभूतमुखभेदकत्ववत् चिन्मात्राश्रितस्याज्ञानस्य बिम्बप्रतिबिम्बीभूताचिद्भेदकत्वौचित्यादित्यत्रैव तात्पर्येण कार्यमात्रावच्छिन्नस्य कार्यस्याज्ञानतादात्म्यस्य निरासे तात्पर्याभावात् । यदि चाज्ञानान्यस्य परिणामिन एव परिणामावच्छेदेन

[1] वच्छेदेन. [2] आवारकत्वेन.

त्वम् । ननु प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य तात्त्विकत्वे अद्वैतहानिः, प्रातिभासिकत्वे सिद्धसाधनं, व्यावहारिकत्वेपि तस्य बाध्यत्वेन तात्त्विकसत्वाविरोधितया अर्थान्तरम् । अद्वैतश्रुतेरतत्त्वावेदकत्वं च तत्प्रयोगिनः प्रातिभासिकस्य प्रपञ्चस्य पारमार्थिकत्वं च स्यादिति चेन्न; प्रपञ्चनिषेधाधिकरणीभूतब्रह्माभिन्नत्वान्निषेधस्य तात्त्विकत्वेऽपि नाद्वैतहानिकरत्वम् । न च तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्य तात्त्विकत्वापत्तिः; तात्त्विकाभावप्रतियोगिनि शुक्तिरजतादौ कल्पिते व्यभिचारात् । अतात्त्विक एव वा निषेधोऽयम् । अतात्त्विकत्वेऽपि न प्रातिभासिकः; किन्तु व्यावहारिकः; न च तर्हि निषेधस्य बाध्य-

---

तादात्म्यं जायत इति यथाश्रुतविवरणोक्त्यनुसारेण स्वीक्रियते, तदा प्रतिपन्नोपाधीत्यस्य स्वप्रकारकवृत्तिविशेषोपाधीत्यर्थः । वृत्तेश्च विशेष्यताप्रकारके यद्यपि नोक्तरूपे अहं सुखीत्यादिज्ञानस्थले वृत्त्यभावात् भ्रमे विशेष्यताद्यभावस्य उक्तत्वेन च चितस्तत्कल्पनावश्यकत्वेन तव[1] तदुभयवद्ज्ञानानुभवोपपत्त्या वृत्तेस्तत्कल्पने मानाभावात् । तथाप्यनुमित्यादिवृत्तेरेकानुयोगिकापरप्रतियोगिकसंसर्गविषयकत्वेनैव परामर्शादिकार्यत्वेन तदावश्यकत्वात् स्वाकारसंसर्गानुयोगित्वप्रतियोगित्वरूपे । तथाच वृत्तेराकाराख्यगौणविषयताश्रयस्य अविद्यातादात्म्यस्य शुद्धचित्यनुयोगित्वसत्त्वात् तन्निष्ठात्यन्ताभावप्रतियोगित्वस्य च अविद्यायां सत्त्वात् तेन सम्बन्धेन तस्याः मिथ्यात्वसिद्धिः । वस्तुतः स्वाधिकरणनिष्ठात्यन्ताभावेत्यादिलक्षणे प्रतिपन्नेत्यादेः तात्पर्यस्य वक्ष्यमाणत्वान्न कोपि दोषः । **त्रैकालिकनिषेधेति**—अत्यन्ताभावेत्यर्थः । **नाद्वैतहानिकरत्वमिति**—निषे-

---

[1] तत एव.

त्वेन तात्त्विकसत्वाविरोधित्त्वादर्थान्तरमिति वाच्यम्; स्वाप्नार्थस्य रजतादेः स्वाप्ननिषेधेन बाधदर्शनात्। निषेधस्य बाध्यत्वं

धत्वस्य काल्पितस्याज्ञानेऽपि सद्रूपाधिष्ठानसामान्यज्ञानसम्भवात् नानुपपत्तिरिति भावः। **स्वाप्नार्थस्य रजतादेः स्वाप्ननिषेधेन बाधेति।** स्वाप्नरजतादेः स्वाप्नाभावविषयकबाधेत्यर्थः। न च मनोवच्छिन्नं जीवरूपं ब्रह्मरूपं वा चैतन्यं अविद्यावच्छिन्नं ब्रह्म वा स्वाप्नाध्यासाधिष्ठानमिति तद्धीरेव स्वाप्नबाधः; न तु स्वाप्नाभावधीः अधिष्ठानाविषयकत्वात्, स्वाप्नस्य प्रातिभासिकत्वेन अज्ञानविषयतानवच्छेदकत्वाच्चेति वाच्यम्। बाधकत्वस्य स्वाप्नाभावबुद्धावप्यानुभविकत्वेन मनोवच्छिन्न इव स्वाप्नाभावावच्छिन्नोपि चैतन्ये अज्ञान[1] विशेषाङ्गीकारसम्भवात्। न च प्रातिभासिकत्वविरोधः, तत्तदज्ञानान्याज्ञानभावस्य तत्र निवेशात्, अन्यथा मनसोऽपि तद्विरोधापत्तेः। तथाचेदं रजताभाववदित्यादिस्वाप्नबुद्ध्युत्तरकालावच्छेदेन रजताभावादौ साक्षिण्युत्पन्ने प्रकाशप्रसक्त्या तदवच्छेदेनाज्ञानविषयत्वसम्भवात्। तदानीमुत्पन्नस्येदं रजतमित्यादिस्वप्नस्य तदुत्तरोत्पन्नया इदं रजताभाववदिति धिया बाधः; अथवा स्वाप्नरजताद्यभावोत्पत्तेः पूर्वं प्रकाशाप्रसक्तावपि पश्चात्तद्धीबाधकत्वानुभवादेव तदवच्छेदेनाज्ञानविषयत्वम्। भाव्यवच्छेदेन ज्ञानविषयत्ववत्। एवंच स्वाप्नेषु प्रातिभासिकत्वं यथाश्रुतमेव। यद्वा बाधोऽत्र न सविलासाज्ञाननिवर्तकधीः, किन्तु मिथ्यात्वनिश्चयः। **निषेध्यस्य बाध्यत्वं**—मिथ्यानिषेधप्रतियोगित्वम्। **पारमार्थिकसत्ताविरोधित्वे**—निषेधसत्ताधिकसत्ताकत्वे। **न तन्त्रम्**—न व्याप्यम्। प्रातिभासिकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमप्रातिभासिकत्वस्य, व्यावहारिकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमव्यावहारिक-

---

[1] अवस्था.

पारमार्थिकसत्त्वाविरोधित्वे न तन्त्रम्। किन्तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्। प्रकृते च तुल्यसत्ताकत्वात् कथं न विरोधित्वम्। न च निषेधस्य निषेधे प्रतियोगिसत्त्वापत्तिरिति वाच्यम्, तत्र हि निषेधस्य निषेधे प्रतियोगिसत्त्वमायाति। यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते न निषेधमात्रं निषिध्यते यथा रजते नेदं रजतमिति ज्ञानानन्तरं इदं नारजतमिति ज्ञानेन रजतं व्यवस्थाप्यते यत्र प्रतियोगिनिषेधयोरुभयोरपि निषेधस्तत्र न प्रतियोगिसत्त्वम्। यथा ध्वंससमये प्रागभावप्रतियोगिनोरुभयोः निषेधः। एवंच प्रकृतेऽपि निषेधबाधकेन प्रतियोगिनः प्रपञ्चस्य निषेधस्य च बाधनात्र निषेधस्य

त्वस्य व्याप्यं नेत्यर्थः। **निषेध्यापेक्षया न्यूनसत्ताकत्वम्।** स्वन्यूनसत्ताकनिषेधप्रतियोगित्वं तन्त्रमित्यनुषज्यते। अप्रातिभासिकनिष्ठं प्रातिभासिकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमप्रातिभासिकत्वस्य, पारमार्थिकनिष्ठं स्वसमानाधिकरणव्यावहारिकात्यन्ताभावप्रतियोगित्वं पारमार्थिकत्वस्य व्याप्यमिति निष्कर्षः। **कथं न विरोधित्वमिति।** व्यावहारिकोक्ताभावप्रतियोगित्वस्य पारमार्थिकत्वाव्याप्यत्वं कथं नेत्यर्थः। **रजतं व्यवस्थाप्यते**—रजतत्वं व्यवस्थाप्यते। रजतत्वस्यात्यन्ताभावरूपो रजतभेदो रजतत्वन्यूनसत्ताक इति न रजतत्वस्य मिथ्यात्वनिश्चयः। न च समसत्ताकयोः भावाभावयोः अविरोधे बाध्यबाधकत्वानुपपत्तिरिति वाच्यम्, अभावग्राहकश्रुत्यादिप्राबल्येन वक्ष्यमाणेन तदुपपत्तेः। न च श्रुत्यनुमित्योः परोक्षभ्रमं प्रत्युच्छेदकत्वादात्मसाक्षात्कारपूर्वं तदुच्छेदस्यादिति वाच्यम्, तदुपादानमूलाज्ञानानिवृत्तेः। न चैवं स्वान्यूनसत्ताकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वेन निश्चितत्वस्य बाध्यत्वरूपत्वे स्वाप्नभावाभावयोः द्वयोरपि स्वप्ने बाधितत्वापत्तिरिति वाच्यम्; उक्त-

बाध्यत्वेपि प्रपञ्चस्य तात्त्विकत्वम्। उभयोरपि निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात्। न चातात्त्विकनिषेधबोधकत्वे

रूपस्य द्वयोः सत्त्वे इष्टापत्तेः। **निषेध्यतावच्छेदकस्य दृश्यत्वादेरिति**। 'नेह नानास्ति' इति श्रुतौ दृश्यत्वं प्रतियोगितावच्छेदकम्। अभावादसाधारणस्य नानात्वस्य वृत्तिविशेषविषयत्वरूपत्वात्। तच्च न पर्याप्त्यवच्छेदकं, येन युगपत्सर्वदृश्याभावसत्त्वात्[1] परेषामिष्टं, परन्तु स्वरूपसम्बन्धेन। न चैकाश्रयेऽपि नाना नास्तीति प्रयोगात् तत्र पर्याप्त्यैव तत्तथेति वाच्यम्, वायौ नानारूपं नास्तीत्यादौ स्वरूपसम्बन्धेनापि तथा वक्तुं शक्यत्वात्। अन्यथा किंचनेत्यस्य वैयर्थ्यात्। केनापि सम्बन्धेन नानात्ववन्नास्तीत्यस्य ततो लाभात्। घटादेर्नाशप्रत्यक्षेण सर्वदृश्यानां युगपदसत्त्वमविवादमिति नेहेत्यादिवाक्यस्यैव वैयर्थ्यापाताच्च। यदिच 'नेह नानास्ति किंचन मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' इत्यस्य 'नात्र काचन भिदाऽस्ति अत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नः मृत्योर्मृत्युमाप्नोति' इत्यादिश्रुत्यैकार्थतया नानेत्यात्मभिन्नार्थकं, किंचनेति च मूढधीविषयार्थकम्। तत्तयोः एकमेवावच्छेदकं अन्यप्रतियोग्यंशे विशेषणमात्रम्। तदुक्तिस्तु भिन्नस्यात्मनि प्रतीयमानस्य तादात्म्यस्यासम्भवात्, विषयस्य विषयिणि स्वप्नवत्कल्पितत्वाच्च सुतरामभाव इति सूचनाय। तवापि[2] तदेव दृश्यत्वम्। आदिना वियत्त्वादिवियदभावत्वादिपरिग्रहः। सम्भवति च भिदानानाशब्दयोः विलक्षणार्थकतया मिथो वैलक्षण्यरूपविषयत्वादेः नेह नानेत्यादौ अवच्छेदकतया धीः। प्रकृतानुमानपक्षतावच्छेदकस्याप्यादिना ग्रहणादनुमानेऽपि निषेध्यतावच्छेदकं तुल्यं लभ्यते। अनुमाने निषेध्यतावच्छेदकं निषेधप्रतियोगित्वांशे विशेष्यतावच्छेद-

---

[1] वभासत्वात्. [2] तदापि.

श्रुतेरप्रामाण्यापत्तिः । ब्रह्माभिन्नं प्रपञ्चनिषेधादिकं अतात्त्विकमित्यतात्त्विकत्वेन बोधयन्त्याः श्रुतेरप्रामाण्यासम्भवात् । नन्वे-

कम् । तेन सामान्यानुमाने पक्षतावच्छेदकस्य प्रतियोगितावच्छेदकतया भानाभावेऽपि न क्षतिः । वस्तुतो निषेधप्रतियोगितावच्छेदकमेवार्थः । सामान्यानुमानेऽपि स्वावच्छिन्ननिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वादेः साध्यत्वात् तुल्यत्वात् भासमानत्वात् । यत्तु स्वाप्नार्थाभावस्य जाग्रत्यबाधानुभवात् न तस्य बाध्यत्वम् । स्वप्नदृष्टत्वेनैव बाध्यत्वे आत्मनोऽपि बाधापत्तिः[1] । एवंच निषेधस्य बाध्यत्वं, प्रतियोगिसत्त्वाविरोधत्वे तन्नमेव । अथ च निषेधनिषेधोपि प्रपञ्चसत्त्वस्यापादकः, तद्विना अनुपपन्नत्वात् प्रतियोगिनो निषेधस्य वा सत्त्वावश्यकत्वात् । अतएव रजतभेदासत्त्वे रजतसत्त्वं त्वयैवोदाहृतम् । प्रागभावप्रतियोगिनोस्तु निषेधः प्रतियोगिसत्त्वं विनाऽप्युपपद्यते, स्वस्यैव सत्त्वादिति । तत्तुच्छम् । जाग्रत्यबाध्यत्वेनानुभूयमानो हि स्वाप्नार्थस्याभावो व्यावहारिक इन्द्रियादिप्रमाणग्राह्यः । तदन्यस्तु स्वाप्नो भावः स्वाप्नवृत्तिविशेषाभिव्यक्तसाक्षिभास्योऽपि न प्रमाणग्राह्यः । किंच स्वप्ने रजतादौ रजतभेदादिकमनुभूयते । तत्र च व्यावहारिकत्वं न शङ्कास्पदम् । रजताद्यात्मकनिषेधेन रजताभावादिकं बाधितमनुभूयते । स च निषेधो न व्यावहारिकः, तदुचितदेशकालकार्यग्राहकाद्यभावात् । स्वप्नदृष्टत्वेनात्मनो न बाध्यत्वापत्तिः दृष्टत्वाभावात्; 'अदृष्टो द्रष्टा' इति श्रुतेः । मूलाविद्यादिकं तु बाध्यमेव, स्वप्नमात्रादृष्टत्वात् । न जाग्रद्बीबाध्यमिति निषेध्यन्यूनसत्ताकत्वेनैव निषेधः प्रतियोगिसत्त्वाविरोधी, न तु बाध्यत्वमात्रेण प्रतियोगिनो निषेधस्य वा सत्त्वं नावश्यकम् । स्वाप्नार्थतन्निषेधयोरसत्त्वात् रजतस्य सत्त्वं तु तदन्यूनसत्ताकाभावा[2]ज्ञानपर्यन्तमिति । **अतात्त्विकेति ।**

[1] बाध्यत्वापत्तेः. [2] सत्ताकाबाधा.

तन्निषेधप्रतियोगित्वं किं स्वरूपेण, उतासद्विलक्षणस्वरूपानुपमर्देन, पारमार्थिकत्वाकारेण वा, नाद्यः, श्रुत्यादिसिद्धोत्पत्तिकस्यार्थक्रियासमर्थस्य अविद्योपादनकस्य तत्त्वज्ञाननाश्यस्य च वियदादेः रूप्यादेश्च धीकालविद्यमानेन असद्विलक्षणस्वरूपेण त्रैकालिकनिषेधायोगात् । नापि द्वितीयः, अबाध्यत्वरूपपारमार्थिकत्वस्य बाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयात् । पारमार्थिकत्वस्यापि स्वरूपेण निषेधे प्रथमपक्षोक्तदोषापत्तिः अतस्तस्यापि पारमार्थिकत्वाकारेण निषेधे अनवस्था स्यादिति चेन्नैवम्; स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगित्वस्य प्रपञ्चे शुक्तिरूप्ये च अङ्गीकारात् । तथाहि शुक्तौ रजतभ्रमानन्तरं

उक्तमिथ्येत्यर्थः । तथाच 'यजेत' इत्यादिश्रुतेरिवोक्तश्रुतेरपि व्यावहारिकं प्रामाण्यमक्षतम् । तात्त्विकं तु तन्नास्त्येवेति भावः । **किं स्वरूपेणेति**—स्वं मिथ्यात्वधर्मि तान्निष्ठं विषयत्वादिरूपं स्वरूपम् । **पारमार्थिकत्वाकारेणेति । पारमार्थिकत्वं**—अबाध्यत्वव्यापकविषयताकधीः । **तदाकारः**—तद्व्यक्तित्वविशिष्टं तस्त्वरूपम् । तेनोक्तधीत्वस्य तद्व्यक्तित्वापेक्षया गुरुत्वेऽपि न क्षतिः, न वाऽऽकारपदवैयर्थ्यम् । **अबाध्यत्वरूपेति** । बाध्यत्वविरोधिरूपेत्यर्थः । **बाध्यत्वेति** । प्रपञ्चगतेत्यादिः । **निरूप्यत्वेनेति** । उक्तविरोधस्य निरूप्यत्वात् तद्विशिष्टे तदुक्तिः । न च उक्त[1] पारमार्थिकत्वस्य तद्व्यक्तित्वेन अवच्छेदकत्वज्ञानं मिथ्यात्वविरोधत्वज्ञानं विनापीऽति नान्योन्याश्रयः इति वाच्यम्; तद्विना वियत्त्वादि[2]स्वरूपवदवच्छेदकत्वानिश्चयात् । तद्धीव्यक्तेः प्रपञ्चविषयकत्वशङ्कायाः प्रपञ्चाविषयकत्वरूपविरोधनिर्णयं विना निवर्तयितुमशक्यत्वात् । न च तावताऽपि तद्धियः प्रपञ्चाविषयकत्वनिरूपणमेव अपेक्षतां, न तु प्रपञ्चमिथ्यात्वनिरूपणमिति

---

[1] उक्तरू. [2] विपक्षादि.

वाच्यम्। मिथ्यात्वेन अनिश्चितप्रपञ्चस्य तद्धीविषयत्वशङ्कासम्भवात्, अबाध्यत्वव्यापकत्वानुरोधात्। न च ब्रह्ममात्रे श्रुतेः तात्पर्यादेव श्रुतिजन्यतद्धीः तथात्वनिश्चय इति वाच्यं, तात्पर्ये संशयानं प्रत्येव प्रकृतानुमानसार्थक्यात्। नापि प्रतिबन्धकवशा तद्धीः प्रपञ्चाविषयणीति निर्णेयमिति वाच्यम्, मिथ्याविषयकत्वे अविद्यानिवर्तकत्वानुपपत्त्यैव प्रतिबन्धकत्वस्य निश्चेयत्वात्। नापि 'तमेवं विदित्वा' इत्यादिश्रुतेः तथा, तस्या अपि उक्तानुपपत्तिमाश्रित्यैव तथा बोधकत्वात्। अन्यथा तन्मात्रधियः अविद्यानिवर्तकस्य अदृष्टद्वारकत्वापत्तेः। अविद्यासमानविषयकत्वं तु शुद्धब्रह्मविषयिण्याः अन्याविषयकत्वेऽप्युपपद्यते न हि[1] घटशुक्तिविषयिणी धीः न शुक्त्यज्ञाननिवार्तिका, मिथ्यात्वे निश्चिते तु मिथ्यार्थे तत्वावेदकश्रुतितात्पर्याभावात्। कदाचित्सामग्रीवशात् मिथ्याविषयकब्रह्मज्ञानोत्पादेऽपि तदभावकाले ब्रह्ममात्रधीः उक्तश्रुतिजन्येति भवति निश्चयः। ततश्च तस्याः अवच्छेदकत्वधीसंभव इति भवत्येवान्योन्याश्रयः। यद्यपि स्वरूपस्यावच्छेदकत्वपक्षे स्वावच्छेदकावच्छिन्नवन्निष्ठात्यन्ताभावप्रतियोगित्वादीव[2] पारमार्थिकत्वावच्छेदकत्वपक्षेऽपि स्वसमनियतधर्मावच्छिन्नवन्निष्ठेत्यादि वक्तुं शक्यम्। स्वप्रतियोगिताव्यापकमात्रस्य व्याप्यमात्रस्य वा उक्तौ प्रमेयत्वाद्यवच्छिन्नवन्निष्ठघटाद्यभावस्य तद्भटवन्निष्ठस्य एतद्भटत्वेन घटाभावस्य वा प्रतियोगित्वं घटादौ सिद्धमेवेति समनियतेति। एवंच पारमार्थिकत्वनिष्ठावच्छेदकत्वस्य लक्षणे प्रवेशो निष्प्रयोजनः भवति[3] तथाऽपि घटादौ पटत्वेन घटाद्यभावीयप्रतियोगितायाः घटपटोभयत्वाद्यवच्छिन्नप्रतियोगितायाश्च स्वसमनियतान्यतरत्वाद्यवच्छिन्नवन्निष्ठाभावीयायाः घटादौ सिद्धत्वात् लाघवाच्च स्वाश्रयसमानाधिकरणात्यन्ताभावीयपारमार्थिकत्वावच्छिन्नप्रतियोगित्वादिकं वाच्यमिति भवत्यन्योन्याश्रयता। विषयता-

[1] न वा. [2] योगित्वादिति [3] भाति.

अधिष्ठानतत्त्वसाक्षात्कारे रूप्यं नास्ति नासीन्न भविष्यतीति स्वरूपेणैव 'नेह नाना' इति श्रुत्या च प्रपञ्चस्य स्वरूपेणैव निषेधप्रतीतेः । न च तत्र लौकिकपरमार्थरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्, भ्रमबाधयोर्वैयधिकरण्यापत्तेः अग्रसक्तप्रतिषेधापत्तेश्च । न च तर्ह्युत्पत्त्याद्यसम्भवः । न ह्यनिषिद्धस्वरूपत्वमुत्पत्त्यादिमत्त्वे तन्त्रम् । परैरनिषेध्यरूपत्वेन अङ्गीकृतस्य वियदादेरुत्पत्त्याद्यनङ्गीकारात्। किन्तु वस्तुस्वभावादिकमन्यदेव किञ्चित्प्रयोजकं वक्तव्यम् । तस्य मयाऽपि कल्पितस्य स्वीकारात्। न च त्रैकालिकनिषेधं प्रति स्वरूपेणापणस्थं

संबन्धेन पारमार्थिकत्वस्य अवच्छेदकता वाच्या, अन्यथा कालिकादिना पारमार्थिकत्वेन घटत्वाद्यभावमादाय घटत्वादौ सिद्धसाधनाद्यापत्तेः न चाधिकरणान्तं व्यर्थम् । पारमार्थिकत्वेन तद्घटादेः स्वानधिकरणे अभावस्य सिद्धत्वात्, सामान्यरूपेण विशेषाभावानभ्युपगमेऽपि उक्ताभावमादाय अर्थान्तरापत्तेः । यत्तु प्रपञ्चसत्यत्वमते बाध्यत्वाप्रसिद्ध्या अबाध्यत्वव्यापकविषयताकधीरपि अप्रसिद्धेति बाध्यत्वसिद्ध्या उक्तधीसिद्धिः, तत्सिद्धौ च तदवच्छिन्नाभावघटितबाध्यत्वासिद्धिरीति अन्योन्याश्रय इति, तन्न; मिथ्यात्वरूपबाध्यत्वासिद्धावपि अबाध्यं सर्वं वाच्यमिति धियः प्रपञ्चसत्यत्वमतेऽपि स्वीकारात् प्रमेयत्वस्यैव अबाध्यत्वरूपस्य तत्र भानस्वीकारात् । अतएव तम इति धीविशेष्यः भावोऽभावो वेति विवदन्ते । **अनवस्तेति**—अबाध्यं सर्वं वाच्यमिति धियः एकस्या अन्यया भावः[1] तस्या अप्यन्यया एवमन्यासामप्यन्याभिः इत्यनवस्था । ननु एकया स्वभिन्नदृश्यमात्रस्य स्वस्य चाभाव इति वा, स्वेन स्वभिन्नदृश्यस्य स्वाविषयकयाऽन्यया च स्वस्याभाव इति वा, अबाध्यत्वव्यापकविषयताकवृत्त्युभयावृत्तिधर्मनिष्ठानवच्छिन्न-

[1] अभावः.

रूप्यं पारमार्थिकत्वाकारेण प्रातिभासिकं वा प्रतियोगीति मतहानिः स्यादिति वाच्यम् । अस्याचार्यवचसः पारमार्थिक-लौकिकरजततादात्म्येन प्रतीतं प्रातिभासिकमेव रजतं प्रतियोगी-त्यर्थः । तच्च स्वरूपेण पारमार्थिकत्वेन वेत्यनास्थायां वाशब्दः ।

प्रतियोगितावच्छेदकतावच्छेदकता यस्य तादृशाभाव इति वा वाच्यं, अतो नानवस्थेति चेन्न ; पारमार्थिकत्वाकारेण निषेधेऽनवस्थेति शब्देन तं तं पूर्वपक्षमानूद्य दोषान्तराणामुक्तत्वात् । तथाहि, पारमार्थिकत्वाकारेणेत्यस्य स्वेनेत्यर्थकत्वात् आद्यपक्षस्यानुवादः । तदा अनवस्थेत्यस्य साध्यसिद्धिरूपावस्थाविरोध्यर्थकतया अर्थान्तरमर्थः । ज्ञानं सर्वं स्वविषयकमिति[1] मते विषयतया स्वस्य स्वाविशिष्टत्वात् तादृशधियः तद्व्यक्तित्वावच्छिन्नाभावस्यैव तन्मते निवेशसम्भवात् । स्वाश्रये स्वस्य स्वेनाभावः स्वाविषयत्वं स्वस्यादायैव वाच्यमित्यर्थान्तरात्, स्वभिन्नेन पारमार्थिकत्वेनेत्यर्थकत्वात् द्वितीयपक्षस्योक्तिः । तदा 'अनवस्था' इत्यस्य एकरूपेण साध्यस्थापनाभावोऽर्थः । स्वभि-न्नस्य स्वेन स्वस्यान्येन अभावे वाच्ये एकावच्छिन्नाभावघटित-रूपेण साध्यस्थापनस्यासम्भवात् । उक्तोभयावृत्तिविशिष्टेनेत्यर्थ-कत्वात् तृतीयपक्षोक्तिः । तदा अनवस्थेत्यस्य विषयतासंबन्धेन घटत्वादेः प्रपञ्चनिष्ठप्रतियोगितायामवच्छेदकत्वसंभवात् घटत्वाद्यपेक्षया तत्तद्व्यक्तीनां गुरुत्वेनानवच्छेदकत्वात् । प्रपञ्चसत्यत्वमते बाध्य-त्वाप्रसिद्धेश्च । उक्ताभावाप्रसिद्धया तद्घटितसाध्यस्थापनाभावोऽर्थः । तस्यापीत्यपिशब्दात् तद्व्यक्तित्वविशिष्टेन उक्तरीत्या तद्व्यक्तित्वविशिष्टा-वच्छिन्नाभावघटितसाध्यस्य अप्रसिद्धया स्थापनाभावः । तेन स्वस्व-भिन्नयोः पक्षयोः व्यक्तिद्वयावच्छिन्नाभावद्वयघटितसाध्यद्वयकरणेऽपि दोष उक्तः । **अनास्थायामिति** । विकल्प इत्यर्थः । उक्तरीत्या

---

[1] स्वाविषयक.

तत्तद्व्यक्तीनां अनवच्छेदकत्वेऽपि अबाध्यत्वोपलक्षितस्वरूपेणाभावनिवेशे न दोषः। ऐक्यस्य संबन्धेनावच्छेदकत्वं वाच्यम्। तेन उक्तस्वरूपस्य आध्यासिकतादात्म्येन प्रपञ्चसम्बधित्वेऽपि, न स्वरूपावच्छेदकत्वपक्षोक्तदोषः। ऐक्यस्य सिद्धान्ते सम्बन्धत्वाभावेऽपि न क्षतिः। परैस्तदभ्युपगमात्, तद्रीत्या तान्प्रत्युक्तिसंभवात्। गङ्गातरणादे[1] रधर्मस्य धर्मविधयेव असम्बन्धस्यापि सम्बन्धविधया प्रतियोगितायामवच्छेदकत्वसंभवाच्च। न च पूर्वक्षणाद्यवच्छिन्नोक्तस्वरूपात्मकघटाद्यभावप्रतियोगित्वमादाय घटादौ सिद्धसाधनतावारणाय अनवच्छिन्नावच्छेदकतानिवेशे घटादिरूपस्याखण्ड[2] त्वाभावेन तदसंभवात्। अखण्डघटत्वाद्यबाध्यस्वरूपनिष्ठं ऐक्यसम्बन्धावच्छिन्नं प्रतियोगितावच्छेदकत्वं यस्य तादृशघटाद्यभावप्रतियोगित्वमादायांशतो घटादौ सिद्धसाधनमिति वाच्यं; पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे तदसंभवात्। सामानाधिकरण्येन तदुद्देश्यत्वेऽपि सखण्डस्यापि घटादिस्वरूपस्य अनवच्छिन्नावच्छेदकतावत्त्वे बाधकाभावेन अदोषत्वात्। अबाध्यत्वव्यापकविषयतयाऽभावनिवेशसंभवात्। एतेन स्वान्येन तत्तदबाध्यस्वरूपेण अवच्छिन्नप्रतियोगिताकाभावमादाय दृश्यमात्रे सिद्धसाधनमित्यपास्तम्। न च निर्विकल्पकविषयता तादृश्येका ब्रह्मणीव घटादावपीति स्वरूपावच्छेदकत्वपक्षीयदोष इति वाच्यं; समवायवत्सिद्धान्ते विषयताया आधारभेदे ऐक्यासंभवात् अबाध्यं सर्वं मेयं इत्यादिसविकल्पकीयमुख्यविशेष्यताव्यक्त्याऽभावनिवेशाच्च। बाध्यत्वादिनिष्ठेन विशेष्यत्वेन अभावस्य प्रतियोगित्वमादाय घटादौ सिद्धसाधनस्य वारणाय मुख्येति। एवंच न तार्किकादिमते बाध्यत्वाप्रसिद्धिः दोष इति बोध्यम्। किंच शुक्तिरजतादौ बाध्यत्वस्वीकार एव प्रकृतानुमानावतारः अन्यथा साध्यवैकल्यात्। न चोक्तविशेष्यतायाः

[1] गगनादे. [2] रूपस्य खण्ड.

एतावदुक्तिश्च पुरोवर्तितादात्म्येनैव रजतं प्रतीयत इति मत-निरासार्थं लौकिकपरमार्थरजततादात्म्येनापि प्रतीयत इति प्रति-

प्रपञ्चवृत्तित्वशङ्कायां स्वरूपावच्छेदकत्वपक्षीयदोषात् तन्निरासार्थं प्रपञ्चे मिथ्यात्वरूपबाध्यत्वनिश्चयापेक्षया अन्योन्याश्रय इति वाच्यं; येन हि रूपेण यद्यत्र निश्चितं न तेन तस्य तत्राभावधीः। प्रकृते च वियत्त्वाद्यवच्छिन्नवत्त्वेन वियदाद्याधिकरणं निश्चितं न तूक्तपारमार्थिकत्वावच्छिन्नत्वेन, वियदादौ पारमार्थिकत्वस्य संदिग्धतया तद्वच्छिन्नवत्तया तत्र संशयस्याप्यौचित्यावर्जितत्वात् संशयान[1] प्रत्येव प्रकृतानुमानसाफल्यात्। स च अभावः अधिकरणात्मकः चित्स्वरूपश्चेत्पारमार्थिकः नोचेत्तदन्यः। यत्तु तादात्म्येन ब्रह्मणो[2] दृश्यसंबद्धत्वाद्यद्यप्यबाध्यस्वरूपं ब्रह्म वियत्त्वादितुल्यं; तथाऽपि तेनैवाभावो निवेश्यः अन्यस्वरूपावच्छिन्नाभावस्य बाध्यत्वात्[3] प्रतियोगिसत्त्वाविरोधित्वाद्यापत्तिदृष्टत्वादिति श्रीमदाश्रमादिभिरुक्तं तन्मिथ्याप्रतियोगित्वान्मिथ्यात्वे सत्यावच्छिन्नप्रतियोगिताकत्वात्सत्यत्वं किं न स्यात्। तस्मात् अभावमिथ्यात्वादौ प्रतियोग्यादिमिथ्यात्वादिकमप्रयोजकमित्यभिप्रायकम्। अन्यथा मिथ्याप्रतियोगिकत्वान्मिथ्यात्वस्य दुर्वारत्वात्। इदं तु तत्र चिन्त्यं— तादात्म्यसंबन्धावच्छिन्नावच्छेदकत्वानिवेशे स्वरूपेण पारमार्थिकत्वेन[4] वा प्रतिपन्नोपाधावभाव इति पक्षयोरुपपादनासंभवः। ऐक्यसंबन्धेन तन्निवेशे उक्तरीत्या सिद्धसाधनं, उक्तविशेष्यतानिष्ठावच्छेदकतानिवेशे तु अभावासत्यत्वाप्रतिक्षेपः व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमोक्तिविरोधश्च। तस्मात् स्वरूपेणाभाव इति पक्षमेवादाय तैस्तथोक्तम्। एकेनैव स्वरूपेणाभावमादाय सर्वत्र मिथ्यात्वं वक्तुं शक्यते इति तत्र भावः। पारमार्थिकत्वेनाभावपक्षस्योपपादनं तु यथोक्तमेव

[1] तत्संशयानं. [2] ब्रह्मणि. [3] अबाध्यत्वात्. [4] अपारमार्थिकत्वेन.

पादयितुं च। तदुक्तं तत्त्वदीपिकायां—'तस्माल्लौकिकपरमार्थ-रजतमेव नेदं रजतमिति निषेधप्रतियोगीति पूर्वाचार्याणां वाचोयुक्तिरपि पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनात् लौकिक-परमार्थरजतत्वेनापरोक्षतया प्रतीतस्य कालत्रयेऽपि लौकिक-परमार्थरजतमिदं न भवतीति निषेधप्रतियोगितामङ्गीकृत्य नेत-व्या' इति। अयमाशयः—एकविभक्त्यन्तपदोपस्थापिते धर्मिणि प्रतियोगिनि च नञोऽन्योन्याभावबोधकत्वनियमस्य व्युत्पत्ति-बलसिद्धत्वात् घटः पटो न भवतीति वाक्यवदिदं रजतं न भवतीति वाक्यस्य अन्योन्याभावबोधकत्वे स्थिते अभिलाप-जन्यप्रतीतितुल्यत्वात् अभिलप्यमानप्रतीतेः नेदं रजतमिति वाक्याभिलप्यप्रतीतेरन्योन्याभावविषयत्वमेव। तथाचेदंशब्द-निर्दिष्टे पुरोवर्तिप्रातीतिकरजते रजतशब्दनिर्दिष्टव्यावहारिक-रजतान्योन्याभावप्रतीतेरार्थिकं मिथ्यात्वम्। नात्र रजतमिति वाक्याभिलप्या तु प्रतीतिरत्यन्ताभावविषया भिन्नविभक्त्यन्त-पदोपस्थापितयोरेव धर्मिप्रतियोगिनोर्नञः संसर्गाभावबोधक-त्वनियमात्। सा च पुरोवर्तिप्रतीतरजतस्यैव व्यावहारिकमत्य-न्ताभावं विषयीकरोतीति कण्ठोक्तमेव मिथ्यात्वम्। अतो

प्रातीतिकव्यावहारिकरजतयोस्तादात्म्यं प्रतीयते इत्यत्र संवादमाह-**तदुक्त-**मिति। निषेधोपयोगिनीं प्रसक्तिमाह—**परमार्थरजतत्वेन अपरो-क्षतयेति**। उक्तरजततादात्म्येन अपरोक्षतयेत्यर्थः। उक्ततादात्म्या-रोपं विना व्यावहारिकमिच्छतः प्रातीतिके प्रवृत्तिर्न स्यादित्याशयेनाह—**रजतार्थिन** इति। व्यावहारिकरजतार्थिन इत्यर्थः। उक्तनिषेधस्य मिथ्यात्वाघटकत्वेऽपि तद्बलान्मिथ्यात्वमिति मिथ्यात्वविचारे तदुक्तचुप-योगमाह—**आर्थिकामिति**। स्वसमानाश्रयात्यन्ताभावप्रतियोगित्वं विना

नापसिद्धान्तो नान्यथाख्यात्यापत्तिः न वा ग्रन्थविरोधः इत्यनवद्यम् । नन्वेवमत्यन्तासत्त्वापातः । प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं ह्यन्यत्रासत्त्वेन सम्प्रतिपन्नस्य घटादेः सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वं पर्यवसितम् । अन्यथा तेषां अन्यत्र सत्त्वापातात् । न हि तेषामन्यत्र सत्ता सम्भवतीति त्वदुक्तेश्च । तथाच कथमसद्वैलक्षण्यम् । न हि शशशृङ्गादेरितोऽन्यदसत्त्वम् ।

पारमार्थिकान्यत्वं अनुपपन्नमित्यर्थाद्बुद्धमित्यर्थः । **नान्यथाख्यात्यापत्तिरिति** । व्यावहारिकस्य शुक्तिगतनिषेधप्रतियोगित्वे तत्र तस्यैव प्रसक्तेर्वाच्यतया अन्यथाख्यात्यापत्तिः । यत्तु प्रातीतिकव्यावहारिकरजतयोः तादात्म्यधीर्न युक्ता तयोरेकस्य अपराज्ञानाकार्यत्वात् प्रातीतिकस्य स्वोपादानाज्ञाननिवर्तकधीविषयेणैव तादात्म्यप्रतीतेश्च । न हि पुरोवर्तितत्त्वाज्ञानेऽपि व्यावहारिकरजतत्वज्ञानात् प्रातिभासिकरजतं निवर्तते, शुक्लः पट इति तु शुक्लपटयोः एकाज्ञानकार्यत्वात् एकत्राध्यासाच्च । न चैवं घटपटयोरपि तादात्म्यबुद्ध्यापत्तिः, बुद्धौ सत्यां तस्य निमित्तत्वकल्पनात् आरोपे सतीति न्यायात् । व्यावहारिकरजतस्य च भ्रमस्थले भानानुपपत्तिः, सन्निकर्षादिविरहात् । तस्माद्व्यावहारिकरजतमेव स्वरूपेण निषिध्यते शुक्ताविति एव त्वदाचार्यवाचामर्थ इत्यपसिद्धान्तादिकं दुर्वारमिति; तत्तुच्छम् । यद्यदज्ञानाकार्यं तत्तत्तादात्म्यवन्नेति हि न नियमः, रजताज्ञानाकार्ये इदमर्थे रजततादात्म्यस्वीकारात् । नापि ययोरेकमपि नापराज्ञानकार्यं तयोः न तादात्म्यमिति नियमः; इदंत्वद्रव्यत्वादिधर्माणां रजतस्य च मिथोऽज्ञानाकार्यत्वेऽपि तादात्म्यारोपात्, जपाकुसुमलौहित्यस्य स्फटिकस्य च मिथोज्ञानाकार्यत्वेऽपि तादात्म्याध्यासात् । तत्र पूर्वसिद्धधर्मिणो हि धर्मः संसृष्टतयैवाध्यस्यते । संसर्गश्च जातिगु-

न च निरुपाख्यत्वमेव तदसत्त्वम्, निरुपाख्यत्वपदेनैव व्याख्यायमानत्वात्। नाप्यप्रतीयमानत्वमसत्त्वम्, असतोऽप्रतीतौ असद्वैलक्षण्यज्ञानस्यासत्प्रतीतिनिरासस्य असत्पदप्रयोगस्य च अयोगात्। न चापरोक्षतया अप्रतीयमानत्वं तत्, नित्यातीन्द्रियेष्वतिव्याप्तेः, इति चेन्नैवं; सर्वत्र त्रैकालिकनिषेधप्रति-

णादीनाम् तादात्म्यमेव सुखादेस्त्वाधारता, अहं सुखीत्यादिप्रतीतेः लौहित्यस्येन्द्रियसन्निकृष्टत्वेन प्रत्यक्षतासंभवात्तदानीमुत्पत्तिस्वीकारस्य निष्प्रयोजनत्वाच्च। आत्मनः कर्तृत्वादिकमध्यस्तं स्फटिकमणेरिव लोहितिमा इति निरासे तात्पर्यं न तु लौहित्यस्य स्वरूपाध्यासे दूरस्थवृक्षयोराच्छादितमिथस्संयुक्तप्रान्तयोः वंशखड्गयोश्च तादृशयोः तादात्म्याध्यासाच्च। न च तत्तत्तादात्म्यं भावरूपं नाध्यस्यते किन्तु भेदाभाव इति वाच्यं; प्रकृतेऽपि तत्सम्भवात् इति अहङ्कारटीकावाक्यस्य व्याख्यातत्वात्, स्वप्नादावपि भिन्नत्वेनाज्ञायमानयास्तादात्म्यानुभवाच्च। तत्रैकाज्ञानकार्यत्वं तादात्म्यमित्युक्तौ भेदधीकालेऽपि तादात्म्यधीस्यात् तादात्म्यजातीययोस्तज्जातीयतादात्म्यसंस्कारा[1]दित्युक्तौ तु प्रकृते न दोषः। अतएव प्रातीतिकस्य स्वोपादानाज्ञानेत्याद्ययुक्तं प्रातीतिकयोः पश्चाद्दूरस्थत्वादिदोषयोगात् मिथस्तादात्म्यानुभवात् प्रातीतिकरजतादौ तदनधिष्ठानस्य सन्निहितसदृशव्यावहारिकस्य पश्चात्तनदोषात्तादात्म्यानुभवाच्च बुद्धौ सत्यामित्याद्यप्ययुक्तं, आरोपे सतीत्यादिन्यायाद्धि यद्रूपावच्छिन्नयोः तादात्म्यधीः आनुभाविकी तद्रूपावच्छिन्नयोः तादात्म्यसंस्कारदोषविशेषादिकं तत्र नियामकं न त्वेकाज्ञानकार्यत्वादि तस्मिन् सत्यपि तदभावात् असत्यपि तद्भावाच्च इति सिद्धम्। अतः व्यावहारिकप्रातिभासिकरजतयोरपि तादात्म्यधीस्तथेति तत्रापि तथा नियामकमव्याहतमिति स्फुट

[1] तादात्म्यात् सजातीययोस्तज्जतीय संस्कारादिति पाठान्तरम्.

योगित्वं यद्यपि तुच्छानिर्वाच्ययोस्साधारणम्। तथापि क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वं अत्यन्तासत्त्वम्। तच्च शुक्तिरूप्ये प्रपञ्चे च बाधात् पूर्वं नास्त्येवेति न तुच्छत्वापत्तिः। न च बाधात्पूर्वं शुक्तिरूप्यं प्रपञ्चो वा सत्त्वेन न प्रतीयते। एतदेव सदर्थकेनोपाधिपदेन सूचितम्। शून्यवादिभिः सदधिष्ठानकभ्रमानङ्गीकारेण क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्व-

---

एव ते स्ववाक्यार्थाबोधः। तस्मात्तदवच्छिन्नाश्रयताकारज्ञानकार्यत्वस्य संस्कारदोषविशेषादेश्च विकल्पेन तत्तादात्म्योत्पत्तिनियामकत्वान्नानुपपत्तिः। व्यावहारिकरजतत्वेन सन्निकर्षादिविरहेऽपि न क्षतिः। तादात्म्यप्रतीतेः तदंशे स्मृतित्वात् इदं सुरभीति धीवत्। तत्रैका प्रमा वृत्तिः इतरत्र प्रमाभ्रमवृत्त्यवच्छिन्नमेकचैतन्यमिति तु विशेषः। इन्द्रियसंयुक्तादात्म्यादेः तत्र सन्निकर्षत्वसम्भवाच्च। तस्मान्नापसिद्धान्तादिकम्। सत्त्वेनाप्रतीयमानत्वं चेदसत्त्वं तदा असच्चेत्सत्त्वेन न प्रतीयेतेत्यध्यासमात्रं पक्षीकृत्य आपादनं न स्यात् आपाद्यापादकयोरभेदात् इष्टापत्तेः[1]। अत उक्तं—**सत्त्वेन प्रतीत्यनर्हत्वमिति**। सत्त्वविषयकधीविषयत्वं सत्तादात्म्यतत्त्वान्यतरत्वं वा तदर्हत्वमिति भावः। नन्वेवमपि अत्यन्तासत्त्वापत्तिः कथं निरस्ता? तत्राह—**एतदेवेति**। सत्त्वेन प्रतीयमानत्वमेवेत्यर्थः। **सूचितमिति**। प्रतिपन्नपदेन स्वप्रकारकधीविशेष्यत्वस्य उपाधिपदार्थे लाभेन स्वप्रकारकधीविशेष्यताश्रयसद्वृत्त्यत्यन्ताभावप्रतियोगित्वलाभात् प्रपञ्चे सत्त्वेन प्रतीयमानत्वलाभः पर्यवसित इति भावः। **शून्यवादिभिः** ज्ञानादत्यन्तभिन्नो योऽर्थः सोऽळीक इति वादिभिः। **सदधिष्ठानकभ्रमेति**। अबाध्यविशेष्यकाळीकप्रपञ्चप्रकारकज्ञानेत्यर्थः। विज्ञानं सत्यं तदाकारस्तद्विषयः तद्धर्मत्वात् तद्भिन्नाभिन्नः ततोऽत्यन्तभिन्नस्त्वळीकः

---

[1] अनिष्टापत्तेः.

रूपासद्वैलक्षण्यस्य शुक्तिरूप्ये प्रपञ्चे च अनङ्गीकारात् । नन्वेवं सति यावत्सदधिकरणात्यन्ताभावप्रतियोगित्वं पर्यवसितम् । तथाच केवलान्वय्यत्यन्ताभावप्रतियोगिषु अवृत्तिषु गगनादिषु तार्किकाणां सिद्धसाधनम् । यदधिकरणं यत्सत् तन्निष्ठात्यन्ताभावप्रतियोगित्वं तस्य मिथ्यात्वमिति विवक्षायां अधिकरणपदेनावृत्तिनिराकरणेऽपि संयोगसम्बन्धेन समवायसम्बन्धेन वा यत् घटाधिकरणं समवायसम्बन्धेन संयोगसम्बन्धेन वा घटस्य तन्निष्ठात्यन्ताभावप्रतियोगितया सर्वेषु वृत्तिमत्सु दुरुद्धरं सिद्धसाधनम् । येन सम्बन्धेन यत् यस्याधिकरणं तेन सम्बधेन तन्निष्ठात्यन्ताभावप्रतियोगित्वमिति विवक्षायां अव्याप्यवृत्तिषु संयोगादिषु सिद्धसाधनमिति चेन्न ; येन रूपेण यदधिकरणतया यत् प्रतिपन्नं तेन रूपेण तन्निष्ठात्यन्ताभावप्रतियोगित्वस्य प्रतिपन्नपदेन सूचितत्वात् । तच्च रूपं सम्बन्धविशेषोऽ-

---

इति विज्ञानवादः । तदुत्तरभूमिरूपे शून्यवादे तु विषयस्तथैव, विज्ञानं तु स्वाकारसहितं मिथ्येति विशेषः । तत्रांत्येतु अबाध्यस्वरूपमेव न स्वीक्रियते कुतः ताद्विशेष्यकज्ञानं, आद्ये तु विज्ञानस्य अबाध्यस्य नाळीकप्रकारकज्ञानविशेष्यता, परमार्थालीकयोः एकज्ञानाविषयत्वात् । अत उक्तमतयोरलीकत्वमादायाकाशादौ नार्थान्तरमिति भावः । **यावत्सदिति** । स्वानाश्रयनिष्ठाभावप्रतियोगित्वस्य सिद्धत्वात् यावदिति प्रतिपन्नेति देयमेव । अन्यथा आकाशादावत्यन्तासत्त्वमादाय विज्ञानवादसम्मतमर्थान्तरादिति[1] भावः । **सिद्धसाधनमिति** । सामानाधिकरण्येनानुमितेरुद्देश्यत्वे सिद्धसाधनम् । अन्यथा तु प्रपञ्चस्यावृत्तित्वमादायार्थान्तरम् । **यदधिकरणं**— यस्याधिकरणम् ।

---

[1] सम्मतार्था.

वच्छेदकविशेषश्च । न हि सम्बन्धविशेषमन्तरेण भूतले घटाधिकरणता प्रतीयते । अवच्छेदकविशेषमन्तरेण वा वृक्षे कपिसंयोगाधिकरणता । तथाच येन सम्बन्धविशेषेण येन चावच्छेदकविशेषेण यदधिकरणताप्रतीतिर्यत्र भवितुमर्हति तेनैव सम्बन्धविशेषेण तेनैव चावच्छेदकविशेषेण तदधिकरणकात्यन्ताभावप्रतियोगित्वं तस्य मिथ्यात्वमिति पर्यवसिते क्व सिद्धसाधनम् । यदि पुनः ध्वंसप्रागभावप्रतियोगित्वमिवात्यन्ताभावप्रतियोगित्वमाकाशादौ न स्यात् । साधकमानाभावस्य

एवंच यावत्पदं व्यर्थमिति भावः । तद्वत्तया धीस्तच्छून्येऽपि भवतीति सिद्धसाधनम् । व्याप्यवृत्त्यधिकरणताधीश्चावच्छेदकं विनैवेत्यत आह— **तथाचेति** । यत्रेत्यधिकरणतान्वयि । तथाच यन्निष्ठा यत्सम्बन्धावच्छिन्नयद्वत्ता यदवच्छिन्नतया प्रत्येतुमर्हा कदाचित् केनचित् प्रतीयमाना इत्यर्थः । **तेनैव सम्बन्धविशेषेणेति**–तदन्यसम्बन्धेन अनवच्छिन्नप्रतियोगिताकेत्यर्थः । तत्सम्बन्धावच्छिन्नप्रतियोगिताकेत्युक्तौ तत्तदितरोभयसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय सिद्धसाधनम् । अतस्तन्नोक्तम्[1] । **तेनैव चावच्छेदकविशेषेणेति**—तदन्यावच्छेदकानवच्छिन्नेत्यर्थः । अभावान्विते अधिकरणत्वे च तदन्वयः । एवंच व्याप्यवृत्तिस्थले तद्वत्तावच्छेदकताभ्रमः प्रसिद्ध एव यद्यदवच्छिन्नतया यद्वत्ताधीः तत्प्रत्येकान्यानवच्छिन्नत्वकूटं निवेश्यम । तेन मूलाघवच्छिन्ने अग्राघवच्छिन्नाभावमादाय न सिद्धसाधनम् । न च मूलाघवावच्छिन्नस्य अग्राघवच्छिन्नत्वेनापि ज्ञानात् तन्मिथ्यात्वलक्षणे अग्राघन्यानवच्छिन्नत्वस्यापि निवेश्यत्वात् बाधः, मूलाघवच्छिन्नस्य मूलाघवच्छिन्नाभावप्रतियोगित्वरूपस्यैव मिथ्यात्वस्य वाच्यत्वादिति वाच्यम् ;

---

[1] यतस्तन्नोक्तम्.

तुल्यत्वादिहाकाशो नास्तीति प्रत्यक्षप्रतीत्यसम्भवात्, अनुमाने च अनुकूलतर्काभावात्, सामान्यतो दृष्टमात्रेण ध्वंसप्रागभावप्रतियोगित्वस्यापि सिद्धिप्रसङ्गात्तद्व्यतिरेकेण कस्यचित् कार्यस्यानुपपत्तेरभावाच्च। एवं संयोगसम्बन्धेन घटवति भूतले

मिथ्यात्वघटकाभावस्य तात्त्विकत्वपक्ष इवातात्त्विकत्वपक्षेऽपि अनवच्छिन्नत्वस्वीकारात्। न चैवमवच्छिन्नत्वसामान्याभाव एव निवेश्यतां लाघवादिति वाच्यम्; विशेषाभावकूटान्यस्य तस्यानभ्युपगमात्, सामान्याभावत्वेन निवेश्य[1] स्वरूपाणामेव प्रदर्शितत्वाच्च। अतीन्द्रियस्य प्रतिबन्धकस्याभावः कार्यान्यथानुपपत्त्या उच्यते। प्रकृते तु न सेत्याह— **तद्व्यतिरेकेणेति। लाघवेनेति।** सम्बन्धरूपावच्छेदकभेदेनाभावभेदाकल्पनलाघवेनेत्यर्थः। **विरोधित्वेति।** सहानवस्थानेत्यर्थः। तथाचात्यन्ताभावत्वेनेति सहार्थे तृतीया। एवंच घटात्यन्ताभावत्वेन सह घटसामानाधिकरण्यस्य एकत्राभावेन प्रतियोगिस्वरूपमात्रेण अत्यन्ताभावस्य विरोधित्वमिति भावः। घटपटोभयं भूतले नास्तीत्यादौ नोक्तोभयस्याभावप्रतियोगितया धीः, घटादिप्रत्येकरूपस्योभयस्योक्तधीविषयाभावविरोधित्वात्। किन्तूक्तोभयत्वस्य भूतलादिनिष्ठाधिकरणतावच्छेदकत्वाभावधीः, अतएव उभयादिपदयोगे एकजातीयव्युत्पत्त्या घटत्वपटत्वोभयं नास्तीत्यादावपि घटत्वपटत्वोभयत्वे घटादिनिष्ठाधारतावच्छेदकत्वाभावधीः, संयोगसमवायोभयसम्बन्धेन भूतले घटो नास्तीत्यादौ संयुक्तत्वसमवेतत्वोभयवद्घटत्वादौ घटसंयोगसमवायोभयत्वादौ वा भूतलादिनिष्ठाधारतावच्छेदकत्वाभावधीः, घटादौ भूतलादिनिष्ठसंयोगसमवायोभयप्रतियोगिकत्वाभावधीर्वा। अतएवोक्तस्थले भासमानाभावमादाय वक्ष्यमाणमिथ्यात्वस्य घटत्वादौ न सिद्धसाधनम्। अथवा

---

[1] निवेशस्य.

समवायसम्बन्धेन घटाभावसत्त्वे मानाभावात् लाघवेन घटात्यन्ताभावत्वेनैव घटसामानाधिकरण्यविरोधित्वकल्पनात् सम्बन्धविशेषप्रवेशे च गौरवात् ।

लाघवेन सम्बन्धाघटितावच्छेदकत्व[1] लाघवेन । **घटसामानाधिकरण्यविरोधित्वेति** । भूतलं घटवदित्याकारिका भूतलत्वादौ या घटसामानाधिकरण्यधीः तत्प्रतिबन्धकतायां भूतलादिविशेष्यकधीनिष्ठायां प्रकारतया अवच्छेदकेत्यर्थः । **गौरवात्**—सम्बन्धानां प्रतियोगितावच्छेदकत्वे गोरवात् । द्वितीये व्याख्याने घटत्वसंयोगाद्यवच्छिन्नप्रतियोगिताकाभावस्य प्रतिबन्धकतावच्छेदकनिवेशे घटत्वसंयोगाद्यवच्छिन्नत्वयोः विशेषणाविशेष्यत्वस्य अविनिगम्यत्वेन[2] प्रतिबन्धकताभेदे गौरवात् । न च प्रतियोग्यंशे भासमानस्यैव प्रतियोगितावच्छेदकतया भानात् प्रतियोगितांशे घटत्वाद्यवच्छिन्नत्वविषयता घटाभाववद्भूतलमिति धीनिष्ठप्रतिबन्धकतावच्छेदककोटौ न निवेश्यते, किन्तु अभावांशे घटत्वाद्यवच्छिन्नप्रकारतैवेति वाच्यम्; व्यधिकरणधर्मावच्छिन्नाभाववादिनामस्माकं तदसम्भवात् । तत्सम्भवे वा सम्बन्धांशेऽपि तदापत्त्या घटत्वसंयोगाद्युभयधर्मावच्छिन्नप्रकारतानिवेशस्यैवौचित्यात्। अथैवं घटत्वादिनाऽपि प्रतियोगिता नावच्छिद्येतेति अनवच्छिन्नैव सा स्यादिति चेत्, स्यादेव यदि नानुभवो बाधकः, अभावांशे प्रतियोगितासम्बन्धघटत्वमात्राभ्यां प्रकारताया एव प्रतिबन्धकतावच्छेदके निवेशसम्भवात् । न च नीलघटाभावस्यापि घटीयत्वात् घटवत्यपि घटो नास्तीति धीः स्यादिति वाच्यम्; घटसामान्याभावीयप्रतियोगिताव्यक्तेरेव घटत्वमात्रावच्छिन्नं प्रति संसर्गत्वान्नीलघटाभावे तद्व्यक्त्यसम्भवात् । अन्यथा प्रतियो-

---

[1] वच्छेदक. [2] विनिगम्यत्वेन

घटसमवायमात्रविषयतया प्रतीतेरुपपत्तेः

गितावच्छिन्नत्वपक्षेऽपि उक्तापत्तेर्दुर्वारत्वात्, नीलघटत्वावच्छिन्नप्रतियोगिताव्यक्तेरपि घटत्वावच्छिन्नत्वात्, प्रतियोगितायाः अवच्छेदकत्वाभिमतघटत्वादिस्वरूपत्वाभ्युपगमात्, प्रतियोग्यंशे प्रकारीभवत एव अभावांशे सम्बन्धतया भानात्। **प्रतीतेरुपपत्तेरिति**। घटसंयुक्तादौ समवायेन घटो नास्तीत्यादिप्रतीत्युपपत्तेरित्यर्थः। न च एवं घटादेः प्रतियोगित्वानुभवविरोधः, समवायविशिष्टघटादिप्रतियोगित्वावगाहनात् तादृशप्रतियोगिताकोपि घटसमवायाभाव एव तत्समनियतत्वात्। न तु घटसामान्याभाव इत्याशयेन घटसमवायाभाव इत्युक्तम्। न चैवमपि वक्ष्यमाणलक्षणस्य तादृशाभावमादाय घटादौ सिद्धसाधनम्, यद्धर्मरूपप्रतियोगिताकाभावत्वेन सत्त्वव्यापकत्वं तद्धर्मवत्त्वस्य वाच्यत्वात् घटादिसमवायिन्यपि संयोगवत् घटाद्यभावसत्त्वादिति वाच्यम्; सत्त्वव्यापकतावच्छेदकं यद्धर्मपर्याप्तप्रतियोगिताकाभावत्वं[1] तद्धर्मवत्त्वे वक्ष्यमाणतात्पर्यात् तादृशाभावप्रतियोगितात्वस्य समवायादिघटत्वयोरेव पर्याप्तत्वात्। अन्यथा नीलघटाद्यभावमादाय सिद्धसाधनाद्यापत्तेः, विशिष्टस्यातिरिक्तत्वात् यथाश्रुतस्याप्यदोषत्वाच्च। अथवा ननु सम्बन्धावच्छिन्नत्वस्य विरोधितावच्छेदकाप्रवेशे संयोगेन घटाभाववदित्यादिबुद्धेरपि समवायेन घटवदित्यादिबुद्धिविरोधित्वापत्तिः घटाभावविषयकत्वाविशेषादत आह—**घटसमवायेत्यादि**। घटः समवायः आदिना प्रतियोगिता अभावश्चेति चतुष्टयमात्रविषयतया समवायविशिष्टघटत्वावच्छिन्ना प्रतियोगिता विशेषसम्बन्धावच्छिन्ना च या प्रकारता तन्निरूपिताभावप्रकारताकत्वेन **प्रतीतेः** समवायेन घटाभाववदित्यादिप्रतीतेः **उपपत्तेः** उक्तधीविरोधित्वोपपत्तेः। न चैवं घटसमवायाद्यभावस्य तद्विरोधित्वस्य चावश्य-

[1] प्रतियोगितावत्त्वं.

कत्वे घटसामान्याभावतद्विरोधित्वयोः पूर्वोक्तयोर्मानाभाव इति वाच्यम् ; घटो नास्तीति बुद्धेरुक्तरीत्या समवायविशिष्टघटादिसामान्याभावीयप्रतियोगितात्वविषयकत्वानुपपत्त्या अतिरिक्तप्रतियोगित्वावश्यकत्वात्, अतिरिक्ताभावानभ्युपगमेऽपि क्षतिविरहात्, ऊक्तबुद्धिसत्वे घटवादित्यादिबुद्ध्यनुत्पादात्, उक्तबुद्धेर्विरोधित्वस्यानुभाविकत्वात्, सम्बन्धसामान्येन घटाद्यभावस्य त्वयाऽप्यङ्गीकारात्, घटसम्बन्धसामान्याभावस्यैव मम घटसामान्याभावत्वात् । एकज्ञानविषयत्वव्यभिचारादिस्तु न सम्बन्धः सम्बन्धो वा न भिन्नकालीनयोः । किंच समवायादिना घटविशिष्टबुद्धौ घटसमवायाभावधीविरोधित्वं त्वयाऽपि वाच्यम् ; तदनुभवात् । न च समवायादिना घटसामान्याभावावच्छेदकत्वेन गृहीततद्धीरेव तद्विरोधिनीति वाच्यम् ; गौरवात् । तथाच सम्बन्धावच्छिन्नप्रतियोगितावादिनस्तव मते तदन्तर्भावेनैव विरोधित्वात् घटसमवायित्वाद्यवच्छिन्नत्वस्वरूपसम्बन्धावच्छिन्नत्वयोः विशेषणविशेष्यत्वाविनिगम्यत्वात् तत्र विरोधिताद्वयं तदवच्छेदकगुरुत्वं च आवश्यकम् । मन्मते च तत्र घटसमवायाभावधीत्वेनैकैव विरोधिता । तव समवायादिसम्बन्धावच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगितान्तर्भावेन उक्तरीत्या विरोधिताद्वयं अवच्छेदकगौरवं च । मम तु तत्र समवायादिविशिष्टघटाभावधीत्वेन एकैव सेति महदेव लाघवम् । न च तवापि समवायवत अंशे घटत्वस्य एकत्र द्वयमिति रीत्या समवायघटत्वयोश्च प्रकारतामादाय अन्ये अपि ते वाच्ये इति वाच्यम् ; घटत्वांशे निर्धर्मितावच्छेदकज्ञानस्यैव विरोधिताया आवयोस्सम्मतत्वात् । घटो न समवायीति धीकालेऽपि प्रकृतविरोधिधीसम्पत्तये एकत्र द्वयमिति रीत्या प्रकारीभवद्द्वयां समवायघटत्वाभ्यां अवच्छिन्नाया एव अभावांशे प्रकारताया विरोधितावच्छेदकत्वस्वीकारात् । न च तथाऽपि समवायविशिष्टघटाभावो

घटसामान्याभाव एव तत्समनियतत्वादिति तद्धीः कथं घटसंयुक्तादौ प्रतियोगिता, समवायस्य न सम्बन्धः; किन्तु स्वाश्रयसमवेतत्वमित्युक्तौ तद्विषयतायाः विरोधितावच्छेदकत्वनिवेशे गौरवमिति वाच्यम्; लाघवेन प्रतियोगितामात्रस्य अभावविरोधित्वे स्थिते समवायप्रतियोगिघटत्वेन भूतलादिनिष्ठाभावाविरोधित्वात्, उक्तगौरवस्य प्रामाणिकत्वात्। अतएव संयोगेन भूतले घटो नास्तीत्यादावपि संयोगादेः घटादौ स्वाश्रयसंयुक्तत्वादिकमेव सम्बन्धः। समवायेन भूतले घटो नास्तीत्यादौ समवेतघटादिकं वा प्रतियोगितया भाति, तस्य केवलघटाद्यन्यत्वेन भूतलादौ तदभावसम्भवात् भूतले समवेतत्वेन घटो नास्तीत्यनुभवात्। अतएव समवायवत् घटाभावस्येव नीलघटाभावस्यापि धीः समवायेन घटवादिति धीविरोधिन्यस्तु इत्याद्यपास्तम्। तव प्रतियोगितावच्छेदकतया प्रतिबन्धकतावच्छेदके निवेशितयोरेव मम प्रकारतावच्छेदकतया निवेशात्। अतएव घटसंयुक्ते घटसमवायाभावस्याप्यसम्भवः, तत्र घटसमवायस्य कालिकसम्बन्धेनाधिकरणत्वसत्त्वात्। अथ कालिकसम्बन्धेन घटसमवायाभाव एव तद्विरोधी तर्हि संयोगेन घटाभाव एव संयोगेन घटाधिकरणत्वविरोधीत्येव युक्तमित्यपास्तम्। घटसंयुक्ते समवायेन घटाभावस्य त्वया स्वीकारेण तस्यैव मया घटसमवायाभावत्वस्वीकारात् समवायसम्बन्धावच्छिन्नघटाधिकरणत्वस्यैव मया घटसमवायाभावविरोधित्वस्वीकारात्। अथवा समवायेन घटो नास्तीत्यादौ घटसमवायादिनिष्ठप्रतियोगितैव परम्परया घटादिगततया भासते 'शिखी विनष्टः' इत्यादिवत्। अतो घटादेः प्रतियोगितानुभवो न विरुद्धः साक्षात्सम्बन्धेन वक्ष्यमाणप्रतियोगितायां लक्षणत्वान्न दोषः। संयोगेन रूपं नास्तीत्यादौ रूपादौ संयोगाद्यभावः घटत्वेन पटो नास्तीत्यादौ पटादौ घटत्वाद्यभाव

इव भाति घटत्वेन पटो नास्तीत्यादिशब्दात् यद्यपि नामार्थस्य घटत्वादेरत्यन्ताभावो न भाति, प्रतियोगिनः प्रथमान्तानुपस्थाप्यत्वात्। अनुयोगिपटादेः सप्तम्यन्तानुपस्थाप्यत्वाच्च। तथापि तृतीयार्थस्य साहित्यरूपैवैशिष्ट्यस्य स भाति। अथवा तत्र घटत्वाभावाद्यन्यो व्यधिकरणघटत्वपटत्वाद्युभयावच्छिन्नप्रतियोगिताकत्वेन पराभ्युपगताभाव एव भाति। अतएव घटत्वपटत्वाद्युभयावच्छिन्नवत्त्वेन ज्ञाते नोक्ताभावधीः, तत्प्रतियोगितायाः मिथोव्यधिकरणघटत्वपटत्वादिरूपत्वात्। प्रतियोग्यंशे प्रकारस्यैव संसर्गत्वमित्युक्तमिति मम न व्याहतिः[1]। अत एव तादृशाभावांशे प्रकारतावच्छेदकतयोक्तधर्मद्वयमवश्यं भातीति स्वीक्रियते। तथाच तत्प्रतियोगितायाः उक्तधर्मद्वयरूपत्वात् प्रतियोग्यंशे प्रकारस्यैव अभावांशे प्रतियोगिसंसर्गत्वमिति नियमाव्याघातः। न च घटत्वस्य पटासम्बन्धित्वात् तद्घाटतसम्बन्धेनाभावस्य पटीयत्वासम्भव इति वाच्यम्; घटत्वनिष्ठं यत्पटत्वनिष्ठप्रतियोगितात्वं तन्निरूपकत्वसम्बन्धेन अभावांशे पटस्य विशेषणत्वेन भानस्वीकारात्। संयोगकालीनसमवायेन घटादेः रूपवत्त्वस्येव उक्तसम्बन्धेन अभावे पटीयत्वस्य सम्भवात् उक्तप्रतियोगित्वाश्रयविशिष्टस्य पटस्योक्ताभावाविरोधित्वेऽपि न क्षतिः, उक्तस्थले प्रतियोग्यभावयोः विरोधस्य परेणाप्यस्वीकारात्। उक्तस्थले घटत्वपटत्वोभयत्रभूतलनिष्ठाधारतावच्छेदकत्वं नास्तीति धीस्तु न सम्भवति, उभयत्वविशिष्टबोधकपदाभावात्। एवंच संयोगेन रूपं नास्तीत्यादावपि संयोगरूपत्वादिमत्प्रतियोगिकतया तादृशाभाव एव भातीति न कथमपि प्रतियोगितायाः अवच्छिन्नता। न चोक्ताभावमादाय सिद्धसाधनम्, स्वावच्छिन्नप्रकारकधीविशेष्यसन्मात्रवृत्त्यत्यन्ताभावप्रतियोगितात्वपर्याप्तयधिकरणोक्ते-

[1] मित्युक्तनियमो न व्याहतः.

आधाराधेयभावस्य प्रत्यक्षसिद्धत्वेन घटस्यावृत्तित्वशङ्कानुदयात् उक्तयुक्तेश्च न घटादेरत्यन्ताभावसामानाधिकरण्यम्। एवं संयोगतदभावयोर्नैकाधिकरण्यम्। 'अग्रे वृक्षः कपिसंयोगी मूले न' इति प्रतीतेरग्रमूलयोरेव संयोगतदभाववत्तयोपपत्तेः तदा सन्मात्रनिष्ठात्यन्ताभावप्रतियोगित्वमेव

भयधर्माधिकरणत्वाप्रसिद्धेः वक्ष्यमाणमिथ्यात्वाभावादित्यास्तां विस्तरः। ननु घटस्य स्वात्यन्ताभाववदवृत्तित्व[1]रूपो विरोधोऽवृत्तित्वेप्युपपद्यत इति स्वसंयोगिनि स्वात्यन्ताभावसत्त्वे किं बाधकं तत्राह—**आधारेति**। ननु घटादिसंयोगी घटाद्यभाववान् तत्समवायाद्यभावात् घटाद्यनाधारवदित्यत आह—**उक्तेति**। अनुकूलतर्काभावात् कपालदृष्टान्तेन तथैव प्रतियोगिसम्बन्धित्वादिहेतुना ध्वंसादिसिद्ध्यापत्तेः तद्व्यतिरेकेण कार्यानुपपत्तेरभावात् एकसम्बन्धवत्यप्यपरसम्बन्धाभावस्यैव प्रतिबन्धकाभावतया प्रयोजकत्वादित्यर्थः। **अग्रमूलयोरिति**। मिथश्चौपाधिकभेदवतोः तदवच्छिन्नवृक्षयोर्वेति शेषः। **तदेति**। इति परेणोच्यत इत्यादिः। **सन्मात्रनिष्ठेति**। स्वप्रकारकधीविशेष्यनिष्ठसत्त्वव्यापकेत्यर्थः। तेन न पूर्वोक्ते प्रपञ्चालीकत्वापत्तिसिद्धसाधने। अधिष्ठानमेव तत्र प्रतीयमानाभाव इति पक्षेऽपि केवलस्य सतोऽभावत्वाविशिष्टेन सता सम्बन्धसत्त्वात् व्यापकत्वमुपपन्नम्। न च तत्पक्षे अधिष्ठानेऽभावाधारत्वप्रत्ययानुपपत्तिः, विशिष्टकेवलयोराधाराधेयत्वाभावात् अन्यथा तद्भटो द्रव्यमितिवत् तत्र द्रव्यमित्यपि धीस्स्यादीति वाच्यम्; अन्यत्र तदस्वीकारेऽपि प्रतीत्यनुरोधेन प्रकृते तत्स्वीकारात्, घटाभावे घटो नास्तीत्यादाविव कल्पिताधारत्वे बाधकाभावात्। किंचाभावप्रत्यये भावस्य सम्बन्धमात्रं नियमेन भासते आधारत्वं तु सति सम्भवे, यथा पृथिव्यां गन्धाभावो

---

[1] भाववद्वृत्तित्व.

नेत्यादौ चैत्रे न गोशून्यतेत्यादौ त्वसम्भवात् न तद्धानि । उक्तं हि न्यायकुसुमाञ्जलौ अभावसम्बन्धविचारप्रसङ्गे 'परस्य तादात्म्यमस्तीति चेत्' इति । परस्य भट्टस्य मते अभावस्य तादात्म्यं सम्बन्ध इति तत्र टीकाकाराः । तथाचाधिष्ठानस्याभावानाधारत्वेऽपि न क्षतिः । अधिष्ठाने घटो नेत्यादिशब्दे सप्तमी तु आकाङ्क्षासम्पादनायापेक्षते नाधारत्वबोधाय । एवंचाभावे स्वाधारत्वाकल्पनेपि न क्षतिः । घटाभावे घटो नेत्यादौ किञ्चिद्विशिष्टघटाभावत्वेनानुयोगितावच्छेदकरूपेण आवश्यकभेदादेवोपपत्तेः । न च या अभावव्यक्तिः तद्व्यक्तित्वेन सत्त्वव्याप्यका तत्प्रतियोगित्वरूपे प्रकृतलक्षणे समवायेन घटाभावमादाय न सिद्धसाधनम्, तद्व्यक्तेः घटसमवायिनि असत्त्वादिति घटादेस्संयोगिनि समवायेनाभावनिराकरणं व्यर्थमिति वाच्यम्; वक्ष्यमाणनिष्कर्षे उक्तदोषासम्भवात् । अभावीयविशेषणतादिसंम्बन्धेन घटाद्यभावव्यक्तिं केवलान्वयिनीमादाय सिद्धसाधनवारणाय प्रतियोगितायाः सम्बन्धावच्छिन्नत्वनिरासस्सार्थक्याच्च । **अत्यन्ताभावेति** । स्वान्यूनसत्ताकत्वरूपात्यन्तिकत्वविशिष्टसंसर्गाभावेत्यर्थः । तेन प्रातिभासिकात्यन्ताभावमादाय न सिद्धसाधनम् ; न वा निष्ठान्तेनैव ध्वंसादिवारणादत्यन्तपदार्थघटकसदातनत्ववैयर्थ्यम्, भेदस्य सत्त्वव्यापकत्वसिद्धया अर्थान्तरं स्यात् । अतः संसर्गेति । ध्वंसादेस्तु तत्सिद्धया[1] न तद्बाधेन[2] तत्सिद्धेरसम्भवात् । ध्वंससामान्यं न सत्त्वव्यापकमिति बाधेन उक्तानुमानात् ध्वंससामान्याभाव[3]सिद्धावपि भेदसामान्यं न सत्त्वव्यापकमिति बाधेन भेदसामान्याभाव[4]सिद्धिः न सम्भवति, घटत्वादिना पटादिभेदस्य सत्त्वव्यापकत्वबाधात् । अस्तु वा अत्यन्ताभावार्थकमभावपदम् । उक्ताभावप्रतियोगित्वं च उक्त-

[1] अत्र तच्छब्देन स्वान्यूनसत्ताकत्वमुच्यते. [2] तच्छब्देनात्र सिद्धसाधनमुच्यते. [3] ध्वंसान्याभाव. [4] भेदान्याभाव.

सत्त्वव्यापकाप्रातिभासिकाभावस्य व्यावहारिकनिष्ठप्रतियोगित्वं उक्त-सत्त्वव्यापकाभावस्य प्रातिभासिकनिष्ठप्रतियोगित्वं चेत्यन्यतरवत्त्वम् । व्यावहारिकनिष्ठत्वं च प्रातिभासिकान्यविनाशिनिष्ठत्वं ब्रह्मावृत्तित्वं वा ग्राह्यम् । आद्यस्यान्त्यस्य च प्रतियोगित्वस्योक्तया[1] व्यावहारिके प्रातिभासिके च साध्यलाभः। व्यावहारिको यः पूर्णानन्दाभावः तत्प्रतियोगिब्रह्मण्यतिव्याप्तेः व्यावहारिकनिष्ठेति विशेषणम् । विनाशिनः स्वस्य अप्रातिभासिकाभावत्वं च स्वान्यूनसत्ताकत्वं, स्वाग्रस्य स्वाग्राभावेन मिथ्यात्वव्यवहारस्तु तदानीं तस्याप्रातिभासिकत्वज्ञानात् । प्रपञ्चः प्रातिभासिकः सत्य इति वादिनं प्रति तु विनाशिनः स्वस्याभावत्वमेव तत् । सत्त्वं[2] तु अबाध्यत्वव्यापक-विषयताकाकिञ्चिद्धीविषयत्वं तद्विषयताव्यक्तित्वेन निवेश्यम् । तेन गुरोरनवच्छेदकत्वेऽपि न क्षतिः । गगनादेरवृत्तित्ववादिनं प्रत्यपि साध्यसिद्धये स्वाधिकरणसन्निष्ठत्वं लब्धमपि नोक्तम् । विषयत्वव्यापकत्वोक्तौ सर्वं बाध्यमिति मते अत्यन्तासत्त्वमादायार्थान्तरम् । अतस्तद्विषयत्वमुक्तम् । तन्मते च तदप्रसिद्धम् । विज्ञानमात्रसत्यत्वमते विज्ञानान्यस्यालीकत्वेन अर्थान्तरात् । उक्तविशेष्यवृत्तित्वं सत्त्वविशेषणम् । तथा अस्मदीयपूर्वोक्तरीत्या ब्रह्मणोऽभावप्रतियोगित्वास्वीकारे तु पूर्वलक्षणे व्यावहारिकनिष्ठत्वादिकं उत्तरलक्षणे विनाशित्वं च न देयम् । तन्मते विज्ञाने विज्ञानान्यप्रकारकबुद्ध्यविशेष्यत्वात् नार्थान्तरम् । स्वावच्छिन्नप्रकारकधीविशेष्यनिष्ठसत्त्वव्यापकात्यन्ताभावप्रतियोगितात्वपर्याप्त्यधिकरणधर्मवत्त्वं लक्षणं बोध्यम् । तेन संयोगेन रूपाद्यभावमादाय रूपादौ न सिद्धसाधनमिति दिक् ॥

अप्रातिभासिको यः स्वसमानाधिकरणात्यन्ताभावः तस्य ब्रह्मावृत्ति यत्प्रतियोगित्वं, यच्च स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं

---

[1] त्वस्योक्तौ. [2] सत्यत्वं.

मिथ्यात्वं मन्तव्यम् । न चैवं सति भावाभावयोरविरोधात् तज्ज्ञानयोर्बाध्यबाधकभावो न स्यादिति वाच्यम्;

प्रातिभासकवृत्ति तयोरन्यतरवत्त्वं मिथ्यात्वमिति निष्कर्षस्तु पूर्वमेवोक्तः । **बाध्यबाधकेति** । भावाभावयोस्सामानाधिकरण्यबुद्धौ सत्यां तयोरेकज्ञानमपरज्ञानाबाध्यम् । अतः उक्तबुद्ध्यभावविशिष्टेन तयोर्विरोधाविषयकेण वा परज्ञानेन बाध्यं वाच्यम् । तादृशज्ञानं च मिथ्यात्वं जानतां न सम्भवतीति न तेषां तथेति भावः । बाधकत्वं यदि प्रतिबन्धकत्वं तदा तन्नास्त्येव[1], तयोरेकप्रमायां सत्यामविद्यादोषादिविरहादेवापरभ्रमानुदयात् । तयोरेकभ्रमे सति तज्जनकदोषादिनैवापरप्रमानुदयात् । भावाभावयोरेकज्ञानस्य अपरज्ञानप्रतिबन्धकत्वाङ्गीकारेऽपि मिथ्यात्वधीपूर्वकं उक्तप्रतिबन्धकज्ञानं सम्भवत्येव । वस्तुतः प्रतियोगिसामनाधिकरण्यधीरभावधीप्रतिबन्धकतायां नोत्तेजिका । न च समुच्चयोत्तरं समुच्चयो न स्यादिति वाच्यम् । अवच्छिन्नत्वरूपाव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वात् । न च प्रातिभासिकत्वेन ज्ञायमानाभावस्य धीरपि प्रतिबन्धिका स्यादिति वाच्यम्; ब्रह्मज्ञानपूर्वबाध्यत्वरूपस्य प्रातिभासिकत्वस्य ज्ञाने तद्वदभावविषयकत्वस्य प्रमात्वाभावव्याप्यत्वेन गृहीतस्याभावज्ञानग्रहे अप्रमात्वग्रहात्[2] प्रमात्वेन गृह्यमाणस्य अभावज्ञानस्य प्रतिबन्धकत्वेन क्लृप्तस्य उक्तधर्मरूपत्वाभावात् । एतेन प्रतियोगिसामानाधिकरण्यज्ञानस्य उत्तेजकत्वे प्रातीतिकप्रतियोगिसामानाधिकरण्यधीरपि तथा स्यात् । अन्यूनसत्ताकप्रतियोगिनिवेशे तु गौरवमित्यपास्तम् । वस्तुतस्तु मन्मते प्रतिबन्धकत्वं न कस्यापि कुत्राप्युच्यते, अव्याप्यवृत्तिशक्तेः मण्याद्यसमवहितवह्न्यादौ स्वीकारात् । अथ तयो-

[1] तत्रास्त्येव [2] प्रमात्वाग्रहात्.

(तज्ज्ञानयोः बाध्यबाधकभावो न स्यादिति वाच्यम्) भिन्नसत्ताकयोरविरोधेऽपि समसत्ताकयोर्विरोधात्। यत्र भूतले यस्य घटस्यात्यन्ताभावो व्यावहारिकः तत्र स घटो न व्यावहारिक इति नियमात्। न चैवं सति 'शुक्तिरियं न रजतम्' इति ज्ञानविषयीभूताभावस्य व्यावहारिकत्वेन पुरोवर्तिप्रतीतरजतस्य व्यावहारिकत्वापहारेऽपि प्रातीतिकसत्त्वानपहारात् बाधोत्तरकालेऽपि 'इदं रजतम्' इति प्रतीतिः स्यादिति वाच्यम्;

रेकज्ञानस्य अपरज्ञाने भ्रमत्वज्ञापकत्वं तत्तथापि स्वान्यूनसत्ताकसन्मात्रनिष्ठाभावप्रतियोगित्वविशिष्टविषयकधीत्वस्यैव भ्रमत्वरूपत्वम्। न तु स्वविरोधित्वाभाववति स्वप्रकारधीत्वस्य शुक्तिरूप्यादिज्ञानस्य तदभावात्। अतएव समसत्ताकयोः अविरुद्धयोरपि स्वाभावाभावयोः बाध्यबाधकधीविषयत्वमुक्तमिति नानुपपत्तिः। अथ तयोरेकज्ञानस्य अपरोपादानाज्ञाननिवर्तकत्वं तत्तथापि न तयोः विरोधोऽपेक्ष्यते प्रत्युत अविरोधः, एकाश्रये अपरस्य कल्पितत्वात्। अथ तयोरेकज्ञानस्य स्वविषयापेक्षया न्यूनसत्ताकविषयकत्वज्ञापकत्वं अपरज्ञाने तत् तथापि तत्परत्वादिप्रावल्यसापेक्षत्वेऽपि तस्य न तयोर्विरोधापेक्षा इत्यस्माकं स्थितिः। त्वं तु यदि तयोर्विरोधेऽत्यन्तभक्तः तदा पारमार्थिको व्यावहारिको वा मिथ्यात्वघटकोऽभाव इत्युक्तयोः पक्षयोराद्य रोचयेरित्यभिप्रेत्याह—भिन्नेति। न व्यावहारिक इति। किन्तु प्रातीतिक इति शेषः। प्रातीतिकसत्त्वानपहारात् भिन्नसत्ताकाभावस्याविरोधित्वेन तज्ज्ञानस्याबाधकत्वात् उच्छिन्नापरोक्षताकत्वाभावात्। बाधेति। स्वान्यून[1]सत्ताकसन्मात्रनिष्ठात्यन्ताभावप्रतियोगित्वनिश्चयेत्यर्थः। तथाच समसत्तान्तर्भावेन न विरोधः किन्तु सामान्यत इति भावः। प्रातीतिकरजतस्य व्यावहारिकस्वाभावाविरोधेऽपि न

[1] स्वन्यून.

तत्र 'इयं शुक्तिः' इत्यपरोक्षभ्रमया प्रातीतिकरजतोपादानाज्ञाननिवृत्तौ प्रातीतिकसत्त्वस्याप्यपहारात्, शुक्त्यज्ञानस्य प्रातीतिकरजतोपादानत्वेन तदसत्त्वे प्रातीतिकरजतासत्त्वस्य आवश्यकत्वात्। अतएव यत्र अपरोक्षया अधिष्ठानभ्रमया न भ्रमोपादानाज्ञाननिवृत्तिः तत्र व्यावहारिकत्वापहारेऽपि प्रातीतिकत्वानपहारात्। 'तिक्तो गुडः' इत्यादिप्रतीतिरनुवर्तत एव। एवमखण्डब्रह्मसाक्षात्कारात्पूर्वं परोक्षबोधेन प्रपञ्चस्य व्याव-

---

क्षतिः। तत्र तादृशाभावधियो बाधकत्वाभावेऽपि शुक्तित्वाद्यधिष्ठानतावच्छेदकप्रमाया बाधकत्वेन उक्तबाधोत्तरं तदप्रतीतिसम्भवादित्याह—**तत्रेति**। भिन्नसत्ताकाभावज्ञानस्यापि मूलोच्छेदकत्वादेव प्रतियोग्यप्रतीतिप्रयोजकत्वम्। अतएव परोक्षस्य तस्यामूलोच्छेद[1]कत्वेनातथात्व[2]मिति अप्रतीतिप्रयोजके मूलोच्छेदकत्वरूपे बाधकत्वे विरोधिविषयकत्वं न प्रयोजकम्। नाप्युक्तभ्रमत्वज्ञापकत्वरूपे बाधकत्वे तत्, तथा उक्ता[3]परोक्षस्य विरोध्यभावाविषयकस्यापि तत्सत्त्वादिति भावाभावविरोधस्वीकारः ते वृथेत्यभिप्रेत्याह—**अतएवेति**। अभावविरोधित्वानपेक्षस्याज्ञानोच्छेदस्यैव तत्कार्यप्रातीतिकसत्त्वापहारकत्वादेवेत्यर्थः। व्यावहारिकत्वापहारे—स्वान्यूनसत्ताकसन्मात्रनिष्ठात्यन्ताभावप्रतियोगित्वेन ज्ञाप्यत्वे। तथाच भ्रमत्वज्ञापकत्वे विरोधिविषयकत्वं नापेक्ष्यत इति भावः। **व्यावहारिकत्वापहारेऽपि प्रातीतिकत्वेति**। एकस्यैव मूलाज्ञानस्य नित्यपरोक्षापरोक्ष[4]प्रपञ्चोपादनत्वात्। अपरोक्षोपादानाज्ञानं प्रत्यपरोक्षस्यैव निवर्तकत्वात् तदभावादुक्ताज्ञाननिवृत्त्या प्रपञ्चमात्रप्रतीतिरित्यर्थः। अथवा अपरोक्षप्रपञ्चोपादानाज्ञानादन्यदेवास्तु परोक्षप्रपञ्चोपादानमज्ञानम्। तथापि परोक्षब्रह्मज्ञानेन तन्निवृत्त्या तदुपादानकप्रपञ्चे निवृत्तेऽपि प्रारब्धभोगानुरोधेन कल्प्यमानसंस्कारोपादान-

---

[1] मूलोच्छेद. [2] तथात्व. [3] उक्त. [4] नित्यपरोक्ष.

हारिकत्वापहारेऽपि प्रतीतिरनुवर्तत एव। अधिष्ठानाज्ञाननिवृत्तौ तु नानुवर्तिष्यते। एतेन—"उपाधिशब्देनाधिकरणमात्रविवक्षायामर्थान्तरम्, वाग्व्यधिकरणकात्यन्ताभावप्रतियोगित्वेऽपि रूपस्यामिथ्यात्वात्। अधिष्ठानविवक्षायां तु भ्रमोपादानाज्ञानविषयस्य अधिष्ठानत्वेन अन्योन्याश्रयत्वम्; ज्ञानस्य भ्रमत्वे विषयस्य मिथ्यात्वं, विषयस्य मिथ्यात्वे च ज्ञानस्य भ्रमत्वम्" इति परास्तम्। उक्तरीत्या अधिकरणविवक्षायां दोषाभावात्। न च 'स एवाधस्तात्' इति श्रुत्या प्रतिपन्ने देशकालाद्युपाधौ परमार्थतो ब्रह्मणोऽभावात्तत्रातिव्याप्तिरिति वाच्यम्; निर्धर्मके तस्मिन्नभावप्रतियोगित्वरूपधर्माभावात्।

कपरोक्षप्रपञ्चान्तरं जायते। अतएवापरोक्षब्रह्मज्ञानोत्तरमपि प्रपञ्चनिवृत्तौ पुनः प्रपञ्चान्तरं अङ्गीक्रियत इति परोक्षब्रह्मज्ञानोत्तरं परोक्षापरोक्षप्रपञ्चधीः न विरुध्यत इति भावः। **अधिष्ठानेति।** तिक्तत्वाभाववद्गुडादीत्यर्थः। तथाचाज्ञानोच्छेदकत्वेऽपि विरोधिविषयकत्वं नापेक्षत[1] इति भावः। **नानुवर्तिष्यत इति।** निवृत्तेऽप्यज्ञाने प्रपञ्चस्य न निवृत्तिः। जातेऽप्यधिष्ठानसाक्षात्कारे नाज्ञानं निवर्तते भुज्यमान[2]कर्मणा प्रतिबन्धादित्यादिकं त्वन्यत्। **निर्धर्मक इति।** सत्यादिपदवाच्यसम्बन्धाज्ञानविषयत्वादिकं तु तदुपहिते न तु केवले इति भावः। केवले तदङ्गीकारे तदन्यधर्मराहित्यमेव निर्धर्मकत्वम्। केवलस्य जगदुपादानत्वपक्षेऽपि न दोषः। दृश्यमात्रधर्मतानियामको यस्साधारणस्सम्बन्धो दृङ्निष्ठतादात्म्यं तदन्यसम्बन्धेन यत् सधर्मकं तदन्यस्य निर्धर्मकपदेनोक्तिसम्भवात्, तावतापि स्वरूपादिसम्बन्धेन प्रतियोगित्वादिराहित्यलाभेन प्रकृतोपयोगात्। न च प्रपञ्चे ब्रह्मसम्बन्धस्य मिथ्यात्वात् ब्रह्मणोऽभाव इति वाच्यम्;

[1] सापेक्ष्यते. [2] वायुच्यमान.

तावताऽपि प्रपञ्चे ब्रह्माभावासिद्धेः प्रत्यक्षाभावात्, घटस्सन्नित्यादावुपहितब्रह्मण एवैन्द्रियकत्वात्, अभावांशे निरवच्छिन्नप्रकारताकज्ञानासम्भवेन केवलप्रतियोगिकाभावाभानात्। प्रतियोगिविशेषिताभावभानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते इत्याद्यभियुक्तोक्तेः, अनुमानस्य चाप्रयोजकत्वात्, तद्व्यतिरेकेण कार्यानुपपत्त्यभावात् प्रतियोगिसम्बन्धस्याभावविरोधित्वात्। अतएव सिद्धान्तबिन्दौ ब्रह्मणोऽभावाप्रतियोगित्वं सर्वत्र सता[1]सम्बन्धादित्युक्तम्। एतेन—निर्धर्मकत्वात् ब्रह्मणः पारमार्थिकत्वादितदवृत्तिधर्मैरभावसम्भवः प्रतियोगित्वस्य च सत्यत्वादिवत् स्वरूपात्मकत्वात् ब्रह्मणि सम्भव इत्यादि परास्तम्। मिथ्यात्वादिग्राहकमानस्य ब्रह्मभिन्नतयैव प्रवृत्ततया ब्रह्मणो मिथ्यात्वाद्यभावसत्यत्वादिस्वरूपत्वेऽपि प्रतियोगित्वादिस्वरूपत्वे मानाभावात्। किंच पारमार्थिकत्वादितदवृत्तिधर्मेणाभावः किञ्चिद्धर्मविशिष्टस्यैव ब्रह्मणो ज्ञातुं शक्यः, न तु केवलस्य घटादौ पारमार्थिकमित्याद्यनाहार्यज्ञानसत्त्वेन घटादौ न पारमार्थिकमिति ज्ञानासम्भवात्, पारमार्थिकत्वाद्यवच्छिन्नप्रतियोगिताकत्वविशिष्टधीत्वेन सामान्यतः उक्तधीप्रतिबध्यत्वात्। अतएवात्र घट इत्युक्तधीसत्त्वे अत्र घटत्वेन पटो नेति धीः, न त्वत्र घटो नेत्याकारा घटाभावस्यापि धीः। अतएव प्रतियोगित्वे मानाभावादित्यनुक्त्वा मानासम्भवलाभार्थं निर्धर्मक इत्याद्युक्तम्। अपिच किञ्चिद्धर्मावच्छिन्नस्य मिथ्यात्वेन स्वान्यूनसत्ताकाभावप्रतियोगित्वं शङ्कास्पदम्। अतादृशस्य[2] तु सत्यस्वरूपत्वेन न तत्तथेत्यपि निर्धर्मकेत्याद्यर्थः। यत्तु—"येन रूपेण यदधिकरणतया यत्प्रतिपन्नमित्यादि सन्मात्रनिष्ठेत्यादि च अयुक्तम्, लाघवेन स्वाभावत्वेनैव स्वविरोधित्वात् समसत्ताकत्वस्य गौरवेणाप्रवेशात् सत्ताभेदस्याद्याप्यसिद्धेश्च मिथ्यात्वानुमानादेव तत्सिद्धावन्योन्याश्रयात् श्रुतेः

[1] सदा. [2] तादृशस्य.

प्रत्यक्षबाधितत्वात्" इति, तन्न ; शुक्तिरजतादेः स्वाश्रयस्य चाभावे उक्ताविरोधत्वाभावेन सामान्यतस्तदभावात्। अथ शुक्तिरजतादेः मन्मते असत्त्वात् न तत्सामानाधिकरण्यं तदभावे इति चेत्तर्हि तदधिकरणाप्रसिद्ध्या तद्घटितविरोधित्वमपि तदभावे नास्तीति क्व सामान्यतो विरोधवार्ता। यो यो यद्विरेधी स तदभाववृत्तिरिति नियमो न नोऽनिष्टः[1], ब्रह्मस्वरूपाभावमादाय तत्सम्भवात्। यत्र यत्र यदभावप्रतियोगित्वं तत्र तदभावविरोधित्वमित्यपि न नियमः ; ब्रह्मस्वरूपाभावस्याधिकरणाप्रसिद्धेः, अधिकरणमेवाभाव इति मते अवृत्तिगगनादिरूपाभावाधिकरणाप्रसिद्धेश्च, घटादेः पटादिरूपस्वाभावेन भूतलादौ सहभावाच्च। शुक्तिरूप्यादेः स्वाभावाभावस्य अधिकरणाप्रसिद्धेश्च। असतो न स्वाभावाभावत्वं मानाभावादिति चेत्तर्हि सतो[2] नाभावो मानाभावात् निर्धर्मकत्वाद्युक्तयुक्तिभिस्तस्याभावप्रतियोगित्वासम्भवात्। अतएव सिद्धान्तबिन्दौ न हि शशविषाणाभावो ज्ञायत इत्युक्तं चरमश्लोके। शशशृङ्गं नास्तीत्यस्य शशे शृङ्गाभाव इत्यर्थ इति मणिकारः, किं तर्हि तल्लक्षणमिति चेन्नकिञ्चित्। तर्हीतरव्यावृत्त्या तन्न प्रतीयेतेति चेन्न प्रतीयत एव। अतएव सद्व्यामभावो निरूप्यत इत्युक्तम्। सद्व्यामित्यस्य धर्मिप्रतियोगिभ्यामिति विशेष्यं यदि तत्तथा प्रतीयते तदा 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति पातञ्जलसूत्रे असद्ज्ञानमात्रस्य शाब्दत्वोक्तेः निर्धर्मकत्वादि[3]-विरहात् तत्तद्धीविषयत्वादेरितरव्यावृत्तत्वानिश्चयेन व्यभिचारसम्भवाच्च [4]नानुमित्या, किन्तु शब्देन, तत्र च न लक्षणमपेक्षते, सत्त्वेन प्रतीत्यनर्हत्वस्य लक्षणत्वसम्भवाच्च। किंच वैशेषिकविशेषवत् निर्धर्मकस्यासतः स्वत एवेतरव्यावृत्तिसम्भवात् न लक्षणापेक्षा। एवंचासत्यतिव्याप्तिप्रसङ्गावनमसङ्गतमेव। किंच स्वान्यूनसत्ताकात्यन्ताभावप्रति-

[1] तन्निष्ठः. [2] असतो. [3] निर्धर्मकत्वाद्वित्यादि. [4] नानुमित्यादिना इति पा.

न चैवं सत्यत्वमपि तत्र न स्यात्, तथाच 'सत्यं ज्ञानमनन्तम्' इत्यादिश्रुतिव्याकोप इति वाच्यम्; अधिकरणातिरिक्ताभावानभ्युपगमेन उक्तमिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मस्वरूपाविरोधात्। एतेन स्वप्रकाशत्वाद्यपि व्याख्यातम्—परप्रकाश्यत्वाभावो हि स्वप्रकाशत्वम्। कालपरिच्छेदाभावो नित्यत्वम्, देशपरिच्छेदाभावो विभुत्वम्, वस्तुपरिच्छेदाभावः पूर्णत्वमित्यादि। तथाच भावभूतधर्माणाश्रयत्वेऽपि ब्रह्मणः सर्वधर्माभावरूपतया न काऽप्यनुपपत्तिरिति सर्वमवदातम्॥

इति द्वितीयमिथ्यात्वविचारः.

तृतीयमिथ्यात्वविचारः.

ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम्। ननु उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने अतिव्याप्तिः मुद्गरपातादिनिवर्त्ये च घटादावव्याप्तिः।

योगित्वस्य नासति सम्भवः[1], तस्योक्तव्यावहारिकत्वादिरूपतद्घटकाभावात्। एवंच अस्तु सन्मात्रेत्यत्र विषयत्वमात्रव्यापकत्वनिवेशः, उक्तविषयकत्वव्यापकत्वनिवेशे प्रयोजनाभावात्। किञ्च विभिन्नसत्तेत्यादिना तव लालनमात्रं कृतम्। तथाचातिलाघवात् भावाभावयोर्विरोध एव न स्वीक्रियतां उक्तरीत्या तस्य निष्प्रयोजनत्वात्। यदुक्तं सत्ताभेदेत्यादि, तन्न[2]; सत्ताभेदस्यानुमितेः पूर्वमसिद्धावपि मिथ्यात्वस्य विप्रतिपन्नत्वेन भावाभावविरोधस्यापि विप्रतिपन्नत्वेन मिथ्यात्वानुमितौ प्रतिबन्धकाभावात् पश्चात्तत्रा[3]प्रामाण्यशङ्कायाः सत्ताभेदकल्पनया निराससम्भवात्॥

'तथा विद्वान्नामरूपाद्विमुक्तः, ज्ञात्वा देवं मुच्यते सर्वपाशैः' इत्यादिश्रुत्यर्थनिर्णयाय साध्यान्तरमाह—ज्ञाननिवर्त्यत्वमिति। पूर्व-

---

[1] संबन्धः. [2] कारणेषु शक्तिस्वीकारेण. [3] तत्र.

ज्ञानत्वेन ज्ञाननिवर्त्यत्वविवक्षायामप्ययं दोषः, अधिष्ठानसाक्षात्कारत्वेन निवर्त्ये शुक्तिरजतादौ च ज्ञानत्वेन ज्ञाननिवर्त्यत्वाभावात् साध्यविकलता। ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वविवक्षायां ज्ञानत्वव्याप्येन स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे अतिव्याप्तिरिति चेन्न; ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं हि ज्ञाननिवर्त्यत्वम्। अवस्थितिश्च द्वेधा—स्वरूपेण कारणात्मना च, सत्कार्यवादाभ्युपगमात्।

ज्ञाने। तन्निष्ठोत्तरज्ञाननिवर्त्यत्वे। मिथ्यात्वलक्षणस्यातिव्याप्तिः। तेन पूर्वज्ञानस्य मिथ्यात्वलक्षण[1]लक्ष्यत्वेऽपि न क्षतिः। अथवा अतिव्याप्तिः सिद्धसाधनम्। **अवस्थितीति**। स्वात्मकेत्यर्थः। **स्वरूपेण** घटादिस्थूलरूपेण। **कारणात्मना** कारणगतसूक्ष्मावस्थया। **सत्कार्येति**। कार्याणां पूर्वं पश्चाच्च आ तत्त्वदर्शनं स्वात्मकावस्थाभ्युपगमादित्यर्थः। पराङ्गीकृतध्वंसप्रागभावयोरेव तथात्वेनाऽगौरवात् एकस्मिन् कनके जायमानकटकमुकुटयोरेकत्रापरध्वंसप्रागभावत्वस्वीकारादतिरिक्तकल्पने मानाभावात् कटकमेव मुकुटं जातमिति तादात्म्यानुभवात् "तद्धेदं तर्ह्यव्याकृतमासीत्, भूतग्रामस्स एवायं भूत्वा भूत्वा प्रलीयते" इति श्रुतिस्मृतिभ्यां तथा प्रतीतेश्च। अन्यथा पूर्वापरकालावच्छिन्नस्वसमवायिगतस्यात्यन्ताभावत्वादिविषयकत्वेनैव प्रतीत्युपपत्तेरतिरिक्तप्रागभावध्वंसयोः असिद्धेः प्रागभावो नष्टः ध्वंसो जात इत्यादिप्रत्ययानां व्यञ्जकनाशादिविषयकत्वेनोपपत्तेः। न च तौ विना पूर्वोत्तरत्वादिकमेव दुर्वचमिति वाच्यम्। तावता पूर्वत्वादेरेवाखण्डस्य सप्रतियोगिकस्य स्वीकर्तुमुचितत्वात्, तयोः कल्पने प्रागभावत्वध्वंसत्वादेरतिरिक्तस्य कल्पनेन गौरवात्। अथ प्रकृतलक्षणस्य प्रातिभासिककटकादावव्याप्तिः तन्निवर्तकज्ञानस्य तन्निष्ठप्रातिभासिक-

[1] आमिथ्यारूपेण घटादिस्थूललक्षण. पा.

तादात्म्यप्रतियोगिव्यावहारिकहेम[1]कटकादिविरहाप्रयोजकत्वादिति चेन्न; न हि यन्निष्ठतादात्म्यप्रतियोगित्वावच्छिन्नप्रतियोगिताकाभावः ज्ञानप्रयुक्तः तत्त्वमित्येव लक्षणं, येन व्यावहारिकहेमादेः प्रातीतिके कटकादौ तादात्म्यारोपादुक्तदोषः, किन्तु यन्निष्ठतादात्म्यस्य यत्समसत्ताकप्रतियोगिसामान्याभावो ज्ञानमयुक्तस्तत्त्वम्। यत्पदाभ्यामेकैव लक्ष्यव्यक्तिर्धार्या। अतएव शुक्तिरूप्यादितादात्म्यप्रतियोगिदमाद्यभावस्य शुक्तिज्ञानाप्रयुक्तत्वेऽपि न क्षतिः। एतेन—"इहेदानीं घटप्रागभाव इति लोकाननुभवादिहेदानीं घटो नेति बुद्धेः सामयिकात्यन्ताभावविषयकत्वान्न प्रागभावे अत्यन्ताभावातिरिक्ते मानम्" इति दीधित्युक्तमपास्तम्। इह मृदि घटो नेति बुद्धेः कपालाद्यवस्थारूपप्रागभावावगाहित्वात् कपालादेश्च घटादितादात्म्यादत्यन्ताभावत्वाभावात् तत्र घटात्यन्ताभावत्वे मानाभावात्। न च तत्र पूर्वत्वरूपाखण्डधर्मकल्पनेनैव व्यवहारनिर्वाहे प्रागभावत्वकल्पने मानाभाव इति वाच्यम्; पूर्वत्वोत्तरत्वयोरेव प्रागभावत्वध्वंसत्वरूपतास्वीकारात्। न च घटादेर्व्यधिकरणेऽपि तन्निरूपितयोस्तयोः सत्त्वाद्घटोदरनधिकरणेऽपि तत्प्रागभावध्वंसयोर्व्यवहारापत्तिरिति वाच्यम्; अत्र घटप्रागभावः अत्र घटध्वंस इति व्यवहारे पूर्वत्वोत्तरत्वयोः तन्निरूपितत्वस्येव तदाश्रये सामानाधिकरण्यस्य तादात्म्यस्य वा घटसंसर्गतया भानात्। इह मृदि घटो नेत्यादिबुद्धौ घटादेः विरोधिसंसर्गाभावस्य विषयत्वेन घटादिप्रागभावादिमति घटाद्यन्तरवति नोक्तबुद्धिः। न चेह न घट इत्यादिवाक्ये नञो विरोधिनि लक्षणा[2]पत्तेनेंदं युक्तमिति वाच्यम्; नञर्थे संसर्गाभावे घटत्वादिरूपान्वायितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वरूपविरोधस्य घटादेः प्रतियोगिनः संसर्गतया भानात्। अतएव घटसंयुक्ते न घटसंयोग इतिवदनुपहास्यते। घटसंयुक्ते अग्रे न

[1] हेमादेः. [2] विरोधिलक्षणा.

घटसंयोग इत्यादौ तु अग्रावच्छेदेन उक्तविरोधस्य भानं व्युत्पत्तिवैचित्र्यात्। न च नञोऽत्यन्ताभावे शक्तिस्वीकारेण तदर्थे तत्र घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपघटा[1]दिसंसर्गस्योक्तवाक्यजन्यबोधे भानेनोपपत्तावुक्तविरोधित्वरूपगुरुतरसंसर्गभानकल्पनमयुक्तमिति वाच्यम्; घटादिमत्तावुद्धौ घटाद्यसमानाधिकरणधर्मवत्ताज्ञानस्य प्रतिबन्धकत्वेन क्लृप्ततया उक्तवाक्यजन्यज्ञानस्य घटाद्यसामानाधिकरण्यरूपविरोधविशिष्टविषयकत्वे[2] सांसर्गिकविषयतासाधारणोक्तविरोधविषयताघटितरूपेण प्रतिबन्धकताकल्पनेनैवोपपत्त्या उक्त[3]प्रतियोगिताकत्वविषयताघटितरूपेणात्यन्ताभावज्ञानस्य प्रतिबन्धकत्वाकल्पनेन लाघवात्, उक्तज्ञानस्योक्तविरोधविषयकत्वेन वक्तुं युक्तत्वात्। किंच उक्तप्रतियोगिताकत्वघटितरूपेण प्रतिबन्धकत्वस्वीकारेऽपि उक्तबुद्धेरुक्तविषयकत्वानियमः[4] घटविरोधित्वविशिष्टघटात्यन्ताभावविषयकत्वेनैव तथा स्वीकार्यत्वात्, अन्यथाऽव्याप्यवृत्तित्वेन गृह्यमाणोक्ताभावज्ञानस्यापि प्रतिबन्धकत्वापातात्, अव्याप्यवृत्तित्वज्ञानस्योत्तेजकत्वे[5] च गौरवात्। तथाचोक्तप्रतियोगिताकत्वविषयतानिवेशो व्यर्थ इति ध्येयम्। पूर्वावस्थाया अनुपमर्देनयत्रावस्थान्तरतन्नाशौ यथा कपालद्वयासंयोगात् घटः तद्विभागाच्च तन्नाशः, तत्र तत्तत्कालादि[6]विशिष्टावस्थैव तत्प्रागभावध्वंसौ। वस्तुतस्तु तत्र घटस्य कपालनाशत्वं कपालान्तरस्य च पश्चादुत्पन्नस्य घटनाशत्वम्, अन्यथा कपालादेः घटादिकालीनानन्तसंयोगादिकल्पनागौरवात्। एवंचाविद्यादिरूपपूर्वावस्थायां तथा बोध्यम्। कपालनाशस्थले तु कापालिकाद्यवस्थैव कपालघटयोः नाशः, तत्रैव लोके तत्त्वानुभवात्। अतएव विष्णुपुराणे—

महीं घटत्वं घटतः कपालिकाकपालिकाचूर्णरजस्ततोऽणुः।

---

[1] घटत्वादि. [2] विषयकत्वेन. [3] अविच्छिन्न. पा. [4] नियमेन. [5] स्योक्तजनकत्वे. [6] कपालादि.

जनैः स्वकर्मस्तिमितात्मनिश्चयैः आलक्ष्यते ब्रूहि किमत्र तत्त्वम् ॥ इत्युक्तम् । तत्र हि क्रमिकाणां कपालादीनामण्वन्तानां सर्वेषां अतत्त्वता प्रतिपादिता । तत्र कपालिकाद्यन्यस्य ध्वंसादेः सम्भवे तदतत्त्वताया अप्रदर्शनात् न्यूनतेति कपालिकादिवत् सोप्युच्येत मही कपालादिः घटत्वं घटः पूर्वावस्थैवोत्तरावस्थां प्रति परिणामितया कारणम् । अतएव तयोस्तादात्म्यमित्यावेदयितुमेकपदासम्भवयोरपि तसिल्प्रत्ययप्रथमयोः भिन्नपदगतत्वेनोक्तिः । अणुः त्रुटिरालक्ष्यते । द्व्यणुकपरमाणू तु न स्तः । अन्यथा तदतत्त्वताया अप्रदर्शनात् न्यूनतापत्तेः । न च त्रुटेः पूर्वसिद्धत्वेन न जन्यतेति वाच्यं; अनन्तत्रुटितत्संयोगादीनां घटादौ पूर्वसिद्धताकल्पने गौरवात्, घटाद्यनन्तर्गतत्वेन उपलभ्यमानानामेव त्रुटीनामुत्पत्तिस्वीकारात् । अतएव 'रूपादिमत्त्वाच्च विपर्ययो दर्शनात्' इति सूत्रे घटादिवत्त्रुटिरनित्या रूपादेरित्युक्तम् । न चाप्रयोजकत्वं रूपादेरिति वाच्यम्; पाकादिना घटादिकमुत्पद्यते नश्यति च, न तु घटरूपादिकम्, एकैकस्मिन् बहूनामुत्पत्तिनाशकल्पने गौरवात्, नित्याखण्डरूपादेः तत्र घटादावनुभवानुरोधात्स्वीकार इति न्यायस्य घटादाविव त्रुटावपि तुल्यत्वात्, जलीयादित्रुटावपि रूपादीत्यादिपदेन संयोगादिकल्पनारूपोक्तगौरवापत्तिग्रहणात् अनित्यत्वावश्यकत्वात् । विवृतमधिकमेतत्सूत्रमुक्तावलौ नः । घटः ध्वंसः इत्यादि तु व्यवह्रियत एव । घटो ध्वंसत्वमापद्यत इत्यादिव्यवहारात् यदि न व्यवह्रियते तदा तादात्म्यस्य घञर्थत्वेन ध्वंसतादात्म्यस्य नामार्थस्य घटादावभेदान्वयासम्भवात् । अतएव साधुः ध्वंस इत्यादिप्रयोगः । अन्यथा धात्वर्थविशेषणत्वात् साध्वित्येव स्यात् । एवंच नश्यतीत्याद्यनुरोधेन परेषामिव न नः प्रतियोगितात्वादिना आख्यातस्य शक्तिः लक्षणा वा युज्यते, चलति स्फुरति भातीत्यादि-

साधारण्येन तादात्म्ये क्लृप्तशक्त्यैवोपपत्तेरित्यादि लाघवम्। किंच घटतद्ध्वंतुकपालयोः समसत्ताकभेदे गुरुत्वादिभेदात्तत्कार्यावनतिविशेषाद्यापत्तिः। अथ गुरुत्वादिकं कार्यद्रव्ये कुत्रापि वा न जायते, उक्तकार्यं तु त्रुटिगुरुत्वेभ्यः अवयवविशेषाद्वा, तर्ह्यवयवानां मिथस्संयोगमात्रादवयवनाशरूपात्परिणामविशेषाद्वा उक्तकार्यसंभवात् [1]कृतमवयवावयवियौगपद्येनोक्तगौरवेण। अथ भिन्नकालीने ध्वंसे प्रागभावे च कथं तत्प्रतियोगिनः तादात्म्यमिति चेत् प्रतियोग्यनुयोगिभावोऽपि ते कथं? अनुभवस्य मेऽपि तुल्यत्वात्। किंचैकस्यामेव मूलाविद्याव्यक्तौ तत्तत्सामग्रीसमवधानोत्तरकालावच्छेदेन सामान्यगुणकर्मणां भेदाभेदादीनां चाखण्डानां [2]अविद्यावस्थारूपत्वेनानादीनां यथामर्यादं सत्त्वम्। अतएवाविद्यान्यजडजातौ मानाभाव इति वृद्धाः। तन्नाशश्च गुणादौ तुल्यः। [3]तेषां नित्याखण्डत्वमपि। एकैका एव नीलारुणादिव्यक्तय इत्यादिना मीमांसकनव्यतार्किकाद्यनुमोदितं आविर्भावमात्रं न किञ्चिदुत्पद्यते इत्यादिसांख्यादिसिद्धान्तस्याप्ययमेव निष्कर्षः, प्रकारान्तरस्यासम्भवात्। इयांस्तु विशेषः—यत्तैः [4]अविद्यानामविनाशि सत्यत्वं भेदाग्रहादिकं चोच्यते, सिद्धान्ते तु विनाशि मिथ्यात्वम्। भेदाग्रहादिस्थले च प्रातिभासिकाभेदादिरिति मूलाविद्यायां घटत्वादेरुक्तकालावच्छेदेनैव सम्बन्धो घटाद्युत्पत्तिः, कपालिकात्वाद्युक्तसम्बन्धो घटादिनाशो व्यवह्रियते। उक्तं च तत्त्वकौमुद्यां—'कारणसम्बन्धः उत्पत्तिः' इति। यावतां मेलन क्षणाव्यवहितोत्तरक्षणावच्छेदेन यस्य सम्बन्धः तावतामनन्यथासिद्धानां तद्विशिष्टं प्रति तत्कारणत्वं व्यवह्रियते। न च कारणकूटवत् तत्तत्क्षणाव्यहितोत्तरक्षणावच्छेदेन मूलाविद्यायां घटत्वादिरूपावस्था-

[1] कृत्रिमावयवयोगपद्येन इति. पा. [2] अवस्थाविद्यारूपत्वेन इति. पा.
[3] तेषांति. पा. [4] अविद्यानाद्यानामितिवा. पा.

विद्यासम्बन्धो घटाद्युत्पत्तिरिति वाच्यं; तत्र तत्तत्क्षणत्वादीनामनादि-तत्तदविद्यारूपतया तद्विशिष्टमूलाविद्यारूपक्षणानामप्यनादित्वात् तत्त-दवच्छिन्नसम्बन्धस्योत्पत्तित्वं न युक्तमिति चेत्, न। अन्येषु तत्त-त्क्षणव्यक्तित्वसंबन्धेषु अन्यक्षणव्यक्तित्वसम्बन्धोऽवच्छेदकः तत्राप्य-न्यक्षणव्यक्तित्वसम्बन्धः अवच्छेदकः इत्यविद्यारूपतत्तत्क्षणव्यक्तित्वा-नामनन्तत्वेनैकैकस्य सम्बन्धे अपरस्यापरस्य सम्बन्धोऽवच्छेदक इत्य-दोषात्। तार्किकादिमतेऽपि स्वजन्यविभागप्रागभाववैशिष्ट्यरूपतत्तत्क्ष-णत्वानां क्रियानिष्ठानां मीमांसकनव्यतार्किकयोरिव सांख्यादीनां मतेऽपि क्षणानां क्षणिकानां पूर्वं सतां उत्पत्तिः, इति विशेषः। तथा-चानादिघटत्वादिरूपपल्लवाविद्यासम्बद्धानां तत्तत्क्षणावच्छिन्नत्वमेव मूला-विद्यारूपत्वेनानादिघटादीनामभिव्यक्तिः सांख्यादिसम्मता। तवा-भिव्यक्तिः पूर्वमसतीति चेदसत्कार्यवादापत्तिः सतीति चेत्तस्या अप्य-भिव्यक्तिरेवं तस्या अपीत्यनवस्था इत्याशङ्क्य परेषामुत्पत्तिवददोष इति तत्त्वकौमुद्यां समाहितम्। एवंच परेषामुत्पत्तिरसती तस्याः उत्प-त्तिरपि सैव युगपत् क्षणद्वयस्य मानाभावेनानङ्गीकारात्, क्षणान्त-रसम्बन्धे तदुत्पत्तित्वस्य वक्तुमशक्यत्वात्। अतो नानवस्था। तथाऽस्माकं अगत्या पूर्वं असती अभिव्यक्तिः सैव च तस्याः अभिव्य-क्तिरिति नोक्तदोषः। अतएव प्रतिक्षणं परिणामिनो भावाः शुद्धे[1]चिति शक्तिरिति सांख्यादिसिद्धान्तः। क्षणविशिष्ट[2]रूपेण चिदन्यस्योत्पत्तिसम्भवात्। चितस्तु नोक्त[3]रूपेणाप्युत्पत्तिरसङ्गत्वे-नोक्तरूपस्यैवाभावादिति भावः। अविद्यादीनां स्वरूपेणानावृतत्वेऽपि एकविशिष्टमूलाविद्यायाः अपरसम्बन्धांशे आवरणे न दोषः। 'षडस्माकमनादयः' इत्यनादीतरेषां अविद्यारूपत्वाभावेऽप्यक्षतेश्च।

---

[1] अन्ये हि, पा. [2] क्षणविशेष. [3] नोत्तर.

दृष्टिसृष्टिपक्षे उक्तावरणस्याप्यस्वीकाराच्च । अथैवमपि घटत्वकपालिकात्वयोः भिन्नकालीनत्वात् तद्विशिष्टयोः न तादात्म्यं किंतु तदुपलक्षितयोरिति चेत्, सत्यं; अतएव घटो यः स्थितः स इदानीं कपालिका, बालो यः स्थितः स इदानीं युवेत्यादिरेव अनुभवः न तु घटः कपालिका इत्यादिः । अतएव घटः प्रमेयः नीलो घटः इत्याद्यनुभवयोः घटत्वादिविशिष्टे प्रमेयादेः नीलत्वाद्युपहिते घटस्य च अभेदभानात् उक्तानुभवाद्वैलक्षण्यम् । भाष्यादौ चायमर्थः स्फुटः — 'भावे चोपलब्धेः' इति सूत्रे हि द्रव्यस्य भावाभावाभ्यां गुणादेः तयोर्दर्शनात् द्रव्यमेव संस्थानभेदाद्गुणाद्यनेकधीशब्दभाक् । यथैको बाल्यादिभेदेनेत्युक्तम् । यत्तु तदुत्तरमेवं सति सांख्यसिद्धान्त इति काणादं प्रत्युक्तं, तत्सत्यताद्यङ्गीकारे, तत्त्यागे तु वेदान्तसिद्धान्तः । अतएव सम्बन्धतद्वतोरेकत्वेऽपि स्वरूपबाह्यरूपापेक्षया घटस्संयोग इत्यादिधीशब्दाः । यथा एकस्मिन् मनुष्यो ब्राह्मण इत्यादिः । न हि कार्यकारणयोः भेदः आश्रिताश्रयत्वं वा वेदान्तिभिरभ्युपगम्यते, कारणस्यैव संस्थानमात्रं कार्यमित्यभ्युपगमादिति तत्रैव पश्चादुक्तम् । तत्र घटत्वविशिष्टं प्रति स्वरूपं घटत्वाद्यवच्छिन्नप्रतियोगिताकभेदानुयोगितानवच्छेदकं घटत्वाद्येव बाह्यरूपं तदन्यत्संयोगद्रव्यत्वादि । 'भावाच्चोपलब्धेः' इति सूत्रे तन्तुव्यतिरेकेण कार्यं न, किन्तु तन्तव एवातानवितानवन्तः पट इत्युक्त्वा तर्ह्यातानवितानरूपसंयोगा एव जायन्त इति कार्यस्य पूर्वमसत्त्वापत्तिरिति हृद्याशङ्क्य मूलकारणपर्यन्तमेषा रीतिः न किंचित् जायते न्यायसाम्यादित्यभिप्रायकं तन्तुष्वंशव इत्यादिकमुक्तम् । भामत्यां च 'तत्रैकत्वं वनवत्' इत्युक्तम् । 'सत्त्वाच्चावरस्य' इति सूत्रे पूर्वं कारणात्मनैव कार्यस्य अवरकालीनस्य सत्त्वात् कारणानन्यत्वमुक्तम् । 'युक्तेश्शब्दान्तराच्च' इति सूत्रे कारणव्यापारवैयर्थ्यमाशङ्क्य नैषदोषः कार्याकारेण कारणव्यवस्थापकत्वात्

तथाच मुद्गरपातेन घटस्य स्वरूपेणावस्थितिविरहेऽपि कारणात्मना अवस्थितिविरहाभावात् ब्रह्मज्ञानप्रयुक्त एव स इति

तस्यार्थवत्त्वादित्युक्ता तर्हि कार्याकारो जायत[1] इति हृद्याशङ्क्य कारणे अव्याप्यवृत्तिपटत्वादिसम्बन्धस्योक्तरीत्या सम्पादकत्वमेव तादृशव्यवस्थापकत्वं अन्यथा कार्यासत्त्वतादवस्थ्यादित्यभिप्रायकमुक्तम्। ततश्च कपालत्वघटत्वयोः भेदात्तदाश्रययोरपि स्वसमसत्ताकभेदः तादृशाभेदविरोधी [2]इत्याशङ्क्य बाल्ययौवनादौ तददर्शनात् न तथेत्युक्तं नच विशेषदर्शनेत्यादिना। ततश्चाव्याप्यवृत्तिघटत्वादिसम्बन्ध एवोत्पत्तिः, ततश्च तादृशभेदश्चावश्यको बालयूनोरपि स इष्ट इत्याशङ्क्य तत्रोत्पत्त्यादिस्वीकारे सङ्कोचविकासाभ्यां एकस्यापि तत्स्यादित्याभिप्रायकं 'न क्षीरे'त्याद्युक्ता तस्मान्मूलकारणमेव तत्तदाकारेण सर्वव्यवहारास्पदमित्युपसंहृतम्। "उभयथा च दोषात्" इति सूत्रे च भाष्यभामत्योः वायवीयादिपरमाण्वपेक्षया तैजसादिपरमणूनां स्थूलतैजसादिद्रव्यस्येव मूर्त्युपचयः[3] आपादितः। तच्चोक्तरीत्या तेजस्त्वादीनां शब्दस्पर्शरूपादीनां च मेळनात् तज्जन्यविशेषस्य स्थूलतैजसस्थले अनङ्गीकारादेवोपपद्यते, अन्यथा तत्र स्थूलद्रव्योत्पत्तिस्वीकारे तदसम्भवात्। न च तदस्वीकारेपि महत्त्वविशेषस्य तैजसत्वादिव्याप्यजातिविशेषस्य च स्थूल इव परमाणावभावान्नोक्तापत्तिरिति वाच्यम्; स्वरूपगुणजातिभिः त्रसरेण्वविशेषस्यैवापादनात्, त्रसरेणौ चोक्तजातिमहत्त्वयोः मानाभावात्, महत्त्वमात्रापेक्षया प्रकृष्टस्येवापकृष्टस्यापि महत्त्वस्यानङ्गीकारात्। नीलपीतकपालारब्धघटादौ रूपानङ्गीकारेण रूपमहत्त्वयोः कारणताद्वयकल्पनापेक्षया लाघवेन च रूपमहत्त्वयोः कारणत्वस्थले शक्तिविशेषविशिष्टत्वेन तादात्म्यसम्बन्धेन द्रव्यचाक्षुषहेतुत्वस्वीकारात्। अत

---

[1] न जायते. [2] समसत्ताकं तदेव तादृशभेदविरोधि इति पा. [3] मृद्युपचयः

नातीतघटादावव्याप्तिः। अतएवोत्तरज्ञाननिवर्त्ये पूर्वज्ञाने न सिद्धसाधनम्। न वा वियदादौ ब्रह्मज्ञाननाश्यत्वेऽपि तद्वदेव मिथ्यात्वासिद्ध्या अर्थान्तरम्। उत्तरज्ञानेन लीनस्य पूर्वज्ञानस्य स्वकारणात्मना अवस्थानात् अवस्थितिसामान्य-

एव परमाण्वादेरचाक्षुषत्वोपपत्त्या महत्त्वस्य तदहेतुत्वात्, उक्तमहत्त्वाङ्गीकारेऽपि लाघवेन प्रकृष्टमहत्त्वासमवहिततैजसत्वादिसम्बन्धविशिष्टे सर्वत्र तत्सम्बन्धस्योक्तरीत्या स्वीकारेण परमाणावपि तत्सम्भवात्। तदुक्तं भामत्यां—'तथाचापरमाणुत्वं स्थूलत्वात्' इति। तथाच परमाणुत्वद्व्यणुकत्वासम्भवः पर्यवसन्नः। महत्त्वस्य प्रत्यक्षानियामकत्वलाघवमप्यत्रोपजीव्यम्। कल्पतरावपि—"द्रव्यस्य गुणसमुदायरूपत्वात् तद्वृद्धिह्रासाभ्यां उपचयापचयौ" इत्युक्तम्। यदिच मूलाविद्यायां कादाचित्कस्य घटत्वादिसम्बन्धस्य अवश्यं प्रयोजकं वाच्यं घटसंयोगाद्यभावोपि भूतलादौ घटसंयोगसामग्रीरूपकारणाभावप्रयुक्तः अन्यथा सर्वदैव स्यात् कदापि वा तन्न स्यादिंति ब्रूषे तदास्तु दण्डादि[1]सम्बन्ध एव तथा। नैतावता कस्यचिदुत्पत्तिः, त्वयापि घटघटत्वादिसम्बन्धस्य दण्डादिप्रयुक्तस्य तदनङ्गीकारादिति अवहिततमाचित्तैश्चिन्त्यमेतत्सुधीभिः। ब्रह्मज्ञानप्रयुक्त एव स—इति॥ ब्रह्मणः तद्ज्ञानस्य वाऽज्ञानादिध्वंसत्वेन ब्रह्मज्ञानप्रयुक्तत्वमखण्डं युक्तम्, ज्ञानात्कैवल्यमिति लोकशास्त्रव्यवहारात्। आधार एव ध्वंसः प्रतियोग्येव प्रागभावस्य स इति मतयोः आत्मनोऽज्ञानादिध्वंसत्वेन प्रयुक्तत्वस्य स्वस्यैव स्वप्रागभावध्वंसत्वेन स्वप्रयुक्तत्वस्य च स्वीकारात्। उत्तरज्ञानात् ज्ञानध्वंसः स्वस्मात् स्वप्रागभावनाश इति प्रत्ययात्, जन्यत्वं तु क्षेमसाधारणं, ब्रह्मणोऽन्यादृशं तु पञ्चमप्रकारस्यैवेति यथास्थानं वक्ष्यते। एकमेव

[1] तत्तद्दण्डादीति पाठान्तरम्.

विरहानुपपत्तेः । शशविषाणादाववस्थितिसामान्याविरहेऽपि तस्य ज्ञानप्रयुक्तत्वाभावान्नातिव्याप्तिः । शुक्तिरजतादेश्चापरोक्षप्रतीत्यन्यथानुपपत्त्या प्रतिभासकाले अवस्थित्यङ्गीकारान्न बाधकज्ञानं विना तद्विरह इति न साध्यविकलता । अतएवोक्तं

ध्वंसत्वं स्वपरसाधारणसकलदृश्यप्रतियोगितानिरूपकमिति ध्वंसत्वान्तरास्वीकारादनवस्था नाशङ्क्या, दृश्यप्रतियोगितात्वेन निरूप्यत्वात् नात्माश्रयः । यद्यपि परमतेऽप्युत्तरधीप्रयुक्तो ध्वंसः पूर्वज्ञानात्मकसामान्यस्यैवेति सिद्धसाधनादितादवस्थ्यं, विषयतासम्बन्धेन प्रयोजकत्वोक्तावपि परामर्शप्रयुक्तानुमित्यादेः प्रागभावे बाधधीप्रयुक्तानादिसंसर्गाभावस्य प्रतियोगिनिविष्टज्ञानादौ च तथा। तथापि ज्ञानप्रयुक्तावच्छेदकं ज्ञानप्रयुक्तं वा अज्ञानवृत्तिप्रतियोगित्वं लक्षणं निर्दोषम् । अज्ञानध्वंसक्षण एव तत्कार्यस्य जीवेशभेदादेश्च ध्वंस एक इत्येकैव तदीया तेषु प्रतियोगितेति नाज्ञानभिन्नाव्याप्तिः । ज्ञानप्रयुक्ताज्ञानध्वंसस्य प्रतियोगित्वं वा अज्ञानध्वंसादितरध्वंसोत्पत्त्यङ्गीकारे अज्ञानध्वंसप्रयुक्तध्वंसप्रतियोगितादात्म्यं तत् उक्तप्रतियोगित्वं जीवेशभेदादाविवाज्ञानकार्येऽपि तत्तादात्म्यमज्ञानेऽपीति दृश्यमात्रे तदन्वयः अज्ञानवृत्तिभेदादिप्रतियोगितया सिद्धसाधनस्य वारणाय विशेषणंशशविषाणेति । शशविषाणे विरहप्रतियोगित्वस्यैवानभ्युपगमात् आदीति । घटादीत्यर्थः । घटादौ चातिव्याप्तिः सिद्धसाधनं, तथाच पटादिनिष्ठस्य घटाद्यवस्थितिसामान्याविरहस्य ज्ञानाप्रयुक्तत्वान्न सिद्धसाधनमिति भावः । शुक्तिरजतादेः पराङ्गीकृतमसत्त्वं निरस्यति—**शुक्तीति** । प्रतिपन्नोपाधौ स्वरूपेण निषेध्यस्यापि नासत्त्वं, असद्विलक्षणरूपं विनाप्यापरोक्ष्ये शशविषाणेऽपि तत्स्यादिति भावः । एतेन—" अवस्थित्या सामान्यं विशेष्यते विरहो वा, आद्ये अवस्थितिसामान्यं कारणात्मनाऽवस्थितिः कारणमिति यावत् । तथाच ज्ञानप्रयुक्ताभावप्रतियोगिकारणकत्वे वाच्ये उत्तरधीप्रयुक्ताभावप्रतियो-

गिपूर्वधीजन्यसंस्कारादौ सिद्धसाधनम्। अनाद्यविद्यादौ च बाधः। तादृशप्रतियोग्यविद्योपादानकत्वोक्तौ प्रतियोग्यन्तवैयर्थ्यं अनादिदृश्ये बाधश्च। न द्वितीयः, घटाद्यवस्थितेर्हि सामान्येन विरहो घटादेः स्वरूपविरहः कारणरूपविरहश्चेति द्वयं विशेषाभावान्यसामान्याभावस्य त्वयैवाविद्यावादे निरस्यत्वात्। तथाच स्वरूपविरहस्य ज्ञानाप्रयुक्तत्वादसम्भवः, अवस्थात्वस्यातिप्रसक्तत्वेन ज्ञानप्रयुक्तविरहप्रतियोगितानवच्छेदकत्वाच्च। शुक्तिरूप्यादेः स्वरूपेणावस्थित्यङ्गीकारे स्वरूपेण निषेधस्यासम्भवात् शुक्तिरूप्याद्यभावस्य शशविषाणाद्यभाववत् ज्ञानाप्रयुक्तत्वाच्च साध्यवैकल्य बाधश्चेत्यपास्तम्। किंच ज्ञानकालाविद्यमानं यत् घटादिस्थूलस्वरूपं तद्विरहस्य सूक्ष्मावस्थारूपस्य ज्ञानाप्रयुक्तेऽपि ज्ञानकालविद्यमानं यद्घटादिस्थूलरूपं तद्विरहो ज्ञान[1]प्रयुक्त एव, ज्ञानकालाविद्यमानस्थूलेऽपि स्वकीयसूक्ष्मावस्थाध्वंसस्य ज्ञानप्रयुक्तस्य प्रतियोगित्वमव्याहतं, घटप्रागभावे घटध्वंसप्रतियोगित्ववत्। तथाच स्वरूपविरहो ज्ञानाप्रयुक्त इति न व्याहतम्। अपिच सामान्याभावास्वीकारेऽपि विशेषाभावकूटनिष्ठेन अज्ञानकार्यत्वावच्छिन्नप्रतियोगिताकविरहत्वेन एकाज्ञानपक्षे अज्ञानध्वंसोत्तरमज्ञानप्रयुक्तध्वंसस्वीकारे अज्ञानभिन्नदृश्यत्वावच्छिन्नप्रतियोगिताकविरहत्वेन युगपत्सर्वदृश्यध्वंसस्वीकारे दृश्यत्वावच्छिन्नप्रतियोगिताकविरहत्वेन ब्रह्मज्ञानप्रयुक्तत्वाङ्गीकारात् ज्ञानप्रयुक्ततावच्छेदकस्वावच्छिन्नप्रतियोगिताकविरहत्वधर्मवत्त्वं लक्षणं निर्दोषम्। न च ध्वंसस्यैव ज्ञानप्रयुक्तत्वान्नोक्तरूपेण तत्, अन्यथा शुक्तिरूप्यादेः उत्पत्तिपूर्वं अनधिकरणदेशे वा तदभावो ज्ञानप्रयुक्त इति स्यादिति वाच्यम्; दाहस्य हेत्वभावकाले जलादौ वा तदभावो मणिप्रयुक्त इति बुद्ध्यभावात्, देशकालविशेषावच्छेदेन तदभावस्य तत्प्रयुक्तत्ववद्देशकालविशेषावच्छेदेन संसर्गाभावमात्रस्यैव

[1] अज्ञानध्वंस. पा.

विवरणाचार्यैः—'**अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा** ज्ञानप्रयुक्तत्वसम्भवात्, तादृशात्यन्ताभावत्वादिनाऽपि ज्ञानप्रयुक्तत्वप्रतीतेश्च, स्वविशिष्टप्रतियोगिकध्वंसत्वस्य स्वादिविरहत्वान्तस्थले निवेशसम्भवाच्च। यत्तु कालदेशविशेषयोः एकनिष्ठापरावच्छिन्नकार्याभावाधिकरणतैव प्रतिबन्धकादिप्रयुक्तेति, तन्न; इहेदानीं दाहाभावो मणिप्रयुक्त इत्यादिशब्दप्रत्यये अधिकरणत्वाप्रत्ययादाधेयत्वस्यैव नव्यमते सप्तम्यर्थत्वात्। न च तयोरेकनिरूपितमन्यावच्छिन्नमाधेयत्वं प्रयुक्तं[1] उक्तप्रत्यये भातीति[2] वाच्यम्। प्रयोजकसमानाधिकरणस्यैव प्रयुक्तस्यौचित्यात्। अन्यथा दाहाभावो मणिप्रयुक्तो नेति प्रत्ययापत्तेः। **अज्ञानस्य स्वकार्येणेति**। स्वोपादानाज्ञानस्य स्वस्य च निवर्तकं ज्ञानमारोप्यस्य बाध इत्यर्थः। तेनाज्ञानस्य बाध इति न व्यवहारः। किन्तु शुक्तिरजतादेः स इति उत्तरधीः पूर्वधीबाधो मा भूदिति स्वोपादानाज्ञानस्येति। उपादानत्वं प्रयोजकत्वम्। तेनाज्ञानादिसम्बन्धादिबाधे नाव्याप्तिः। अज्ञानतत्कार्ययोः ध्वंसयोः भेदस्वीकारे स्वोपादानाज्ञाननिवृत्त्युदयक्षणे स्वबाधाव्यवहारात् स्वस्येति। निवर्तकत्वं च निवृत्त्युपधायकत्वं उपाधिसन्निधानादिकालीनज्ञानस्य प्रतिबिम्बादिभ्रमबाधत्वे स्वरूपयोग्यत्वमेव वाच्यं, स्वस्येति न वाच्यम्। परोक्षस्याप्यपरोक्षभ्रमबाधत्वे अज्ञानतद्व्याप्ययोः ध्वंसैक्ये वा उपधायकत्वोक्तिपक्षेऽपि स्वस्येति न वाच्यम्। परोक्षभ्रमोपादानस्य असत्त्वापादकाज्ञानस्य निवर्तकत्वात् परोक्षेऽपि लक्षणान्वयः। उपधायकत्वं च एककालीनत्वघटितमिति निवृत्तिकालएव बाधव्यवहारः स्थूलस्वरूपस्यापि सूक्ष्मावस्थानिवृत्तिप्रतियोगित्वमिति तत्कालेऽपि तद्बाधव्यवहारः। निवृत्त्युपधायकत्वोक्तिपक्षे भाविनो वर्तमानं ज्ञानं बाधो नेत्याशयेनाह—**वर्तमानेन प्रविलीनेन वेति**। तच्च लक्षणाप्रविष्टत्वेन

[1] मवच्छिन्नमाधेयत्वप्रयुक्ततया. [2] न भातीति.

सह ज्ञानेन निवृत्तिर्बाधः' इति । वार्तिककृद्भिश्चोक्तम्—

तत्त्वमस्यादिवाक्योत्थसम्यक्धीजन्ममात्रतः ।
अविद्या सह कार्येण नासीदास्ति भविष्यति ॥

इति । सह कार्येण नासीदिति लीनेन कार्येण सह निवृत्त्यभिप्रायम् । 'सह कार्येण न भविष्यति' इति तु भाविकार्यनिवृत्त्यभिप्रायमित्यन्यदेतत् । रूप्योपादानमज्ञानं

स्वरूपकथनमपि अतीतस्यापि वर्तमानज्ञानं बाध इत्यत्रोपष्टम्भकम् । अज्ञानप्रयोज्यस्य ज्ञानप्रयुक्ता निवृत्तिः निवृत्तिस्वरूपयोग्यं ज्ञानं वा बाध इति बाधसामान्यलक्षणम् । प्रयुक्तत्वस्य स्वरूपयोग्यत्वस्य चाज्ञाननिवृत्तिद्वारकत्वं वाच्यम् । तेनोत्तरधीप्रयुक्तपूर्वधीनिवृत्तौ नातिव्याप्तिः । अज्ञानतत्प्रयुक्तयोः ध्वंसैक्ये निवृत्तावज्ञानप्रतियोगिकत्वं वाच्यम् । ज्ञानप्रयुक्तेति न वाच्यम् स्वरूपयोग्यत्वं[1] च साक्षादेव वाच्यमिति दिक् । **लीनेन कार्येणेति** । येन कार्येण सह अविद्या आसीत् येन चास्ति भविष्यति तैस्सह सा तत्त्वज्ञानान्नास्तीति श्लोकार्थः । तत्राविद्याया इवातीतादिकार्याणामपि ध्वंसरूपसंसर्गाभावस्य तत्त्वधीप्रयुक्तत्वप्रतीतेरतीतस्य च सूक्ष्मावस्थारूपो ध्वंसो न वर्तमानतत्त्वधीप्रयुक्तः तस्य तत्त्वाप्रत्ययात् । किन्तूक्तावस्थाप्रतियोगिकध्वंस इति ज्ञानप्रयुक्तध्वंसप्रतियोगित्वाय लीनावस्था आवश्यकीति भावः । **भावीति** । वर्तमानतत्त्वज्ञानेनाज्ञानस्य आवरणशक्तिमात्रस्य वा निवृत्तिद्वारा भुज्यमानकर्मफलस्य भाविनो निवृत्तिः । सा च प्रकृतानुपष्टम्भिकेत्याह—**इत्यन्यादिति** ।

[1] स्वरूपयोग्यत्वात्

स्वकार्येण वर्तमानेन लीनेन वा सहाधिष्ठानसाक्षात्कारा-न्निवर्तते । तत्तद्रूप्योपादानानां अज्ञानानां भेदाभ्युपगमा-दिति न दृष्टान्ते साध्यवैकल्यम् । मुद्गरपातानन्तरं घटो नास्तीति प्रतीतिवदधिष्ठानज्ञानानन्तरं शुक्त्यज्ञानं तद्गत-रूप्यं च नास्तीति प्रतीतेः सर्वसम्मतत्त्वात् । ज्ञानत्वव्याप्यध-र्मेण ज्ञाननिवर्त्यत्वमित्यपि साधु । उत्तरज्ञानस्य पूर्वज्ञान-निवर्तकत्वं च न ज्ञानत्वव्याप्यधर्मेण, किन्त्विच्छादिसा-धारणेनोदीच्यात्मविशेषगुणत्वेन उदीच्यत्वेन वेति न सिद्ध-

---

अज्ञानानां भेदेति । तथाच तन्मत एवेदं साध्यमिति भावः । अथवा ननु अवस्थाऽज्ञानानभ्युपगमपक्षे साध्यं नेदृशं सम्भ-वतीत्यत आह—रूप्येत्यादि । अधिष्ठानेति । ब्रह्मेत्यर्थः । निवर्तते निवर्तितुं योग्यम् । तथाचाज्ञानकार्यत्वरूपं ज्ञाननिवर्त्यतायो-ग्यत्वमेव वाच्यं, उक्तसंग्रहायेति भावः । एकस्य मूलाज्ञानस्य कार्यमात्रोपादानत्वं सहकारिवैचित्र्यादित्याह—तत्तदिति । अज्ञाना-नामिति । पदार्थतावच्छेदकभेदेन एकशेषानेकवचनयोरुक्तिः सूर्याग्नि-त्रावित्यादिवत् । भेदः तत्तद्दोषादिसहकारेण तत्तद्भ्रमोपधायकत्वम् । नास्तीति प्रतीतेरिति । न च तत्र ध्वंसभाने[1] रूप्यध्वंसवत्ति रूप्यवत्यपि तादृशबुद्ध्यापत्त्याऽत्यन्ताभावविषयकत्वस्यैव वाच्यत्वात् कथं ज्ञानप्रयुक्तनिवृत्तिसिद्धिरिति वाच्यम्; तादृशबुद्धेः रूप्यत्वाव-च्छिन्नविरोधिसंसर्गाभावविषयकत्वेनोक्तापत्त्यभावात् । किंच पातानन्तरं पातोत्तरमेव। रूप्यं चेति चकार एवार्थो ज्ञानानन्तरमित्यत्र योज्यः। तथाच ज्ञानानन्तरमेव रूप्यं नास्ति[2] नतु ज्ञानपूर्वमिति प्रतीतेः ध्वंस एव विषय इति भावः । उदीच्यात्मेति । शब्दस्य तु पृथिव्यादिगुणस्य वायु-संयोगादिनैव नाशः । उदीच्यत्वेनेति । उदीच्यगुणत्वादिव्यापके-

---

[1] ध्वंसाभाने. [2] नास्तीति धीः इति पा.

साधनादि । नापीच्छाद्यनिवर्त्ये स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे अतिव्याप्तिः, स्मृतित्वेन स्मृतेः संस्कारनिवर्तकत्वे मानाभावात् । स्मृतौ हि जातायां संस्कारो दृढो भवतीत्यनुभवसिद्धम् । दृढत्वं च समानविषयकसंस्कारानेकत्वमित्यदोषः । वस्तुतस्तु साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वं विवक्षितम् । अतो न पूर्वोक्तदोषः । नापि निश्चयत्वेन ज्ञानत्व-

---

त्यर्थः । व्यापकत्वरूपावच्छिन्नत्वस्य तृतीयार्थत्वान्नाम्नोप्युदीच्यविशेषपरत्वाच्च । तथाच गुणत्वादिना निवर्तकत्वं, निवर्त्यता तु धर्मादिव्यावृत्तेन शब्दसाधारणेन । न च ज्ञानादेः क्षणिकत्वापत्तिः स्वस्यैव नाशकत्वादिति वाच्यम् ; पूर्वत्वसम्बन्धेन नाशकत्वस्वीकारात् । वस्तुतस्तु उदीच्यत्वेनेत्यस्य जातिविशेषेणेत्यर्थः । तेन गुणत्वादेः व्यापकत्वेन अन्यथासिद्ध्या विनिगमकाभावेन च ज्ञानत्वादिना न तत्प्रसक्तिः । यत्तु सिद्धान्ते पूर्वधीनिवृत्तिरेवोत्तरधीः अतो न सिद्धसाध्यतेति, तन्न ; ज्ञानमेवाज्ञाननिवृत्तिरित्यस्यापि तुल्यत्वात् ज्ञानात्मकनिवृत्तिप्रतियोगित्वे वाच्ये तद्दोषतादवस्थ्यात् अनुभवसिद्धं विलक्षणस्मृत्यादिकार्येणानुमेयम् । ननु अनुमेयो विलक्षणसंस्कारोपि स्मृतिजन्य इति स्मृत्या पूर्वसंस्कारनाश एवेत्यत आह—**दृढत्वं चेति** । तथाच समानविषयकत्वादिसम्बन्धेन संस्कारविशिष्टसंस्कारत्वेन विलक्षणस्मृतौ हेतुत्वं न तु विलक्षणसंस्कारत्वेन, वैलक्षण्यस्य तत्र स्मृतिनियम्यत्वस्य संस्कारनाशादेश्च कल्पने गौरवात् । न चोपेक्षात्मकस्मृत्युत्तरं स्मृत्यापत्तिः, उद्बोधकाभावात् । पदज्ञानत्वाद्यनुगतरूपे विशेष्यविशेषणत्वाविनिगम्यत्वेन नानाहेतुत्वापत्त्या विजातीयत्वेनैवोद्बोधकत्वादिति भावः । **संशये** विपरीतज्ञाने । यद्यपि ध्वंसत्वेन प्रयुक्तत्वोक्तौ नायं दोषः अनादिसंसर्गाभावस्यैव निश्चयादिप्रति-

बन्धकप्रयुक्तत्वात् । अनुमित्यादिरूपः प्रागभावध्वंसो न ध्वंसत्वेन परामर्शादिप्रयुक्तः, तथापि ज्ञानत्वव्याप्यापेक्षया लाघवात्साक्षात्कारत्वमेव वाच्यं न तु ध्वंसत्वेन प्रयुक्तत्वमिति भावः । ननु इदं रजतं पश्यामीत्यनुभूयमानभ्रमं प्रति चाक्षुषत्वेन निवर्तकत्वं एवं स्पृशामीत्याद्यनुभूयमाने स्पार्शनत्वादिनेति साध्यवैकल्यमिति चेन्न; चाक्षुषाधिष्ठानधर्मजन्यभ्रमोपधायकाज्ञानत्वेन चाक्षुषत्वेन निवर्त्यनिवर्तकतोक्तौ तादृशोपधानशून्याज्ञानस्य चाक्षुषेणाप्यनिवृत्त्यापत्तेः । उक्तभ्रमस्वरूपयोग्यतोक्तौ चाक्षुषं विना स्पार्शनादिना तादृशस्वरूपयोग्याज्ञानानिवृत्ति[1] प्रसङ्गात् । न च स्पार्शनादिनिवर्त्याज्ञानं नोक्तस्वरूपयोग्यमिति वाच्यम्; चाक्षुषस्पार्शनाधिष्ठानधीजन्यभ्रमस्य समूलस्य स्पार्शनादिना निवृत्तेः । तत्राज्ञानभेदस्वीकारेऽपि अज्ञानसत्त्वे अधिष्ठानप्रकाशानुपपत्तेः । न च साक्षात्कारत्वेन निवर्तकत्वे अधिष्ठानस्पार्शनोत्तरं क्वचिच्चाक्षुषादिभ्रमस्यानुभूयमानस्यानुपपत्तिरिति वाच्यम्; तादृशस्थले स्पार्शनादौ अप्रमात्वधिया निवर्तकत्वास्वीकारात् । अन्यथा वह्न्यादौ स्पार्शने तदन्यत्वादिचाक्षुषभ्रमाद्यापत्तेः । अन्यथा रजतभेदादितद्व्याप्यत्वानवगाहिनी शुक्तित्वादिधीरखण्डबह्वधीश्च न भ्रमनिवर्तिका स्यात् । परेषां तथैवाभ्युपगमादित्यस्याप्यापत्तेश्च परोक्षप्रातिभासिकभ्रमे साक्षात्कारत्वेनानिवर्तकत्वेपि तस्यादृष्टान्तत्वेन न दोषः । न च ब्रह्मज्ञानेऽपि निश्चयत्वेनैव तथास्तु, तच्च जातिविशेषादिरूपं निर्विकल्पेऽपीति वाच्यं; अभानापादकस्य परोक्षेण निवृत्त्यननुभवात् अतादृशाज्ञानं प्रत्येव तथा स्वीकारात् । न च परोक्षभ्रमोऽप्यभानापादकाज्ञानादिति वाच्यं; पिशाचाद्यतीन्द्रिये रूपविशेषादिभ्रमोपादानाज्ञानस्य तत्त्वासम्भवात्, पिशाचाद्यवच्छिन्नचैतन्यस्य साक्षित्वानापत्त्यैवाभानसम्भवात् । यदि

---

[1] योग्याज्ञाननिवृत्ति.

व्याप्यधर्मेण ज्ञाननिवर्त्ये संशये अतिव्याप्तिरीति सर्वमवदातम् ॥

इति तृतीयमिथ्यात्वविचारः.

च चाक्षुषत्वादिना तथेत्याग्रहः; तथापि यद्विशेषयोरिति व्याप्त्या साक्षात्कारत्वेनाऽपि निवर्तकत्वं शुद्धविषयकसाक्षात्काराज्ञानत्वाभ्यामपि विशेषतो नाशकनाश्यभावः स्वीक्रियते। एतेन ब्रह्मसाक्षात्कारेणेव शुक्त्यादिस्पार्शनेनापि तत्त्वज्ञानेन विनैवचाक्षुषादितत्त्वज्ञानं चाक्षुषादिभ्रमो निवर्त्यतामिति परास्तं, शुद्धविषयकसाक्षात्कारसविकल्पकचाक्षुषाद्यन्यतमविशेषकारणसहकृतस्यैव साक्षात्काररूपसामान्यकारणस्य फलोपधायकत्वात्। "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति" इति तु चाक्षुषत्वेनैव निवर्तकत्वबोधकं, साक्षात्कारत्वेन उपादानप्रत्यक्षप्रयुक्तमपि[1] प्रवृत्त्यादिकं न निवृत्तिः प्रागभावानङ्गीकारात्। अतो न प्रवृत्त्यादिप्रागभावे सिद्धसाधनम्। नचैवं लक्षणे निवृत्तिनिवेशे संशयनिवृत्तेः निश्चयाप्रयुक्तत्वान्नापीत्यादिकमसंगतमिति वाच्यं, साक्षात्कारत्वोक्तिपक्ष एव निवृत्तिनिवेशात्। अतएव तादित्यनुक्त्वा ज्ञाननिवर्त्यत्वमित्युक्तम्। प्रागभावस्वीकारे तु स्वसमानविषयकत्वसम्बन्धावच्छिन्नप्रयोजकताकविरहप्रतियोगिकत्वमेव वाच्यम्। ज्ञानं हि तत्सम्बन्धेन अज्ञाने सन्निवृत्तिप्रयोजकं न तूपादानप्रत्यक्षादिकम्। तत्पक्षे स्मृत्या संस्कारनाशास्वीकारे साक्षात्कारत्वप्रयोजकं[2] चिन्त्यम्। अज्ञानव्याप्यस्य निवृत्तिरप्यज्ञाननिवृतिद्वारा तादृशीति दिक् ॥

इति तृतीयमिथ्यात्वनिरूपणम्

---

[1] प्रयुक्तमिति. पा. [2] प्रयोजनं. पा.

चतुर्थमिथ्यात्वनिरूपणम्.

स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं वा मिथ्यात्वम्। तच्च स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वम्। अतः पूर्ववद्वैलक्षण्यम्। दूषणपरिहारः पूर्ववत्। न च संयोगिनि समवायिनि वा देशे तदत्यन्ताभावासंम्भवः, सम्भवे तु उपादानत्वाद्यनुपपत्तिरिति वाच्यम्; काले सहसम्भववद्देशेऽपि सहसम्भवाविरोधात् प्रागभावसत्त्वेनोपादानत्वाविरोधाच्च। न चात्यन्ताभावाधिकरणे प्रागभावस्याप्यनुपपत्तिरिति वाच्यम्; काले व्यभिचारात्। न च काले प्रागभावात्यन्ताभावयोस्सामानाधिकरण्यमिदानीं घटात्यन्ताभाव इदानीं घटप्रागभाव इति प्रतीतिबलादङ्गीकृतं, देशे तु तदुभयसामानाधिकरण्ये न किञ्चिदपि प्रमाणमिति वाच्यम्; मिथ्यात्वानुमितेः श्रुतेश्च प्रमाणत्वात्। विषमसत्ताकभावाभावयोरविरोधः पूर्वमुपपादितः। न चासत्यतिव्याप्तिः. स्वात्यन्ताभावाधिकरण एव सत्त्वेन

सत्त्वेनेति। अबाध्यत्वोपलक्षिततादात्म्येनेत्यर्थः। तच्च स्वस्मिन्नपि स्वरूपसम्बन्धेनास्त्येव, तत् तत्त्वान्यतरवत्त्वेनेति वा अर्थः। तेन तादात्म्ये नाव्याप्तिः सत्त्वावच्छिन्ना या स्वप्रकारता तन्निरूपितविशेष्यताव्यापकस्वात्यन्ताभावकत्वं सत्त्वावच्छिन्नस्वाधिकरणताव्यापकस्वात्यन्ताभावकत्वं सत्त्वसमानाधिकरणस्वावच्छिन्नाधिकरणताव्यापकतावच्छेदकं यद्धर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वं तद्धर्मवत्त्वं वा लक्षणम्। व्यापकत्वस्थले सामानाधिकरण्यं निवेश्यान्त्यद्वयं वा वाच्यम्। तेन स्वात्यन्ताभावानधिकरणाप्रसिद्धावपि नैवकारार्थासङ्गतिः। आद्ययोः स्वपदं लक्ष्यपरं, अन्त्ये तु यद्धर्मपरम्। असतः सत्त्वेन धीस्वीकारेऽपि द्वितीयतृतीययोः नासत्यतिव्याप्तिः। येन सम्बन्धेनाधिकरणता तेन प्रति-

प्रतीयमानत्वस्य विवक्षितत्वात्। न च "तद्धैक आहुरसदेवेदमग्र आसीत्" इति श्रुत्या असतः सत्त्वप्रतीतेस्तत्रातिव्याप्तिर्दुष्परिहरेति वाच्यम्; 'सदेवेदमग्र आसीत्' इत्यस्य अर्थस्याभाव एव नञा प्रतिपाद्यते। न त्वसतः सत्त्वम्, विरोधात्। अतः नातिव्याप्तिः। सर्वं चान्यत् पूर्वोक्तमेवानुसन्धेयमित्युपरम्यते॥

इति चतुर्थमिथ्यात्वविचारः.

योगिता आद्या। वृत्त्यनियामकसम्बन्धेनापि मिथ्यात्वलाभायाधिकरणतांऽपि सम्बन्धितारूपा। एवंच विषयितया स्वसम्बन्धिनि ज्ञाने असतोऽत्यन्ताभावसत्त्वादसत्यतिव्याप्तेः सत्त्वावच्छिन्नत्वादिनिवेशः। एकरूपेण स्वाधिकरणे रूपान्तरेण स्वाभावस्वीकारेऽपि न तृतीये सिद्धसाधनम्। पूर्वोक्तमिति। न चाव्याप्यवृत्तिवारणाय एकावच्छिन्नत्वस्यानवच्छिन्नत्वस्य वा अभावे निवेशे साध्यापसिद्धिः, शुक्तिरजतादावेव त्रैकालिकनिषेधेन तत्प्रसिद्धेः। एवंच स्वाधिकरणावृत्तिस्सन् स्वानधिकरणवृत्तिर्यस्तदन्यात्यन्ताभावप्रतियोगित्वं साध्यम्। संयोगादौ दृष्टान्ते साध्यप्रसिद्ध्यर्थमवृत्त्यन्तम्। स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वेति पक्षविशेषणात् अवृत्त्यन्ताभावप्रतियोगित्वं पर्यवस्यति। अव्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वेन विशेषिते पक्षे स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं वा साध्यं व्याप्यवृत्त्यभावेन पर्यवस्यतीतियत्तत्वविवेकादावुक्तं तत्सम्भवप्राचुर्येण; अवृत्त्यधिष्ठानात्मकाभावपर्यवसानस्यास्मत्साध्येऽपि लाघवेन सम्भवात्, अवृत्तेरप्यत्यन्ताभावत्वेन रूपेण स्वस्मिन् तादात्म्याभ्युपगमेन व्यापकत्वसम्भवात्, संयोगादौ पक्षे अस्मदीयरीतेरावश्यकत्वाच्चेति ध्येयम्। असद्व्यावृत्तिमभ्युपेत्य वाद

पञ्चममिथ्यात्वनिरूपणम्.

सद्विविक्तत्वं वा मिथ्यात्वम्। सत्त्वं च प्रमाणसिद्धत्वम्। प्रमाणत्वं च दोषासहकृतज्ञानकरणत्वम्। तेन स्वप्नादिवत् प्रमाणसिद्धभिन्नत्वेन मिथ्यात्वं सिद्ध्यति। प्रमाणसिद्धत्वं च अबाध्यत्वव्याप्यमित्यन्यत्। अत्राप्यसति निर्धर्मके ब्रह्मणि

उक्तरीत्या तदत्यन्ताभावे मानाभावात्। सत्त्वाननुगमे[1] तु सत्त्वसमानाधिकरणं यत् स्वावच्छेदक तदवच्छिन्नव्यापकत्वं स्वनिरूपकत्वं चेत्युभयसम्बन्धेन प्रतियोगिमत्त्व[2]मत्यन्ताभावत्वावच्छेदेन साध्यम्। व्यापकत्वं समानाधिकरणभेदीयायाः प्रतियोगितायाः अनवच्छिन्नावच्छेदकताशून्यत्वम्। सिद्धान्ते सर्वेषां अभावस्वरूपाणां केवलान्वयित्वेन नोक्तावच्छेदकत्वं सामानाधिकरण्यं वा व्यापकत्वस्थले वाच्यम्। व्यापकत्वादि, निरवच्छिन्नविशेषणतया बोध्यम्। तेनाव्याप्यवृत्तौ न सिद्धसाध्यता[3]। विस्तरस्तु विशेषानुमानेषु भविष्यति॥

इति चतुर्थमिथ्यात्वनिरूपणम्

दोषेति। **प्रमाणसिद्धत्वं** प्रमाविषयत्वम्। प्रमाणत्वं तु बाधिताविषयकधीत्वमखण्डधर्मो वा। तेन दोषाणामनुगतत्वसर्वसम्मतत्वाद्यभावेऽपि न क्षतिः। घटादिज्ञानं न प्रमा तद्विषये अबाधितत्वाग्रहात्, किन्तु तत्त्वेनाभिमन्यत इत्याह—**प्रमाणसिद्धत्व चेति**। प्रमा चेत्यर्थः। **अबाध्यत्वव्याप्यमिति**। नास्ति बाध्यत्वं यत्र तदबाध्यत्वं शुद्धं ब्रह्म तदभिन्नं प्रमोपहितं ब्रह्म व्याप्यं विषयो यस्य तत्तथा। तेनाबाध्यस्य शुद्धस्याविषयत्वेऽपि न क्षतिः। **निर्धर्मक इति**। भावरूपधर्मशून्यत्वेऽपि अभावरूपधर्मवैशिष्ट्यस्यो-

---

[1] स्वत्वाननुगमे. [2] प्रतियोगित्व. [3] सिद्धसाधनता.

चातिव्याप्तिवारणाय सत्त्वेन प्रतीयमानत्वं विशेषणं देयम्; तयोः सत्त्वप्रकारकप्रतीतिविषयत्वाभावात्। अतएव सद्विविक्तत्वामित्यत्र सत्त्वं सत्ताजात्यधिकरणत्वं वा, अबाध्यत्वं वा, ब्रह्मरूपत्वं वा। आद्ये घटादावाविद्यकजातेस्त्वयाऽभ्युपगमेनासम्भवः। द्वितीये बाध्यत्वरूपमिथ्यात्वपर्यवसानम्। तृतीये सिद्धसाधनमिति निरस्तम्। अनभ्युपगमादेव सदसद्विलक्षणत्वपक्षोक्तयुक्तयश्चात्रानुसन्धेयाः। अवशिष्टं च दृष्टान्तसिद्धौ वक्ष्यामः॥

इत्यद्वैतसिद्धौ पञ्चममिथ्यात्वनिरुक्तिः.

क्तत्वादतिव्याप्तिः। विशेष्यतया तद्दाने शेषवैयर्थ्यादाह—**विशेषणमिति**। तथाच धूमप्रागभाववन्न वैयर्थ्यमिति। **पर्यवसानमिति**। तथाच बाध्यत्वमेवास्तु शेषवैयर्थ्यात्, तच्च ज्ञाननिवर्त्यत्वादिरूपमुक्तमेवेति भावः। **उक्तेति**। गुणादिकमित्यादिनोक्तेत्यर्थः। तथाच सत्त्वेन प्रतीयमानत्वांशे न सिद्धसाधनं, मिलितप्रतीतेरुद्देश्यत्वात्। तच्च मिलितस्यैव दृश्यत्वप्रयोजकत्वात्। मिलितं च शुक्तिरूप्यादौ प्रसिद्धमित्यादि। अत्र सद्विविक्तत्वं सदवृत्तिधर्मवत्त्वम्। सत्त्वं च अबाध्यं सर्वमेयमित्याकारकधीविषयत्वम्। तेन न बाध्यत्वघटितत्वप्रयुक्तवैयर्थ्यादि अविनाश्यवृत्तिधर्मवत्त्वं वा पक्षतावच्छेदकावच्छेदेन साध्यमित्यादि बोध्यम्। यत्तु—"ज्ञानत्वव्याप्येत्याद्ययुक्तं मननत्वावच्छिन्ननिवर्तकताके अर्थसंशये अतिव्याप्तेः, मननस्यातत्वे वैयर्थ्यात्। उत्तरात्मविशेषणत्वेनेत्यादि च न युक्तम्, धर्मादावतिप्रसङ्गात्। स्मृत्या च संस्कारो नाश्यते सुखादिनेव धर्मादिः, दृढस्तु संस्कारः स्मृतिजन्य एव, साक्षात्कारत्वेन च निवर्तकताऽपि न; प्रत्यक्षस्य शब्दजा-

ध्यत्वं वदता त्वयैव नायं सर्प इति शाब्दबुद्धेः बाधकत्वोक्तेः[1] । प्रतियोग्यत्यन्ताभावयोः काल इव देशेऽप्यविरोध इत्यपि न; तथा सति विरोधोच्छेदापत्तेः, अद्वैतधियोप्यबाधकत्वापत्तेः । मिथ्यात्वानुमानं च तत्र न मानं, विरोधेन तस्यैवानवतारात् । प्रमाणासिद्धत्वं सत्त्वमित्यपि न, तदभावस्य[2] घटादावव्याप्तेः । तदबाध्यत्वव्याप्यमित्यपि न; तस्य ब्रह्मण्यभावेऽप्यबाध्यत्वात्, प्रपञ्चे तद्भावेऽपि बाध्यत्वात्, तस्मिन् अबाध्यत्वं प्रति व्यापकत्वस्येव व्याप्यत्वस्याभावात्" इति, तत्तुच्छम्; मननस्य तर्कत्वेनेच्छादेरिव ज्ञानत्वाभावात् । भावे वा युक्त्यनुसन्धानरूपस्य तस्य निश्चयत्वरूपेण ब्रह्माद्वितीयमित्यादिनिश्चयद्वारा ब्रह्माद्वितीयं न वेत्याकारकसंशयविरहप्रयोजकतायाः नापि निश्चयत्वेत्यादिना ग्रन्थकृतैवोक्तत्वेन त्वदुद्भावनानर्हत्वात् । व्यभिचारादिनिश्चयद्वारा साध्यादिज्ञाननिवर्त्यव्याप्त्यादिज्ञानवारणाय ज्ञानमद्वारीकृत्य निवर्तकताया अवश्यवाच्यत्वात् । मननत्वादिना साक्षात्संशयनिवर्तकतायां मानाभावात् स्वप्रयोज्योक्तनिश्चयद्वारा तत्सम्भवे[3] तत्कल्पने गौरवाच्च । उत्तरेत्यादि न युक्तं, स्वोत्तरधर्मादेर्निवर्तकत्वे क्षत्यभावात् । स्मृत्या च संस्कारनाशे दृढसंस्कारजनने च गौरवमुक्तम् । सुखादिना धर्माद्यनाशे पुनस्सुखाद्यापत्तिः । संस्कारनाशेऽपि न पुनः स्मृत्यापत्तिः उद्बोधकाभावादित्युक्तम् । प्रकारान्तरेणोक्तापत्तिवारणे धर्मादिकमपि सुखादिना न नाश्यताम् । परोक्ष[4]शाब्दबुद्धेः प्रत्यक्षं प्रत्यप्रमात्वज्ञापकत्वादिरूपबाधकत्वोक्तावपि साक्षात्कारत्वेन निवर्तकताया न हानिः । भावाभावयोरविरोधेऽपि तद्धीबाधकत्वमुपपादितम् । मिथ्यानुमाने च विरोधसन्देहो न विरोधी तन्निश्चयस्तु तदा नेत्युक्तम् । उक्तप्रमाणासिद्धत्वं च न घटादौ, किन्तु प्रमोपहिते ब्रह्मणि । अबाध्यत्वव्याप्य-

[1] प्रतिबन्धकतोक्तेः. [2] तदा भावस्य. [3] तत्सम्भवेन. [4] परीक्षित.

मिथ्यात्वमिथ्यात्वोपपत्तिः

ननूक्तमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वापातः। एकस्मिन् धर्मिणि प्रसक्तयो· विरुद्धधर्मयोः एकमिथ्यात्वे

मित्यस्य तु उक्तार्थे न दोषः। न चैवमुपहितब्रह्मणोपि बाधितत्वात्तुच्छबाधितविषयकधीत्वरूपस्य विशेषणस्यासिद्धिः प्रमाया अप्रसिद्धिश्चेति वाच्यम्; उक्तोपहितब्रह्मान्यबाध्याविषयकत्वनिवेशात्, तादृशब्रह्मबुद्धावेव प्रमात्वस्वीकाराच्च, निर्धर्मकब्रह्ममते अन्यथानुपपत्तेः। यत्तु सर्वदेशकालगतात्यन्ताभावप्रतियोगित्वरूपं नृशृङ्गादिसाधारणमत्यन्तासत्त्वमेव मिथ्यात्वमिति, तन्न; तार्किकमते गगनादौ मिथ्यात्वव्यवहारापत्तेः। स्वाधिकरणनिवेशे च कालान्तस्य व्यर्थत्वादस्मदीयलक्षणमेव। अत्यन्तासतश्च नाभावप्रतियोगित्वं मानाभावादित्युक्तम्। कदाचिदधिकरणासम्बद्धे च ध्वंसादिप्रतियोगित्वं प्रत्यक्षादिसिद्धम्॥

एवमन्यत्प्रलपितं दूषितत्वान्न दूष्यते।
तस्मात् टीकोक्तमार्यं द्वे प्रकाशात्मोक्तबाध्यते?॥
चित्सुखीयं चतुर्थं स्यादन्त्यमानन्दबोधजम्।
नानिर्वाच्येऽप्रसिद्ध्यादिः प्रतीते प्रतिषेध्यता॥
स्वाश्रयेऽत्यन्तविरहः सद्विलक्षणता तथा।
इति पक्षत्रयेऽत्यन्तासत्त्वं नोक्तविशेषणात्॥
नोक्तधीनाश्यता सिद्धा गृह्यतां पञ्चता परैः।
सारस्वतैस्तर्करत्नैश्चन्द्रिकाचन्द्रतां गतैः॥
दुरन्तध्वान्तखण्डानां खण्डिता दृश्यसत्यता॥

इति पञ्चममिथ्यात्वनिरुक्तिः

अपरसत्यत्वनियमात्, मिथ्यात्वसत्यत्वे च तद्वदेव प्रपञ्चसत्यत्वापत्तेः। उभयथाप्यद्वैतव्याघात इति चेन्न; मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वानुपपत्तेः। तत्र हि विरुद्धयोर्धर्मयोः एकमिथ्यात्वे अपरसत्यत्वम्, यत्र मिथ्यात्वावच्छेदकमुभयवृत्ति न भवेत् यथा परस्परविरहरूपयो रजतत्वतदभावयोः शुक्तौ, यथावा परस्परविरहव्यापकयोः रजतभिन्नत्वरजतत्वयोः तत्रैव। तत्र निषेध्यतावच्छेदकभेदानियमात्। प्रकृते तु निषेध्य-

---

एकमिथ्यात्वे अन्यतरमिथ्यात्वे। **अपरसत्यत्वनियमात्** अन्यतरस्याधिकसत्तानियमात्। एवमग्रेऽपि। सत्यत्वमधिक[1]सत्ता। तथाच ययोर्विरुद्धयोरन्यतरस्मिन् मिथ्यात्वं पारमार्थिकं तयोरन्यतरदन्यतरापेक्षया अधिकसत्ताकमिति नियमः, विरुद्धयोः यदेकं मिथ्या तदपेक्षया तदपरमधिकसत्ताकमवश्यमित्युक्तौ तु शुक्तिरूप्ये व्यावहारिकमिथ्यात्वाश्रये तात्त्विकसत्यत्वाभावाद्व्यभिचारापत्तेः। यत्तु शुक्तिरूप्यं न मिथ्या मिथ्यात्वस्याश्रयः मिथ्यात्वविरुद्धस्य तात्त्विकसत्यत्वस्याभावात्। यद्यद्विरुद्धस्य तात्त्विकस्याभाववत् तत्तस्य मिथ्याभूतस्यानाश्रयो यथा गोत्वविरुद्धस्य तात्त्विकस्य गोत्वाभावस्याभाववान् मिथ्याभूतस्य गोत्वस्यानाश्रयश्च गौः। तथाच रूप्यमिथ्यात्वस्य तात्त्विकत्वेन रूप्ये हेतोरेवाभावान्न व्यभिचार इति तत्प्रायः[2]स्वगुरुं प्रत्येवोक्तम्। अन्यथास्मान् प्रति तात्त्विकस्य गोत्वाभावस्येत्यस्यासिद्धया साधनवैकल्यात्, तात्त्विकं ब्रह्मैवेति तत्प्रतियोगिकात्यन्ताभावाप्रसिद्धया हेत्वप्रसिद्धेश्च। वक्ष्यमाणतर्कसनाथं दृश्यमिथ्यात्वानुमानमपेक्ष्योक्तानुमानस्य तर्करहितत्वेन[3] दुर्बलत्वाच्च। ननु परस्परविरहरूपयोः परस्परविरहव्यापकयोश्चैकस्य मिथ्यात्वे अपरस्याधिकसत्ता आवश्यकी, अन्यथा समसत्ताकत्वे तयोः सहानवस्थान-

---

[1] सत्यत्वमग्र. [2] तदभिप्रायः. [3] तद्रहितत्वेन.

तावच्छेदकमेकमेव दृश्यत्वादि। यथा गोत्वाश्वत्वयोः एकस्मिन् गजे निषेधे गजत्वात्यन्ताभावव्याप्यत्वं निषेध्यतावच्छेदकमुभयोस्तुल्यमिति नैकतरनिषेधे अन्यतरसत्त्वं तद्वत्। यथाच सत्यत्वमिथ्यात्वयोः न परस्परविरहरूपत्वं न वा परस्परविरहव्यापकत्वं तथोपपादितमधस्तात्। पर-

---

रूपविरोधात्। तथाच गोत्वाश्वत्वयोः समानाधिकरणप्रतीतिकयोः अतथात्वात्समसत्ताकत्वेऽपि सत्यत्वमिथ्यात्वयोः तथात्वान्न समसत्तेत्यत आह—**यथाचेति। तथेत्यादि**। स प्रकारः सत्त्वासत्त्वे अधिकृत्योपपादित इत्यर्थः। तथाच यथा सत्त्वासत्त्वयोः न परस्पराभावत्वं प्रपञ्चे तयोः प्रत्येकासत्त्वेपि प्रत्येकाभावसत्त्वात् तथा सत्यत्वमिथ्यात्वयोरपि न तत्त्वम्, तुच्छे तयोः प्रत्येकासत्त्वेपि प्रत्येकाभावसत्त्वादिति भावः। ननु तथाऽपि परस्परविरहव्याप्यत्वात्तयोर्व्यावहारिकयोः न सामानाधिकरण्यं गोत्वाश्वत्वयोरिव, तत्राह—**परस्परविरहरूपत्व इति**। उक्तविरहस्य रूपं रूपणं यस्मादिति व्युत्पत्त्या उक्तविरहव्याप्यत्वे इत्यर्थः। अथवोक्तविरहेण रूपं रूपणं यस्येति व्युत्पत्तेरपि सम्भवात्। रूपमभिन्नं व्याप्यं व्यापकं च। ननु यत्र तात्त्विकसत्त्वं तत्र न मिथ्यात्वमित्यात्मनि दृष्टमिति भिन्नसत्ताकयोरपि विरोधः। किञ्च प्रपञ्चे सत्यत्वं मिथ्यात्वविषमसत्ताकमपि तात्त्विकं वाच्यम्। अन्यथा 'सत्यं चानृतं च सत्यमभवत्' इत्यादिश्रुतौ सत्यब्रह्मणः प्रातीतिकसत्यत्वाश्रयाकाशादिसकलप्रपञ्चे कारणत्वोक्तेरनृतपदं विनापि सम्भवात्तद्वैयर्थ्यापत्तेः। शुक्तिरूप्यादिव्यावृत्तसत्यत्वस्य सत्यपदेन ग्रहणे तु शुक्तिरूप्यादिग्राहकमनृतपदं सार्थकमतो नाद्वैतहानेरुद्धारस्तत्राह—

स्परविरहरूपत्वेपि विषमसत्ताकयोरविरोधात् । व्यावहारिकमिथ्यात्वेन व्यावहारिकसत्यत्वापहारेपि काल्पनिकसत्यत्वानपहारात् । तार्किकमतसिद्धसंयोगतदभाववत् सत्यत्वमिथ्यात्वयोः समुच्चयाभ्युपगमाच्च । एकस्य साधकेन अपरस्य बाध्यत्वं विषमसत्ताकत्वे प्रयोजकम्, यथा शुक्तिरूप्यतदभावयोः ।

व्यावहारिकेति । **व्यावहारिकसत्त्वेति** । प्रातीतिकान्यसत्यत्वेत्यर्थः । **काल्पनिकेति** । प्रातीतिकेत्यर्थः । शुक्तिरूप्यादौ तयोरविरोधस्सिद्धः । उक्तश्रुतौ च सत्यपदं व्यवहारकालाबाध्यपरम् । अतो नानृतपदवैयर्थ्यमिति भावः । यथा तार्किकैः संयोगतदभावयोर्व्यावहारिकयोरप्यवच्छेदकभेदेनाविरोधोऽङ्गीक्रियते तथा अवच्छेदकभेदाभावेऽपि सत्यत्वमिथ्यात्वयोः व्यावहारिकयोरविरोधः, प्रमाणस्योभयत्राविशेषात् । उक्तं हि भामत्यां—'विरुद्धमिति नः क्व सम्प्रत्ययः यत्र न प्रमाणम्' इति । न चैवं भेदाभेदादिस्थले विषमसत्ताप्रतिपादनपरा वयं तु पश्यामोऽभेदोपादानाभेदकल्पनेत्यादिभामती व्यर्थेति वाच्यम् । अभ्युपेत्य वादत्वात् । समसत्तयोरपि बाध्यबाधकत्वं स्वाप्नगजतन्निषेधदृष्टान्तेनोक्तमेवेत्याशयेनाह—**तार्किकेति** । ननु यत्र मिथ्यात्वावच्छेदकं नोभयवृत्ति तत्राप्येकमिथ्यात्वे अपरस्याधिकसत्तायां का युक्तिः तत्राह—**एकसाधकेति** । **प्रयोजकं** व्याप्यम् । यद्यद्बाधकधीविषयः तत्ततोधिकसत्ताकमिति व्याप्तौ यदि ततोधिकसत्ताकं न स्यात् तदा तद्बाधकधीविषयो न स्यादिति हेतूच्छित्तिरेव विपक्षे बाधिकेति भावः । अभ्युपेत्य वादोऽयम् । तेन स्वाप्नगजतदभावदृष्टान्तेन व्यावहारिकयोः प्रपञ्चतदभावयोः बाध्यबाधकभावापन्नधीविषयत्वस्य पूर्वोक्तत्वेपि न क्षतिः । अथवा ननु मिथ्यात्वावच्छेदकस्योभयावृत्तित्वेऽपि एकमिथ्यात्वे अपरस्याधिकसत्ता मास्तु, न ह्ययं नियमः—'एकत्र प्रसक्तयोः विरुद्धता-

एकबाधकबाध्यत्वं च समसत्ताकत्वे प्रयोजकम्, यथा शुक्तिरूप्य-शुक्तिभिन्नत्वयोः। अस्ति च प्रपञ्चतन्मिथ्यात्वयोरेकब्रह्मज्ञान-बाध्यत्वम्। अतः समसत्ताकत्वान्मिथ्यात्वबाधकेन प्रपञ्च-स्यापि बाधाच्चाद्वैतक्षतिरिति कृतमधिकेन॥

इति मिथ्यात्वस्य मिथ्यात्वनिरुक्तिः.

वच्छेदकरूपावच्छिन्नयोरुभयावृत्तिरूपेणैकमिथ्यात्वे अपरस्याधिकसत्ता' इति। गजे प्रसक्तयोः गोत्वाश्वत्वयोः नात्र गोत्वं नात्राश्वत्वमित्यु-भयावृत्तिरूपेण निषेधेऽपि समसत्ताकत्वादित्यत आह—**एकसाधकेति**। तथाचोक्तनियमाभावेऽपि यद्यद्बाधकेत्याद्युक्तनियमोऽस्त्येव। एकसाधके-नापरबाध उभयावृत्तिरूपेणैवेत्याभिप्रायेणोभयवृत्ति न भवेदिति पूर्वमु-क्तमिति भावः। प्रपञ्चसत्यत्वमिथ्यात्वयोः समसत्ताकत्वमुक्तं प्रमा-णेन साधयति—**एकबाधकेति**। यद्यद्बाधकबाध्यं तत्तसमसत्ताकमिति व्याप्तौ यदि साध्यं न स्यात् तदा हेतुर्न स्यात् तद्बाधकात्पूर्वमेव बाधसम्भवादिति विपक्षे बाधक इति भावः। **ब्रह्मज्ञानबाध्यं** शुक्तिरूप्यादिकमपि स्वाभावादिसमसत्ताकमेव, प्रमात्रा सह बाध्य-त्वस्य व्यावहारिकत्वस्य उभयत्रापि तुल्यत्वात्। **प्रपञ्चेति**। स्वस-त्यत्वादिघटितप्रपञ्चेत्यर्थः। **समसत्ताकत्वादिति**। प्रपञ्चसत्यत्वस्य तात्त्विकत्वासम्भवादिति शेषः। अथवा एकत्र प्रसक्तयोर्विरुद्धयो-रेकस्यापरापेक्षया अन्यूनसत्ताकत्वं प्रत्यमिथ्यात्वं न प्रयोजकं, किन्तु स्वाश्रयसमसत्ताकत्व[1]मतो मिथ्यात्वं प्रपञ्चे मिथ्यापि सत्यत्वान्न्यूनसत्ताकं प्रपञ्चसमसत्ताकत्वात्। तच्च प्रपञ्चबाधकबाध्यत्वान्नासिद्धमित्याशयेनाह—**एकबाधकेति**। **समसत्ताकत्वादिति**। प्रपञ्चमिथ्यात्वस्य प्रपञ्चसत्यतां प्रत्यन्यूनसत्ताकत्वेन तस्याः तात्त्विकत्वासम्भवादिति शेषः। **बाधात्** बाधसम्भवात्। ननु मिथ्यात्वं न स्वाश्रयसमसत्ताकं तस्य प्रातीति-

[1] सत्ताक

कनिष्ठस्य व्यावहारिकत्वात् व्यावहारिकनिष्ठस्य प्रातीतिकत्वादिति चेन्न ; व्यावहारिकनिष्ठमिथ्यात्वस्यैव स्वाश्रयसमसत्ताकत्वेनोक्तत्वात्, व्यावहारिकप्रपञ्चे स्वान्यूनसत्ताकस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्य अनुमितत्वेन तत्प्रातीतिकत्वस्य तद्धर्मिग्राहकमानेनैव निराकृतत्वात् । किंच मिथ्यात्वस्य सत्यत्वमिथ्यात्वविकल्पेन दूषणं नित्यसमा जातिः ।

धर्मस्य[1] तदतद्रूपविकल्पानुपपत्तितः ।
धर्मिणस्तद्विशिष्टत्वभङ्गो[2] नित्यसमो भवेत् ॥

इति तल्लक्षणात् । न च मिथ्यात्वस्य सत्यत्वे धर्मिणि न तद्वैशिष्ट्यभङ्गः किन्त्वद्वैतहानिरिति वाच्यम् ; विकल्पितकोट्योरेकस्या अद्वैतहानिप्रयोजकत्वेऽपि अन्यस्याः प्रपञ्चसत्यत्वतात्त्विकतापत्तिद्वारा प्रपञ्चे धर्मिणि मिथ्यात्ववैशिष्ट्यभङ्गप्रयोजकत्वात् । अन्यथा मिथ्यात्वकोटिमात्रस्यास्माभिराश्रयणे सत्यत्वकोटिप्रयुक्तस्याद्वैतहान[3]दोषस्यानवकाशात् । किंच मिथ्यात्वस्यापि मिथ्यात्वधर्मित्वेन तस्य सत्यत्वे मिथ्यात्ववैशिष्ट्यभङ्गेन सत्यत्वकोटेरपि धर्मिणि तद्वैशिष्ट्यभङ्गप्रयोजकत्वमावश्यकम् । न च स्वव्याघातकत्वाद्यभावान्नेयं जातिरिति वाच्यम् ; त्वदीयस्य सर्वदेशकालनिष्ठात्यन्ताभावप्रतियोगित्वरूपासत्त्वस्यासत्त्वे तद्विरुद्धस्य 'असदेवेदमग्र आसीत्' इति वाक्यादसति प्रतिपन्नतया त्वदभ्युगतस्य सत्त्वस्यासति तात्त्विकत्वापत्तिः, सत्त्वे तस्य सतोऽसति सम्बन्धानुपपत्तिः । उक्तं हि बौद्धाधिकारे—'सदसतोः सम्बन्धानुपपत्तेः' इति । तथा 'तुच्छस्य विशेषाभावात्' इति । तथा 'न च तस्य भाविको देशकालसम्बन्धः तुच्छत्वात्' इति । भाविकस्तात्त्विकः । न च प्रागभावप्रतियोगित्वादेरिव सतोऽपि[4] तस्य सत्सम्बन्ध[5] इति वाच्यम् ; प्रागभावादिप्रतियोगिनः उक्तासत्त्वाभावात् । असत् शशविषाणमिति प्रततेः सत्त्वाश्रयासत्त्वविषयकत्वे 'वस्तुशून्यो

[1] धर्मिणः. [2] भङ्गात्. [3] हानि. [4] असतोपि. [5] असत्सम्बन्धः.

विकल्पः' इति पातञ्जलसूत्रादिविरोधः, स्वलक्षणस्य च विकल्पागोचरत्वादिति बौद्धाधिकारीयवाक्यादिविरोधश्च । असतः सदसम्बन्धश्च बौद्धाधिकारादौ स्पष्ट उक्तः । तस्मादसतः सत्सम्बन्धं वदन् बौद्धादपि बौद्ध इत्युपेक्षणीय इति, स्वव्याघातकत्वाद्यावश्यकत्वात् । न च भेदः किं भिन्ने उताभिन्ने इत्यादि त्वदुक्तिरपि जातिरिति वाच्यम्; मम वैतण्डिकतामाश्रित्य तदुक्तौ[1] जातित्वासम्भवात् स्थापनीयाभावेन स्वव्याघातकत्वाद्यभावात् त्वदीयरीतिमाश्रित्य त्वां प्रति मिथ्यात्वानुमानाद्युपन्यासात् । खण्डनयुक्तीनां सर्वप्रमाणबाधकत्वस्यास्मदिष्टत्वेऽपि स्वप्रकाशचिन्मात्रस्य अस्मत्सम्मतस्य केनापि बाधासम्भवात् साक्षित्वात्तादृशमानाभावाच्च । तदुक्तं खण्डने—

अभीष्टसिद्धावपि खण्डनानामखण्डि राज्ञामिव नैवमाज्ञा ।
तत्तानि कस्मान्न यथावदेव सैद्धान्तिकेप्यध्वनि योजयध्वम् ॥

इत्यादिकमभिप्रेत्याह—**कृतमधिकेनेति** । यत्तु—"तत्र हि विरुद्धयोरेकमिथ्यात्वे अपरसत्यत्वं यत्र मिथ्यात्वावच्छेदकं नोभयवृत्ति सत्यत्वमिथ्यात्वयोश्च निषेध्यतावच्छेदकं दृश्यत्वाद्येकमित्ययुक्तम्; परस्परविरहयोरेकरूपेण निषेधस्य क्वाप्यदर्शनात् । विषमसत्ताकत्वेन तयोः अविरोध इत्यपि न । तयोर्हि विषमसत्ता रूप्ये जगति वा, नाद्यः; रूप्यमिथ्यात्वं तात्त्विकमित्यग्रिमत्वदुक्तिविरोधात्, रूप्यमिथ्यात्वस्य बाध्यत्वे रूप्यसत्यत्वस्य तात्त्विकत्वापत्तेः । नान्त्यः; अप्रातीतिकस्य जगतो व्यावहारिकमिथ्यात्वे तात्त्विक[2]त्वापत्तेः । सत्यत्वमिथ्यात्वयोः समुच्चयस्तु अत्यन्तायुक्तः, सत्त्वासत्त्वसमुच्चयभीत्या त्वयाऽपि सदसद्वैलक्षण्योक्तेः । उक्तं च बौद्धाधिकारे—'सदसत्त्वस्यैकत्र विरोधेन विधिवन्निषेधस्याप्यनुपपत्तेः' इति । संयोगतदाभावौ च न दृष्टान्तः,

[1] त्वदुक्तौ. [2] मिथ्यात्वेनातात्त्विक.

तद्वदवच्छेदकभेदाभावात्। एकबाधकेत्याद्यपि न युक्तं, परस्परविरहयोरेकबाध्यत्वासिद्धेः। शुक्तिरूप्यशुक्तिभिन्नत्वयोः परस्परविरहत्वाभावात्। प्रपञ्चे सत्यत्वमिथ्यात्वे समसत्ते इत्यपि न, विरुद्धयोरेकत्र समसत्ताऽसम्भवात्। सम्भवे वा वह्नावौष्ण्यतदभावौ व्यावहारिकौ स्यातामिति बाधोच्छेदः। तथाच व्यावहारिकमौष्ण्याभावमादायाग्रे त्वदुक्ता बाधव्यवस्था विरुध्यत इति पूर्वापरविरोधः" इति; तत्तुच्छम्। क्वाप्यदर्शनादेकरूपेण परस्परविरहयोः न निषेध इति हि न युक्तम्; व्यवहारकाले तददर्शनेऽपि तदुत्तरकाले शुद्धचित्तपुरुषैः 'नेह नानास्ति किंचन, नात्र काचन भिदाऽस्ति' इत्यादिश्रुतिभिरुक्तानुमानेन च तद्दर्शनात्। अधिकसत्ताकाभावज्ञानस्यैव बाधकत्वपक्षे गज[1]तदभावादेः स्वाप्नस्य जागरे स्वाप्नं दृश्यमात्रं कालत्रयेऽपि स्वाश्रये नास्तीति एकरूपेण निषेधात्, शुक्तिरूप्याभावस्याश्रमाद्युक्तेः[2] शुक्तिरूप्याधिष्ठानमात्रगतत्वपक्षे शुक्तिरूप्यतदभावान्यतरत् घटादौ नास्तीति निषेधाच्च, घटध्वंसकाले कपाले घटतदत्यन्ताभावान्यतरन्नास्तीति निषेधाच्च। विषमसत्तेत्याद्यपि न युक्तम्; रूप्यमिथ्यात्वं तात्त्विकमित्याचार्यवाक्ये तात्त्विकशब्दस्य व्यावहारिकपरत्वात् विरुद्धयोरेकमिथ्यात्वे अपरसत्यत्वमिति नियमस्य यद्यद्बाधकधीविषयः तत्तदधिकसत्ताकमित्येवंरूपत्वेन रूप्यसत्त्वस्य[3] तात्त्विकतापत्त्यसम्भवात्, तस्य रूप्यमिथ्यात्वबाधकधीविषयत्वाभावात्। एवं नान्त्य इत्याद्यपि न युक्तम्; जगत्सत्यत्वस्य जगन्मिथ्यात्वबाधकधीविषयत्वाभावात्। समुच्चयस्तु इत्यादिकमपि न युक्तम्; कल्पितस्य तदुभयस्य कल्पितयोस्तात्त्विकयोर्वा तदभावयोश्चैकधर्मिणि सम्भवात्, रूप्ये सत्त्वासत्त्वे[4] तु न समुच्चिते; जगति सत्यत्वमिथ्यात्वयोरिव तत्र तयोः प्रतीत्यभावात्। सर्व-

[1] रजत. [2] श्रयाद्युक्तेः. [3] रूप्यस्य. [4] सत्यत्वासत्यत्वे.

देशकालगतात्यन्ताभावप्रतियोगित्वरूपं त्वदीयासत्त्वं प्रातीतिकसत्त्वं च रूप्ये समुच्चीयत एव, प्रतीयमानत्वात्; अस्मदीयाभ्यां सदसद्भ्यां वैलक्षण्यं विनाऽख्यातिबाधयोः रूप्येऽनुपपत्तेश्च। बौद्धाधिकारीयादुदयनाचार्यवाक्यात्तु असत्ख्यातिवादिनां त्वादृशानामेव भीः, तन्निराकरणार्थमेव तत्प्रवृत्तेः। नास्माकं भीः; अस्मन्मते सर्वमतमूर्धन्यत्वस्योदयनाचार्यैरुक्तत्वात्, अस्मन्मतस्य पुरस्कारे तत्तात्पर्यादिदूषणे च तत्तात्पर्याभावात्।

न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः
तद्बाधके बलिनि वेदनये जयश्रीः।
नो चेदनित्यमिदमीदृशमेव विश्वं
तथ्यं तथागतमतस्य तु कोऽवकाशः॥

इति तदीयश्लोके क्षणिकविज्ञानातिरिक्तार्थापलापिविज्ञानवादिशून्यतावादिमतयोः दूषणोपसंहारपरे ज्ञानादत्यन्तविलक्षणार्थमपलप्य[1] ज्ञानस्वीकारो न सम्भवति, अनुभवादिविरोधात्; तस्य ग्राह्यमात्रस्य बाधके ज्ञाने चित्तशुद्धिश्रवणादिपरिपाकेन दृढे सति वेदनये वेदान्तदर्शने सङ्कोचकाभावात् सर्वमतापेक्षया बलिनि जयश्रीः यद्विषयकज्ञानं बाधकं तत् नित्यमेकं स्वप्रकाशानन्दस्वरूपं मोक्षान्वयि, लाघवात्। तस्य च न बाध्यत्वं, सर्वसाक्षित्वात्। यदिचोक्तपरिपाकाभावादुक्तबाधकाभावः, तदा दृश्यमात्रं व्यवहारकालाबाध्यरूपव्यावहारिकतथ्यं तत्रापाततः[2] कदाचित्तार्किकादिभिः तत्तात्विकमिति वक्तुं शक्यम्। तदलीकमिति तथागतस्य बौद्धस्य मतं तु निरवकाशमित्यर्थस्य स्फुटत्वात्। न च दूष्यबौद्धमतस्य प्रस्तुतत्वात्तदपेक्षया बलित्वमुदयनैः विवक्षितमिति वाच्यम्; तथा सत्यस्मन्मतप्रकटनपूर्वकं तस्य स्वापकर्षोक्तयोगात्। तथाहि—"अस्तु

[1] विलक्षणत्वमालम्ब्य. [2] तत्रापततः न.

तर्हि शून्यतैव परमनिर्वाणमिति चेन्न; सा हि यद्यसिद्धा, तत्कथं तदवशेषं[1] विश्वम्? परतश्चेत् सिद्धा, परोऽभ्युपगन्तव्यः। स च परो यदि संवृतिरेव, विश्वशून्यतयोर्न कश्चिद्विशेषः। कथं तदप्यवशिष्येत? असंवृतिरूपश्चेत् परः, परत एव सिद्धा अनवस्था[2] स्वयमसिद्धश्चेत् कथं शून्यत्वमपि साधयेत्? स्वतस्सिद्धश्चेदायातोऽसि मार्गेण। तथाहि — स्वतस्सिद्धतया तदनुभवरूपशून्यत्वादेव न तस्य कालोऽवच्छेदक इति नित्यम्। अतएव न देशोऽवच्छेदक इति व्यापकम्। अतएव तत् निर्धर्मकमिति विचारास्पृष्टम्; तस्य धर्मधर्मिभावमुपादाय प्रवृत्तेः। अतएव च तस्य विशेषाभाव इत्यद्वैतं प्रपञ्चस्यापारमार्थिकत्वादेव निष्प्रतियोगिकमिति विधिरूपम्। अविचारितप्रपञ्चाक्षेपात्तु शून्यमिति व्यवहारः। तथापि प्रपञ्चशून्यस्यानुभवमात्रस्य प्रपञ्चेन कस्सम्बन्धः? न च नायं प्रकाशत इति चेत्; वस्तुतो न कश्चित्। संवृत्या गगनगन्धर्वनगरयोराधाराधेयभाव इव[3] विषयविषयिभावः। स च यथा नैयायिकैः समर्थयिष्यते तथैव वेद्यनिष्ठस्त्वसावस्मिन् दर्शन इति विशेषः। अविद्यैव हि तथातथा विवर्तते यथानुभवीयतया व्यवह्रियते। तत्तन्मायोपनीतोपाधिभेदाच्चानुभूतिरपि भिन्नेव व्यवहारपथमवतरति गगनमिव स्वप्नदृष्टघटकटाहकोटरकुटीकोटिभिः। तदास्तां तावत् किमार्द्रकवणिजो वहित्रचिन्तयेति। तस्मादनुभवव्यवस्थितावनात्माऽपि स्फुरतीत्यवर्जनीयमिति प्रविश वा अनिर्वचनीयख्यातिकुक्षिं तिष्ठ वा मतिकर्दममपहाय न्यायानुसारेण नीलादीनां पारमार्थिकत्वे" इत्याद्युक्तम्। संवृतिरिति। विकल्प इत्यर्थः। शून्यत्वात्—असंगत्वात्। तस्य—विचारस्य। निष्प्रतियोगिकम्—प्रपञ्चप्रतियोगिकत्वस्य मिथ्यात्वेन तद्रहितम्। विधिरूपं—कल्पितेन

[1]तदविशेषं. [2]सिद्धावनवस्था. [3] भावरूप.

प्रपञ्चाभावत्वेन शून्यम्। अविचारितप्रपञ्चाक्षेपात्—यतः प्रपञ्चो विचारासहः अतस्तस्य खण्डनात्। प्रकाशते—प्रकाशसम्बद्धः।[1] विषयविषयिभावः—विषयिप्रतियोगिको विषयभावः। नैयायिकैः—मादृशैः। समर्थयिष्यते—'प्रकाशस्य सतः तदीयतामात्रनिबन्धनः स्वभावविशेषो विषयता' इत्यादिना वक्ष्यते। वेद्यनिष्ठस्त्विति—चित्तादात्म्यस्य[2] चितो भिन्नेषु कल्पितस्य स्वीकारात् चित्तेः स्वप्रकाशत्वेन चितिविषयत्वास्वीकाराच्च चिद्भिन्नेष्वेव चित्तेस्तादात्म्यरूपा विषयता न तु चित्ताविति्यर्थः। अस्मिन् दर्शने—वेदान्तिदर्शने। तत्तन्मायोपनीतेति—मूलाविद्यापल्लवाविद्यापरिणामघटादिशुक्तिरूप्यादीत्यर्थः। वहित्रेति—महानौकेत्यर्थः। किंच सदसत्त्वविरोधस्य अस्मत्सम्मतत्वात् तत्परमुक्तवाक्यं न नः प्रतिकूलं, अवच्छेदकभेदाभावेऽपि प्रमाणबलात्समुच्चय इत्युक्तमेव। परस्परविरहयोरेकज्ञानबाध्यत्वं युक्तम्; जाग्रद्बोधेन स्वाप्नयोर्भावाभावयोरयं घट इत्यादिज्ञानेन शुक्तिरूप्यतदभावयोः बाधात्। किंच यद्यपि ब्रह्मप्रमान्यज्ञानं न परस्परविरहयोर्बाधकं तदधिष्ठानाविषयकत्वात्; तथापि ब्रह्मप्रमा तद्बाधिकैव, तदधिष्ठानविषयकत्वात्; विरुद्धयोः समसत्तयोः एकत्र स्थितिरपि युक्ता, स्वप्नेन्द्रजालादौ तथा दृष्टत्वात्। व्यावहारिकयोरौष्ण्यतदभावयोः एकत्र सत्त्वेऽपि न बाधोच्छेदः, संयोगतदभावयोरिव विरोधनिरूपकाधिकरणस्यैव स्वप्रतियोगिविरोधित्वविशिष्टाभावाविशिष्टस्य बाधत्वसम्भवात्। न चैवं जलमुष्णमित्यादावुष्णत्वानधिकरणवृत्त्यनुष्णत्ववज्जलस्य बाधत्वसम्भवेऽपि तेजोऽनुष्णमित्यादौ बाधो न स्यात्, अनुष्णत्वानधिकरणाप्रसिद्धेरिति वाच्यम्;

---

[1] प्रकाशसंबद्धः संवृत्या, अविद्यया न.इति पा. [2] चिन्निष्ठतादात्म्येन चिति भिन्नेषु कल्पितस्य स्वीकाराच्चेतस्स्वप्रकाशचितिविषयत्वास्वीकाराच्च चिद्भिन्नेष्वेव चितेस्तादात्म्यरूपा विषयता न तु चित्ताविति्यर्थः. इति पा.

दृश्यत्वनिरुक्तिः.

ननु मिथ्यात्वे साध्ये हेतूकृतं यद्दृश्यत्वं तदप्युपपादनीयम् । तथाहि—किमिदं दृश्यत्वं वृत्तिव्याप्यत्वं वा

उष्णत्वानाधारवृत्त्यनुष्णत्वसाध्यकस्थले तत्सम्भवात् । शुद्धानुष्णत्वसाध्यकस्थले बाधाभावस्त्विष्टः, तव संयोगाभावसाध्यकस्थलवत् । अत एव व्यावहारिकमभावमादायापि बाधव्यवस्था न विरुद्धा, समसत्ताकयोः भावाभावयोः विरोधपक्षे वा सोक्तेति न कोपि दोषः ॥

सारस्वतैः तर्करत्नैः चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तखण्डानां भग्ना मिथ्यात्वसत्यता ॥

इति मिथ्यात्वस्य मिथ्यात्वनिरुक्तिः.

वृत्तिव्याप्यत्वमिति । व्याप्यत्व[1]सम्बन्धेन वृत्तित्वेन हेतुता । व्याप्यत्वं च स्वजनकेन्द्रियसंयोगादिरूपं, परोक्षवृत्तेः स्वप्रयोजकव्यापकतावच्छेदकादिरूपं, भ्रमवृत्तेः स्वजनकदोषजन्यत्वादिरूपं, वृत्तिमात्रस्य स्वावच्छिन्नचैतन्याभिन्नमहाचैतन्यव्यक्तिप्रतियोगिकं तत्तद्विषयनिष्ठं तादात्म्यं वा; अनुमित्यादिवृत्तेरपि स्वावच्छिन्नचैतन्याभिन्नमहाचैतन्यव्यक्तिप्रतियोगिकं वह्न्यादिनिष्ठं तादात्म्यमस्त्येव तावदन्यतमत्वेन सम्बन्धत्वात् नाननुगमः । न चातिरिक्तविषयतैवास्तु तदनङ्गीकारे उक्तान्यतमत्वविशिष्टसम्बन्धेन कारणत्वादिकल्पने गौरवमिति वाच्यम्; तस्याग्रे दूष्यत्वात्, उक्तसंयोगादेरेव सम्बन्धत्वस्य वक्ष्यमाणत्वात् क्लप्तेनैव निर्वाहे अतिरिक्तकल्पने गौरवात् । उक्तान्यतमत्वस्य स्वरूपतोऽवच्छेदकत्वे गौरवात् ॥

वृत्तित्वं च[2] धीर्भीरित्यादिश्रुत्यनूद्यमानः संस्कारेच्छादिजनकतावच्छेदकतया सिद्धो धीत्वरूपो जातिविशेषः । अन्यथा तत्तद्विष-

---

[1] तद्व्याप्यत्व. [2] वृत्तिश्च.

फलव्याप्यत्वं वा, साधारणं वा, कदाचित् कथंचित् विषयत्वं वा, स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतिर्वा, अस्व-

यावच्छिन्नो योऽसत्त्वापादकाज्ञानाभावः तत्त्वेन संस्कारादिहेतुत्वे गौरवात् । प्रमाभ्रमान्यतरत्वं वा प्रमात्वभ्रमत्वे बाधोद्धारे वक्ष्यमाणे सखण्डे अखण्डे वा। असिद्धिवारकमपि सार्थकम् । मणिकारादिभिरीश्वरवादादौ तथोक्तत्वात् । अन्यतरत्वमन्यतमत्वं च स्वरूपतोऽवच्छेदकं वा, प्रमाभ्रमावित्याकारकतद्धीविशेष्यत्वमन्यतरत्वं प्रमाव्याप्यत्वभ्रमव्याप्यत्वे इत्याकारकतद्धीविशेष्यत्वं अन्यतमत्वमिति वा । तेन हेतुतावच्छेदके धर्मे सम्बन्धे च व्याप्तिग्राहकतया दृष्टान्तवृत्तितावच्छेदकस्य भ्रमत्वस्य भ्रमवृत्तिव्याप्यत्वस्य चावश्यकत्वेपीतरवैयर्थ्यमिति परास्तम् । **फलव्याप्यत्वमिति** । फलं वृत्तिप्रतिबिम्बितचैतन्यं भग्नावरणकचैतन्यं वा तत्तादात्म्यं तादात्म्येन तद्वा हेतुः साधारणं वृत्तिफलान्यतरव्याप्यत्वं, वैयर्थ्यपरिहारः पूर्ववत् । **कदाचिदिति** । कालावच्छिन्नवृत्तिकत्वोक्तिः दैशिकसम्बन्धेन हेतुतालाभाय । कालिकेन हेतुत्वे हि अविद्याद्यनादिषु भागासिद्धिः स्यात् । **कथंचिदित्यावृतानावृतसाधारणं चित्तादात्म्यत्वं** हेतुतावच्छेदकमित्यर्थः । यत्तु 'बाह्येन्द्रियद्वारा निस्सृतोऽन्तःकरणपरिणामो वृतिः' इति परेण स्वग्रन्थे वृत्तिपदं व्याख्यातम्, तन्न शोभतेतराम् । निस्सृतान्तःकरणपरिणामस्य हेतुत्वे नित्यातीन्द्रियेषु भागासिद्धेः, योगिनोऽन्तःकरणवृत्तेरपि तेषु निस्सरणे मानाभावात्, निस्सृतत्वस्य जीवनकाला, वच्छेदेन बाह्येन्द्रियविभक्तत्वरूपत्वासम्भवात्, त्वगिन्द्रियसंसृष्टत्वस्य वृत्तिमात्रे सत्त्वेन बाह्येन्द्रियसंसृष्टत्वरूपस्याव्यावर्तकत्वात् व्यर्थत्वाच्च ब्रह्मणि व्यभिचारोक्त्ययोगाच्च । यदपि परेण कदाचिदित्यादिकं विवृतं अतीतादिकमपि कदाचित्स्वाकारवृत्तिप्रतिफलितचिद्विषयो नित्यातीन्द्रियमपि कथंचित् ज्ञातत्वेन वा साक्षिविषय इति, तदपि तुच्छम्;

प्रकाशत्वं वा। नाद्यः; आत्मनो वेदान्तजन्यवृत्तिव्याप्यत्वेन तत्र व्यभिचारात्। अतएव न तृतीयोऽपि। नापि द्वितीयः; नित्यातीन्द्रिये शुक्तिरूप्यादौ च तदभावेन भागासिद्धिसाधनवैकल्ययोः प्रसङ्गात्। नापि चतुर्थः; ब्रह्म पूर्वं न ज्ञातमिदानीं वेदान्तेन ज्ञातमित्यनुभवेन आत्मनि व्यभिचारात्। नापि पञ्चमः; ब्रह्मण्यप्यद्वितीयत्वादिविशिष्टव्यवहारे संविदन्तरापेक्षानियतिदर्शनेन व्यभिचारात्। नापि षष्ठः; स हि अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वाभावरूपः। तथाच शुक्तिरूप्यादेरपि अपरोक्षव्यवहारयोग्यत्वेन साधनवैकल्यादिति चेन्नैवम्; फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्यापि पक्षस्य क्षोदक्षमत्वात्। न च वृत्तिव्याप्यत्वपक्षे ब्रह्मणि व्यभिचारः,

---

अतीतादेर्योग्यस्थूलावस्थायां तदधिकरणयावत्कालं योगिनोन्यस्य वा कस्यचित् प्रत्यक्षसत्त्वेन[1] स्वाकारवृत्तिप्रतिबिम्बितचैतन्यविषयत्वात्, सूक्ष्मावस्थायामयोग्यस्थूलावस्थायां च अज्ञातत्वादिना साक्षिविषयत्वात्, कादाचित्कोक्तविषयत्वोक्तेर्निरालम्बनत्वात्। किंच ज्ञातत्वादिना साक्षिविषयत्वस्य साक्ष्यध्यस्तज्ञानदिविषयत्वरूपतया तस्य वृत्तिप्रतिबिम्बिताचिद्विषयत्वसाधारणरूपेण न हेतुतासम्भवः। वृत्तेर्हि विषयत्वमुक्तान्यतमादिरूपं, वृत्तिप्रतिबिम्बितचितस्तु तादात्म्यं, अन्यतमत्वादिना तत्सम्भवे वा साधारणमिति तृतीयपक्षाविशेषः। तस्मात्कथांचिद्विषयत्वमिति वृद्धोक्तपक्षस्योक्त एवार्थः। स्वव्यवहारेत्यादिपक्षद्वयं तु मूल एव स्पष्टीभविष्यति। **अवेद्यत्वे सतीत्यादि**। अवेद्यत्वं भग्नावरणचैतन्यतादात्म्यं तत्समानाधिकरणस्यापरोक्षव्यवहारयोग्यत्वस्याभाव इत्यर्थः। **क्षोदक्षमत्वादिति**। विचारसहत्वादित्यर्थः। एतेन—"स्तम्भादिप्रत्ययो मिथ्या, प्रत्ययत्वात्, तथाहि—यः प्रत्ययः

---

[1] प्रत्यक्षत्वेन,

अन्यथा ब्रह्मपराणां वेदान्तानां वैयर्थ्यप्रसङ्गादिति वाच्यम्; शुद्धं हि ब्रह्म न दृश्यं, 'यत्तदद्रेश्यम्' इति श्रुतेः। किन्तूपहितमेव। तच्च मिथ्यैव। न हि वृत्तिदशायां तदनुपहितं तद्भवति। न च 'सर्वप्रत्ययवेद्येऽस्मिन् ब्रह्मरूपे व्यवस्थिते' इति स्ववचनविरोध इति वाच्यम्; तस्याप्युपहितपरत्वात्। न चैवं सति शुद्धसिद्धिर्न स्यादिति वाच्यम्; स्वत एव तस्य प्रकाशत्वेन सिद्धत्वात्। नन्वज्ञाते धर्मिणि कस्यचिद्धर्मस्य विधातुं निषेद्धुं वा अशक्यत्वेन शुद्धे दृश्यत्वं निषेधता शुद्धस्य ज्ञेयत्वं अवश्यं स्वीकरणीयम्। न च स्वप्रकाशत्वेन स्वतस्सिद्धे शुद्धे श्रुत्या दृश्यत्वनिषेध इति वाच्यम्; शुद्धं स्वप्रकाशमिति शब्दजन्यविशिष्टवृत्तौ शुद्धप्रकाशे तस्य स्वप्रकाशत्वसिद्धेरिति चेन्न; वृत्तिकाले वृत्तिरूपेण धर्मेण शुद्धत्वासम्भवात्। शुद्धस्य वृत्तिविषयत्वं न सम्भवति। अतः

स मृषा[1]दृष्टः, स्वप्नादिप्रत्ययो यथेति बौद्धोक्तं युक्तं, तन्मते भ्रमत्वस्य स्वतस्त्वेनानुकूलतर्कसत्त्वात् प्रमात्वस्वतस्त्वमते तु साक्षिणा प्रथमतः प्रमात्वग्रहात् पश्चादनुमित्या न मिथ्यात्वग्रहः" इति परेणोक्तं विचारासहं सूचितम्। भ्रमत्वस्य स्वतस्त्वे मानाभावात्, साक्षिणा बाधासम्भवादेरुक्तत्वात्, व्यवहारकालाबाध्यत्वादिरूपप्रमात्वस्य स्वतस्त्वेपि[2] बाध्यत्वसामान्यानुमितौ बाधकाभावस्य बाधोद्धारे वक्ष्यमाणत्वाच्च। यत्तु "प्रत्ययत्वादित्यस्य विशिष्टप्रत्ययत्वादित्यर्थः। तेनाहमित्यालयविज्ञाने शून्यज्ञाने मिथ्याविषयकत्वरूपसाध्यासत्त्वेऽपि न व्यभिचारः" इत्युक्तम्, तत्स्वपाण्डित्यप्रकटितम्। शून्यवादिमते ह्युक्तानुमानम्। तत्र च सर्वं बाध्य[3]मित्युक्तज्ञानयोर्व्यभिचाराप्रसक्तिः। अतएव मिथ्यात्वमिथ्यात्ववादोपन्यस्तबौद्धाधिकारीयवाक्ये संवृतिसिद्धत्वं शून्यत्वस्य शङ्कितम्। तत्पूर्वमप्यस्तु तर्हि विचारासहत्वमेव विश्व-

[1] तथा. [2] अस्वतस्त्वेऽपि. [3] साध्य.

'शुद्धं स्वप्रकाशम्' इति वाक्यस्य लक्षणया अशुद्धत्व-मस्वप्रकाशकत्वव्यापकमित्यर्थः । तथाच अशुद्धत्वव्यावृत्त्या शुद्धे स्वप्रकाशता पर्यवस्यति । यथा भेदनिषेधेनाभिन्नत्वम् । स्येत्यनेन शून्यवादश्शङ्कितः । न च शून्यप्रत्ययस्य संवृतिशब्दित-विकल्पात्मकस्य शशविषाणादिप्रत्ययवन्निर्विषयकत्वेन उक्तसाध्याभाव इति वाच्यम्; तथापि बौद्धमते प्रत्ययमात्रस्य स्वविषयकत्वेन स्वात्म-कमिथ्याविषयत्वेनादोषात् । खण्डनेऽप्युक्तं—"सौगतब्रह्मवादिनोरयं विशेषः यदादिमस्य सर्वानिर्वाच्यत्वमन्तिमस्यानात्मन्यनिर्वाच्यत्वम्[1]" इति । **अशुद्धत्वम्** उपहितत्वं, न तु शुद्धभिन्नत्वं, शुद्धत्वस्य[2] वृत्तिविषयत्वापत्तेः । अशुद्धत्वव्यावृत्त्या शुद्धे पर्यवस्यति । उपहितत्वशून्यब्रह्मानिष्ठाभावप्रतियोगित्वेन न ज्ञायते । तथाचास्वप्रकाशत्वव्यापकाभावप्रतियोगित्वरूपायाः स्वप्रकाशत्वव्यतिरेकव्याप्तेः यदोपहितत्वाभावरूपे शुद्धत्वे ज्ञानमुद्बुद्धसंस्कारो वा तदा शुद्धत्वविशिष्टे स्वप्रकाशत्वाभावस्य न ज्ञानम्। वह्न्यभावव्यापकाभावप्रतियोगित्वस्य धूमे ज्ञानादि[3]काले धूमवान् वह्न्यभाववानिति ज्ञानाभाववदिति[4] तादृशज्ञानासम्भव एव स्वप्रकाशत्वसिद्धिरिति भावः । एतेन—'शुद्धत्वस्य हेतोः ब्रह्मण्यज्ञाने कथं तत्र स्वप्रकाशत्वस्यानुमितिरूपासिद्धिः' इति परास्तम्, शुद्धस्वरूपज्ञानं विनापि शुद्धत्वस्योक्तप्रतियोगित्वधीसम्भवात् । उपहितत्वमस्वप्रकाशत्वव्यापकमिति ज्ञानकालेऽप्युपहितत्वाभावविशिष्टे स्वप्रकाशत्वाभावो न ज्ञायते । धूमव्यापको वह्निरिति ज्ञानकाले वह्न्यभाववान् धूमवानिति ज्ञानाभाववत्। अतः उपहितत्वाभावरूपशुद्धत्वस्याज्ञातत्वेऽपि क्षत्यभावाच्च । न चोपहितत्वाभावाविशिष्टे स्वप्रकाशत्वभावो न ज्ञायत इत्याद्युक्तवाक्यजबुद्धौ शुद्धभानमावश्यकमिति वाच्यम्; उपहितत्वाभावावच्छिन्नाविशेष्यतानिरूपितस्वप्रकाशत्वाभावप्रकारताशालिज्ञानविषयत्वाद्यभावस्य अस्वप्रकाशत्वेन उक्तबुद्धौ भानादुक्तप्रकार-

[1] स्यात्मान्यनिर्वाच्यत्वम्. [2] शुद्धस्य. [3] धूमज्ञानादि. [4] धूमवद्वह्न्यभाववदिति.

न च शुद्धपदेनाभिधया लक्षणया वा शुद्धाप्रकाशे तत्प्रयोगवैयर्थ्यमिति वाच्यम्; पर्यवसितार्थमादाय सार्थकत्वोपपत्तेः। एवंच 'शुद्धं न दृश्यं न मिथ्या' इत्यस्याप्यशुद्धत्वं, दृश्यत्वमिथ्यात्वयोर्व्यापकमित्येतत्परत्वेन शुद्धे दृश्यत्वमिथ्यात्वयोः व्यतिरेकः पर्यवस्यति। एतेन—'स्फुरणमात्रमेव मिथ्यात्वे तन्त्रं लाघवात्, अतः स्वतः स्फुरदपि ब्रह्म मिथ्यैव' इति शून्यवादिमतमपास्तम्। स्वतः स्फुरणरूपतायाः शुक्तिरूप्यादावभावात्। स्फुरणविषयत्वस्य ब्रह्मण्यसिद्धेः। ननु विशिष्टज्ञाने विशेष्यस्यापि भाने श्रुत्या विशिष्टस्य दृश्यत्वेनैव विशेष्यस्यापि

रताया अनुपहितत्वेन भासमानोपहिते स्वप्रकाशत्वज्ञाने प्रसिद्धत्वात्। न चोपहितत्वे स्वप्रकाशत्वाभावव्यापकताज्ञाने शुद्धत्वस्वप्रकाशत्वयोः सहचारज्ञानमवश्यमपेक्षितं, अन्यथोपहितत्वाभाववद्वृत्त्यस्वप्रकाशत्वामिति व्यभिचारज्ञानानुच्छेदेन तादृशव्यापकताज्ञानासम्भवात्, तथाचोक्तसहचारघटकतया शुद्धज्ञानमावश्यकामिति वाच्यं; शुद्धस्य वृत्त्यविषयत्वेन तद्घटितोक्तव्यभिचारविषयकवृत्त्यसम्भवात्, उपहितत्वाभावभ्रमकाले उक्तव्यापकत्वज्ञानासम्भवेऽपि तदन्यकाले तत्सम्भवात्, उक्तसहचारभ्रमस्योपहितरूपाधिकरणमादाय सम्भवाच्च। न च शुद्धत्वान्यधर्मविशिष्टे स्वप्रकाशत्वाभावज्ञानापत्तिरिति वाच्यम्; बुद्धत्वसत्यत्वादेरपि[1] तादृशप्रतियोगित्वज्ञानादिविषयत्वात्, तदभावे इष्टत्वात्। न चैवमपि शुद्धत्वोपहिते स्वप्रकाशत्वसिद्धावपि शुद्धे तदसिद्धिरिति वाच्यम्; शुद्धत्वस्योपहितत्वाभावत्वेनाभावरूपधर्मे शुद्धवृत्तित्वस्योक्तत्वात्। युज्यते च तत्। उपहितत्वाद्यभावतोपहितेन स्वेन ब्रह्मणो भेदाभेदस्वीकारात् अभेदस्य धर्मधर्मितानियामकत्वात्। **पर्यवसितार्थमिति**। उक्तज्ञानासम्भवरूपं पर्यवसितप्रयोजनमित्यर्थः। **एवमिति**। वृत्तिविषयत्वं विनैवार्थसिद्धि[2]सम्भवे इत्यर्थः। **स्वतःस्फुरणेति**। तथाच साधन-

---

[1] शुद्धसत्त्वादेरपि. [2] वृत्ति.

दृश्यत्वात् व्यभिचारः । न च 'विष्णवे शिपिविष्टाय' इत्यादौ विशिष्टस्य देवतात्ववत् विशिष्टस्य विषयत्वम्, अग्नीषोमयोर्मिलितयोर्देवतात्ववद्वा मिलितस्य विषयत्वम्. अतो न विशेष्ये विषयत्वमिति वाच्यम्; तद्वदेव विशेषणस्यापि अविषयत्वे भागासिद्धिप्रसङ्गादिति चेन्न; विशेष्यतापन्नस्य विषयत्वेपि क्षत्यभावात्, तस्य मिथ्यात्वाभ्युपगमात् । अतएवोपहितविषयत्वेऽपि उपधेयविषयत्वमक्षतमेवेत्यपास्तम्। उपहितात्मना तस्यापि

वैकल्यमिति भावः । **मिलितस्येति** । उभयपर्याप्तं विषयत्वमित्यर्थः । **तद्वदेवेति** । यथा विशिष्टस्यातिरिक्तत्वात् पर्याप्तिसम्बन्धेन विषयत्वस्य हेतुत्वाद्वा विशेष्ये न हेतुः तथा विशेषणेपीति भावः । **विशेष्यतापन्नस्येति** । न च विशिष्टज्ञानेन शुद्धे ज्ञातत्वस्य अज्ञाननिवृत्तेश्च व्यवहारो न स्यादिति वाच्यम्; इष्टत्वात् शुद्धस्याव्यवहार्यत्वात् 'अव्यवहार्यमलक्षणम्' इत्यादिश्रुतेः । न च शुद्धतात्पर्यनिर्णायकविचारासिद्धिरिति वाच्यम्; तावताऽप्यक्षतेः उपहिततात्पर्यनिर्णायकविचारादेरेव श्रवणत्वादिसम्भवात् । **तस्यापीत्यपिकारेण** उपहित[1]ब्रह्मभिन्नप्रपञ्चमात्रस्य मिथ्यात्वम्, उपहितत्वेन तत्र दृश्यत्वसत्त्वादिति सूचितम् । तेन निर्विकल्पकास्वीकारे घटादेस्तत्स्वीकारेऽपि नित्यातीन्द्रियस्यापि विशिष्टरूपेणैव दृश्यत्वात् केवले तत्र भागासिद्धिरिति परास्तम् । घटादिप्रपञ्चस्योपहितान्यस्वरूपाभावादसिद्धयनवकाशात् उपहिततत्स्वरूपे मिथ्यात्वसिद्धयैव नः कृतकृत्यत्वात्। किंच ब्रह्मणः स्वप्रकाशत्वेन शुद्धरूपेण ज्ञानाविषयत्वेऽपि न क्षतिः । घटादेस्तु यदि शुद्धरूपं तदा ज्ञानाविषयत्वे अलीकमेव स्यात् । स्वप्रकाशत्वं तु तस्य दूरत एव । अनन्तानां तत्स्वीकारे गौरवस्योक्तत्वात् घटं न जानामीत्यनुभवाच्च । अपिच सोयं घट इत्यादिवाक्याद-

---

[1] उपहिते.

मिथ्यात्वाभ्युपगमात् ज्ञानान्तरविषयत्वेन विशेषणे भागासिद्ध्यभावाच्च । ननु वेदान्तजन्याखण्डवृत्तेरुपहितविषयत्वे तदानीमुपाध्यन्तराभावेन तस्या एव उपधायकत्वात् स्वविषयत्वापत्तिः । नचेष्टापत्तिः, शाब्दबोधे शब्दानुपस्थिता भाननियमेन वृत्तेः शब्दानुपस्थितायाः भानानुपपत्तेः । यथाकथंचिदुपपत्तौ वा न ततोऽज्ञानतत्कार्ययोर्निवृत्तिस्स्यात् अज्ञानतत्कार्याविषयकज्ञानस्यैव तदुभयनिवर्तकत्वात् । अन्यथा 'अहमज्ञः अयं घटः' इत्यादिज्ञानानामप्युपहितविषयकत्वेन अज्ञाननिवर्तकत्वप्रसङ्ग इति चेन्न; वृत्तेः शाब्दवृत्तावनवभासमानाया

स्मन्मते शुद्धव्यक्ति[1]धीः । त्वन्मतेऽपि प्रमेयमित्यादिज्ञानद्विशेष्यमात्रांशे उद्बुद्धसंस्कारात् विशेष्यमात्रस्मृतिर्वाच्या । अन्यथा अननुभूतदशरथत्वादिविशिष्टे शक्यादिज्ञानासम्भव इति भावः । **ज्ञानान्तरेति** । विशिष्टविषयकज्ञानेत्यर्थः । **उपाध्यन्तराभावेनेति** । ज्ञानमेवाज्ञानस्य स्वेतरतत्कार्यस्य च ध्वंस इति मते भुज्यमानादृष्टाभावकालीनज्ञानस्य स्वेतरोपाधिकालीनत्वासम्भवात् उपाध्यन्तराभावेनेत्यर्थः । अथवा तदानीन्तनानां स्वस्वेतरोपाधीनामन्तरस्य विशेषस्याभावेन **तस्या एव** तस्या अपीत्यर्थः । यद्वा ज्ञानमेवाज्ञानध्वंस इति मते अज्ञानस्योपाधित्वासम्भवात् अज्ञानकार्यस्यैकजातीयस्य असार्वत्रिकत्वात् तस्या एवाखण्डाकारवृत्तित्वेन सर्वत्रोपधायकत्वादित्यर्थः । **यथाकंथंचित्**—शाब्दज्ञानस्य स्वभिन्नशब्दानुपस्थिताविषयकत्वनियमस्वीकारेण । **तत्कार्याविषयकेति** । तत्प्रयुक्ताविषयकेत्यर्थः । तेन जीवेशभेदादिविषयकस्याप्यनिवर्तकत्वलाभः । **उपहितविषयकत्वेन** विशिष्टविषयकत्वेन । तेनास्मन्मते ज्ञानोपहितविषयकस्य निवर्तकत्वेन नेष्टापत्तिः । **निवर्तकत्वप्रसङ्ग इति** । न चोक्तज्ञानानामनिवर्तकत्वात् समानविषयकत्वेन ज्ञाना-

[1] शुद्धवृत्ति.

ज्ञानयोः निवर्तकनिवर्त्यत्वसिद्ध्या शुद्धब्रह्मविषयकाज्ञाननिवर्तकज्ञानस्य शुद्धब्रह्मविषयकत्वनियमेपि अज्ञानाद्यविषयकत्वनियमः कुतः? इयं शुक्तिरज्ञानं रजतं च मेयं अहं ब्रह्म अज्ञानं घटादि मेयमित्यादिज्ञानानामधिकविषयकत्वेपि अज्ञानं प्रति समानविषयकत्वेन निवर्तकत्वसम्भवात्, अवस्थाज्ञानतत्कार्यशुक्तिरजतादिज्ञानानामविद्यावृत्तित्वेन शुक्त्याद्यविषयकत्वेऽपि शुद्धब्रह्मज्ञानस्य मूलाज्ञानतत्कार्यघटादिविषयकत्वे बाधकाभावात् बाधितविषयकत्वेऽप्यबाधितविषयकत्वेन प्रमात्वसम्भवाच्चेति वाच्यम्। तार्किकादिमते घटाभाववदिदं घटवदिति ज्ञानस्येव शुद्धब्रह्मविषयकज्ञानस्य तदन्यविषयकस्यासम्भवात्। यादृशविषयतयोर्विरोधस्तादृशविषयतयैरेकज्ञानासम्बन्धनियमस्य तुल्यत्वात्। विरोधश्च तन्मते प्रतिबध्यप्रतिबन्धकतावच्छेदकत्वम्, अस्मन्मते नाश्यनाशकतावच्छेदकत्वं नाशतत्प्रतियोगिताच्छेदकत्वं चेत्यन्यदेतत्। वह्निव्याप्यो धूम इत्याकारोद्बुद्धसंस्कारकाले धूमवान् वह्न्यभाववानिति ज्ञानस्येव ह्रदो वह्न्यभाववान् इति उद्बुद्धसंस्कारकाले ह्रदो वह्निमानिति ज्ञानस्याप्यनुत्पत्तेः, आनुभविकत्वेन दृश्याभाववद्ब्रह्मेत्याकारकोद्बुद्धसंस्कारकालीनब्रह्मज्ञानकाले दृश्यविषयकज्ञानस्यासम्भवाच्च। दृश्यभाने सद्रूपब्रह्मणो दृश्यानुविद्धतया भानावश्यकत्वात्। ब्रह्मज्ञानात्पूर्वं घटत्वाद्युपस्थितयावद्धर्मावच्छिन्नाभावस्य मिथ्यात्वघटकतया ब्रह्मणि निश्चयात्। तत्र तस्योद्बुद्धसंस्कारसत्त्वात्सर्वदा मुमुक्षुणा प्रपञ्चमिथ्यात्वस्य चिन्त्यमानत्वात्। अतएव विवरणे "ननु ब्रह्मात्मानुभवद्वैतदर्शनयोः कुतस्साहित्यम्" इत्याशङ्क्य न वयं साहित्यं ब्रूमः किन्तु कदाचित् असम्प्रज्ञातात्मैकत्वदर्शनं कदाचिदारब्धकर्मोपस्थापितदोषनिमित्तद्वैतदर्शनं चेति" इत्युक्तम्। सन्तमसबहुळालोकयो रिव[1] द्वैताद्वैतधियोर्विरोध इति तत्त्वदीपने शङ्काव्याख्यानम्। असम्प्रज्ञातं प्रत्यक्षादिमानाज्ञातम्। ननु ज्ञानं स्वसमानविषयकाज्ञानतज्जन्यभ्रम-

[1] संतमसबहुळभास्करयोरिव.

तद्विषयनाश इति पक्षे तस्योक्तविषयाविषयकत्वनियमो युक्तः, उक्तविषयविषयकस्योक्त[1]भ्रमरूपत्वेन तन्नाशत्वासम्भवात् । इयं शुक्तिः तत् रूप्यं ज्ञेयमित्यादिरूपेण अतीतरूप्यादिविषयकत्वेन स्वसमानकालीनत्वेनापि ज्ञानस्य तु नासम्भवः, [2]स्वसमानकालीनत्वेनापि विषयस्य विशेषणीयत्वादुक्तज्ञानस्य तद्रूप्यामित्यंशे स्मृत्यादिरूपत्वेनातीतरूप्यादिविषयकत्वेन स्वसमानकालीनरूप्याद्यविषयकत्वात् । अतएवेयं शुक्तिरस्य रूप्यस्य धीः मम जातेत्यादिज्ञानस्यापि नासम्भवः । तथाच शुक्तिरियं रजतमिदं विद्यमानमित्यादेरिव अहं ब्रह्म, विद्यमानो घटो रूपवानित्यादेरपि ज्ञानस्यासम्भवः[3], स्वसमानविषयकाज्ञानजन्यभ्रमविषयविद्यमानविषयकत्वात् । ज्ञानस्योक्तनाशहेतुत्वपक्षे तूक्तनियमो न युक्तः, उक्तविषयविषयकेनाप्युक्त[4]नाशजननसम्भवात् । न चैवमुक्तज्ञानस्य स्वनाश्यत्वेन क्षणिकता स्यादिति वाच्यम् : उक्तनियमे स्वीकृतेऽपि ब्रह्मज्ञानस्य ब्रह्माज्ञानजन्यभ्रमविषयत्वेन स्वनाश्यत्वात् तन्नाशकान्तरकल्पने गौरवाच्च क्षणिकतापत्तेः । न च ब्रह्मज्ञानविषयकभ्रमस्य साक्षिणः अविद्योपहितचिद्रूपत्वेन उक्ताज्ञानाकार्यत्वेन ब्रह्मज्ञानस्य न स्वनाश्यत्वमिति वाच्यम् ; उक्तभ्रमस्य ब्रह्मज्ञानरूपविषयोपहितरूपेणाज्ञानकार्यत्वात् अविद्यावृत्त्युपहित[5]चितः साक्षित्वपक्षे स्वरूपेणापि तत्त्वात् । वस्तुतस्तु स्वसमानविषयकाज्ञानतत्प्रयुक्तान्यतरत्वावच्छेदेनैव लाघवेन ज्ञाननाश्यत्वात् प्रयुक्तत्वस्य च नाश्यतावच्छेदकतया सिद्धस्य तदधीनत्वरूपस्य शक्तिविशेषरूपस्य वा नित्येऽपि सम्भवात् अज्ञा-

[1] विषयकतत्त्वज्ञानस्योक्त. [2] विषयपदेन विषयतापर्याप्त्याश्रयोक्तया रजताभिन्नेदमादेरेव शुक्त्यादिज्ञानविषयत्वासम्भवात् । न चेयं शुक्तिरस्य रूप्यस्य ज्ञानं मे जातमित्यादिज्ञानासम्भव इति वाच्यम् : इतरांशे अविशेषणस्य अविशेष्यस्य चोक्तपर्याप्त्याश्रयस्य विषयपदेनोक्तिरिति । स्वसमानकालीनत्वेत्यारभ्य तथाचेत्यन्तं पाठान्तरम् । इति कोशागारीयमातृकायां वर्तते. [3] स्य संभवः. [4] उक्तविषयकेनाप्युक्त. [5] प्रत्युपहित.

नसम्बन्धादेरपि ज्ञाननाश्यत्वमुपपादनीयम्। अन्यथा तदुपहितरूपेणापि तद्भ्रमस्याकार्यत्वेन तस्य ज्ञानानाश्यत्वापत्तेः। तथाच किं भ्रमाजन्यत्व-चिन्तया। अतएव ज्ञानस्य उक्तनाशत्वपक्षे उक्तनाशहेतुत्वपक्षे वा अज्ञानसम्बन्धादिनाशत्वं तन्नाशहेतुत्वं वा नानुपपन्नं, उक्तान्यतर-नाशत्वादेरेव तत्र स्वीकारात्। यदा तु ज्ञानस्य नाश्यमज्ञानमेव, तत्प्रयुक्तं तु तन्नाशनाश्यमिति स्वीक्रियते, तदोक्तक्षणिकत्ववार्तापि नेति सुतरां नोक्तनियमः। किंच ज्ञानमुक्तनाशः तद्धेतुर्वा आस्ताम्, उभयथापि जीवन्मुक्तिकाले कथमुक्तनियमः? तदा भुज्य-मानादृष्टदेहादिसत्त्वात् तद्भ्रमात्मकब्रह्मज्ञानोत्पत्तौ बाधकाभावात्। यच्चोक्तं वह्निव्याप्य इत्यादिकं, तदप्ययुक्तं; तार्किकादिमते हि घटाभाववानयं घटवानिति ज्ञानं नोत्पद्यते, प्रतिबन्धकीभूतबाधबुद्धि-सामग्र्याः प्रतिबन्धकत्वात्। सिद्धान्ते तु बाधबुद्धेरेव प्रतिबन्ध-कत्वस्य विवरणाद्युक्तत्वात् तत्सामग्र्या अ(पि)प्यप्रतिबन्धकत्वम्। ह्रदो वह्न्यभावेत्यादिकं तु तार्किकादिविमत[1]मिति चेन्न; सिद्धान्ते बाध-बुद्धेरप्रतिबन्धकत्वेपि तत्सामग्रीप्रतिबन्धकत्वसम्भवात्। परमते अनु-मित्यादिसामग्रीप्रतिबन्धकत्ववत्। अन्यथा ज्ञानस्य अज्ञाननाशकत्वपक्षे घटाभाववानयं घटवानयमिति ज्ञानस्य दुर्वारत्वात्। ह्रदो वह्न्यभावेत्यादौ विमतत्वे तुल्ययुक्त्या धूमो वह्निव्याप्य इत्युद्बुद्धसंस्कारकालीनस्य धूमवान् वह्न्यभाववानिति ज्ञानस्योत्पत्त्यापत्तेः[2]। एवंच तमेव विदित्वेत्यादि श्रुतेरप्याज्ञस्यम्, अथवा अज्ञानतत्कार्यविषयकेत्यस्य स्वनिवर्त्याज्ञान-विषयविषयकेत्येवार्थः[3]। उक्तश्रुतिस्तु "एकधैवानुद्रष्टव्यं, प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते सोयमात्मा स विज्ञेय." इत्यादिकेवलात्मज्ञेयत्व-परश्रुत्यैकवाक्यतया तदंशेऽन्याविषयकज्ञानमोक्षहेतुत्वपरा। न्यायसिद्धस्य स्वसमानविषयकत्वेनाज्ञान[4]निवर्तकत्वस्य तया अनुवादात्। अतएव—

[1] प्रत्यक्षमत. [2] ज्ञानस्योत्पत्तेः. [3] स्वनिवर्त्याज्ञानविषयकेत्येवार्थः. [4] ज्ञान.

एवोपधायकत्वाभ्युपगमात्। तदुक्तं कल्पतरुकृद्भिः—"शुद्धं ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदयते, स्वस्याप्युपाधित्वाविशेषात्। एवंच नानुपहितस्य विषयता, वृत्त्युपरागोऽत्र सत्तयोपयुज्यते न भास्यतया विषयकोटिप्रवेशेन" इति। अयमभिप्रायः—यथा अज्ञानोपहितस्य साक्षित्वेऽपि नाज्ञानं साक्षिकोटौ प्रविशति जडत्वात्, किन्तु साक्ष्यकोटावेव। एवं वृत्त्युपहितस्य विषयत्वेऽपि न वृत्तिर्विषयकोटौ प्रविशति, स्वस्याः स्वविषयत्वानुपपत्तेः। किन्तु स्वयमविषयोऽपि चैतन्यस्य विषयतां सम्पादयतीति न काऽप्यनुपपत्तिः। एतेन ज्ञानाज्ञानयोरेकविषयत्वं व्याख्यातम्। अज्ञा-

---

'न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता।
उपमृद्नाति चेद्बुद्धिं ध्याताऽसौ न तु तत्ववित्॥'

इति ध्यानदीपे श्रीविद्यारण्यैरुक्तम्। बुद्धेर्मर्दनमितरविषयकत्वविघटनम्। तच्च ध्यानोपयुक्तम्। अन्यथा इतरविषयकज्ञानस्योत्पत्तौ ध्यानत्वस्येतरविषयकज्ञानाभावविशिष्टज्ञानधारात्वस्य[1] हानापत्तेः। न तु तत्त्ववेदनमात्रोपयुक्तमिति तदविषयकस्यापि[2] तत्त्वविषयकत्वसम्भवात्। पराभिमतबाधसामग्र्याः प्रतिबन्धकत्वस्य परैः क्लृप्तत्वेपि अखण्डब्रह्मधीसामग्र्याः तन्मते अलीकत्वेन तत्प्रतिबन्धकत्यस्य अक्लृप्तत्वात्, तत्कल्प्यत्वे सिद्धान्ते गौरवापत्तेः, तत्र प्रयोजनाभावाच्च। विवरणादिवाक्यं तु ब्रह्मज्ञानोत्पत्त्युत्तरं प्रारब्धभोगाभावकाले द्वैतप्रत्ययोत्पत्त्यभावपरं योजनीयम्। **निवृत्तिः** निवर्तिका। **विषयतां सम्पादयति**—अविषयात् शुद्धात्[3] विषयं विद्यमाना सती व्यावर्तयति। तथाच ब्रह्मान्विते स्वविषयत्वेऽनन्वितत्वे सति विद्यमानत्वे च सति व्यावर्तकत्वात् स्वविषयतां प्रत्युपाधित्वं वृत्तेः। यदनन्वितत्वे सति यद्वि-

---

[1] धारात्वादस्य. [2] युक्तमितरविषयकस्यापि. [3] अविषयत्वात् शुद्धं.

नमपि हि स्वोपधानदशायामेव ब्रह्म विषयीकरोति स्वानुपधानदशायां स्वस्यैवाभावात्। तथाच ज्ञानाज्ञानयोरुभयोरप्युपाध्यविषयकत्वे सत्युपहितविषयकत्वात् समानविषयकत्व-

---

शिष्टस्येतरव्यावर्तकं यद्विद्यमानं तत्र तदुपाधिः, यथा घटकारणत्वे दण्डत्वमिति लक्षणादिति भावः। **उपहितविषयत्वादिति**। ज्ञानस्याज्ञाननाशकत्वपक्षे ज्ञानाज्ञानयोः अन्याविशिष्टज्ञानपरासमूहालम्बनं स्यादेव; अज्ञानोपहितविषयकत्वसम्भवात्। एकविषयत्वेपि तस्य तन्नाशकत्वपक्षे तयोः स्वोपहितविषयकत्वेपि नैकविषयकत्वम्। अतः तन्नोक्तम्। अज्ञानादिविशिष्टविषयकमप्युपहितविषयकं, विशेष्यतापन्नस्य विषयत्वेऽपि क्षत्यभावादित्युक्तत्वात्। अतः **उपाध्यविषयकत्वे सतीति**। स्वोपहितब्रह्मान्याविषयकत्वे सतीत्यर्थः। तावन्मात्रं निर्विषयके तुच्छव्यवहारजनके विकल्पेपीति उपहितविषयकत्वादित्युक्तम्। सविषयकत्वादिति तदर्थः। तुच्छवृत्तेः सविषयकत्वमते तु विशेष्यदळं न देयम्। ज्ञानस्याज्ञानतत्प्रयुक्ताविषयकत्वनियमास्वीकारे तु विषयत्वानिरूपितेत्यस्य सत्यन्तेन लाभात् तादृशी या उपहितब्रह्मविषयता तच्छालित्वं दळद्वयार्थः। तच्च 'अहं ब्रह्म, घटो मेयः' इत्यादिसमूहालम्बनज्ञानेऽप्यक्षतम्। ब्रह्मभिन्नविषयकज्ञानाज्ञानयोस्तु अज्ञानतत्प्रयुक्ताविषयकत्वे सति अज्ञानविषयतावच्छेदकविषयकत्वं ज्ञानस्य अज्ञानसमानविषयकत्वम्। ज्ञानस्याज्ञानतत्प्रयुक्ताविषयकत्वनियमस्वीकारे तु सत्यन्तं न वाच्यम्। यादृशी अवच्छेदकता तादृशी ज्ञानस्य विषयता वाच्या। तेन शुद्धतद्व्यक्त्यवच्छिन्नविषयताकाज्ञानस्य शुद्धतद्व्यक्तिविषयकज्ञानं, शुद्धशुक्तित्वादिविशिष्टावच्छिन्नविषयताकाज्ञानस्य शुद्धशुक्तित्वप्रकारकं ज्ञानं, जातित्वादिविशिष्टशुक्तित्वादिविशिष्टावच्छिन्नविषयताकाज्ञानस्य तादृशशुक्तित्वादिप्रकारकज्ञानं समानविषयकम्। **समानविषयकत्वमिति**। एकविषयत्वपदेन पूर्वोक्तार्थ इत्यर्थः।

मस्त्येव । एतेनोपाधिविषयज्ञानानामज्ञाननिवर्तकत्वं व्याख्यातम् । अज्ञानस्योपाध्यविषयत्वेन समानविषयत्वाभावात् । समानविषयत्वेनैव तयोर्निवर्त्यनिवर्तकभावात् । वस्तुतस्तु शब्दाजन्यवृत्तिविषयत्वमेव दृश्यत्वम् । अन्यथा 'शशविषाणं तुच्छम्' इत्यादिशब्दजन्यवृत्तिविषये तुच्छे व्यभिचारस्य दुरुद्धरत्वात् । एवंच सति शुद्धस्य वेदान्तजन्यवृत्तिविषयत्वेऽपि न तत्र व्यभिचारः, तुच्छशुद्धयोः शब्दाजन्यवृत्तिविषयत्वानभ्युपगमात् ॥

तेन न पञ्चम्यसङ्गतिः । **उपाधिविषयकेति** । सत्यन्तव्यावर्त्येत्यर्थः । **समानविषयकत्वेनैवेति** । समानविषयकत्वव्याप्यं निवर्त्यनिवर्तकत्वमित्यर्थः । तेन चैत्रो[1] ब्रह्मेति वाक्यजन्यस्योपहित[2]ब्रह्मविषयकस्य उक्तसमानविषयकस्य स्वसमानाधिकरणसंसारप्रयोजकाज्ञाना[3]निवर्तकत्वेऽपि न क्षतिः । शक्तिविशेषवत्त्वेनैव स्वपरिणाम्यज्ञानत्वसम्बन्धेन स्वहेत्वज्ञानत्वसम्बन्धेन वा कारणत्वम् । अज्ञानोपहितब्रह्मान्याविषयकाज्ञानवृत्तिप्रतियोगितासम्बन्धेन नाशत्वेन कार्यत्वम् । यस्य मूलाज्ञानस्य येन ब्रह्मज्ञानेन नाशः तस्य शक्तिविशेषविशिष्टस्य ज्ञानस्य स्वपरिणामिनः परिणाम्यज्ञानत्वसम्बन्धेन तत्र सत्त्वात् शुक्त्याद्यज्ञाने व्यभिचारापत्तेः वृत्त्यन्तम् । शुक्त्याद्यवच्छिन्नविषयताशाल्यज्ञानवृत्तिप्रतियोगितासम्बन्धेन नाशं प्रति स्वपरिणामिमनोवच्छिन्नाश्रयताकाज्ञानत्वसम्बन्धेन शुक्तित्वप्रकारताकज्ञानत्वेन कारणत्वम् । ज्ञानत्वजात्यस्वीकारे निश्चयत्वजातिर्निवेश्येति दिक् । एवंचोपहितब्रह्मान्याविशेषितोपहितब्रह्मविषयकज्ञानत्वं तात्त्विकप्रमात्वम् । यादृशरूपविषयकस्य व्यावहारिकप्रमाबाधकत्वं तादृशरूपविषयकज्ञानत्वस्यैव तात्त्विकप्रमात्वरूपत्वात् । अतस्तादृशज्ञानस्य अप्रमात्वापत्तिर्मौढ्येनैव । न चोपहितब्रह्मण आकाशादिबाधकधीविषयत्वानुपपत्तिः, आकाशाद्यधिकसत्ताकत्वाभावात्, यद्यद्बाधकधी-

[1] च ईशो. [2] स्वोपहित. [3] ज्ञान.

विषयः तत्तदधिकसत्ताकमित्युक्तव्याप्तेरिति वाच्यम्; स्वाबाधकेत्यनेन यद्बाधकस्य विशेषणीयत्वात्। अन्यथा स्वाग्नयोर्गजतदभावयोः परस्परबाधकधीविषयत्वस्य पूर्वोक्तस्यानुपपत्तेः। विवक्षिते तु स्वाग्नगजाभाववति स्वाग्नगज इत्याकारकज्ञानस्य स्वाग्नगजतदभावयोः स्वसमानाधिकरणस्वान्यूनसत्ताकात्यन्ताभावप्रतियोगित्वविषयकत्वेनोभयबाधकत्वात्। यद्बाधके स्वाबाधकत्वाभावात् यत्र धीविषयत्वं स्थाप्यं तत्स्वपदार्थः। यत्तु—"ज्ञानाज्ञानयोः शुद्धाविषयकत्वे—

'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला'।

इति सिद्धान्तहानिः, लब्धे उपहिते विषये अज्ञानस्वरूपसिद्धिः, अज्ञानस्वरूपे च सिद्धे तदुपहितरूपासिद्धिरित्यन्योन्याश्रयः। उपहिताश्रयकत्वमप्यज्ञाने स्यात्। इष्टापत्तौ च तत्राप्यन्योन्याश्रयः, एवमनुपहितस्य वृत्त्यविषयत्वेन चैतन्यस्य वृत्तिविषयत्वार्थं[1] तटस्थयाऽप्युत्पन्नया वृत्त्योपहितत्वम्। उपहिते सति चैतन्ये तद्विषयकवृत्त्युत्पत्तिः निर्विषयकवृत्त्यनुत्पादात्। तथाच चैतन्यस्य विषयत्वे तद्विषयकवृत्त्युत्पत्तिः, तस्यां च चैतन्यस्य वृत्त्यधीनं विषयत्वमित्यन्योन्याश्रयः" इति, तत्तुच्छम्; आश्रयत्वेत्यादिवाक्येनाज्ञानकार्यानुपहितस्याज्ञानविषयताश्रयत्वयोरुक्तत्वात्।

'पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥'

इत्युत्तरार्धेनाज्ञानकार्योपहितस्याविषयाश्रयत्वे पश्चादुत्पन्नत्वहेतोरुक्तत्वात्। अज्ञानोपहितस्याप्यविषयत्वादौ तात्पर्ये हेत्वनुक्त्या न्यूनतापत्तेः। लब्ध इत्यादिकं तु स्वमौढ्यप्रकटनम्। अज्ञानतदुपहितयोस्तद्गोचरसाक्षिणोश्च अनादित्वेनोत्पत्तिज्ञप्त्योरन्योन्याश्रयानवकाशात्। एवमित्यादिकमपि तथा, शाब्द[2]वृत्तौ विषयस्याहेतुत्वेन विषयस्योपहितस्य वृत्तिपूर्वमनपेक्षणात्। लक्षणाज्ञानतज्जन्योपस्थिती अपि अन्याविशेषितं यत्स्वोपहितं तद्विषयके अपेक्ष्येते[3] न तु शाब्द[2]वृत्त्युपहितविषयके। न

[1] वृत्त्यविषयत्वार्थः. [2] शाब्दा. [3] अपेक्षेते.

यद्वा सप्रकारकवृत्तिविषयत्वमेव दृश्यत्वम्। प्रकारश्च सोपाख्यः कश्चिद्धर्मः। तेन निष्प्रकारकज्ञानविषयीभूते शुद्धे निरुपाख्यधर्मप्रकारकज्ञानविषयीभूते तुच्छे च न व्यभिचारः। अभावत्वस्यापि सोपाख्यत्वाद्भावत्वप्रकारकज्ञानविषयीभूते अभावे न भागासिद्धिः। उपाख्या चास्तीति प्रतीतिविषयत्वादीत्यन्यत्। एतेन वृत्तिव्याप्यफलव्याप्ययोः साधारणं व्यवहारप्रयोजकविषयत्वरूपं दृश्यत्वमपि हेतुः, ब्रह्मणि तुच्छे च व्यभिचारपरिहारोपायस्य उक्तत्वात्॥

च वाचस्पतिमते आत्मसाक्षात्कारस्य मानसत्वेन मनस्सन्निकर्षविषयाभ्यां जन्यत्वात् स्वोपहितात्मविषयकत्वानुपपत्तिः, विषयनिष्ठप्रत्यासत्त्या तयोर्हेतुत्वेन स्वोपहिते तयोः स्वोत्पत्तिपूर्वमसत्त्वादिति वाच्यम्; सन्निकर्षाद्युपहितस्य स्वविषयस्य स्वोपहितत्वेन[1] तदुपपत्तेः। यस्मिन् क्षणे यत्कारणकूटवत्तदव्यवहितोत्तरक्षणे तत्तादात्म्यापन्ने कार्योत्पत्तिरिति व्याप्तेः स्वीकारात्। न च विनश्यदवस्थसन्निकर्षादिना स्वोत्पत्तिस्थले भिन्नकालीनसन्निकर्षाद्युपहितात् स्वोपहितस्य अत्यन्तभेदात् यत्र मनस्संयोगोपहिते मनस्संयोगः[2] तत्र लौकिकविषयतया न साक्षात्कारोत्पत्तिरित्युक्तानुपपत्तिरिति वाच्यम्; तावताऽप्यविनश्यदवस्थसंप्रयोगात् तदुत्पत्तिसम्भवादिति सुधीभिर्ज्ञेयम्। असत्ख्यातिमते शब्देनेवानुमानादिनाऽपि तुच्छस्य ज्ञेयत्वात्तत्र व्यभिचारादाह—**यद्वेति। धर्म** इति। ग्राह्य इति शेषः। तथाच सोपाख्यनिष्ठप्रकारताकवृत्तिर्वाच्येति भावः। तुच्छस्याप्यस्तित्वेन[3] ज्ञानमस्तीति वादिनं प्रत्याह—**आदीति**। सत्तातादात्म्यतत्त्वान्यतरवत्त्वादित्यर्थः। एवं फलव्याप्यत्वहेतुतोक्तिपक्षेऽपि वृत्त्यभिव्यक्तचित्त्वादिरूपफलत्वेन न निवेशः। किन्तु स्वावच्छेदकवृत्तिव्याप्यत्वसम्बन्धेन मनोवच्छिन्नचित्त्वेन हेतुता।

[1] स्वविषयस्वोपहितादभेदेन. [2] मनस्संयोगे तत्तादात्म्यवति. इति पा. [3] प्यसत्त्वेन.

वृत्तिश्च सोपाख्यनिष्ठप्रकारताका ग्राह्या। तेन नोक्तव्यभिचारः। चित्त्वेन हेतुत्वं वा, सम्बन्धभेदाच्चतुर्थपक्षाद्भेदः। न चातीन्द्रिये अविद्यासुखादौ च अनुमित्यादिवृत्त्यवच्छिन्नचैतन्यमादाय हेतुः स्थाप्यः तच्च न फलमिति फलव्याप्यत्वं रूपान्तरेणापि प्रकृते न हेतुरिति वाच्यम्; वृत्तिप्रतिबिम्बितत्वेन तदधीनासत्त्वापादकाज्ञाननिवृत्तिमत्त्वेन वा साक्षिचैतन्यस्यैव प्रकृते फलत्वात्। अनुमित्यादिवृत्तौ साक्षिणः प्रतिबिम्बितत्वाद्यनपायात्। उक्तं हि विवरणे—'जानातेश्चानुमेयादिषु फलापेक्षया सकर्मकत्वं न कर्मकारकापेक्षया' इति। अतएव सुखादिरूपाया वृत्तेरपि स्वच्छत्वात् चित्प्रतिबिम्बग्राहित्वमित्युक्तं सिद्धान्तविद्यादौ। वृत्तिज्ञाने यद्यपि बाह्यार्थवत् फलं नास्ति, तथापि चैतन्याभिव्यक्तिरूपं फलमस्त्येव, मनस इव तत्परिणामस्यापि स्वच्छत्वेन चित्प्रतिबिम्बग्राहित्वादित्युक्तम् 'नाभाव उपलब्धेः' इत्यधिकरणे कल्पतर्वादौ। एवंचेन्द्रियकरणकवृत्तावेव चित्प्रतिफलनं न त्वनुमित्यादिवृत्ताविति वेदान्तसिद्धान्त इति यत्परेणोक्तं तत् तन्मतिपरिपाकः। स्वाकारवृत्तिप्रतिबिम्बितचिद्विषयत्वादिरूपस्य फलव्याप्यत्वस्यानुमित्यादिस्थले अस्मत्सिद्धान्ते परमनङ्गीकारात्। उक्तं हि विवरणे—'अनुमित्यादौ न क्रियाजन्यफलशालित्वरूपं कर्मत्वं, किन्तु सुषुप्त्यादिव्यावृत्तिमात्रम्' इति। वस्तुतः सर्वस्य कर्तृत्वादेव वर्तमानसर्वविषयज्ञतेत्यादिविवरणे[1] ईश्वरोपाधिसत्त्वप्रधानमाया वर्तमानसर्वविषयाकारेण परिणमते, तस्मिंश्च परिणामे प्रतिबिम्बितं चैतन्यं सर्वं पश्यत्याध्यासिकसम्बन्धादित्यादितत्त्वदीपनोक्तेः[2] स्वाकारवृत्तिप्रतिबिम्बितचैतन्यविषयत्वरूपं फलव्याप्यत्वं सर्वत्र सुलभम्। न च चैतन्यत्वेनैव तादात्म्यरूपविषयतया हेतुत्वसम्भवात् व्यर्थविशेषणत्वमिति वाच्यम्; वृत्तिप्रतिबिम्बितत्वेनैव तादात्म्येन हेतुत्वात्। तुच्छे तु नोक्तमायावृत्तिः, विद्यमानमात्र एव

[1] विवरणात्. [2] दीपनोक्तं

तदुक्तेः । अतश्चैतन्यातादात्म्याच्च न तत्र व्यभिचारः । ब्रह्मणि तु न सः, तदन्याकारवृत्तौ पूर्वोक्तविरोधेन तदाकारकत्वाभावात् । तन्मात्राकारकवृत्तेः सप्रकारकत्वविशेषणेन वारणसम्भवात् । तदन्यनिष्ठतादात्म्येनैव हेतुत्वाद्वा । एतेन वृत्तिप्रतिबिम्बितशुद्धब्रह्मरूपाभ्यां[1] भेदसत्त्वात् तादात्म्यसत्त्वेऽपि न क्षतिः । अतीतादेरपि वर्तमानतादृशायां तादृशचित्तादात्म्यात् तत्र न भागासिद्धिः । यत्तु—"वृत्तिविषयत्वेनैव सकलव्यवहारसम्भवात् वृत्तिविषयत्वातिरिक्तस्य चिद्विषयत्वस्याननुभवाच्च न कुत्रापि चिद्विषयत्वम् । अन्यथा तमोनिवर्तकप्रभादिप्रतिफलितं प्रभाद्यन्तरं स्यात् । विषयस्यापरोक्ष्यमपि इन्द्रियप्रयुक्तसाक्षात्कारत्वविशिष्टवृत्तिविषयत्वरूपं वृत्तिप्रतिफलितचिद्विषयत्वं विनाप्युपपद्यते, ज्ञानत्वाश्रयवृत्तिविषयत्वरूपज्ञातत्वादिवत्" इति, तन्न; सुखादौ वृत्तिज्ञाने च इन्द्रियजन्यवृत्त्यन्तरकल्पने गौरवात्, वृत्तिविषयत्वस्येच्छादिव्यवहारविषयत्वाप्रयोजकत्वात् । असत्त्वापादकाज्ञानविषयतानवच्छेदकत्वस्य तत्र प्रयोजकत्वोक्तौ चेच्छाविरहप्रयोजकमज्ञानाविषयतावच्छेदकत्वं घटादेरज्ञानविषयचित्तादात्म्येनैवोपपाद्यम् । अवच्छेद्याधिकरणसंम्बन्धं विना अवच्छेदकत्वानुपपत्तेः । न चाज्ञानविषयतानवच्छेदकत्वस्य तथात्वे अतीतत्वादिदशायां सुखादौ परोक्षवृत्तिनिवर्त्यतत्समसंख्याज्ञानानामिच्छादिविरहप्रयोजकानां कल्पनमावश्यकं, तथाच तदपेक्षया वृत्तीनां विद्यमानतादशायां तत्र कल्पनायां न गौरवमिति[2] वाच्यम्; अज्ञानस्य वृत्तिप्रागभावरूपतया प्राचां मते वृत्तिसमसङ्ख्यत्वेऽपि विद्यमानसुखादौ वृत्तितत्प्रागभावादिकल्पनायां तदपेक्षया गौरवात्, नव्यमते प्रागभावास्वीकारेणाज्ञानस्य वृत्तिप्रागभावत्वाभावात् तत्समसङ्ख्यत्वाभावात् । देशकालविशेषावच्छेदेन घटाद्यत्यन्ताभावस्य घटादिविरोधित्ववत् तद्विषयतावच्छेदक-

[1] स्वरूपाभ्यां. [2] तत्कल्पनाया गौरवादिति.

त्वस्य वृत्तिविरोधित्वसम्भवात् एकस्यैवाज्ञानस्येच्छाविरहप्रयोजकत्वात् । तादृशस्याप्यध्यासोपादानत्वेन भावरूपत्वात् । प्रतिकर्मव्यवस्थायामधिकं वक्ष्यते । असत्त्वापादकाज्ञानस्यैवेच्छादिप्रयोजककुक्षौ निक्षेपादनुमित्यादिकाले अभानापादकाज्ञानसत्त्वेपीच्छाद्युत्पत्तिः । न च घटादेरज्ञानविषयत्वमेव लाघवादस्तु, तथाच तदवच्छेदकत्वोपपादकं चित्तादात्म्यं न कल्प्यमिति वाच्यम्; घटादिजडेषु तदाकारवृत्तिं विना प्रकाशप्रसक्तिर्हि चैतन्यस्य शुद्धरूपेण मोक्षान्वयिसत्तास्फुरणरूपसर्वगतस्वप्रकाशत्वेन क्लृप्तस्य सम्बन्धात् । तथाच तत्रैवैकत्र तत्तदवच्छिन्नरूपेणाज्ञानविषयत्वकल्पनेन तदवच्छेदकेषु घटादितद्धर्मेष्वनन्तेषु अप्रकाशनिर्वाहे तेषु नाज्ञानविषयकत्वं कल्प्यते, गौरवात् । किञ्च घटादौ तदवच्छिन्नचिति वा तद्विषयत्वमित्यत्र न विनिगमकम् । न चोक्तचिति तत्स्वीकारे घटादौ तदवच्छेदकत्वस्य आवश्यकत्वात् गौरवमेव विनिगमकमिति वाच्यम्; उक्तचितः केवलचिदन्यत्वेन तस्यामनवच्छिन्नोक्तविषयत्वस्वीकारे दोषाभावात्, अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वमादायैव शास्त्रे तदवच्छेदकत्वव्यवहारात् अतिरिक्तावच्छेदकत्वाकल्पनात् । उपहितस्य केवलानन्यत्वपक्षे तु एकस्यैव अज्ञानविषयत्वस्य शुद्धचिन्निष्ठस्योक्तरीत्या अवच्छेदकत्वानि घटादौ कल्प्यन्ते । तत्र विषयत्वं ब्रह्मज्ञानस्यैव विरोधि, अवच्छेदकत्वादीनि तु घटाद्याकारवृत्तीनामपि । सर्वथा घटादौ चित्तादात्म्यमावश्यकम् । अत एव सत्तास्फुरणाकारप्रतीत्याऽपि सर्वत्र चित्तादात्म्यसिद्धिः, सत्तास्फुरणरूपतया क्लृप्तचित एव तद्विषयत्वात् । अतएव विषयापरोक्ष्यमपि नेन्द्रियजन्यवृत्तिविशेषविषयत्वं, आत्मसुखादौ तदभावात्, तन्मानससाक्षात्कारस्य तत्र मनस्सन्निकर्षादिहेतुत्वस्य च कल्पने गौरवात् । किन्तु अज्ञानविरोधि चिद्रूपम् । अज्ञानविरोधित्वं च सुखाद्यवच्छिन्नचिति स्वतः, तदन्याचिति तु तदाकारवृत्त्येति विशेषः । अतएव ज्ञातत्व-

यद्वा दृश्यत्वं चिद्विषयत्वम्। तच्च यथाकथंचित् चित्सम्बन्धित्वरूपं हेतुः। तच्च न चैतन्ये, अभेदे भेदनान्तरीयकस्य

मपि न वृत्तिविशेषविषयत्वं, किन्तु असत्त्वापादकाज्ञानविरोधि चिद्रूपम्। उक्तविरोधित्वं च सुखाद्यवच्छिन्नचिति स्वतः, तदन्याचिति तु वृत्त्या। तच्चापरोक्ष्यादिकम्। यद्यपि ब्रह्म स्फुरति, ब्रह्मास्तीत्यादावसंसृष्टमेव भासते; तादृशवाक्ये लकारस्य साधुत्वार्थकत्वस्योक्तत्वात्। तथापि घटः स्फुरतीत्यादौ घटादौ तत्तादात्म्यं भासत एवेति चिद्विषयत्वमाचिन्मात्रस्यावश्यकम्। प्रभादिप्रतिफलिते च प्रभाद्यन्तरे न कापि युक्तिरिति न तदापादनम्। न चैवमपरोक्षज्ञानत्वं चितीव वृत्तावपि वाच्यमिति परोक्षत्वापरोक्षत्वयोः[1] चैतन्यरूपमुख्यज्ञानत्वं वृत्तिरूपगौणज्ञानत्वं प्रति वा व्याप्यता न स्यादिति वाच्यम्; मुख्ययोः परोक्षापरोक्षज्ञानत्वयोः मुख्यज्ञानत्वव्याप्यतायाः अमुख्ययोस्तयोरमुख्यज्ञानत्वव्याप्यतायाः सम्भवात्, अज्ञानसामान्यविरोध्यज्ञानविशेषविरोधिचित्त्वाभ्यां चितो मुख्यापरोक्षपरोक्षरूपत्वात् तादृशचिदात्मकविषयकत्वेन वृत्तेरमुख्यापरोक्षतासम्भवात्। तस्मात् फलव्याप्यत्वहेतुरपि निर्दोषः। फलव्याप्यत्वव्यतिरिक्तस्येत्याद्याचार्योक्तिस्तु स्वाकारवृत्त्यभिव्यक्तचैतन्यविषयकत्वाहेतुत्वपरा; तस्योक्तमायावृत्त्याप्यतीन्द्रियेष्वसम्भवात्, अज्ञाननिवृत्तिरूपाभिव्यक्तेः मायावृत्त्यप्रयोज्यत्वात्। **भेदनान्तरीयकस्येति।** ययोर्भेदस्तयोरेव सम्बन्ध इत्यर्थः। भेदाभेदानुमानविवेचने विवेचितमस्माभिरेतत्। यद्यपि कल्पितश्चित्सम्बन्धश्चैतन्येष्यस्ति, सत्यत्वादिरूपस्य तस्य स्वधर्मतास्वीकारात्। तथाऽपि स्वज्ञानाबाध्यचित्सम्बन्धवत्त्वं वाच्यम्। अथवा भेदनान्तरीयकस्येति भेदघटितत्यर्थः। **सम्बन्धस्य** चित्सम्बन्धित्वपदार्थस्य। तथाच चिदन्यनिष्ठचित्सम्बन्धो हेतुरिति भावः। ननु चितः स्वावच्छेदकवृत्तिव्याप्यत्वसम्बन्धस्तुच्छेपीत्यत आह—

[1] परोक्षापरोक्षज्ञानत्वयोः

सम्बन्धस्य अभावात् । अतो न व्यभिचारः । तुच्छे च व्यभिचारः परिहारणीयः । यद्वा स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिरूपं दृश्यत्वं हेतुः । संविच्छब्देन विषयाभिव्यक्तं वा वृत्त्यभिव्यक्तं वा शुद्धं वा चैतन्यमात्रमभिप्रेतम् । तथाच घटादौ नित्यातीन्द्रिये साक्षिभास्ये च सर्वोपि व्यवहारः स्वातिरिक्तसंवित्सापेक्ष इति नासिद्धिः । व्यवहारश्च स्फुरणाभिवदनादिसाधारणः । तत्र ब्रह्मणः स्फुरणरूपे व्यवहारे नित्यसिद्धे स्वातिरिक्तसंविदपेक्षा नास्तीति नियतिपदेन व्यभिचारवारणम् ।

तुच्छ इति । स्वज्ञानाबाध्यत्वोक्तिपक्षे तुच्छज्ञानबाध्य[1]त्वाप्रसिद्धेः तदनुक्तिपक्षे तुच्छावृत्तित्वेन सम्बन्ध[2]विशेषणात् तादात्म्यसम्बन्धस्यैव निवेशाद्वेति शेषः । प्रातिभासिकज्ञानमपि स्वप्नादौ स्वाभावज्ञानबाधकमिति स्वज्ञानबाध्यतायोग्यताप्रसिद्धेर्न साधनवैकल्यम् । **विषयाभिव्यक्तं**—विषयावच्छिन्नेनावरणेन शून्यम् । **वृत्त्यभिव्यक्तं**—वृत्तिप्रतिबिम्बितम् । **सर्वोपीति** । इच्छाप्रवृत्त्यादिरित्यर्थः । अविद्यादेः स्वावच्छिन्नचिद्रूपं स्फुरणमनाद्यप्यनवच्छिन्नचित्सापेक्षं तदाश्रितत्वात् प्रयुक्तत्वरूपसापेक्षत्वस्या[3]नादावपि सम्भवादिति भावः । स्फुरणमसत्त्वापादकाज्ञानविरोधि चैतन्यं, तादृप्येण स्फुरणस्य निवेशेऽपि न क्षतिः, ब्रह्मस्फुरणापेक्षणीयशुद्धचैतन्यस्य ब्रह्मातिरिक्तत्वाभावादित्याशयेनाह—**तत्र ब्रह्मण** इत्यदि । **नित्यसिद्धे** इति। नित्यसिद्धब्रह्माश्रिते इत्यर्थः। इदं च नास्तीत्यत्र हेतुगर्भं विशेषणम् । **स्वातिरिक्तेति** । स्वविलक्षणेत्यर्थः । स्ववृत्तिधर्माश्रयेति यावत् । तेन ब्रह्मणः स्वस्मिन् स्वात्मकसत्यत्वादिधर्मतानियामककल्पितभेदसत्त्वेऽपि न क्षतिः । अत्रोक्तविशिष्टस्फुरणस्य स्वातिरिक्तवृत्तिसापेक्षत्वात् संवित्पदेन पूर्वं चैतन्यमुक्तम् । अथवा **नित्यसिद्धे** ब्रह्मस्वरूपे । तथाच घटादिस्फुरण-

---

[1] तुच्छज्ञानतुच्छबाध्य. [2] संबन्धि. [3] साक्षित्वस्या.

स्वगोचरयावद्व्यवहारे स्वातिरिक्तसंविदपेक्षायां पर्यवसानात्। अत एवास्वप्रकाशत्वरूपं दृश्यत्वमपि हेतुः। स्वप्रकाशत्वं हि स्वापरोक्षत्वे स्वातिरिक्तानपेक्षत्वम्। 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुतेः। तथाचान्यानधीनापरोक्षत्वं पर्यवस्यति। तच्चिरूपितभेदवत्त्वं हेतुः। तच्च नित्यपरोक्षे अन्याधीनापरोक्षे च घटादावस्तीति नासिद्धिः। न च ब्रह्मणोऽपि ब्रह्मप्रतियोगिककाल्पनिकभेदवत्त्वात्तत्र व्यभिचारः, अकल्पितभेदस्य क्वाप्यसिद्धत्वादिति

स्योक्तविरोधिचिद्रूपत्वेऽपि शुद्धचिद्रूपब्रह्मणः स्फुरणं शुद्धचिदेव, आवृताया अपि तस्याः चिन्मात्रमस्तीत्यभिलापादि[1]दर्शनादिति भावः। **स्वगोचरेत्यादि**। स्वस्फुरणाद्यन्यतमत्वव्यापकस्वातिरिक्तचित्प्रयुक्तताकत्वे पर्यवसानादित्यर्थः। स्वातिरिक्तचित्प्रयुक्तस्फुरणकत्वं सापेक्षस्फुरणस्वरूपकत्वं वा हेतुर्लघुर्बोध्यः॥

स्वापरोक्षत्वे इति। अपरोक्षत्वमज्ञानसामान्यविरोधि चैतन्यम्। **स्वातिरिक्तेति**। स्वविलक्षणचिदित्यर्थः। तेनाज्ञानविरोधित्वरूपेण वृत्त्यपेक्षत्वेऽपि न क्षतिः; वृत्त्यसत्त्वेऽपि चिन्मात्रं भातीति व्यवहारात्। शुद्धचैतन्यस्यापरोक्षताकत्वे तु स्वातिरिक्तं न निवेश्यम्। अनपेक्षापरोक्षताकत्वस्य ब्रह्मणि सत्त्वात् साक्षादपरोक्षात् स्वविलक्षणचिदनपेक्षापरोक्षताकमनपेक्षापरोक्षताकं[2] वा अविद्याद्युपहितचिद्रूपमविद्याद्यपरोक्षत्वं शुद्धचित्सापेक्षमेव। **तच्चिरूपितेत्यादि**। तदवच्छिन्नानुयोगिताकस्य स्वभेदस्य प्रतियोगित्वमित्यर्थः। ब्रह्म स्वप्रकाशं नेति बुद्ध्या स्वप्रकाशत्वावच्छिन्नप्रतियोगिताकस्य शुद्धब्रह्मानुयोगिकभेदस्य कल्पन[3]सम्भवात् स्वप्रकाशत्वावच्छिन्नप्रतियोगिताकभेदानुयोगित्वं नोक्तम्। स्वप्रकाशं ब्रह्म नेति बुद्धिस्तु ईश्वरत्वादिधर्मोपहितप्रतियोगिकं भेदमवगाहते, न तु शुद्धब्रह्मप्रतियोगिकम्। अभावप्रत्यक्षे शुद्धस्य प्रति-

[1] व्यालापादि. [2] स्वविलक्षणचिदनपेक्षताकं. [3] कल्पना.

वाच्यम् ; तद्भेदस्यान्यानधीनापरोक्षत्वरूपधर्मानिरूपितत्वात् । जीवत्वेश्वरत्वादिरूपस्यान्यस्यैव धर्मस्य तन्निरूपकत्वात् ।

योगित्वेनाभाननियमात् । अतो न शुद्धब्रह्मण्युक्तहेतुरिति भावः । जीवत्वाद्युपहितस्य ब्रह्मणः शुद्धब्रह्मानुयोगिको भेदः नोक्तस्वप्रकाशत्वावच्छिन्नानुयोगिताकः, येन जीवत्वोपहितब्रह्मप्रतियोगिकत्वात् शुद्धब्रह्मप्रतियोगिकत्वमाशङ्क्येत । अतो न व्यभिचार[1] इत्याशयेनाह—**तद्भेदस्येति । धर्मानिरूपितत्वात्**—धर्मानवच्छिन्नानुयोगिताकत्वात् । ननु स्वप्रकाशो न जीव इत्यादिप्रत्यक्षसिद्धभेदप्रतियोगित्वं ब्रह्मण्यपीत्यत्राह—**जीवत्वेति । अन्यस्य** शुद्धब्रह्मान्यस्य । शुद्धान्यो यो जीवत्वादिधर्मः तस्य **तन्निरूपकत्वात्** उक्तभेदप्रतियोगितावच्छेदकत्वात् । तथाच तादृशभेदप्रतियोगित्वस्य स्वावच्छेदकधर्मसामानाधिकरण्यनियमात् उपहितस्य शुद्धातिरेकात् उपहित[2]वृत्तेः शुद्धवृत्तित्वे मानाभावेन शुद्धब्रह्मावृत्तित्वान्न व्यभिचार इति भावः । अथवा ननु स्वप्रकाशत्वविशिष्टकेवलब्रह्मरूपाभ्यां कल्पितभेदस्यावश्यकत्वात् तस्यानुयोगितावच्छेदकत्वं स्वप्रकाशत्वे प्रतियोगित्वं केवलब्रह्मणीत्यत आह—**जीवत्वेति । तन्निरूपकत्वात्** स्वप्रकाशत्वावच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वात् । तथाचोक्तभेदो यदि स्वप्रकाशत्वावच्छिन्नानुयोगिताकस्तदा जीवत्वाद्यवच्छिन्नप्रतियोगिताकत्वाज्जीवत्वाद्युपहितप्रतियोगिक एव स्यात् । न शुद्धब्रह्मप्रतियोगिकः ; उक्तभेदस्य प्रत्यक्षसिद्धत्वात्, प्रत्यक्षे अभावप्रतियोगितया शुद्धाभाननियमात् । अतः[3] शुद्धानुयोगिकः स्वप्रकाशत्वावच्छिन्नप्रतियोगिताको वाच्यः । तथाच तादृशभेदप्रतियोगित्वमादाय न व्यभिचारशङ्का, तादृशभेदस्यैव शुद्धस्वप्रकाशयोः तादात्म्याद्युपहिततया [4]स्वप्रकाशे शुद्धस्याप्रत्यक्षे भेदान्तरे मानाभावादिति भावः । न चैवं

[1] अतो व्यभिचार. [2] स्वोपहित. [3] नियमादरः [4] द्युपपादकतया.

एवंचावेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपं दृश्यत्वमपि हेतुः। न च फलव्याप्यत्वाभावविशिष्टं यदपरोक्षव्यवहारयोग्यत्वं तस्य ब्रह्मणीवाविद्यान्तःकरणादौ शुक्तिरूप्यादौ च सत्त्वेन असिद्धिसाधनवैकल्ये इति वाच्यम्; अज्ञाननिवर्तकवृत्तिविषयत्वयोग्यत्वस्य अपरोक्षव्यवहारयोग्यत्वपदेन विवक्षितभेदप्रतियोगित्वमात्रं हेतुरस्तु स्वावच्छेदकोपहित एव तत्सत्त्वात् न शुद्धब्रह्मणि व्यभिचार इति वाच्यम्; सत्यत्वादिरूपस्य ब्रह्मणः स्वधर्मतानिर्वाहाय कल्पितभेदस्य अस्वीकारमते शुद्धं ब्रह्म जगदुपादानमिति मते उपादानत्वान्यथानुपपत्त्या कल्प्यस्य भेदस्य च परोक्षबुद्ध्येकविषयत्वेनानवच्छिन्नप्रतियोगिताकस्य प्रतियोगित्वमादाय शुद्धब्रह्मणि व्यभिचारात्, प्रत्यक्ष एव किञ्चिदवच्छिन्नप्रतियोगिताकत्वेनाभावभाननियमात्, स्वप्रकाशत्वावच्छिन्नानुयोगिताकत्वेन प्रतियोगितासम्बन्धेन हेतुत्वे वैयर्थ्यानवकाशाच्च। स्वप्रकाशो न तद्व्यक्तिरिति धिया स्वप्रकाशो न स्वप्रकाश इत्याहार्यधिया वा स्वप्रकाशत्वोपहितेऽपि तद्व्यक्तित्वादिरूपेण तस्माद्भेदस्य सत्त्वात् न भागासिद्धिः। **एवञ्चेति**। यथाश्रुतमनादृत्य व्याख्यादरे चेत्यर्थः। **अवेद्यत्वे इत्यादि**। अवेद्यत्वसमानाधिकरणं यदपरोक्षव्यवहारयोग्यत्वं तदभाव इत्यर्थः। वेद्यत्वं स्वावच्छिन्नचैतन्यविषयकं यदभानापादकाज्ञानं तन्निवर्तकवृत्तिव्याप्यत्वरूपं फलव्याप्यत्वम्। तच्च न ब्रह्मणि, तदवच्छिन्नचैतन्याप्रसिद्धेः। नापि शुक्तिरूप्यादौ, तस्यातीततादशायां असत्त्वापादकाज्ञाननिवर्तकानुमित्यादिवृत्तिव्याप्यत्वेऽप्युक्ताज्ञाननिवर्तकवृत्त्यव्याप्यत्वात्। अनावृतसाक्षिसम्बन्धो नोक्त[1]व्यवहारयोग्यत्वम्, येनोक्तदोषः। किन्तु अभानापादकाज्ञाननिवर्तकवृत्तिविषयत्वयोग्यत्वम्। उक्तविषयत्वस्य अव्याप्यवृत्तित्वात् ब्रह्मण्यपि तदभावोस्तीत्यतो **योग्यत्वेति**। तच्चाभानापाद-

[1] सबन्धेनोक्त.

तत्वात्। तस्य चाविद्यादौ शुक्तिरूप्यादौ चासत्त्वान्नासिद्धि-साधनवैकल्ये। यथाच घटादेः फलव्याप्यत्वं तथाग्रे व-क्ष्यामः। अविद्यानिवृत्तेः पञ्चमप्रकारत्वाभ्युपगमपक्षे तत्र व्यभिचारवारणायाज्ञानकालवृत्तित्वं हेतुविशेषणं देयम्। तेनैव तुच्छेऽपि न व्यभिचारः। एवमेव सर्वेषु हेतुषु व्यभिचा-

---

काज्ञानविषयतदवच्छेदकान्यतरत्वम्। उक्तविषयत्वं ब्रह्मण्येव, उक्त-विषयावच्छेदकत्वं घटादावेव, न त्वविद्यादौ। अतीतत्वादिदशा-यामपि शुक्तिरूप्यादेः नाभानापादकाज्ञानविषयतावच्छेदकत्वम्। साक्षि-सम्बन्धाभावादेव तदा तदभानोपपत्तेः। न चाज्ञानविषयतदवच्छे-दकत्वयोरव्याप्यवृत्तितया तद्दोषतादवस्थ्यमिति वाच्यम्; तदव्या-प्यवृत्तित्वेऽपि तदवच्छिन्नभेदघटितान्यतरत्वस्य व्याप्यवृत्तित्वात्, ब्रह्म-घटादियत्किञ्चिद्व्यक्त्योरन्यतरत्वादेरव्याप्यवृत्तेरुक्तयोग्यतात्वसम्भवाच्च। अत्र मूलाज्ञानाविषयत्वावाच्छिन्नप्रतियोगिताक एकाज्ञानपक्षे तु चिन्मात्र-विषयकतद्धीविषयत्वावच्छिन्नप्रतियोगिताको भेदो लघुः हेतुर्बोध्यः[1]। **अज्ञानकालवृत्तित्वमिति**। अज्ञानाप्रयुक्तं सत् यज्जन्यं तदन्यत्वे सति कालसम्बन्धित्वमित्यर्थः। अज्ञाननाशकप्रयुक्तनाशप्रतियोगित्वादिकं ब्रह्मण्यपि नास्तीति दृश्यत्वभागवैयर्थ्यं, अतस्तन्नोक्तम्। न चोक्त-दृश्यत्वस्योक्तप्रतियोगित्वाभिन्नत्वाद्ध्वंसप्रागभाववत् न वैयर्थ्यमिति वाच्यम्; उक्तप्रतियोगित्वविशिष्टस्य दृश्यत्वघटकीभूतविशेष्यांशस्यैव हेतुत्वसम्भवेनेतरवैयर्थ्यात्। उक्तकालसम्बन्धित्वं तु ब्रह्मण्यपीति दृश्यत्वं सार्थकम्। सत्यन्तं तुच्छेऽपीति विशेष्यम्। तन्मात्रं पञ्चमप्र-कारेऽपीति सत्यन्तमुक्तम्। अज्ञानाप्रयुक्तं अज्ञानतल्लेशान्यतरतादा-त्म्यानापन्नम्। तेनाज्ञाननिवृत्तावपि प्रतियोगितया ज्ञानस्य प्रयोजक-त्वेऽपि न क्षतिः। जीवन्मुक्तभोगादिकमज्ञानानात्मकमपि तल्लेशा-

---

[1] हेतुरिति भेदः.

रपरिहाराय यतनीयम्। सद्विविक्तत्वमात्रे तु साध्ये तुच्छे पञ्चम-प्रकाराविद्यानिवृत्तौ च न व्यभिचारगन्धोऽपीति सर्वमवदातम्॥

इति दृश्यत्वनिरुक्तिः

त्मकम्। सर्वेष्वनुमानेषु साध्यस्यैव मिथ्यात्वलक्षणत्वाभिप्रायेण तुच्छ-व्यावर्तकं सत्त्वेन प्रतीत्यर्हत्वादिकं साध्ये दत्तम्। वस्तुतस्तु साध्ये तन्न देयम्, प्रयोजनाभावात्। अतो नोक्तव्यभिचार इति वस्तु-गतिमनुरुध्याह—**सद्विविक्तत्वमात्रे साध्य** इति। सतो विविक्तत्वं भेदो यत्र तन्मात्रे यत्साध्यं तस्मिन्नित्यर्थः। तदन्य[1]सकलसाधा-रणेषूक्तसाध्येष्विति यावत्। यत्तु—"ब्रह्मनिष्ठस्यान्यानधीनापरोक्ष-त्वस्य ब्रह्मातिरिक्तत्वे अविद्याधीनतया अन्यानधीनत्वमसम्भवि, ब्रह्मस्वरू-पत्वे तु तस्य घटादिनिष्ठभेदप्रतियोगित्वेऽपि घटादिनिष्ठत्वात् घटादि-निष्ठभेदप्रतियोगितानवच्छेदकत्वेन घटादावसिद्धिः। उक्तापरोक्षप्रति-योगिकभेदोक्तौ तादृशजीवप्रतियोगिकभेदवत्त्वात् ब्रह्मणि व्यभिचारः। घटादिर्नापरोक्ष इति धीकल्पितभेदमादाय ब्रह्मस्वरूपस्याप्यपरोक्षत्व-स्योक्तावच्छेदकत्वे पञ्चमप्रकाराविद्याध्वंसादौ व्यभिचारः। तद्वार-णायाज्ञानकालवृत्तित्वोक्तौ अविद्यानाशोत्तरजीवन्मुक्तभोगादावसिद्धिः। अविद्यालेशकालीनत्वोक्तौ घटादावसिद्धिः। क्रमिकसर्वमुक्तिपक्षे पञ्चमप्रकाराविद्यानाशादौ च व्यभिचारः, युगपत्सर्वमुक्तेः वामदेवा-दिमुक्तिबोधकागमविरोधेनाप्रामाणिकत्वात्। किंचापरोक्षत्वं जाति-विशेषो वा, तदाश्रयज्ञानविषयत्वं वा, तृतीयप्रकाराभावात्। उभ-यथाऽप्यन्यानधीनापरोक्षताकभिन्नत्वात् ब्रह्मणि व्यभिचारः। न हि ब्रह्म इन्द्रियजन्यमनोवृत्तिनिष्ठोक्तिजात्याश्रयः। न चोक्तवृत्तिविषयः। द्वितीयपक्षे अन्यानधीनापरोक्षत्वाप्रसिद्ध्या घटादावसिद्धिः। अपि-

---

[1] सदन्य.

चावेद्यत्वे सतीत्यादि न युक्तम्, वृत्तिमात्रस्याज्ञानानिवर्तकतया त्वन्मते घटादाविव ब्रह्मण्यप्यज्ञाननिवृत्त्यर्थं वृत्तिप्रतिबिम्बितचैतन्यस्यावश्यकत्वेन फलव्याप्यत्वात्। विशेषणाभावप्रयुक्तविशिष्टाभावः घटादाविव वृत्तौ चित्प्रतिफलनं न तु ब्रह्मणीत्यङ्गीकारे वृत्तेरज्ञानानिवर्तकत्वेनातीन्द्रियादाविव विशेष्याभावप्रयुक्तो विशिष्टाभाव इति ब्रह्मणि व्यभिचारो दुर्वारः। वृत्त्यन्यचैतन्यरूपज्ञानस्य मया अनङ्गीकारेणान्यतरासिद्धिश्च" इत्युक्तं, तत्तुच्छम्; उक्तव्याख्यानस्य निर्दोषत्वात्। किंच निरूपितपदस्यावच्छिन्नप्रतियोगिताकार्थकत्वमिति ते भ्रमः। तथा सत्युक्तभेदप्रतियोगित्वं ब्रह्मण्येवेति प्रपञ्चे तदसिद्धिं त्यक्त्वा पञ्चमप्रकारादौ व्यभिचार एव कथमुक्तः; चित्रं महदेतद्यद्वाक्यार्थमबुद्ध्वैव दूषणे प्रवृत्तिः। अपिच पञ्चमेत्याद्ययुक्तम्[1], सद्योमुक्तिपक्ष एवोक्तविशेषणादरात्। उक्तं हि संक्षेपशारीरकादौ—

सम्यक्ज्ञानविभावसुः सकलमेवाज्ञानतत्सम्भवं
सद्यो वस्तुबलप्रवर्तनमरुद्व्यापारसन्दीपितः।
निर्लेपेन हि दन्दहीति न मनागप्यस्य रूपान्तरम्
संसारस्य शिनष्टि तेन विदुषः सद्यो विमुक्तिर्ध्रुवा॥

इति। नापि प्रत्येकमुक्तिपक्षे दोषः, एकजीवपक्ष एव तथोक्तत्वात्। तस्यैव मुख्यसिद्धान्तत्वात् पक्षान्तराण्यपि संगृहीतान्येव। वामदेवादिमुक्तिशास्त्रं तु अर्थवादो देवताधिकरणन्यायेन प्रत्येकमुक्तिसाधकं वाच्यम्। न च तत्सम्भवति, मानान्तराविरोध एव तन्न्यायप्रवृत्तेः। प्रकृते च लाघवतर्कसनाथेभ्यः 'पुरत्रये क्रीडति यस्तु जीवः' इत्यादिश्रुत्यनुमानादिभ्यो जीवैकत्वसिद्धेः। किंचेत्याद्यपि न युक्तं, 'यत्साक्षादपरोक्षात्' इति श्रुत्युक्तब्रह्मापरोक्षत्वस्य तृतीयप्रकारत्वात्तस्य जातित्वे जन्यापरोक्षत्वस्येन्द्रियादिजन्यता-

[1] पञ्चमेत्यादि.

वच्छेदकत्वे गौरवात्, अपरोक्षत्वजात्याश्रयमानसविषयत्वस्य सुखादावपि सत्त्वेन तस्य ब्रह्मण्येवोक्तश्रुत्योक्त्यसम्भवात् अनावृतचिद्रूपत्वेन ब्रह्मणि तत्तादात्म्येन विषये तद्विषयकत्वेन वृत्तौ चापरोक्षत्वव्यवहारसम्भवेन अपरोक्षत्वजातावेव मानाभावात्। न च वृत्तिगतोक्तरूपस्येन्द्रियादिजन्यतावच्छेदकत्वे गौरवमिति वाच्यम्; चाक्षुषत्वादिना जन्यतावश्यकत्वेन चाक्षुषरासनादिसाधारण्येन तदस्वीकाकारात्। स्वीकारे वेन्द्रियत्वापेक्षया लघुना संयोगत्वादिनेन्द्रियं प्रतिज्ञानत्वादिना जन्यत्वसम्भवात्। परोक्षस्थलेऽपीन्द्रियसंयोगाद्यभावेऽपि न वह्न्यादौ कस्यचित्संयोगवतः संयोगादिसम्भवादव्यभिचारात्। अपिचेत्याद्यपि न युक्तम्—

स्वच्छेऽन्तःकरणे सति प्रसृमरे नेत्रादिमार्गोद्गते
तत्तद्ग्राह्यचया[1]त्मना परिणते बिम्बीभवन्ती चितिः।
एकाऽप्यर्थमनोविशेषकवशात् द्वैतं[2] प्रपन्ना हर-
त्यज्ञानं, प्रकटीकरोति विषयान्, ज्ञातं मयेदं त्विति॥

इत्यादिना सिद्धान्ते वृत्तौ प्रतिबिम्बितचिदङ्गीकारेऽपि सा स्वाश्रितमेवाज्ञानं हरतीति नियमः, न तु स्वविषयावच्छिन्नाश्रितं स्वविषयाश्रितमेव वा हरतीति। आद्ये प्रतिबिम्बितचैतन्यविषयघटाद्यवच्छिन्नचिदाश्रितस्य पल्लवाज्ञानस्य नाशसम्भवेऽपि मूलाज्ञाननाशासम्भवात् ब्रह्मणः प्रतिबिम्बितचिद्विषयत्वेऽपि मूलाज्ञानस्य तदवच्छिन्नानाश्रितत्वात्। द्वितीये पल्लवाज्ञानस्याप्युक्तचिद्विषयघटाद्यनाश्रितत्वेन नाशासम्भवात्। किंच ब्रह्मज्ञानस्य जातिविशेषादिनैव अज्ञाननिवर्तकतावश्यकत्वस्योक्तत्वात् नाज्ञाननिवृत्त्यर्थं ब्रह्मणः फलव्याप्यत्वोक्तिः युक्ता। वृत्त्यन्येत्यादिरोदनं तु सुखादिस्थले वृत्तिकल्पनागौरवमोक्षस्वप्रकाशत्वावश्यकत्वादिना परिहृतमेव। न च

[1] ग्राह्यतया. [2] भेदं.

जडत्वनिरुक्तिः

जडत्वमपि हेतुः। ननु किमिदं जडत्वं? अज्ञातृत्वं वा? अज्ञानत्वं वा? अनात्मत्वं वा? नाद्यः; त्वन्मते पक्षे निक्षिप्तस्यैव अहमर्थस्य ज्ञातृत्वात्तत्रासिद्धेः; शुद्धात्मनोऽज्ञातृत्वेन तत्र व्यभिचाराच्च । नापि द्वितीयः; वृत्त्युपरक्तचैतन्यस्यैव ज्ञानत्वेन केवलाया वृत्तेः केवलस्य चैत-

---

वृत्तिः सुखादौ मयाऽपि नोच्यते, वृत्तिसाक्षिणोः ज्ञानत्वादिजातिस्वीकारेण मन्मते 'घटं जानामि, सुखं जानामि' इत्याद्यनुगतव्यवहारसम्भवादिति वाच्यम्; अनुगतव्यवहारस्यैकव्यक्तिविषयकत्वासम्भवे सत्येवैकजातीयविषयकत्वस्वीकारात्। मन्मते असत्त्वापादकाज्ञानविरोधिचैतन्यव्यक्तेरेव जानामीति व्यवहारप्रयोजकत्वात्। न चाज्ञानतद्विरोधित्वयोः कल्पने गौरवमिति वाच्यम्; ज्ञानप्रागभावस्थले अज्ञानस्वीकारात्, मूलाज्ञानस्यैव घटाद्यवच्छिन्नाचिदावरकत्वपक्षे अज्ञानस्य वृत्त्या नाशास्वीकारेणागौरवात्। वृत्त्यभावविशिष्टं यदज्ञानं तदभावविशिष्टचिद्व्यक्तेरेव जानामीति व्यवहारप्रयोजकत्वात्। दृष्टिसृष्टिपक्षे केवलचिद्व्यक्तेरेव तत्त्वसम्भवात् वृत्त्यकल्पने नातिलाघवात्। विस्तरः प्रतिकर्मव्यवस्थायां भविष्यति॥

सारस्वतैस्तर्करत्नैश्चन्द्रिकाचन्द्रतां गतैः।
दुरन्तध्वान्तखण्डानां खाण्डिता दृश्यताहुतिः॥

इति दृश्यत्वनिरुक्तिः.

वृत्त्युपरक्तेति । सुखादावपि सुखादिरूपवृत्त्युपरक्तचैतन्यमेव ज्ञानमिति भावः । **केवलाया इति** । जडत्वादित्यादिः । **केवलस्येति** । वृत्त्यभावकाले घटं जानामीत्यापत्तेरित्यादिः । मोक्षे

न्यस्य चाज्ञानत्वेन वृत्तावसिद्धिपरिहारेऽपि चैतन्ये व्यभिचारतादवस्थ्यात्। नापि तृतीयः; आत्मत्वस्यैव निरूपयितुमशक्यत्वात्। तद्धि न जातिविशेषः; त्वया आत्मनएकत्वाभ्युपगमात्। विशिष्टात्मनां भेदेऽपि तेषां पक्षकुक्षिनिक्षिप्तत्वात्। नाप्यानन्दरूपत्वम्, वैषयिकानन्दे तद्व्यतिरेकस्य हेतोरसिद्धेः। तस्याप्यात्मत्वे अज्ञान[1]पक्षोक्तदोषः प्रसञ्जनीय इति चेत्, मैवम्; द्वितीयतृतीयपक्षयोः दोषाभावात्।

तु न ज्ञानपदवाच्यं किन्तु लक्ष्यमिति भावः। **अज्ञानपक्षोक्तेति**। विषयेसवाजन्यवृत्त्युपरक्तचैतन्यस्यैवानन्दत्वेन केवलचैतन्ये व्यभिचार इति भावः। केवलवृत्तिचितोरिव वृत्त्युपरक्तचितोऽपि न ज्ञानत्वम्। पटाकारवृत्तिकाले घटं जानामीत्यापत्त्या तदाकारवृत्त्युपरक्तचित एव तज्ज्ञानत्वात्, सुखाद्याकारवृत्त्यभावेन सुखादि जानामित्यस्य असम्भवात्। किन्तु तदीयस्यासत्त्वापादकाज्ञानस्य विरोधिचितः तज्ज्ञानत्वं तदीयत्वं च स्वावच्छिन्नचिद्विषयताविषयितान्यतररूपः तत्सम्बन्धः ब्रह्मणः स्वावच्छिन्नचिद्विषयितायाः घटादेश्च स्वविषयितायाः अज्ञाने अप्रसिद्ध्या अन्यतरनिवेशः सुखादेश्चातीतत्वादिदशायां स्वावच्छिन्नचिद्विषयताकाज्ञानं प्रसिद्धम्। अन्यथा तत्र भ्रमादिकार्यानुपपत्तेः अभानापादकाज्ञानसत्त्वेपि परोक्षवृत्तिकाले घटं जानामीत्यनुभवादसत्त्वापादकेति। ज्ञाधातोः शक्यता तु लाघवाच्चिद्व्यक्तावेव निरवच्छिन्ना शक्यनानात्व एवानुगमार्थ[2] अवच्छेदकस्वीकारात्। घटं जानातीत्यादिवाक्यजन्यबोधे उक्ताज्ञानविरोधित्वसम्बन्धेन घटादेर्ज्ञाधात्वर्थे अन्वये निर्धर्मितावच्छेदकशाब्दबोधः प्रकृते स्यादेव[3]। घटत्वाद्यवच्छिन्नविशेष्यताकस्य बाधप्रतिबध्यस्य योग्यताज्ञानस्य घटः

---

[1] ज्ञान. [2] निरवच्छिन्नाशक्यता न त्ववच्छिन्नानुगत्यर्थं. इति. पा. [3] स्यात्। एवं.

तथाहि—अज्ञानत्वं जडत्वमिति पक्षे नात्मनि व्यभिचारः, अर्थोपलक्षितप्रकाशस्यैव ज्ञानत्वेन मोक्षदशायामपि तदनपायात्। न चाभावे सप्रतियोगित्ववदिच्छाज्ञानादिष्वपि सविषयकत्वस्य स्वाभाविकत्वादिच्छायामिव ज्ञानेऽपि तस्य समानसत्ताकत्वमिति वाच्यम्; ज्ञानस्य हि सविषयत्वं विषयसम्बन्धः। स च न तात्त्विकः, किन्त्वाध्यासिकः, वक्ष्यमाणरीत्या तात्त्विकसम्बन्धस्य निरूपयितुमशक्यत्वात्। अतो न तस्य स्वाभाविकत्वम्। न हि शुक्तौ

स्ववृत्त्यभावप्रतियोग्यसत्त्वापादकाज्ञानविषयतावच्छेदकत्वसम्बन्धेन चिद्विशिष्ट इत्याकारकस्य हेतुत्वसम्भवात् चिदाश्रयत्वे आख्यातार्थे वा व्युत्पत्तिवैचित्र्यादन्वयः[1]। अथवा शक्तिज्ञानस्य चिद्विषयकशाब्दत्वेनैव कार्यता। घटं जानामीत्यादिसमभिव्याहारधीकार्यता तु घटाद्यज्ञानविरोधिचित्त्वावच्छिन्नप्रकारताकशाब्दत्वेनैवेति न निर्धर्मितावच्छेदकशाब्दधीः। आकाशादिपदवन्निरवच्छिन्नशक्यतामते तादृशरीतेरावश्यकत्वात्। न चैवं 'सत्यं ज्ञानम्' इत्यादौ लक्षणया शुद्धचिद्बोधसिद्धान्तहानिरिति वाच्यम्; विशिष्टचिद्बोधस्यौत्सर्गिकत्वेन शुद्धचिद्बोधमात्रे शक्तिज्ञानस्य प्रतिबन्धकत्वकल्पनात्, विशिष्टरूपेण बोधाभावमात्रे लक्षणेति भाक्तव्यवहाराच्च। अन्यथा विशिष्टशक्तिपक्षेऽपि शुद्धे शक्त्यनपायात्। न चैवमपि ज्ञानानन्दादिपदानां पर्यायतापत्तिरिति वाच्यम्; आनन्दादिपदानां तुल्ययुक्त्या शुद्धचिच्छक्तत्वेऽपि चन्दनानन्द इत्यादौ चन्दनसेवाजन्यवृत्तिविशेषस्य सम्बन्धत्वादिना भाननियमेन तावता विशेषेण पर्यायतावारणसम्भवादित्याशयेनाह—**अर्थोपलक्षितप्रकाशस्येति**। शुद्धचित इत्यर्थः। **ज्ञानत्वेन**—ज्ञानपदार्थ-

---

[1] वैचित्र्यादयः.

रूप्यं स्वाभाविकम् । एवंच ज्ञानोपाधिकस्यैव सविषयत्वस्य इच्छादिष्वभ्युपगमात् नसुतरां तत्र तस्य स्वाभावि-

त्वेन । यद्वा उक्तविरोधित्वोपहितचित्त्वेनैव ज्ञाधातुशक्यता । घटज्ञानविरोधित्वपटाज्ञानविरोधित्वादिरूपेण नानार्थकत्वं तु इष्टमेव । घटज्ञानमित्यादौ घटादिपदं तात्पर्यग्राहकम् । यत्किञ्चिदज्ञानविरोधिचित्त्वेनैव वा तथा । असत्त्वापादकाज्ञानास्वीकारमते अनावृततत्तादात्म्यं तद्गोचरवृत्तिश्चेत्यन्यतरोपहितचित्त्वेनैव तथा । नानार्थत्वास्वीकारे तदिति तद्गोचरेति च न देयम् । तादात्म्ये तदीयत्वं वृत्तौ तद्विषयकत्वं च शाब्दबोधे संसर्गतया भासते । एवं नित्यानन्दादिपदानामपि बोध्यम् । त्रिकालापरिच्छिन्नचित्त्वेन नित्यपदस्य चन्दनादिसेवाजन्यवृत्तिविशेषाद्यवच्छिन्नचित्त्वेनानन्दपदस्याबाध्यत्वाद्यपहितचित्त्वेन सत्यादिपदस्य शक्यता । एवंच ज्ञानत्वेनेत्यस्य प्रकृते हेतूकृतभेदप्रतियोगित्वेनेत्यर्थः । ज्ञाधातुवाच्यत्वोपलक्षितव्यक्तिभेदो हेतुरिति भावः । न च तद्व्यक्तित्वेन तद्व्यक्तेः भेदो हेतुः, तद्व्यक्तित्वं च तद्व्यक्तिरेव; तथा च तस्याः सिद्धान्ते स्वकीये विशिष्टरूपे कल्पिततादात्म्यसत्त्वेऽपि शुद्धरूपे तदभावेन तादृशभेदसम्भवात् व्यभिचारः, प्रपञ्चे तद्व्यक्तितादात्म्यस्य तदा[1] सत्त्वेनासिद्धिश्चेति[2] वाच्यम् ; परमते शुद्धेपि तद्व्यक्तेरैक्यरूपसम्बन्धस्य स्वस्मिन् सत्त्वेन परार्थानुमाने ऐक्यरूपसम्बन्धेन तद्व्यक्तिविशिष्टप्रतियोगिकभेदस्य हेतुत्वसम्भवात्, विशेष्यतावच्छिन्नप्रतियोगिताकभेदत्वेन हेतुत्वस्याचार्यैरेव वक्ष्यमाणत्वाच्च । सत्यत्वादिरूपे स्वधर्मतानिर्वाहकभेदस्य शुद्धब्रह्मणि स्वीकारमतेऽपि तस्याप्रत्यक्षत्वेन तत्प्रतियोगितायाः निरवच्छिन्नत्वात्, तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्य तद्व्यक्ता[3]वस्वीकारेणादोषाच्च तद्व्यक्तिवृत्तिभेदभिन्नभेदो वा हेतुः । **ज्ञानोपाधिकस्य** सविषयकज्ञानतादात्म्यरू-

[1] सदा. [2] नासिद्धिर्वेति. [3] तद्वृत्ता.

कत्वम्। न चैवं ज्ञानवत् विषयसम्बन्धं विनापि कदाचिदिच्छायास्सत्त्वापत्तिरिति वाच्यम्, सविषयत्वप्रयोजकोपाध्यपेक्षया अधिकसत्ताकत्वस्य तत्र प्रयोजकत्वात् इच्छायाश्च तत्समानसत्ताकत्वात्। न च त्वया मोक्षावस्थायामात्मनो निर्विषयत्वाङ्गीकारात् आनन्दप्रकाशे तदपुमर्थत्वं स्यादिति वाच्यम्; तदा ह्यानन्द एव प्रकाशो न त्वानन्दस्य प्रकाशत्वम्। अर्थोपलक्षितप्रकाशत्वं वा तदास्त्येवेति न ज्ञानत्वहानिरित्युक्तम्। ननु तथापि ज्ञातुरभावात् तदा तन्न ज्ञानम्। न हि भोक्तृहीना भुजिक्रिया भवति। न चानादित्वेन क्रियारूपत्वाभावात् अनपेक्षत्वमिति वाच्यम्; अनादेः प्रागभावस्य प्रतियोगिनि, जातेर्व्यक्तौ, जीवब्रह्मविभागस्य धर्मिप्रतियोगिनोरज्ञानस्य चाश्रयविषययोः, ब्रह्मसत्तायाश्च कर्तर्यपेक्षादर्शनात्। अन्यथा 'अस्ति ब्रह्म' इत्यादौ कर्तरि लकारो न स्यात्। एवंचातीतादिज्ञानस्य ईश्वरज्ञानस्य च

पस्य ज्ञाने उक्तविरोधित्वादिविषयस्य[1] सम्बन्धः। इच्छादिषु तु स्वनिष्ठमुक्तविरोधित्वादिमज्ञान[2]तादात्म्यमिति भावः। अथवा ज्ञानोपाधिकस्येति। ज्ञानोपाध्यविद्याप्रयुक्तस्येत्यर्थः। न तरामिति। तात्त्विकेऽपि ज्ञानस्वरूपे यदि तन्न तात्त्विकं तर्हि अतात्त्विकेच्छादौ तत्तथा न तरामित्यर्थः। एवंच मनोवृत्तिमात्रस्यातिरिक्तविषयतास्वीकारेपि न क्षतिः। नन्वानन्दसम्बन्धिप्रकाशस्य तदा विरहे आनन्दाप्रकाशः स्यात् दुःखादिसम्बन्धाभावकाले साक्षिणि दुःखाद्यप्रकाशवत्तत्राह— प्रकाशत्वमित्यादि। प्रकाशत्वं अप्रकाशरूपाज्ञानसामान्यविरोधिस्वरूपम्। अर्थोपलक्षितप्रकाशत्वं आनन्दावारकाप्रकाशविरोधिस्वरू-

---

[1] त्वादिर्विषयस्य. [2] विरोधित्वादिदमज्ञान.

उत्पत्त्यर्थमर्थानपेक्षत्वेऽपि तन्निरूप्यत्वदर्शनेन ज्ञानस्य ज्ञातृ-ज्ञेयनिरूप्यत्वं स्वभावः। अन्यथा 'इदमहं जानामि' इत्य-नुभवो न स्यात्। 'ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात्' इति विव-रणविरोधश्च स्यादिति चेन्न; जातेर्व्यक्तिनिरूप्यत्वेऽपि कदा-चित्तदसम्बन्धवदुपपत्तेः सम्बन्धप्रयोजकोपाध्यपेक्षया अधि-कसत्ताकत्वात्। अतएव ज्ञानस्य सज्ञेयत्वं सज्ञातृत्वं च न स्वाभाविकम्। तथाहि— सज्ञेयत्वं तावत् ज्ञेयजन्यत्वं वा ज्ञेयव्याप्यत्वं वा। नाद्यः, परोक्षज्ञाने ईश्वरज्ञाने चाभावात्। नापि द्वितीयः; 'यदा ज्ञानं तदार्थः' इति कालिकव्याप्तौ पूर्ववत् व्यभिचारात्। दैशिकव्याप्तिस्तु दूरनिरस्तैव। न च 'यदा अपरोक्षज्ञानं तदार्थः' इति कालिकव्याप्तौ नास्ति व्यभिचारः, आत्मा च 'यत्साक्षादपरोक्षाद्ब्रह्म'. इति श्रुतेरप-रोक्षज्ञानरूप इति सोप्यर्थव्याप्त इति वाच्यम्; ईश्वरज्ञाने योगिज्ञाने च व्यभिचारात्। 'यदैन्द्रियकं ज्ञानं तदार्थः' इति तु व्याप्तिस्सर्वसम्मता। न चात्मरूपे ज्ञाने ऐन्द्रियकत्व-मस्तीति न तया विरोधः।

पम्। अखण्डाकारवृत्त्युपलक्षितचिद्रूपस्यैवोक्तविरोधित्वरूपत्वादिति भावः। ज्ञानत्वहानिः—आनन्दाप्रकाशापत्तिः। उक्तमिति। सविषयक-त्वस्य अतात्त्विकतोक्त्या अखण्डाकारवृत्त्युपलक्षितचिद्रूपस्याज्ञानतत्प्रयु-क्तसामान्यविरोधित्वमुक्तमित्यर्थः। सम्बन्धप्रयोजकोपाधीति। ज्ञातृ-ज्ञेयसम्बन्धप्रयोजकविद्योपाधीत्यर्थः। यदा ज्ञानं तदार्थ इति। यदा यस्यार्थस्य ज्ञानं तदा सोर्थ इत्यर्थः। तेन वक्ष्यमाणव्यभिचारसङ्गतिः। दूरेति। अन्तःकरणादौ ज्ञानवत्यपि साक्षात्सम्बन्धेन तद्विषयघटाद्यस-त्त्वात्परम्परासम्बन्धेन व्यापकत्वस्य यद्यत् ज्ञानं तत्र तादात्म्येनार्थ इति व्याप्तेश्चास्माकमिष्टत्वाच्चेति भावः। सर्वसम्मतेति। यदा यदर्थेन्द्रि-

ननु 'यदा अपरोक्षं ज्ञानं तदाऽर्थः' इति व्याप्त्यनभ्युपगमे 'इदं रजतम्' इत्यपरोक्षज्ञानान्यथानुपपत्त्या अनिर्वचनीयतासिद्धिर्न स्यात् । अर्थं विनाप्यपरोक्षत्वोपपत्तेरिति चेन्न; 'इदं रजतमहं जानामि' इति अनुसन्धीयमानं यत् ज्ञानविषयत्वं तस्य आश्रयान्तरानुपपत्त्या अनिर्वचनीयरजतासिद्धेर्वक्ष्यमाणत्वात् । अतएव परोक्षभ्रमेऽपि अनिर्वचनीयार्थासिद्धिः । अन्यापरोक्षत्वेन वा अर्थव्याप्यता, आर्षज्ञानस्यापरोक्षत्वानभ्युपगमात् । तथाच नानिर्वचनीयरजतसिद्ध्यनुपपत्तिः । एवं सज्ञातृकत्वमपि किं ज्ञातृजन्यत्वं? ज्ञातृव्याप्यत्वं? ज्ञातृसमवेतत्वं वा? आद्ये ईश्वरज्ञाने व्यभिचारः । ज्ञाननित्यत्वस्य साधयिष्यमाणत्वाच्च । द्वितीयेऽपि अप्रयोजकता । न तृतीयः; ज्ञातृजन्यत्ववत् ज्ञातृसमवेतस्यापि सम्भवात्, ज्ञानस्य गुणत्वक्रियात्वयोरनभ्युपगमेन द्रव्याश्रयत्वानुमानायोगात् । कदाचित् ज्ञातृज्ञेयसम्बन्धेनैव अनुभवस्य विवरणवाक्यस्य च

ययोः लौकिकसन्निकर्षजन्यज्ञानं तदा तदर्थ इति सर्वसम्मतेत्यर्थः । **वक्ष्यमाणत्वादिति**—"देशान्तरीयस्य साक्ष्यसम्बन्धेनापरोक्षतानुपपत्तेरपरोक्षज्ञानमादाय जानामीति न स्यात् । कालान्तरे तस्य साक्षिसम्बन्धेऽपि वर्तमानकालावच्छेदेन अपरोक्षानुपपत्तेः । देशान्तरीये सन्निकर्षाभावेन प्रत्यक्षासम्भवात्, अलौकिकसन्निकर्षनिरासात् प्रतीतिमात्रे यादृशं भासते तादृशमवश्यं वाच्यम्; प्रतीतेः स्वविषयशूरत्वात् । अन्यथा घटादावपि रूपादिवैशिष्ट्यं व्यावहारिकं न स्यात्, पश्चात् बाधस्य तत्रापि सत्त्वात् । इदानीं बाधात्परं शुक्त्यादौ रजतादिवैशिष्ट्यं प्रातीतिकम् । भ्रमस्थले दोषादिकार्यता रजतत्वादिना; न तु रजतज्ञानत्वादिना, गौरवात्" इत्यादियुक्तेः वक्ष्यमाणत्वादित्यर्थः । **आर्षज्ञानस्येति** । इन्द्रियसन्निकर्षादिरूपकलक्षसकारणबाधात् तत्प्रत्यक्षादिभिन्नं,

उपपत्तेः। 'अस्ति ब्रह्म' इति च लकारो न ब्रह्मसत्तां प्रति ब्रह्मणः कर्तृत्वमाह, नित्यत्वेन तदसम्भवात्। किन्तु साधुत्वार्थ इति द्रष्टव्यम्। ननु प्रमाभ्रमभिन्नं न ज्ञानम्, न चात्मस्वरूपं ज्ञानं प्रमा, तद्विषयस्याविद्यादेः तात्त्विकत्वापातात्। न च अप्रमा, दोषजन्यत्वापातादिति चेन्न; तार्किकसिद्धेश्वरज्ञानवत् घटादिनिर्विकल्पकवच्च स्वभावतः उभयवैलक्षण्येनाप्युपपत्तेः। तत्रापि ईश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वस्य, भ्रमत्वे दोषजन्यत्वस्य चापत्तेः। निष्प्रकारके च निर्विकल्पके तद्वति तत्प्रकारकत्वस्य, तदभाववति तत्प्रकारकत्वस्य च अनुपपत्तेः। जन्यसविकल्पकत्वेन भ्रमप्रमान्यतरत्वानियमे च अस्माकं क्षत्यभावात्। विलक्षणवृत्तिद्वयोपरागेण च स्वभावतो भ्रमप्रमाविलक्षणस्याप्यात्मज्ञानस्य तदुभयरूपेण व्यवहारोपपत्तेः। न च ज्ञानपदवाच्यभिन्नत्वविवक्षायां उपाधेरपि

पूर्वं तु परमतेन तत्प्रत्यक्षत्वमुक्तमिति भावः। **साधुत्वेति**। मणिकारादिमते जानातीत्यादाविव कर्तृत्वानभिधानम्। वर्तमानकालभानं तु अखण्डार्थतात्पर्याभावे स्वीक्रियत इति भावः। **विलक्षणवृत्तीति**। प्रमाभ्रमरूपवृत्तीत्यर्थः। सुखाद्यवच्छिन्नचैतन्यस्यापि घटाद्याकारवृत्त्या तथात्वम्। सुखाद्यंशे च प्रमाभ्रमाविलक्षणत्वमिष्टं, अज्ञाताविषयकत्वात् स्मृतिवत्। आगन्तुकदोषाजन्यत्वादीश्वरज्ञानादिवदिति भावः। अथवा वृत्तेरेव मुख्यप्रमात्वादि, चैतन्ये तूपचारात्तद्व्यवहार इत्याह—**विलक्षणवृत्तिद्वयोपरागेणेति**। बाधकवृत्तिघटितं यत् बाधितविषयकत्वं तदन्यविषयकत्वरूपं द्वयं तदुपरागेणेत्यर्थः। तथाचाबाधितबाधितविषयकत्वाभ्यां चैतन्ये प्रमात्वभ्रमत्वोपचार इति भावः। वस्तुतस्तु वृत्ताविव व्यावहारिकप्रमात्वस्य घटाद्यवच्छिन्नचैतन्ये स्वीकारेऽपि न क्षतिः, तेन रूपेण गुणजन्यत्वस्य सत्त्वात्। अविद्यावच्छिन्ना

ज्ञानपदवाच्यत्वात्तत्रासिद्धिः, ज्ञानपदलक्ष्यभिन्नत्वविवक्षायां तु घटादेरपि ज्ञानपदलक्ष्यत्वात् तत्राप्यसिद्धिरिति वाच्यम्; ज्ञानपदजन्यप्रतीतिविशेष्याभिन्नत्वविवक्षायामुक्तदोषाभावात् । एवमानन्दभिन्नत्वरूपमनात्मत्वमुपपाद्यम्; वैषयिकानन्दस्यापि ब्रह्मरूपत्वात्, तदुपाधिमात्रस्यैवोत्पत्तिविनाशप्रतियोगित्वात् । न च ज्ञानाभिन्नत्वस्य आनन्दाभिन्नत्वस्य च काल्पनिकस्य ब्रह्मणि सत्त्वात् तत्र व्यभिचार इति वाच्यम्; धर्मिसमसत्ताकत्वेदस्य हेतुत्वात् । अनौपाधिकत्वेन वा भेदो विशे-

---

चित्तु न प्रमा, अज्ञाता[1]गोचरत्वात् । [2]जीवेशभेदादेरनादित्वेऽपि तदवच्छिन्ना चित् आवरणभङ्गकवृत्तिविशिष्टतया गुणजन्यैव । शुक्तिरूप्यावच्छिन्नरूपेण तु चित् आगन्तुकदोषजन्यैव । शुद्धरूपेण तु सा प्रमा भ्रमो वा नेति न कोपि दोषः । **ज्ञानपदवाच्येति** । शक्त्या ज्ञाधातुजन्यप्रतीतिविषयेत्यर्थः । तेन शुद्धवाच्यतापक्षे उपाधेरवाच्यत्वेऽपि उपाधेरित्यादेः नासङ्गतिः । **विशेष्याभिन्नत्वस्य** शुद्धब्रह्मनिष्ठतद्धीविशेष्यताव्यक्त्यवच्छिन्नप्रतियोगिताकभेदस्य । तेन घटादेरपि तादृशविशेष्यत्वेऽपि नासिद्धिः, गुरोरनवच्छेदकत्वेऽपि न वा क्षतिः । **तदुपाधीति** । विषयसेवाजन्यवृत्तिविशेषेत्यर्थः । नन्वव्याप्यवृत्तिविशेष्यत्ववद्भेदस्य अव्याप्यवृत्तित्वपक्षे ब्रह्मणि व्यभिचारः । न च ब्रह्मण आवृतत्वेन तत्र भेदस्य प्रत्यक्षतया तत्प्रतियोगिता अवच्छिन्नेति वाच्यम्; जीवन्मुक्तौ तत्प्रत्यक्षतासम्भवादिति शङ्कते—**न चेति** । **ज्ञानाभिन्नत्वस्य**—ज्ञानपदजन्यतद्धीविशेष्याभिन्नत्वस्य । **आनन्दाभिन्नत्वस्य**—आनन्दपदजन्यतद्धीविशेष्याभिन्नत्वस्य । **धर्मिसमसत्ताकेति** । शुद्धब्रह्मवृत्तिभिन्नेत्यर्थः । विशेषणतया शुद्धब्रह्मवृत्ति यत् तदन्यत्वेन विशेषणतया हेतुत्वसम्भवात् विशेष्यांशवैयर्थ्यादाह—**अनौपाधिकत्वेनेति** ।

---

[1] अज्ञाना. [2] जीवेशभेदा.....गुणजन्यैव. नास्त्यतत्कोशान्तरे.

षणीयः। तुच्छे पञ्चमप्रकाराविद्यानिवृत्तौ च व्यभिचारपरिहारः पूर्ववत्। एवमस्वप्रकाशकत्वं वा जडत्वम्। तच्च पूर्वमेवोपपादितमिति शिवम्॥

इति जडत्वहेतूपपत्तिः.

उपाधिं स्वप्रतियोगितावच्छेदकं अर्हति तत्समानाधिकरणं भवतीत्यौपाधिकम्। तदन्यत्वेन स्वप्रतियोगिवृत्तिभिन्नत्वेनेति यावत्। घटादिभेदमादाय ब्रह्मणि व्यभिचारात् शुद्धब्रह्मप्रतियोगिकभेदेति विशेष्यं वाच्यमिति भावः। शुद्धब्रह्मणो ज्ञानपदजन्यतद्धीविशेष्यत्वेन आनन्दपदजन्यतद्धीविशेष्यत्वेन च निवेशाद्धेत्वोर्भेदः। तादृशविशेष्यताव्यक्त्यवच्छिन्नप्रतियोगिताकभेदत्वेन वा निवेशः। तेन स्वरूपतो ब्रह्मव्यक्तिनिवेशसम्भवेन तादृशविशेष्यताघटितस्य न व्यर्थविशेषणत्वशङ्केति ध्येयम्। यत्तु—"यदि ज्ञानस्य विषयेणाध्यासिकः सम्बन्धस्तर्हि चरमवृत्तावात्मा विषयो न स्यात्। न च वृत्तिप्रतिबिम्बितचैतन्यरूपस्य ज्ञानस्य विषयेणाध्यासिकः सम्बन्ध इति वाच्यम्; चरमवृत्तावपि अज्ञाननिवर्तकत्वाय चित्प्रतिबिम्बावश्यकत्वात्। तादृशप्रतिबिम्बिताच्चितः आध्यासिकसम्बन्धरूपविषयत्वस्यात्मन्यङ्गीकारे फलव्याप्यत्वहेतोः तत्र व्यभिचारात्। परोक्षवृत्तौ चातीन्द्रियं विषयो न स्यात्, तत्र तस्यानध्यासात्। तस्मात् ज्ञाने विषयसम्बन्धः स्वाभाविकः। एवमिच्छायामपि उपाध्यनुल्लेखेन घटमिच्छामीत्यनुभवात् जातेर्व्यक्तिनिरूप्यत्वेऽपीत्याद्यपि न युक्तम्; व्यक्तिं विना प्रलये जातिसत्त्वेऽपि व्यक्त्युपरक्तधीविषयत्वं जातेरन्यदस्त्येवेति जात्यादेः व्यक्त्याद्यनुपरक्तबुद्ध्यविषयत्वस्य व्यक्त्याद्यनुपरक्तप्रत्यक्षाविषयत्वस्य वा नियमवत् ज्ञेयाद्यनुपरक्तबुद्ध्यविषयत्वस्य ज्ञेयाद्यनुपरक्तप्रत्यक्षाविषयत्वस्य वा ज्ञाने नियमसम्भवात्। किंचैवमैक्यं जीवस्य

ब्रह्मणि न स्यात्। ऐक्ये जीवस्य हि जन्यत्वं व्याप्यत्वं वा सबन्धः। नाद्यः; तस्य ब्रह्मरूपत्वेनाजन्यत्वात्। नान्त्यः; यदा ऐक्यं तदा जीव इत्यत्र सर्वमुक्तौ व्यभिचारात्। यत्रैक्यं तत्र जीव इति दैशिकव्याप्तौ जीवे व्यभिचारात्। 'अस्ति ब्रह्म' इत्यत्र लकारो न पदसाधुत्वार्थः; योगक्षेमसाधारणीं सत्ताक्रियासिद्धिं प्रति स्वातन्त्र्यरूपकर्तृत्वस्य तत्रापि संभवेन अर्थसाधुत्वसम्भवात्। तार्किकेश्वरज्ञानवदित्याद्यपि न युक्तम्; तार्किकमते हि प्रमात्वं न गुणजन्यतावच्छेदकं, येन ईश्वरज्ञाने न स्यात्। किन्तु तत्तत्प्रमात्वम्। उक्तं हि मणिकारैः—'प्रमामात्रे नानुगतो गुणः' इति। तथाच दोषाजन्यत्वादीश्वर[1]ज्ञानं प्रमैवेति नोभयबहिर्भावः। अतएव नित्यसाक्षात्कारप्रमाया आश्रयत्वेन ईश्वरः प्रत्यक्षप्रमाणमित्युक्तमुदयनाचार्यैः। तद्वति तत्प्रकारकज्ञानत्वं न मुख्यप्रामाण्यं, स्मृतौ सत्त्वात् निर्विकल्पके चासत्त्वात्। किन्तु विशेष्यावृत्त्यप्रकार[2]कानुभवत्वमित्युक्तमन्यैस्तार्किकैः; अतो निर्विकल्पकमपि प्रमैवेति चैतन्यस्य ज्ञानत्वे प्रमाभ्रमान्यतरत्वमावश्यकम्" इति, तत्तुच्छम्; ज्ञानस्याध्यासिकसम्बन्धनियमोक्तौ वृत्तौ व्यभिचारोक्त्यसङ्गतेः। वृत्तेरज्ञानत्वात्, वृत्तेरात्मनाऽऽध्यासिकसम्बन्धस्यापि सत्त्वात्। अहंकारोपहितात्मनि तदध्यासे केवलात्मन्यप्यध्यासात्। अन्यथा जन्यमात्रोपादानत्वभङ्गापत्तेः। आत्मनि च फलव्याप्यत्वहेतुर्यथा नास्ति तथोक्तमस्माभिः। परोक्षेत्याद्यपि न युक्तम्; वृत्तेरज्ञानत्वात् परोक्षवृत्तिस्थले साक्षिणि वह्न्यादेरज्ञानविरोधित्वादिरूपोक्तसम्बन्धस्य अतात्त्विकत्वात्। अतात्त्विकस्यैवाध्यासिकशब्देनोक्तत्वात्। कल्पिततादात्म्यस्य आध्यासिकशब्दार्थत्वे तादात्म्यरूपत्वे निरूपयितुमशक्यत्वादिति हेत्वनुपपत्तेः। घटमिच्छामीत्यत्र च प्रकारतया ज्ञानरूपोपाधि-

[1] त्वादिदं. [2] विशेष्यावृत्तिप्रकार.

सम्बन्धस्यानुल्लेखेऽपि सम्बन्ध[1]तया तदुल्लेखानपायात्। अन्यथा सम्बन्धान्तरकल्पने गौरवात् । अतिरिक्तविषयतारूपसम्बन्धान्तरकल्पनेऽपि तस्याविद्यकत्वात् सविषयकत्वमात्रस्य तात्त्विकत्वाभावे प्रकृतग्रन्थतात्पर्यसम्भवात् । व्यक्तिं विनेत्याद्यपि न युक्तम् ; व्यक्त्यविषयकजात्यनुमित्यादिसम्भवात्, ध्वंसो घटत्वाद्यप्रतियोगिक इत्यनुमित्यादेः सर्वसम्मतत्वात् । आद्यनियमे व्यभिचारात् । घटाद्यविषयकघटत्वादिभ्रमदोषविशेषजन्यतया लौकिकप्रत्यक्षे द्वितीयनियमे व्यभिचारात् । कालिकसम्बन्धेन पटे घटत्वप्रत्यक्षं भवत्वितीच्छाजन्ये वह्न्यनुमित्यादिसामग्रीकालीने घटाविषयके घटत्वप्रत्यक्षे व्यभिचाराच्च । तत्रेच्छानुरोधेन घटत्वादिभानेऽपि भिन्नविषयकानुमितिसामग्र्या प्रतिबन्धेन[2] घटाभानात् घटत्वे सन्निकर्षसत्त्वे तस्य लौकिकप्रत्यक्षत्वसम्भवात् समवायेन जातिप्रत्यक्षप्रमाया व्यक्तिविषयकत्वनियमे च तदापादनासंभवात्कालिकेति ज्ञानविषयोभयवैशिष्ट्यावगाहिज्ञानस्य विषयविषयकत्वनियमस्य युक्तत्वात् । मन्मते ज्ञानस्य स्वप्रकाशत्वेन विषयाविषयकप्रत्यक्षाविषयत्वस्य तत्रेष्टत्वात्। यदा यस्य प्रत्यक्षं तदा स इति नियमे स्वोत्पत्तिक्षणतद्द्वितीयक्षणविनाशिघटादिप्रत्यक्षे त्वन्मतेऽपि व्यभिचारात् । यदैन्द्रियकं ज्ञानं तदाऽर्थ इत्याचार्योक्तिस्तु स्वाव्यवहितपूर्वत्वसम्बन्धेन व्याप्यत्वाभिप्रायेण विषयस्य कार्यसहभावेन प्रत्यक्षहेतुत्वमाश्रित्य स्वोत्पत्तिक्षणत्वसम्बन्धेन व्याप्यताभिप्रायेण वा जन्यापरोक्षत्वेन वाऽर्थव्याप्यतेत्यप्याचार्यवाक्यं तथैव योज्यम् । तादात्म्येन व्याप्यता कालिकेन व्यापकतेति वा तत्र बोध्यम् । यदा ऐक्यं तदा जीव इति व्याप्तौ सर्वमुक्तौ व्यभिचारोक्तिस्तु नामूढस्य । सर्वमुक्तौ कालाद्यभावात् सर्वमुक्तिर्भविष्यतीत्यादिरूपेण कल्पितः काल इदानींतनः । यत्र ऐक्यं तत्र जीव इति दैशिकव्याप्तिमदृष्ट्वा[3] । यत्रैक्यमित्याद्युक्तिरपि मोहादेव । किंच नाम्मात्सिद्धान्ते जीवेश्वरयोरैक्यं, येन

[1] संबद्ध. [2] साभर्ग्याप्रतिबन्धेन. [3] व्याप्तिरप्यविदुषां.

जीवत्वरूपे ईश्वरत्वरूपे वा ऐक्ये जीवाभावाद्व्यभिचारः। नापि जीवब्रह्मणोरात्यन्तिकभेदः, तस्य भेदे सत्यसम्भवात्। किन्तु तत्त्वोपलक्षितचिन्मात्रयोः। अस्तीत्यादिकमपि न युक्तम्; स्वस्वव्याप्येतरासु यावतीषु व्यक्तिषु सतीषु यदधिकरणक्षणाव्यवहितोत्तरक्षणे सत्वे तावतीषु सतीष्वेव तदनधिकरणक्षणाव्यवहितोत्तरक्षणे सत्त्वाभावरूपं क्षेमसाधारणजन्यत्वं हि मङ्गलादेर्विघ्नप्रागभावादाविव न ब्रह्मणः स्वसत्तायां ब्रह्मासम्बन्धिक्षणाप्रसिद्धेः, स्वस्मिन् स्वप्रयुक्तत्वरूपाखण्डधर्मस्यासम्भवाच्च। सत्तास्तीत्यत्रौ परैरपि तथा वाच्यत्वात्। तथाचास्ति ब्रह्मेत्यादावखण्डार्थत्वमव्याहतम्, सत्यं ज्ञानमित्यादिवत्। तार्किकमते हीत्यादिकमप्ययुक्तम्; मणिकारो हि तद्वति तत्प्रकारकानुभवत्वरूपे प्रमालक्षणे तत्प्रकारकत्वं तद्वैशिष्ट्यविषयकत्वं तद्ज्ञानजन्यत्वं वा, ईश्वरस्य तद्वैशिष्ट्यविषयकं ज्ञानं, न तु तत्प्रकारकं, निर्विकल्पकं च प्रमाभ्रमबहिर्भूतं, व्यवहारानङ्गत्वादिति वदन् ईश्वरधीनिर्विकल्पकयोरप्रमात्वं व्यक्तमुक्तवान्। यथा स्मृतौ तान्त्रिकाणां प्रमात्वाव्यवहारात् विशेष्यसंसृष्टविशेषणज्ञानादिरूपगुणजन्यत्वासंम्भवाच्च अनुभवत्वघटितं प्रमात्वं, तथा जन्यत्वाघटितस्येश्वरधीसाधारणत्वेन गुणजन्यतावच्छेदकत्वरूपपरतस्त्वविप्रतिपत्तिरूपव्यवहाराविषयत्वेन नित्यज्ञानस्य प्रमाणफलत्वाभावाच्च जन्यत्वघटितमेव तत्। अतएव स्वतोग्राह्यत्वविप्रतिपत्तिरूपव्यवहाराविषयकमनुभवत्वजन्यत्वघटितमपहाय[1] ज्ञानत्वघटितमुक्तव्यवहारविषयप्रमालक्षणान्तरमुक्तम्। एवं निर्विकल्पकस्य प्रवृत्त्यादिरूपव्यवहाराप्रयोजकत्वात् तद्व्यावृत्तं तदित्याशयेन प्रमात्वमेश्वरज्ञाननिर्विकल्पकव्यावृत्तत्वे व्यवहारानङ्गत्वं हेतूक्तम्। न च प्रमामात्रे नानुगतो गुण इति पूर्वं मणावुक्तत्वात् सामान्यतः प्रमात्वं नैव जन्यतावच्छेदकमिति वाच्यम्; तथापि भूयोऽवयवेन्द्रियसन्निकर्षादिजन्यतावच्छेदकस्य ईश्वरप्रत्यक्षव्यावृत्तप्रत्यक्षादिप्रमात्वस्य आवश्य-

[1] अविहाय.

कत्वात् । किंच प्रमामात्र इत्यादि मणिवाक्यं प्रमात्वसामान्यस्य जन्यतावच्छेदकत्वाभिप्रायकमेव । तार्किकशिरोमण्यादिभिः तथैव व्याख्यातत्वात् । तथाहि—"यद्यपि प्रमासामान्ये अनुगतो गुणो नान्वयव्यतिरेकासिद्धः; तथापि प्रमाविशेषे गुणविशेषाणामन्वयव्यतिरेकाभ्यां हेतुत्वे सिद्धे बाधकाभावात् प्रमासामान्येऽपि तेषां तत्सेत्स्यतीत्यभिप्रेत्य समाधत्ते—'प्रमामात्रे नानुगतो गुणः किन्तु तत्तत्प्रमायां भूयोऽवयवेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं गुणत्वम्' इति । तथाच प्रमात्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतावत्त्वेन प्रमासामान्ये कारणत्त्वम् । एतेन दोषोऽपि व्याख्यातः । तत्प्रमासामान्ये ईश्वरीयं तद्विशिष्टज्ञानं हेतुः । तदभावः भ्रमसामान्ये, दोषोपि तदेव । वस्तुतो विशेषणसंसृष्टासंसृष्टविशेष्यज्ञाने गुणदोषौ, लौकिकसन्निकर्षवत् सामान्यलक्षणाऽपि निर्विकल्पकजननी विशेष्यसंसृष्टासंसृष्टविशेषणज्ञाने वा तौ, तेनाप्रसिद्धसाध्यकानुमितिस्वीकारेऽपि न क्षतिः" इत्यादि शिरोमणिनोक्तम् । यत्तु—"प्रमात्वसामान्यस्य जन्यतावच्छेदकत्वे[1] प्रत्यक्षादिप्रमात्वं न भूयोवयवसन्निकर्षादिजन्यतावच्छेदकं, प्रत्यक्षस्य प्रमासामान्यस्य च सामग्रीभ्यां तदवच्छिन्नस्यार्थसमाजसिद्धत्वात् । अतः प्रमामात्रे नानुगतो गुण इति" इति विद्यावागीशैर्व्याख्यातं, तदापाततो ग्रन्थलापनमात्रम् । प्रमात्वसामान्यस्य जन्यतावच्छेदकत्वेऽपि अर्थसमाजसिद्धत्वस्य दुर्वारत्वात् । उक्तं हि कुसुमाञ्जलिटीकायां तैरेव—"घटत्ववद्विशेष्यकत्वादि न कार्यतावच्छेदकं, अर्थसमाजसिद्धत्वात् । तद्विशेष्यकज्ञाने तद्ज्ञानसामग्री, तत्प्रकारकज्ञाने च तज्ज्ञानं,[2] विधेयताख्यतत्प्रकारताकज्ञाने च तदसंसर्गाग्रहादिर्हेतुः । तद्व्यक्तिप्रकारतानिरूपिततद्व्यक्तिविशेष्यताके हि संसर्गा[3]ग्रहसामान्यप्रत्यासत्तिरेव तथा । अन्यथा

[1] वच्छेदकत्वेन. [2] तदज्ञानं. [3] चासंसर्गा.

यावन्तो विशेष्यवृत्तिव्यतिरेकधर्माः तत्तदाश्रयविशेष्यकत्वे सति घटत्व-प्रकारकत्वेन जन्यत्वापत्त्या अनन्तहेतुत्वापत्तेः। भवतु वा प्रमात्व-मेव जन्यतावच्छेदकम्। तथापि शाब्दादिप्रमात्वं न तथा, शाब्द-ज्ञानप्रमासामान्यसामग्रीभ्यां तदवच्छिन्नस्यार्थसमाजसिद्धत्वात्" इत्यादि। उत्पत्तिवादे अस्तु वेत्यादिमणौ मिश्रैरप्युक्तं—'सर्वकार्यप्रमासाधा-रणमीश्वरीयज्ञानमेव गुणः' इत्यादि। एवं 'यदि प्रमात्वा[1]समा-नाधिकरणधर्मनिरूपितकार्यत्वप्रतियोगिककारणजन्या न स्यात् अप्रमा स्यात्' इत्यादिमणौ ईश्वरज्ञानं तु न प्रमेत्युक्तम्। प्रमामात्रे नानुगतो गुण इत्यत्रोक्तम्। अस्मन्मते त्वनुगत एव स साधारणोऽस्तीति। उद-यनाचार्यैस्तु—"ननु नेश्वरज्ञानं प्रमा, नित्यत्वेनाफलत्वात्" इत्याशङ्क्य—

"मितिस्सम्यक्परि(च्छत्ति)ज्ञप्तिस्तद्वत्ता च प्रमातृता।
तद्योगव्यवच्छेदः प्रामाण्यं गौतमे मते।
समीचीनो ह्यनुभवः सा प्रमेति व्यवस्थितम्॥

तथाच नित्यत्वेन[2] विशेषणमनर्थकम्। यद्येवं 'आप्त[3]प्रामाण्यात्' इति गौतमसूत्रविरोधः। तेन ईश्वरे प्रामाण्यमावेदितं न तु प्रमातृत्वमिति चेन्न; प्रमासमवायित्वेन प्रमातृत्वस्येव प्रमाया अयोगव्यवच्छेदेन प्रमाणत्वस्यापि सम्भवात्" इत्यादिकं कुसुमाञ्जलिचतुर्थस्तबकान्ते उक्तम्। तत् प्रौढिमात्रम्; उक्तयुक्तेरनित्यत्व[4]विशेषणसार्थक्यात्, उक्त-सूत्रे ईश्वरस्य वेदार्थप्रमावत्त्वेन तदुक्तवेदस्य प्रामाण्यं यदुक्तं तत्रा-नित्यत्वाविशेषितमेव प्रमात्वमुपयुज्यत इत्येतत्परत्वाच्च, सौत्रप्रमाशब्दस्य जन्यत्वघटितमुख्यार्थैकदेशेन अजन्यज्ञाने प्रवृत्तिसम्भवपरत्वाच्च। अत एव प्रमाया अयोगव्यवच्छिन्नत्वे सति कारणत्वरूपस्य मुख्यार्थस्य एकदेशेन प्रमायोगव्यवच्छेदेन सौत्रप्रमाणशब्दो भगवति वर्तते। न चैतावता लक्षणा,—

---

[1] प्रमाऽप्रमात्वा [2] अनित्यत्वेन. [3] आद्य. [4] रनित्यार्थ.

एवमस्वप्रकाशत्वं वा जडत्वम्। तच्च पूर्वमेवोपपादितमिति शिवम्॥

इति जडत्वोपपत्तिः.

'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा'

इत्यत्र शक्यादित्यस्य शक्यतावच्छेदकघटकादित्यर्थकत्वात्। अतएव 'श्येनेन यजेत' इत्यादौ बलवदनिष्टाननुबन्धित्वसमानाधिकरणेष्टसाधनत्वशक्तस्य विधेः केवलेष्टसाधनत्वबोधने न लक्षणेत्यभिप्रायेण प्रमायोगव्यवच्छिन्नत्वमीश्वरस्योक्तम्। अन्यथा प्रमाया अकरणे घटादावपि प्रमायाः कालिकादिसम्बन्धरूपयोगाभावव्यवच्छेदसत्त्वेन प्रमाणशब्दमुख्यार्थत्वापत्तेः। अतएव 'करणव्यवहारस्तु अन्यत्र यद्यप्यन्यनिमित्तकः, तथापीहोक्तनिमित्तविवक्षयैव' इत्यग्रे उक्तं कुसुमाञ्जलौ। अन्यनिमित्तकः अयोगव्यवच्छेदेन जनकत्वनिमित्तक इति वर्धमानाः। यत्तु—"स्वाधिकरणक्षणध्वंसोत्पत्तिक्षणत्वव्यापकप्रमितिकत्वरूपः प्रमायोगव्यवच्छेदः सौत्रप्रमाणशब्दार्थः। स चेश्वरे प्रमाचरमकारणे चास्ति" इति विद्यावागीशैरुक्तं, तत्रायमेव यदि मुख्यार्थः तदा परमाण्वाद्यकारणेऽपि तत्त्वापत्तिः, ईश्वरप्रमामादाय तत्राप्युक्तार्थसत्त्वात्, उक्तप्रमित्यधिकरणत्वोक्तावपि जन्यमात्रस्येश्वरज्ञानमादाय तत्सत्त्वात्। जन्यप्रमानधिकरणकालोत्पन्ने चरमक्रियादौ प्रमाणपदमुख्यार्थत्वापत्तिः। यदि चायं गौणोर्थः, तदा प्रवृत्तिनिमित्तं तु यथोक्तमेवेत्युत्तरग्रन्थविरोधः। अथ प्रमोपधायकत्वघटितमुक्तरूपं मुख्यार्थः, उक्तग्रन्थस्य तु यथोक्तं प्रवृत्तिनिमित्तमेव तद्घटकत्वादित्यर्थः, तदाऽस्मदुक्तप्रकारे पर्यवसानम्। तस्मादीश्वरज्ञाननिर्विकल्पकव्यावृत्तं प्रमात्वमव्याहतम्। यच्चोक्तम्—'तद्वति तत्प्रकारकज्ञानत्वं न मुख्यप्रमात्वम्, किन्तु विशेष्यावृत्त्यप्रकारकानुभवत्वम्' इति, तत्तुच्छम्; तद्वतीत्यादेः मणिकारादिभिः

परिच्छिन्नत्वविचारः.

परिच्छिन्नत्वमपि हेतुः। तच्च देशतः कालतो वस्तुतश्चेति त्रिविधम्। तत्र देशतः परिच्छिन्नत्वं अत्यन्ताभावप्रतियोगित्वम्। कालतः परिच्छिन्नत्वं ध्वंसप्रतियोगित्वम्। वस्तुतः परिच्छिन्नत्वमन्योन्याभावप्रतियोगित्वम्। ननु—"समवायसम्बन्धेनात्यन्ताभावप्रतियोगित्वं आत्मनि व्यभिचारि, तस्याप्याकाशादिवत् क्वाप्यसमवेतत्वात्। संयोगसम्बन्धेनात्यन्ताभावप्रतियोगित्वमाकाशादावसिद्धम्; तस्य यावन्मूर्तसंयो-

---

सिद्धान्ते उक्तत्वात् विशेष्यावृत्तीत्यादेः स्वतः परतो ग्राह्यताविप्रतिपत्त्यनास्पदत्वेन प्रवृत्त्यनुपयुक्तत्वात्। अनुभवत्वघटितस्य प्रमाव्यवहारमात्रोपयोगेऽपि[1] ज्ञानत्वघटिततद्वतींत्यादेरेव प्रवृत्त्युपयुक्तत्वेन मुख्यत्वसम्भवात्। तदुक्तं मणौ—प्रवृत्तिसंवादादिना प्रमाण्यं यथार्थत्वमेवानुमीयते न त्वनुभूतित्वे सति स्मृतौ व्यभिचारादिति प्रमापदमुख्यार्थत्वाच्च। उक्तं हि दीधितौ—'प्रमापदं हि धात्वर्थतावच्छेदकज्ञानत्वपुरस्कारेण यथार्थज्ञानमभिधत्ते। स्मृतिहेतोः प्रमाणान्तरत्वापत्तेः शास्त्रे प्रमाव्यवहारौपयिकं स्मृतिव्यावृत्तमनुमन्यते' इति। मणौ निर्विकल्पकं च प्रमाबहिर्भूतं, व्यवहारानङ्गत्वादित्याद्युक्तेः दर्शितत्वाच्च। यच्चानन्दस्य ब्रह्मरूपत्वे तत्तारतम्यानुभवादिकमनुपपन्नमित्युक्तम्, तदग्रे समाधेयम्॥

सारस्वतैस्तर्करत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तखण्डानामखण्डि जडताहुतिः॥

इति जडत्वनिरुक्तिः.

आकाशादावित्यादिना ईश्वरादिग्रहणम्। सर्वमूर्तेष्वाकाश-

---

[1] मात्रोपयोगितया.

गित्वनियमात्। अमूर्तनिष्ठात्यन्ताभावप्रतियोगित्वाभिप्राये तु आत्मनि व्यभिचारस्तदवस्थः। सर्वसम्बन्धित्वाभावविवक्षायामपि सर्वसम्बन्धशून्ये परमात्मनि व्यभिचारः, अज्ञाने सर्वसम्बन्धिन्यसिद्धिश्च। ध्वंसप्रतियोगित्वमपि आकाशादावसिद्धम्। तेषां परैर्नित्यत्वाभ्युपगमात्। अन्योन्याभावप्रतियोगित्वं च आत्मनि व्यभिचारि, तस्य जडनिष्ठान्योन्याभावप्रतियोगित्वात्। अन्यथा जडत्वापत्तेः" इति चेन्न; अत्यन्ताभावे अन्योन्याभावे च प्रतियोगिसमसत्ताकत्वविशेषणेन आत्मनि व्यभिचारपरिहारात्। अज्ञानाकाशादौ च स्वसमानसत्ताकात्यन्ताभावान्योन्याभावप्रतियोगित्वसत्त्वेन असिद्ध्यभावात्। अविद्याकाशादेर्व्यावहारिकस्य पारमार्थिकत्वाभावपक्षे स्वान्यूनसत्ताकेति विशेषणं देयम्। अतएव प्रातिभासिकशुक्तिरूप्यादेः

मित्यादिप्रतीत्याऽऽकाशादिसंयोगो वृत्तिनियामक इति वृत्तिनियामकसंयोगेन प्रतियोगित्वमप्यसिद्धमिति भावः। **अभिप्राय इति**। संयोगावच्छिन्नप्रतियोगितात्वेनैव हेतुः अमूर्तनिष्ठाभावीयं त[1]मादायाकाशादावप्यस्तीत्यभिप्राय इत्यर्थः। मूर्ते संयोगेनात्मनः सत्त्वेप्यमूर्ते तेन तदभावाद्व्यभिचार इत्याह—**आत्मनीति**। उपहितात्मन एवोपादानत्वात्साक्षित्वाच्च सर्वसम्बन्धो न तु शुद्धस्येति मत्वाऽऽह—**सर्वेति**। धर्मीत्यस्य स्वाश्रयेत्यर्थकत्वे स्वपदस्य हेतुपरत्वादन्यतरत्वादिना तादृशप्रतियोगित्वं शुद्धात्मनोऽपीत्यत आह—**अज्ञानाकाशेति**। **स्वेति**। यत्र हेतुः स्थाप्यः स स्वपदार्थः। अत्माद्यवृत्तिप्रतियोगितया अत्यन्ताभावो भेदश्च हेतुः। अतः स्वत्वाननुगमादिर्न दोषः। यद्यपि मिथ्यात्वलक्षणोक्तरीत्या आकाशादेरत्यन्ताभावप्रतियोगित्वे मानाभावः,

---

[1] भावीयात्त.

व्यावहारिकाभावप्रतियोगित्वेऽपि न साधनवैकल्यम्। निरुक्त-मिथ्यात्वप्रकाराणामेवंरूपत्वाभावात् न साध्याविशिष्टता। ध्वंसप्रतियोगित्वं चाकाशादौ नासिद्धम्। 'तस्माद्वा एत-स्मादात्मन आकाशस्सम्भूतः' इति श्रुतिसिद्धजन्यत्वेनानुमि-तत्वात्। 'आकाशवत्सर्वगतश्च नित्यः' इत्यत्र चात्मनिदर्शन-नत्वं[1] स्वसमानकालीनसर्वगतत्वेन आभूतसम्प्लवावस्थायित्वेन चेति द्रष्टव्यम्। 'अतोऽन्यदार्तम्' इति श्रुत्या अनात्ममात्र-स्यैव विनाशित्वप्रतिपादनात्। अतएव "घटादयः स्वानु-

---

मिथ्यात्वानुमानं चोक्तहेतुकं उक्तहेतुसिद्धेः पूर्वमप्रवृत्त्या न तत्साधकम्; तथापि दृश्यत्वादिहेत्वन्तरेणात्यन्ताभावप्रतियोगित्वघटितमिथ्यात्वे सिद्धेऽ-प्यत्यन्ताभावप्रतियोगित्वेन सदसद्विलक्षणत्वादिरूपमिथ्यात्वानुमितिस्स-म्भवतीत्यभिप्रायेणाह—**निरुक्तेति**। अत्यन्ताभावप्रतियोगित्वान्येत्यर्थः। **एवंरूपत्वेति**। अत्यन्ताभावप्रतियोगित्वरूपत्वेत्यर्थः। **साध्याविशि-ष्टता** साध्यस्यानुमितिपूर्वकालापेक्षया अनुमितिकाले विशेषाभावः, सिद्धत्वमिति यावत्। विशिष्टप्रतियोगित्वरूपमिथ्यात्वसिद्धावपि प्रकृत[2]-हेतुना तदन्यमिथ्यात्वसाधनमव्याहतमिति भावः। एतेन—मिथ्या-त्वलक्षणे स्वाधिकरणादिनिवेशात् तदनिवेशपक्षेऽपि सद्वृत्त्यत्यन्ताभाव-निवेशान्न साध्यहेत्वोरविशेषः' इत्यादि परास्तम्। **जन्यत्वेनेति**। जन्यमात्रस्याविद्योपादानकत्वात्तन्नाशनाश्यत्वादविद्यासम्बन्धादेरपि अज्ञा-नप्रयुक्तत्वेनाज्ञाननाशकनाश्यत्वात्। शुक्त्यज्ञान[3]सम्बन्धादौ क्लृप्तत्वात् एकाज्ञानपक्षे तस्या[4]क्लृप्तत्वेऽपि 'विद्वान्नामरूपाद्विमुक्तः' इत्यादि-श्रुतेः लाघवादनात्मत्वावच्छेदेनैवात्मज्ञानविरोधित्वकल्पनात् अनात्म-मात्रं विनाशि अविद्यानाशस्यैव अनात्ममात्रनाशत्व[5]कल्पनात् नाका-

---

[1] निदर्शनवत्त्वं. [2] अप्रकृत. [3] शुक्तिज्ञान. [4] तथा. [5] नाशकत्व.

गतप्रतिभासे वस्तुनि कल्पिताः, विभक्तत्वात्, यथा सर्पमालादिकम्, स्वानुगतप्रतिभासे रज्ज्वा इदमंशे विभज्यते। "एवं ब्रह्मण्यनुगच्छति घटादिकं विभज्यते। सन् घटः सन्

शादिव्यक्तिनाशकल्पनागौरवमिति भावः। **स्वानुगतप्रतिभासे इति।** स्वतादात्म्येन स्वरूपतो भानयोग्ये स्वतादात्म्यविषयतानिरूपितानवच्छिन्नप्रकारतावतीति यावत्। सप्तम्या व्यापकत्वमर्थः[1]। व्यापकतानिरूपकत्वं तादात्म्येन। तथाच यदुक्तप्रकारतावत्तत्र कल्पिता इति व्यापकता लभ्यते। **कल्पिताः** ज्ञाननिवर्त्याः, स्वाभाववति ज्ञेया वा। तादृशप्रकारताव्यापकस्वनिवर्तकधीविषयताकत्वं तादृशप्रकारताव्यापकस्वात्यन्ताभावकत्वं वा पर्यवसितार्थः। उक्तप्रकारतायाः सामानाधिकरण्यमात्रनिवेशे घटस्य स्वतादात्म्यभ्रमविषयपटत्वादौ कल्पितत्व[2]मादाय परैरर्थान्तरं वाच्यम्। अतस्तस्याव्यापकत्वं निवेशितम्। तादृशप्रकारतावति द्रव्यगुणकर्मादौ स्वनिवर्तकधीविषयत्वाभावादनवच्छिन्नेति। द्रव्यगुणादौ च नानवच्छिन्नं प्रकारत्वम्। प्रतियोगितादेरखण्डत्वस्वीकारे तादृशप्रकारतावति तत्र घटादेः स्वनिवर्तकधीविषयत्वाभावान्निरूपितान्तस्थले स्वतादात्म्यसमानाधिकरणेति वाच्यम्। एवंच यथासन्निवेशे व्यापकत्वं न व्यर्थम्। सामानाधिकरण्यं वा तत्स्थाने निवेश्यम्, प्रतियोगितादेरपि धर्मत्वात्। घटादौ तादात्म्यस्वीकारे तु सामान्यवद्वक्ष्यमाण[3]रीत्या तस्य ब्रह्मस्वरूपत्वाद्घटादिनिवर्तकधीविषयत्वात् न तद्व्यभिचार इति निरूपितान्तमपि निर्दोषम्। तच्च यथोक्तरूपेण साध्यसिद्ध्यर्थं प्रकारताविशेषणम्। द्वितीयसाध्ये त्वनवच्छिन्नत्वं न देयम्। वस्तुतस्तु[4] कल्पितपदस्य स्वात्यन्ताभाववति प्रतीयमानार्थत्वे स्वानुगतप्रतिभासेत्यस्य स्वपश्चादपि

---

[1] सिद्धमित्यस्याव्यापकत्वमर्थे. इति. पा. [2] कल्पित. [3] सामान्यस्य वक्ष्यमाण. [4] सत्येन वस्तुतस्तु.

पटः" इत्यानन्दबोधोक्तमपि साधु। विभक्तशब्देन स्वसमानसत्ताकभेदप्रतियोगित्वरूपवस्तुपरिच्छेदस्य विवक्षितत्वात् न ब्रह्मतुच्छयोर्व्यभिचारः। न च 'खण्डो गौर्मुण्डो गौः" इत्येवमादिस्वानुगतप्रतिभासे गोत्वादौ व्यक्तीनामकल्पितत्वात् व्यभिचार इति वाच्यम्; सत्सामान्यातिरिक्तगोत्वादिसामान्यानभ्युपगमात्, गोत्वाद्यभ्युपगमेऽपि गोत्वादिव्यञ्जकतावच्छेदकसामान्यानभ्युपगमात्, व्यक्तिविशेषाणामेवाननुगतानां

भासमानार्थकतया सद्रूपार्थकत्वपर्यवसानात् सत्त्व[1]व्यापकस्वात्यन्ताभावकत्वं द्वितीयसाध्यं पर्यवस्यति। स्वानधिकरणकपालादिरूपसद्वृत्त्यत्यन्ताभावप्रतियोगित्वमादाय पटादौ परेषामर्थान्तरवारणाय व्यापकत्वम्। भासमानत्वव्यापकतानिवेशे शून्यवादिनां सिद्धसाधनम्। अतः सत्व[1]-व्यापकत्वमुक्तम्। अथवा द्वितीयसाध्यं ब्रह्मसिद्ध्युक्तवक्ष्यमाणानुमान एव बोध्यम्। कल्पितत्वं च स्वाभाववतीति वक्ष्यमाणाचार्यवाक्यमपि तदभिप्रायम्। यथेत्यादिः, यद्यद्विभज्यते तत्स्वानुगतप्रतिभासे कल्पितं, यथा रज्जुसर्पादिकमित्युदाहरणे एवमित्यादेरुपनयनिगमनयोः तात्पर्यम्। **आनन्दबोधोक्तमिति**। प्रमाणमालायामित्यादिः। प्रथमसाध्याभिप्रायेणाशङ्क्य निराकरोति—**न चेत्यादि**। गोत्वाद्यनपेक्षतया गोत्वादिकार्यप्रयोजकतायां दृष्टान्तमाह—**गोत्वाद्यभ्युपगम इति**। **व्यक्तिविशेषाणामिति**। जातिवृत्तिर्लौकिकविषयतया प्रत्यक्षं प्रति स्वविषय[2]-समवेतत्वसम्बन्धेन प्रत्यक्षस्य कारणत्वेन स्वविषयव्यक्तीनां सम्बन्धविधया प्रत्यक्षोत्पत्तिप्रयोजकत्वरूपं व्यञ्जकत्वमिति भावः। **अननुगतानां** गोत्वाद्यविशेषितानाम्। अथ सास्नाद्यवच्छिन्नसन्निकर्षादेः विशिष्य गोत्वादिव्यञ्जकत्वस्यावश्यकत्वेनोक्तव्यञ्जकत्वे मानाभावः,

---

[1] स्व. [2] स्वविषये.

सास्नादिमत्त्वाद्युपाध्यनुगतानां वा तद्व्यञ्जकत्ववत् व्यक्तिविशेषविशिष्टत्वेन सत्सामान्यस्यैव तत्तद्व्यवहारजनकत्वोपपत्तेः ।

तत्राह—**सास्नेति** । अनुगतानां विशेषितानां सास्नाद्यवच्छिन्नसन्निकर्षाद्याश्रयतया व्यक्तीनां[1] व्यञ्जकत्वमिति भावः । **व्यक्तिविशेषविशिष्टत्वेनेति** । गोत्वादिना अभिमतव्यक्तीनामन्यतमनिष्ठतादात्म्यरूपवैशिष्ट्येनेत्यर्थः । **तत्तद्व्यवहारेति** । गोत्वादिप्रयोज्यकार्येत्यर्थः । **जनकत्वेति** । प्रयोजकत्वेत्यर्थः । न च सम्बन्धाननुगमो दोषः, स्वरूपसम्बन्धेन कारणत्वादिस्थले तस्यातत्त्वात् अन्यतमत्वेनानुगमसम्भवाच्च । न च तावता तादात्म्यानन्त्यात्तद्घटितान्यतमत्वनिवेशे गौरवमिति वाच्यम् ; तावदन्यतमत्वव्यक्तेः स्वरूपत एव निवेशात्, अनुगतरूपान्तरसत्त्व एव तेन रूपेणावच्छेदकत्वे अन्यथासिद्धेः स्वीकारात् । अतएव स्वरूपसम्बन्धेनाभावादेः कारणत्वादिस्थले तावत्स्वरूपान्यतमत्वमेव स्वरूपतोऽवच्छेदकम् । अन्यथाऽननुगतसम्बन्धैः कारणत्वादेर्दुर्वचत्वात् । एवंच तादृशान्यतमसम्बन्धेन सद्रूपमेव गौरित्यादिव्यवहारविषयः । गोत्वाद्यवच्छिन्नत्वेन अभिमतं कारणत्वादिकं उक्तसम्बन्धेन तद्रूपेणैवा[2]वच्छिद्यत इति गोत्वादिकल्पनं व्यर्थम् । तदुक्तं भर्तृहरिणा—

सम्बन्धभेदात्सत्तैव[3] विद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥

इतीति भावः । न च गोव्यक्तीनां अन्यतमत्वेनापि कारणत्वादिसम्भवात् सत्सामान्यस्यैवेत्यसङ्गतमिति वाच्यम् ; गोत्वाभ्युपगमेप्युक्तान्यतमत्वादिना तदापत्त्या तेन रूपेणान्यथासिद्धेरावाभ्यां स्वीकारात् । अथवा गोव्यक्तयः सद्रूपतादात्म्यविशिष्टा गौरित्यादिव्यवहारविषया इत्येव प्रकृतग्रन्थार्थः । न च गवादिपदानां शक्यता, गवादिनिष्ठकारणत्वादिकं च सद्रूपेणावच्छेत्तुमशक्यं, अतो गोत्वमावश्यकमिति वाच्यम् ; सद्रूपविशिष्टगोव्यक्तिष्वेव उक्तशक्यताकारणतादे-

[1] सन्निकर्षान्यवृत्तीनां. [2] सद्रूपेणैवा [3] भेदास्तत्रैव.

अतएव 'घटादिकं सद्रूपे कल्पितम्। प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात्, प्रत्येकं चन्द्रानुविद्धजलतरङ्गवत्' इति ब्रह्म-

---

रनवच्छिन्नस्य स्वीकारे बाधकाभावात्। न च कम्बुग्रीवादिमत्त्वादिना शाब्दबोधस्यापि घटादिपदशक्तिज्ञानजन्यत्वापत्तिरिति वाच्यम्; घटत्वेन घटबोधस्यानुकूलायाः घटपदनिष्ठायाः शक्तेरेव घटपदघटयोः शक्तिरूपत्वात्। तार्किकादिरीत्या तु घटपदात् घटत्वेन घटो बोध्यतामितीच्छा[1]विशेष्यत्वस्यैव तद्रूपत्वात्[2] तत्र घटत्वं सद्रूपेमेव घटस्तद्व्यक्तिरेव सद्रूपेण यत्किञ्चिद्बोध्यक्तौ शक्यताग्रहस्यैव अन्वयव्यतिरेकाभ्यां सद्रूपेण गोव्यक्तिस्मृतिशाब्दबोधहेतुत्वस्य अनवच्छिन्नस्य सम्भवात्, अनवच्छिन्नकारणत्वादेरेव दण्डत्वविशिष्टादौ ग्रहात् प्रवृत्त्यादिसम्भवात्। न च घटत्वादिजातिं विना घटादिकारणत्वमेकं दुर्वचमिति वाच्यम्; शक्तिविशेषरूपस्यातिरिक्ताखण्डरूपस्य वा कारणत्वस्य उक्तजातिं विनाऽप्यैक्यसम्भवात्, कार्यकारणव्यक्तीनामन्यतमत्वव्यक्तयोरेव अखण्डकारणता[3]घटकत्वसम्भवाच्च। अन्यथा व्याप्यत्वादेः कारणत्वाद्यवच्छेदकत्वस्य चावच्छिन्नत्वनियमापत्तेरित्यास्तां विस्तरः। **अतएव** उक्तपरिच्छेदानां हेतुत्वसम्भवादेव। **सद्रूपे कल्पितं** सद्रूपधीनिवर्त्यमुक्तार्थकं वा। तरङ्गचन्द्रे तु तत्त्वं सिद्धमेवेति न साध्यवैकल्यम्। **प्रतीयमानत्वात्** प्रतीयमानतायोग्यत्वात्। सदनुवेधेन प्रतीयमानतायोग्यत्वं च उक्तपरिच्छेद एवेति भावः। अथवा सत्तादात्म्याविषयकप्रतीत्यविषयत्वादित्यर्थः। प्रतीतिमात्रे सद्रूपं विषय इति वक्ष्यते। यत् यत्तादात्म्याविषयकप्रतीत्यविषयस्तत्तत्र कल्पितमिति सामान्यतो व्याप्तिः। अतएव दृष्टान्ते चन्द्रानुविद्धेत्युक्तम्। चन्द्रानुविद्धधीविषयेतत्यर्थः[4]। **प्रत्येकमिति**। प्रतीतिविशेषणेन स्वविषयक-

---

[1] बोध्यत इतीच्छा. [2] सद्रूपत्वात्. [3] मन्यतमत्वादिव्यक्तेरेवाखण्डकारणता. [4] चन्द्रानुवेधलाभेन उक्तहेतुलाभात् न तदुक्तिवैयर्थ्यम्। यत्तु अनेकेषां तदनुविद्धतया प्रतीयमानत्वं हेतुः; ब्रह्मणस्तु नानेकत्वमिति न तत्र विद्धधीविषयेत्यर्थः—इत्यधिकपाठः.

सिद्धिकारोक्तमपि साधु। ननु सदर्थस्य ब्रह्मणः रूपादिहीनस्या-संसारमज्ञानावृतस्य शब्दैकगम्यस्य कथं घटस्सन्नित्यादिबुद्धि-विषयता स्यात्? तथाच 'घटोऽनित्यः' इत्यनेन घटगतानित्य-तेव 'घटस्सन्' इत्यनेनापि घटगतमेव सत्त्वं गृह्यते। न च स्वरू-पेणाप्रत्यक्षस्य राहोः चन्द्रावच्छेदेनेव ब्रह्मणोऽपि घटाद्यवच्छेदेनैव प्रत्यक्षतेति वाच्यम्; शब्दाद्यवच्छिन्नस्यापि गगनादेः श्रावणत्वा-द्यापातात्। राहोस्तु दूरदोषेणाज्ञातस्य नीलस्य योग्यस्य शुक्लभा-स्वरचन्द्रसम्बन्धाच्चाक्षुषता युक्तेति चेन्न; यतस्सदात्मना न ब्रह्मणो मूलाज्ञानेनावृतत्वम्, किन्तु घटाद्यवच्छिन्नशक्त्यज्ञानेनैव।

प्रतीतिमात्रस्य तत्तादात्म्य[1]रूपानुवेधविषयकत्वलाभेन उक्तहेतुलाभान्न तदुक्तिवैयर्थम्। यत्तु अनेकेषां तदनुविद्धतया प्रतीयतमानत्वं हेतुः, ब्रह्मणस्तु नानेकत्वमिति; न तत्र व्यभिचारः, तद्रूपाभिन्नत्वं वा साध्यमित्युक्तं तच्छोभतेतराम्। ब्रह्मणोऽपि ज्ञानानन्दादिरूपेण अनेकत्वस्य कल्पितत्वात्, प्रपञ्चमादायापि तत्सत्यत्वाच्च। उक्त-साध्यं च मिथ्यात्वं विनाऽपि सम्भवतीत्यर्थान्तरात्। ननु सदिति प्रथमहेतुर्यद्यपि स्वान्यूनसत्ताकभेद[2] प्रतियोगितात्वाद्युक्तरूपेण; तथापि सदनुवेधधीविषयत्वयोग्यतात्वेन तदुक्तिर्न घटत इत्यभिप्रायः। **सदात्मनेति**। सद्रूपेणेत्यर्थः। **घटाद्यवच्छिन्नशक्त्यज्ञानेनेति**। घटादिप्रपञ्चानुकूला शक्तिः यस्य तादृशमज्ञानं यत्र तेन पूर्णानन्द-रूपेणेत्यर्थः। सद्रूपस्फुरणेऽपि पूर्णानन्दावरणादेव संसारदृष्ट्याऽ[3]-पूर्णानन्दरूपेण मूलाज्ञानावृतत्वम्। सद्रूपपूर्णानन्दरूपयोस्तु भेद आविद्यक इति भावः। अथवा सदात्मनेति घटाद्यवच्छिन्नसदात्मने-त्यर्थः। अतएव वक्ष्यति ब्रह्म घटाद्यवच्छेदेन योग्यमिति। अत एव पल्लवाज्ञानास्वीकारपक्षेऽपि मूलाज्ञानेन घटाद्याकारवृत्तिकाले घटा-

---

[1] सत्तादात्म्य. [2] सत्ताकाभेद. [3] संसारदशा.

तथाच चक्षुरादिजन्यवृत्त्या तदावरणभङ्गे सति 'सन् घटः' इत्यत्र ब्रह्मणः स्फुरणे बाधकाभावात्। न च रूपादिहीनतया चाक्षुषत्वाद्यनुपपत्तिः बाधिकेति वाच्यम्; प्रतिनियतेन्द्रिय-ग्राह्येष्वेव रूपाद्यपेक्षानियमात्। सर्वेन्द्रियग्राह्यं तु सद्रूपं ब्रह्म। नातो रूपादिहीनत्वेऽपि चाक्षुषत्वाद्यनुपपत्तिः, सत्तायाः परैरपि सर्वेन्द्रियग्राह्यत्वाभ्युपगमाच्च। तदुक्तं वार्तिककृद्भिः—

अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः।
अक्षादीनां स्वतस्सिद्धो यत्र तेषां प्रमाणता॥

द्यवच्छिन्नसद्रूपानावरणात् तस्य प्रकाश इति भावः। घटाद्यवच्छिन्ने-त्यादेरर्थस्तु पूर्ववत्। **सर्वेन्द्रियग्राह्यमिति**। धीमात्रविषयत्वाभ्युप-गमादिति भावः। **परैरिति**। सत्ताजातेस्तार्किकादिभिः सर्वेन्द्रिय-ग्राह्यत्वाभ्युपगमात् ज्ञानविषयत्वरूपसत्तायाः मणिकारोक्तप्राभाकरमते धीमात्रविषयत्वाभ्युपगमादित्यर्थः। उक्तं हि मणौ—'प्राभाकरास्तु मितिमात्रंशे सर्वं ज्ञानं प्रत्यक्षम्' इति। प्राचीनप्राभाकरमते तु वाचस्पत्याद्युक्ते मेयभानकाले मितिमात्रोर्न संशयविपर्ययावित्येवाभ्युप-गमः। सर्वेन्द्रियग्राह्यत्वसाधकस्य[1] सर्वधीविषयत्वस्योपपदकमाह— **तदुक्तमिति**। अनुभवः सद्रूपम्। तस्यैव विषयत्वे हेतुः—**अज्ञात-लक्षण इति**। सद्रूपभिन्नं तु विषयीभूतसद्रूपावच्छेदकम् न तु विषय इति भावः। **स्वतस्सिद्धः** अनारोपितः। अथवा अज्ञातो[2] विषयोऽनुभव एव, जडे अज्ञातत्वाभावादित्यर्थः। तथाच सद्रूपा-न्यस्य विषयत्वेऽपि न क्षतिः। **अक्षादीनां** चक्षुरादिप्रयोज्यज्ञानानाम्। तेन भ्रमस्याप्यनुभवो विषय इति लभ्यते। उक्तविषयकत्वं विना-ज्ञानमात्रे प्रमात्वव्यवहारो न स्यात्, अज्ञाताबाधितविषयकत्वस्यैव प्रमात्वरूपत्वादित्याशयेनाह—**यत्रेति**। यद्विषयकत्वेनेत्यर्थः। **प्रमाणता**

---

[1] साधकत्वस्य. [2] ज्ञाने.

इति कालस्य च रूपादिहीनस्य मीमांसकादिभिः सर्वेन्द्रियग्राह्यत्वाभ्युपगमात्, न च शब्दावच्छिन्नस्याकाशस्यापि श्रावणत्वं स्यादिति वाच्यम्; स्वभावतो योग्यस्य हि केनचिन्निमित्तेन प्रतिरुद्धयोग्यताकस्य अवच्छेदकादिना योग्यता

प्रमात्वव्यवहारः । भ्रमेष्यधिष्ठानीभूतसद्रूपतदात्म्यापन्नरजतादिविषयकत्वेनैव प्रमात्वं बाधात्पूर्वं[1] व्यवह्रियत इति धीमात्रस्य सद्रूपविषयकत्वमावश्यकमिति भावः । कालसम्बन्धित्वरूपा सत्ता सर्वधीविषयत्वात् सर्वेन्द्रियग्राह्या मीमांसकादीनाम् । उक्तं हि तैः—

'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते'

इतीत्याशयेनाह—**कालस्येति** । प्रतीयमानांशे आधेयतासम्बन्धेन विशेषणतया कालो भाति, इदानीं घट इत्यनुभवात् । अविद्यमानघटादेरपि तदानीं घट इत्याद्यनुभवात्, स्मर्यमाणस्य तत्कालीनार्थकः स इत्युल्लेखनियमात् । अतएव तार्किकादिभिः परोक्षज्ञाने सत्ताभानावश्यकत्वं वाच्यमित्याशयेन मीमांसकादीनामित्यादि पदमुपात्तम् । तथाचानुभवानुरोधात् सत्तावच्छेदकभानसामग्र्या एव सत्ताभासकत्वं कल्प्यत इति तार्किकादिभिरपि वाच्यम् । पर्वते वह्निमनुमिनोमीत्याद्यनुभवस्यापलापायोगात् । अन्यथा पर्वतीयवह्निः सन्न वेत्यादिसंशयापत्तेः उक्तसंशयनिवर्तकज्ञानान्तरकल्पने गौरवात्, सत्ताघटितरूपेण व्यापकत्वाग्रहेपि सत्ताभानस्यानुमित्यादौ सम्भवात्, उक्तनियामकसम्भवात् । अतएवातीन्द्रियानुमित्यादावपि सत्ताभानावश्यकत्वम् । न च मीमांसकादिभिः कालांशे लौकिकान्यविषयतैव धीमात्रे स्वीक्रियते, त्वन्मते तु सद्रूपे लौकिकविषयतेति कथमनुभवैकरूपतेति वाच्यम्; तन्मतेऽपि सत्तां साक्षात्करोमीति धीबलात्तादृशविषयत्वावश्यकत्वा-

---

[1] बाधपूर्वं.

सम्पाद्यते, यथा दूरदोषेण प्रतिरुद्धयोग्यताकस्य राहोश्चन्द्र-सम्बन्धेन। एवंचावरणेन प्रतिरुद्धयोग्यताकं ब्रह्म घटाद्यव-च्छेदेन योग्यं भवति। नभस्तु स्वभावायोग्यमेव, न प्रतिरुद्ध-योग्यताकम्; येन शब्दावच्छेदेन योग्यं भवेत्। यद्वा द्रव्य-ग्रहे चक्षुषो रूपापेक्षा। न तु अन्यग्रहे। ब्रह्म तु न द्रव्यम्, 'अस्थूलमनण्वह्रस्वमदीर्घम्' इति श्रुत्या चतुर्विधपरिमाणनिषेधेन द्रव्यत्वप्रतिषेधात्। अतो नानुपपत्तिः। अस्तु वा द्रव्यम्; तथाप्यध्यस्तद्रव्यवति गुणादौ रूपानपेक्षचाक्षुषत्वदर्शनेन धर्म्य-

---

त्संयुक्तविशेषणतासान्निकर्षसम्भवात्, गुरुमते लौकिकान्यप्रत्यक्षविषय-त्वानभ्युपगमाच्च[1]। न च सद्रूपस्य द्रव्यत्वमभ्युपगम्य सिद्धान्त-स्येदानीमुच्यमानत्वात् द्रव्यप्रत्यक्षे च रूपादिहेतुतायाः कल्पितत्वात् रूपादिहीने तत्र कथं प्रत्यक्षविषयत्वमिति वाच्यम्; द्रव्यत्वं हि यद्यपि सद्रूपं कल्पिततादात्म्येन स्वस्मिन्नपि वर्तत इति तादृशतादात्म्यं सद्रूपभिन्नद्रव्यव्यक्तिनिष्ठतादात्म्यानि चेत्यन्यतमसम्बन्धेन सद्रूपविशिष्ट-मेव द्रव्यम्; तथापि स्वभिन्नद्रव्यव्यक्तिवृत्तितादात्म्याना[2] मन्यतम-सम्बन्धेन सद्रूपविशिष्टं यत् तद्वृत्तिविषयतासम्बन्धेन प्रत्यक्षं प्रति रूपादिहेतुतेति भावः। सद्रूपभिन्नद्रव्यव्यक्तिवृत्तितादात्म्यान्यतमसम्ब-न्धेन सद्रूपविशिष्टमेव द्रव्यमित्याशयेनाह—**यद्वेति**। व्यावहारिक महत्त्वादिपरिमाणं व्यावहारिकस्य द्रव्यत्वसम्बन्धस्य सद्रूपेऽनङ्गीकारे अनुपपन्न[3] मित्यत आह—**अस्तु वेति। धर्मीत्यादि**। धर्म्यन्यूनसत्ता-केन तादात्म्येन द्रव्यत्ववतीत्यर्थः। तेन कर्मधारयोत्तरं मतुपोऽसाधु-त्वेऽपि न क्षतिः। न वा द्रव्यत्वस्य सद्रूपत्वेन द्रव्यव्यक्तीनामिव गुणादिव्यक्तीनामन्यूनसत्ताकत्वेऽपि क्षतिः। यद्यपि यथाश्रुतोक्तविव-

---

[1] विषयत्वान्यानभ्युपगमाच्च. [2] व्यक्तितादात्म्याना. [3] व्यवहारविषयत्वमनुपपन्न.

न्यूनसत्ताकद्रव्यत्ववत्येव चक्षुः रूपमपेक्षते । ब्रह्मणि च द्रव्यत्वं धर्म्यपेक्षया न्यूनसत्ताकमेवेति न तद्ग्रहे रूपाद्यपेक्षा । कल्पितत्वं च स्वाभाववति प्रतीयमानत्वं वा स्वरूपज्ञाननिवर्त्यत्वं वेत्यन्यदेतत् । तस्मात् परिच्छिन्नत्वमपि भवति हेतुरिति सिद्धम् ॥

इति परिच्छिन्नत्वहेतूपपत्तिः.

क्षायामपि सद्रूपद्रव्यत्वस्य व्यावहारिकतादात्म्याश्रये व्यावहारिकगुणादौ चाक्षुषे व्यभिचारः, प्रातीतिकस्य तत्तादात्मस्य आश्रये प्रातीतिकगुणादौ चाक्षुषत्वस्वीकारे तत्रापि व्यभिचारः; तथापि धर्म्यन्यूनसत्ताके[1] त्यस्य गुणाद्याश्रयत्वेन पराभिमतं यद्यत्सद्रूपभिन्नं तादृशव्यक्तिगततादात्म्यान्यतमेत्यर्थकत्वान्न दोषः । गुणादेः सद्रूपस्य च तादृशतादात्म्येन सद्रूपद्रव्यत्वानाश्रयत्वात् । एवमन्यत्रापि धर्म्यन्यूनसत्ताकत्वादिकं निर्वाच्यम् । तेन धर्म्यादिनिवेशगौरवानवकाशः । सत्तात्रैविध्यासिद्धिदशायामपि तदुक्तिसम्भवश्चेति ध्येयम् । **चक्षुः** चक्षुरादि । **रूपं** रूपादि । तेन त्वगिन्द्रियादिकमपि न ब्रह्म[2] स्पार्शनादावुद्भूतस्पर्शादिकमपेक्षत इति लभ्यते । ननु अन्यांशे उद्बोधकाद्यभावे घटत्वादिमात्रविषयकस्मृतिः सद्रूपाविषयेति नोक्तहेतुसम्भव इति चेन्न; सद्रूपभाने उद्बोधकादेः पृथगनपेक्षाया उक्तत्वात् । न चायं घट इत्यादिज्ञाने घटत्वांशे सद्रूपभाने[3] अयं घटो न वेत्यादिसंशयनिवर्तकता न स्यादिति वाच्यम्; जातिमान् घट इत्यादाविव स्वातन्त्र्येणापि स्वरूपतो घटत्वादिविषयतायास्तत्र सम्भवात्, उक्तसंशयेऽपि घटत्वांशे सद्रूपभानाच्च[4] । न च ब्रह्मज्ञाने[5]

[1] धर्म्यसत्ताके. [2] मपि ब्रह्म. [3] सद्रूपाभाने. [4] सद्रूपाभानाच्च. [5] ब्रह्मभाने ज्ञाने.

ब्रह्मांशे घटः सान्नित्यादौ सद्रूपांशे च सद्रूपतादात्म्यभानं स्यादिति वाच्यम्; सद्रूपान्यभासकसामग्र्यां सद्रूपभिन्नांश एव सद्रूपतादात्म्य-भासकत्वनियमात्। वस्तुतस्तु ब्रह्मणश्चाक्षुषादिवृत्त्यविषयत्वेऽपि नास्माकं प्रकृते क्षतिः; घटादिविषयकवृत्त्या घटाद्यवच्छिन्नसद्रूपस्याप्यावरणाभि-भवाद्घटादौ भासमाने सद्रूप[1] तादात्म्यस्यावश्यं भानसम्भवात्, अज्ञातचिदवच्छेदकविषयकत्व[2]घटितस्य घटादिगोचरवृत्तिप्रामाण्यस्य वक्तुं शक्यत्वात्। ब्रह्मज्ञानस्य तु त्रिकालाबाध्यविषयकत्वघटितं प्रामाण्यं भिन्नमेवेति तत्राज्ञातविषयकत्वनिवेशेऽपि क्षत्यभावात् सद्रू-पानुविद्धेत्यादिहेतोः सद्रूपतादात्म्ये[3] स्वनिष्ठे भासमान एव भास-मानत्वरूपत्व[4] सम्भवात्। परंतु वस्तुगतिराचार्यैरुक्ता। यत्तु—"खण्डो गौर्मुण्डो गौरित्याद्यनुगतव्यवहार एव गोत्वादिसामान्ये मानं, अन्यथा व्यक्तिविशेषविशिष्टसत्सामान्यस्य उक्तव्यवहारविषयत्वे घटादेरपि व्यक्ति-विशेषत्वादुक्तव्यवहारविषयत्वापत्तिः, व्यक्तौ[5] विशेषस्य गोत्वादि-रूपत्वे तु मदिष्टसिद्धिः। सदात्मना न ब्रह्मण इत्याद्यप्ययुक्तम्। सदानन्दरूपयोरखण्डैकरूपत्वेन सदात्मनाऽऽवरणाभिभवे आनन्दात्म-नाऽपि तदभिभवसंभवात् आनन्दात्मनाऽपि प्रकाशापत्तेः। प्रति-नियतेन्द्रियेत्याद्यपि न युक्तम्, ब्रह्मणोऽत्यन्ताव्यक्तत्वेन अतीन्द्रिय-त्वात्। 'नावेदविन्मनुते तं' न चक्षुषा दृश्यते, सर्वभूतेषु गूढः, दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया' इत्यादिश्रुतेः। सत्तादृष्टान्तोप्य-युक्तः, तस्याः योग्यव्यक्तिवृत्तिजातित्वेन योग्यत्वेऽपि ब्रह्मणोऽतथा-त्वेन अयोग्यत्वात्। अतोऽनुभव इत्यादिवार्तिकमप्ययुक्तम्, 'अथ परा यया तदक्षरमधिगम्यते' इत्यादिश्रुत्या ब्रह्मबोधकत्वस्य परविद्या-रूपोपनिषदां लक्षण[6] स्योक्तत्वात्, प्रत्यक्षादेर्ब्रह्मबोधकत्वे तत्र तदति-

---

[1] तद्रूप. [2] अज्ञातचिद्विषयत्व. [3] तादात्म्येन. [4] रूपत्वा. [5] वृत्तौ. [6] निषदंशलक्षण. [7] तद.

व्याप्तेः। कालदृष्टान्तोप्ययुक्तः; उपनयसन्निकर्षेणैव साक्षिणा वा कालभानात्। स्वभावतो योग्यस्येत्याद्यपि न युक्तम्; आकाशस्येव ब्रह्मणोऽपि रूपाद्यभावेन स्वभावायोग्यत्वात्। ब्रह्म तु न द्रव्यमित्याद्यपि न युक्तम्; अस्थूलादिश्रुत्या घटादिसाधारणस्थौल्यादेरेव निषेधेन परिमाणमात्रानिषेधात्, "महान्तं विभुमात्मानं, अणोरणीयान् महतो महीयान्, ज्यायानेभ्यः त्रिभ्यो लोकेभ्यः, सर्वं समाप्नोषि, सर्वत्र प्रसिद्धोपदेशात्" इत्यादिश्रुतिस्मृतिसूत्रैः ब्रह्म परिमाणवत्, उपादानत्वादित्यादियुक्तया च ब्रह्मणि परिमाणसिद्धेः, अद्रव्यस्य तस्याम्बरादिधारणानुपपत्तेः। धर्म्यन्यूनसत्तेत्याद्यपि न युक्तं; जगतः कल्पितत्वासिद्धौ द्रव्यत्वे ब्रह्मन्यूनसत्ताकत्वासिद्धेः" इति, तत्तुच्छम्; गोत्वादिसामान्यं विनाऽप्युक्तव्यवहारस्योपपादितत्वात्, सदानन्दयोः कल्पितभेदेन घटादिवृत्त्या घटाद्यवच्छिन्नसद्रूपस्यैव प्रकाशस्वीकारेण च दोषाभावस्योक्तत्वात्, 'आनन्दं ब्रह्मणो रूपम्, आनन्दं ब्रह्मणो विद्वान्' इत्यादिश्रुतिभिरुक्तभेदस्यानुवादात्। किंच सदानन्दयोर्मास्तूक्तभेदः[1], तथापि न क्षतिः; सद्रूपस्य घटादिविशेषणतया व्यवहारं प्रति सद्रूपमूलाज्ञानं न विरोधि, घटादिवृत्तिशून्य[2]काले घटादिव्यवहारस्य विरोधिपल्लवाज्ञानसत्त्वेन[3] तद्विशेषणतया सद्रूपभानासम्भवात्। पल्लवाज्ञानावृत्तं[4] सद्रूपमित्युपचर्यत इत्यस्मिन्नर्थे प्रकृतग्रन्थतात्पर्यात्। आनन्दरूपमपि विशेषणतया व्यवह्रियत एव—

'अस्ति भाति प्रियं नाम रूपं चेत्यंशपञ्चकम्' इति व्यवह्रियमाणस्य पञ्चांशत्वोक्तेः घटोस्तीत्यादिवत् घटः प्रेयानित्यादिप्रतीतेः। न च सद्रूपस्य घटादिवृत्तिविषयत्वे मूलाज्ञाननिवृत्तिः स्यादिति वाच्यम्; आपातश्रौतज्ञानस्येव घटादिवृत्तेरपि तदनिवर्तकत्वात्, सामग्रीविशेषजन्यज्ञानस्यैव विजातीयत्वेन तन्निवर्तकत्वस्योक्तत्वात्। न च विशेषणतया

[1] मास्तु भेदः. [2] घटादिशून्य. [3] पल्लवाज्ञानस्य सत्त्वे. [4] नावृतं.

व्यवहारस्यावरण[1]प्रतिरुद्धत्वे घटादिवृत्तिविषयत्वं सद्रूपे व्यर्थमुक्तमिति वाच्यम्; सदुपरक्तघटादिसंस्कारार्थं तदुक्तेः, सम्भवप्राचुर्यमात्रेण तस्योक्तत्वाच्च। 'नावेदवित्' इत्यादिश्रुतेस्तु न विरोधः, मूलाज्ञानस्य वेदजन्यवृत्त्यैव निवृत्तिरित्येतत्परत्वात्। सत्ताद्दष्टान्तस्तु न त्वया दृष्टान्तः, यथा सत्ता सर्वेन्द्रियग्राह्या तथा ब्रह्म; उक्तयुक्तिकलापसत्त्वे जातित्वाभावस्याप्रयोजकत्वात् ब्रह्मण एव सर्वजातिरूपत्वस्योक्तत्वाच्चेत्याशयात्, सद्रूपं धीमात्रविषयत्वेन सर्वानुभविकमित्येतत्परत्वेन मया व्याख्यातत्वात्, सत्तेत्यादेः दृष्टान्तत्वाभावाच्च। उक्तवार्तिकमपि युक्तम्, 'अथ परा' इत्यादिश्रुत्याऽक्षरविषयकमूलाज्ञाननिवर्तकत्वस्यैव लक्षणस्योक्तत्वात्, कालस्योपनीततया न भानं, प्रत्युक्तत्वात्, तया विनापि भानस्योपपादितत्वाच्च। साक्षिणा न तज्ज्ञानं, तस्य क्रियादिरूपस्य साक्षिण्यनध्यासात्। स्वभावेत्यादि[2]रोदनं तु प्रत्युक्तम्। ब्रह्म त्वित्यादिकं तु युक्तम्[3]; अस्थूलादिश्रुत्या परिमाणमात्रस्यैव निषेधात् सङ्कोचे मानाभावात्, घटादिसाधारणपरिमाणस्य ब्रह्मण्यप्रयुक्त[4]त्वात्, सर्वभासकत्वादिना प्रसक्तसर्वसम्बन्धयोग्यस्य परममहत्त्वस्यैव प्रसक्तत्वात्। अणीयानित्यादेः दुर्बोधत्वपरत्ववत् महीयानित्यादेः परिमाणशून्यत्वपरत्वात्, अविद्यादि[5]महत्साधारणपरिच्छेदशून्यत्वपरत्वाद्वा। सर्वत्र प्रसिद्धेत्यादिसूत्रेण मनोमयत्वादिना ब्रह्मोपासना, सर्वं समाप्नोषीति स्मृत्या सर्वसम्बन्धः प्रतिपाद्यते, न परिमाणम्। उपादानत्वमपि न परिमाणसाधकं; व्याप्तिग्राहकतर्काभावात्। अतएव द्रव्यत्वमपि न तथा; विवर्तोपादानत्वे तदुपयोगस्य शङ्कानास्पदत्वात्। एवं धारणं न द्रव्यत्वसाधकम्; न हि ब्रह्मणि ब्रह्माण्डादिधारणं संयोगविशेषः, निरवयवे संयोगाभावात्, किन्तु आध्यासिकतादात्म्यं पतनप्रतिबन्धकप्रयत्नो वा, तस्य च मायि-

[1] स्यावरणा. [2] साक्षिणा तदज्ञानस्य क्रियादिरूपस्य साक्षिण्यध्यासात्। सत्ता वेत्यादि. इति कोशान्तरे पा. [3] न युक्तम्. [4] प्रसक्त. [5] असत्यादि.

कस्याद्रव्येऽपि सम्भवात् । उक्तं हि पदार्थखण्डने—"ईश्वरस्य परिमाणवत्त्वे मानाभावः, द्रव्यत्वस्य तृटित्वादेरिव परिमाणासाधकत्वात् । रूपादीनां च नेन्द्रियायोग्यत्वं, मानाभावात्, अतीन्द्रियानन्तस्पर्शकल्पने गौरवात् न स्पर्शवत्त्वेन द्रव्यसमवायित्वं, किन्तु जातिविशेषेण" । तट्टीकायां चोक्तं रामभद्रसार्वभौमैः—'एवमीश्वरे जीवे च द्रव्यत्वे संयोगादौ च मानाभावः, आत्ममनोयोगादेः हेतुत्वेऽपि न मानम्' इत्यादि । जन्यमात्रं प्रति द्रव्यत्वेन परिणामिकारणत्वेऽपि न क्षतिः । अन्यूनसत्ताकत्वे च यथाव्याख्याते न कोऽपि दोष इति । यदपि देशकालयोः कुत्रापि नात्यन्ताभावः, स्वस्मिन्नपि सत्त्वादित्याद्युक्तं; तच्छोभतेतरां, देशकालान्तरयोः देशकालात्यन्ताभावसत्त्वात्, स्वस्मिन् स्वसत्त्वस्य विरुद्धत्वात् देशकालान्तरस्यैव देशकालयोः सम्बन्धप्रतीतेः । यदपि प्रमेयत्वादेः स्वस्मिन् वृत्तिरित्युक्तं दृष्टान्ततया, तदपि न; प्रमेयत्वान्तरमादायैव प्रमेयत्वं प्रमेयमित्यादिबुद्ध्युपपत्तेः । किंच प्रमेयत्वादेरेकस्य सर्व[1]सम्बन्धित्वेऽपि न देशकालयोरेकैकयोः तथात्वं, अविद्यारूपयोस्तयोस्तदिति चेन्न; अविद्यायाः तादात्म्यादिसम्बन्धेन स्वस्मिन् जीवेशभेदादौ चाभावात्[2] । न हि घटाभावे घटो नास्तीतिवदविद्या स्वस्मिन् अस्तीति धीरस्ति । सर्वत्र देशकालौ स्त इति धीस्तु सर्वं दृश्यं विनाशीतिवत् सर्वत्र नैकसम्बन्धविषयिका ॥

सारस्वतैस्तर्करत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तखण्डानामखण्डि मितताद्युतिः ॥

इति परिच्छिन्नत्वनिरुक्तिः.

---

[1] रेकस्यासर्व. [2] जीवेशभेदाभेदौ च भावात्.

अंशित्वविचारः.

चित्सुखाचार्यैस्तु 'अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वात् इतरांशिवत्' इत्युक्तम्। तत्र तन्तुपदमुपादानपरम्। एतेनोपादाननिष्ठात्यन्ताभावप्रतियोगित्वलक्षणमिथ्यात्वसिद्धिः। न च-कार्यस्य कारणाभेदेन तदनाश्रितत्वात् सिद्धसाधनं, अनाश्रितत्वेन अन्याश्रितत्वेन वा उपपत्त्या अर्थान्तरं चेति वाच्यम्; अभेदे कार्यकारणभावव्याहत्या कथञ्चिदपि भेदस्यावश्याभ्युपेयत्वात्। न च 'तदनन्यत्वमारम्भणशब्दा-

---

अंशित्वात्—उपादानतानिरूपकत्वात्, जन्यत्वाद्वा। ननु तन्त्ववच्छिन्नचैतन्यमेवोपादानं न तु तन्तुरिति मते पटे सिद्धसाधनम्; किंच उक्तप्रतियोगित्वं न मिथ्यात्वस्वरूपं, घटादेः सत्यत्वमतेऽपि तत्र तत्स्वीकारादित्यर्थान्तरम्। अपिच पटान्तरे तन्त्वन्तरानिष्ठाभावप्रतियोगित्वानुमित्यर्थमेकोक्तय[1]लाभस्तत्राह—**तत्रेति**। एतत्पदं[2] तु पक्षीभूतव्यक्तिपरामित्याशयेन तत्स्थाने स्वपदमाह—**स्वेति**[3]। **भेदस्येति**। तथाच कार्यस्य कारणानाश्रितत्वेऽपि कारणस्य कार्यभिन्नत्वेन कार्यप्रतियोगिकसम्बन्धानुयोगित्वान्न कार्यात्यन्ताभाववत्त्वम्। अन्यथा न्यायादिमते बदरं कुण्डीयमित्यादिधियो भ्रमत्वापत्तेः, कुण्डाभाववति कुण्डप्रकारकत्वात्। न च तादात्म्यसम्बन्धो भेदस्यैव विरोधी नात्यन्ताभावस्येति वाच्यं; मन्मते ययोस्तादात्म्यं तयोरवश्यं भेद इत्युक्तत्वात्, तादात्म्यस्य परकीयसमवायस्थानीयत्वाच्च तस्यात्यन्ताभाव एव विरोधित्वात्[4]। अतएव धनानाधिकरणे धनस्वामिन्ययमधन[5] इत्यादिधीर्न प्रमा, मण्यादिवृत्तितृणादौ च न दाहादिकं, मण्याद्यभावसत्त्वात्।

---

[1] मित्यर्थ ऐकात्म्य. [2] तत्पदं. [3] मूले नोपलभ्यते. [4] भावविरोधित्वात्. [5] धनस्वामीतिवदयमधन.

'दिभ्यः' इत्यधिकरणविरोधः; उपादानव्यतिरेकेणोपादेयं नास्तीत्यस्यैव तदर्थत्वात्। बाधात्तन्मात्राश्रितत्वेन पक्षविशेषणाद्वा नार्थान्तरम्। न च प्रकृतेऽपि बाधः, तस्योद्धरिष्यमाणत्वात्। न चात्यन्ताभावस्य प्रामाणिकत्वाप्रामाणिकत्वाविकल्पावकाशः, तस्य प्रागेव निरस्तत्वात्। न च कस्यचित्पटस्य संयोगवृत्त्यै-तत्तन्तुषु सत्त्वेन तत्र व्यभिचार इति वाच्यम्; तत्समवेतस्य तन्निष्ठात्यन्ताभावप्रतियोगित्वमङ्गीकुर्वतः तत्संयोगिनस्तन्निष्ठात्यन्ताभावप्रतियोगित्वाङ्गीकारेण पक्षसमत्वात्। न चाव्याप्य-

---

न च मण्यादिसंयोग एव प्रतिबन्धकमिति वाच्यम्, तत्त्वेन प्रतिबन्धकत्वे गौरवात्। बदरे कुण्डं नेत्यादिधीस्तु वृत्तिनियामकसंयोगेनाभावविषयिका। अतएव तत्सत्वेऽपि संयोगेन कुण्डीयं बदरमित्यादिधीः। अतएव पृथिवीत्वादिकं प्रति संयोगेन गगनादेर्व्यापकत्वोक्तिप्रस्तावे गगनाभाववतोऽपि पृथिव्यादेः संयोगेन तत्सम्बन्धित्वादिति दीधितिवाक्ये उत्पत्तिकालावच्छेदेन संयोगेन समवायेन वा गगनाभावः पृथिव्यादाविति व्याचक्षते। अथवा भेदसत्त्वेन तादात्म्यसम्बन्धसंभवोक्तिद्वारा स्वोपादाननिष्ठात्यन्ताभावप्रतियोगिस्वतादात्म्यैकत्वमेव मिथ्यात्वमिति ज्ञापितम्। **कथंचिदिति**। प्रातीतिकस्येत्यर्थः। तादात्म्यसम्बन्धत्वान्यथानुपपत्त्या भेदकल्पनात् भेदोपजीव्यत्वेनाभेदरूपतादात्म्यस्य व्यावहारिकत्वादिति भावः। **बाधादिति**। कारणानाश्रितस्यापि पटादेर्भूतलाद्याश्रितत्वादनाश्रितत्वबाध इति भावः। **तन्मात्राश्रितत्वेनेति**। स्वोपादानान्यस्मिन् तादात्म्यसम्बन्धेनानाश्रितत्वेनेत्यर्थः। तेनान्यतादात्म्यवत्त्वेनापि नार्थान्तरम्। **प्रामाणिकत्वेति**। तात्त्विकत्वेत्यर्थः। **प्रागेवेति**। तात्त्विको व्यावहारिको वेत्यादेरुक्तत्वादित्यर्थः। ननु मूले वृक्षे न तत्संयोग इतिवत्तन्तुषु दशायां न पट इति प्रतीतेः तादात्म्येन पटस्य अव्याप्यवृत्तित्वं, तत्राह—**संयोगेति**।

वृत्तित्वेन अर्थान्तरम्; पटतदभावयोरेकाधिकरणवृत्तौ विरोधस्य जगति दत्तजलाञ्जलित्वप्रसङ्गात्, संयोगतदभावयोरप्येकाधिकरणवृत्तित्वानभ्युपगमात्। अभ्युपगमे वा एतत्तन्तुत्वावच्छिन्नवृत्तित्वमत्यन्ताभावस्य विशेषणं देयम्। एवमेतत्कालीनत्वमपि। तेन कालान्तरीयाभावमादाय नार्थान्तरम्। न चेह तन्तुषु पट इति प्रत्यक्षबाधः, तस्य भ्रमसाधारणतया चन्द्रप्रादेशिकत्वप्रत्यक्षवदप्रामाण्यशङ्कास्कन्दितत्वेनाबाधकत्वात्। बाधोद्धारे च विस्तरेणैतद्वक्ष्यामः। न चान्यासमवेतस्यांशित्वमेतत्तन्तुसमवेतत्वं विना न युक्तमिति विरुद्धो हेतुरिति वाच्यम्; एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वेपि एतत्तन्तुसमवेतस्य सत्त्वेनांशित्वस्य साध्येनाविरोधात्। एतन्निष्ठात्यन्ताभावाप्रतियोगित्वं हि एतत्समवेतत्वे प्रयोजकं न भवति; परमते केवलान्वयिधर्ममात्रस्य एतत्समवेतत्वापत्तेः। किन्त्वेतन्निष्ठप्रागभावप्रतियोगित्वादिकम्। तच्चैतन्निष्ठात्यन्ताभावप्रतियोगित्वेऽपि न विरुद्ध-

---

उक्तबुद्ध्योः[1] मूले वृक्षवृत्तिसंयोगाभावः मूलाद्यवच्छिन्नवृक्षे संयोगाभावो वा, दशायां तन्तुवृत्तिपटाभावः, दशावच्छिन्नतन्तुषु पटाभावो वा विषय इति भावः। **एतत्तन्तुत्वावच्छिन्नवृत्तित्वं** एतत्पटानवच्छेदकानवच्छिन्नत्वम्। तेन मिथ्यात्वघटकाभावस्यावच्छिन्नत्वास्वीकारेपि न क्षतिः। तत्पटानवच्छेदकेत्यत्र देशकालसाधारणमवच्छेदकत्वं निवेश्यमित्याशयेनाह—**एवमेतदिति**। **प्रयोजकं** समव्यापकं, न तु व्याप्यमात्रं व्यापकमात्रं वा; आद्योक्तेर्व्यर्थत्वात्, द्वितीये केवलान्वयिनि वक्ष्यमाणापत्त्यसम्भवात्। **केवलान्वयीति**। उपलक्षणमेतत्। केवलव्यापकमपि न भवति, तत्त्वग्राहकतर्काभावादिति भावः। ननु प्रागभावप्रतियोगित्वमपि न प्रयो-

---

[1] उक्तबुद्धेः.

मित्युपपादितमधस्तात् । एतत्समवेतत्वं च एतदुपादानकत्वम् । न तु नित्यसम्बन्धशालित्वं, तस्यानभ्युपगमात् । नन्वयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न, एतत्तन्त्वारब्धत्वात् व्यतिरेकेण पटान्तरवदिति प्रतिरोधः । न चाप्रसिद्धविशेषणत्वम्, एतन्निष्ठात्यन्ताभावप्रतियोगित्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि, संसर्गाभावप्रतियोगित्वव्याप्यत्वात् प्रागभावप्रतियोगित्ववदिति सामान्यतस्तत्प्रसिद्धेः । न चाकाशात्यन्ताभावस्य घटादौ संसर्गाभावप्रतियोगित्वव्याप्यत्वग्रहात्तस्य च केवला-

जकं, तत्तन्तुसमवेतद्रव्यत्वादौ तदभावात्तत्राह–**एतत्समवेतत्वमिति** । एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगि, न एतदारब्धत्वादित्युक्तसाध्याभाववान् तत्पटोपादानोपादानकत्वादित्यर्थः । तेन तत्पटाव्याप्यवृत्तित्वान्न बाधः, न वा तत्संयोगजन्यत्वस्य तदारब्धत्वस्यास्मन्मते असिद्धिः । यद्यपि—संसर्गाभावप्रतियोगित्वस्यैव तादात्म्येन हेतुत्वसम्भवाद्व्याप्यत्वांशवैयर्थ्यम्, व्याप्यत्वं च यदि यत्किञ्चिद्रूपेण, तदा घटादिवृत्तित्वविशिष्टत्वेनाकाशाभावस्यापि तदस्ति ; यदिच अत्यन्ताभावप्रतियोगितात्वेन, तदा साधनवैकल्यम् । यदि संसर्गाभावप्रतियोगितात्वेन, तदा व्याप्यतायाः साधनतावच्छेदकरूपायाः[1] स्वव्यापकोक्तसाध्यसमानाधि[2]करणवृत्ति यत् संसर्गाभावप्रतियोगितात्वं तत्त्वेन हेतुता वाच्या । तथाच संसर्गाभावप्रतियोगितात्वस्य निवेशावश्यकत्वे[3] तेनैव रूपेण हेतुतासम्भवादितरवैयर्थ्यम्, किञ्चिन्निष्ठात्यन्ताभावप्रतियोगितात्वस्य[4] तादृशप्रतियोगितात्वरूपेणोक्तव्याप्तौ प्रविष्टत्वेन तेनैव रूपेण हेतुतासम्भवादितरवैयर्थ्यं च । न चास्तु तथैवेति वाच्यम् ; अप्रयोजकत्वात् । द्वितीयपक्षे साधनवैकल्यात् । अन्यथा भेदप्रतियोगितात्वेनापि उक्त-

[1] साधारणरूपायाः. [2] व्यापकोक्तसमानाधि. [3] कत्वेन. [4] प्रतियोगितात्वरूपसाध्यतावच्छेदकस्य.

न्वयित्वेन किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वाभावात् तत्र व्यभिचार इति वाच्यम्; संसर्गाभावप्रतियोगित्वानधिकरणे केवलान्वयिनि धर्मे सत्त्वेनाकाशात्यन्ताभावस्य संसर्गाभाव-प्रतियोगित्वाव्याप्यत्वेन व्यभिचाराभावादिति चेन्न; यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं तत्रैतत्तन्त्वारब्धत्वाभाव इति व्यतिरेकव्याप्तावेतन्निष्ठप्रागभावाप्रतियोगित्वस्य उपाधित्वेन प्रतिरोधस्य हीनबलत्वात्, एतत्तन्त्वारब्धत्वाभावव्यापकस्यैतत्तन्तुनिष्ठप्रागभावाप्रतियोगित्वस्य पक्षावृत्तेः पक्षवृत्तितया सान्दिह्यमानैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाव्यापकत्वात्, दृश्यत्वाद्यनुपपत्तिप्रतिकूलतर्कपराहतेर्वक्ष्यमाणत्वाच्च। अतएव एत-

सध्यानुमित्यापत्तेरित्युक्तानुमानं न सम्भवदुक्तिकम्—तथापि तदभ्युपेत्य दूषणान्तरमाह—**यत्रैतदिति**। प्रागभावानङ्गीकारे तु एतदुपादानकत्वाभाव एवोपाधिः। तादृशप्रतियोगित्वेन सन्दिह्यमाने पक्षे यदि उपाधेर्निश्चयस्स्यात्तदा तदृशप्रतियोगित्वरूपसाधन[1]व्यापकत्वमुपाधौ निश्चीयेत, स तु नास्तीत्याशयेन **पक्षावृत्तेरित्युक्तम्**। पक्षावृत्तित्वेन निश्चितस्येत्यर्थः। **सन्दिह्यमानेत्यादि**। सन्दिह्यमानं यदुक्तप्रतियोगित्वं तद्व्यापकत्वानिश्चयादित्यर्थः। तथाचैतदारब्धत्वाभावव्यापकोपाधिव्यभिचारित्वेन हेतुना एतदारब्धत्वाभावव्यभिचारित्वमेतन्निष्ठाभावप्रतियोगित्वे अनुमेय[2]मित्येतदनारब्धत्वे तादृशप्रतियोगित्वव्यापकतानिश्चयो न सम्भवतीति भावः। न चोक्तोपाध्यभाववति तादृशप्रतियोगित्वस्य सन्देहा[3]त्तत्रोक्तव्यभिचारित्वस्य हेतोरनिश्चय इति वाच्यम्; एतत्तन्तुपदस्य तत्पटोपादनपरतया तत्पटोपादानीभूतं यत्तन्त्ववच्छिन्नचैतन्यं तन्निष्ठप्रागभावाप्रतियोगित्वरूपोपाध्यभाववति तादृशचैतन्यारोपितसर्पादौ स्वोपादानवृत्तिस्वावच्छेदकावच्छिन्नात्यन्ताभावप्रतियोगित्वनिश्चयस्य परेणापि वा-

[1] साधना. [2] न प्रमेय. [3] योगित्वसंदेहा.

त्तन्त्वनारब्धत्वमपि नोपाधिः, उपाधिव्यतिरेकेण साध्यव्यतिरेके साध्यमाने सोपाधिकत्वस्य उक्तत्वात्, अव्याप्यवृत्तिसंयोगाभ्युपगमे तत्र व्यभिचाराच्च । अतएव यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं तत्र एतत्तन्त्वनारब्धत्वमिति न साध्यव्यापकताग्रहोऽपि, तत्रैव व्यभिचारादिति सर्वमनवद्यम् ॥

एवंच 'विमतं ज्ञानव्यतिरेकेणासत्, ज्ञानव्यतिरेकेणानुपलभ्यमानत्वात् स्वप्नादिवत्' इति विद्यासागरोक्तमपि साधु । ज्ञानव्यतिरेकेणासत्त्वमुक्तमिथ्यात्वान्यतमत्वं साध्यम् । ज्ञानव्यतिरेकेणानुपलभ्यमानत्वं चिदाभासे सत्येवोपलभ्यमानत्वं

च्यतयोक्तव्यभिचारित्वस्य हेतोर्निश्चयानपायात्, तादृशव्यभिचारित्वसंशयाहितव्यभिचारसंशयेनाप्युक्तव्यापकतानिश्चयप्रतिबन्धसम्भवाच्च । **उक्तत्वादिति** । उपाध्यभावे साध्याभावस्य व्यतिरेकव्याप्तेरेव वाच्यतया तत्र एतन्निष्ठप्रागभावा[1]प्रतियोगित्वस्योपाधेरुक्तत्वादित्यर्थः । **तत्र व्यभिचारादिति** । दशावच्छिन्नसंयोगे तत्पटानवच्छेदकानवच्छिन्नात्यन्ताभावप्रतियोगित्वरूपस्य साध्याभावस्य तत्तन्त्वारब्धत्वस्य हेतोश्च सत्त्वादित्यर्थः । न च स्वानवच्छेदकानवच्छिन्नस्वसमानाधिकरणाभाव[2] प्रतियोगित्वस्यैव साध्यतया उक्तप्रतियोगित्वस्य उक्तसंयोगे स्थापनकाले व्युत्पत्तिस्वाभाव्यात् तस्यैव स्वपदेन धार्यत्वात् नोक्तव्यभिचार इति वाच्यम्, प्रकृतानुमानवादिनव्यमते स्वत्वस्याननुगतत्वात्, व्युत्पत्तेर्व्याप्तिज्ञानादावनुपयोगाच्च, तत्पटावच्छेदकत्वेनैव साध्ये निवेशात् साध्योपाध्योः तत्तन्तुपदेन तत्पटोपादानस्यैव धार्यतया तत्तन्त्ववच्छिन्नचैतन्याधिष्ठानकसर्पादौ स्वानवच्छेदकानवच्छिन्नस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्याप्यनपायाच्च, तदारब्धत्वस्य तदुपादानकत्वरूपस्य सत्त्वाच्च; तत्संयोगजन्यत्वरूपस्य[3] पक्षेऽपि मन्मते अभावात् । **चिदाभासे** इति ।

[1] एतन्निष्ठात्यन्ताभावा. [2] भावा. [3] जन्यत्वस्य.

हेतुरिति न किञ्चिदनुपपन्नम्। एवमन्येषामपि प्रयोगा यथायोगमुपपादनीया इति शिवम्॥

इत्यंशित्वविचारः.

चिदाभासं विनापि यत्प्रकाशते तदन्यत्वं, स्वप्रकाशान्यत्वमिति यावत्। स्वावच्छिन्नचिद्विषयत्वं वा, जडानामेव चिदवच्छेदकत्वान्न ब्रह्मणि तत्। अथवा ज्ञानं सदात्मकं चिद्रूपम्। तथाच सत्तादात्म्याविषयकबुद्ध्यविषयत्वादिरूपः प्रत्येकं तदनुविद्धतया प्रतीयमानत्वादित्युक्तहेतुः पर्यवसन्नः। सदविषयकबुद्ध्यविषयत्वस्य ब्रह्मण्यपि सत्त्वात्तादात्म्यनिवेशः। चिदाभासशब्दस्यापि सत्तादात्म्यार्थकत्वाच्चिदाभासेत्यादेरुक्तार्थकत्वम्। एवंच बौद्धोक्तस्सहोपलम्भहेतु[1]रयमिति भ्रान्तिरेव। अर्थो ज्ञानभिन्नो ज्ञानाविषयकबुद्ध्यविषयत्वादित्यस्यैव बौद्धानुमानस्य बौद्धाधिकारे उक्तत्वात्। एतेन–ज्ञानात्[2] भेदेनानुपलभ्यमानत्वं ज्ञानाभावप्रयुक्तोपलब्धिविरहकत्वं वा हेतुः; नाद्यः, पटस्य ज्ञानं न तु पट[3] इत्यसिद्धेः, नान्त्यः, ज्ञान[4]मेवोपलब्धिरिति स्वस्य स्वाप्रयुक्तत्वादित्यादि परास्तमित्याह–**न किञ्चिदिति**॥

ननु विमतं मिथ्या, धीकाल एवान्यथा प्रमितत्वाच्चित्रनिम्नोन्नतादिवत्, भारूपवत्सुसंलग्नत्वात् सवितृ[5]च्छिद्रादिवत्; न चासिद्धिः, धीकाल एव 'इदं सर्वं यदयमात्मा' इति श्रुत्या सर्वात्मन आत्मत्वेन प्रमितेः, घटादि स्फुरतीति भारूपसंलग्नत्वाच्चेति कौमुदी। तत्रान्यथेत्यात्मत्वेनेत्यर्थे सदात्मत्वेन[6] प्रमितत्वस्यामिथ्यात्वव्याप्यत्वाद्विरुद्धो हेतुः, प्रतिपन्नोपाधौ निषेधप्रतियोगित्वेनेत्यर्थे तु असिद्धिर्व्यर्थविशेषणता च; द्वितीयस्तु सवित्रात्मनोः व्यभिचारी, 'सविता प्रकाशते आत्मा स्फुरति' इति तयोः भारूपसंलग्नत्वादित्यत आह— **एवमन्येषामिति**। अन्यथा प्रमितत्वादित्यस्य प्रपञ्चविलक्षणाखण्डानन्द-

---

[1] सदोपालम्भो हेतु. [2] ज्ञानत्वात्. [3] तन्तुपट. [4] ज्ञानत्व. [5] सचित्र. [6] त्वेनेत्यर्थः तदात्मत्वेन.

रूपेण प्रमिततादात्म्यादित्यर्थः । तच्च कल्पितं ब्रह्मण्यपीति धीकाल इत्युक्तम् । स्वधीकाल इत्यर्थः । ब्रह्मधीकाले च ब्रह्मणि न तत्, ब्रह्मधियः स्वेतरकल्पितध्वंसरूपत्वात् । तथाच ब्रह्मावृत्तिस्तद्धीविषयत्वावच्छिन्नप्रतियोगिताको वा भेदो हेतुरिति उक्तजडत्वहेतौ पर्यवसानम् । भारूपं स्वप्रकाशरूपं, तत्र सम्यक् लग्नत्वात् यावत्स्वरूपं सम्बद्धत्वात् । ब्रह्मणः स्वस्मिन्नसम्बन्धस्तु न तथा, कल्पितत्वात्, ब्रह्मान्यनिष्ठभासम्बन्धादिति यावदिति द्वितीयस्याप्यस्वप्रकाशत्वाद्युक्तहेतावेव पर्यवसानम् । सवितरि व्यभिचारोक्तिस्तु शोभते, तस्यापि पक्षत्वात्, दृष्टान्तस्तु शुक्तिरूप्यादि वा चित्रनिम्नोन्नतादि वेति[1] न विशेषः । यत्तु—"कथंचिद्भेदो यदि कार्यकारणत्वानुपपत्तयोच्यते[2] तर्हि कथंचित्त्वं मिथ्यात्वमेव । तच्चाबाध्यात्यन्ताभावप्रतियोगित्वमित्यभेदस्सत्य[3] इत्यागतमेव । एतन्निष्ठाभावप्रतियोगित्वेप्येतत्समवेतत्वादंशित्वस्य साध्येना[4] विरोधादित्यादि कथमप्ययुक्तम् ; तदत्यन्ताभाववति तत्प्रागभावस्य विरोधात् । अन्यथा वाय्वादौ रूपादिप्रागभावापत्तेः । केवलान्वयीत्याद्यपि न युक्तम्, एतत्समवेतत्वस्य यावत्स्वरूपमेतत्सम्बन्धवत्त्वरूपत्वात्,[5] तस्य च केवलान्वयिन्यपि सत्त्वात् । तत्तन्तुसंयोगिनि पटे व्यभिचारोऽपि युक्तः, तत्संयोगिनि तदत्यन्ताभावविरोधात् । समवायेनाभावस्य साध्ये निवेशे तु समवायानभ्युपगमपक्षे सिद्धसाधनमर्थान्तरं वा । इह तन्तुषु पट इति प्रत्यक्षं चन्द्रप्रादेशिकत्वप्रत्यक्षवदप्रमाणमित्यपि न ; दृष्टान्तस्यापरीक्षितत्वत्, दार्ष्टान्तिकस्य फलपर्यन्तार्थक्रियापरीक्षितत्वात्तयोर्वैषम्यात् । तत्र एतत्तन्तुनिष्ठेत्याद्यपि न युक्तम्, तथा सति हि पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यादावपि यत् पृथिवीतरत्तत्र पृथिवीत्वाभाव इत्यादिव्याप्तिग्रहे पाकजरूपाभावादिरुपाधिः स्यात्, पृथिवीत्वाभावव्याप-

---

[1] शुक्तिरूप्यादिवच्चित्रनिम्नोन्नतादिवद्वेति. [2] कारणत्वान्यथानुपपत्योच्यते. [3] मित्यतः भेदस्सत्य. [4] अंशस्य साध्येन. [5] वत् रूपत्वात्.

कस्य पाकजरूपाभावस्य पक्षावृत्तेः पक्षवृत्तितया सन्दिह्यमानपृथिवीतरा-व्यापकत्वात्। तथाच व्यतिरेकिमात्रोच्छेदः। दृश्यत्वानुपपत्तिस्तु न प्रति-कूलतर्कः,[1] संयोगादिना दृश्यत्वस्य वाच्यत्वात्[2]। एतत्तन्त्वनारब्धत्वरू-पोपाधिरेव प्रयोजकः, साध्यं प्रति समानियतत्वात्। नांशित्वं हेतुः, साध्यवति ब्रह्मण्यसत्त्वात्" इति, तत्तुच्छम्; स्वसमानाधिकरणस्वान्यू-नसत्ताकात्यन्ताभावप्रतियोगित्वमेव मिथ्यात्वमित्युक्तत्वादभेदसत्यत्वास-म्भवात्। तत्सम्भवे वा मिथ्याभेदस्य त्वन्मते अलीकत्वात् कथं ते कार्यकारणत्वम्? अत्यन्ताभावप्रागभावयोः विरोधस्तु दीधित्यादावेव निरस्तः। घटे रक्तरूपं[3] नास्तीति प्रत्ययात् तस्य प्रागभावादिवि-षयकत्वे रक्तताप्रागभावादिमति[4] रक्तेऽपि तत्प्रसङ्गात्। वाय्वादौ रूपादिप्रागभावापत्तिस्तु शोभतेतराम्, अत्यन्ताभावस्य प्रागभावाव्या-प्यत्वात्। केवलेत्यादिकमयुक्तम्; प्रयोजकत्वग्राहकतर्काभावस्यो-क्तत्वात्। तत्तन्तुसंयोगिनी[5]त्यादि न युक्तम्; तत्सम्बन्धिनि तदत्यन्ताभावस्य मिथ्यात्वानुमितिकाले सन्दिग्धत्वेन विरोधानिश्चय-त्वात्, समवायवादिनं प्रति समवायेन, तादात्म्यवादिनं प्रति तादात्म्येनाभावस्य निवेशेन सिद्धसाधनाद्यभावात्, नैकदा त्रयाणां विवाद इति न्यायात्, तन्तुः पटीय इति धीविषयसम्बन्धेन सम्बन्ध-सामान्येन वाऽभावस्य निवेशसम्भवाच्च। इह तन्तुषु पट इति प्रत्यक्षस्य त्वादृशैरिव चन्द्रप्रादेशिकत्वप्रत्यक्षस्यापि बहुभिः परीक्षित-त्वात्, विचारशून्य[6]परीक्षितत्वस्य दार्ष्टान्तिकेप्यभावात्, अर्थक्रियामात्रस्य स्वाप्नपदार्थेऽपि सत्त्वात्। यत्रैतदित्यादिकं तु युक्तमेव; साध्यासमा-नाधिकरणाधिकरणं[7] यत्साधनवत्तान्निष्ठाभावप्रतियोगितावच्छेदकः साध्य[8]-

---

[1] नुपपत्तिरनुकूलस्तर्कः. [2] व्याप्यत्वात्. [3] रूपं. [4] रक्तप्रागभाववति. [5] संयोगी. [6] शून्य. [7] साध्यासमानाधिकरणं. [8] वच्छेदकसाध्यसमानाधिकरणं साध्य इत्यधिकः पाठः.

समानाधिकरणवृत्तिर्यो धर्मः तद्वत्त्वरूपलक्षणस्योक्तोपाधौ[1] सत्त्वात् ज्ञानसम्भवाच्च। उक्तप्रतियोगित्वरूपसाधनवत्त्वेन उभयवादिनिश्चिते तत्तन्त्ववच्छिन्नचैतन्योपादानकसर्पादौ दशावच्छिन्ने तत्तन्तुसंयोगादौ च तत्पटोपादानोपादानकत्वाभावरूपसाध्यस्यासमानाधिकरणधर्मनिश्चयात्। एवं स्वानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वादिलक्षणस्यापि सत्त्वात् पृथिवीतररूपसाधनतादात्म्येन निश्चिते जलादौ पृथिवीत्वाभावरूपसाध्यस्यासमानाधिकरणधर्मो नास्ति न ज्ञायते[2] चेति प्रथमलक्षणस्य स्वानधिकरणत्वादि नस्ति न ज्ञायते[2] चेति द्वितीयादिलक्षणस्यासत्त्वात्,[3] ज्ञातुमशक्य[4]त्वाच्च। पृथिवी इतरभिन्ना पृथिवीत्वादित्यादौ पाकजरूपाभावादेरुपाधित्वासम्भवात्, व्यतिरेकिमात्रोच्छेदाप्रसक्तेः पाकजरूपाभावरूपोपाधिव्यभिचारित्वस्य पृथिवीतररूपसाधने निश्चयाभावे तेन हेतुना पृथिवीत्वाभावरूपसाध्यव्यभिचारित्वानुमानासम्भवाच्च,[5] सत्प्रतिपक्षोन्नायकतया दूषकत्वस्य तत्रासम्भवाच्च। उक्तं हि दीधितौ—"यत्र यद्दोषोन्नायकत्वमुपाधेः, तत्र तदुन्नयनौपयिक[6]; रूपवैकल्यमाभासत्वे बीजम्" इति। न च तथापि सन्दिग्धोपाधित्वं पाकजरूपाभावादेः स्यादिति वाच्यम्; साध्यहेत्वोर्व्याप्तिग्राहकतर्कसत्त्वात्। तदुक्तं हि मणौ—"यत्र साध्यहेत्वोः साध्योपाध्योर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयः, तत्र सन्दिग्धोपाधित्वम्। यत्र तु एकत्र तर्कावतारः, तत्र हेतुत्वमुपाधित्वं वा निश्चितम्। अत एव पक्षेतरत्वं न सन्दिग्धो[7]पाधिः" इति। न चैवमुक्तसर्पादावुक्तसाधननिश्चयस्योभयवादिनोः सम्भवेन साधनाव्यापकत्वसौलभ्यात् पक्षावृत्तेः पक्षवृत्तितया सन्दिह्यमानेत्युक्तिर्व्यर्थेति वाच्यम्; यदि उक्तसर्पादौ नोक्तसाधननिश्चयः, तथापि यत्रैतत्तन्त्वित्यादिव्याप्तिग्राहकतर्काभावा-

[1] क्तोपाय. [2] जायते. [3] स्य सत्वात्. [4] ज्ञातुं शक्य. [5] मानात्सम्भवाच्च. [6] नौपाधिक. [7] तरत्वं संदिग्धो.

त् सान्दिग्धोपाधित्वमेतान्निष्ठप्रागभावाप्रतियोगित्वस्याव्याहतामित्याभिप्रायेण तथोक्तत्वात् । संयोगादिना दृश्यत्वोपपादनं तु प्रतिवक्ष्यते । उपाधिरेवेत्यादिकं तु न युक्तं ; 'उपाधित्वे साध्यसमनियतत्वादिकं नोपयुज्यते' इत्यादेर्मण्यादावुक्तत्वात् । साध्यासमनियतत्वान्न हेतुत्वमित्युक्तौ न लज्जेति चित्रम् । तथा सति धूमादेर्वह्न्याद्यहेतुत्वापत्तेः । तर्कसत्त्वात्तत्र हेतुत्वमिति चेत्तर्हि साम[1]नैयत्यं कोप[2]युक्तम् ? वक्ष्यन्ते च प्रकृतहेतौ तर्काः । साध्यवति ब्रह्मणीत्ययुक्तम् ; ब्रह्मणोऽत्यन्ताभावप्रतियोगित्वे मानाभावस्य उक्तत्वात् । एतत्पटात्यन्ताभावः एतत्तन्तुनिष्ठः एतत्पटानाद्यभावत्वादित्यादिनव्यानुमानेषु परेणात्राशङ्कितमग्रे समाधेयम् । समाहितप्रायं चेत्याचार्यैरुपेक्षितम् । यदपि मिथ्यात्वघटकोऽभावो यदि न तात्त्विकः, तदा सिद्धसाधनादि । अथ यदि तात्त्विकः, मण्डनमते भावाद्वैतस्वीकारान्नाद्वैतहानिरिति तदाऽभावे अभावत्वादेर्ब्रह्मणि तदाश्रयत्वादेरावश्यकत्वात् भावाद्वैतमपि व्याहतम् । अभावस्य प्रवृत्तिनिमित्तस्य सम्भवात् ब्रह्म वाच्यं स्यात् । अखण्डार्थेन वेदान्तेन ब्रह्माभावयोर्द्वयोः संसर्गासिद्धिश्च, अन्यस्य तत्त्ववेदकत्वं नास्त्येवेत्यभावः कथं तात्त्विकः ? अद्वितीयपदस्य भावरूपद्वितीयाभावपरतया सङ्कोचे बीजाभावश्च । भावस्यापि स्वाभावाभावत्वेन सत्यता स्यात् । भेदोप्यभावत्वात् सत्यः स्यात् । ध्वंसादेस्सत्यत्वे मिथ्याप्रतियोगिना विरोधो न स्यात् । भावत्वस्येवाभावत्वस्यापि दुर्वचत्वात् कथमभावस्सत्यः ? दृश्यत्वादिहेतोरभावे व्यभिचारश्चेत्युक्तम् । तत्रोक्ताभावस्यातात्त्विकत्वमाचार्यैर्विवेचितत्वाददोषम् । तात्त्विकत्वमपि ब्रह्मान्यस्याभावस्य मण्डनमते युक्तमेव ; अभावत्वाभावाश्रय[3]त्वादेरतिरिक्तस्यानङ्गीकारादभावस्वरूपेण प्रतियोगिविशेषितेन ब्रह्माद्वैतमिति व्यवहारोपपत्तेः, अभावत्वस्यातिरिक्तत्वेप्यनुयोगितावशेषरूपस्य तस्य प्रतियोगिताया इवातात्त्विकत्व[4]सम्भवात् । आश्रयत्वमतिरिक्तमि-

[1] सम. [2] नोप. [3] अभावत्वाश्रय. [4] तात्त्विकत्वा.

त्युक्तिस्तु शोभते, सम्बन्धस्यैवाश्रयत्वरूपत्वात् । अभावस्य त्वधिकरणमेव सम्बन्ध इति द्वितीयाभावाश्रयत्वस्य ब्रह्मरूपत्वात् अभावस्येत्यादि न युक्तम् ; ब्रह्मणो विशिष्टरूपेण वाच्यत्वेपि तात्पर्यानुरोधेन लक्षणाङ्गीकारात् । अखण्डार्थेन महावाक्येनाभावासिद्धावपि 'एकमेवाद्वितीयम्' इत्याद्यवान्तरवाक्येन तत्सिद्धेः, तस्य च मण्डनमाते अखण्डार्थत्वाभावेऽप्यक्षतेः । न चावान्तरवाक्ये शुद्धाबोधे महावाक्ये तद्भानं न स्यादिति वाच्यम् ; ज्ञानानन्दादिपदेभ्योऽवान्तरवाक्यजन्यबोधे शुद्धरूपेणापि भानात्समानाधिकृतनानानामघटितस्यैकमेवाद्वितीयमित्यादेरेव सिद्धान्तेऽखण्डार्थत्वात्, नेह नानेत्यादिश्रुतेः मिथ्यात्वानुमितेश्चाभावसिद्धिसम्भवाच्च । न चैवं मिथ्यात्वघटकवस्तुमात्रस्यैव तात्त्विकतापत्तिः, स्वाधिकसत्ताकस्वसमानाधिकरणाभावप्रतियोगित्वस्य मण्डनमतेऽनुमेयतया तदन्यथानुपपत्त्याऽभावस्य तात्त्विकतासिद्धावपि तदन्यत्वस्य[1] तत्सिद्धयसम्भवात् । अतएवाद्वितीयपदे उक्तसङ्कोचोऽपि प्रामाणिकः । अन्यथा तत्राभावस्यापि निषेधे स्वप्रतियोग्याधिकसत्तानुपपत्तेः । किंच तत्त्वज्ञानोद्देशेन प्रवृत्त्यन्यथानुपपत्त्या तत्त्वज्ञानकार्योऽविद्याध्वंसो वाच्यः । तस्य च मिथ्यात्वे तत्त्वज्ञानबाध्यत्वान्न तत्कार्यत्वमिति स तात्त्विकः । एवंच मिथ्यात्वघटकात्यन्ताभावोऽ[2]विद्याध्वंसश्च तात्त्विकः, तदन्यत् दृश्यजातं मण्डनमतेऽपि मिथ्यैव, तात्त्विकत्वग्राहकयुक्तयभावादिति भावस्येत्यादि निरस्तं बोध्यम् । अभावत्वं दुर्वचत्वान्मिथ्यैव सप्रतियोगिकत्ववत् उक्ताभावव्यावृत्तदृश्यत्वं ध्वंसप्रतियोगित्वादिकमेव वा मण्डनमते मिथ्यात्वे हेतुरिति न व्यभिचारः ॥

सारस्वतैस्तर्करत्नैश्चान्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तखण्डानामखण्डि सांशताहुतिः ॥

इत्यंशित्वविचारः.

---

[1] तदन्यस्य. [2] भावे योऽविद्या.

सोपाधिकत्वभङ्गः

ननु दृश्यत्वादिहेतवः सोपाधिकाः; तथाहि—स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं स्वबाधकाबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वं वा विपक्षाद्व्यावृत्तं समव्याप्तम्। अतएव व्यतिरेकव्याप्तिमदुपाधिरिति चेन्न; ब्रह्मज्ञानमात्रबाध्ये देहा-

---

स्वबाधकेत्यादि। यत्रोपाधिः स्थाप्यः स स्वपदार्थः। स्वबाधकेन ज्ञानेनाबाध्यो यो दोषस्तत्प्रयुक्तं भानं यस्य तत्त्वम्, शुक्तिरूप्यादौ साध्यव्यापकं वियदादेः स्वबाधकाबाध्य[1]दोषाप्रसिद्ध्या शुक्तिरूप्यादावेव प्रसिद्धं तद्वियदादिनिष्ठसाधनाव्यापकं बोध्यम्। **स्वबाधकाबाध्यबाधकमित्यादि**। स्वपदार्थः पूर्ववत्। शुक्तिज्ञानादिरूपं यत् स्वबाधकं तदबाध्यं नात्र रूप्यमित्यादिधीरूपं, बाधकं प्रति निषेध्यत्वेन विषयः शुक्तिरूप्यादिः, स्वबाधकाबाध्यधीविषयत्वं वियदादावप्यस्ति, तद्बाधकब्रह्मज्ञानाबाध्यचिद्विषयत्वस्य तत्र सत्त्वात्। अतो बाधकं प्रति **निषेध्यत्वेनेति**। तथाच स्वबाधकाबाध्यस्वप्रतियोगिकाभावबुद्धिकत्वं समुदायार्थः। आकाशाद्यभावबुद्धेस्तद्बाधकब्रह्मज्ञान[2]बाध्यत्वादाकाशादावुक्तोपाधेरभावेन न साधनव्यापकतेति भावः। **विपक्षेत्यादि**। विपक्षात् ब्रह्मणस्तुच्छाच्च व्यावृत्तं, अतः समव्याप्तमित्यर्थः। उदयनादिमते समव्याप्तस्यैवोपाधित्वादिदमुक्तम्। **अतएव** समव्याप्तत्वादेव। ययोः व्यतिरेकव्याप्तिः, तयोरेव व्याप्य[3]वृत्तिव्यतिरेकिणोः अन्वयव्याप्तिः। अतएव पक्षेतरत्वं नोपाधिः, व्यर्थविशेषणत्वेन व्यतिरेके[4] व्याप्त्यभावादिति मते साध्यान्वयव्यतिरेकोन्नायकस्वान्वयव्यतिरेकत्वरूपं साध्यप्रयोजकत्वमुपाधित्वम्। अतएव पक्षेतरत्वेनोपाधिरिति मते च उपाधित्वसंपादनायाह—**व्यतिरेकव्याप्तिमदिति**।

---

[1]काबाध्या. [2] द्वाधकत्वमज्ञान. [3] व्याप्ति. [4] व्यतिरेक. [5] स्वाभावक.

त्मैक्ये मिथ्याभूते साध्याव्यापकत्वात् पर्वतावयववृत्त्यन्यत्वादिवत्, साधनवत्पक्षमात्रव्यावर्तकविशेषणवत्त्वेन पक्षेतरतुल्यत्वाच्च।

साध्याभावव्याप्यस्वाभावकत्व[1]मित्यर्थः। **साधनवदिति**। पर्वतावयववृत्तीत्यस्य स्वबाधकेत्यादेश्च विशेषणस्य पर्वतावयवरूपादेः वासनादि[2]दोषप्रयुक्तविकल्पविषयादलीकाच्च विपक्षाद्व्यावर्तकत्वात् साधनवदिति साधनवत्पक्षव्यावर्तकं यत्साधनवद्विपक्षाव्यावर्तकं विशेषणं तद्वत्त्वेनेत्यर्थः। साधनवद्विपक्षनिष्ठभेदप्रति[3]योगितावच्छेदकताया यन्निष्ठाया अनवच्छेदकं यद्विशेषणं तत्र तत्साधनवद्विपक्षाव्यावर्तकमन्यत्वादिनिष्ठोक्तावच्छेदकताया अनवच्छेदकं पर्वता[4]वयववृत्त्यादिकं पर्वतो धूमवान् वह्नेरित्यादौ साधनवद्विपक्षे अयःपिण्डादौ पर्वतावयववृत्त्यन्यत्वादि[5]मद्भेदासत्त्वात्स्वबाधकेत्याद्युपाधौ यद्यपि प्रकृतसाधनवान् विपक्षोऽप्रसिद्धः, तथापि साधनवद्विपक्षव्यावर्तको यावान् प्रसिद्धः तत्तदन्यत्वं स्वबाधकेत्यादिविशेषणेष्यस्त्येव। यद्विशेषणघटितस्य यस्योपाधेराश्रयाद्धिन्ने साधनवत्त्वविपक्षत्वोभयाभावः तत्तत्र साधनवद्विपक्षा[6]व्यावर्तकमिति वा बोध्यम्। आर्द्रेन्धनस्य तु आर्द्रत्व[7]विशेषणं साधनवद्विपक्षव्या[8]वर्तकमिति तदुपाधिः। **पक्षेतरतुल्यत्वादिति**। यदा[9] साध्यव्यापकताग्राहकतर्काभावनियतात् साधनवत्पक्षमात्रव्यावर्तकविशेषणात् पर्वतेतरत्वादिकं नोपाधिः, न वोपाधित्वेन कथायामुद्भाव्यं, तदा[10]पर्वतावयववृत्त्यन्यत्वादिकं स्वबाधकेत्यादिकं च तर्काभावे पक्षे व्यभिचारसंशयेन साध्यव्यापकत्वानिश्चयादित्यर्थः। उक्तं हि मणौ—न च पक्षतरत्वे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः, तत्र अनुकूलतर्काभावेन व्यापकत्वानिश्चयात्। बाधोन्नीते च तर्कोस्त्येव। एवं पर्वतावयववृत्त्यन्य-

---

[1] स्वाभावक. [2] वा साधनादि. [3] निष्ठप्रति. [4] पर्वतीया. [5] वृत्तित्वादि. [6] द्विपक्ष. [7] आदित्यादि. [8] द्विपक्षवद्व्या. [9] यथा. [10] तथा.

त्वादिकं नोपाधिः, पक्षमात्रव्यावर्तकविशेषणवत्त्वात् । उक्तं च तत्र दीधितौ—"तर्कादिना व्यापकतानिश्चये तु पक्षेतरत्वमपि बाधोन्नीतपक्षेतरत्ववन्निश्चितोपाधिः,[1] पक्षमात्रव्यावर्तकविशेषणवत्त्वं तु नानुपाधितायां बीजं, परिभाषामात्रत्वात्, किन्त्वनुकूलतर्काभावेन तादृशव्यापकत्वानिश्चय इति, तथाकथकसम्प्रदायानुरोधात् बाधानुन्नीतः[2] पक्षेतरो न कथायामुपाधित्वेनोद्भाव्यते" इति । ईश्वरवादे च मणावुक्तं—"पक्षेतरत्वादौ विपक्षबाधकाभावात् न साध्याव्यापकतानिश्चय इत्यनुपाधित्वे बीजम्" इति । अतएव सन्दिग्धोपाधित्वमपि तस्य नास्ति, दृश्यत्वादिहेतोः साध्ये व्यापक[3]ताग्राहकतर्कसत्त्वात्, उक्तोपाधौ साध्यव्यापकताग्राहकतर्कासत्त्वाच्च । उक्तं हि मणौ—"यत्र साध्योपाध्योः हेतुसाध्ययोः व्याप्तिग्राहकसाम्याच्चैकत्र व्याप्तिनिश्चयः, तत्र सन्दिग्धोपाधित्वं, व्यभिचारसंशयाधायकत्वात्, यत्रत्वेकत्र तर्कावतारस्तत्र हेतुत्वमुपाधित्वं वा निश्चितम्" इति । विपक्षाव्यावर्तकत्वेऽपि[4] साधनवद्विपक्षान्न व्यावर्तयतीत्यंशेन प्रकृतोपाध्योः पर्वतेतरत्वादिकं न सदृशं, किन्तु पर्वतावयववृत्त्यन्यत्वादिकमिति तदेव दृष्टान्तीकृतम् । तत्रायमभिप्रायः—पक्षेतरतुल्यत्वेन पर्वतावयववृत्त्यन्यत्वादेः यथोक्तमणिवाक्ये अनुपाधित्वमुक्तम्, तथा तत्सुसदृशयो[5]रुक्तोपाध्योरपि तदिति । यत्तु—'व्यतिरेके साधारणत्वात् पर्वतेतरत्वस्य अनुपाधित्वं, न तु विपक्षाव्यावर्तकविशेषणवत्त्वादिति तन्न[6] दृष्टान्तीकृतम्' इति, तत्तुच्छम्; उक्तविशेषणात् तदनुपाधित्वस्य मण्यादावुक्तत्वात्, तदभावस्य पक्षमात्रवृत्तित्वेन असाधारणत्वादन्वयव्याप्त्या सत्प्रतिपक्षासम्भवेऽपि व्यतिरेकव्याप्त्या तत्सम्भवाद्व्यभिचारज्ञापकतया दूषकत्वे तदभावासाधारण्यस्याप्रयोजकत्वात्, सत्प्रतिपक्षोन्नायकतयैवोपाधेः दूषकत्वे सत्प्रतिपक्षे

---

[1] पक्षेतरत्वविनिश्चिते उपाधिः. [2] बाधानुन्नीत. [3] साध्यव्यापक. [4] कत्वे सत्यपि. [5] तथाच तर्कसदृशयो. [6] तत्र.

न च बाधोन्नीतत्वात् सोप्युपाधिः, बाधस्याग्रे निरसिष्यमाणत्वात्। अपिच यद्व्यतिरेकस्य साध्यव्यतिरेकसाधकत्वं तस्यैव साध्यव्यापकत्वम्, इतरांशे अनुकूलतर्काप्रसरात्। तथाच 'क्षित्यादिकं न कर्तृजन्यं, शरीराजन्यत्वात्' इत्यत्र यथा शरीरविशेषणवैयर्थ्यात्च शरीरजन्यत्वं कर्तृजन्यत्वव्यापकम्, एवं

उपाध्युद्भावनाभावप्रसङ्गात्। यदपि प्रथमोपाधौ विशेषणं साध्यसमव्याप्त्यर्थं न तु पक्षमात्रव्यावृत्त्यर्थम्, अतस्तस्योपाधित्वमव्याहतमिति, तदपि न; समव्याप्त्यर्थमुक्तस्यापि साधनवत् पक्षमात्रव्यावर्तकत्वानपायात्। न हि तत्पक्षव्यावृत्तिमात्रार्थमुपात्तत्वम्,[1] अपितूक्तरूपम्। किंच दोषप्रयुक्तभानत्वं न ब्रह्मणि, तस्य स्वप्रकाशत्वात्। अतो विशेषणं विनापि साध्यसमव्याप्तिसत्त्वमिति न तदर्थं विशेषणं, किन्तु पक्षमात्रव्यावृत्त्यर्थमेव। भानं हि चैतन्यं चेत्तदा न तत्कुत्रापि दोषप्रयुक्तं, अनावृतचैतन्यं चेत्तदा वृत्तिद्वारा ब्रह्मण्यपि दोषप्रयुक्तं तद्वाच्यम्। तथाच परोक्षप्रातीतिके तस्य साध्याव्यापकत्वमतो वृत्तिरूपं तद्वाच्यम्। न च ब्रह्मणि दोषप्रयुक्तं तदस्ति, बाध्य[2]विषयकवृत्तेरेव दोषप्रयुक्तत्वात्। न च बाध्याविषयकत्वेऽपि तत्वाविषयकत्वेनालीकाकारवृत्तेः वासनादिदोषप्रयुक्तत्वादलीकवारणायोक्तविशेषणमावश्यकमिति वाच्यम्; अलीकाकारवृत्तेरस्माभिरस्वीकारात्, त्वया स्वीकारेऽप्यस्मान् प्रत्युपन्यस्तोपाधावुक्तविशेषणवैयर्थ्यात्। **बाधोन्नीतत्वादिति**। पक्षे साध्याभावानिश्चयरूपबाधेन[3] निर्णीतसाध्य[4]व्यापकताकत्वादित्यर्थः। यथा वह्निरनुष्णः कृतकत्वादित्यादौ वह्नीतरत्वमुपाधिः, पक्षस्य साध्याभाववत्तया निश्चितत्वरूपाद्विपक्ष[5]त्वाद्विपक्षाव्यावर्तकविशेषणशून्यत्वात् तथा स्वबाधकेत्यादिकमपीति भावः। **यदिति**। यदवच्छिन्नप्रतियोगिताकेत्यर्थः। **साधकत्वं** व्याप्यत्वम्। **तस्य** तद्विशिष्टस्य। **यथा शरीरेत्यादि**। शरीरजन्यत्वं यदि कर्तृजन्यत्वव्यापकं

[1] मुपात्तम्. [2] बाह्य. [3] निश्चयानेरूपकबाधे. [4] बाध्य. [5] रूपविपक्ष.

'वियदादिकं न मिथ्या, स्वबाधकाभिमताबाध्यदोषप्रयुक्त-भानत्वरहितत्वात्' इति साध्यव्यतिरेकसाधने स्वबाधकाभिमताबाध्यभागस्य वैयर्थ्यात् स्वबाधकाभिमताबाध्यदोषप्रयुक्त-भानत्वं न मिथ्यात्वव्यापकम्। दोषप्रयुक्तभानत्वं तु भवति साध्यव्यापकम्। तच्च साधनव्यापकमपीति नोपाधिः;

न स्यात्तदा कर्तृजयत्वाभावव्याप्याभावप्रतियोगि न स्यादिति तर्को नावतरति, लाघवेन जन्यत्वाभावेनैव व्याप्यतासम्भवेन शरीरविशेषण-वैयर्थ्यादिष्टापत्तित्वादिति यथा मण्यादावुक्तम्, एवं **स्वबाधकेत्यादि** न[1] मिथ्यात्वव्यापकं, यदि तत्तद्व्यापकं न स्यात् तदा तदभावव्याप्य-स्वाभावकं न स्यादित्यापत्तेरिष्टत्वाल्लाघवाद्दोषप्रयुक्तभानत्वाभावत्वेनैवा[2]-मिथ्यात्वव्याप्यतासम्भवेन स्वबाधकेत्यादिवैयर्थ्यादित्यर्थः। यत्र तु विशिष्टाभावत्वेनैव व्याप्यता व्यर्थविशेषणत्वाद्यभावात्तत्र विशिष्टरूपेणापि व्यापकत्वं, तर्कप्रसरात्। उक्तं हि मणावीश्वरवादे—"धूमविशेषादौ चन्दनवह्न्यादेः कारणत्वाद्विपक्षबाधकेन[3] विशिष्टस्य व्यपकत्वाद्विशिष्टा-भावस्य हेत्वभावव्याप्यत्वं, यत्र तु विपक्षे बाधकं नास्ति तत्र विशिष्टव्यापकता नास्ति" इत्यादि। न च शरीरजन्यत्वाभावे जन्यत्व-सामान्याभावत्वस्यासत्त्वात्तत्र शरीरांशस्य तेन न वैयर्थ्यं, धूमत्वेनेव धूमप्रागभावे प्रागभावत्वस्य[3] स्वसमानाधिकरणव्याप्यतावच्छेदका-न्तरघटितत्वस्य व्यर्थविशेषणतारूपत्वादिति वाच्यम्; विशेष्यविशेष-णयोः प्रत्येकाभावयोरेव विशिष्टाभावत्वस्वीकारात्, येन विना व्याप्तिः गृह्यते तदेव व्यर्थविशेषणमिति मते[4] वा तथोक्तत्वात्। उक्तं हि मणौ—"उक्तस्थले शरीराजन्यत्वे व्यर्थविशेषणत्वं, लाघवेनाजन्यत्वस्यैव व्याप्यत्वात्, येन विशेषणेन विना व्याप्तिर्न गृह्यते तस्यैव व्याप्यताव-च्छेदकत्वनियमात्। अतएव घ्राणं पार्थिवं, रूपादिषु मध्ये गन्धस्यैव

[1] स्वबाधकेत्यादिना. [2] नैव. [3] साधकेन धूमप्रागभावत्वस्य. [4] प्रकृते.

दृश्यत्वादिनैव मिथ्यात्ववत्तस्यापि साधनत्वात्। एवं द्वितीयोपाधावपि 'स्वबाधकाबाध्यबाधकं प्रति' इति विशेषणं व्यतिरेकसाधने व्यर्थम्। विशेष्यभागस्तु साध्यसाधनयोः

व्यञ्जकत्वादित्यत्र रूपादिषु मध्य[1] इति असिद्धिवारकमपि न व्यर्थम्, तेन विना व्याप्तयग्रहात्" इत्यादि। किंच तर्काप्रसरादित्यनेन व्यापकताग्राहकतर्कमात्रमुपाधित्वे बीजमुक्तम्। उक्तमण्यादिवाक्येऽपि तथोक्तम्। तथाच व्यर्थविशेषणत्वाभावेऽपि यथा शरीरजन्यत्वं तादृशतर्काभावात् न साध्यव्यापकम्। जन्यत्वमात्रं तु तत् यदि कर्तृजन्यत्व[2]व्यापकं न स्यात् तदा कर्तृजन्यतावच्छेदकं न स्यादिति तादृशतर्कसत्त्वात् साध्याव्यापकम्। तथा स्वबाधकेत्यादि न मिथ्यात्वव्यापकं, तादृशतर्काभावात्। दोषप्रयुक्तभानत्वं तु तद्व्यापकम्। मिथ्याभूतवस्तुमात्रं यदि दोषप्रयुक्तभानं न स्यात्तदा मिथ्या न स्यात् परमते वियदादिवदिति तादृशतर्कसत्त्वादित्यत्र प्रकृतग्रन्थतात्पर्यम्। व्यतिरेके व्यर्थत्वं तु तादृशतर्काप्रसरबीजमात्रोपलक्षणत्वेनोक्तमिति ध्येयम्॥

ननु यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकपाकजत्वं, तस्मिन् साध्ये श्यामत्वमुपाधिः, तथा दृश्यत्वादिना मिथ्यात्वे साध्ये दोषप्रयुक्तमानत्वं,[3] तस्मिन् साध्ये मिथ्यात्वमुपाधिः, अस्तु युगपदुभयसाधने त्वर्थान्तरं, मिथ्यात्व एव विप्रतिपत्तेस्तत्राह- **दृश्यत्वादिनेति**। युगपदुभयसाधनेपि नार्थान्तरं, मिथ्यात्वत्वावच्छिन्नविधेयकानुमितेरुद्देश्यत्वादुभयविषयकसमूहालम्बनानुमितेरपि तथात्वादुद्देश्यतानाक्रान्तसिद्धेरेवार्थान्तरत्वात्। न च तथापि पक्षे[4] साधनवति द्वयोरपि सन्दिग्धत्वात्सन्दिग्धात्साधनाव्यापकत्वात्सन्दिग्धोपाधित्वमेकैकस्याक्षतमिति वाच्यम्; साधने साध्यव्याप्यतानिश्चायकतर्कावतारे तदसम्भवस्योक्तत्वात्, साध्यं च नोपाधिरिति तार्किकोक्तेश्चेति। अथ यथा पर्वतावयववृत्तीति

---

[1] पञ्चसु मध्य, [2] जन्यत्वं, [3] भानवत्त्वं, [4] तथा विपक्षे,

व्यापक इति नोपाधिः । अतएवाधिष्ठानत्वाभिमतसमसत्ताक-दोषवद्धेतुजन्यज्ञानविषयत्वमुपाधिः । अत्र च ब्रह्मणोऽपि बौद्ध-कल्पितदोषवद्धेतुजन्यक्षणिकत्वादिज्ञानविषयत्वात् समव्याप्ति-सिद्ध्यर्थं अधिष्ठानसमसत्ताकेति विशेषणं, न तु पक्षमात्रव्याव्-र्त्त्यर्थम् । अतो न पक्षेतरतुल्यतेत्यपास्तम् । ब्रह्मणीव ब्रह्मणि कल्पिते क्षणिकत्वादावपि मिथ्याभूते धर्मे अधिष्ठानसमसत्ताक-दोषवद्धेतुजन्यज्ञानाविषयत्वादुपाधेः साध्याव्याप्तेः, व्यतिरेक-साधने व्यर्थविशेषणत्वस्योक्तत्वाच्च । नापि श्रुतितात्पर्याविषय-त्वमुपाधिः, श्रुतितात्पर्यविषयत्वस्य ब्रह्ममात्रनिष्ठतया तदभा-

---

विशेषणकृता पर्वता[1]वयवरूपादेर्व्यावृत्तिः[2] नोपाधितायामुपयुज्यते, किन्तु पक्षस्येव साधनाव्यापकत्वसम्पादकत्वादिति, उपाधित्वौपयिकी या विपक्षव्यावृत्तिः तदसम्पादकत्वादुक्तविशेषणस्य पक्षमात्रव्यावर्तकत्वं मण्यादावुक्तमिति दीधित्यादौ स्पष्टम् । तथा समव्याप्तिसम्पादकस्या-प्यधिष्ठानेत्यादिविशेषणस्य ब्रह्मव्यावर्तकत्वस्य[3] स्वानधिकरणेत्यादिनिरु-क्तोपाधित्वानौपयिकत्वादुक्तव्यावृत्त्यसम्पादकत्वेन पक्षमात्रव्यावर्तकत्व-मक्षतम् । आर्द्रेन्धनादेस्तु आर्द्रत्वादिविशेषणकृतायोगोलकादिव्या-वृत्तिः साधनाव्यापकत्वसम्पादकत्वादुपाधित्वौपयिकीत्याशयेनाह—**अत-एवेति**। समव्याप्तिसम्पादकत्वेप्युक्तरीत्या पक्षमात्रव्यावर्तकत्वादेवेत्यर्थः। **ब्रह्मणीवेत्यादि** । स्वजनकाज्ञानविषयावच्छेदक[4] रूपाधिष्ठानघटितो-क्तोपाधिर्यथा न ब्रह्मणि, तज्जनकाप्रसिद्धेः, तथा न तत्र कल्पिते क्षणिकत्वादावपि, तज्जनकाज्ञानविषयब्रह्मावच्छेदकाप्रसिद्धेः । तत्प्रसि-द्धिस्तु शुक्तिरूप्यादौ । स्वजनकाज्ञानविषयसमसत्ताकदोषनिवेशे तु तत्राप्रसिद्धया साध्यव्यापकत्वमपि । **ब्रह्ममात्रेति** । अवान्तरतात्पर्य-विषयत्वं तु यागादिनिष्ठे स्वर्गादिसाधनत्वे, न तु यागादौ, 'अनुप-

---

[1] कृतपर्वता. [2] व्याप्यवृत्तिः. [3] व्यावर्तकस्य. [4] विषयतावच्छेदक.

वस्य साधनव्यापकत्वात् । नापि प्रातिभासिकत्वमुपाधिः । तद्धि ब्रह्मज्ञानेतरबाध्यत्वम् ; तस्य च देहात्मैक्ये मिथ्याभूतेऽप्यसत्त्वेन साध्याव्याप्तेः, व्यतिरेके व्यर्थविशेषणत्वाच्च । नापि प्रतिभासमात्रशरीरत्वमुपाधिः, दृष्टिसृष्टिपक्षे साधनव्यापकत्वात्, परेषामसिद्धेश्चेति ॥

इति दृश्यत्वादीनां सोपाधिकत्वभङ्गः.

लब्धेस्तत्प्रमाणम्' इति जैमिनिसूत्रैकदेशेन मानान्तरानुपलब्ध एव श्रुतितात्पर्योक्तेः । साधनत्वादिविशिष्टतया यागादाविव मिथ्यात्वविशिष्टतया दृश्यमात्र एव श्रुतितात्पर्यात् साध्याव्यापकत्वापत्तेः परमतात्पर्यमेव निवेश्यमिति भावः । दोषजन्यधीविषयत्वमपि परोक्तं साधनव्यापकं प्रातिभासमात्रशरीरत्वमज्ञानविषयतानवच्छेदकत्वं प्रातीतिक एव सत्त्वात् साध्यं व्याप्नोति, न तु साधनमिति भावः । **दृष्टीति** । प्रतिकर्मव्यवस्था तु तत्पक्षे नास्तीति भावः । **परेषां** तत्त्ववादिनाम् । शुक्तिरूप्यादीनां अत्यन्तासत्त्वेन तत्र तदसिद्धेः साध्याव्यापकत्वमित्यर्थः । अत्यन्तासत्त्वादेव तत्र नाज्ञानविषयावच्छेदकत्वमिति चेदसतः सत्त्वेन धीवादिनां भवतां तस्यापि[1] सम्भवात्, परेषां तत्त्ववादितार्किकादीनां तदसिद्धेरज्ञानाप्रसिद्ध्या तदप्रसिद्धेरिति वाऽर्थः - स्वकालत्वव्यापकस्वधीकत्वं तदित्युक्तमपि[2] सुखादिषु साक्षिभास्यत्वेन। तत्प्रसिद्धावपि शुक्तिरूप्यादावत्यन्तासत्त्वेन तदसिद्धिः । तार्किकादीनामपि क्वचित्तत्सिद्धावपि क्वचिच्छुक्तिरूप्यादौ तदसिद्धिरिति साध्याव्यापकत्वमिति भावः । चकार उक्तोपाधिषु दोषान्तराणि समुच्चिनोति। तथाहि--स्वबाधकेत्यादौ स्वत्वस्यानुगतत्वेपि स्वबाधकबाध्यत्वं, यदि स्वजनकाज्ञाननिवर्तकनिवर्त्यत्वं तदा जनकत्वस्य स्वावच्छेदकघटितत्वात् स्वजनकत्वस्य

[1] तस्यामपि. [2] तदित्युक्तावपि.

शुक्त्यवच्छिन्नविषयकत्वादिरूपावच्छेदकभेदेन [1] स्वजनकाज्ञाननिवृत्ति-जनकत्वस्य शुक्तित्वप्रकारकेदंविशेष्यकत्वादिरूपावच्छेदकभेदेन नानाविधस्याननुगमः[2] । पल्लवाज्ञानास्वीकारपक्षे शुक्तिरूप्यादिबाधकब्रह्मज्ञाना[3]-बाध्यदोषाप्रसिद्धिः । यदि च स्वमिथ्यात्वनिश्चयनिश्चितमिथ्यात्वकत्वं[4] तत्तथापि निश्चयस्य तत्तद्धर्मितावच्छेदकादिभेदेन नानात्वादननुगमः । नेह नानास्तीत्यादिश्रुत्यादिजन्येन ईश्वरीयेन वा मिथ्यात्वनिश्चयेन दोषमात्रस्य निश्चितमिथ्यात्वकत्वादेतादृशदोषाप्रसिद्धिः । अथ जनकत्वं तत्त्वं वा अखण्डं न तु स्वावच्छेदकघटितं पल्लवाज्ञानं चास्तीत्यङ्गीकृत्य आद्य एव पक्षः, दोषभिन्नं यत्स्वभिन्नं तदविशेष्यकमिथ्यात्वनिश्चय-निश्चितमिथ्यात्वकत्वं तदिति पक्षो वा ग्राह्यः[5] । उक्तश्रुतिजन्यादि-मिथ्यात्वनिश्चयस्तु स्वाभिन्नाविशेष्यकः । स्वभिन्ना[6]विशेष्यकमिथ्यात्वनिश्च-यनिश्चितमिथ्यात्वकदोषप्रयुक्तभानकत्वस्य घटादावपि सत्त्वाद्दोषभिन्नेति । स्वाभन्न यद्दोषभिन्नं तदविशेष्यकेन 'घटाविद्ये मिथ्या' इत्यादिनिश्चयेना-विद्यारूपदोषमिथ्यात्वं निश्चितमिति न घटादौ तदिति चेन्न; तथापि द्वितीयपक्षे शुक्तिरूप्यतज्ज्ञापकदोषौ मिथ्येति निश्चयमादाय साध्याव्याप-कत्वाद्यत्र प्रातिभासिकान्तराविशेष्यकं स्वविशेष्यकं मिथ्यात्वज्ञानं न जातं, तत्रापि साध्याव्यापकत्वाच्च पक्षद्वयेऽपि दोषत्वस्य दोषमात्राननुगतत्वात्, साध्याव्यापकत्वादबाध्यान्तवैयर्थ्याच्च । न चान्यतमत्वेन दोषाणामनु-गमः, अनन्तदोषघटिततया युगसहस्रेणापि दुर्ज्ञेयत्वापत्तेः । न च स्वरूपतोऽन्यतमत्वं निवेश्यमिति वाच्यम्; त्वन्मते तस्य स्वरूपतो ज्ञेयत्वे गोत्वादिजात्यपलापापत्तेः तावद्व्यक्त्यन्यतमत्वस्यैव तत्त्वसम्भ-वादविद्यान्यदोषाणामन्यतमत्वस्यैव निवेशसम्भवेन अबाध्यांश[7] वैयर्थ्यात्, साध्यव्यापकत्वस्य तेन रूपेण ग्राहकतर्काभावादन्यथाप्रातीतिकाना-

---

[1] त्वाद्रूपावच्छेदेन भेदेन, [2] स्यानागमः [3] बाधकज्ञाना, [4] निश्चयानिश्चि-तमिथ्याकत्वं, [5] पक्षो नायुक्तः, [6] स्वभिन्न, [7] साध्यत्वान्त.

मन्यतमत्वेन[1] तादात्म्येन उपाधित्वसम्भवात्तदपेक्षया गुरुरूपानुधावनस्य तेऽनुचितत्वात् । अविद्यान्यदोषप्रयुक्तभानत्वानि यावन्ति वस्तुगत्या तावन्निष्ठप्रतियोगिताया लघुना तावदन्यतमत्वेन स्वरूपतोऽवच्छिन्नत्वात् स्वबाधकेत्यादिरूपावच्छिन्नप्रतियोगिताकाभावत्वस्य अप्रसिद्ध्या तेन रूपेण साध्याभावव्याप्यत्वाभावात् स्वबाधकेत्यादिरूपेण व्यापकताग्राहकतर्काप्रसरादुपाधित्वासम्भवात् स्वाप्नादिभ्रमे स्वाप्नादिप्रातीतिकस्यापि दोषत्वेन तत्र स्वबाधकजाग्रदादिबोधबाध्यत्वेन साध्या[2]व्यापकत्वाच्चेति । एवमुपाध्यन्तरेपि दोषा बोध्याः । यत्तु—"देहात्मैक्ये साध्याव्यापकतोक्तिः न युक्ता, मम देह इति देहात्मभेदस्यानुभाविकत्वेन तस्यैवाप्रसिद्धेः । यद्यतिरेकस्येत्याद्यपि न युक्तम्; एकनिष्ठव्याप्यतायामवच्छेदकयोस्सम्भवे तयोर्लघुनैव अवच्छेद्या सा, न गुरुणा, यथा नीलधूमनिष्ठव्याप्यता धूमत्वेन, न नीलधूमत्वेन । न च विशिष्टाभावे विशेष्यसामान्याभावत्वमस्ति, येन तन्निष्ठव्याप्यता तेनावच्छिद्येत । ईश्वरानुमाने तु शरीरजन्यत्वस्यानुपाधित्वं श्रुत्येश्वरसिद्धौ, पक्ष एव साध्याव्यापकत्वात् । ब्रह्मणीवेत्याद्यपि न युक्तम्; समसत्ताकान्तेन व्यावहारिकबाधाबाध्यस्येत्यस्य वाच्यत्वात्, ब्रह्मणि क्षणिकत्वादिज्ञापकदोषस्याविद्यादिरूपस्य शून्यवाद्युत्थापिततर्कादेर्वा व्यावहारिकबाधाबाध्यत्वात् । ब्रह्मण एवेत्याद्यपि न युक्तम्; श्रुतिजन्यप्रमां प्रति विषयत्वस्य प्रपञ्चे अवश्यवाच्यत्वात् धर्मादौ तदनङ्गीकारे तदसिद्ध्यापत्तेः । उक्ता च देवताधिकरणे परै[3]र्देवताविग्रहादिप्रमा श्रुतिजन्या" इति, तत्तुच्छम्; मनुष्यत्वादिविशिष्टस्य ऐक्यस्यात्मन्यध्यासस्वीकारेण तत्सत्त्वेऽपि मम देह इत्यनुभवे बाधकाभावादहङ्कारस्यापि मन्मते अस्मदर्थत्वेन तद्वेद्यस्यैवोक्तानुभवविषयत्वसम्भवात्, त्वन्मते ममात्मेतिवदभेदस्यैव षष्ठ्यालेखसम्भवाच्च । अन्यथा

[1] मनतीतत्वेन, [2] साध्यादि, [3] पदैः,

रजतमस्य स्वरूपमित्युक्तिमात्रेण इदंरजतयोरैक्यमप्यपलप्येत । विस्तरेण चैतदग्रे वाच्यम् । यद्यतिरेकेत्यादि युक्तं, विशेषणविशेष्ययोरेकैकाभावस्यैव विशिष्टधर्मावच्छिन्नप्रतियोगिताकत्वमित्यादेरुक्तत्वात् । ईश्वरेत्यादिकं तु शोभते; मीमांसकादिकं प्रतीश्वरानुमानस्य प्रवृत्ततया तेन श्रुत्येश्वरसिद्ध्यस्वीकारात् । अन्यथा सिद्धसाधनप्रसक्त्यैवानुमानवार्तालोपे उपाध्यन्वेषणा[1] नौचित्यात् । व्यावहारिकेत्यादिकं तु न युक्तम्; शुक्तिरूप्यादिज्ञापके दोषेपि व्यावहारिकस्य यद्बाधकं ब्रह्मज्ञानं तद्बाध्यत्वस्य सत्त्वात्, व्यावहारिकविषयकबाधाबाध्यदोषोक्तावपि व्यावहारिकदोषमात्रस्य तत्त्वेन शुक्तिरूप्यादाविव वियदादौ क्षणिकत्वादिज्ञानविषयत्वमादाय ब्रह्मणि चोक्तोपाधेस्सत्त्वेन साध्यसमव्याप्त्यभावात्, स्वं प्रतीत्यस्यापि बाधविशेषणत्वे [2]ततएव ब्रह्मनिष्ठक्षणिकत्वे तद्घटितोक्तोपाधेरसत्त्वात् साध्याव्यापकत्वस्य आवश्यकत्वात्तद्बारकस्य व्यावहारिकविषयकेत्यस्य व्यर्थत्वात् प्रातीतिकदोषज्ञाप्यप्रातीतिकविशेषे साध्याव्यापकत्वात्। श्रुतिजन्येत्याद्यपि न युक्तम्; नेह नानास्तीत्यादिश्रुतिजन्यप्रमाविषयत्वस्य दृश्यमात्रे सत्त्वस्योक्तत्वात्। निषेध्यत्वेन विषयत्वान्यविषयत्वोक्तावपि "इदगँ् सर्वमसृजत, सत्यं चानृतं च सत्यमभवत्" इत्यादिश्रुत्या मानान्तरनैरपेक्ष्येण ब्रह्मोपादानकत्वादिना कार्यमात्रप्रमापनात् कार्यमात्रनिष्ठकार्यतायाः व्यवहारकालाबाध्यत्वात् । अन्यथा घटादेरपि तादृशप्रमां प्रत्यविषयत्वात्, 'पृथिवी ब्रह्मेत्युपासीत' इत्यादिश्रुतिजन्यज्ञानस्य मानान्तरज्ञातपृथिव्याद्यंशे प्रमात्वाभावात् । किञ्चिदंशे[3] प्रमात्वविवक्षायां प्रातीतिकपृथिव्यादेरपि तादृशविषयत्वसम्भवान्मिथ्या नोपास्य[4]मिति सङ्क्षेपोक्ते-

---

[1] उपाध्यत्वेषणा. [2] तत एव ब्रह्मनिष्ठक्षणिकत्वस्यापि वारणाद्व्यावहारिकविषयकेत्यस्य व्यर्थत्वाच्च । प्रातीतिकदोषज्ञाप्यप्रातीतिकविशेषे ब्रह्मनिष्ठक्षणिकत्वे. इति कोशान्तरे पाठः. [3] किञ्चिदंशेन. [4] तन्नोपास्य.

आभाससाम्यभङ्गः

ननु—विमतं प्रातिभासिकं, दृश्यत्वात्; ब्रह्म मिथ्या, व्यवहारविषयत्वात् असद्विलक्षणत्वाद्वा शुक्तिरूप्यवदित्याद्याभाससाम्यमिति चेन्न; जगतो व्यावहारिकसत्त्वबाधे व्यवहारानुपपत्तिः, ब्रह्मणो मिथ्यात्वे शून्यवादापत्तिश्चेति प्रतिकूलतर्कपराघातेन तयोरसाधकत्वात्, प्रकृते च प्रतिकूलतर्कस्य निरसिष्यमाणत्वात्। किंच प्रातिभासिकत्वं ब्रह्मज्ञानेतरबाध्यत्वं प्रतिभासमात्रशरीरत्वं वा? आद्ये साध्ये देहात्मैक्ये व्यभिचारः, अप्रयोजकत्वं च। द्वितीये दृष्टिसृष्टिमतेन सिद्धसाधनम्। एवं ब्रह्मणि मिथ्यात्वे साध्ये सोपाधिके सिद्धसाधनम्। निरुपाधिके व्यवहारविषयत्वरूपो हेतुरसिद्धः, वेदान्तजन्यवृत्तिविषयत्वाभ्युपगमेऽप्यप्रयोजकः। एवमसद्विलक्षणत्वमपि

र्मिथ्यात्वेन ज्ञातं नोपास्यमित्यत्र तात्पर्यात्। तथाच साध्यव्यापकत्वरक्षार्थमबाध्यविषयकत्वरूपप्रमात्वनिवेशे साधनव्यापकत्वस्य दुर्वारत्वात्॥

सारस्वत्तैस्तर्करत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तखण्डानामुपाधिरपसारितः॥

इत्युपाधिभङ्गः

आभाससाम्यमिति। उक्तानुमानाभासा यथा न साधकाः तथा प्रपञ्चमिथ्यात्वानुमानमित्यर्थः। प्रपञ्चमिथ्यात्वे नानुपपत्तिः, आभासे तु साऽस्तीत्याशयेनाह—**न जगत इत्यादि**। जगतः व्यावहारिकमात्रस्य। **व्यावहारिकसत्त्वेति**। अज्ञातसत्त्वेत्यर्थः। **व्यवहारेति**। चक्षुरादिजन्यवृत्तिप्रत्यभिज्ञादी[1]त्यर्थः। अज्ञातत्वावच्छेदकघटादिस्वीकारे चाक्षुषादिवृत्तेः विषयेन्द्रियसम्बन्धादिजन्यायाः पूर्वदृष्टस्य दृश्यमानेनैक्यप्रत्यभिज्ञादेश्चानुपपत्तिरिति भावः। **अप्रयोजक इति**। यदि ब्रह्म

[1] प्रत्यक्षादी.

ब्रह्मण्यसिद्धमेव। क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वं ह्यसत्त्वम्, तद्विलक्षणत्वं च क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वरूपम्। तच्च शुद्धे ब्रह्मणि नास्त्येव। न च बाध्यत्वमसत्त्वं, तद्विलक्षणत्वं चाबाध्यत्वं, तच्च ब्रह्मण्यस्त्येवेति वाच्यम्; अबाध्यत्वेन बाध्यत्वलक्षणामिथ्यात्वसाधने विरोधात्, शुक्तिरूप्यदृष्टान्तस्य साधनविकलत्वाच्च, शून्यवादस्याग्रे निराकरिष्यमाणत्वाच्च। तस्मान्न दृश्यत्वादीनामाभाससाम्यमिति सिद्धम्॥

इत्याभाससाम्यभङ्गः.

मिथ्या न स्यात्तदा वृत्तिविषयो न स्यादिति न तर्कः, मिथ्यात्वाभावेऽपि तत्र कल्पितस्य वृत्तिविषयकत्वस्य सम्भवात्। ब्रह्मणः साक्षित्वेन बाधकप्रमाणस्य तत्रानवतारादिति भावः। **तच्च शुद्ध इति**। सत्तादात्म्यसत्त्वा[1] न्यतरवत्त्वरूपमुक्तार्हत्वं निर्धर्मके ब्रह्मणि नास्ति, किन्तु तदुपहित इति भावः। शुद्धे तत्स्वीकृतमप्यप्रयोजकमित्याशयेनाह–**शून्यवादस्येति**। यत्तु–"सुखानुभवपर्यन्तव्यवहारस्याप्यव्यावहारिकत्वस्वीकारे का व्यवहारानुपपत्तिः? स्वप्नोत्थापिततर्कवन्न तर्कः प्रतिकूलः। किञ्चेत्याद्यपि न युक्तम्; देहात्मैक्याप्रसिद्धेः, दृष्टिसृष्टेरप्रमाणिकत्वादनुपाधिकस्याव्यवहारे तदसिद्ध्यापत्तेः। एवमित्यादिकमपि न युक्तम्; 'स्वे महिम्नि' इति श्रुत्या स्वस्मिन्नेव ब्रह्मणः प्रतीत्यर्हत्वात् मिथ्यात्वस्यैव मन्मते तुच्छ[2]रूपत्वात्, शून्यवादस्यैव स्वयं स्वीकृतत्वेन आपत्त्यनर्हत्वात्" इति, तत्तुच्छम्; घटादिज्ञाने अन्वयव्यतिरेकसिद्धस्य चक्षुरादिजन्यत्वस्य प्रत्यभिज्ञादिसिद्धस्य पूर्वोत्तरकालीनयोरैक्यस्य च व्यावहारिकत्वं स्वीकृत्यैव घटादौ व्यावहारिकत्वपक्षप्रवृत्तेः दृष्टिसृष्टेर्मुख्यत्वस्य[3] सिद्धान्तत्वात्। देहात्मैक्यं तु स्थापितमेव; सर्वस्यैव

---

[1] तत्त्वा, [2] तुच्छत्व, [3] मुख्यत्वेनास्य,

प्रत्यक्षबाधोद्धारः.

ननु 'सन् घटः' इत्याद्यध्यक्षबाधितविषया दृश्यत्वादय इति चेन्न; चक्षुराद्यध्यक्षयोग्यमिथ्यात्वविरोधिसत्त्वानिरुक्तेः। तथाहि—न तावत् प्रमाविषयत्वं तद्योग्यत्वं, भ्रमाविषयत्वं वा तादृक्सत्त्वम्; चक्षुराद्यगम्यभ्रमप्रमाघटितत्वेन चक्षुराद्ययोग्यत्वाद्वक्ष्यमाणदूषणगणग्रासाच्च। तथाहि—नाद्यः; असति प्रमाणप्रवृत्तेः तद्विषयत्वात् प्राक् सत्त्वस्य वक्तव्यत्वेन तस्य तदन्यत्वात्, सत्त्वनिरूपणं विना सदर्थविषयत्वरूपप्रमात्वस्य निरूपणे

दृश्यस्य परोक्षत्वापरोक्षत्वान्तरत्वबहिष्ट्वादिना यथानुभवं साक्षिणि कल्पनासम्भवादस्थिरज्ञानानामर्थानां च कल्पने गौरवात्, ज्ञानोत्पत्ति[1]कालत्वेन अभ्युपगतकाले अर्थानामेवोत्पत्तिस्वीकारे लाघवात्, दृष्टिसृष्टिपक्षस्यादरणीयत्वात् 'अचिन्त्यमव्यवहार्यम्' इत्यादिश्रुत्या अव्यवहार्यस्यापि ब्रह्मणः स्वत एव सिद्धेरुक्तत्वात्। एवमित्यादि युक्तम्; उक्तार्हत्वस्य स्वोपहित एव ब्रह्मणि सत्त्वात्, शुद्धे सत्त्वेऽप्यप्रयोजकत्वस्योक्तत्वात्, अस्मन्मते मिथ्यात्वस्य उक्तार्हत्वघटितत्वस्योक्तत्वात्त्वन्मतसिद्धस्य सर्वदेशकालवृत्त्यत्यन्ताभावप्रतियोगित्वस्यापि मिथ्यात्वस्य अत्यन्तासति ब्रह्मणि च सत्त्वे मानाभावस्योक्तत्वेन शून्यवादे अस्मत्स्वीकारोक्ते[2]रुन्मत्तप्रलापत्वान्न हि दृश्यमात्रमिथ्यात्वेन शून्यवादः, किन्तु सर्वासत्यत्वेन ॥

सारस्वतैस्तर्करत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तखण्डानामखण्ड्याभासतुल्यता ॥

इति आभाससाम्यभङ्गः

---

[1] अज्ञानोत्पत्ति. [2] अस्मन्मतस्वीकारोक्ते.

चान्योन्याश्रयात्, मिथ्याभूतस्य शुक्तिरजतसंसर्गस्य व्यवसाय-द्वारा साक्षाच्च निषेध्यत्वादिना प्रमाविषयत्वाभ्युपगमाच्च। नापि द्वितीयः; योग्यताया अनिरूपणात्। न तृतीयः; असिद्धेः, सर्वस्यैव क्षणिकत्वादिना भ्रमविषयत्वाभ्युपगमात्। अत एव नासत्त्वाप्रकारकभ्रमाविषयत्वमपि, अन्योन्याश्रयाच्च। नापि सत्त्वप्रकारकप्रमाविषयत्त्वम्, आत्माश्रयात्। नापि असत्त्वप्रकारकभ्रमाविषयत्वं सत्त्वम्, अन्योन्याश्रयात्। नापि प्रतिपन्नोपाधौ त्रैकालिकसत्त्वनिषेधविरहः, आत्माश्रयात्। नापि सत्ता जातिः अर्थक्रियाकारित्वं असद्वैलक्ष्यण्यं वा, एतेषां मिथ्यात्वाविरोधित्वेन तत्प्रत्यक्षेण मिथ्यात्वानुमाने बाधाभावात्। नापि वेदान्त्यभिमतमिथ्यात्वाभावस्सत्त्वम्, तुच्छे अतिव्याप्तेः। नाप्यसद्विलक्षणत्वे सत्यनारोपितत्वम्; अनारोपितत्वं हि आरोपाविषयत्वम्, तच्चासम्भवि; सर्वस्यापि क्षणिकत्वादिना आरोपविषयत्वात्। नाप्यस्तित्वप्रकारकप्रमां प्रति कदाचित्साक्षाद्विषयत्वं, कालसम्बन्धित्वं वा सत्त्वम्; अस्तित्वं च वर्तमानत्वम्, न तु

व्यवसायद्वारेति। रजतमिदं जानामीत्यनुव्यवसायरूपप्रमायाः व्यवसायांशे नेदं रजतमिति प्रमाया निषेधांशे विशेषणत्वं रजतादेरिति भावः। **आत्माश्रयादिति**। यद्यपि पूर्वोक्तान्योन्याश्रयस्थलेऽपि सत्त्वघटितत्वेनात्माश्रयत्वं, सत्त्वप्रकारकप्रमानिरूपणे तद्विषयत्वरूपसत्त्वनिरूपणं, तन्निरूपणे च तादृशप्रमानिरूपणमिति प्रकृतेऽप्यन्योन्याश्रयत्वं; तथापि स्पुटप्रतीतिमपेक्ष्य एकैकमुक्तम्। **प्रतिपन्नेति**। त्रैकालिकस्य स्वसत्त्वाभावस्य स्वधीविशेष्यदेशकालावच्छेदेन स्वास्मिन् या धीः 'अत्र रजतं नास्ति नासीन्न भविष्यति' इत्यादिरूपा तद्विषयत्वस्य शुक्तिरूप्यादिनिष्ठस्याभाव इत्यर्थः। **अस्तित्वेति**। अस्तित्वप्रकारतानिरूपितं प्रमाविशेष्यत्वमित्यर्थः। **वर्तमानत्वं** काल-

सत्त्वम्, अतो नात्माश्रयः। अतीतादिरपि कदाचित् वर्तत एवेति नाव्याप्तिः। आरोपितत्वं च कालत्रयासम्बन्धित्वेन बाधेन बोधितमिति न द्वितीयलक्षणे अतिव्याप्तिरिति वाच्यम्; प्रमात्वस्य सत्त्वघटितत्वेन चक्षुराद्ययोग्यत्वेन पूर्वोक्तदोषात्, वर्तमानत्वप्रकारकप्रमाविषयत्वेऽपि मिथ्यात्वाविरोधाच्च। द्वितीयमपि न मिथ्यात्वविरोधि; शुक्तिरूप्यस्यापि प्रतिभासकालसम्बन्धित्वात्, बाधेन तात्त्विककालत्रयसम्बन्धनिषेधेऽपि अतात्त्विककालसम्बन्धस्य अनिषेधात्। नापि तात्त्विककालसम्बन्धित्वं तत्; तात्त्विकस्याद्याप्यनिरूपणात्, निरूपणे वा शेषवैयर्थ्यात्। ननु भवन्मते यत् सत्त्वं ब्रह्मणि, तदेवेह मम। उक्तं हि—

'यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपि।
तत्र स्यात्तदनिर्वाच्यं चेदिहापि तथास्तु नः॥'

इति। न च तत्रापरिच्छिन्नत्वं सत्त्वम्, तच्च न जगतीति वाच्यम्; तुच्छस्यापरिच्छिन्नत्वेऽपि सत्त्वानभ्युपगमान्नापरिच्छिन्नत्वं सत्त्वम्। किन्त्वन्यदेव। तच्च ब्रह्मणीव भ्रमाधिष्ठानत्वाच्छुक्तिकादेरपि भविष्यतीति चेत्, नूनं विवाहसमये कन्यायाः पित्रा निजगोत्रं पृष्टस्य यदेव भवतां गोत्रं तदेव ममापि गोत्रमिति वदतो वरस्य भ्राता भवान्। यतो जामातृश्वशुरयोः एकगोत्रत्वे विवाहानुपपत्तिवत् जगद्ब्रह्मणोरेकसत्त्वे जगतोऽसत्त्वमेव स्यात्। तथाहि—स्वप्रकाशाद्वितीयचैतन्यरूपत्वमेव ब्रह्मण-

---

सम्बन्धित्वम्। तेन तत्तत्कालसम्बन्धित्वरूपवर्तमानत्वस्याननुगमेऽपि न क्षतिः। **बाधेन तात्त्विकेति**। तात्त्विकत्वेन कालसम्बद्धस्य[1] निषेधेऽपि कालसम्बन्धत्वेनानिषेधात् कालसम्बन्धित्वेन[2] निषेधपक्षेऽपि प्रतियोग्यभा-

---

[1] सम्बन्धस्य. [2] धात् सम्बन्धित्वेन.

स्सत्त्वम्; तदेव चेज्जडस्यापि जगतः, तदा रजतत्वविरोधिशुक्तिसत्तया रजतस्येव जडत्वविरोधिस्वप्रकाशसत्तया जगतः स्वरूपतो मिथ्यात्वोपपत्तेः। चैतन्यस्यैवावच्छिन्नानवच्छिन्नाज्ञानविषयत्वेन सर्वभ्रमाधिष्ठानत्वाभ्युपगमात् न भ्रमाधिष्ठानत्वेन

वयोः भिन्नसत्ताकत्वेन अविरोधादित्यर्थः। **रजतत्वविरोधीत्यादि**। यथा शुक्त्यवच्छिन्नसत्तातादात्म्यं[1] रजते कल्पितं व्यावहारिकरजतावृत्तित्वरूपरजतत्वविरोधादव्यावहारिकरजतवृत्ति; तथा तात्त्विकस्वप्रकाशसत्तातादात्म्यं प्रपञ्चे कल्पितं तात्त्विकस्वप्रकाशत्वविरोधीति अतात्त्विका[2] स्वप्रकाशवृत्त्युच्यत इति जगतो मिथ्यात्वोपपत्तेरित्यर्थः। **अवच्छिन्नेत्यादि**। अवच्छिन्नं चानवच्छिन्नं च तदवच्छिन्नानवच्छिन्नमिति समाहारः। तादृशं यदज्ञानविषयत्वं तेनेत्यर्थः। रजतादिभ्रमोपादानाज्ञानविषयत्वं शुक्त्याद्यवच्छिन्नचैतन्यनिष्ठं, वियदाद्युपादाना[3] ज्ञानविषयत्वं तु अनवच्छिन्नचैतन्यनिष्ठमिति भावः। **न भ्रमेति**। भ्रमविषये अधिष्ठानसत्तायास्तादात्म्यारोपादधिष्ठानस्याबाधाच्च सद्रूपत्वं वाच्यम्। तत्रैकस्याश्चैतन्यव्यक्तेः सर्वभ्रमाधिष्ठान[4]त्वसम्भवेन सद्रूपतासम्भवे तदन्यत्र तत्कल्पने गौरवं, "नेह नानास्ति, त्रयमप्येतत् स्वप्नं, मायामात्रं, ज्ञानं यथा सत्यमसत्यमन्यत्" इत्यादिश्रुतिस्मृत्यादिविरोधश्चेति भावः। यत्तु—"ब्रह्मणि यत्सत्त्वं तदेव प्रपञ्चे इत्यस्य स्वप्रकाशाद्वितीयचैतन्यरूपं सत्त्वं प्रपञ्चगतमिति नार्थः; किन्तु यादृशं ब्रह्मसत्त्वं श्रुतिगम्यं मिथ्यात्वविरोधि तादृशं प्रपञ्चसत्त्वं प्रत्यक्षादिगम्यं मिथ्यात्वविरोधीति। ब्रह्मसत्त्वं च न स्वप्रकाशाद्वितीयत्वादिरूपं, मिथ्यात्वाविरोधित्वात्, सर्वं मेयमिति ज्ञानस्य स्वप्रकाशस्यापि त्वन्मते मिथ्यात्वात्, अवेद्यत्वादिरूपस्व[5] प्रकाशत्वयुक्तस्याद्वितीयस्य शून्य[6]-

[1] सत्तादात्म्यं. [2] अतात्त्विक. [3] वियदाद्यवच्छिन्नानवच्छिन्नाद्युपादाना. [4] सर्वत्राधिष्ठान. [5] रूपस्य. [6] अशून्य.

शुक्त्यादेस्सत्त्वसिद्धिः । नन्वेवमपि सर्वदेशीयत्रैकालिकनिषेध-प्रतियोगित्वमसत्त्वं तुच्छानिर्वचनीयसाधारणम्, तदभावस्स-त्त्वम् । तच्च ब्रह्मणीव जगत्यपीति ब्रूमः । न च संयोगे अव्याप्तिः, तस्याव्याप्यवृत्तित्वानभ्युपगमात् । तदभ्युपगमे च व्याप्यवृत्ति-त्वेनाभावो विशेषणीयः । नापि वियत्यव्याप्तिः; तदत्यन्ता-भावस्य केवलान्वयित्वाङ्गीकारेण लक्षणस्य विद्यमानत्वादेव । न हि कस्मिंश्चिद्देशे काले वा तस्याभावः, नित्यविभुत्व-भङ्गप्रसङ्गात् । आकाशात्यन्ताभावस्य केवलान्वयित्वाभ्युपगमे च वृत्तिमत्प्रतियोगिकत्वेनाभावो विशेषणीय इति चेन्न; चक्षु-राद्ययोग्यानेकपदार्थघटितत्वेन एतादृशसत्त्वस्य ग्रहणे चक्षुरादेर-

---

स्यापि सद्विविक्तत्वादिरूपमिथ्यात्वाद्ब्रह्मणि श्रौतसत्यत्वव्यवहारप्रयोजकं यत्तद्विरहस्यैव मां प्रति प्रपञ्चे त्वया साध्यतया तथाभूतस्वप्रकाशत्वा-द्वितीयत्वादेरभावस्य साधने सिद्धसाधनापत्तेश्च" इति, तत्तुच्छम्; अस्मदीयदूषणानवबोधात् । ब्रह्मसत्त्वं यदि हि प्रपञ्चे स्वीक्रियते, तदा तन्मिथ्यात्वोपपत्तेरित्यन्तेन प्रत्युक्तम्[1] । यदि यथा ब्रह्म सद्रूपं तथा विय-दादीत्युच्यते, तदा चैतन्यस्येत्यादिना प्रत्युक्तम्[1] । ब्रह्मसत्त्वं च नेत्या-दिकं तु प्रलापः । न हि ब्रह्मणि स्वविषयकत्वरूपं स्वप्रकाशत्वं मिथ्यात्व-विरोधि ब्रूमः, येन सर्वं मेयमिति धीसाधारणं स्यात् । नाप्यवेद्यत्वादिमात्रं, येन तुच्छसाधारणम् । किन्तु अन्यानधीनापरोक्षताकत्वादिरूपं, तच्च ब्रह्मण्येवेत्युक्तम् । ब्रह्मणि सत्यताव्यवहारप्रयोजकं यदबाध्यस्वरूपं तन्निष्ठेनाबाध्यत्वव्यापकविषयत्वेन यो भेदः तादृशविषयतासम्बन्धेन ज्ञानात्यन्ताभावो वा तद्घटितं मिथ्यात्वं साध्यम् । अतो न सिद्धसाधन-मित्याद्युक्तमेव । ब्रह्मस्वरूपमिव वियदादिस्वरूपमपि न बाध्यम्,

---

[1] प्रयुक्तम्

सामर्थ्यात्। न हि सर्वदेशीयत्रैकालिकवृत्तिमत्प्रतियोगिकव्याप्य-वृत्तिनिषेधप्रतियोगिकत्वं कस्यापि प्रत्यक्षम्; येन तदभावः प्रत्यक्षो भवेत्। वृत्तिमत्प्रतियोगिकत्वव्याप्यवृत्तित्वपरित्यागेऽपि सर्वदेशीयत्वत्रैकालिकत्वयोरयोग्यत्वात्। ननु स्वदेशकाल-

---

तत्त्वे गौरवादिति चेत्, सेयं मिथ्यात्वबोधकश्रुत्यनुमानादौ तवापरिचितिः। सा चापसार्यत एव। **नित्यत्वेति**। यदाऽऽकाशस्यात्यन्ताभावस्तदा तस्य ध्वंसः प्रागभावो वा वाच्यः, तथाचानित्यत्वं स्यात्। यत्र द्रव्ये तस्यात्यन्ताभावः तत्र तत्संयोगो न जात इति वाच्यम्। अन्यथा अत्राकाशमिति प्रतीतेः वृत्तिनियामकतत्संयोगेन तदत्यन्ताभावविरोधादव्याप्यवृत्तित्वानङ्गीकारात्। वृत्त्यनियामक एव तत्संयोग इति स्वीकारेऽपि तेन तद्विरोधात्। अन्यथा धनवत्यपि निर्धन इत्यादिव्यवहारापत्तिरित्यादेश्चित्सुखीयानुमाने उक्तत्वात्। तथाच सर्वमूर्तसंयोगित्वरूपं विभुत्वं न स्यात्। यद्यपि तत्संयोगिन्यपि समवायादिना तदत्यन्ताभावः तद्वत्यपि काले तत्सम्बद्धे देशावच्छेदेन तदत्यन्ताभावो वक्तुं शक्यः, तथापि तत्सम्बन्धिनि सम्बन्धान्तरेणापि न तस्यात्यन्ताभावः; किंतु यदीयसम्बन्धान्तरस्येति पूर्वोक्ताभिप्रायकमेतत्। अतएव नित्यजलीयरूपादावपि देशे संयुक्ततत्संयुक्तसमवायादिसम्बन्धसत्त्वेन[1] न तदत्यन्ताभावः। तथा सति तादृशरूपादिसमवायाद्याश्रये तत्संयोगस्यानङ्गीकार्यतया विभुत्वभङ्गप्रसङ्गादिति भावः॥

यत्तु—"सर्वसंसर्गकात्यन्ताभावनिवेशात् समवायादिना सर्वदेशीयात्यन्ताभावप्रतियोगित्वेऽपि गगनादौ न सत्त्वलक्षणाव्याप्तिः" इति, तत्तुच्छम्; सर्वसंसर्गकत्वं हि यदि सर्वसम्बन्धावच्छिन्नप्रतियोगिताकत्वं, तदाऽसम्भवः। न हि सर्वत्र सर्वैस्सम्बन्धैः किञ्चिदस्ति[2]। यदि सर्व-

---

[1] सम्बद्धत्वेन. [2] कश्चिदस्ति.

वृत्तिनिषेधप्रतियोगिकत्वाभावे गृह्यमाणे कालत्रयमध्ये वर्तमानकालस्य सर्वदेशमध्ये प्रकृतदेशस्यापि प्रवेशेन तत्र निषेधप्रतियोगित्वाभावस्य गृहीतत्वात् तत्संवलितं कालत्रयवृत्ति

सम्बन्धानां अन्यतमावच्छिन्नप्रतियोगिकत्वं तत्तथापि शशविषाणादावतिव्याप्तिः। यथा हि भेदप्रतियोगिता न नव्यनये तादात्म्यसम्बन्धावच्छिन्ना, तत्त्वे[1] मानाभावात् घटत्वादिना भेदस्यैव घटादितादात्म्यविरोधित्वसम्भवात्। यथावा ध्वंसप्रागभावयोः प्रतियोगिता न केनापि धर्मेण सम्बन्धेनाऽवच्छिन्ना, मानाभावात्, तथा तुच्छनिष्ठाप्यभावप्रतियेागिता न केनापि धर्मेण सम्बन्धेन वा अवच्छिन्ना, मानाभावात्, स्वप्रतियोगिकाभावमात्रेण तुच्छस्य विरोधसम्भवात्। अथैवं तुच्छस्याभावोपि न सिद्धयेत् मानाभावात् तस्यायोग्यत्वेन अप्रत्यक्षत्वादनुमानस्याप्रयोजकत्वेन अनवतारादिति चेत्, सोयं तुच्छवादिनस्तवैवं गर्तपातः। यत्तु अश्वे गोत्वं नास्तीति प्रतीतिः गोत्वाश्वत्वयोः संसर्गमलीकं निषेधप्रतियोगितया अवगाहत इति अश्वावच्छेदेन गोत्वाभावस्य सर्वकालवृत्तित्वात् सर्वकालिकत्वमेवाभावे निवेश्यं, तादृशाभावप्रतियोगिकत्वमसदनिर्वाच्ययोरेव सर्वदेशीयाभावप्रतियोगित्वं घटादावपीति तन्नोक्तमिति मतं, तत्परोक्तमपि गोत्वादेः प्रतियोगित्वानुभवापलापादलीकसंसर्गस्य प्रतियोगित्वेनानुल्लेखाच्चाचार्यैर्न शङ्कितम्। न हीत्यादि[2] वृत्तिमत्प्रतियोगिकाभावादिकं न प्रत्यक्षं, वृत्तिमान् यद्यत्र स्यात्तदोपलभ्येतेत्यादिरूपापादनासम्भवात्। प्रतियोगिसत्त्वहेतुकापादन[3] योग्योपलब्धिप्रतियोगिकत्वरूपयोग्यतायाः प्रतियोग्यनुपलब्धावभावात् वृत्तिमदादेः सत्त्वेप्यतीन्द्रियत्वादिना तदनुपलब्धिसम्भवादिति भावः। **तत्संवलितेति**। सर्वदेशकालघटितं मिथ्यात्वं, परमते मिथ्यात्व-

[1] तत्तत्त्वे. [2] न तर्हीत्यादि. [3] हेतुनापादन.

सर्वदेशीयनिषेधप्रतियोगित्वरूपं मिथ्यात्वं नानुमानेन ग्रहीतुं शक्यत इति चेन्न; स्वदेशकालवृत्तिसकलनिषेधप्रतियोगित्वस्य चक्षुराद्ययोग्यत्वेन तदभावस्य सुतरां तदयोग्यत्वात्। स्वदेशकालवृत्तियत्किञ्चिन्निषेधाप्रतियोगित्वस्य मिथ्यात्वाविरोधित्वात् स्वप्रतियोगिकात्यन्ताभावासामानाधिकरण्यस्य च स्वप्रतियोगिकात्यन्ताभावाप्रसिद्ध्या केवलान्वयिनि सम्बन्धभेदेन घटादौ चासिद्धेः। स्वात्यन्ताभावयावदधिकरणावृत्तित्वं वा, स्वात्यन्ताभावयत्किञ्चिदधिकरणावृत्तित्वं वेति विकल्पेन पूर्वोक्तदोषाच्च। तस्मात् तत्प्रकारान्तरस्य निरूपयितुमशक्यत्वात् मिथ्यात्वाविरोधित्वाच्च स्वसमानाधिकरणयावदत्यन्ताभावप्रतियोगित्वाभावरूपमेव सत्त्वमुपेयम्। तच्च न चक्षुरादियोग्य-

---

स्यासत्त्वरूपत्वात्। अस्मन्मतेऽपि स्वदेशकालवृत्तिनिषेधप्रतियोगित्वरूपं तद्ग्रहीतुमशक्यम्, तदभावस्य गृहीतत्वादिति बोध्यम्। **पूर्वोक्तेति**। एतेन—"अत्यन्ताभावसामान्ये यत्प्रतियोगिकत्वयत्सामानाधिकरण्योभयाभावस्तत्त्वं सत्त्वं वाच्यं, तत्सम्बन्धिनि तदभावस्वीकारे तु तत्सम्बन्धावच्छिन्नप्रतियोगितासामान्ये यन्निष्ठत्वस्य तत्सम्बन्धावच्छिन्नयदधिकरणतासमानाधिकरणात्यन्ताभावनिरूपितत्वस्य च द्वयोरभावस्तत्त्वं तत्केवलान्वयिनि च नाव्याप्तिः, तन्निष्ठत्वस्य स्वरूपसम्बन्धावच्छिन्नतदाधारतासमानाधिकरणतात्यन्ताभावनिरूपितत्वस्य च द्वयोः स्वरूपसम्बन्धावच्छिन्नप्रतियोगितासामान्ये अभावात्" इति प्रत्युक्तम्; अधिकरणे यावत्त्वकिञ्चित्त्वविकल्पेन तत्रतत्राप्युक्तदोषादुक्तोभयाभावाधियः उक्तोभयत्वाघटितमिथ्यात्वधीविरोधित्वाभावाच्च। **स्वसमानेत्यादि**। स्वपदं लक्ष्यपरम्। **यावदिति** तादृशप्रतियोगित्वसामान्याभावाभिप्रायकम्। तेन तत्तत्प्रतियोगितावशेषाभावज्ञानस्य मिथ्यात्वबुद्ध्याविरोधित्वेऽपि न क्षतिः। तथाच घटादिसमानाधिकरणात्यन्ताभावप्रतियोगित्व-

मित्युक्तम्। ननु यस्मिन्कस्मिंश्चित् स्वदेशकालवृत्तिनिषेधे एतद्देशैतत्कालवृत्तिनिषेधत्वं ज्ञात्वा तेन प्रत्यासत्तिभूतेनोपस्थापितानां स्वदेशकालवृत्तिसकलनिषेधानां प्रतियोगित्वस्याभावो घटे ग्राह्यः। ततस्सार्वदिक्सर्वदेशीयनिषेधप्रतियोगित्वस्य ग्रहणं घटे दुर्घटमिति चेन्न; एवं सामान्यलक्षणया सर्वनिषेधेषूपस्थितेष्वपि तत्प्रतियोगित्वाभावस्य चक्षुरादिना ग्रहीतुमशक्यत्वात्। योग्यप्रतियोगिक एव हि संसर्गाभावो योग्यः।

सामान्यस्य पटादिनिष्ठस्य घटादावभावसत्त्वात्तत्र लक्षणसङ्गतिः। पूर्वोक्तस्य मिथ्यात्वस्याभावः सत्त्वमित्युक्तौ तुच्छेऽपि तत्सत्त्वादतिव्याप्तिः। अतस्तथा नोक्तम्। अयोग्यत्वमुक्त्यात्यन्ताभावे इन्द्रियसन्निकर्षाभावात्प्रत्यक्षाविषयत्वमिति भ्रान्त्या शङ्कते—**नन्वित्यादि**। उक्ताभावेषु सामान्यलक्षणसन्निकर्षसत्त्वेप्युक्ताभावप्रतियोगित्वं यदि घटादौ स्यात्तदोपलभ्येतेत्यापादनासम्भवः[1] उक्ताभावप्रतियोगित्वस्य तत्र सत्त्वेपि तन्निरूपकाभावानां[2] अतीन्द्रियत्वाल्लौकिकसन्निकर्षाद्यभावाच्च अनुपलब्धिसम्भवात्। अतः उक्तप्रतियोगित्वाभावस्य न लौकिकप्रत्यक्षविषयत्वम्। अतएव दीधित्यादावुक्तं—"यथा विद्यमानमपि वह्नित्वे रासभादिदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वं न गृह्यते, अभावदेशविप्रकर्षादिना ग्राहकाभावात्, तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वमपि" इति। नानुपलब्धेः प्रतियोगिसत्त्वविरोधित्वरूपयोग्यतेति तदभावो नाध्यक्ष इतीत्याशयेनाह—**नैवं सामान्येत्यादि**। **योग्यप्रतियोगिक इति**। स्वप्रतियोग्युपलम्भापादकता[3]योग्यप्रतियोगिक इत्यर्थः। **संसर्गाभाव इति**। अभावमात्रं विवक्षितम्। येन संसर्गेण यत्र यस्य प्रतियोगिनः उपलम्भापादकत्वं तेन संसर्गेण तत्र तस्याभावः प्रत्यक्ष इति ज्ञापयितुं संसर्गपदमुक्तम्। **एतेन**—

---

[1] संभवात्. [2] भावं. [3] पादकतया.

न चाशेषनिषेधानां प्रतियोगित्वमतीन्द्रियसाधारणं चक्षुरादि-

"योग्यप्रतियोगिक इत्यादेः योग्यप्रतियोगिकान्यः संसर्गा[1]भावः न योग्य इति नार्थः, उक्तप्रतियोगित्वाभावस्य योग्यायोग्यप्रातियोगिकत्वेन योग्यतापत्तेः । नाप्ययोग्यप्रतियोगिकः संसर्गाभावो योग्यो नेत्यर्थः । महावायौ योग्यायोग्योद्भूतरूपसामान्याभावप्रत्यक्षतायाः दीधित्यादावुक्तत्वात् । नाप्ययोग्यधर्मावच्छिन्नप्रतियोगिताकः संसर्गाभावः न योग्य इत्यर्थः । तावता उक्तप्रतियोगितात्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रत्यक्षतावारणेऽपि स्तम्भे पिशाचादेरिव योग्ये घटादौ तादृशप्रतियोगित्वाश्रयस्य भेदप्रत्यक्षतासम्भवेन तदवारणे[2] मिथ्यात्वानुमितिप्रतिबन्धकबाधसामान्यावारणात्" इत्यादि परास्तम्; उक्तप्रतियोगित्वस्य अत्यन्ताभावप्रत्यक्ष[3] इव तद्भेदप्रत्यक्षेऽपि निरुक्तयोग्यतायाः प्रतियोग्यनुपलम्भे अपेक्षणात्, तदभावस्य प्रकृतग्रन्थार्थत्वात् । अतएव तदभावो नाध्यक्ष इति दीधित्यादिवाक्यस्य तद्भेदस्याप्यनध्यक्षतायां तात्पर्यम्; अन्यथा तस्य लौकिकप्रत्यक्षसम्भवे उत्तरग्रन्थेनोपनयेन तदभावधीकथनवैयर्थ्यापत्तेः । अतएव च मूर्तसामान्यतद्वतोरिव (उपाधिसामान्यतद्वतोः) अत्यन्तान्योन्याभावौ न योग्याविति व्याप्तिग्रहोपायदीधित्यादावुक्तम् । मूर्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्येव मूर्तवद्भेदस्यापि निरुक्तयोग्यताविशिष्टस्य प्रतियोग्यनुपलम्भस्य असत्त्वादेव अप्रत्यक्षतायाः सम्भवात् **अतीन्द्रियसाधारणमिति** । अतीन्द्रियासन्निकृष्टाभावप्रतियोगितात्ववदित्यर्थः । **चक्षुरादियोग्यमिति** । येनोपलब्धिरापादयितुं शक्यते तादृशमित्यर्थः । अयोग्यधर्मानवच्छिन्नयोग्यमात्रवृत्तिप्रतियोगिताकाभाव एव योग्यः । वाय्वादौ रूपाद्यभावस्तु न प्रत्यक्षः, किन्तु अनुमेयमिति मते तु यथाश्रुतमेव सम्यक् । यत्तु—"सर्वदेशकालवृत्तिनिषेधप्रतियोगित्वस्य चक्षुराद्ययोग्यत्वेपि तदभावो

[1] योगिकान्यसंसर्गा. [2] तदवधारणे. [3] प्रत्यय.

योग्यः, घटे आकाशत्वाभाववत् घटे आकाशत्व[1]सत्त्वे तस्यानेकवृत्तित्त्वाज्जातित्वापत्त्योपलम्भापादनवत् घटे तादृशाभावप्रतियोगित्वोपलम्भस्य आपादनसम्भवात् घटवृत्तेः[2] संसर्गाभावप्रतियोगित्वस्य प्रागभावप्रतियोगित्वादिवत् योग्यत्वात् प्रतियोगित्वस्य स्वरूपविशेषरूपत्वात् घटादिज्ञानानन्तरं अयमिहैव नान्यत्रेत्यन्यनिष्ठात्यन्ताभावप्रतियोगित्वस्यानुभवात्। अन्यनिष्ठात्यन्ताभावस्तु न चक्षुरादिग्राह्यः, विशेष्यसन्निकर्षाद्यभावात्। न च घटादौ सर्वदेशकालवृत्त्यत्यन्ताभावप्रतियोगित्वाभावे दृष्टान्ताभाव इति वाच्यम्; मन्मते शुक्तिरूप्यादेस्तादृशप्रत्तियोगित्वस्य साक्षिभास्यस्य सत्त्वेन दृष्टान्तत्वात्, तार्किकादिमते तु व्यतिरेकेण दृष्टान्तत्वसम्भवात्। एवं स्वसमानाधिकरणेत्यादिरूपं सत्त्वमपि योग्यम्, उक्तरीत्या उपलम्भापादनसम्भवात्" इति प्रलपितं, तत् स्वमतिः प्रकटिता। प्रागभावस्य हि सत्त्वे[3] तत्प्रतियोगित्वं प्रत्यक्षं, तदसत्त्वे वा, नाद्यः; तदा स्वाश्रयासन्निकर्षेण तत्प्रतियोगित्वस्य प्रत्यक्षासम्भवात्। अन्त्येपि तस्य प्रागभावप्रतियोगितात्वेन प्रत्यक्षं प्रतियोगितात्वेन, तद्व्यक्तित्वेन वा, नाद्यः; प्रागभावासन्निकर्षात्। न द्वितीयः; सम्बन्धिता[4]वच्छेदकरूपेण प्रत्यक्षं प्रति सम्बन्धितावच्छेदकरूपेण प्रत्यक्षस्य हेतुत्वात्, प्रागभाव[5]प्रत्यक्षे तेन रूपेण प्रत्यक्षासम्भवात्, अन्त्यकल्पे वक्ष्यमाणदोषाच्च। नान्त्यः; तावतापि यथा तद्व्यक्तित्वेन उपलब्धिरापादयितुं शक्यते न तु प्रागभावप्रतियोगितात्वेन, तथोक्तात्यन्ताभावप्रतियोगितात्वेनोपलम्भो नापादयितुं शक्यत इति तदवच्छिन्नाभावस्यायोग्यत्वानपायात्। अतएव 'घटत्वत्वादिना नाभावप्रत्यक्षता' इति शिरोमणिः। अयं नान्यत्रेत्यनुभवस्तु नानुपपन्नः, सन्निकृष्टस्वानधिकरणनिष्ठाभावप्रतियोगित्वप्रत्यक्षसम्भवाद्विशेष्यसन्निकर्षाभावात्। अत्यन्ताभावो न प्रत्यक्ष इति तु शोभतेतमां, तथा सति महावायावुद्भूत-

[1] घटाकाशत्व. [2] घटव्यक्तेः. [3] सत्त्वे न. [4] संबन्धता. [5] तत्प्रागभावा.

योग्यम्। वस्तुतस्तु सामान्यं नेन्द्रियप्रत्यासत्तिः, मानाभावात्। न च महानसीयधूमेन्द्रियसंयोगेन तत्रैव व्याप्तिग्रहे पर्वतीयधूमादनुमितिर्न स्यात्, सामान्यस्य च धूमत्वादेः प्रत्यासत्तित्वे तस्यापि प्रत्यासन्नत्वात्तत्र व्याप्तिग्रहे ततोऽनुमितिरिति वाच्यम्; पर्वतीयधूमेन्द्रियसन्निकर्षदशायां धूमत्वेनप्रकारेण गृहीतस्मृतव्याप्तेः तत्र वैशिष्ट्यग्रहसम्भवात्। 'सुरभि चन्दनम्' इतिवत् विशेष्येन्द्रियसन्निकर्षविशेषणज्ञानासंसर्गा-

---

रूपात्यन्ताभावादेरपि प्रत्यक्षत्वासम्भवात्। न च यथा मनस्तत्त्वेन[1] रूपेणोपलब्ध्यापादनं न सम्भवति तस्य मनोभिन्नावृत्तित्वादिघटितत्वेनातीन्द्रियत्वात्, अथ च मनस्त्वाभावः प्रत्यक्षः, तथोक्तप्रतियोगित्वाभावोऽपि प्रत्यक्षः स्यादिति वाच्यम्। मनस्त्वं यदि घटे स्यात् तदा मनसो योग्यत्वेन तत्समवेतत्वेन मनस्त्वोपलब्ध्यापत्त्या तेन रूपेणैव तदभावस्य प्रत्यक्षात्। मन्मते इत्यादिकं तु स्वपित्रार्दीन् प्रत्येव वाच्यम्। यादृशाभावो न्यायादिमते प्रत्यक्षस्तस्यैव त्वया साक्षिभास्यताया वाच्यत्वात्, अन्यथा अतिप्रसङ्गात्। तार्किकादीनां तु वाक्यमुक्तमेव, तत्तु त्वया तथा प्रलपता स्वप्नेऽपि न श्रुतमित्यलमव्युत्पन्नविडम्बनया। ननूक्तप्रतियोगित्वाभावस्य लौकिकप्रत्यक्षासम्भवेऽपि उक्तरीत्या सामान्यप्रत्यासत्त्या ज्ञानप्रत्यासत्त्या वा अलौकिकप्रत्यक्षमस्तु; तत्राह–**वस्तुतस्त्वित्यादि। विशेष्येन्द्रियसन्निकर्षेति**। मुख्यविशेष्येन्द्रिययोः लौकिकसन्निकर्षेत्यर्थः। बहिरिन्द्रियाणां स्वलौकिकसन्निकृष्टमुख्यविशेष्यकज्ञानजनकत्वनियमान्मुख्याविशेष्यांशे लौकिकसन्निकर्षस्य बहिरिन्द्रियजन्यप्रत्यक्षे अपेक्षेति भावः। यो यत्र पुरा अवगतः स एव तत्र संस्कारवशादलौकिकप्रत्यक्षविषयोऽन्यत्रानुमानादिति प्राचीनतार्किकादिमते, उपनयसन्निकर्षास्वीकारमते च महानसीय एव स्मृतव्याप्तेः

---

[1] मानसत्वत्वेन.

ग्रहरूपाया विशिष्टज्ञानसामग्र्याः पूर्णत्वात्। व्याप्तिस्मृतिप्रकारेण वा पक्षधर्मताज्ञानस्य हेतुता; महानसीय एव धूमो धूमत्वेन व्याप्तिस्मृतिविषयो भवति। धूमत्वेन पर्वतीयधूम-

---

पर्वतीयधूमे प्रत्यक्षासम्भवादाह—**व्याप्तिस्मृतिप्रकारेण वेत्यादि**। यथाश्रुतार्थमिदं प्राभाकरादिमते। अस्मन्मते तु स्मृतिप्रकारेण स्मृतिप्रकारतायोग्येन विषयो विषयतायोग्यः। योग्यत्वं च उद्बुद्धसंस्कारविषयत्वम्। तथाच प्राभाकरादिमते व्याप्तिविशिष्टवैशिष्ट्यबुद्ध्यनावश्यकत्ववत्[1] मन्मते व्याप्तिस्मृत्यनावश्यकत्वं, पर्वते धूमज्ञानोत्तरं व्याप्तिविशिष्टवैशिष्ट्यस्येव व्याप्तेरपि ज्ञानाकल्पने लाघवात्। न च व्याप्तिसंस्कारत्वेन हेतुत्वे पूर्वाननुभूतव्याप्तेः विशिष्टवैशिष्ट्यानुभवादनुमितिर्न स्यात्, अनुद्बुद्धसंस्कारादनुमितिवारणायोद्बोधकानां नानाविधानां हेतुत्वे च गौरवमिति वाच्यम्; व्याप्तिसंस्कारज्ञानयोः स्वविशिष्टानुमितौ कारणत्वयोः सम्भवात्। स्मृत्युपधायकोद्बोधकानां परेषां स्मृताविवास्माकमनुमितौ हेतुतायामगौरवात्। संस्कारहेतुत्वं च स्मृताविवानुमितावपि अन्वयव्यतिरेकसिद्धमस्तु, मास्तु वा। अतएव पञ्चपाद्यां "लिङ्गज्ञानसंस्कारयोः सम्भूय लिङ्गज्ञानहेतुत्वं, संस्कारानुद्बोधे तदभावात्; तस्माल्लिङ्गज्ञानमेव लिङ्गिसम्बन्धसंस्कारमुद्बोध्य तत्सहितं लिङ्गिज्ञानं जनयति" इत्युक्तम्। तत्र स्मृताविवानुमितौ संस्कारस्य हेतुत्वमस्तु, मा वा। तदुद्बोधकहेतुत्वात्तु तद्धेतुत्वमुक्तमित्याशयेन संस्कारानुद्बोधे तदभावादित्युक्तम्। उद्बोधकानामपि स्मृताविवान्वयव्यतिरेकाभ्यां हेतुत्वमस्तु, मा वा, लिङ्गज्ञानमेव वस्तुगत्या अनुमित्यव्यवहितपूर्ववृत्ति उद्बुद्धसंस्कारादिसहितं जातिविशेषेण शक्तिविशेषेण वा हेतुर्लाघवादित्याशयेन तस्मादित्यादि। न चैवं वह्निव्याप्यधूमवानित्यादिज्ञानादिदं व्याप्यवांश्चायं भ्रम इति धीविषयादनुमितिः

---

[1] वैशिष्ट्यबुद्धेरिव. [2] तच्च.

ज्ञानं चापि जातम्। तच्च सामान्यलक्षणां विनैव तावतैवानुमितिसिद्धेः। न च सामान्यप्रत्यासत्तिं विना धूमो वह्निव्यभिचारी न वेति अनुभूयमानसंशयो न स्यात्, प्रसिद्धधूमे वह्निसम्बन्धावगमात् अप्रसिद्धस्य च अज्ञानादिति वाच्यम्; प्रसिद्धधूम एव तत्तद्धूमत्वादिना व्याप्तिनिश्चयेऽपि धूमत्वेन तत्संशयोपपत्तेः। तथाचोक्तं मणिकृता—'घटत्वेनेतरभेद-

---

स्यात्, व्याप्तयादिविषयकज्ञानत्वस्य कारणतानवच्छेदकत्वेन तदंशे भ्रमत्वज्ञानस्य अकिञ्चित्करत्वात्, एवं व्यभिचारादिज्ञानसत्त्वेप्युक्तहेतुसम्पत्त्या अनुमितिः स्यादिति वाच्यम्; व्याप्तिज्ञानत्वपक्षधर्मताज्ञानत्वाभ्यां हेतुत्वद्वयमते वह्निव्याप्यधूमवैशिष्ट्यांशे भ्रमत्वेन गृहीतादिव मन्मतेऽप्युक्तज्ञानादनुमितेरिष्टत्वाद्व्याप्तयादिविषयकज्ञानत्वेनाहेतुत्वेऽपि उक्तभ्रमत्वज्ञानाभावानां हेतुज्ञाननिष्ठहेतुतावच्छेदकत्वस्य स्वातन्त्र्येण हेतुत्वस्य वा सम्भवात्, कारणतावच्छेदकजात्यादेरुक्तज्ञानावृत्तित्वसम्भवेनापत्त्यसम्भवाच्च। एवमुक्तहेतुताद्वयमते वह्निव्याप्याभाववानयमित्यादिधीसत्त्व इव व्यभिचारादिधीसत्त्वे कारणसम्पत्त्या अनुमितेर्मन्मतेपि इष्टत्वात्, [1] संस्कारद्वारा अनुमितिप्रयोजकधीप्रतिबन्धकधीविषयत्वादेव व्यभिचारादेः हेत्वाभासत्वसम्भवात्, कारणीभूतसंस्कारायथार्थत्वज्ञापकव्यभिचारादिज्ञापनार्थं सत्प्रतिपक्षाद्युत्थापनार्थं वा विपरीतनिश्चयस्य संस्कारनाशकत्वमते व्यभिचारादिज्ञानस्य व्याप्तिसंस्कारनाशकत्वेन तादृशव्यभिचारादिज्ञानार्थं वा उपाध्युपन्याससम्भवात्, कारणतावच्छेदकीभूतजात्यादेर्व्यभिचारादिज्ञानोत्तरकालीनज्ञाने सत्त्वे मानाभावेनाखिलदोषपरिहाराच्च। **वह्निसम्बन्धेति**। वह्निव्याप्तीत्यर्थः।

---

[1] संस्कारानुमितिप्रयोजक . . . . वा लाघवादि . . . . हेतुरयं संशयः . . . ज्ञेरिव मन्मते व्याप्तिस्मृतेरपि नावश्यकत्वम्। . . . रद्वा . . . नारद्वा . . धीप्रतिसम्बन्धकधीविषयत्वादेव. इत्यधिकः पाठः.

निश्चयेऽपि पृथवीत्वादिना तत्र संशयसिषाधयिषे भवत एव' इति । निश्चितेप्यर्थे प्रामाण्यसंशयाहितसंशयवत् धूमत्वं वह्निव्याभिचारिवृत्ति न वेति संशयादपि तादृश-संशयोपपत्तेश्च । एतेन वायुः रूपवान्न वेति संशयोपि व्याख्यातः । ननु सिद्धे नेच्छा किन्तु असिद्धे, सा च स्वसमानविषयज्ञानजन्या । तच्च ज्ञानं न सामान्यप्रत्यासत्तिं विना । न च सिद्धगोचरसुखत्वप्रकारकज्ञानादेव अज्ञाते सुखे भवतीच्छा, समानप्रकारकत्वमात्रस्य नियामकत्वादिति वाच्यम्; रजतत्वेन प्रकारेण रजते अनुभूयमाने घटादौ रजतत्वप्रकारकेच्छाप्रसङ्गात् । न च प्रकाराश्रयत्वमपि नियामकम्, रजतभ्रमाच्छुक्ताविच्छानुदयप्रसङ्गात् । तथाच समान-प्रकारकत्वे सति समानविषयकत्वं तन्त्रम् । अतएवाख्याति-पक्षे रजतस्मरणस्यैव शुक्तौ प्रवर्तकत्वमित्यपास्तमिति चेन्न; यतो रजतभ्रमाच्छुक्ताविच्छा नास्त्येव, किन्त्वनिर्वचनीये रजत इत्यनिर्वचनीयख्यातौ वक्ष्यते । प्रकाराश्रयत्वं नियामकं

संशयादिति । धूमवृत्तित्वघटितधूमत्वत्वरूपेण धूमत्वस्य विशेष्यतया व्यभिचाराभावरूपव्याप्तेः उपस्थितेश्च व्यभिचारतदभावसहचरितधूमत्व-वैशिष्ट्यस्य धूमे अवगाहनात् साधारणधर्मवद्धर्मिधीविधया धूमधर्मिक-व्यभिचारसंशयहेतुरयं संशयः । यद्यपि व्यभिचारतदभावसहचरित-धर्मान्तरज्ञानमपि तथा सम्भवति; तथाप्यस्य धूमत्वव्याभिचारि-वृत्तित्वावगाहित्वात् व्यभिचारिणि धूमे व्याप्तिप्रकारकत्वरूपाप्रामाण्य-ज्ञापकत्वेन व्याप्तिनिश्चयाभिभावकत्वादादर इति ध्येयम् । वस्तुतस्तु उक्तसंशयस्य दोषविशेषतया अनुभवबलात् तदजन्यव्यभिचारज्ञान एव व्याप्तिनिश्चयो विरोधीति भावः । अप्रामाण्यसंशयोत्थानद्वारा उक्त-संशयस्य व्याप्तिनिश्चयाभिभावकत्वे तु न दृष्टान्तसामञ्जस्यम् ।

वदन्नख्यातिवादी परमेवं विभीषणीयः । तथाच प्रकाराश्रयत्वस्य नियामकत्वादन्यथाख्यातिपक्षोपि निरस्त एव । न च तर्हि भ्रमत्वं न स्यात्, इदं रजतमिति भ्रमत्वाभिमतज्ञानस्य व्यधिकरणप्रकारत्वानभ्युपगमादिति वाच्यम्; बाधितविषयत्वेन हि भ्रमत्वं, न तु व्यधिकरणप्रकारत्वेन,

---

विभीषणीय इति । वस्तुतस्तन्मते संवादिप्रवृत्तावेव प्रकाराश्रयत्वं नियामकं, प्रवृत्तिमात्रे तु उपस्थितयोः इष्टतावच्छेदकपुरोवर्तिनोरसंसर्गाग्रह इति न दोष इति भावः । **प्रकाराश्रयत्वस्येति** । एकरजतज्ञानादन्यरजते प्रवृत्त्यापत्तिस्तु ज्ञानरजतानामेकत्रैव अन्यत्रापि प्रवृत्तिः स्यादित्यापत्त्या तुल्या, असाधारणकारणकल्पनात्तदभावात् तदनापत्तिरपि तुल्येति भावः । **व्यधिकरणप्रकारत्वेति** । स्वनिरूपितविशेष्यतावद्वृत्तिभिन्नवृत्तिप्रकारताकत्वेत्यर्थः । स्वप्रकारता रजतादिस्वप्रकारता, स्वनिरूपितविशेष्यतावति शुक्त्यादौ वर्तमानादिदंत्वादेः भिन्नरजतादौ वर्तमाना बोध्या । **बाधितेति** । स्वसमानाधिकरणाभावप्रतियोगीत्यर्थः । विषयाबाधप्रयोज्यत्वात्स्वाधिकरणत्वेन प्रतीतेः विषयाभावज्ञानज्ञप्यत्वात् । किंच यत्र येन सम्बन्धेनासम्बन्धि यत् तन्निष्ठविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्नप्रकारताकधीत्वं, तत्र तेन सम्बन्धेन तस्य भ्रमत्वमित्युक्तौ भ्रमत्वं संसर्गांशे न स्यात् । व्यवह्रियते च तदंशेपि भ्रमत्वम् । अन्यथा संसर्गांश एव भ्रमत्वं न प्रकारांशे इत्येव स्वीकृत्य तदीयतत्सम्बन्धनिष्ठसांसर्गिकविषयताकत्वं तत्सम्बन्धस्य भ्रमत्वामिति लक्षणं किं न स्यात् । अथ तस्य विशेषणस्येव तदीयतत्सम्बन्धस्यापि उक्तप्रकारताकधीत्वमेव तस्मिन् विशेष्ये भ्रमत्वम्, तथापि संयोगेन रूपवानित्यादिज्ञानं रूपांशे संयोगस्य भ्रमो न स्यात्, प्रतियोगितासम्बन्धेन रूपासंबन्धिनः संयोगस्य तेन सम्बन्धेन प्रकारत्वाभावात् सम्बन्धभानस्य नव्यैरस्वीकारात् । अथ यस्सम्बन्धो यदप्रति-

योगिकः तन्निष्ठसांसर्गिकविषयतानिरूपिततत्प्रकारताकधीत्वं तत्सम्बन्धस्य तत्र तत्सम्बन्धे तस्य च भ्रमत्वं तदा एकोक्तयसम्भवः । न चोक्तज्ञानं घटादौ रूपस्यैव भ्रमः न तु रूपे संयोगस्येति वाचम्; व्यधिकरणधर्मावच्छिन्नाभावास्वीकर्तृमते व्यधिकरणसम्बन्धावच्छिन्नाभावास्वीकारस्याप्यौचित्येन घटत्वेन पटो नास्तीत्यत्र पटे घटत्ववैशिष्ट्यस्यैव संयोगेन रूपं घटे नास्तीत्यत्र रूपे संयोगवैशिष्ट्यस्य अभावभानौचित्येन तादृशधीबाध्यस्य संयोगेन रूपवान् घट इति ज्ञानस्य रूपे संयोगभ्रमत्वौचित्यात् उक्तज्ञानस्य उक्तधीबाध्यत्वं चानुभवबलादेव कल्प्यम्, संयोगससंर्गकज्ञानस्यापि संयोगाभावप्रकारकधीबाध्यत्ववत् । ननु प्रतियोगिनि विशेषणमेव प्रतियोगितावच्छेदकमिति नियमेन घटो नास्तीत्यादिज्ञानस्य प्रतियोगिनि विशेषणप्रमात्वमेव विशेषणीभूतघटत्वादेः प्रतियोगितावच्छेदकत्वप्रमात्वे नियामकं[1], अन्यथा घटत्वावच्छिन्नाभावः पटत्वावच्छिन्नप्रतियोगिताक इत्यादिज्ञानस्यापि प्रमात्वापत्तेः । तथाच घटत्वेन पटो नास्तीति ज्ञानं न घटत्वादौ प्रतियोगितावच्छेदकत्वस्य प्रमा, संयोगेन रूपं नास्तीति ज्ञानं तु संयोगादौ सम्बन्धे[2] प्रतियोगितावच्छेदकत्वस्य कुतो[3] न प्रमेति चेत्, तादृशयुक्तेरेव[4] । न हि संयोगेन घटो नास्तीति ज्ञाने संयोगादिसम्बन्धो घटांशे विशेषणीभूतोऽपि प्रतियोगितावच्छेदकः, घटत्वादिकं तु न तथेति वैषम्ये मानमस्ति । न च पूर्वमज्ञातस्य[5] संयोगादेर्विशेषणत्वासम्भवेपि[6] प्रतियोगितावच्छेदकत्वधीरिति वाच्यम्; विशिष्टबुद्ध्यादौ विशेषणधीहेतुत्वास्वीकर्तृनव्यमते तथोक्तेरसम्भवात् । न च रूपे संयोगाभावनिर्ण-

[1] घटत्वादिप्रमात्वमेव घटत्वादौ प्रतियोगितावच्छेदकत्वेन नियामकम् । अन्यथा घटसामान्याभावः पटत्वत्वावच्छिन्नप्रतियोगिताकः । पा. [2] सम्बन्धविधया. [3] भ्रमो. [4] तादृशे ह्युक्तज्ञानप्रतियोगिनि संयोगस्याविशेषणत्वेपि प्रतियोगितावच्छेदकतया भानं रूपत्वस्य तत्र विशेषणतयैव. पा. [5] पूर्वज्ञातस्य. [6] प्रतियोगिनि विशेषणत्वासम्भवेपि.

तस्यापि विषयबाधप्रयोज्यत्वादिति हि वक्ष्यते । नन्वभावज्ञानस्य प्रतियोगिज्ञानजन्यत्वात् प्रौढप्रकाशयावत्तेजोविरहरूपस्य तमसः प्रत्यक्षता न स्यात्, सामान्यप्रत्यासत्तिं विना प्रतियोग्यनुपस्थितेरिति चेन्न; अस्मन्मते तमसो भावान्तरत्वात् ।

योत्तरं जायमाने संयोगेन रूपं नास्तीति ज्ञाने रूपे संयोगस्य विशेषणत्वासम्भवात् उक्तवैषम्यमिति वाच्यम्; एकत्र द्वयमिति रीत्या रूपत्वसंयोगोभयप्रकारज्ञानस्य संयोगेन रूपं नास्तीति निर्णयाप्रतिबद्धत्वाच्च तयोः तदाऽपि भानसम्भवात् । एवं दूरस्थविषयकनिर्विकल्पकप्रत्यक्षे सर्वलोकसम्मतभ्रमत्वव्यवहारो न स्यात् । अस्मन्मते तत्रानिर्वाच्यं जातं बाधितमतो बाधितविषयकत्वमेव भ्रमत्वमित्याशयेनाह—**वक्ष्यत इति** । **अस्मन्मते** पूर्वोत्तरमीमांसकमते । **भावान्तरत्वादिति** । तदुक्तम्—

नाभावोऽभाववैधर्म्यान्नारोपो बाधहानितः ।
द्रव्यादिषट्कवैधर्म्यात् ज्ञेयं मेयान्तरं तमः ॥

इति । तमो नीलं चलतीत्यादिप्रतीत्या रूपादिमत्त्वात् घटादिष्विव तत्राबाधात् गन्धाद्यभावेन पृथिव्यादिनवद्रव्यगुणादिवैधर्म्याच्च द्रव्यान्तरमित्यर्थः । किञ्च द्रव्यचाक्षुषे आलोकप्रतियोगिकः संयोगो न हेतुः, मणिप्रभादौ तदभावेऽपि चाक्षुषभावात्[1] । नापि आलोकप्रतियोगिकत्वोपलक्षितः संयोगो विजातीयत्वेन हेतुः, अणुदेशावच्छिन्नाद्यालोकसंयोगात् न चाक्षुषमतो विजातीयत्वेनेति । आलोकप्रभादौ वाय्वादिसंयोग एव तादृश इति वाच्यम् । आलोकप्रभादौ वाय्वादेः संयोगो विभागादिरेव वा तादृश इत्यत्र विनिगमकाभावात्, घटादावपि विभागादेर्हेतुत्वसम्भवेन सङ्कराद्यप्रसक्तेः तददोषत्वाच्च[2] । अतो द्रव्यचाक्षुषे तादात्म्येन संसर्गविधया तमस्त्व-

[1] चाक्षुषाभावात्. [2] तद्दोषत्वाच्च.

न च तथाऽपि तद्व्यञ्जकत्वात्तदपेक्षेति वाच्यम्; स्वरूपसत एव तादृक्तेजोविरहस्य तमोव्यञ्जकत्वं, न तु ज्ञातस्य, माना-

---

जात्या प्रतिबन्धकत्वात् तमो नाभावः, कपालादौ घटादिरिव घटादौ तदवच्छिन्नचैतन्यगतमूलाविद्यापरिणामस्तम इति तत्रतत्र तत्तादात्म्यात् तत्काले न चाक्षुषम्, प्रभादौ तदभावाच्चाक्षुषम् । तमोध्वंसश्चालोक[1]संयोगादिरूप इति न तत्कल्पने गौरवम् । न चैवं तमोऽभावत्वेन कारणत्वे गौरवात् द्रव्यचाक्षुषहेतुत्वेन वस्त्वन्तरमेव सिद्धयेदिति वाच्यम्; प्रतिबन्धकाभावस्य सिद्धान्ते हेतुत्वास्वीकारात्, प्रतिबन्धकस्य कार्याभावं प्रति क्षेमसाधारणजनकत्वमात्राभ्युपगमात् । प्रतिबन्धकाभावाधिकरणं यः प्रतिबन्धकाभावसहितकारणकूटक्षणोत्तरक्षणः तत्त्वस्यैव कार्यव्याप्यतया प्रतिबन्धककाले न कार्योत्पत्त्यापत्तिः । अथवा स्वावच्छिन्नप्रतियोगितानिरूपकत्वसम्बन्धेन स्वनिरूपकत्वसम्बन्धेन वा तमस्त्वमभावनिष्ठ कारणत्वावच्छेदकं प्रतियोगितायाः स्वावच्छेदकधर्मरूपत्वेन तमस्त्वाभिन्नप्रतियोगितानिरूपकत्वमभावेऽपि । वस्तुतस्तु तमस्त्वावच्छिन्नाभावव्यक्तिस्तद्व्यक्ति[2]त्वेनैव हेतुः, तच्च सैव व्यक्तिस्तन्निष्ठधीविशेषविषयत्वं वेत्यन्यत् । न च तद्व्यक्तेः स्वरूपतो भानाभावात् स्वरूपतो नावच्छेदकत्वमिति वाच्यम्, स्वरूपतो भानाभावेऽपि स्वरूपतोऽवच्छेदकत्वे बाधकाभावात् । किञ्च उक्तकारणत्वेन भावान्तरासिद्धौ तदभावेन नीलं तम इत्यादिप्रतीतेरनिर्वाहात्तमसो भावत्वावश्यकत्वेन तदभावस्यैव उक्तकारणत्वसम्भवेन तद्धेतुत्वेन भावान्तरं न कल्प्यते गौरवादित्यास्तां विस्तरः ॥

न तु ज्ञातस्येति । अलोकस्य तमोनाशकत्वात्तमस आलोकाभावप्रयुक्तत्वेन तमोजन्यस्य तमश्चाक्षुष[3]स्यालोकाभावप्रयोज्यत्वं; तत्र च न ज्ञानमुपयुज्यते । उक्तं च विवरणे—'आलोकविनाशितस्य

---

[1] तमोध्वंसाच्चालोक. [2] व्यक्तितद्व्यक्ति. [3] तद्वच्चाक्षुष.

भावादित्यभ्युपगमात्। अन्येषां मते तादृक्तेजोविरहज्ञानस्यापेक्षितत्वेपि प्रतियोगितावच्छेदकप्रकारकज्ञानादेव तत्सम्भवेन तदर्थं सकलप्रतियोगिज्ञानजनिकायाः सामान्यप्रत्यासत्तेरनुपयोगात्। न च गोत्वाभावज्ञानं गोत्वत्वप्रकारकज्ञानजन्यम्, तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपं सामान्यप्रत्यासत्तिमन्तरेण न शक्यमवगन्तुमिति साम्प्रतम्; यत्किञ्चिद्गोव्यक्तेरेव

तमसः पुनर्मूलकारणादेव विद्युदादेरिव झटिति जन्म' इति। तम उत्पन्नं नष्टमिति प्रतीतेस्तमउत्पत्त्यादिविषयकत्वं स्वीकृत्येदम्। लाघवाच्छब्द उत्पन्नो नष्ट इत्यादिबुद्धेरिवोक्तबुद्धेरभिव्यक्तयुत्पत्तिनाशविषयकत्वे च साक्षादेव आलोकाभावस्य व्यञ्जकत्वम्। न चैवमालोके सत्यपि दिवा उलूकादेस्तमश्चाक्षुषं न स्यादिति वाच्यम्; दोषविशेषाणामपि विकल्पेन व्यञ्जकत्वादालोकाभावभ्रम एव दोषविशेषाणामावश्यकहेतुत्वेपि प्रातीतिकस्याप्यालोकाभावस्य व्यञ्जकत्वाद्वा। **अन्येषां** उक्ततेजोविरहस्तम इति वादिनां वैशेषिकादीनां, द्रव्यं तमस्तद्व्यञ्जक आलोकाभाव इति वादिनां पूर्वमीमांसकानां, च। **प्रतियोगितावच्छेदकेति**। प्रौढप्रकाशत्वेत्यर्थः। तच्च उद्भूतानभिभूतरूपकमहातेजस्त्वं प्रभात्वरूपा जातिर्वेत्यन्यत्। **गोव्यक्तेरिति**। समवेतत्वसम्बन्धेन गोत्व[1]रूपेणावच्छिन्नं प्रतियोगितावच्छेदकत्वं गोव्यक्तीनां सर्वासां प्रत्येकपर्याप्तत्वाद्यत्किञ्चिद्गोव्यक्तिनिष्ठतया भातीति भावः। विशेषणविधया गोः प्रतियोगितावच्छेदकत्वात् गोसमवेतद्रव्यत्वाद्याश्रयेऽपि गोत्वं नास्तीति धीः प्रमा। वस्तुतस्तु तत्तद्गोव्यक्तीनां गोत्वनिष्ठाधेयतया अवच्छेदकत्वमनवच्छिन्नम्, न तु गोत्वादिना अवच्छिन्नम्, एकैकगोव्यक्तिमात्रनिष्ठावच्छेदकत्वस्य तदतिप्रसक्तगोत्वाद्यवच्छिन्नत्वासम्भवात्, तत्तद्व्यक्तित्वेनापि तदव[2]-

---

[1] गो. [2] तदनव.

गोत्वत्वरूपत्वात्। एतेन प्रागभावप्रतीतिरपि व्याख्याता। किंचानागतज्ञानस्य अपेक्षितत्वे अनुमानादेव तद्भविष्यति। तथाच न्यायकुसुमाञ्जलौ—

शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम्।

च्छिन्नं लाघवात्। तथाच तत्तद्व्योव्यक्तीनामेकैकमात्रस्य उपलक्षण-विधयैवावच्छेदकत्वं तादृशसम्बन्धेन तद्व्यक्तिविशिष्टगोत्वस्य गवान्तरे सत्त्वाभावेन तत्र गोत्वं नास्तीति प्रत्ययापत्त्या विशेषणविधया तस्या-वच्छेदकत्वासम्भवात्। गोत्वं तु नावच्छेदकं, अत्यन्ताभेदे सिद्धान्ते सम्बन्धाभावेन प्रतियोग्यसम्बद्धत्वात्। गौरित्याकारकयत्किञ्चित्ज्ञाने-च्छाप्रकारत्वादिकं तु ज्ञानविषययोर्भेदे विषयत्वभेदानङ्गीकारे अति-प्रसक्तम्। अतो गोव्यक्तेरेवेत्युक्तम्—**गोत्वत्वेति**। गोत्वांशे प्रकारेत्यर्थः। तथाच गोमात्रस्य गोत्वनिष्ठप्रतियोगितायां वस्तुगत्या अवच्छेदकत्वेऽपि कस्यचिद्गोरेव गोत्वांशे प्रकारत्वेन गोत्वाभाव-प्रतियोगितावच्छेदकतया भानात् तद्विषयीभूतस्यैव कस्यचिद्गोर्वा गोत्वेन ज्ञानमेव[1] तदभावधीहेतुः न तु गोमात्रस्येति भावः। **एतेनेति**। प्रतियोगिज्ञानस्याभावबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतु-त्वात् प्रतियोग्यंशे विशेषणतावच्छेदकधर्मप्रकारकज्ञानत्वेन हेतुत्वेने-त्यर्थः। घटत्वादिना विद्यमानघटज्ञानादेव भाविघटविशेषितप्राग-भावधीः शब्दादिना[2] योग्यतावलाद्विद्यमानकार्ये शक्तिग्रहात् भावि-कार्यस्य लिङा प्राभाकरमते बोधवदिति भावः। **शङ्केत्यादि**। कालान्तरे देशान्तरे च वर्तमानधूमादिव्यभिचारीत्यस्य अतीन्द्रियपिशाचा[3] द्युपाधित्वस्य वा शङ्का पूर्वोक्ता चेदस्ति तदा देशकालान्तरयोः भावि-भूतयोः अननुभूतयोर्ज्ञानाय अनुमानमस्त्येव। जल्पेन प्रतिवादिनं निरस्य

---

[1] गोर्वा ज्ञानमेव. [2] शब्दादीनां [3] पिशाचत्वा शङ्कते.

व्याघातावधिराशङ्का तर्कश्शङ्कावधिर्मतः ॥

इत्यत्र शङ्कोपपादकमनागतज्ञानमनुमानादेवेत्युक्तम् । अनुमानं च 'वर्तमानपाकः पाकपूर्वकालीनः पाकत्वादतीतपाकवत्' इत्यादि । न च चरमपाके व्यभिचारः; साध्यासिद्ध्युपजीवकस्य व्यभिचारज्ञानस्यादोषत्वात्, अन्यथा सिद्ध्यसिद्धिव्याघातात् । किंच शब्दादपि सकलधूमपाकादिगोचरज्ञानसम्भवः । न च शङ्कादिपूर्वं शब्दस्योपस्थितिनियमाभाव इति वाच्यम्; कदाचिदेव शब्दादनुभूतस्य तदानीं

त्स्वबुभुत्सुं प्रत्याह—**तर्कश्शङ्कावधिरिति** । शङ्काया अवधिः सामग्रीविघटकः । ननु तर्कस्यापि व्याप्तिधीमूलकत्वादनवस्था; तत्राह—**व्याघातेति** । आशङ्का उक्तानवस्था यदि सर्वत्र शङ्कसे, तदा धूमाद्यर्थं वह्न्यादौ तवैव प्रवृत्तिः न स्यादिति तर्करूपेण व्याघातेन वारणीयेत्यर्थः । **उक्तमिति** । कालान्तरे कदाचिद्व्यभिचरिष्यतीति कालं भाविनमाकल्प्याशङ्केत; तदाकलनं च नानुमानमवधीरयेतेत्यनेनोक्तमित्यर्थः । भाविनमित्युपलक्षणम् । **पाकपूर्वकालीनः** । पाककालीनध्वंसप्रतियोगी । **सिद्ध्यसिद्धीति** । भावि यदि ज्ञातं, तर्ह्यनुमानेनेति किं पाश्चात्येन व्यभिचारज्ञानेन, यदि न ज्ञातं तर्हि, तत्र व्यभिचारो ज्ञातुमशक्य इत्यर्थः । पाककालीनध्वंसप्रतियोगिपाकत्वादि तु असिद्धत्वा[1]-च्चरमपाकसिद्ध्यधीनसार्थकताकविशेषणयुक्तत्वाच्च न हेतूकृतम् । न च जातायामनुमितौ व्यभिचारिलिङ्गधीजन्यत्वेन भ्रमत्वमनुमेयमिति वाच्यम्; व्यभिचारलिङ्गधीजन्यानुमितेरपि प्रमात्वात् । **शब्दादनुभूतस्येति** । विद्यमानशक्त्यादि[2]ज्ञानादविद्यमानव्यक्तिबोधः प्राभाकरमत इव समानप्रकारकत्वेन शक्त्यादिधीशाब्दबोधयोः कार्यकारणभावादिति भावः ।

---

[1] पाकत्वादिति हेत्वसिद्धत्वा. [2] शक्त्यादि.

प्रमृष्टतत्ताकस्मृतिसम्भवात्। नन्वनुमितेः विशेषणज्ञानजन्यत्वेन सामान्यप्रत्यासत्तिसिद्धिः, न चानुमानान्तराद्विशेषणज्ञानमनवस्थानादिति चेन्न; विशेषणतावच्छेदकप्रकारकज्ञानादेव साध्यविशेषणकपक्षविशेष्यकानुमितिसम्भवात्। एतेन 'सुरभि चन्दनम्' इत्यादिविशिष्टज्ञानाय कल्पिता ज्ञानलक्षणा प्रत्यासत्तिरपि निरस्ता; चन्दनत्वेन सुरभित्वानुमानोपपत्तेः। अन्यथा साध्यविशिष्टपक्षप्रत्यक्षोपपत्तेरनुमानमात्रोच्छेदप्रसङ्गात्। न चाभावसाध्यकेवलव्यतिरेकिणि साध्यप्रसिद्धेरनङ्गत्वात् तत्र क्लृप्तायाः अनुमितिसामग्र्याः प्रत्यक्षसामग्रीतो बलवत्त्वमिति वाच्यम्; अर्थापत्तिवादिभिरस्माभिस्तदनभ्युपगमात्। 'पर्वतवृत्तिधूमो वह्निव्यापकः' इति परामर्शात् साध्यविशेष्यक-

---

तत्तद्देशकालसम्बन्धित्वरूपतत्ताविशिष्टधूमत्वादिना अनुभूतस्यापि केवलधूमत्वादिना स्मृतिरित्याह---**प्रमृष्टतत्ताकेति**। तत्तांशे संस्कारानुद्बोधेनाविषयीभूततत्ताकेत्यर्थः। **ज्ञानादेवेति**। विशेषणज्ञानं यदि समवायेन हेतुः तदा प्रत्यक्ष एव, अन्यथा स्मृतौ व्यभिचारादिति भावः। **पक्षप्रत्यक्षेति**। परमाणुः रूपवानित्याद्यनुमितेरपि परमते मानसप्रत्यक्षत्वोपपत्तिः। न चानुमिनोमीत्यनुव्यवसायेनानुमितित्वजातिसिद्ध्या तद्विशिष्टस्य परामर्शजन्यत्वमावश्यकम्, अन्यथा व्याप्तिपक्षधर्मतानिश्चयस्यानुपयुक्तत्वापत्तेरिति वाच्यम्; अनुमितिसामग्रीत्वेन पराभिमतव्याप्तिज्ञानाद्युत्तरप्रत्यक्षस्यैवोक्तानुव्यवसायविषयत्वात्, व्याप्तिपक्षधर्मतानिश्चयस्य तादृशप्रत्यक्षप्रमात्वग्रहोपयुक्तत्वसम्भवात् वह्न्यादिप्रमात्वस्य व्यापकत्वपक्षे वह्न्यादिव्याप्यवद्विशेष्यज्ञानस्य विशेष्यदर्शनत्वेन उपयोगादिति भावः। **अर्थापत्तीति**। वस्तुतस्तु तत्रानुमितिस्वीकारेपि व्यतिरेकव्याप्तिज्ञानघटितायाः सामग्र्या एवालौकिकप्रत्यक्षसामग्रीतो बलवत्त्वं सिद्ध्यति,

पक्षविशेषणकानुमित्यभ्युपगमे तु नैव काप्यनुपपत्तिः, अनुमितेः पक्षविशेष्यत्वनियमे मानाभावात्। किञ्च धूमत्वादिसामान्यं न स्वरूपतः प्रत्यासत्तिः। धूलीपटले धूमभ्रमानन्तरं धूमत्वेन सकलधूमनिष्ठवह्निव्याप्तिग्रहानुदयप्रसङ्गात्। न चेष्टापत्तिः; तदुत्तरकालमनुमित्यनुदयापत्तेः। तथाच धूमत्वज्ञानं प्रत्यासत्तिरिति वाच्यम्। तच्च धूमेन्द्रियसन्निकर्षद-

---

न त्वन्वयव्याप्तिज्ञानघटिताया इति ध्येयम्। **नैव काप्यीति**। विशिष्टबुद्धिमात्रे विशेषणविषयकत्वेन संस्कारादिसाधारणेन हेतुत्वेऽपि पक्षवृत्तिसाध्यघटितव्याप्तिविशिष्टविशेष्यकज्ञानात् पक्षधर्मताबलात् पक्षीयसाध्यविशेष्यकानुमितिसम्भवः सामान्यलक्षणानैरपेक्ष्येणेति भावः। यदि पक्षीयधूमस्सन्निकृष्टः, तदा तत्र पूर्वोक्तरीत्या स्मृतव्याप्तेर्वैशिष्ट्यधीसम्भवान्न सामान्यलक्षणापेक्षा। यदि च व्याप्तिधीसमये पक्षे विद्यमानो धूमोऽसन्निकृष्टः; तदापि स्वरूपतो धूमत्वप्रत्यासत्तित्वेऽपि तदानीं तत्सत्त्वात् व्याप्तिधीसम्भवः। यदि तु न तथा, किन्तु पक्षीयधूलीपटले धूमत्वभ्रमोत्तरं पक्षीयातीतानागतधूमेषु व्याप्तिं गृहीत्वा अनुमितं, तदा अतीतादिधूमेषु व्याप्तिधीपूर्वेक्षणावच्छेदेन धूमत्वरूपप्रत्यासत्तेः कारणस्याभावात् न व्याप्तिधीरूपकार्यस्य विशेष्यतासम्बन्धेन तेषूत्पत्तिसम्भव इत्याह—**धूलीत्यादि**। उपलक्षणमिदम्। पक्षावृत्तिधूमे व्याप्तिग्रहानन्तरं यदि पक्षीयातीतादिधूमेषु व्याप्तिं गृहीत्वा अनुमितिः, तत्राप्यनुपपत्तिर्बोध्या। तत्राततादिषु पक्षीयधूमेषु व्याप्तिप्रत्यक्षपूर्वेक्षण इति शेषः। एतेन "धूलिपटले धूमत्वभ्रमात् धूममात्रे व्याप्तिप्रत्यक्षे बाधकाभावः, तस्य धूलीपटलविशेष्यकत्वं तु दोषप्रयोज्यं, न तु धूमत्वसामान्यप्रयोज्यम्; धूमनिष्ठविशेष्यतासम्बन्धेनैव धूमत्वप्रकारकप्रत्यक्षस्य तत्कार्यत्वात्" इति परास्तम्। **धूमत्वज्ञानमिति**। विषयतासम्बन्धेन कारणत्वात्[1] तेन

---

[1] विषयतासंम्बन्धेन—विषयत्वरूपविषयताघटितसंम्बन्धेन कारणत्वात्.

शायां धूमज्ञानात् प्राक् नास्त्येव। निर्विकल्पके मानाभावात् विशिष्टज्ञानत्वेन विशेषणज्ञानत्वेन च कार्यकारणभावानभ्युपगमात्, अवश्यकल्पनकार्यकारणभावविशेषेणैव सर्वव्यवहारोपपत्तेः। न च धूमत्वेन सन्निकृष्टधूमव्याप्तिज्ञानानन्तरं तत्समानाकारमसन्निकृष्टधूमगोचरं ज्ञानान्तरमुत्पद्यत इत्यत्र

सम्बन्धेनाततादावपि तदस्तीति तत्रापि विशेष्यतया प्रत्यक्षोत्पत्तिरिति भावः। नन्वनवच्छिन्नप्रकारतया ज्ञानं जन्य[1]प्रत्यक्षं वा प्रत्यनवच्छिन्नविषयतया[2] सम्बन्धेन सविषयकत्वेन हेतुत्वमवश्यं वाच्यम्, अन्यथा जातिमानिति प्रत्यक्षस्य नियमेन घट इत्याद्याकारकत्वं स्यात्, सन्निकर्षादेरविशेषात्; ज्ञानोपरमेऽपि इच्छाद्यनुव्यवसाये घटादेः प्रकारत्वात् ज्ञानत्वेन हेतुत्वम्, अनुव्यवसायस्य साक्षित्वेनाजन्यत्वे तु ज्ञानत्वेनैव हेतुत्वमित्यत्राह—**अवश्येति**। अयं घट इत्यादिसधर्मितावाच्छेदकबुद्धेः बाधाभावप्रयोज्यत्वात् निर्धर्मितावच्छेदघट इत्यादिबुद्धेरपीष्टविषयान्तरजिज्ञासादिरूपप्रतिबन्धकाभावप्रयोज्यत्वात् तादृशप्रतिबन्धकत्वस्य च जातिमानिति प्रत्यक्षं भवतु; घट इति प्रत्यक्षं भवत्वित्यादीच्छोत्तेजका[3]नुरोधेन पृथक्त्वात् जातिमानिति धीकाले घट इत्यादिधीसामग्र्या अनावश्यकत्वेन जातिमानिति ज्ञानस्य नियमेन घट इत्याद्याकारकत्वासम्भवात् किंच उक्तप्रकारतासम्बन्धेन प्रत्यक्षे न[4] विशेषणधीहेतुत्वम्, अनन्तनिर्विकल्पककल्पनागौरवात्; किन्तु अनवच्छिन्नविषयतासम्बन्धेन प्रत्यक्षं प्रति कल्पसंयोगादेरेव स्वाश्रयसमवायेन विजातीयत्वेन हेतुत्वम्। अलौकिकप्रत्यक्षं तु अनवच्छिन्नाप्रकारतापरामर्शादिनियम्येति भावः। ननु धूमनिष्ठविशेष्यतया प्रत्यक्षं प्रति स्वाश्रयनिष्ठविषयतया धूमत्वं हेतुः, तथाच ज्ञानान्तरानुत्पादेऽपि न क्षतिः, चक्षुस्संयुक्तसमवायादेः सहकारित्वात्, तदभावकाले न

[1] ज्ञानजन्य. [2] विषयता. [3] त्तेजकता. [4] प्रत्यक्षेण.

मानमस्ति; धूमत्वेन पुरोवर्तिनं धूमं साक्षात्करोमि न व्यवहितमित्यनुभावाच्च। अन्यथा जगतीगतसकलधूमव्यक्तीरहं साक्षात्करोमीत्यनुव्यवसीयेत। न चैवमनुभवमात्रशरणैरभ्युपेयते। किञ्च सामान्यप्रत्यासत्त्यङ्गीकारे यत् प्रमेयं तदाभिधेयं, यत् प्रमेयवत् तदभिधेयवदित्यादिव्याप्तिपरिच्छेदे सार्वज्ञचापत्तिः। न चेष्टैव सा; परज्ञानविषयो घटो न वेत्यादिसंशयानुपपत्तेः। न च घटत्वप्रकारकघटविषयकनिश्चयो घटसंशयविरोधी, प्रमेयमिति निश्चयस्तु घटविषयोऽपि न घटत्वप्रकारक इति वाच्यम्; भासमानवैशिष्ट्यप्रतियोगिन एव प्रकारत्वात्, घटत्वस्यापि प्रमेयमिति ज्ञाने भासमानवैशिष्ट्यप्रतियोगित्वात्, घटत्वप्रकारकनिश्चयस्य घटत्वज्ञानजन्यत्व-

---

प्रत्यक्षं, तत्राह—**धूमत्वेन पुरोवर्तिनमित्यादि**। **साक्षात्करोमीति**। न च—सन्निकृष्टलौकिकविषयकप्रत्यक्षस्योक्तानुव्यवसायविषयत्वात् नोक्तापत्तिः, व्यवहितादिषु लौकिकविषयत्वाभावादिति वाच्यम्; प्रत्यक्षीयालौकिकविषयतायामुक्तरीत्या मानाभावे तात्पर्यात्कविकाव्यादिस्थले स्मरणानुमानशाब्दबोधरूपवाक्यार्थधीसम्भवात् बाधितेप्यर्थे आहार्यालौकिकमानसादिप्रत्यक्षास्वीकारेपि शाब्दधीसम्भवात्, कलहादौ तथा दृष्टत्वात्, वाक्यार्थज्ञानं विनापि शुकवद्वाक्यरचनासम्भवाच्च प्रमेयत्वसामान्यलक्षणायाः सर्वविषयज्ञानजनकत्वम्। प्रमेयत्वसामान्यलक्षणा तु प्रमेयत्व[1]सामान्यलक्षणाजन्या स्वयमपि सर्वविषयकेत्यभिप्रायेणाह—**यत्प्रमेयवदिति। इष्टैवेति**। अलौकिकप्रत्यक्षत्वादुक्तसार्वज्ञ्यमीश्वरीयधीविलक्षणमिति भावः। उक्तज्ञानाभावकाले संशये बाधकाभावादाह—**परज्ञानेति**। उक्तज्ञानेत्यर्थः। यस्योक्तज्ञानं जातं तस्यैवोक्तज्ञानविषयताविशिष्टो घटो न वेत्यादिसंशयानुपपत्तेरित्यर्थः। **प्रमेयमितीति**।

---

[1] न प्रमेयत्व.

विशेषणाददोष इति चेत् न विशेषणज्ञानत्वेनैव तस्य जनकता वाच्या, तस्याः प्रागेव निरासात्; स्वरूपसम्बन्धविशेषाभ्युपगमे च अनिर्वचनीयवादापत्तेरित्यादिदूषणानि बहुतरमूहनी-

---

यत्प्रमेयं तदभिधेयमितीत्यर्थः। **विशेषणादिति**। घटत्वज्ञानजन्यत्वमेव घटत्वप्रकारकत्वमित्यर्थः। **निरासादिति**। यत्र घटत्वादौ प्रमेयत्वाभिधेयत्वयोः सहचारं गृहीत्वा व्याप्तिर्गृहीता तत्र घटत्वज्ञानजन्यत्वमपि व्याप्तिग्रहे वर्तते। न च स्वरूपतो घटत्वज्ञानजन्यत्वं वाच्यम्, उक्तस्थले च प्रमेयत्वाधिकरणत्वेन तद्ज्ञानं न स्वरूपत इति वाच्यम्; तथाप्ययं घटभिन्नवानिति निश्चयस्य घटभिन्नत्वसामान्यलक्षणाजन्यस्योक्तसंशयविरोधित्वापत्तेः॥

ननु—प्रकाशस्य सतस्तदीयतामात्ररूपः स्वभावविशेषो विषयतेति बौद्धाधिकारे उक्तम्, तत्र तदीयता तत्सम्बन्धित्वं प्रकाशस्य ज्ञानस्य, तथाच ज्ञानस्वरूपविशेष एव अर्थेन सह ज्ञानस्य सम्बन्ध इत्यर्थः। सामान्यतो विषयता ज्ञानमेव, घटादिविषयता तु घटादीयत्वेन अनुगताः ज्ञानविशेषाः संयोगविशेषा इव घटादीनां, सम्बन्धव्यवहारनिमित्तं च ज्ञाननिष्ठमर्थसम्बन्धित्वं, न त्वर्थनिष्ठं ज्ञानसम्बन्धित्वं, अतीतानागतानुरोधात्, सम्बन्धसम्बन्धिनोश्चाभेदो न दोषाय, सर्वत्र स्वरूपसम्बन्धस्थले तथा कल्पनादिति शिरोमणिः। तथाच घटत्वप्रकारकज्ञान[1]मुक्तसंशयविरोधि; प्रकारकत्वं च ज्ञानविशेषरूपमिति प्रमेयमित्याद्याकारकज्ञानस्य अतथात्वादविरोधित्वमित्यत आह—**स्वरूपेति**। स्वस्य स्वं न सम्बन्धः, स्वं न स्वीयमित्यनुभवात्, अथ केनचित् रूपेण स्वस्यापि स्वातिरेकं स्वीकृत्य स्वप्रतियोगिकसम्बन्धत्वं वाच्यम्; तथापि तादृशकिञ्चिद्रूपविशिष्टस्य स्वरूपस्य स्वभिन्नत्वे स्वभेदो[2]

---

[1] मान. [2] स्वाभेदो.

विरुद्ध इति मिथ्यात्वं वाच्यमित्यनिर्वाच्यवादापत्तिः। अथ तादृशविशिष्टरूपमत्यन्तभिन्नं, तर्हि भाषान्तरेणातिरिक्तविषयैव स्वीकृता। नन्वस्त्वतिरिक्तैव विषयता। उक्तं च शिरोमणिना—"यदि ज्ञानं विषयता, तर्हि घटपटाविति धीर्घटत्वपटत्वावच्छिन्नघटीयपटीयात्मकविषयताशालित्वात् भ्रमस्स्यात्; अथ यथा समवायोऽनवच्छिन्न एव[1] सत्ताया रूपसंयोगाद्यवाच्छिन्नश्च रूप[2]संयोगादेः सम्बन्धः, तथा निर्विकल्पकं ज्ञानं अनवच्छिन्नमेव। सविकल्पकं तु तत्तत्प्रकारावच्छिन्नम्। विषयतासमूहालम्बने[3] घटत्वाद्यवच्छिन्नं ज्ञानं घटादेर्विषयताभ्रमे घटत्वाद्यवच्छिन्नं पटादेरिति चेत्तर्हि घटज्ञानं ज्ञातो घट इत्येव स्यात्, न तु घटत्वेन घटज्ञानं, घटत्वेन घटो ज्ञात इति, घटत्वस्य सम्बन्धकोटौ प्रवेशात्। न हि भवति नीलत्वेन नीलः पटः, नीलत्वेन पटः नीलिमेति। तत्तत्प्रकारावच्छिन्नं च यदि धर्मान्तरं तदा भाषान्तरेणातिरिक्तविषयताङ्गीकारः। अथ तदुभयमेव, तदातीतानागतविशेषणके अप्रतीकारः। किंच घटज्ञानं यदि घटादिभिः स्वरूपेण सम्बन्धमिति तेषु व्यवहारमाधत्ते, तदा आत्मनि स्वाभावेषु कालादावप्यादध्यात्, तैरपि समं तस्य स्वरूपेण सम्बद्धत्वात्। अपिच यदि विषयत्वं तत्त्वं वा नातिरिच्यते, तदा कथं तद्विषयकेच्छादिसामान्ये तद्विषयकज्ञानानां कारणत्वं? अननुगतत्वात्। तस्मादतिरिक्तैव विषयता, तद्विशेषास्तु प्रकारत्वादयः। एवं विषयतात्वादिकमपि। एतेन प्रतियोगित्वादधिकरणत्वादयोपि व्याख्याताः। अथैवं सम्बन्धानन्त्ये अनवस्था स्यात्, स्यादेव, यदि क्वचिदपि स्वरूपसम्बन्धेन न प्रतीकारः; अन्यथा अनुपपत्तेः दुर्वारत्वात् सा ज्ञाननिष्ठा[4] ज्ञानस्य नियतकार्यजनकतावच्छेदकतया कल्पनीया, तत्तत्प्रतियोगितया चार्थे विषय-

---

[1] एवं. [2] च्छिन्नस्वरूप. [3] च्छिन्नविषयतासमूहालम्बनेन. [4] साक्षात् ज्ञाननिष्ठा.

व्यवहारः। परे तु विषयत्वविषयित्वे भिन्ने एवार्थज्ञानयोः प्रतियोगित्वानुयोगित्वे इव भावाभावयोरित्याहुः। इत्थंच स्वभावेति स्वीयभावार्थकम्[1]। प्रकाशस्येति त्विच्छानिरासायेत्युत्तरग्रन्थानुरोधेन वर्णयन्ति। वस्तुतस्तु इच्छादिष्वपि ज्ञान इव विषयत्वम्। अथ तेषु जनकज्ञानौपाधिकं विषयत्वामिति चेन्न; जनकज्ञानस्य तद्विषयत्वस्य वा तद्विषयतात्वे अतिप्रसङ्गात्, ईश्वरेच्छादौ तदसम्भवाच्च। अथ यद्विषयकत्वेन ज्ञानस्येच्छादिजनकत्वं तद्विषयकज्ञानमेव इच्छादेस्तद्विषयत्वमिति चेत्तर्हि इच्छादेः सर्वविषयकत्वं[2] न स्यात्, सर्वविषयकत्वेन इच्छाद्यनुत्पादकत्वात्। स्याच्च सुखादीच्छाया अपि दुःखाभावादिविषयकत्वं, ज्ञानोपरमे इच्छादीनां च सविषयकत्वं न स्यात्। तस्माल्लाघवाद्बाधकाभावाच्च ज्ञान इवेच्छादिष्वपि ज्ञानाघटितैव विषयता" इति। तत्र व्याख्यानम्---तत्तत्प्रकारेति। यदवच्छिन्नं ज्ञानं विषयता तद्विशेषणं यस्य विषयता[3]तद्विशेष्यमिति भावः। अतीतेति। अतीतादिविशेषणकं ज्ञानमिदानीं अतीतादिविषयकमित्यादिव्यवहारानुपपत्तिरिति भावः। नन्वेकत्र ज्ञानं घटसम्बद्धत्वं पटसम्बद्धत्वं च अस्ति, तत्राद्ये घटत्वम् अन्त्ये पटत्वं चावच्छेदकं, भ्रमे तु पटसम्बद्धत्वे घटत्वमवच्छेदकमिति भ्रमत्वमेव, सम्बन्धत्वावच्छेदकत्वे चातिरिक्ते अनतिरिक्ते चेति न विषयताबाधः; इत्थंच यत्सम्बद्धत्वं ज्ञाने, स विशेष्यः, योऽवच्छेदकः स प्रकार इत्युच्यते तत्राह--किञ्चेति। स्वरूपेण स्वात्मकेन सम्बन्धेन आत्मनि स्वस्मिन् कथमिति। न चाननुगततत्तद्विषयता[4]सम्बन्धेन विषयविशिष्टज्ञानत्वेनैव हेतुतेति वाच्यम्; अननुगतसम्बन्धैः कारणत्वे सत्यपि परामर्शादौ तत्सम्बन्धेन हेतुत्वं न क्लृप्तमित्यनुमित्याद्यनुत्पत्तिसम्भवे पक्षतादिहेतुत्वानापत्त्या

---

[1] र्थकत्वम्. [2] सवियकत्वं. [3] विषयतायाः. [4] गतत्वाद्विषयता.

अव्यवस्थापत्तेः, [1] अननुगतसम्बन्धघटितव्यापकत्वस्य दुर्वचत्वाच्च। अतएव सम्बन्धतावच्छेदकस्य संयोगत्वादेरपि अभावभाने संसर्गमर्यादया भानमङ्गीकुर्वन्ति। अतएव सर्वसम्बन्धेन भूतलादौ द्रव्यं नास्ति सम्बन्धसामान्येन तु द्रव्यं तत्रास्तीति सिद्धान्तः। प्रकारत्वादय इत्यादिना संसर्गत्वविशेष्यत्वनिर्विकल्पकविषयत्वसंग्रहः। निर्विकल्पकविषयत्वं विशेष्यत्वमिति केचित्। सर्वसाधारणं तु विषयितात्वादिकमर्थान्तरं सम्बन्धतावच्छेदकमुपेयम्। अतएव, तद्विषयकज्ञानत्वादिनाऽनुगतरूपेण हेतुत्वादिति भावः। स्वरूपसम्बन्धलोपे अनवस्थेत्याह—अथेति। यावत्प्रतीतिः तावत्सम्बन्धः, तदभावे तु न स इति नानवस्थेत्याशयेनाह—स्यादिति। जनकतावच्छेदकेति। न च विषयनिष्ठा सा प्रतियोगितासम्बन्धेन ज्ञाननिष्ठजनकतायामवच्छेदिकाऽस्त्विति वाच्यम्; कारणांशे साक्षात्प्रकारीभूय अवच्छेदकस्य वृत्तिनियामकसम्बन्धेनैव तत्वोपगमात्। कारणताया अवच्छेदकत्वेन कल्प्यस्य तत्सामानाधिकरण्यसम्भवे वैयधिकरण्याकल्पनादिति भावः। विषयनिष्ठप्रत्यासत्त्या हेतुतद्भावे वाच्ये विषयनिष्ठोपि सम्बन्धास्सिध्यति, अन्यथा स्वविषयताप्रतियोगित्वेन तदुक्तगौरवादित्याशयेनाह—परेत्विति। तथाप्यर्थज्ञानोभयनिष्ठ एक एव सम्बन्धः कल्प्यते न तूभयमित्यस्वरसेनाहुरिति। तदेतत्सव्याख्यानं शिरोमणिवाक्यम्। तथाच प्रमेयमित्यादिज्ञाने घटत्वप्रकारताकत्वाभावेन उक्तसंशयाविरोधित्वं, प्रमेयवदिति ज्ञाने च घटत्वप्रकारता नानवच्छिन्नेत्यनवच्छिन्ना या घटत्वप्रकारता तच्छालित्वेन विरोधित्वे न दोष[2] इति चेन्न; तस्यापि स्वरूपसम्बन्धेत्यादिग्रन्थेनैव प्रत्याख्यानात्, ज्ञानार्थस्वरूपयोः सम्बन्धविशेषरूपस्य अतिरिक्तविषयतारूपस्य अभ्युपगमे चानिर्वनीयत्वं विचारासहत्वमापद्यत इति तदर्थसम्भवात्। तथाहि—भासमानवैशिष्ट्यप्रतियोगि-

[1] अनुगतेने. [2] नादोष.

त्वानुयोगित्वयोरेव प्रकारताविशेष्यतारूपत्वसम्भवेन तदतिरिक्ततत्कल्पने मानाभावः। न च दण्डपुरुषसंयोगा इत्यादिसमूहालम्बने दण्डादेः प्रकारत्वापत्तिः, संयोगेन रूपवानित्यादिज्ञाने च रूपादेः प्रकारत्त्वं न स्यादिति वाच्यम्; भासमानेत्यस्य वैशिष्ट्यप्रतियोगित्वानुयोगित्वयोश्च विशेषणत्वात्। तथाच सांसर्गिकविषयतामतिरिक्तामङ्गीकृत्य संयोगादिनिष्ठसांसर्गिकविषयतानिरूपितसांसर्गिकविषयताश्रययोः प्रतियोगित्वानुयोगित्वयोः प्रकारताविशेष्यतारूपत्वमुच्यते। न च प्रकारतां विशेष्यतां वा अतिरिक्तां उपेत्य[1] प्रकारताश्रयप्रतियोगिकत्वं विशेष्यताश्रयानुयोगिकत्वं वा सांसर्गिकविषयत्वमित्येवास्त्विति वाच्यम्; संयोगेन रूपवानित्यादिज्ञाने कालिकसम्बन्धस्यापि संसर्गत्वापत्तेः, संयोगादेः संसर्गत्वाभावापत्तेश्च, संयोगादेः रूपादिप्रतियोगिकत्वाभावात्। न च अतिरिक्तप्रकारतादिस्वीकारे संयोगनिष्ठसंसर्गतानिरूपितघटादिप्रकारताकज्ञानत्वेन कारणतावच्छेदके निवेशे लाघवम्, उक्तसंसर्गतानिरूपिता या घटादिप्रतियोगित्वसंसर्गता तच्छालिज्ञानत्वेन निवेशे तु गौरवमिति वाच्यम्; उक्तगौरवापेक्षया प्रकारताविशेष्यतयोरतिरिक्तयोः कल्पने गौरवात्। संयोगे तत्प्रतियोगित्वानुयोगित्वयोश्च एकस्या एव सांसर्गिकविषयतायाः सम्भवेन संयोगनिष्ठा या घटप्रतियोगित्वसंसर्गता तच्छालिज्ञानत्वेन निवेशसम्भवाच्च। एतेन—'संयोगसंसर्गतानिरूपितसंसर्गताद्वयकल्पने तत्स्थाने प्रकारताविशेष्यते एव कल्पयेते इति न गौरवम्' इति परास्तम्; स्वप्रतियोगिकसंयोगानुयोगित्वसम्बन्धेन घटादिप्रकारताकज्ञानस्थले तादृशसंसर्गताद्वयस्य अनुव्यवसायासिद्धत्वात्। अतएव केवलसंयोगेन घटाभावनिश्चयोत्तरं तादृशबुद्धेः त्वन्मते उत्पत्त्यापत्तिः, स्वाश्रयसंयोगेन घटवत्ताबुद्धेः तत्प्रतिबध्यत्ववारणाय घटप्रकारतानिरूपितसंयोगसंसर्गताशालिज्ञानस्यैव त्वन्मते तत्प्रतिबध्य-

[1] अभ्युपेत्य.

त्वात्, तादृशबुद्धेस्त्वन्मते संयोगसंसर्गताया घटप्रकारतानिरूपितप्रतियोगित्वसंसर्गतानिरूपितत्वात्[1]। ननु घटादिस्वरूपं यदि संयोगादिप्रतियोगित्वानुयोगित्वं, तदा स्वाश्रयसंयोगादिसम्बन्धेन घटत्वप्रकारकज्ञानस्यापि घटप्रकारकत्वापत्तिः; यदि तदतिरिक्तं, तथापि स्वाश्रयप्रतियोगिकसंयोगत्वादिना सम्बन्धतायां तत्प्रकारकज्ञानस्य स्वसंयोगीयप्रतियोगितासम्बन्धेन पटवान् घट इत्यादिज्ञानस्य च घट प्रकारकत्वापत्तिः, द्रव्यवत् घटवदिति ज्ञानयोरवैलक्षण्यापत्तिश्च, अतिरिक्त प्रतियोगित्वानुयोगित्वयोः तत्संसर्गिकविषयत्वयोश्च कल्पनामपेक्ष्य अतिरिक्तप्रकारत्वविशेष्यत्वयोरेव कल्पने लाघवं चेति चेन्न; घटत्वावच्छिन्नप्रतियोगित्वपर्याप्तसांसर्गिकविषयता हि घटत्वावच्छिन्नप्रकारता; तथाच स्वाश्रयप्रतियोगिकसंसर्गत्व[2]स्थले स्वाश्रयतावच्छिन्नप्रतियोगित्वस्य भानेऽपि घटत्वावच्छिन्नप्रतियोगित्वस्य अभानात् न घटत्वावच्छिन्नप्रकारताव्यवहारः। स्वाश्रयत्वरूपेण स्वाश्रयस्य तु प्रकारत्वमिष्यत एव; तवापि मते तेन रूपेण तत्प्रमात्वनिर्वाहार्थं तथा वाच्यत्वात्। अन्यथा स्वाश्रयरूपसंयोगेन गुणत्वादिप्रकारकज्ञानस्य रूपभ्रमत्वं न स्यात्। स्वसंयोगीयप्रतियोगितासम्बन्धेन पटवान् घट इति[3] ज्ञानस्यापि संसर्गता न घटत्वावच्छिन्नप्रतियोगित्वे पर्याप्ता। तत्पर्याप्तत्वं च घटत्वावच्छिन्नत्व[4]संसर्गतानिरूपितत्वे सति प्रतियोगित्वनिष्ठत्वं, घटत्वावच्छिन्नत्वप्रतियोगितारूपत्रितय[5]पर्याप्तैकविषयतारूपत्वं वा। न च घटत्वावच्छिन्नप्रतियोगिताकसंयोगेन पट[6]प्रकारकज्ञानस्यापि घटत्वावच्छिन्नप्रकारताकत्वेन व्यवहारापत्तिरिति वाच्यम्; इष्टत्वात्। शुद्धसंयोगेन घटत्वावच्छिन्नप्रकारताकत्वेन त्वदङ्गीकृतज्ञानस्यैव मया घटत्वावच्छिन्नप्रतियोगिताकसंयोगसंसर्गकत्वस्वीकारात्,

---

[1] घटप्रकारतानिरूपित्वात्. [2] योगिकसंयोगसंसर्गत्व. [3] पटवानिति.
[4] वच्छिन्न. [5] प्रतियोगितादिषु विशेषणविशेष्यभावापन्नेषु त्रितय. [6] घट-

तत्रैव घटत्वावच्छिन्नत्वप्रतियोगित्वसंयोगानुयोगित्वेषु पर्याप्तायाः एकविषयतायाः स्वीकाराच्च । स्वानुयोगिकसंयोगप्रतियोगितासम्बन्धेन घटवानिति ज्ञानस्य न संयोगेन घटप्रकारकत्वं; प्रतियोगित्वानुयोगित्वयोः अधिकरणधर्मतेन उक्तपर्याप्तिसम्बन्धाभावात्, रक्तदण्डवादति ज्ञानीयस्य व्यासज्यवृत्तेः प्रकारत्वस्य तदवच्छेदकत्वस्य वा दण्डरक्तवदिति ज्ञान इव संयोगेन घटवादिति ज्ञानीयस्य विलक्षणस्य प्रतियोगित्वादिविषयत्वस्य संयोगेन घटप्रकारतानियामकस्य[1] स्वानुयोगीत्याद्याकारकज्ञाने अभावाच्च । शुद्धघटत्वादिप्रकारकत्वं तु शुद्धघटत्वादौ प्रतियोगित्वे च वर्तमानं संसर्गताकत्वं घटवदिति ज्ञाने, घटत्वावच्छिन्नं द्रव्यवदिति ज्ञाने द्रव्यत्वावच्छिन्नं प्रतियोगित्वं संसर्ग इति तयोः वैलक्षण्यमेव । इत्थंच प्रतियोगित्वानुयोगित्वयोः घटादिरूपत्वेऽपि न क्षतिः । वस्तुतस्तु तयोः तदतिरिक्तत्वं त्वयाऽपि वाच्यम्; अन्यथा संयोगसम्बन्धेन तद्भटस्तद्भटीय इत्यादिज्ञानमपि प्रमा स्यात्, तद्भटप्रतियोगिकसंयोगानुयोगित्वस्य भूतलस्वरूपत्ववत् तदा घ[2]टस्वरूपत्वस्याप्यवश्यवाच्यत्वात् भूतलं तद्भटीयं तद्भटो भूतलीय इति बुद्ध्योरेकसंयोगेन प्रमात्वात् । अतिरिक्तयो[3]स्तयोस्स्वीकारे तु संयोगीया या तद्भटनिष्ठप्रतियोगिता तन्निरूपितानुयोगित्ववति तद्भटप्रकारकज्ञानस्य तद्भटप्रमात्वरूपत्वात् तद्भटस्य भूतलनिष्ठतत्प्रतियोगितानिरूपितानुयोगित्वेऽपि स्वनिष्ठतत्प्रतियोगितानिरूपितानुयोगित्वाभावादुक्तबुद्धेः प्रमात्वासम्भवः । न च तयोरतिरिक्तत्वेऽपि तद्भटनिष्ठेन तादात्म्यसम्बन्धे प्रतियोगित्वेन निरूपितानुयोगित्वं तद्भटेऽपीति अयं तद्भट इति बुद्धिरिवायं संयोगेन तद्भटीय इति बुद्धिरपि प्रमा स्यादिति वाच्यम्; संयोगप्रतियोगितायास्तादात्म्यप्रतियोगितातिरिक्तत्वात् । अथ संयोगवत् तादात्म्यस्य संयोगरूपत्वा-

[1] नियामकत्वस्य. [2] तद्भट. [3] प्रमात्वातिरिक्तयोः.

दुक्तदोषतादवस्थ्यमिति चेन्न; तादात्म्यस्यातिरिक्तत्वात् । अन्यथा अयं तादात्म्येन संयुक्तवान् संयोगेन संयुक्तवानिति धियोर्वैलक्षण्यानुपपत्तेः, संयोगवत्त्वावच्छिन्नस्य तादात्म्यप्रतियोगित्वस्य तद्घटे सत्त्वेऽपि तद्घटत्वावच्छिन्नं यत्संयोगप्रतियोगित्वम् तन्निरूपितानुयोगित्वस्य असत्त्वात्, तद्वति संयोगेन[1] तद्घटप्रकारकत्वस्य प्रमात्वरूपत्वेन दोषाभावाच्च । अतएव स्वस्मिम् तद्घटस्य संयोगो नेति व्यवहारः प्रमाणम् । अतएव उक्तशिरोमणिवाक्ये प्रतियोगित्वाधिकरणत्वयोः अतिरिक्तत्वमुक्तम् । तस्य सम्बन्धप्रतियोगित्वयोः अभाव[2]प्रतियोगित्वादेश्च अतिरेक[3] परत्वात् । परमार्थतस्तु संयोगेन घटवद्भूतलमित्यादौ संयोगादिसम्बन्धनिष्ठसांसर्गिकविषयताया एव अतिरिक्ताभ्यां घटभूतलप्रतियोगित्वानुयोगित्वाभ्यां निरूपितत्वं स्वीक्रियते, अत्र ज्ञाने घटस्य भूतले संयोगस्सम्बन्ध इति प्रत्ययात् । स्वाश्रयसंयोगादिसंसर्गकज्ञाने च संयोगादिनिष्ठसांसर्गिकविषयतायाः न ताभ्यां निरूपितत्वं, तथा प्रत्ययाभावात्, स्वाश्रयसंयोगादिसंसर्गकात् घटवद्भूतलमित्यादि[4]ज्ञानात् संयोगेन घटवद्भूतलमिति धीकार्यापत्तेश्च । उक्तज्ञानयोः वैलक्षण्यान्तरस्वीकारे गौरवात् । अतएव वह्न्यादिप्रतियोगिकपर्वताद्यनुयोगिकसंसर्गता संयोगादावस्तीति प्रतियोगिवैयधिकरण्यनिरूपणप्रस्तावे व्याप्तिसिद्धान्तलक्षणे हरिदासादिभिरुक्तं शिरोमणिटीकायाम् । एवंच घटवद्भूतल[5]मित्यादिज्ञाने यदि घटादौ विषयत्वमपेक्षितं, तदा घटादेः ज्ञानसामान्यसामग्र्या घटादौ निर्विकल्पकीयविषयतानियामकत्वम् । अथ विशिष्टबुद्ध्यादौ विशेषणज्ञानादिहेतुत्वे मानाभावात् न तदपेक्षा, तदा तद्ज्ञानाविषयस्यापि घटादेः

---

[1] सत्त्वासंयोगेन. [2] भाव. [3] अनतिरेक. [4] मित्याकारक. [5] घटवद्भूतलमितिज्ञानस्य विशेषणज्ञानादिविधया विशिष्टबुद्ध्यादिहेतुत्वाद्घटवद्भूतल. इत्यधिकः पाठः.

सांसर्गिकविषयतानिरूपकतावच्छेदकत्वम् । वस्तुतस्तु प्रतियोगित्वानुयोगित्वयोरेव विषयतात्वप्रकारतात्वविशेष्यतात्वानि कल्प्यन्ते । अन्यथा उक्तरीत्या घटत्वावच्छिन्नप्रतियोगित्वनिरूपितसंसर्गताकत्वस्य घटत्वावच्छिन्नप्रकारताकत्वरूपत्वे गौरवात् । तथाच प्रतियोगित्वानुयोगित्वयोः अतिरिक्तत्वं स्वीकृत्यापि विषयताया अतिरिक्तत्वस्वीकरणस्य अयुक्तत्वात् पक्षधरपर्यन्तप्राचीनतार्किकसम्मतं भासमानवैशिष्ट्यप्रतियोगित्वानुयेगित्वे एव प्रकारत्वविशेष्यत्वे इति मतमेव युक्तमित्यवहिततमचित्तैश्चिन्त्यमेतत्सुधीभिः ॥

ननु तथापि प्रमेयत्वसामान्यलक्षणाजन्यज्ञानस्य प्रमेयमुख्यविशेष्यकत्वेन घटत्वादिरूपप्रमेयप्रतियोगितानिरूपितसमवायसांसर्गिकविषयताकत्वाभावात् कथमुक्तसंशयविरोधित्वमाचार्यैरुक्तम् ? न चोक्तज्ञानोत्तरभाविज्ञानस्य तथात्वमभिप्रेतमिति वाच्यम् ; घटत्वस्यापि प्रमेयमिति ज्ञाने भासमानवैशिष्ट्यप्रतियोगित्वादित्युक्तिविरोधादिति चेन्न ; प्रमेयमिति ज्ञानात् ज्ञानान्तरे भासमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वादित्यर्थसम्भवात् । अपिच मुख्यविशेष्यतानन्त[1]र्भावेन सामान्यप्रत्यासत्तिकार्यत्वस्य नव्यमते स्वीकारात्, विशिष्टवैशिष्ट्यबुद्ध्यादौ विशेषणतावच्छेदकप्रकारकज्ञानत्वादिना हेतुत्वस्याप्यस्वीकारात्, प्रमेयमिति सामान्यज्ञानाज्जायमाने प्रमेयवानयमित्याकारकज्ञाने घटत्वस्य भासमानवैशिष्ट्यप्रतियोगित्वादुक्तसंशयानुपपत्तिरित्याभिप्रायः । न चोक्तसंशये प्रमेयवानित्याकारा[2] प्रमेयतावच्छिन्नप्रतियोगितात्वावच्छिन्ननिरूपकताकसमवायसंसर्गताकधीः न विरोधिनी, किन्तु अयं घट इत्याकारा शुद्धघटत्वप्रतियोगितात्वावच्छिन्ननिरूपकताकसमवायसंसर्गताकधीरिति वाच्यम् ; सकलघटवृत्तित्वादिरूपघटत्वत्व[3]विशिष्टवानयमित्यादिज्ञानस्यापि तद्विरोधत्वानुभवात् तद्व्यक्तिप्रतियोगिताकाभावबुद्धौ लाघवेन तद्व्यक्तिप्रकारक[4]-

[1] विशेष्यताविशेषणानन्त. [2] त्याकारात्. [3] घटत्वत्वं त्वन्मते. [4] प्रकारताक.

यानि । तस्मात् सामान्यप्रत्यासत्त्या निषेधमात्रप्रतियोगि-

निश्चयत्वेन विरोधित्वौचित्यात् । अन्यथा तद्घटमात्रवृत्त्यनन्तधर्मावच्छिन्नप्रकारताकनिश्चयत्वेन अनन्तविरोधित्वकल्पने गौरवात् । न चात्र घटत्वमित्यादिज्ञानस्यापि विरोधित्वान्नोक्तधीत्वेन विरोधित्वं, किन्तु घटत्वनिश्चयत्वेन, निश्चयत्वं च जातिविशेषोऽनभ्यासकालीनज्ञानइव प्रमेयवानयमित्यादिज्ञाने घटत्वाद्यंशे नास्ति, दोषविशेषस्य तत्र प्रतिबन्धकतया[1] स्वीकारादिति वाच्यम् ; तादृशदोषकल्पने गौरवात्, सामान्यप्रत्यासत्तेरेव प्रक्षालनाद्धीति न्यायेन त्यागार्हत्वात्, प्रमेयत्ववन्निष्ठेत्यादिव्याप्तिज्ञानस्य आधेयत्वांशेऽपि प्रमेयत्वनिश्चयत्वाभावापत्तेश्च । **तस्मादिति** । यद्यपि घटोऽत्यन्ताभावसमानाधिकरणो धर्मत्वादित्यनेन, कपालमत्यन्ताभाववत् वस्तुत्वादित्यनेन वा घटसमानाधिकरणयावदत्यन्ताभावसिद्धिः सम्भवति, वह्निमदित्यनुमितेरबाधितयावद्वह्निविषयकत्ववत् उक्तानुमितेरप्यबाधितयावदत्यन्ताभावविषयकत्वसम्भवादिति चेत्, तथापि यादृशयावद्भावप्रतियोगित्वाभावस्यायोग्यत्वेन लौकिकप्रत्यक्षाभावस्योक्तत्वादलौकिकप्रत्यक्षस्य च अनङ्गीकारात्, अङ्गीकारेऽपि चन्द्रप्रादेशिकत्वप्रत्यक्षमिव तद्बाधितत्वानुमानोदयादनुपयुक्ता सेति भावः ॥

यत्तु—'असद्विलक्षणत्वे सत्यनारोपितत्वं वर्तमानत्वप्रमाविषयत्वं वा सत्त्वलक्षणमदोषं, तस्य चक्षुराद्ययोग्यार्थघटितत्वेऽपि तद्योग्यताया लक्षणत्वसम्भवात् 'इति' तन्न ; अज्ञानविषयत्वस्य तद्योग्यतात्वे जडेष्वव्याप्तेस्तदवच्छेदकत्वस्य तत्त्वे[2] ब्रह्मण्यव्याप्तेः । तदन्यतरस्य तत्त्वेऽपि शुक्तिरूप्यादावपि धीकाले मिथ्यात्वेन न जानामीत्यनुभवेन अज्ञानविषयतावच्छेदकत्वसत्त्वात्तत्रातिव्याप्तेः, सुखादावव्याप्तेश्च । अत एव प्रातीतिकान्यत्वे सति तुच्छान्यत्वमपि न तथा, चक्षुराद्ययोग्य-

[1] बन्धकतायाः. [2] अतत्त्वे.

त्वोपस्थितौ तदभावग्रहात् बाध इत्यनुपपन्नमेव ।

तुच्छादिघटितत्वाच्च । अतएव वर्तमानविशिष्टरूपेणा[1]ज्ञानविषयतावच्छेदकत्वमपि न तथा, शुक्तिरूप्यादेरिव सुखादेरपि यावत्स्वसत्ताकालं वर्तमानत्वेन प्रत्ययात्तदभावात् दृष्टिसृष्टिपक्षे घटादावव्याप्तेश्च, अज्ञानविषयतावच्छेदकत्वादेः मन्मते मिथ्यात्वाविरोधित्वाच्च । यदपि[2] पराभिमतमिथ्यात्वाभावः सत्त्वमिति स्वकीयमूलग्रन्थे पराभिमतमिथ्यात्वं यदि स्वसमानाधिकरणस्वसमानकालीननिषेधप्रतियोगित्वादि, तदा तदभावस्य पूर्वमुक्तत्वात् पौनरुक्त्यमित्याशङ्क्य स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे तात्पर्यमित्युक्तं, तदतीव चित्रम्, उक्तावच्छेदकत्वस्य मिथ्यात्वरूपत्वेनास्मदाचार्यैः क्वाप्यनुक्तत्वेन अस्मदिष्टत्वात् । न ह्यस्मन्मते घटादौ घटत्वादिना भेदः स्वीक्रियते-किन्तु घटत्वाद्यत्यन्ताभावः । अथ 'नेह नाना' इत्यादिश्रुतावत्यन्ताभाव इव अस्थूलमित्यादिश्रुतौ भेदस्य बोधनात् तादृशमपि मिथ्यात्वं युक्तमिति चेन्न; न स्थूलं यत्रेत्यादिव्युत्पत्त्या तस्या अप्यत्यन्ताभावबोधकत्वात्, 'अस्नेहमच्छायमि' इत्यादौ[3] तत्पुरुषासम्भवेन तत्समभिव्याहारात्, अस्थूलमित्यादावपि बहुव्रीहेर्युक्तत्वात् विभक्त्यन्तत्वानुरोधेन जघन्यत्वेन च चरमपद एव लक्षणास्वीकारेण तस्याद्यपदलाक्षणिकतत्पुरुषतुल्यत्वाच्च । अतएवाद्वैतरत्नादौ तस्या[4] भेदबोधकत्वं खण्डितम् । तद्बोधकत्वेऽप्यार्थिकस्यात्यन्ताभावघटितमिथ्यात्वस्य बोधनसम्भवात्तादृशबोधमादायैव परिमाणनिषेधबोधकत्वमस्याः पूर्वमाचार्यैरुक्तम् । न च परिमाणवति तद्भेदानङ्गीकारे कथं तद्बोधकत्वमिति वाच्यम्; धार्मिसमसत्ताकेन तदाश्रयत्वेन भेदबोधनसम्भवात् । अतएव नेदं रजतमिति प्रतीतिरार्थिकमिथ्यात्वसाधकत्वमिति पूर्व-

[1] रूपेण. [2] यत्तु. [3] अस्मेहोऽच्छाय इत्यापत्त्या. इत्यधिकः पाठः [4] तद्ब.

माचार्यैरेवोक्तम् । किञ्च त्वदीयमूलेऽपि पञ्चविधमेवमिथ्यात्वं दूषणायानुदितं अन्यविधमिथ्यात्वस्यास्मदीयत्वे तददूषणे[1] त्वन्मूलक्षतो न्यूनता स्यात् । तस्मात् पराभिमतेत्यादित्वन्मूलस्यायमर्थः—"सदसद्विलक्षणत्वादिरूपमिथ्यात्वे परैर्ब्रह्ममात्रगततया स्वमतसिद्धसत्त्वस्याभावनिवेशे सिद्धसाधनापत्तेः अबाध्यं सर्वं मेयमित्याकारकधीविशेषविषयत्वाद्यभावस्य तद्धीविषयत्वाद्यभावत्वेन निवेशः कार्यः । तथाच मिथ्यात्वलक्षणस्यासत्त्वाभावघटितत्वेऽपि अनुमीयमानमिथ्यात्वांशस्य तदघटितत्त्वेन पराभिमतस्याभावः उक्तधीविषयत्वादिरूपः सत्त्वमिति । एवञ्च यत्पूर्वमनुमेयत्वेन शङ्कितं तदभावरूपसत्त्वग्राहिप्रत्यक्षस्य बाधत्वमपि सङ्गच्छते, न तु भेदगर्भयथोक्तग्राहिप्रत्यक्षस्यानुमेयात्यन्ताभावतद्भेदा[2] विषकत्वादिति स्फुटमेव ते भ्रान्तप्रतारकत्वम् । तद्धीविषयत्वादिकं च चक्षुराद्ययोग्यत्वात् न प्रत्यक्षमिति त्रिकालसर्वदेशीयनिषेधाप्रतियोगित्वादि दूषणेनैव दुष्ट[3]मित्यस्मदाचार्यैर्न पृथग्दूषितम् । यद्यपि त्वन्मते दृश्यत्वादयः सत्त्वप्रत्यक्षबाधिता इति प्रतिज्ञायास्तित्वप्रमाविषयत्वादिरूपसत्त्वोक्तिरप्यसङ्गता, तत्प्रत्यक्षस्योक्तरीत्याबाधत्वासम्भवात् । तथापि पराभिमतेत्यादौ उक्तासङ्गतौ त्वत्पाण्डित्यमेव बीजमिति । अपिच स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमव्याप्तं[4], घटादिसखण्डदृश्यमात्रे तद्वन्निष्ठायां भेदप्रतियोगितायां तत्समनियतानां ज्ञानविषयताविशेषाणामत्यन्ताभावप्रतियोगित्वादीनां वा तदपेक्षया लघुत्वेनावच्छेदकत्वात् । अथ गुरोरवच्छेदकत्वमते घटादिकमपि तथेति चेन्न; तन्मते कम्बुग्रीवादिमत्त्वादेः प्रतीतिबलात् स्वाश्रयविरोध्यभावप्रतियोगितावच्छेदकत्वेऽपि तदविरोध्यभावप्रतियोगितावच्छेदकत्वाभावात् श्रुत्यादिजनितायाः मिथ्यात्वबुद्धेर्विषयताविशेषादिलघुरूपावच्छिन्नस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वादिवि-

[1] त्वेन तद्दूषणे. [2] तद्भेदादि. [3] दूषित. [4] मव्याप्यं.

ननु प्रत्यक्षस्य वर्तमानमात्रग्राहित्वे शुक्तिरूप्यादेः प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं कथं प्रत्यक्षं स्यात्? अथ तत्र रजतत्वविरोधिशुक्तित्वे साक्षात्कृते तदन्यथानुपपत्त्या च रजतत्वाभावे निश्चिते मिथ्यैव रजतमभादिति तादृङ्निषेधप्रत्ययः स्वसम्बन्धसर्वभासकेन साक्षिणैवोपपन्नः, तर्हि साक्षात् स्वविषयस्यगगनादेर्भाविकालनिषेधाप्रतियोगित्वं सकलकालग्राहिणासाक्षिणा गृह्यतामिति—चेन्न साक्षिणो विद्यमानावभासकत्वेनाविद्यमानभाविबाधाभावभासकत्वानुपपत्तेः,

---

षयकत्वेनाप्युपपत्तेः गुरुनिष्ठतादृशावच्छेदकत्वाकल्पकत्वात् । [1] अथ विषयताविशेषादेरिव तद्भटादेरपि स्वरूपतोऽवच्छेदकत्वसम्भवात् न गौरवमिति वाच्यम्, तथापि तस्य स्वरूपतः प्रतियोग्यंशे विशेषणत्वासम्भवेन केनचिद्रूपेण तथाभूतस्यावच्छेदकत्वं वाच्यमित्युपस्थितिगौरवं दुर्वारमेव । अन्यथा तद्रूपादेः स्वसमनियतकारणतावच्छेदकत्वापत्त्या अनन्त [2] कारणत्वाद्यापत्तेः । विषयताविशेषादिकं यद्यपि प्रत्यक्षे ज्ञानविशेषिततयैव भाति; तथाप्यनुमित्यादौ स्वरूपेणैवविशेषणमिति तदेवावच्छेदकं युक्तम् । किञ्च भेदगर्भमप्युक्तसत्त्वं [3] न चक्षुरादियोग्यं, मूर्तसामान्यवद्भेदवदुक्तरीत्या योग्यानुपलम्भाभावादिति दिक् ॥

साक्षात्स्वविषयस्येति । ज्ञाततया अज्ञाततया वा स्वविषय[4]स्येत्यर्थः । **साक्षिण इति** । प्रमाणवृत्त्यनुपहितसाक्षिण इत्यर्थः । **विद्यमानावभासकत्वेनेपि** । विद्यमानान्येनार्थेन [5] विद्यमानकालावच्छेदेन आध्यासिकतादात्म्याभावेनेत्यर्थः **भाविबाधाभावभासकत्वेति** । भाविकालनिषेधाप्रतियोगित्वनिश्चयत्वेत्यर्थः । तथाचाज्ञाततया भाविबाधाभावस्य साक्षिणा व्यवहारो यद्यपि सम्भवति; तथापि न

---

[1] न च. [2] कल्पापत्तेर्याद्यनन्त. [3] स्वं. [4] विषय. [5] विद्यमानार्थे.

साक्षिज्ञानस्य भ्रमप्रमासाधारणत्वेन प्रमाणाबाधकत्वाच्च । ननु ज्ञानप्रामाण्यं गृह्णन् साक्षी घटादिगतमबाध्यत्वं गृह्णात्येव, न हि विषयाबाधमनन्तर्भाव्य प्रामाण्यग्रहणं नामेति चेन्न; व्यवहारकालाबाध्यत्वमात्रेण प्रवृत्तावपि संवादोपपत्तेः, तद्गतप्रामाण्यस्य साक्षिणा ग्रहणेऽपि विरोधाभावात् । न हि घटादिज्ञानस्य संवादिप्रवृत्तिजनकतावच्छेदकं प्रामाण्यं त्रिकालाबाध्यविषयकत्वम्, किन्तु शुक्तिरूप्यादिज्ञानव्यावृत्तं व्यवहारकालाबाध्यविषयकसकलज्ञानवृत्ति व्यवहारकालाबाध्यविषयकत्वमेव । तच्च न भाविकालबाधविरोधीत्युक्तम्, भाविकालबाधतदभावौ च न मानं विना साक्षिणा गृहीतुं शक्यौ,

---

तस्य तन्निश्चयत्वामेति न मिथ्यात्वानुमितिबाधकत्वम्[1] । शुक्तिरूप्यादेरप्युक्तान्यथानुपपत्त्यादिमानेनैव त्रिकालादिगर्भ[2] मिथ्यात्वनिश्चय इति भावः **भ्रमप्रमासाधारणेति** । सुखाद्यंशे प्रमात्वस्येव शुक्तिरूप्याद्यंशे भ्रमत्वस्यापि गृह्यमाणत्वेन त्रिकालनिषेधाप्रतियोगित्वांशेऽपि भ्रमत्वशङ्कास्पदत्वेनेत्यर्थः—**व्यवहारेत्यादि** । व्यवहारकालाबाध[3] विषयकत्वमात्रेण प्रवृत्तिप्रयोजकाविसंवादोपपत्तेरित्यर्थः । यादृशं प्रवृत्तावविसंवादित्वं तादृशं तत्प्रयोजकज्ञाने अपेक्ष्यते औचित्यत्, भाविकालाबाध्यत्वादिनिवेशे गौरवाच्चेत्याशयेनाह—**न हीति** । **अवच्छेदकमिति** । आवरणविषयतानवच्छेदक[4] प्रमात्वेन जनकतेत्यर्थः । तेन दोषविशेषात्प्रमाया अप्रमात्वभ्रमविषयीभूताया अप्रवर्तकत्वेपि न दोषः । तत्रप्रमात्वविशिष्टमानावच्छेदेन साक्षिण आवरणविषयत्वात् । प्रवृत्ति[5] सामान्यकारणीभूतं यत् प्रमात्वेन निश्चीयमानं[6] ज्ञानं तत्सहकृताया एव प्रमायाः संवादिप्रवृत्त्युपधायकत्वात्—**शुक्तिरूप्येति** ।

---

[1] साधकत्वं. [2] त्रिकालादिगत. [3] कालाबाध्य. [4] तावच्छेदक. [5] प्रयत्न. [6] निर्णीयमानं.

तस्य विद्यमानमात्रग्राहित्वादिति चोक्तम्। ननु तर्हि देहात्मैक्यज्ञान मुष्णं जलमित्यादि ज्ञानं च प्रमास्यात्, व्यवहारदशायां विषयाबाधादिति चेन्न; आब्रह्मज्ञानमबाधितत्वेन तेषामापि घटादिज्ञानसमानयोगक्षेमत्वात्। ननु कालान्तरस्थमपि यत् बाधकं तदपि किं यत्कालावच्छेदेन अनेन स्वार्थो गृहीतः तत्कालावच्छेदेनैव तन्निषेधति उतान्यकालावच्छेदेन; आद्ये कथमस्य प्रामाण्यम्? अन्त्ये अनित्यत्वादिकमेवेति—चेन्न; अबाध्यत्वरूपप्रामाण्यस्य प्रपञ्चज्ञाने मया अनङ्गीकारात्। यत्कालावच्छेदेनैवानेन स्वार्थो गृहीतः तत्कालावच्छेदेनैव तन्निषेधाभ्युपगमात्। यच्च प्रामाण्यं मया अभ्युपेयते तत् व्यवहारदशायां विपरीतप्रमारूपबाधकस्य अनुपपन्नत्वादस्त्येव।

व्यवहारकालबाध्य[1] शुक्तिरूप्येत्यर्थः—क्षेमत्वादिति। तथा च व्यवहारकालाबाध्यप्रातीतिकमात्रस्येयं गतिरिति तत्र साक्षिणा उक्तप्रमाण्य[2] ग्रहात् संवादिन्येव प्रवृत्तिः, व्यवहारकालाबाध्यविषयकत्वस्त्येव प्रवृत्तिसंवादित्वादिति भावः। न च स्मृतिवारणायाज्ञानविषयतावच्छेदकाबाध्यविषयकत्वं प्रमात्वं वाच्यमिति प्रातीतिकस्य तादृशाबाध्यत्वाभावान्नतद्धीः प्रमेति वाच्यम्; तान्त्रिकव्यवहार्यप्रमात्वस्य तथात्वेऽपि प्रवृत्तिप्रयोजके अवच्छेदकान्तानिवेशात्। स्मृतेरप्यनुमित्यादिवत् प्रवर्तक[3] त्वात्—अनित्यत्वादित्यादिना। निषेधस्याव्याप्यवृत्तित्वमेवकारात् न तु मिथ्यात्वधीरूपो बाधः, मिथ्यात्वस्य प्रतिपन्नदेशकालावच्छिन्ननिषेधघटितत्वादित्यर्थः—अबाध्यत्वेति। त्रिकालाबाध्यत्वेत्यर्थः। अस्त्येवेति। व्यवहारकालावच्छिन्नात्यन्ताभावप्रतियोगित्वेऽपि तद्धीविषयत्वाभावो व्यवहारकाले अस्त्येवेत्यर्थः। अत्र तद्रूपप्राण्यस्य साक्षिणा ग्रहणेऽपीत्यपिशब्देन अस्वरसः सूचितः।

---

[1] कालाबाध्य. [2] प्रामाण्या. [3] मित्यादिप्रवर्तक.

स चेत्थम्, व्यवहारकालाबाध्यविषयकत्वमपि न साक्षिग्राह्यम्, यदेव हि तार्किकादिमतरीत्या साक्षात्क्रियते तदेव साक्षिग्राह्यं वाच्यम्; अन्यथा पिशाचाभावादेरपि तत्त्वापत्तेः। व्यवहारकालाबाध्यत्वं च तन्मतरीत्या घटादिकं इदानीं यदि व्यवहारकाले बाध्येत तर्हि तथोपलभ्येतेत्यापादनासम्भवेन योग्यानुपलम्भाभावात् वर्तमानव्यवहारकाले अन्यपुरुषस्य बाधसम्भवेऽपि तत्पुरुषे बाधाभावेन तत्पुरुषस्य बाधानुपलब्धिसम्भवात्। अथ—वस्तुगत्या यो व्यवहारकालः तत्तज्ज्ञानाधिकरणीभूतः तद्घटितं स्वाधिकरण[1]कालावच्छिन्नं यद्बाधाविषयत्वं तद्विषयकत्वरूपं स्वाधिकरणकालावच्छिन्नसामानाधिकरण्यसम्बन्धेन स्वविषयबाधस्य योऽभावस्तद्विशिष्टत्वं वा प्रमात्वम्। स्वपदं प्रमाव्यक्तिपरम्। पुरुषभेदेन प्रपञ्चभेदादेकपुरुषीयधीविषये पुरुषान्तरीयबाधाभावादाद्यं, पुंभेदेन प्रपञ्चाभेदेऽपि द्वितीयं साक्षिणा सुग्रहम्, यदीदानीमिदं घटादि बाध्येत तदा तथोपपलभ्येत, यद्युक्तसम्बन्धेनात्र ज्ञाने बाधः स्यात् तदा तथोपलभ्येतेत्यापादनसम्भवात्, योग्यानुपलम्भसत्त्वादिति चेन्न; तत्तज्ज्ञाने स्वानधिकरणव्यवहारकालबाध्यविषयकत्वग्रहे प्रवृत्त्याद्यनु[2]त्पादेन स्वाधिकरणकालीनोक्तबाधाभावघटितस्य प्रमात्वरूपत्वाभावात्, स्वसमानाधिकरणस्वान्यूनसत्ताकाभावप्रतियोगित्वस्य स्वाधिष्ठानस्य वा ज्ञानं घटादेर्बाध इति तत्त्वेनेदानीं ज्ञानसम्भवाच्च। अथ वस्तुगत्या व्यवहारकालीनं यद्बाधायोग्यत्वं तद्विषयकत्वमेव। तदुक्तायोग्यत्वं च उक्तप्रतियोगित्वविशिष्टरूपेणाज्ञानविषयतावच्छेदकत्वं अज्ञानविशेषणतया च उक्तप्रतियोगित्वविशिष्टं साक्षिग्राह्यमेव। स्मृतेरप्युक्तप्रमात्वेन प्रवर्तकत्वम्। शुक्तिरूप्यादिधीरपि बाधपूर्वं तथेति सापि प्रवर्तिका संशयवारणाय निश्चयत्वमपि निवेश्यम्। अज्ञान[3]विषयकनिश्चयत्वं प्रमात्वमिति अद्वैतरत्नाद्युक्तेरत्रैव तात्पर्यम्।

[1] स्वस्यानधिकरण. [2] प्रवृत्त्यनु. [3] अज्ञात.

न च यत् भवतां घटादिबुद्धेः प्रातिभासिकबुद्धितो वैलक्षण्यं विषयस्य व्यावहारिकसत्त्वसाधकं, तदेवेह मम विषयस्य पारमार्थिकसत्त्वसाधकमस्त्विति वाच्यम्; प्रातिभासिकबुद्धिवैलक्षण्यं हि घटादिबुद्धेः सप्रकारकज्ञानाबाध्यविषयत्वादिरूपम्। तन्न पारमार्थिकसत्त्वं घटादेः साधयितुं शक्तम्। देहात्मैक्यज्ञाने ब्रह्मज्ञानाव्यवहितभ्रमे च व्यभिचारात्। ननु 'घटस्सन्, रूप्यं मिथ्येति' प्रतीत्योरविशेषे कथं 'घटोमिथ्या, रूप्यमिथ्यात्वं न मिथ्या' इति विशेषः? न च तदापि मिथ्यैव, रूप्यतात्त्विकत्वापत्तेरिति चेन्न; मिथ्यात्वमिथ्यात्वेऽपि यथा न रूप्यस्य तात्त्विकत्वं तथोपपत्तेरुक्तत्वात्। न च पारमार्थिकसत्त्वस्य प्रत्यक्षागोचरत्वे तन्निषेधश्रुतीनां

अन्यथा स्वरूपेणाज्ञातत्वनिवेशे व्यवहारकालाबाध्यप्रातीतिकबुद्धेः संवादिप्रवृत्तिप्रयोजक[1]प्रमात्वाभावापत्तेरिति चेत् तथापि व्यवहारकालीनबाधाभावघटितस्य साक्ष्यग्राह्यत्वेनापिशब्दसूचितमस्वारस्यं सिद्धमेव। तदेवं त्रिकालबाधाभावघटितप्रमात्वग्राहकत्वेनाविद्यमानग्राहकत्वात्त्रिकालनिषेधाप्रतियोगित्वमपि साक्षी गृह्णात्विति दृश्यत्वादेः साक्षिबाध्यत्वशङ्कां निरस्य व्यावहारिकप्रमायाः प्रसङ्गात् तदीयव्यावहारिकविषयकत्वसाधकलिङ्गेन दृश्यत्वादिकं बाधितमिति प्रसङ्गाच्छङ्कते। **न चेति। प्रातिभासिकेति।** ब्रह्मविषयकज्ञानबाध्येत्यर्थः विषयकत्वादीत्यादिना ब्रह्मधीबाध्यत्वविषयकत्वादिसङ्ग्रहः। तेन सोऽयमिति शाब्दनिष्प्रकारकधीबाध्यभेदविषयकस्योक्तवैलक्षण्याभावेऽपि न क्षतिः। **अविशेषे।** आगन्तुकदोषजन्यत्वविशेषस्याभावे। **तन्निषेधेति।** तदवच्छिन्नप्रति-

---

[1] संवादिप्रयोजक.

अप्रसक्तप्रतिषेधकता स्यादिति वाच्यम्; तासां चक्षुरादिप्रसक्तद्वैतनिषेधपरत्वात्। पारमार्थिकत्वेन द्वैतनिषेधपरत्वेऽपि नाप्रसक्तनिषेधकत्वम्; परोक्षप्रसक्तेस्सम्भवात्, 'नान्तरिक्षेऽग्निश्चेतव्यः' इत्यादिवदप्रसक्तप्रतिषेधस्याप्युपपत्तेश्च। न च

योगिताकनिषेधबोधकेत्यर्थः[1]। **अप्रसक्तप्रतिषेधकतेति।** येन रूपेण यत् न ज्ञातं[2] तेन तन्निषेधकतेत्यर्थः। **चक्षुरित्यादि।** दृश्यत्वाकाशत्वादिना चक्षुरादिज्ञातं द्वैतं, तेन तन्निषेधपरत्वादित्यर्थः। **नान्तरिक्ष—इत्यादि।** यत्र प्रतिषेधे तात्पर्यं, तत्र प्रतियोगिप्राप्त्यादिकं विना तत्कल्पनवैयर्थ्यात् तदावश्यकता, यत्र तु 'नान्तरिक्षे' इत्यादौ न तत्र तात्पर्यं, किन्तु मानान्तरसिद्धतदनुवादद्वारा विधेयस्तुतिपरत्वं, तत्र न तदावश्यकता। तथाच सत्यत्वविशिष्टद्वैतरूपप्रतियोगिप्राप्तिं विनापि 'नेहनाना' इत्यादिश्रुतीनां मिथ्यात्वानुमानादिसिद्धस्य ब्रह्मगतस्य सत्यत्वेन द्वैताभावस्य अनुवादद्वारा विधेयब्रह्मस्तुतिपरत्वमिति भावः। प्रथमाध्याये द्वितीयपादे अर्थवादाधिकरणे 'न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि' इत्यन्तरिक्षे दिवि च चयनं न प्रतिषिध्यते, अप्राप्तत्वात्। नापि पर्युदस्यते, अदिव्यनन्तरिक्षे च नित्यप्राप्तत्वात्। एवं पृथिव्यां न तत्प्रतिषेधपर्युदासौ, चयनविरोधात्। नापि ग्रहणाग्रहणवत् पाक्षिकत्वसिद्धये प्रतिषेध इति वाच्यम्; 'पशुकामश्चिन्वीत' इत्यादि पुरुषार्थचयनस्य 'अथातोऽग्निमग्निष्टोमेन यजेत' इत्यादि क्रत्वर्थचयनस्य च पाक्षिकत्वस्य च सिद्धत्वात्। 'यद्यग्निं चेष्यमाणा भवन्ति' इत्यस्मिन् सत्रगतसमारोपकालादिगुणविधायकवाक्ये सिद्धवत्पाक्षिकानुवादादिना 'अग्निः सोमाङ्गं वेच्छताम्' इति कात्यायनोक्तयाचनिरग्निसोत्तरेवेदिकप्रयोगस्य दशमोक्तत्वात् क्रत्वर्थचयनस्यापि पाक्षिक-

---

[1] निषेधकेत्यर्थः. [2] यत् ज्ञातं.

अतात्त्विकप्रपञ्चे यदि तात्त्विकत्वमप्यध्यक्षेण न गृह्यते कथं तर्हि तस्यातत्त्वावेदकत्वम्? न हि तदेव तत्त्वेनावेदयत्तात्त्विकं नाम। दृश्यते च सार्वलौकिकप्रपञ्चे पारमार्थिकत्वानुभव इति वाच्यम्; न ह्यस्माकं तत्त्वावेदकत्वं तद्धेति तत्प्रकारकत्वम्, ताद्धित्वमतत्त्वावेदकत्वम्। किन्तु अबाधितविषयत्वं तत्त्वावेदकत्वम्। बाधितविषयत्वं च अतत्त्वावेदकत्वम्। अबाधितविषयत्वं च श्रौते ब्रह्मज्ञान एव, तद्धित्वज्ञाने तात्पर्यवद्भेदत्वेनैव तत्त्वावबोधकत्वात्। तथाच प्रपञ्चप्रत्यक्षस्य तात्त्विकत्वागोचरत्वेऽपि अतत्त्वावबोधकत्वं सङ्गच्छते। सार्वलौकिकपारमार्थिकत्वप्रसिद्धिस्तुजलगतपिपासोपशमनसामर्थ्यप्रसिद्धिवत् परोक्षतयाप्युपपन्ना नापरोक्षत्वपर्यवसायिनी॥

तस्मादध्यक्षयोग्यस्य सत्त्वस्येहानिरुक्तितः।
नाध्यक्षबाधो मिथ्यात्वलिङ्गस्यात्रोपपद्यते॥

त्वस्य सिद्धत्वात् 'उत्तरवेद्यामग्निश्चीयते' इत्यनेन साग्निप्रयोग एवाग्न्युत्तरवेद्योः समुच्चयस्य सङ्कर्षोक्तत्वात्। अत उक्तवाक्यमप्रमाणमप्रतिषेधभागित्वादिति 'अभागिप्रतिषेधात्' इति सूत्रे आशङ्क्य शुद्धपृथिवीचयनप्रतिषेधो नित्यानुवादो 'न पृथिव्यां चेतव्यः' इति नहि निन्दान्यायेन 'हिरण्यं निधाय चेतव्यम्' इति विहितहिरण्यस्तुत्यर्थः। तदुपपादकौ च इतरौ नित्यानुवादौ, यथा अन्तरिक्षे दिवि वा चयनमप्रसिद्धं तथा हिरण्यरहितायां शुद्धपृथिव्यामिति सिद्धान्तितं 'अन्त्ययोर्यथोक्तम्' इति सूत्रे। **तात्पर्येति**। महातात्पर्येत्यर्थः। अवान्तरतात्पर्यविषयस्य यागादिगतेष्टसाधनत्वादेः बाधितत्वादिति भावः। **पिपासेति**। दुःखविशेषरूपपिपासानिवृत्तिसामर्थ्यस्य जलगतस्य व्यापकताविशेषरूपत्वात् शक्तिविशेषरूपत्वाद्वा नापरोक्षतेति

न लौकिकं न सामान्यजन्यं साक्ष्यात्मकं च न ।
प्रत्यक्षं बाधते लिङ्गमिथ्यात्वस्यानुमापकम् ॥

इति प्रत्यक्षयोग्यसत्यत्वानिरुक्तया प्रत्यक्षबाधोद्धारः.

प्रत्यक्षबलखण्डनम्.

किंचेदं रूप्यमित्यत्र इदमितिवत् 'सन् घटः' इत्यत्रापि सदित्यधिष्ठानभूतं ब्रह्मैव भासते । न च चाक्षुषादिज्ञाने रूपादिहीनस्य ब्रह्मणः कथं स्फुरणमिति वाच्यम्; रूपादिहीनस्यापि कालादिन्यायेन स्फुरणस्य प्रागेव उपपादितत्वात् । नन्वेवं 'नीलो घटः, मिथ्या रूप्यं असन्नृशृङ्गम्'

भावः । **लौकिकं** । लौकिकसन्निकर्षजन्यम् । **सामान्येति** । अलौकिकसन्निकर्षमात्रेत्यर्थः । सामान्यज्ञानप्रत्यासत्त्योः सन्निकर्षत्वास्वीकारात् योगजधर्मस्य प्रत्यक्षजनकत्वस्वीकारपक्षेऽप्यतीन्द्रियप्रत्यक्षजनकत्वास्वीकारात् सत्यत्वप्रत्यक्षाजनकत्वमिति भावः ॥

सारस्वतैस्तर्करत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तखण्डनां खण्डिता सत्त्वयोग्यता ॥

इति प्रत्यक्षबाधोद्धारः.

इदमितीति । यथेदंरजतयोः कल्पितं तादात्म्यं भाति, तथा सद्रूपमिथ्यारूपयोः, तच्च नोक्तमिथ्यात्वविरोधीति लौकिकप्रत्यक्षमपि न दृश्यत्वादिबाधकरूपमिति भावः । घटादेरारोपितत्वात् सिद्धिकालेऽपि कार्यमात्रे ब्रह्मणो निमित्तत्वस्येवोपादानत्वस्यापि सिद्धि-

इत्यादावपि 'नीलः' इत्यादिरधिष्ठानानुवेध इति स्यात्। न च नैल्यं घटादिष्वस्ति सत्त्वं तु नेति वाच्यम्; अस्यारोपितत्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयात्। अन्यथा 'सत्यं ज्ञानम्' इत्यत्रापि सत्यमित्यधिष्ठानानुवेध एव स्यादिति चेत् न; सन्नित्यस्य घट इत्यनेन सामानाधिकरण्यस्य बाधितत्वात्। तथाहि सत्ताजातिस्फुरणनिबन्धनं वा, स्वरूपसत्त्वनिबन्धनं वा, कालत्रयाबाध्यत्वनिबन्धनं वा, सामानाधिकरण्यं स्यात्। न चाभावादिसाधारणसत्प्रतीतौ सत्ताजातिस्फुरणं सम्भवति, अभावादिषु त्वयापि तदनङ्गीकारात्। न च क्वचित्साक्षात्सम्बन्धेन क्वचित् परम्परासम्बन्धेन सदिति प्रतीत्युपपत्तिः, विजातीयसम्बन्धेन समानाकारप्रतीत्यनुपपत्तेः।

सम्भवात् ज्ञानरूपत्वेन ज्ञेयमात्रसम्बन्धत्वाच्च सद्रूपब्रह्मतादात्म्यमुक्तधीविषयो निर्णीयते। न त्वन्यादृशसत्तासम्बन्धः, असम्भवात्। किञ्च उक्तमिथ्यात्वाभावविषयकत्वे सिद्धे त्वानिष्ट[1]सेत्स्यति। न च तत्त्रयं[2] साधयितुं शक्तं, सद्रूपतादात्म्यविषयकत्वस्य त्वत्सिद्धत्वेऽपि मिथ्यात्वरूपारोपितत्वासिद्धिःस्सम्भवत्येवेति क्वान्योन्याश्रयतेत्याशयेनाह—**न सन्नित्यस्येति**। यद्यपि जातिनिबन्धनमित्येव वक्तुमुचितं, तथापि जातेः सर्वगतत्वमते तथा वक्तुमशक्यतया स्फुरणनिबन्धन मित्युक्तम्। **विजातीयेति**। सर्वत्र एकजातीयसम्बन्धेन सत्ताप्रकारकत्वेन मानसिद्धप्रतीतेर्विजातीयसम्बन्धेन क्वचित्सत्ताप्रकारकत्वेन उपादानासम्भवादित्यर्थः। न च तथा मानसिद्धत्वमसिद्धमिति वाच्यम्; द्रव्यगुणकर्मसु साक्षात् सम्बन्धः, अन्यत्र परम्परासम्बन्धः भातीति हि वैशेषिकादिशास्त्रकल्पना। न तु लोका-

---

[1] त्वदिष्टं. [2] तत्त्वया.

अन्यथा सम्बन्धभेद एव न सिद्ध्येत्। न च स्वरूपसत्त्वेनाभावादौ तत्प्रतीतिः, अननुगमात्, अननुगतेनापि अनुगत-

---

नुभवः अन्यथा तच्छास्त्रानभिज्ञस्य द्रव्यादित्रयमेव सदितिधीकाले त्रयान्य[1]त्सामान्यादिसदिति परम्परासम्भन्धेन सत्ताधीः स्यात्। न च त्रयान्यत्र परम्परासम्बन्धेन सत्तावतो भेदस्त्रयमेवेत्यत्र प्रकार इति परम्परासम्बन्धेन सत्ताधीर्न जायते इति वाच्यम्; येन सम्बन्धेन त्रये सत्ताप्रकारः त्रयान्यत्र तत्सम्बन्धेन तद्वतो भेदस्यैव एवकारेण बोधनादेव[3] परम्परासम्बन्धेन सामान्यादिकं न सदिति धीकाले सामान्यादिसदिति धीर्भ्रमस्स्यात्। द्रव्यादिसप्तकं सदेवेति च लोकानुभवो भ्रमस्स्यात्; विशेष्यतावच्छेदकावच्छेदेन एकसम्बन्धेन सत्ताप्रकारकत्वात्। न[4] च तदिष्टं; बाधकाभावात्, तत्कारणदोषकल्पने गौरवाच्च 'लोहितः स्फटिकः' इत्यादौ तु बाधस्य सर्वानुभाविकत्वात् तत्कल्पना न दोष इति भावः। **अन्यथेति**। साक्षात्सम्बन्धस्य प्रामाणिकत्वसम्भवेऽपि परम्परासम्बन्धस्य कल्पन इत्यर्थः। **सम्बन्धभेदः** साक्षात्सम्बन्धनानात्वम्। घटादेस्संयोगः समवायो वा अस्तु कपालादौ भूतलादौ वा परम्परासम्बन्धसम्भवात्। अथ क्वसाक्षात् क्वपरम्परेति विनिगमकाभावादुभयत्र परम्परासम्बन्धाननुभवाच्च उभयत्रापि साक्षात्सम्बन्धः, तर्हि प्रकृतेऽपि द्रव्यादित्रये साक्षात्, अन्यत्र परम्परेति वा अन्यत्रैव स्वरूपसम्बन्धेन समवायत्वाभावत्वादिवत् सत्ताखण्डोपाधिर्वर्तते द्रव्यादित्रये स्वरूपसम्बन्धघटितपरम्परासम्बन्धेनेति वेति विनिगमकाभावादुभयत्र परम्परानुभवाच्चोभयत्रापि साक्षात्सम्बन्धः। तत्र घटादेरुत्पत्तिकाले कपालादौ संयोगस्य, भूतलादौ समवायस्य चासम्भवात् सम्बन्धभेदसिद्धावपि प्रकृते एकसम्बन्ध एव

---

[1] क्रिया. [2] भेदस्त्रय. [3] बोधनादेवं. [4] न चेत्यादिस्सर्वानुभाविकत्वादित्यन्तःपाठः क्वचिच्च दृश्यते.

प्रतीतौ जातिमात्रोच्छेदप्रसङ्गात्। अतएव न सर्वत्रापि स्वरूपसत्त्वेनैव सद्व्यवहारः, एकेनैव सर्वानुगतेन सर्वत्र सत्प्रतीत्युपपत्तौ बहूनां तद्धेतुत्वकल्पने मानाभावात्। नापि कालत्रयाबाध्यत्वनिबन्धनं तत्, तस्य चक्षुराद्यगम्यत्वस्योक्तत्वात्, सदिदं रजतमित्यादिभ्रमे अभावाच्च। तस्मादेकं सर्वाधिष्ठानमेव सदिति सर्वत्रानुभूयत इति युक्तम्। नीलादेस्तु घटादिसामानाधिकरण्ये किमपि नास्ति बाधकम्। न वा नीलादेरधिष्ठानत्वं सम्भवति, प्रागसत्त्वात्। नीलपीतादिप्रातिस्वि-

---

कल्प्यत इति विशेषः। न च जन्यसत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वम्; अन्यथा रूपादेः स्वसमवायिसमवेतत्वसम्बन्धेन कारणस्य सत्वात् कपालरसादावपि रूपाद्युत्पत्तिस्स्यात्, अतो द्रव्यादित्रये[1] सत्तासमवायस्य आवश्यकत्वात् अन्यत्र परम्परासम्धन्वस्य तद्घटितस्य सम्भवान्न स्वरूपसम्बन्धकल्पनमिति विनिगमकमिति वाच्यम्; तावतापि हि रूपादिष्वेव साक्षात्सम्बध्यतां सत्ता, न तु द्रव्ये। किञ्च समवायेन जन्यत्वेनैव द्रव्यकार्यत्वसम्भवात् रूपादेर्घटत्वादिवत् अनुगतनित्यत्वसम्भवेन रूपाद्यजन्यत्वसम्भवाच्च नोक्तं विनिगमकमिति भावः। **स्वरूपसत्त्वेन**—घटादिस्वरूपसत्त्वेन। अथवा स्वरूपसत्त्वेनेति कालसम्बन्धित्वेनेति देशसम्बन्धित्वेनेति वा अर्थः। **सर्वानुगतेनेति**। यदि खण्डकालदेशभानं तदा अननुगतत्त्वम्। अथाविद्यारूपमहाकालदेशभानं तदा अनादिपदार्थेषु तत्सम्बन्धा[2] सम्भव। परम्परासम्बन्धस्य तेषु भानेऽपि सम्बन्धस्यैकजातीयत्वाभावादननुगम इति भावः। **अधिष्ठानत्वं** उपदानाज्ञानविषयत्वम्। नीलादेर्घटत्वादिवन्नानाद्रव्यानुगतानित्यत्वमते प्राक्स्तत्वादाह—**नीलपीतेति**। सद्रूपं

---

[1] द्रव्यादित्वेन हेतुत्वम्। अन्यथा त्रये. [2] तत्सम्बन्ध.

कानन्ताधिष्ठानकल्पने गौरवात्, अधिष्ठेयतुल्ययोगक्षेमत्वाच्च। अधिष्ठेयविषमसत्ताकमेव हि अधिष्ठानं भवति। 'मिथ्यारूप्यम्, असन्नृशृङ्गम्' इत्यादौ मिथ्यात्वासत्त्वयोराधिष्ठानत्वशङ्कापि नास्तीति शून्यवादापत्तेः। तत्र चानुपपत्तिरुक्ता, वक्ष्यते च। यत्तु 'सत्यं ज्ञानमनन्तम्' इत्यत्रापि तथा स्यादिति, तन्न; यतो न तत्र सत्तासम्बन्धेन सत्त्वम्, किन्तु स्वरूपेणैवेति उक्तदोषानवकाशात्। न चैवं घटादावपि स्वरूपेणैव तथात्वम्, पूर्वमेव निराकृतत्वात्। किं च निश्चित-

---

नीलादि प्रत्येकं वा अधिष्ठानमित्यत्र विनिगमकमाह—**अधिष्ठेयतुल्ययोगक्षेमत्वादिति**। मिथ्यात्वादित्यर्थः॥

अधिष्ठेयविषमसत्ताकमिति। यत्प्रमया यदुपादानाज्ञाननिवृत्तिस्तत्तदपेक्षया अधिकसत्ताकं वाच्यं, अन्यथा तथा सा न स्यात्। नीलादिकं च घटाद्यपेक्षया न तथेति भावः। अथवा अधिष्ठेयविषमसत्ताकं तात्त्विकं, अतात्त्विकस्य नाधिष्ठानत्वमज्ञानविषयत्वरूपं सम्भवति, जडत्वेनैव प्रकाशासम्भवेन तद्वैयर्थ्यादिति भावः। न चाधिष्ठानावच्छेदकतया नीलादि भासतां इदं रजतमित्यादाविदमादिवदिति वाच्यम्; घटत्वादिवन्नीलादेः प्राक् सत्त्वं; अतएव तदवच्छिन्नचैतन्यस्याज्ञानविषयत्वस्य वाच्यतया तन्मते घटत्वादिवत् नीलादेरपि सद्रूपानतिरेकसम्भवात्, अधिष्ठान [1]स्यैव सम्भवात् अधिष्ठानावच्छेदकतया सामानाधिकरण्यस्यापीष्टत्वसम्भवाच्च **मिथ्यात्वासत्त्वयोः** मिथ्यातुच्छयोः। तेन परमते मिथ्यात्वासत्त्वयोः नीलादितुल्यत्वेऽपि न क्षतिः। **शङ्कापीति**। नीलादेस्तु सत्त्वशङ्कया अधिष्ठानत्वशङ्का सम्भवतीति भावः। **स्वरूपेणेति**। स्वरूपानतिरिक्तमित्यर्थः। तथाच सत्तायां सद्व्यवहारः सत्तान्तराविषयक इति परेषामपि सम्मतमिति भावः।

---

[1] त्व.

प्रामाण्यमेव प्रत्यक्षमितरबाधकं भवेत्। न चात्र प्रामाण्यं निश्चितम्, आगमविरोधात्, अनुमानविरोधात्, भाविबाधाभावानिर्णयाच्च। ननु प्रत्यक्षमेव प्रबलमनुमानागमबाधकम्, नानुमानागमौ, प्रत्यक्षाप्रामाण्ये तद्विरोधाभावेनानुमानागमयोः प्रामाण्यम्; तयोः प्रामाण्ये च तद्विरोधात्, प्रत्यक्षाप्रामाण्यमित्यन्योन्याश्रयात्। न हि प्रत्यक्षस्य प्रामाण्येऽप्येवमन्योन्याश्रयः, तस्यानपेक्षत्वादिति चेन्न; चन्द्रतारकादिपरिमाणप्रत्यक्षे अनुमानागमविरोधेन तस्याप्रामाण्यदर्शनात्, तेनापि स्वप्रामाण्यसिद्ध्यर्थमितराविरोधस्य अवश्यमपेक्षणीयत्वात्। तथाचान्योन्याश्रयतुल्यत्वात् परस्पराविरोधेन प्रामाण्यसन्देहे सत्यनाप्तप्रणीतत्वादिना प्रमाजनकत्वव्याप्तेः वेदप्रामाण्यनिश्चये जाते तेन स्वतस्सम्भावितदोषस्य प्रत्यक्षस्य बाधात् अस्मन्मते क्वान्योन्याश्रयः। अन्यथा देहात्मैक्यप्रत्यक्षबुद्ध्या बाधात् देहभिन्नत्वमप्यात्मनो नागमानुमानाभ्यां सिद्ध्येत्। ननु प्रत्यक्षमनुमानाद्यपेक्षया जात्यैव प्रबलम्, कथमन्यथा औष्ण्यप्रत्यक्षेण वह्नेश्शैत्यानुमितिप्रतिबन्धः? न च तत्रोपजीव्यत्वनिबन्धनं प्रत्यक्षस्य बाधकत्वम्, धर्म्यादेश्चक्षुरादिनैव सिद्धेस्त्वचोऽनुपजीव्यत्वात्। किञ्च प्रत्यक्षस्य प्राबल्यमनुमाद्यगृहीतरेखोपरेखादिग्राहकत्वादनुमानाद्यनिवर्तितादिज्ञोहादिनिवर्तकत्वाच्चेति चेन्न? त्वाचप्रत्यक्षस्याप्युपजीव्यत्वेनैव शैत्यानुमितिप्रतिबन्धकत्वसम्भवात्, चक्षुरादिना धर्म्यादिग्रहेऽपि त्वचं विना साध्यप्रसिद्धेरभावात्। तथा न जात्या प्राबल्ये मानमस्ति। तदगृहीतग्राहित्वमपि न प्राबल्ये प्रयोजकम्, प्रत्यक्षागृहीतधर्मादिग्राहकत्वेन परोक्षप्रमाणस्यैव प्राबल्यापत्तेः। नाप्य-

---

अनुमानविरोधात्। तर्कसहकृतत्वेन बलवदनुमानविरोधात्।

नुमानाद्यनिवर्तितदिङ्मोहनादिनिवर्तकत्वेन प्राबल्यम्। एतावता हि वैधर्म्यमात्रं सिद्धम् न च तावता इतरप्रमाणापेक्षया प्राबल्यं भवति। अन्यथा त्वाचप्रत्यक्षनिवर्तितवंशोरगभ्रमनिवर्तकत्वाच्चक्षुषोऽपि त्वगपेक्षया प्राबल्यं स्यात्। ततश्च चित्रनिम्नोन्नतज्ञानस्य चाक्षुषस्य तद्विरोधित्वाच्चज्ञानात् बाधो न स्यात्। प्रत्युत आगमस्यैव सर्वतः प्राबल्यं स्मर्यते—

'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्'।

इति। न च तद्वैदिकार्थविषयमिति वाच्यम्। अद्वैतस्यापि वैदिकार्थत्वात्।

वंशोरगेति। मण्डूकवसाञ्जनदुष्टनयनजन्यभ्रमस्यादुष्टनयनजप्रत्यक्षेणैव निवृत्तिः। त्वगादिना काठिन्योपलम्भेप्युक्तदोषदुष्टनयनेन वंशोरगदर्शनादिति भावः। वैदिकेति। वेदान्याबोध्येत्यर्थः अद्वैतस्येति वस्तुतस्तु वेदान्याबोध्येऽर्थेमानान्तरस्य प्रवृत्तेरेवाभावात् दौर्बल्योक्तेरसङ्गतत्वात् स्वबोध्यार्थ एव मानान्तरस्य दौर्बल्यपरा उक्तस्मृतिरिति बोध्यम्। यत्तु—"विजातीयसम्बन्धेत्यादिकं न युक्तं; लोहितोऽयमिति समानाकारप्रतीतेः स्फटिकादौ स्वसमवायिसंयोगरूपपरम्परासम्बन्धेन अन्यत्र समवायेन लौहित्यप्रकारकत्वस्य सर्वैः स्वीकारात्, नीलोऽयमित्याकारकप्रतीतेः सम्बन्धभेदेन घटतन्नीलिम्नोः नीलरूपप्रकारकत्वाच्च। अन्यथेत्यादपि न युक्तम्; तत्तत्सम्बन्धगोचरबुद्धेः सम्बन्धभेदसाधकत्वात्। न च स्वरूपसत्त्वेनेत्यादिकमप्ययुक्तम्; त्वन्मते प्रमेयत्वेनैवाननुगतेनाप्यनुगतव्यवहारसम्भवात्, त्वन्मतेऽपि ब्रह्मणि स्वरूपेणान्यत्र तत्सम्बन्धेनेत्यननुगमाच्च आधिष्ठेयविषमेत्यादिकमप्ययुक्तम्; ब्रह्मणोऽपि घटाद्यपेक्षया आधिकसत्वस्य मया अनङ्गीकारात्, ब्रह्मसत्त्वश्रुतेरिव सन् घट इत्यादिप्रत्यक्षस्यापि सत्त्वग्राहकत्वात् शून्यवादापत्ति-

रपि न युक्ता ; वियदादिमिथ्यात्वेऽपि तदापत्तेः, अधिष्ठानमात्र-सत्यत्वस्य शून्यवादेऽपि स्वीकारात्" इति, तत्तुच्छम् ; अस्मद्व्याख्या-तार्थानवबोधमूलकत्वात् । व्याख्यातं हि साक्षात्सम्बन्धेन बाधसत्त्वे सामान्यादौ लोकानां सद्बुद्ध्यनुदयात् तत्र तत्सम्बन्धेनैव तद्धीरिति । तथाच स्फटिकादौ तत्सम्बन्धेन लौहित्यादेः बाधसत्त्वेपि तद्बुद्ध्युदयात् तद्धीः, तत्सम्बन्धेनौपाधिकभ्रमत्वात् परम्परासम्बन्धविषयकत्वाद्वा बाधा-प्रतिबध्या वा, उभयथापि न क्षतिः । तत्र परम्परासम्बन्धविषयकत्वे च रजतादिकमपि सादृश्यादिसम्बन्धेन शुक्त्यादौ भातीति सम्भवेन भ्रममात्रोच्छेदः । साक्षात्सम्बन्धविषयकत्वानुभवेन भ्रमत्वकल्पनं तु तुल्यमित्यस्मदीयो भ्रमत्वपक्ष एव साधुः । न परेषां परम्परासम्बन्ध-धीत्वपक्षः । नीलोऽयमित्याद्ययुक्तं, नीलरूपस्यापीदन्त्वादिरूपेण नील-त्वावच्छिन्नप्रतियोगिताकतादात्म्यानुयोगित्वान्नीलोऽयमिति बुद्धेः तादा-त्म्यरूपैकजातीयसम्बन्धविषयकत्वात्, रूपविशेष्यकतत्प्रतीतेः परमते अत्यन्ताभेदसम्बन्धविषयकत्वेऽपि बाधादिकृतविशेषस्यो[1]क्तत्वेनादोषत्वाच्च यत्तु अन्यथेत्यादेः कमप्यर्थमबुध्वा प्रलपितं, तन्महाचित्रम् । प्रमेयत्वेने-त्यादिकं तु शोभते । न ह्यस्मन्मतेऽननुगतेन व्यवहारविषयस्यानुगमः, किन्तु अननुगम एव तत्तद्भ्रमभेदकूटवज्ज्ञानत्वाद्यनुगतरूपेण जाति-रूपेण वा, प्रमात्वादिना प्रमेयत्वाद्यनुगमो वा । ब्रह्मणीत्यादिकं तु चित्रं ; ब्रह्मणि सम्बन्धाभानेऽपि एकसद्व्यक्तिविषयकज्ञानस्य सर्वत्रा-क्षतत्वात्, सत्तायाः ऐक्यान्यसम्बन्धभानस्य सर्वसम्मतत्वाच्च । अधि-ष्ठेयेत्यादि युक्तमेव ; सद्रूपमिव नीलादिकमधिष्ठानं स्यादिति मांप्रति त्वया आपादितम् ब्रह्माधिष्ठानं विषमसत्ताकत्वात् न नीलादि तद-भावादिति मदुक्तौ त्वदस्वीकारस्याप्रयोजकत्वात्, प्रत्यक्षस्य मिथ्या-त्वविरोधिसत्त्वग्राहकत्वस्य अद्याप्यसिद्धेश्च । अधिष्ठानमात्रेत्यादितु

[1] बाधाबाधादिकृतविशेष्य.

शोभते । सर्वमिथ्यात्ववादो हि शून्यवादः । अतएवास्तु तर्हि शून्यतैवेत्यादिबौद्धाधिकारीयपूर्वोक्तवाक्ये शून्यतायाः परतःसिद्धावनवस्थादिकमुक्त्वा स्वतस्सिद्धत्वमाशङ्क्य आयातोऽसि मार्गेणेत्यादिना अस्मन्मतप्रसक्त्या शून्यवादत्वहानिरुक्ता । अधिष्ठानमात्रसत्यतायां तु शून्यवादस्य मन्मताविशेषः । वाचस्पत्यादिभिरपि तत्वप्रमाविरहेण प्रपञ्चबाधो न स्यादिति शून्यवादो दूषितः । खण्डने च सौगतब्रह्मवादिनोरयं विशेषः—'यदाद्यस्य सर्वमनिर्वाच्यं अन्त्यस्यात्मान्यत्' इत्युक्तम् । तस्माच्छून्याशून्यमतधीशून्योसीति व्यक्तम् । यदपि—"चक्षुरादिना धर्म्यादिग्रहेऽपीत्याद्ययुक्तम्; श्वैत्यानुमित्याद्यनिवर्तितपीतभ्रमनिवर्तकजातिविशेषावच्छिन्नधीजनकत्वेन प्रत्यक्षस्य प्राबल्यसम्भवात् । प्रत्यक्षागृहीतधर्मादिग्राहकत्वेनेत्याद्ययुक्तम्; यत्प्रमाणविषयगतविशेषस्य तदगृहीतस्य ग्राहकम् यत्प्रमाणं ततो हि तत्प्रबलम् । धर्मादिकं च न प्रत्यक्षविषय इति न प्रत्यक्षाच्छब्दः प्रबल इत्यदोषः" इति, तदपि तुच्छम्; जात्या प्राबल्यमित्यस्य हि प्रत्यक्षत्वमात्रेण प्राबल्यमित्यर्थः । तदनिवर्तितभ्रमनिवर्तकत्वादिना ततः प्राबल्यं तु पश्चादाशङ्क्य दूषणीयम् । किंच निर्दोषचक्षुषः त्वगनिवर्तितवंशोरगभ्रमनिवर्तकत्वात् त्वगपेक्षया प्राबल्यापत्तिः कथमुद्धृता? काठिन्यविशेषादिविषयकवंशत्वाचप्रत्यक्षस्यापि मण्डूकवसाञ्जनरूपचक्षुर्दोषसत्त्वे तादृशभ्रमानिवर्तकत्वात् । चाक्षुषविशिष्टबुद्धौ त्वाचबाधबुद्धिप्रतिबद्धयत्वस्य तार्किकाद्यसम्मतत्वाच्च । अत एव चक्षुरनिवर्तितवंशोरगभ्रमनिवर्तकत्वाच्चक्षुरपेक्षया त्वक्प्राबल्यं स्यादित्याशङ्कापि तवासङ्गतैव । अपि च यद्यदनिवर्तितभ्रमनिवर्तकं तत्ततः प्रबलमित्युक्तौ प्रत्यक्षानिवर्तितं यागादावधर्मत्वभ्रमं प्रति श्रुतेर्निवर्तकत्वात् प्रत्यक्षात्सा प्रबला ते स्यात्, प्रत्यक्षत्वेन उक्तनिवर्तकविशेषणे शाब्दत्वविशेषणमादायापि तथा नियमः किं न स्यात् । अथ यादृशविशिष्टविषयकयदानिवार्तितं

'क्वचित्प्रत्यक्षतः प्राप्तमनुमागमबाधितम् ।'
इति तु परीक्षितप्रामाण्यप्रत्यक्षविषयम् ।

भ्रमं प्रति तादृशविशिष्टविषयकतया यन्निवर्तकं ततस्तत्प्रबलं, प्रत्यक्षविषयविषयकतया[1] च श्रुतिर्नोक्तभ्रमनिवर्तिका, धर्मस्य प्रत्यक्षागोचरत्वादिति चेन्न ; आप्तोपदेशादिना शुक्त्यादौ रजतादिप्रत्यक्षनिवृत्तेरानुभाविकत्वेन शब्दात् प्रत्यक्षस्य प्राबल्यासिद्धेः वंशोरगादिस्थलीयापत्तेः तथाप्यनुद्धाराच्च । यत्प्रमाणविषयगतेत्याद्यपि न युक्तम् ; प्रत्यक्षविषययोगादिगतस्यालौकिकश्रेयस्साधनत्व[2]रूपधर्मत्वादेः ग्राहकत्वात् शब्दस्य प्रत्यक्षात्प्राबल्यसम्भवात् । किञ्चातीन्द्रियं प्रत्यक्षागृहीतं घटादिगतं गुरुत्वादिविशेषमनुमानादि गृह्णातीत्यतो यत्प्रमाणफलागृहीतविशेषस्य यत्प्रमाणफलं ग्राहकं ततः तत्प्रबलमिति न नियमः । नापि फलवृत्तिजातिविशेषविशिष्टागृहीतविशेषान्तर्भावेन नियमः, गुरुत्वादिकं च न प्रत्यक्षत्वविशिष्टागृहीतमीश्वरप्रत्यक्षगृहीतत्वादिति वाच्यम्, शाब्दत्वादिजातिविशिष्टागृहीतविशेषाप्रसिद्धेः केनचित्पुरुषेण तदादिशब्दैः बुद्धिविशेषविषयत्वादिरूपेण विशेषमात्रगृहीतसङ्केतैः स्वरूपत एव सर्वविशेषग्रहणसम्भवात्, ईश्वरीयेन विवरणाद्युक्तभाविविषयकानुमितिरूपेण ज्ञानेन सर्वविशेषाणां गृहीतत्वाच्च, प्रत्यक्षत्वजातेरस्मन्मते अलीकत्वस्योक्तत्वाच्च यदपि च त्वाचप्रत्यक्षत इत्यादेः परीक्षितप्रामाण्यकप्रत्यक्षविषयकत्वेऽपि अस्मदिष्टसिद्धेः सन् घट इत्यादिरपि फलपर्यन्तं परीक्षितत्वादित्यादिरोदनं, तत् देहात्मज्ञानस्य[3] स्वाप्नादिज्ञानस्य च फलपर्यन्तं परीक्षितत्वेऽपि दुर्बलत्वाद्धेयम् । पाश्चात्यबाधादिकं तु तुल्यम् । **परीक्षितप्रामाण्यकप्रत्यक्षेति**—

प्रत्यक्षमनुमानं च शास्त्रं च विविधागम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥

[1] प्रत्यक्षविषयकतया. [2] साधनवत्त्व. [3] सिद्धेऽपि.

प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् ॥

इति स्मृतेः,

तस्मात्प्रत्यक्षदृष्टेऽपि[1] युक्तमर्थं परीक्षितुम् ।
परीक्ष्य ज्ञापयन्नर्थान् न धर्मात्परिहीयते ॥

इति नारदोक्तेश्चेति भावः यदपि—" तस्माद्दीक्षितेन सत्यमेव वदितव्यमथो खल्वाहुः कोऽर्हति मनुष्यस्सर्वं सत्यं वदितुं सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति विचक्षणवतीं वाचं वदेच्चक्षुर्वै विचक्षणं विद्वेनेन पश्यतीत्येतद्ध वै मनुष्येषु सत्यं निहितं यच्चक्षुस्तस्मादाचक्षाणमाहुरद्रागिति स यद्यदर्शमित्याह अथास्य श्रद्दधाति यद्यु वै स्वयं पश्यति न बहूनां च नान्येषां श्रद्दधाति तस्माद्विचक्षणवतीमेव वाचं वदेत्सत्योत्तरा हैवास्य वागुदिता भवति भवति " इति दीक्षणीयेष्टेरर्थवादे ऐतरेयब्राह्मणवाक्यं प्रत्यक्षप्राबल्यबोधकम्; तत्र विचक्षणवतीमित्यस्य चक्षुस्संवादिनीमित्यर्थकत्वात्, सत्यं निहितमित्यस्य मानान्तरापेक्षया बलवद्व्यवस्थापितमित्यर्थकत्वाच्चेति । तदपि तुच्छम् । यदि हि चक्षुरेव मानान्तराद्बलवत् तदा त्वगाद्यपेक्षयाऽपि बलवत्स्यात् । यदि चक्षुस्संवादि वदनमेव सत्यं न स्यात् । चक्षुर्वेदस्य प्रत्यक्षपरत्वेऽपि अतीन्द्रियादिविषये निर्दोषानुमानादिसंवादि वदनं सत्यं न स्यात् । तस्मादुक्तश्रुतिरेवं व्याख्येया सत्यं व्यावहारिकसत्यार्थकवाक्यं तन्मात्रोक्तिर्न मनुष्याणां सम्भवति, भ्रमबाहुल्यात्, तन्मूलकवाक्यानां बहुशः उच्यमानत्वात् । किञ्च 'न ब्रूयात्सत्यमप्रियम्' इत्यादिवचनेभ्यः 'सत्यमेव वदितव्यम्' इत्यनुपपन्नमित्यभिप्रायेण अथो खल्वाहुरित्यादिनाऽऽशङ्क्य 'यद्भूतहितमत्यन्तं तद्धि सत्यं प्रचक्षते' इत्यादिवचनोक्तलक्षणाक्रान्तवचनमेव सत्यं, तदपि मानान्तरेणोपलभ्यम् यादृशं तादृशं वाच्यम्, न रागद्वेषादिना तद्विरुद्धं वाच्यम् । अतएव ॥

[1] ऊहात्मकज्ञानस्य.

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मस्सनातनः ॥

इतीत्याशयेन समाधत्ते---विचक्षणवतीमिति । चक्षुरिति । विशेषदर्शनसाधनमित्यर्थः । विशेषेण चक्ष्यते दृश्यते अनेनेति व्युत्पत्तेः । 'मनोऽस्य दैवं चक्षुः' इति प्रजापतिविद्यास्थश्रुतौ मनसि चक्षुःपदप्रयोगात्, 'योऽयं दक्षिणेऽक्षिण पुरुषो दृश्यते इति श्रुतौ प्रमाणसामान्ये प्रमातृतया यः पुरुषो दृश्यत इत्यर्थात् प्रमाणसामान्ये तत्प्रयोगाच्च । तच्च साधनं द्विविधं, वाक्ये परदुःखप्रयोजकत्वनिश्चयसाधनविचारः, वाक्यार्थोपलब्धिसाधनमानान्तरं च तत्र द्वितीयस्ययोगो वाचि आवश्यकः, अनुपलभ्यकथने प्रत्यवायादित्याशयेनाह—एतेनेति । प्रथमस्य योगोऽपि तस्यां तथा दुःखप्रयोजके कथिते प्रत्यवायादित्याशयेनाह—एतद्धेति सत्यमिति वाक्सत्यतायां मुख्यं प्रयोजकमित्यर्थः । प्रमाणगृहीतार्थकमपि परदुःखप्रयोजकं त्याज्यमित्येतदर्थं । मुख्यत्वोक्तिः । मानान्तरोपलब्धार्थकत्वस्य वाक्सत्यताप्रयोजकत्वे शिष्टव्यवहारमनुवदति । तस्मादाचक्षाणमिति अद्राक् वाक्यार्थं प्रतीतवानसीति प्रश्नः । अदर्शं प्रामितिवानहमित्युत्तरम् । अस्य वचनस्य श्रद्दधाति सत्यतां निश्चिनोति आचक्षाणस्य प्रमाणाकुशलत्वे आह यद्युवेति स्वयं श्रोता पश्यति वाक्यार्थं प्रमिणोति । एवंच वाक्यार्थग्राहकमानस्यैव दैवादृष्टत्वे वक्ता नापराध्यति, परिहारासामर्थ्यादित्यशयेनाह—सत्योत्तरेति । तस्मादागमाद्यपेक्षया प्रत्यक्षे श्रद्धालुत्वं चार्वाकसख्य[1]मात्रविजृम्भितमिति बोध्यम् ॥

किंच उक्तश्रुतिर्माधवीयभाष्ये एवं व्याख्याता—"सत्यमेव वाच्यमित्यस्य प्रायेण मनुष्याणामशक्यता 'अथो खलु' इत्यादिनोक्ता । सत्यमात्रोक्तिफलाय प्रकारान्तरं विधत्ते—विचक्षणवतीमिति ।

[1] सांख्य.

विचक्षणेनि चतुरक्षरो मन्त्रस्तद्युक्तं वाक्यं वदेत्—देवदत्त विचक्षण गामानयेत्यादि वक्तव्यमित्यर्थः । तदाह आपस्तम्बश्च "लसितं विचक्षण इति नामधेयन्तेषु [1] निदधाति च लसितेति ब्राह्मणस्य, विचक्षणेति राजन्यवैश्ययोः" इति । उक्तमन्त्रस्य सत्योक्तिस्थानीयत्वं प्रतिपादयति—चक्षुर्वै इति । चक्षुरिन्द्रियं नेत्रं, तद्विचक्षणं विशेषेण चष्टे पश्यत्यनेनेति व्युत्पत्तेरित्याह—एतेनेति । एतद्धेत्यादि । प्रत्यक्षानुमानादिप्रमाणानां मध्ये चक्षुरेव मनुष्याणां सत्यं निहितं, तथाच [2] यथावस्तुज्ञानसाधनत्वेनाभिमतं, चक्षुःपर्यायविचक्षणशब्दप्रयोगः सत्योक्तिस्थानीय इत्यभिप्रायः । चक्षुषो यथावस्तुज्ञानसाधनत्वमन्वयव्यतिरेकाभ्यामाह—तस्मादाचक्षाणेति । उदाहरणान्तरमाह—यद्यु वेति । निपातसमुदायः । च नेति शब्दः अपिशब्दसमानार्थ इति । तथाच वस्तुगत्या चक्षुषि यथावस्तुज्ञानसाधनत्वस्य असत्त्वेऽपि मनुष्याणां तथा अभिमत[3]त्वात् सत्यत्वं चक्षुष उक्तम् । अतो यथावस्तुज्ञानसाधनत्वमेव तस्य भाष्याभिप्रेतम् । अतएव तथा अभिमानस्यैवाग्रे उदाहरणम् । अन्यथा यथा वस्तुज्ञानसाधनत्वमात्रदृढत्वे उदाहरणतात्पर्ये चक्षुषा यथावस्तुज्ञानं, तद्विना नेत्येवोक्तं स्यात् । न तु अद्राक् अदर्शं श्रद्दधातीति । यस्माच्चक्षुषः तत्त्वदर्शनहेतुत्वं मनुष्याणामभिप्रेतं तस्मादाचक्षाणमाहुरद्रागितीति भाष्ये मनुष्याणामभिप्रेतमिति नोक्तं स्यात् । मनुष्याणामिति श्रुतावपि नस्यात् । मानान्तरापेक्षया बलवत्त्वं तु त्वया स्वमत्यनुसारेणाप्रामाणिकं सत्यशब्दार्थतयोक्तं सुदूरपराहतम् । तथा विचक्षणवतीमित्यस्य चक्षुस्संवादिनीमित्यर्थोऽप्यप्रामाणिक इत्युक्तम् । 'चक्षुर्वैसत्यम् अद्रागित्याह अदर्शमिति तत्सत्यम्' इति तैत्तिरीयश्रुतिरप्युक्तसमानार्थकत्वादविरुद्धा । यत्तु—"वाजसनेयिनो द्वौ विवदमानावे-

[1] नामधेयं तेषु. [2] 'तथाच . . . . चक्षुषः' इत्येतत्क्वचिन्न दृश्यते. [3] नियमित.

वायातावहमदर्शमहमश्रौषमिति, य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्धधते" इत्यामनन्ति ; तत्परीक्षितप्रामाण्यकप्रत्यक्षप्राबल्यानुवादः, अपरीक्षितप्रत्यक्षस्थले वैपरीत्यस्यैव लोके दर्शनादिति नास्मत्प्रतिकूलम् । तस्मादैतरेयब्राह्मणप्रथमाध्यायशेषवाक्यमस्मदनुकूलमेव ॥

'अग्ने ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः' इत्युपक्रम्य ज्योतिष्टोमे श्रूयते—'तस्मादुच्चैरृचाक्रियते, उपांशु यजुषा, उच्चैस्साम्ना इति । तत्र उच्चैष्ट्वादिकमृगादिपदार्थमुद्दिश्य विधीयते । स किं तत्पदस्य मुख्यार्थो मन्त्रविशेषः? उत उपक्रमस्थऋग्वेदादिपदगृहीततात्पर्यानुपपत्त्या लाक्षणिक ऋग्वेदादिविहितकर्माङ्गमन्त्रमात्ररूपोर्थः? इति संशये, ऋग्वेदादिपदानां विध्यपेक्षितस्तुतिबोधकत्वेन गुणभूतार्थवादस्थत्वात् न प्रधानभूतविधिवाक्यस्थेषु ऋगादिपदेषु लाक्षणिकार्थतात्पर्यग्राहकत्वं, किन्तु वेदपदानामेव विधिस्थर्गादिपदानुरोधेन लक्षणया वेदैकदेशमन्त्रमात्रपरत्वमङ्गगुणविरोधन्यायात्, अपच्छेदन्यायेन पश्चात्तनविधेः प्राबल्यादनुवादे लक्षणाया अदोषत्वाच्चेति प्राप्ते—ऋग्वेदादेरुद्देश्यतया विधेयतया वा वाक्यार्थाप्रवेशे स्तूयमानत्वानुपपत्तेः, प्रधानस्यापि विधिवाक्यस्य स्वगतऋगादिपदेषु वेदलक्षणां विना निर्वाहाभावात् अङ्गगुणविरोधन्यायानवतारात् । अतएवापच्छेदन्यायस्याप्यप्रवृत्तेरेकवाक्यत्वाभावे सत्येव तन्न्यायेन परेण पूर्वोपमर्दस्वीकारात् विधिस्थर्गादिपदानामपि उद्देश्यसमर्पकत्वेनोक्तरीत्या अर्थवादोक्तार्थबोधकत्वावश्यकत्वेन चानुवादकत्वाल्लक्षणाया अदोषत्वाच्च तेष्वेव लक्षणा । न वेदपदेषु । न च वेदपदेष्वेव लक्षणया ऋगादिमन्त्राणामेव स्तूयमानत्वसम्भवात् न विधिस्थपदेषु लक्षणेतिवाच्यम् तेषु लक्षणाग्राहकाभावात्, विधेः पूर्वमनुत्पन्नतया पूर्वोत्पन्नेषु लक्षणारूपोपमर्दाक्षमत्वात् लक्षणां विनैवाऽग्नेः ऋगित्यादिना मन्त्रस्तुतिधीसम्भवेन वेदपदानां वैयर्थ्यापत्तेश्च । मन्त्रमात्रं च न वेदशब्दस्य मुख्यार्थः एकदेशाध्ययने-

ननु प्रत्यक्षस्यासञ्जातविरोधित्वादुपक्रमन्यायेनैव प्राबल्यम्; उक्तं हि—

'असञ्जात विरोधित्वादर्थवादो यथाश्रुतः।
आस्थेयस्तद्विरुद्धस्य विध्युद्देशस्य लक्षणा'॥

इति चेन्न; यत एकवाक्यस्थपरस्परसापेक्षपदत्वेन उभयोस्साम्ये सति। उपक्रमस्थवेदपदानुरोधेन उपसंहारस्थगार्दिपदानां मन्त्रमात्रवाचिनां कृत्स्नवेदपरत्वे निर्णीतेऽपि न प्रकृते तन्न्यायस्सम्भवति, उभयोस्साम्याभावात्, गृहीतप्रमाणभावश्रुत्यपेक्षया भ्रमविलक्षणत्वेनानिश्चितस्य प्रत्यक्षस्य न्यूनबलत्वात्।

नापि वेदाध्यनविध्यर्थसिद्ध्यापत्तेः। तस्माद्वेदादिपदानां ऋग्वेदादिलक्षणाग्राहकत्वात् ऋग्वेदादिना यत्क्रियते विधीयते तत्कर्म उच्चैः कुर्यादित्यर्थपर्यवसानात् योग्यत्वान्मन्त्रमात्रस्य द्वारत्वलाभात् ऋग्वेदादिविहितकर्मादिमात्रस्योच्चैष्ट्रादिसिद्धिरिति वाक्यविनियोगप्रस्तावे तृतीये तृतीयाद्याधिकरणे 'श्रुतेर्जाताधिकारस्स्यात्' इत्यत्र चिन्तितम्। ऋगादिश्रुतेः मन्त्रजातेरधिकार उद्देश्यता स्यादिति पूर्वपक्षसूत्रम्। तथाच न्यायेन प्रथमोत्पन्नं प्रत्यक्षं श्रुत्याद्यपेक्षया प्रबलमिति शङ्कते—**ननु प्रत्यक्षस्येति।** एकवाक्यस्थेत्यनेनापच्छेदन्याया (न) वतारः; परस्परसापेक्षेत्यनेन विधेः प्रधानतयाऽपेक्षणीयत्ववदर्थवादस्याप्युक्तरीत्या विधिनिर्वाहकार्थसमर्पकत्वेन अपेक्षणीयत्वमित्यङ्गगुणविरोधन्यायानवतारस्तूचितः। ननु वेदपदानामेव मन्त्रमात्रपरत्वं किं न स्यात्? तत्राह—**उपक्रमस्थेति।** प्रथमप्रवृत्तेत्यर्थः। तथाच विधेः तत्प्रवृत्तिकालपश्चात्प्रवृत्तत्वान्न लक्षणारूपतदुपमर्दक्षमतेति भावः—**न्यूनबलत्वादिति।** तथाच परस्परसापेक्षत्वेन एकवाक्यगतत्वेन च पूर्वस्य परेण बाधासम्भवेऽप्यतथाभूतत्वेन प्रत्यक्षस्य पूर्वस्यापि प्रबलश्रुत्या बाध्यत्वमेव सम्भवतीति नोक्तन्यायावतार इति भावः—

अन्यथा 'इदं रजतम्' इति भ्रमोऽपि 'इयं शुक्तिः' इत्याप्तोप-

अन्यथेति। एकवाक्यत्वादिप्रयुक्तस्यापेक्षणीयत्वस्याभावेन बाध्यत्वसम्भवेऽपि प्रथमप्रवृत्तत्वमात्रेणोक्तन्यायेन प्राबल्याभ्युपगम इत्यर्थः। यत्तु 'प्रत्यक्षस्य प्रमात्वं फलपर्यन्तपरीक्षया निश्चितमिति न न्यूनबलत्वम्' इति, तत्तुच्छम्; उक्तपरीक्षासत्त्वेऽपि निश्चितप्रामाण्यकश्रुतिविरुद्धार्थकत्वेन स्वतस्सम्भावितदोषत्वेन च अप्रामाण्यसंशयसम्भवादुक्तपरीक्षायाः स्वप्नादाविव प्रामाण्यनिश्चायकत्वात्। तृतीयतृतीये 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदैर्बल्यमर्थविप्रकर्षात्' इत्यधिकरणे श्रुत्यादीनां विरोधे पूर्वापेक्षया परं दुर्बलं पूर्वसापेक्षतया विनियोजकत्वात्, श्रुत्यादिकं विना लिङ्गादेः विनियोजकत्वासम्भवात्। श्रुत्यादिकं कल्पयित्वा यथा विनियोजकं लिङ्गादिकं ततः पूर्वमेव लिङ्गादिनिरपेक्षश्रुत्यादिना विनियोगसम्भवे तदाकांक्षोच्छेदालिङ्गादेः प्रवृत्त्यसम्भवात्। तत्र श्रुतिरङ्गाङ्गिभावबोधकतृतीयादिः, तत्कल्पकयोग्यता लिङ्गं, तत्कल्पकः पदयोस्सन्निधिःवाक्यं, तत्कल्पकोभयाकाङ्क्षा प्रकरणं, तत्कल्पकं पाठादिसादेश्यं स्थानं, तत्कल्पकं यौगिकमाध्वर्यवादिपदं समाख्येति। तत्र श्रुतिलिङ्गयोर्विरोधे 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यादौ इन्द्रप्रकाशनसामर्थ्यरूपलिङ्गादैन्द्री नेन्द्राङ्गं, किन्तु श्रुत्या गार्हपत्याङ्गम्। न चाङ्गानां प्रकृत्यर्थत्वेन निराकाङ्क्षाणामपि विकृतिमात्राकाङ्क्षया अतिदेशकल्पनवदैन्द्रीगार्हपत्ययोः प्रकाश्यमन्त्राकाङ्क्षोच्छेदेऽपि[1] इन्द्रस्य स्मृत्यर्थं मन्त्राकाङ्क्षयैव उक्तलिङ्गस्य ऐन्द्रीविनियोजकत्वमास्तामितिवाच्यम्। ध्यानाद्युपायान्तरेणापि स्मृतिसम्भवेन मन्त्रपर्यन्तमाकांक्षाविरहात्। यद्यपि स्तृतीयादिश्रुतिः केवलकरणत्वस्य बोधिका, न तु गार्हपत्यादिनिरूपितकरणत्वस्य, तस्य 'ऐन्द्र्या गार्हपत्यम्, इति श्रुतपदसान्निधिरूपवाक्येनैव

[1] प्रकाश्यप्रकाशकाङ्क्षोच्छेदेऽपि.

देशापेक्षया प्रबलं स्यात्। एतेन—"लिङ्गात् श्रुतेरिव शीघ्रगामित्वात् प्रत्यक्षस्य प्राबल्यम्। तदुक्तम्—

प्रत्यक्षे चानुमाने च यथा लोके बलाबलम्।
शीघ्रमन्थरगामित्वात्तथैव श्रुतिलिङ्गयोः॥"

इत्यपास्तम्, परीक्षितस्य मन्थरगामिनोऽपि प्राबल्यात्।

बोधनात्[1]। तच्च ब्राह्मणवाक्यत्वेन मन्त्रलिङ्गापेक्षया प्रबलम्, यद्यप्यन्यदैवत्यः पशुरितिवत्। तथाच लिङ्गस्य वाक्यबाध्यतायामुक्तोदाहरणं युज्यते, न तु लिङ्गस्य श्रुतिबाध्यतायां, तथापि वाक्यस्यापि श्रुतिघटितत्वात् श्रुतिवाक्याभ्यां बाध्यस्यापि प्रधानेन व्यपदेशात् श्रुतिमात्रबाध्यत्वव्यपदेश इति तत्राप्युक्तोदाहरणं युक्तमिति चिन्तितम्। तथाच शीघ्रप्रवृत्तत्वाद्यथाश्रुतिर्लिङ्गापेक्षया प्रबला तथा श्रुत्याद्यपेक्षया प्रत्यक्षमिति शङ्कां निरस्यति—**एतेनेति**। लिङ्गापेक्षणीयतया लिङ्गात् प्रबलश्रुतेः तद्बाधकत्वेऽपि प्रत्यक्षस्योक्तरीत्या न्यूनबलत्वेन श्रुत्याद्यबाधकत्वेनेत्यर्थः। ननु प्रत्यक्षस्य उक्तरीत्या न्यूनबलत्वेऽपि श्रुत्याद्यपेक्षया शीघ्रगामित्वेन प्राबल्यम्, श्रुत्यादेराकाङ्क्षादिनिश्चायकमानान्तरसापेक्षत्वेन मन्थरगामित्वात्, तत्राह—**परीक्षितस्येति**। प्राबल्यहेतुयुक्तस्येत्यर्थः। अतएव ब्राह्मणवाक्यस्य मन्थरगामिनोऽपि मन्त्रलिङ्गात्प्राबल्यमुक्तम्। विवरणकारीयन्यायनिर्णयादौ च लिङ्गादेस्तात्पर्यवत्त्वेन प्रबलस्य श्रुत्याद्यपेक्षया प्राबल्यमुक्तम्। मन्थरगामित्वमात्रेण दुर्बलत्वे चन्द्रप्रादेशिकत्वादिप्रत्यक्षापेक्षया चन्द्राप्रादेशिकत्वाद्यागमानुमानाद्यपि दुर्बलं स्यादिति भावः दशमाष्टमे 'अविशेषेण यच्छास्त्रमन्यायत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्टं स्यात्, इत्यधिकरणे चिन्तितम्—ज्योतिष्टोमे श्रुते। पदे जुहोति, वर्त्मनि जुहोति इत्यादौ, अन्यत्र श्रुते—

---

[1] बोधनसंभवात्.

'गार्हपत्ये पत्नीसंयाजान् जहोति इत्यादौ विशेषविहितगार्हपत्यादेः 'यदाहवनीये जुहोति' इति सामान्यविहिताहवनीयादिभिः विकल्पो बाधो वेति संशये, प्रत्यक्षस्य 'शरमयं बर्हिः' इत्यादिशास्त्रस्यानुमानिककुशाद्यतिदेशशास्त्रबाधकत्वं युक्तम्; तस्य तदपेक्षया शीघ्रप्रवृत्तत्वात्। सामान्यविशेषशास्त्रयोस्तु द्वयोरपि प्रत्यक्षत्वात्। शीघ्रप्रवृत्त्य[1]विशेषेण तुल्यबलत्वात् तद्विहितयोर्विकल्प इति प्राप्ते, अविशेषेत्यादि सिद्धान्तः। होमत्वसामान्य जुहोतिवाच्यस्य सर्वहोमव्यक्तिषु सम्बन्धालक्षणया अविशेषेण यत्सामान्यशास्त्रं विशेषबोधतात्पर्यकं तत्सन्दिग्धं विशेषपरत्वेन निर्णेतुमशक्यम्। अतो विशेषविशिष्टं विशेषरूपेण विधायकं पदादिशास्त्रमारात् शीघ्रप्रवृत्तं[2] प्राकरणिकहोमविशेषविषयकत्वात् पदादिविशिष्टहोमविशेषोत्पत्तिवाक्यत्वात्, विषयान्तरे निरवकाशत्वाच्च सामान्यशास्त्रं तु अनारभ्याधीतत्वादुत्पन्नहोमविषयकत्वात् पदहोमादिविशेषातिरिक्ते सावकाशत्वाच्च दुर्बलम्। पत्नीसंयाजादिविशेषशास्त्रं लक्षणां विनैव प्रवृत्तत्वादपि[3] शीघ्रप्रवृत्तं, पत्नीसंयाजादिपदानां जातिवाचित्वाभावेन व्यक्तिविशेषशक्तत्वात् अत अतुल्यबलत्वाद्विकल्पो न युक्तः। अतएव न समुच्चयः; व्रीहियवादिवन्निरपेक्षकरणत्वेन पदादेराहवनीयस्य च विहितत्वाच्च। तस्माद्विकल्पस्य समुच्चयस्य वान्याय्यत्वाद्बाध एव सामान्यशास्त्रविहितस्येति सूत्रार्थः। यद्यपि व्रीह्यादिद्रव्यं विना यागादिस्वरूपनिष्पत्तिरूपदृष्टकार्याभावात् तस्य दृष्टार्थत्वसम्भवेऽपि आहवनीयादिकं विनापि प्रक्षेपरूपहोमनिष्पत्त्यादिरूपदृष्टकार्यसम्भवात् न तस्य दृष्टार्थतेति[4] विभिन्नादृष्टरूपकार्यजनकत्वेन समुच्चय एव युक्तः; एकेनापरजन्यादृष्टजननासम्भवात्। अतएव न 'देवताग्निशब्दक्रियमन्यार्थसंयोगात् इति सूत्रेण षष्ठे देवतादीनां प्रतिनिधिर्निषिद्धः। अग्नेर्दृष्टार्थत्वे तु प्रतिनिधिस्स्यादेव।

[1] प्रवृत्ति. [2] प्रवृत्तिक. [3] त्वात्तदपि. [4] सम्भवात्तस्यादृष्टार्थतेति.

न च 'यदाहवनीये जुहोति' इत्यस्मात् 'पदे जुहोति' इत्यस्य विशेषविषयत्वेन प्राबल्यवत् घटविषयसत्त्वग्राहिणः प्रत्यक्षस्य सामान्यतो द्वैतनिषेधकश्रुत्यपेक्षया प्राबल्यमिति वाच्यम्; सामान्यविशेषन्यायस्य निश्चितप्रमाणभावोभयविषयत्वात् । अन्यथा 'अयं गौरश्वः' इत्यादेरपि गौरश्वो न भवतीत्यादितः प्राबल्यं भवेत् ।

अतएव चानूयाजा अदृष्टेनोपकुर्वन्तो नाम न होमादिभिरुपहोमैः विकल्प्यन्ते बाध्यन्ते वेत्युक्तं दशमे । तथाप्याहवनीयादेः होमं प्रत्यवश्यापेक्षणीयत्वाभावेऽपि अधारतारूपदृष्टोपकारजनकत्वात् दृष्टार्थतैव । एवमपि-नतस्यप्रतिनिध्यापत्तिः अवश्यापेक्षणीयदृष्टार्थस्यैव तत्स्वीकारात् । अतो न षष्ठोक्तिविरोधः । अदृष्टजनकत्वमप्याधारत्वं द्वारीकृत्य वाच्यम् । तच्च होमं प्रति पदादेराहवनीयस्य च निरपेक्षं प्रमितमिति तदन्यथानुपपत्त्या समुच्चयाभावः विशेषविधिना सामान्यविधिरिव सामान्यनिषेधोऽपि बाध्यते । अतो 'न हिंस्यात्' इत्यादौ वैधान्यहिंसानिषेधः; इष्टानिष्टसाधनत्वयोरविरोधेऽपि पुण्यजनकत्वस्य पापाजनकत्वव्याप्यत्वात् । अतएव 'न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति' इत्यादिस्मृतिः, 'अशुद्धमिति चेन्न, शब्दात्' इति व्याससूत्रं च । तथाच यथा पदहोमादिशास्त्रेणाहवनीयादिशास्त्रं बाध्यते, सामान्यविषयकत्वात्, तथा प्रत्यक्षेण श्रुत्यादीति शङ्कते—**न च यदाहवनीयेति । भवेदिति ।** अत्र यथा 'न हिंस्यात्' इत्यादेः वैधान्यहिंसानिषेधपरत्वं सम्भवति, हिंसात्वसामान्यरूपेण वैधान्यहिंसायामनिष्टसाधनत्वबोधने लक्षणाविरहात् । नेह नाना' इत्यादौ तु सत्त्वप्रत्यक्षाविषय द्वैतसामान्याभावबोधकत्वं लक्षणयैव वाच्यमिति वैषम्यम् । अथ भावनाविध्यर्थत्वमते हिंसाकरणकक्रत्यभावे शाब्दभावनाविषयत्वबोधे वाच्ये वैधान्यहिंसाकृतिसामान्याभाव एव लक्षणया बोध्य इति चेन्न;

कृतिमुख्यविशेष्यकबोधस्य तन्मते स्वीकारेण हिंसाकृतित्वसामान्यरूपेण वैधान्यहिंसाकृतौ भावनाप्रयोज्याभावप्रतियोगित्वबोधस्य लक्षणां विनैव सम्भवात्। अथाद्वैतश्रुत्यादिरूपसामान्यबोधकप्रमाणस्य सावकाशत्वं लक्षणयाऽपीत्यत्राविशेषप्रमाणस्य सामान्यप्रमाणगतलक्षणारूपोपमर्दप्रयोजकत्वमदृष्टमपि प्रकृते कल्प्यत इति चेन्न; सावकाशत्वं हि विशेषप्रमाणविषयान्यत्र स्वारसिकेप्रवृत्तिः, न तु लक्षणादिरूपोपमर्दप्रयुक्ता। वक्ष्यतेचाचार्यैः—'श्रुतेरपि निरवकाशत्वमनन्यपरत्वात्' इति। न श्रुत्यादेः सावकाशत्वेन प्रत्यक्षबाध्यतासम्भवः। किञ्च 'नेह नानास्ति किञ्चन, नात्र काचन भिदा, इदं सर्वं यदयमात्मा' इत्यादौ-किमादि सर्वनाम्ना विशेषरूपेण बोधकत्वात्॥

न पुण्यपापे मम नास्ति नाशो न जन्मदेहेन्द्रियबुद्धिरस्ति।
न भूमिरापो मम वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च॥

'अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽतेजस्कम्, अशब्दमस्पर्शमरूपमव्ययम् तथाऽरसं नित्यमगन्धवच्च यत्' इत्यादिश्रुतौ विशेष्यवाचकपदयोगात् पृथिवीमिथ्येत्यादिविशेषानुमानरीतेरुक्तत्वाच्च श्रुत्यादीनामपि विशेषरूपेण मिथ्यात्वविषयकत्वाद्विशेषरूपेण सत्यताविषयकप्रत्यक्षबाध्यतायां न प्रत्याशा। न चोक्तश्रुतौ पुण्यादौ आत्मनि सम्बन्धनिषेधात्[1] न पुण्यादिमिथ्यात्वबोधकत्वमिति वाच्यम्; "एवं विदित्वा परमात्मरूपम्" इत्युत्तरवाक्येन आत्मानमुद्दिश्य पुण्याभावादिविधानस्य स्वरसतः प्रतीतेः ममेति षष्ठ्याः सप्तम्यर्थकत्वात्। न च प्रत्यक्षायोग्यभूम्यादेरेव निषेध इति वाच्यम्; लक्षणापत्तेः। अदृष्टमव्यवहार्यमनिन्द्रियमविषयम्' इति नृसिंहतापनीयश्रुतौ "अशरीरं शरीरेषु, अपाणिपादोऽहमचिन्त्यशक्तिः, पश्याम्यचक्षुस्स शृणोम्यकर्णः, अप्राणोह्यमनाः" इत्यादिश्रुतिषु प्रत्यक्षविषयत्वादिरूपदृष्टत्वादिनिषेधस्य स्फुट-

[1] आत्मसम्बन्धनिषेधात्.

त्वात्। न चादृष्टमित्यादिकं तत्पुरुष इति वाच्यम्; 'नान्तः प्रज्ञम्' इत्यादिबहुव्रीहिप्रायपाठात्, अबहुव्रीहित्यस्य अविनिगम्यत्वादिति ध्येयम्।

यत्तु 'उत्सर्गतः स्वतः प्रामाण्यस्य प्रत्यक्षेऽपि निश्चयावश्यकत्वात् सामान्यविशेषेत्याद्ययुक्तम्' इति, तत्तुच्छम्; औत्सर्गिकत्वादेव दोषसत्त्वे अपवादात्। अन्यथा औत्सर्गिकत्वहानिरिति स्ववचनार्थाबोधस्य स्फुटत्वाच्च ज्योतिष्टोमे श्रूयते—'त्सरा वा एषा यज्ञस्य तस्माद्यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ति इत्यादौ विहितमुपांशुत्वमग्नीषोमीयापेक्षया पूर्वस्य ज्योतिष्टोमभागस्याङ्गमुत तद्गतपदार्थस्येति संशये, तत्पदार्थमुद्दिश्योपांशुत्वं विधीयते। अन्यथा सिद्धान्तेऽप्यग्नीषोमीयादिपदार्थानां मिथोऽनन्वयेन प्रत्येकोद्देशे वाक्यभेदापत्तेः। तत्पदं च पूर्वभागमेव परामृशति, न तु तद्गतपदार्थान्, तेषामप्रक्रान्तत्वात्। प्राचीनशब्दस्य लक्षणया क्वचित्तादृशपदार्थबोधकत्वेऽपि आकृत्यधिकरणन्यायेन पूर्वभागवाचकत्वात् यद्यपि पूर्वरूपेण पदार्थबोधकत्वमपि तस्य सम्भवति; तथाप्येकवचनान्तत्वेन नात्र नानापदार्थबोधकत्वम्। एकपदार्थबोधेन च यत्किञ्चिदित्यसङ्गतम्। अतस्तस्य समूहतात्पर्यग्राहकत्वेन सार्थक्यात् एकसमूहाभिप्रायेण एकवचनप्रयोगात् पूर्वसमूहबोधकत्वं तस्यावश्यकम्। तादृशे च समूहे भागितया ज्योतिष्टोमरूपप्रकृतयज्ञस्यान्वयः तदेकदेशपूर्वत्वे च निरूपकतयाऽग्नीषोमीयस्य अन्वयः। तथाच तादृशसमूहरूपभागस्यैव प्रक्रान्तस्य तत्पदेनोद्देश्यता। यद्यपि यज्ञस्येति पदं तस्मादित्यनेन व्यवहितम्; तथापि विधिवाक्यार्थे तदर्थान्वयः। अन्यथा अर्थवादकक्षावाक्यार्थ एव तदन्वये तस्य प्रवृत्तिविशेषकरत्वाभावापत्तेः। अस्तु वा तस्य त्सरायामेवान्वयः। तथापि ज्योतिष्टोमस्य प्रकृतत्वात् तदीयभागलाभः; सिद्धान्तेऽपि पदार्थविशेषणतया तदीयत्वस्यावश्यकत्वात्, अन्यथा अतिप्रसङ्गात्। तथाच तादृशभाग-

स्वरूपे साधनानर्थक्यात् तज्जन्यापूर्वे च मानाभावात् भागिज्योतिष्टोम-जन्यपरमापूर्वविशिष्टतया भागोद्देशे नोपांशुत्वं विधीयत इति परमापूर्व-प्रयुक्तं तत्। तथाच ज्योतिष्टोमविकारे अग्नीषोमीयपूर्वभागान्तर्गते स्वप्राकृत[1]पदार्थेष्वपितदूह इति प्राप्ते, यत्किञ्चिच्छब्दस्य बहुष्वेव प्रयोगात् स्वार्थपरत्वे सम्भवति समूहतात्पर्यग्राहकत्वेन तत्सार्थक्यस्य युक्तत्वात् यत्प्राचीनमित्यनेन एकवचनान्तेनैव समूहलाभे किञ्चित्पदवैयथर्य्या-पत्तेश्च प्रथमोक्तत्वेन बलवतस्तस्यानुरोधेन चरमोक्तप्राचीनपदाश्रितस्यै-कवचनस्य बहुत्वलक्षणासम्भवात् प्राचीनपदस्य पूर्वत्वरूपेण पदार्थ-बोधकत्वात् तेनेत्यनेन तत्तत्पदार्थजन्यावान्तरापूर्वसाधनोद्देशेनैवोपांशुत्वं विधीयते। एवंच योग्यत्वान्मन्त्रमात्रं द्वारं, समूहस्योद्देशत्वे तु घटकपदार्थाङ्गमन्त्रो द्वार[2]मिति गौरवम्. अतएव एकवचनानुरोधेन भाग-स्यैव स्वघटकपदार्थजन्यापूर्वसम्बन्धित्वेनोद्देश्यता आस्तामित्यपि परा-स्तम्। किञ्चित्पदानर्थक्यादेरुक्तत्वाच्च। यत्तु "यज्ञत्सरयोरन्वयात् उपांशुत्वं परमापूर्वप्रयुक्तं, त्सर छद्मगतौ' इति स्मृतेः। यदु-पांशुत्वानुष्ठानमेषा यज्ञस्य त्सरा यज्ञसाध्यपरमापूर्वलाभाय छद्मगतिः, यथा पक्ष्यादिलाभाय शनैः छद्मगतिरित्यर्थपर्यवसानात्" इति तन्न; यज्ञसम्बन्धिपदार्थजन्यापूर्वलाभायेत्यर्थस्य न्यायानुसारिणः सम्भवात्। तथाचोक्तेष्वप्राकृतपदार्थेषु यूपावटास्तरणबर्हिर्धर्मवदुपांशुत्वस्य नोह इति नवमप्रथमे 'देशलब्धमुपांशुत्वं, तेषां स्यात् श्रुतिनिर्देशात् तस्य च तत्र भावात्' इति सूत्रेण सिद्धान्तितम्। देशलब्धमग्नीषोमीयात् पूर्वसम्बन्धितयोपात्तमुपांशुत्वं, तेषां पदार्थानां लिङ्गं स्यात्, यत्किञ्चिच्छ्रुतिनिर्देशात्। तत्र तादृशनिर्देशे सति पश्चात् तस्य 'प्राचीनम्' इत्यस्य भावात् उत्पन्नत्वात् तत्र तेषु पदार्थेषु तस्य उपांशुत्वस्य मन्त्रद्वाराभावात्। उपकारकतया सत्त्वात्–इति सूत्रार्थः। तथाच

[1] ष्वप्राकृत. [2] द्वार.

न च यथा 'यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ति' इत्यस्य यत्किञ्चिच्छब्दस्य यत्किञ्चित्प्रकृतवाचित्वेन सामान्यविषयत्वेऽपि दीक्षणीयाव्यतिरिक्ते सावकाशत्वात् 'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात् इत्यनेन निरवकाशेन सङ्कोचः, तथा प्रत्यक्षेण निरवकाशेन वृत्र्यन्तरेणानेकार्थत्वेन वा विषयान्तरपरत्वेन सावकाशायाः श्रुतेः सङ्कोचः

दीक्षणीयादिसकलप्राचीनपदार्थजन्यापूर्वसाधनोद्देशेन उपांशुत्वविधानप्रसक्तावपि 'यावत्या' इत्यादिविशेषविहितस्वरावरुद्धदीक्षणीयाप्रायणीयादिभिन्नप्राचिनपदार्थजन्यापूर्वसाधनोद्देशेन उपांशुत्वविधायकतया सावकाशं यत्किञ्चिदित्यादिवाक्यं सङ्कुच्यते, यथा यावत्येत्यादिना, तथा प्रत्यक्षेण तदविषये सावकाशश्रुत्यादिसङ्कोच इति शङ्कते—**न च यथेति। निरवकाशेनेति।** दीक्षणीयादिजन्यापूर्वसाधनोद्देशेन स्वरविशेषविधायकत्वेन दीक्षणीयादन्यत्रानवकाशेनेत्यर्थ। स्थितं हि नवमद्वितीयाधिकरणद्वितीयवर्णके 'यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयान्मद्रं प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्सू उच्चैः प्रवर्ग्येण उच्चैरग्नीषोमीय' इति। ज्योतिष्टोमे श्रुताः स्वरविशेषाः दीक्षणीयादिजन्यापूर्वसाधनोद्देशेन विधीयन्ते, ज्योतिष्टोमजन्यापूर्वप्रयोजकापूर्वसाधनीभूतदीक्षणीयाद्युद्देशेन वेति संशये साक्षात्पुरुषार्थसाधनत्वादवान्तरापूर्वमात्रं नोद्देश्यघटकमिति द्वितीयपक्षे प्राप्ते, पश्वादिवत्परम्परयापुरुषार्थसाधनस्याप्युद्देश्यत्वसम्भवात् ज्योतिष्टोमापूर्वघटितोक्तरूपापेक्षया आवश्यकत्वाल्लाघवाच्च दीक्षणीयादिजन्यावान्तरापूर्वसाधनत्वेनैव उद्देश्यता[1]। एवं प्रोक्षणादिरूपसन्निपत्योपकारकाङ्गानामुत्पवनादिरूपा धर्मा प्रोक्षणादिजन्यव्रीह्यादिनिष्टापूर्वसाधनोद्देशेन, प्रयाजाद्यारादुपकारकाङ्गनामभिक्रमणादिरूपाधर्माः प्रयाजादिजन्यापूर्वसाधनोद्देशेन विधीयन्ते। एवंच ज्योतिष्टोमविकारं-

---

[1] उद्देश्यत्वात्.

प्रत्यनङ्गभूतेषु मेष्यादिद्रव्येषूपाकरणादीनामूहः। पूर्वपक्षे तु ज्योतिष्टोमापूर्वस्थानापन्नापूर्वाभावेन प्राकृतकार्यभावादनूहः। तेषु दैक्षधर्मानतिदेशश्च। यत्तु भाष्ये—'अश्वमेधे त्रैधातवीया[1] दीक्षणीया भवति' इति वचनेन यजमानसंस्कारे दीक्षणीयाकार्ये विहितत्रैधातवीयायां दीक्षणीयाधर्मप्राप्तिः पूर्वपक्षे, सिद्धान्ते तु प्रसिद्धत्रैधातवीयाधर्मप्राप्तिः, इति प्रयोजनमुक्तं, तत्र पूर्वपक्षवत् सिद्धान्तेऽपि स्थानापत्तै बाधकाभावात्। यदितु स्थानापत्त्यतिदेशापेक्षया त्रिविधातिदेशो[2] बलवानिति अष्टमोक्तेः नामातिदेशेन प्रसिद्धत्रैधातवीयाधर्मप्राप्तिरिति शङ्क्येत, तदा तत्पूर्वपक्षेऽपि तुल्यम्। वस्तुतो नेयं त्रैधातवीया, प्रसिद्धत्रैधावीयातः कर्मान्तरं, सत्यप्युपादेयगुणायोगे आरुणातासामाधिकरण्यात्। अतः सधर्मिकैव यजमानसंस्काराय विधीयत इति धर्मस्यानाकाङ्क्षितत्वात् न स्थानापत्त्यतिदेश इति। अत्र यद्यपि दीक्षणीयायाः यार्जुवदिकत्वेनोपांशु यजुषेत्यनेनोपांशुत्वं, तथापि तच्चोदकेन बाध्यते। प्राक् स्विष्टकृतः प्रथमस्थाने[3] मध्यमेनेडाया शेषे तृतीयस्थानेनेत्येतत् स्थलवैपरीत्यस्य दर्शपूर्णमासीयस्य चोदकप्राप्तत्वात् चोदकाश्रितस्य प्रयोगवचनाश्रितोपांशुत्वादिनानावेदस्वरापेक्षया बलवत्त्वात्, तदपि यत्किञ्चित्प्राचीनमित्यादिना बाध्यते,[4] तदपि यावत्येत्यादिनेति बोध्यम्। स्विष्टकृतः प्राक् प्रथमस्थानेन नीचैः स्वरेण प्राक्[5] स्विष्टकृदुत्तरं मध्यमेन स्वरेण शेषे इडोत्तरं तृतीयस्थानिनोच्चैस्स्वरेणेति दर्शपूर्णमासीयवाक्यार्थः। न चाग्नीषोमीयात्प्राचीनासु दीक्षणीयाप्रायणीयोपसत्सु[6] यावत्येत्यादिना स्वरविशेषे विहिते यत्किञ्चिदित्याद्यपि निर्विषयकत्वात् निरवकाशमुपसत्सु उपांशुत्वस्यानुवादश्च स्यात् इति वाच्यपू; यत्किञ्चिदित्यादेः दीक्षणीयाद्यङ्गेषु विधायकत्वात्, यावत्येत्यादेः

---

[1] उद्देश्यत्वात्. [2] त्रैधातवीयातिदेशो. [3] प्रथमस्थानेन. [4] साध्यते. [5] इडायाः प्राक्. [6] प्रायणीयाभिन्नोपसत्सु.

दीक्षणीयादिस्वरूपमात्रे स्वरविशेषविधायकत्वात् । प्रवर्ग्ये तु साङ्ग एवोच्चैःस्वर उच्चैः प्रवर्ग्येणेत्यस्य तद्विधायकवचनस्य करणतावाचितृतीयायोगात्साङ्गस्यैव करणत्वात् । ननु यत्किञ्चिदित्यादेः सामान्यविषयकत्वादेवाहवनीयादिवाक्यवत्सङ्कोचः न तु सावकाशत्वात् सामान्यविशेषन्यायश्च पूर्वमेवोक्तस्तत्राह—**यत्किञ्चिच्छब्दस्येति** । **प्रकृतवाचित्वेनेति** । विशेषबोधकत्वेनेत्यर्थः सर्वनाम्नां घटादिशब्दपर्यायतावारणाय बुद्धिविषयविशिष्टशक्तत्वेऽपि विशेषरूपेण शाब्दधीजनकत्वमावश्यकम्; अन्यथा विशेषरूपेण संशयस्य निवृत्त्यनुपपत्तेः । तथाच सामान्यविषयकत्वात् न सङ्कोचः, किन्तु सावकाशत्वादिति भावः । यत्तु 'विशेषबोधने प्रकरणसापेक्षतया यत्किञ्चिच्छब्दसङ्कोचः' इति, तत्तुच्छम्; अग्नीषोमीयात्प्राचीनं यत्किञ्चिदित्यनेन प्रकरणनिरपेक्षेणैव तत्पदार्थ[1] बोधसम्भवात्, अवान्तरापूर्वसाधनलक्षणार्थमवान्तरप्रकरणापेक्षणस्य तत्तत्स्वरूपपरिचयार्थं तत्तद्वाक्यापेक्षणस्य वा दीक्षणीयादिपदेऽपि तुल्यत्वात् । **वृत्त्यन्तरेणेति** । 'नेह नानास्ति' इत्यादौ आदरणीयं नाना नास्ति इह ब्रह्मणि तत्सत्त्वे[2] एकैवादरणीयास्ति' इति लक्षणा(दि)वृत्त्या विषयान्तरपरतेत्यर्थः । ननु स्वारसिकवृत्तेः सङ्कोचयोग्यता सावकाशता, न हि 'यजमानः प्रस्तरः' इत्यादेर्यजमानसादृश्यादिबोधकत्वं, 'सोमेन यजेत' इत्यादेः सोम[3] सम्बन्धिबोधकत्वं च, सावकाशत्वेन सङ्कोचात् । किन्तु मुख्यार्थतात्पर्यहीनश्रुत्यपेक्षया, बलवत्प्रत्यक्षबाध्यत्वात् । न चाद्वैतश्रुतेः बाध्यत्वं सम्भवति; तात्पर्यवत्त्वात्, प्रत्यक्षस्यानिश्चितप्रामाण्यत्वेन न्यूनबलवत्त्वाच्चेत्यत आह—**अनेकार्थत्वेनेति** । 'अन प्राणने' इत्यस्य भावकिबन्तस्य नकारपूर्वकस्य नानेतितृतीयान्तं रूपं जीवना-

---

[1] तत्फलार्थ. [2] तत्सर्वैः. [3] साम.

किं न स्यादिति वाच्यम्; तात्पर्यलिङ्गैरुपक्रमादिभिः द्वैत-

भावेनेत्यर्थकं, 'अ मा नो नाः प्रतिषेधवाचकाः' इत्युक्तेः। तथाच नाना विनाशेन किञ्चन नास्ति अस्त्येवेति न अस्थिरमित्यर्थः। तथाच ब्रह्मैव सेव्यं तदन्यस्य विनाशित्वेनास्थैर्यात्तत्प्राप्तेरपुरुषार्थत्वात्, 'मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' इत्यत्र तु इव-शब्दस्याल्पार्थकत्वादल्पमपि विनाशेन युक्तं यः सेव्यत्वेन पश्यति[1] स मुहुर्मियत इति व्याख्येयम्। अथवा इह ब्रह्मणि नानात्वं नास्तीत्यर्थो लक्षणया वाच्यः, 'हिरुक् नाना च वर्जने' इत्यमरात्। इह ब्रह्मणि पृथक्भाव(रूपवर्जन)विशिष्टं किमपि नास्तीत्यर्थः। अनेकार्थकत्वेनेति भावः। यत्तु—"तत्त्वमसीत्यादौ तदादिपदस्य तदीये लक्षणारूपवृत्त्यन्तरेण ब्रह्मैव सन् ब्रह्माप्येतीत्यादावनेकार्थत्वेन पूर्वब्रह्मपदस्यजीवार्थकतया अप्येतीत्यस्य सम्बध्नातीत्यर्थकतया विषयान्तरपरता" इति व्याख्यानं, तत् शोभते; मिथ्यात्वबोधकश्रुतेः सत्यताप्रत्यक्षेण सङ्कोचस्य प्रकृतत्वात्, तदन्यत्र वृत्यन्तरादि[2] वर्णनस्य प्रकृतानुपयोगात्। **उपक्रमादिभिरिति**। बृहदारण्यके षष्ठे द्वितीय-ब्राह्मणान्ते—'स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते अशीर्यो न हि शीर्यते असङ्गः' इत्युपक्रमः। तादृश एव चतुर्थब्राह्मणान्ते उपसंहारः—'अभयं वै जनक प्राप्तोसि' इति, 'नैनं कृताकृते तपतः' इति च। तत्रैव फलं—'अनु मा शाधि' इति मानान्तराविषयत्वरूपापूर्वतास्चनम्। 'स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुष इति, नेह नानास्ति किञ्चन, सलिल एको द्रष्टा अद्वैतो भवति' इत्यादिरभ्यासः। 'मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' इत्याद्यर्थवादः। 'एष सेतु-र्विधरण एषां लोकानां यस्सिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः'

[1] सेव(व्य)ते न पश्यति. [2] पूर्ववृत्यन्तरादि.

निषेधपरत्वे अवधृते अद्वैतश्रुतेरपि निरवकाशत्वात्, प्रत्यक्षस्यापि व्यावहारिकद्वैतविषयतया सावकाशत्वात्, विरुद्धयोश्च द्वयोः 'अहं मनुष्यः' इत्यादिप्रत्यक्ष 'आकाशवत्सर्वगतश्च नित्यः' इत्यादिश्रुत्योरिव तात्त्विकप्रामाण्यानुपपत्त्या कस्यचिद्व्यावहारिकं कस्यचित्तात्त्विकं प्रामाण्यमभ्युपेयम्, अत्यन्ता-

---

इत्यादिकमात्मनो जगदुपादानत्व बोधकत्वात् कारणं विना कार्यं नास्तीत्युपपत्तिः । एवमन्यत्रापि बोध्यम्—**निरवकात्वादिति** । विषयान्तरपरतया सावकाशत्वाभावादित्यर्थः । किञ्च नात्र काचन भिदाऽस्ति इत्यादिश्रुत्या नेह नानास्तीत्यादिश्रुतेरेकार्थत्वस्योक्तत्वात् उक्तव्याख्यानं प्रलापः । न च भिदापदस्यापि विनाऽश्यर्थकतया यतो विनाशि अतो नास्तीत्यर्थ इति वाच्यम्; अत्र भिदामिव मन्यमानः शतधा मृत्युमाप्नोतीत्युत्तरासङ्गतेः । अत्र सावकाशनिरवकाशन्यायस्यापि निश्चितप्रामाण्यकोभयविषयकत्वम्; अन्यथा 'अयं गौरश्वः' इत्यादेरपि स सगौर्नाश्व[1] इत्यादिसङ्कोचकत्वं स्यादित्याशयेन—**श्रुतेरपीत्यपिशब्द उक्तः** । यत्तु—'सत्त्वप्रत्यक्षाविषये मिथ्यात्वबोधकतया अद्वैतश्रुतेः सामकाशत्वसम्भवेन प्रत्यक्षस्यापि तात्त्विकप्रामाण्यसंभवे व्यावहारिकप्रामाण्यस्य अप्रामाण्यपर्यवसितस्य तत्रोक्तिरयुक्ता' इति, तत्तुच्छम्; प्रत्यक्षाविषये व्यावहारिके मिथ्यात्वबोधनेऽपि त्वन्मतोपमर्दात् । अथ तत्राप्यनुमानादेः सत्वग्राहकस्य निरवकाशत्वेन मिथ्यात्वश्रुतिर्न प्रवर्तते[2], तर्हि तस्या निरवकात्वं स्थिरमेव । अथ उक्तानुमानादेः सम्भावितदोषत्वात् 'प्राबल्यमागमस्य' इत्यादिश्रुतेश्चाद्वैतश्रुतिबाध्यता, तदा सत्त्व[3]-प्रत्यक्षस्यापि सत एव सा अस्तु । किञ्च 'अशब्दमस्पर्शमरूपम्' इत्यादिश्रुतेः प्रत्याक्षाविषये कथं सावकाशत्वं; शब्दादेः प्रत्यक्षाविषयत्वे

---

[1] गौणाश्व. [2] श्रुतिर्निवर्तेत. [3] सत्व.

मानाभावात्, 'देहेन्द्रियबुद्धिनास्ति, न लिप्यते लोकदुःखेने' त्यादौ देहदुःखादेः प्रत्यक्षाविषयत्वस्य कथमप्यसम्भवाच्च, पृथिवीत्वपटत्वादि-विशेषविशिष्टमिथ्यात्वानुमानस्योक्तस्य निरवकाशत्वाच्च। अपिच नेह नानेत्यादौ प्रत्यक्षा[1]विषयद्वितीयादिसामान्याभावो लक्षणयैव बोद्धव्यः, मुख्यवृत्त्या द्वितीयादिसामान्याभावस्यैव बोधात्। मुख्यवृत्त्युपमर्दश्च न सावकाशतया सङ्कोचात्, किन्तु बलवत्प्रमाणबाध्यत्वात्। बलवत्त्वं च श्रुतेरेव निर्णीततात्पर्यकत्वात्। यदिचामुख्यवृत्त्या विषयान्तरे श्रुतेः सावकाशत्वं तदा प्रत्यक्षस्यापि किञ्चित्कालबाध्यत्वरूपमिथ्यात्वाविरोधि-सत्वविषयकत्वेन तत्किं न स्यादित्युक्तम्। तेन 'उपांशु चरन्ति' इत्यादौ तु तत्पदस्य दीक्षणीयात्वादिरूपेणेव तदन्यरूपेणापि बोधस्य[2] मुख्यवृत्त्यैव सम्भवात् सावकाशत्वन्यायसम्भवः। तस्मादद्वैतश्रुतेः सावकाशत्वेन सङ्कोचोक्तिरुन्मत्तप्रलापः॥

द्वादशे द्वितीये स्थितं पञ्चदशरात्रे पञ्चदशसुत्याके सत्रविशेषे प्रथ-माहोऽग्निष्टुन्नामकं नाम्नाग्नेयाग्निष्टुद्विकारत्वात्तत्राग्नेयी सुब्रह्मण्या तदुत्तरत्र्य-हस्य ज्योतिर्गौरायुरिति नामकस्य नाम्नैकाहकाण्डोक्तज्योतिरादियागविका-रत्वात् तदीया ऐन्द्री सुब्रह्मण्या, अन्येष्वेकादशसु द्वादशाहविकारत्वा-त्तदीया ऐन्द्री सुब्रह्मण्या, सुब्रह्मण्या इन्द्र आयाहीत्यादिनिगदविशेषः। तत्र सुत्याकालीनसुब्रह्मण्यापाठे तत्तद्दिनभेदेन अनुष्ठेयत्वान्न विचारः। आतिथ्यान्ते उपसत्काले च सुब्रह्मण्यापाठे सर्वसुत्यार्थे तन्त्रत्वस्यैकादशे स्थापितत्वाद्विरोधप्रसक्तौ अग्निष्टुन्नामकस्य मुख्यत्वात्तदीयाग्नेयी एव पठनीयेति प्राप्ते भूयोऽनुग्रहाय ऐन्द्र्यैव कार्येति भाष्यम्। वार्तिके तु सुब्रह्मण्याया देवताप्रकाशनार्थत्वादिन्द्रप्रकाशनेनाग्निप्रकाशनरूपोपकारा-सिद्धेरन्यत उपकारलाभे अननुष्ठानरूपस्य प्रसङ्गस्य असम्भवाद्भेदेनैव सुब्रह्मण्यापाठ इति नेदमुदाहरणम्। अतएवैकादशे तन्त्रतोक्तिरपि

[1] प्रत्यक्षादि. [2] बाधस्य.

एकदैवत्यसुब्रह्मण्याविषयेति । तस्मात्काम्येष्टिकाण्डे 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्रायप्रदात्रे पुरोडाशमेकादशकपालं, दधिमधुघृतमापोधानास्तत्संसृष्टं प्राजापत्यं पशुकामः' इति श्रुते चित्रेष्टिवद्ध्यादिद्रव्यकानेकयागा आग्नेयपुरोडाशधानायागयोराग्नेयविकारत्वादमावास्यापौर्णमास्युभयधर्मकत्वेन न वक्ष्यमाणविरोधः । ऐन्द्रस्यैन्द्राग्नविकारत्वाद्दधियागस्य दधियागविकारत्वादमावास्याधर्माः । मधुघृतोदकानां तु उपांशुयाजविकारत्वात् पौर्णमासधर्माः । तदिह पञ्चसु[1] सहक्रियमाणेषु आज्यभागयोः वार्त्रघ्नीवृथन्वतीमन्त्राणां हविरभिमर्शने चतुर्होतृपञ्चहोतृमन्त्रयोश्च विरोधः । 'वार्त्रघ्नी पौर्णमास्यामनूच्येते वृथन्वती अमावास्यायाम्' इत्याभ्यां पौर्णमास्यङ्गाज्यभागयोः वार्त्रघ्नयोरमावास्याङ्गाज्यभागयोर्वृथन्यत्योः व्यवस्थयाप्रापणात् पौर्णमास्यमावास्याविकाराङ्गाज्यभागेष्वपि तासां व्यवस्थयैव प्राप्तेः । एवं 'चतुर्होत्राप्रौर्णमासीमभिमृशेत्पञ्चहोत्रामावास्यामित्याभ्यामपि 'पृथिवी होता द्यौरध्वर्युः रुद्रोऽग्नीत् बृहस्पतिरुपवक्ता' इति चतुर्होतृमन्त्रस्य पौर्णमासीहविरभिमर्शने, 'अग्निर्होता अश्विनावध्वर्यू; त्वषाऽग्नीत् मित्र उपवक्ता' इति पञ्चहोतृमन्त्रस्य अमावास्याहविरभिमर्शने विहितत्वात्तत्तद्विकारेष्वपि तथा प्राप्तत्वात् । न चाज्यभागयोः हविरभिमर्शनस्य च सर्वानुद्दिश्य तन्त्रेणैकमन्त्रेणकरणे मन्त्रान्तरानुरोधेन पुनःकरणं युक्तम्; गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् । अत[2] ऐन्द्रदध्नोः प्रथमोक्तत्वेन मुख्यत्वात् असज्ञातविरोधित्वात्तदनुग्रहायामावास्याधर्मा वृधन्वतीपञ्चहोतृमन्त्रा एव कार्या इति प्राप्ते—मुख्यधर्मानुग्रहो यद्यपि प्रथमं बुद्धः; तथापि पाश्चात्यपर्यालोचनेन बहूनां धर्मबाधस्यायुक्तत्वात् भूयोनुग्रहानुरोधेनाल्पसङ्ख्यानां भूयोधर्मेषु प्रसङ्गित्वमिति पौर्णमासीविकाराणां भूयसां धर्मा वार्त्रघ्नीचतुर्होत्रमन्त्राः कार्याः । 'आसन्नानि हवींष्यभिमृशति' इति वच-

[1] सप्तसु. [2] अथ.

प्रामाण्यस्यान्याय्यत्वात्। तत्राद्वैतश्रुतेः व्यावहारिकप्रामाण्यसम्भवे द्वैतग्राहिप्रत्यक्षादेः तात्त्विकं प्रामाण्यं भवेत्। तदसम्भवे तु बलादेवाद्वैतश्रुतेः तात्त्विकं प्रामाण्यमिति प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं पर्यवस्यतीति कृतबुद्धयो विदांकुर्वन्तु। ननु पञ्चदशरात्रे प्रथमे अहन्यग्निष्टुन्नामके नामातिदेशेन एकाहाग्निष्टुद्धर्मभूता सुब्रह्मण्या आग्नेयी प्राप्ता। तस्या अल्पविषयायाश्चतुर्दशा-

---

नान्तरविहिताभिमन्त्रणानुवादेन चतुर्होत्रेत्यादिना मन्त्रविधानात् सकृदेव सर्वहविरभिमर्शनसम्भवात्। अविरुद्धधर्मविषये तु सर्वेषां तन्त्रता आवृत्तिः, योग्यधर्मविषये त्वावृत्तिः। इदमप्युदाहरणं उपांशुयाजस्यामावास्यायामभावपक्षे। तत्र तद्भावपक्षे द्विविधमन्त्राणामप्यविरोधात् नेदमुदाहरणमित्यन्यन्मृग्यमिति सिद्धान्तितं 'विरुद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वम्' इति सूत्रेण। तथाच तत्र यथाभाष्यरीत्या भूयोऽनुग्रहानुरोधेन उक्तमन्त्ररूपमुख्यधर्मांशे अतिदेशस्य बाधः, एवं प्रत्यक्षादिभूयोनुग्रहानुरोधेन अद्वैतश्रुतेः मुख्यार्थांशे बाध इति शङ्कते—**ननु पञ्चदशरात्र इति**। पञ्चदशयागार्थं क्रियमाण आतिथ्यान्तोपसत्कालीनसुब्रह्मण्यापाठे इत्यर्थः। अत्र प्राप्ता या आग्नेयी तस्यास्तत्र प्राप्तया ऐन्द्र्या यथा बाध इति योजना। आग्नेयीप्राप्तौ मानमाह—**प्रथम इत्यादि**। प्रथमाहविषयकेन नामातिदेशेन प्राप्तेत्यर्थः। तत्रापि हेतुः—**एकहाग्निष्टुद्धर्मभूतेति**। ऐन्द्रीप्रापकमानमाह—**चतुर्दशाहस्स्विति**। नामातिदेशेनेत्यनुषाक्तिशेषः। तथाच चतुर्दशाहस्सु प्रथमत्रयहाविषयकेन नामातिदेशेन अवशिष्टैकादशविषयकेन चोदकेन च प्राप्तया ऐन्द्र्येत्यर्थः। यथाश्रुतं त्वसङ्गतं[1] चोदनालिङ्गकातिदेशरूपेण चोदकेनावशिष्टेष्वेकादशाहस्वेवः[2]

---

[1] त्वसंशयितं. [2] दशाहस्सु.

हस्सु चोदकेन प्राप्तया ऐन्द्र्या सुब्रह्मण्यया बहुविषयया यथा बाधः, बहुबाधस्यान्याय्यत्वात् । तथा द्वैतग्राहिप्रत्यक्षतदुपजीव्यनुमानकर्मकाण्डसगुणोपासनावाक्यादिरूपबहुप्रमाणाबाधायाद्वैतवाक्यस्य प्रतीतार्थबाधः किं न स्यात्। तदुक्तं बहुप्रमाणविरोधे चैकस्याप्रामाण्यम् । दृष्टं शुक्तिरजतज्ञान इति चेन्न; दृष्टान्ते बहुविषयया बाधः अत्र बहुभिरिति वैषम्यात्, देहात्मैक्ये प्रत्यक्षानुमानशब्दाभासादिसत्त्वेऽपि देहात्मभेदबोधकस्यानन्यपरत्वेन प्राबल्यवदत्रापि अनन्यपरत्वेनाद्वैतश्रुतेः प्राबल्यात्,

---

ऐन्द्रीप्राप्तत्वादित्थमेव[1] सामञ्जस्येऽध्याहारवशेन व्याख्यानं परेषां स्वमतिव्याख्यानार्थमेवेति ध्येयम्—**द्वैतग्राहीति** । द्वैतसत्त्वग्राहीत्यर्थः । **वैषम्यादिति** । 'भूयसां सधर्मत्वम्' इति सौत्रपदद्वयेन भूयोविषयक प्रमाणानुरोधेन स्वल्पविषयकप्रमाणबाध इति न्यायशरीरम् । न त्वेकस्मिन्नेव विषये भूयसां प्रमाणानामनुरोधेन स्वल्पप्रमाणबाध इति सर्वत्रैव शब्दानुमानाभासानां भूयसां सम्भवात्, भूयोविषयकैकप्रमाणेनस्वल्पविषकबहूनां प्रमाणानां बाधाभावापत्तेश्च किञ्च श्रुत्यनुमानदृश्यत्वाद्यन्यथानुपपत्तिरूपाणां नानाविधानां मिथ्यात्वग्राहकमानानां जीवेश्वरयोरैक्यबोधकानन्तश्रुत्यनुमानार्थापत्तीनां च बहूनामनुरोधेन द्वैतसत्त्वप्रत्यक्षमेव बाधितुमुचितम् । कर्मकाण्डसगुणोपसनावाक्यादिकं तु द्वैतमिथ्यात्वविरोध्यविषयकं मिथ्यात्वनिश्चयपूर्वमेव प्रवर्तत इति तदबाधायाद्वैतवाक्यार्थबाधोक्तिः प्रलाप इति भावः । एकविषयकप्रत्यक्षतदुपजीव्यनुमानाद्याभासानां बहुत्वमात्रेण अनुग्राह्यत्वेऽतिप्रसङ्ग इत्याशयेनाह—**देहेति** । **प्राबल्यादिति** । निरवकाशत्वेनेत्यादिः । तर्हि प्रत्यक्षस्यापि निरवकाशत्वात्तात्त्विकप्रामाण्यव्यवहाराच्च

---

[1] ऐन्द्र्याः.

विद्याविद्याभेदेन विद्वदविद्वत्पुरुषभेदेन च विरोधाभावात् ॥

इति प्रत्यक्षप्राबल्यनिराकरणम्

विरोधः; तत्राह—**विद्येति**। विद्या तात्त्विकविषयकमद्वैतश्रुतिजन्यज्ञानं, अविद्या व्यावहारिकविषयकं द्वैतप्रत्यक्षादीत्यर्थः—**विद्वदिति**। अविदुष एव प्रत्यक्षादौ दोषवशात् तात्त्विकप्रामण्यव्यवहारः। निर्दोषस्य विदुषस्तु विद्यायामेव तद्व्यवहार इति नोक्तविरोध इत्यर्थः॥

अत्रेदमालोचनीयम्—विप्रतिषिद्धेत्याद्युक्ताधिकरणोत्तरं 'मुख्यं वा पूर्वचोदनालोकवत्, इत्यधिकरणे स्थितं अध्वरकल्पायामिष्टौ 'आग्नावैष्णवमेकादशकपालं निर्वपेदपराह्णे, सरस्वतीमाज्यस्य यजेत' इति श्रुतयोराद्यस्यौषध[1]द्रव्यकत्वाद्दैवत्यत्वाच्च ऐन्द्राग्नविकारः, तस्यापि वैकल्पिकद्वादशकपालद्रव्यत्वाच्च। सरस्वती तु उपांशुयाजविकारः, आज्यद्रव्यकत्वात्। तथाचाद्यस्य दार्शिकम्, द्वितीयस्य पौर्णमासिकं तन्नमित्याज्यभागमन्त्रहविरभिमर्शनमन्त्राणां पूर्ववत् विरोधे मुख्यत्वादाद्यायांदार्शिकाज्यभागादिमन्त्राः कार्याः, मुख्यत्वन्यायापवादकस्यामुख्यभूयस्त्वादेरभावादिति सिद्धान्तयित्वा[2] वार्तिकादौ मतान्तरमुक्तम्। तत्र 'विप्रतिषिद्धेत्यादि—मुख्यं वे' त्यादिसूत्राभ्यामेकाधिकरणम्। तत्रामुख्यभूयस्त्वं मुख्यत्वापवादकमिति पूर्वसूत्रेण पूर्वपक्षयित्वा मुख्यत्वमेवामुख्यभूयस्त्वापवादकं, लोके बहुभिरप्यमुख्यैर्मुख्यस्याबाधनात् प्रत्युत विपरीतदर्शनादिति। युक्तं चैतत्; भूयसां दुर्बलत्वे भूयस्त्वस्याकिञ्चित्करत्वात्, 'शतमप्यन्धानां न पश्यति' इति न्यायात्। उक्तं हि सत्प्रतिपक्षस्थले न्यायभाष्यादौ—'व्याप्तिपक्षधर्मते बलं, न तु भूयस्त्वम्' इति। दुर्बलत्वात् द्वैतसत्त्वप्रत्यक्षादेः अनिश्चितप्रामाण्यकत्वादिना श्रुतेर्नि-

---

[1] श्रुतयोराद्य (स्यौ) औषध. [2] सिद्धान्त इति.

त्यनिर्दोषत्वादनन्यपरत्वाच्च प्राबल्यमिति भूयोनुग्रहन्यायोपन्यासः परस्य निरालम्ब एव। यत्तु—"भूयोनुग्रह आवश्यकः, न ह्यल्पवैगुण्ये सम्भवति भूयोवैगुण्यं प्रयोगवचनं क्षमते, पूर्वावगतमपि कारणान्तरवशाद्बाध्यत एव" इत्यादि शास्त्रदीपिकादावुक्तम्, तदुक्तयुक्तेरप्रयोजकम्; मुख्योपकारेण भूयसामुपकृतत्वाद्वैगुण्यभावात्। अतएव उपकारांशे साधनाकाङ्क्षाविच्छेदेन भूयोधर्मांशे अतिदेशाप्रवृत्तावपि क्षत्यभावात्, भूयस्त्वादेर्बाधकत्वासम्भवाच्च। यदपि प्रथमप्रवृत्तस्य लोकेबहुभिः पश्चात्प्रवृत्तैरुपमर्दात् भूयस्त्वं मुख्यत्वबाधकमिति नव्योक्तं तच्चिन्त्यत्; दुर्बलभूयस्त्वे तथा दर्शनाभावात्। समानबलभूयोभिर्बाध्यत्वं वाच्यम्; तदपि प्रमाणस्थले वक्तुमशक्यम्, असञ्जातविरोधित्वेन मुख्यस्यबलवत्त्वात्समानबलत्त्वाभावात् सञ्जातविरोधित्वेन बाध्यत्वस्य भूयस्त्वप्यविशिष्टत्वेन भूयसामपि समानबलवत्त्वाभावात्। न ह्येकेनोपक्रमस्थेन प्रमाणेन प्रमाणानामुपसंहारस्थानां बहूनां बाधः। तस्मादमुख्यस्यैव समानबलभूयोबाध्यत्वं वाच्यम्। तत्र तूदाहरणं न यथोक्तं, प्रत्यक्षादेर्न्यूनबलत्वात्, प्रकृतानुपयोगाच्च। तस्मादुक्तन्यायस्य अत्यन्तशिथिलत्वाद्वाक्यमात्रं त्वया दृष्टान्तीकृतम्। तदपि विषममित्याशयेन 'दृष्टान्ते' इत्याद्युक्तम्। 'अपिचानन्यपरत्वेन श्रुतेः प्राबल्यात्' इत्यनेन प्रत्यक्षादेरदैतश्रुतिशेषत्वाद्दौर्बल्यम्। उक्तं हि वार्तिकादावपि—'वात्स्यायनादीनां ब्रह्मण्येव समन्वयः' इति। उक्तं च—'मुख्यंवे' त्युक्ताधिकरणोत्तरं 'अङ्गगुणविरोधे च तादर्थ्यात्, इत्यधिकरणे मुख्यानां दक्षिणीयाद्यङ्गानां प्रधानस्य जघन्यस्य च सोमयागस्य, य इष्ट्या' इत्यादिविहितपर्व[1]काले अनुष्ठानविरोधे प्रधानस्यैव तत्काले अनुष्ठानं, अङ्गनां प्रधानसाद्गुण्यार्थत्वेन तद्विरोधे अङ्गसाद्गुण्यस्यार्किञ्चित्करत्वात्, लोके प्रधानेन पश्चात्प्रवृत्तेन एकेनापि प्रथमं प्रवृत्तानां

[1] पूर्व.

प्रत्यक्षस्योपजीव्यत्वभङ्गः

ननु—उक्तन्यायैः प्रत्यक्षस्य जात्या प्राबल्याभावेऽपि उपजीव्यत्वेन प्राबल्यम्, उपजीव्यत्वं च अनुमानागमापेक्षित शेषार्थग्राहकतया। सा च क्वचित् साक्षात्, क्वचित्परम्परया-दृष्टं चापेक्षितैकदेशग्राहिणामप्युपजीव्यत्वम्। तद्विरुद्धग्रहणे तेन बाधश्च यथा घटविभुत्वानुमाने पक्षग्राहिणा अक्ष्णा, नरशिरश्शुचित्वानुमाने साध्यग्राहकेणागमेन, मनोवैभवानुमाने ज्ञानासमवाय्याधारत्वहेतुग्राहकेणानुमानेन। किमु वक्तव्यमपेक्षिताशेषग्राहिणा स्वविरुद्धग्राहकस्य बाधः; चक्षुरादेश्च शब्दतज्जन्यज्ञानप्रामाण्याद्यग्राहित्वेऽपि तद्ग्राहिश्रोत्रसाक्ष्यादिसजातीयत्वादुपजीव्यत्वम्। दृष्टं च नरशिरःकपालाशुचित्वबोधकागमस्य तच्छुचित्वानुमानोपजीव्यशुचित्वागमसजातीयत्वेन तदनुमानात् प्राबल्यम्। न चेन्द्रियमपि स्वज्ञानार्थमनुमानमुपजीव-

---

बहूनां गुणीभूतानां उपमर्ददर्शनाच्च। अत एकादि[1]दीक्षापक्षे दीक्षणीयादौ पर्वकालबाधः। द्वादशदीक्षापक्षे त्वाविरोधान्न सः अग्नीषोमीयादौ तु सर्वथाऽपि स इति अङ्गस्य प्रधानस्य च गुणानां धर्माणां विरोधे प्रधानस्य धर्मा एव कार्या इति सूत्रार्थः। तथा च प्रधानत्वाद्द्वैतश्रुतिरेवादरणीयेति भावः॥

तर्कैस्सारस्वत्तै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तद्वान्तखण्डानामक्षजातिबलं हृतम्॥

इति प्रत्यक्षप्राबल्यभङ्गः

असमवायीति। असमवायिकारणेत्यर्थः—वक्तव्यमिति। बाधक्रियाविशेणत्वान्नपुंसकं बाधइत्यनन्तरमितिशब्दोऽध्याहर्तव्यः।

[1] एकाहादि.

तीति सम एव उपजीव्योपजीवकभावः । अज्ञातकरणतया ज्ञान-जननार्थमनुमानानपेक्षणात्, अनुमानागमादिना तु ज्ञान-ज्ञानजननेति । स्वकार्ययावद्ज्ञानजनने त्यर्थः । तेन सविकल्पक-प्रत्यक्षस्यातीन्द्रियविशेषणज्ञानादिरूपानुमित्यादिसापेक्षत्वेऽपि न क्षतिः । विशेषणज्ञानत्वादिना हेतुत्वाभावमते तु यथाश्रुतमेव रम्यम् । यद्य-प्यतीन्द्रियपक्षसाध्यहेतुकानुमितिविशेषस्यप्रत्यक्षानपेक्षमेव जननम्, शब्दानुमानादिनैव व्याप्त्यादिधीसम्भवात् । न च किञ्चिद्विषयक-प्रत्यक्षत्वावच्छेदेनापि[1] नानुमित्यादिसापेक्षता, विशेषणधीत्वादिना हेतु-त्वानङ्गीकात् । किञ्चिद्विषयकानुमितित्वाद्यवच्छेदेन तु प्रत्यक्षसापे-क्षता, ऐन्द्रियविषयकानुमित्यादौ तत्सम्भवात् । तथाच किञ्चिद्विषयक-यज्जातीयप्रमासामान्यं यज्जातीयप्रमोपजीवकं तज्जातीयं तज्जातीयापेक्षया दुर्बलम्, अदृष्टाद्वारकोपजीवकत्वनिवेशात्, प्रत्यक्षस्य स्वजनकचक्षुरादि-जनकादृष्टप्रयोजकानुमानादिसापेक्षत्वेऽपि न क्षतिः— इति वाच्यम्; चक्षुर्घर्षणादाविष्टसाधनत्वानुमितिप्रयोज्यचक्षुषैव यस्य व्यक्तिविशेषस्य यच्चाक्षुषसामान्यं जातं तस्यानुमित्युपजीवकत्वात्, सविषयकान्यदद्वारी-कृत्य उपजीवकत्वनिवेशेऽपि विशुद्धमातापितृजन्यत्वादिपरोक्षसापेक्षे ब्राह्मणत्वादिप्रत्यक्षे तादृशोपजीवकत्वसम्भवात् । न चानुमित्यादिसामान्ये प्रमात्वेन ज्ञायमानज्ञानस्य हेतुत्वात् प्रमात्वग्राहकसाक्षिण उपजीव्यत्वेन तज्जातीयत्वेन चाक्षुषादिकं प्रबलमिति वाच्यम्, आवरणविषयतान-वच्छेदकप्रामाण्यकचाक्षुषादिज्ञातस्य हेतुत्वेन साक्षिणोऽनुपजीव्यत्वात् । अस्तु वाऽनुमित्यादौ जनकतया तदीयाप्रामात्वशङ्कानिरासकतया तत्स्व-रूपवत्त्वम् । शङ्कानिरासकतया च[2] साक्ष्युपजीव्यः ; तावतापि तज्जा-तीयत्वेन प्राबल्यं दुर्वचम् । तज्जातीयत्वं हि न तद्वृत्तिप्रत्यक्षत्व[3] जातिमत्त्वं ; तस्यास्मान् प्रत्यलकित्वेन पूर्वोक्तत्वात् । नाप्यपरोक्षभ्रम-

[1] प्रत्यक्षावच्छेदेनापि. [2] न. [3] प्रत्यक्षत्वादि.

जननार्थमेव तदपेक्षणादिति विशेषादिति चेन्न—उपजीव्याविरोधात्। तथाहि–यत्स्वरूपमुजीव्यते, तन्न बाध्यते। बाध्यते च त्तात्त्विकत्वाकारः। स च नोपजीव्यते, कारणत्वे तस्याप्रवेशात्।

निवर्तकत्वं, तस्य साक्षिण्यभात्, अज्ञाननिवृत्तिद्वारकत्वेन प्रमायामेव भा(वा)नात्। नाप्यपरोक्षधीप्रतिबन्धकत्वम्; तस्य प्रमायामपि सिद्धान्ते अनङ्गीकारात्, विपरीतनिश्चये सति अज्ञानाभावादेव भ्रमानुत्पादात् दोषाणां प्रतिबन्धकत्वादिना प्रमानुत्पादात्, परोक्षधीप्रतिबन्धकत्वरूपेण अनुमितेरपि प्रत्यक्षप्रमोपजीव्यसाक्षिसजातीयत्वसम्भवाच्च, साक्षिणो भ्रमप्रमासाधारणत्वेन तज्जातीयत्वेन प्राबल्यासम्भमाच्च। किञ्च उपजीव्यजातीयत्वमात्रेण न प्राबल्यम्, यदा हि नोपजीव्यत्वेन प्राबल्यं, किन्तु परीक्षितत्वेनेति पर एव वक्ष्यति, तदा परीक्षीतमुपजीव्यजातीयं प्रबलं वाच्यम्। न त्वपरीक्षितम्। तथाच परीक्षितप्रत्यक्षत्वेन प्राबल्ये न नः क्षतिः। अपि च उपजीव्यजातीयत्वेन न प्राबल्यं क्वापि क्वसम्-अशुचित्वबोधकागमस्य आगमत्वेनैव प्राबल्यसम्भवादित्यादिदूषणानि सन्ति; तथापि स्फुटत्वात्तान्युपेक्ष्य वाचस्पत्याद्युक्तरीत्या समाधत्ते—**नोपजीव्येति। यत्स्वरूपमिति।** व्यवहारिकप्रामाण्यमित्यर्थः—**तात्त्विकाकारः।** त्रिकालाबाध्यविषयकत्वम्—**अप्रवेशादिति।** व्यावहारिकप्रमात्वेनैव प्रत्यक्षस्यागमानुमानजन्यधीकारणत्वं, न तु त्रिकालाबाध्यविषयकत्वेन। व्यावहारिकप्रमात्वं चाद्वैतश्रुत्यनुमानजन्यज्ञानपूर्वं कालाबाध्यविषयकत्वम्। तस्य चाद्वैतश्रुत्यनुमानजन्यज्ञानेन स्वकाले द्वैतमात्रबाधकेनापि[1] नोपमर्द इति भावः। प्रमात्वेनापि न कारणत्वमिति तु किञ्चेत्यादिना वक्ष्यति। ननु पूर्वकालावच्छिन्नसत्त्वं

---

[1] बोधकेनापि.

तदुक्तम्—

पूर्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ ।
हेतुतत्त्ववहिर्भूतसत्त्वासत्त्वकथा वृथा ॥

इति किञ्चापेक्षितग्राहित्वमात्रेण चेदुपजीव्यता, तया च बाधकत्वम् । तदपेक्षितप्रतियोगिग्राहकत्वे 'इदं रजतमि'ति भ्रमस्य बाधोपजीव्यत्वात् कथं नेदं रजतमिति बाधबुद्धिस्तद्विरुद्धा उदीयात् । अथ निषेध्यार्थसमर्पकतया प्रतियोगिज्ञानत्वेन तस्योपजीव्यत्वेऽपि तत्प्रामाण्यं नोपजीव्यम्; न हि प्रतियोगिप्रमात्वेनाभावज्ञानजनकता; गौरवात्, प्रतियोगिभ्रमादप्यभावज्ञानदर्शनाच्च । किन्तु तद्ज्ञानत्वेनैव; लाघवात् । अतस्तद्विरुद्धविषयकं ज्ञानमुदीयादेवेति ब्रूषे, तुल्यमिदं प्रकृतेऽपि पक्षज्ञानत्वादिना कारणता, न तु तत्प्रमात्वादिना-

---

कारणत्वं मिथ्यात्वविरुद्धं; तत्राह—**तदुक्तमिति** । खण्डन इति शेषः—**पूर्वसम्बन्धनियम इति** । अनन्यथासिद्धत्वे सति कार्याव्यवहितप्राक्कालावच्छेदेन कार्यव्यापकत्वे इत्यर्थः । अन्यथासिद्धव्यभिचारिणोर्वारणायोक्तरूपमवश्यं हेतुत्वं त्वयापि वाच्यम् । सत्त्वं तु न तत्र निवेश्यते, व्यर्थत्वादित्याह—**तुल्य इत्यादि** । **प्रमात्वादिनापीति** । अप्रामाण्याशङ्कास्पदज्ञानं तु न निश्चय इति न तस्मात्कार्यापत्तिः । अथवा अनावृतप्रमात्वेन हेतुत्वेऽपि न क्षतिः; प्रातीतिकधीसाधारणस्य मिथ्यात्वेनाज्ञातविषयकत्वरूपप्रमात्वस्यैव तथात्वस्वीकारेण श्रुत्याद्युपजीव्यप्रत्यक्षेणावृतस्य[1] श्रुत्यादिजन्यज्ञानात्पूर्वमनपायात् । एवंच तत्प्रामाण्यं नोपजीव्यमित्यस्य पूर्ववाक्यस्य तदीयं भ्रमव्यावृत्तं प्रामाण्यं

---

[1] प्रत्यक्षेनावृतस्य.

पीति । अथ यत्प्रामाण्यं स्वरूपसिद्ध्यर्थं अपवादनिरासार्थं च यत्प्रामाण्यमनुमजीवति; तत्तस्योपजीव्यम् । यथा स्मृतेरनुभवः न च रजतभ्रमस्तथेति चेत् तर्हि व्याप्तिधियोऽपि नानुमित्युपजीव्यत्वं स्यात्, लिङ्गाभासादपि वह्निमति वह्निभ्रमादर्शनात् । ननु येन विना यस्योत्थानं नास्ति, तत्तस्योपजीव्यमित्येव वक्तव्यम् । तथाच रजतभ्रमस्योपजीव्यत्वमस्त्येव, न तु प्राबल्यम् । न ह्युपजीव्यत्वमात्रेण प्राबल्यम्; किन्तु परीक्षिततया परीक्षा च सजातीयविजातीयसंवादविसंवादाभावरूपा । न च तौ रजतभ्रमे स्तः; प्रकृते चाक्षुषस्य परीक्षितत्वेन प्राबल्यम्

नोपजीव्यमित्यर्थः—**यत्प्रामाण्यं**। यद्धीनिष्ठप्रामाण्यम्—**अपवादेति**। स्वाभावधीरित्यर्थः। अबाधितविषयकानुभवेन अबाधितविषयिकैव स्मृतिर्जायते, अनुभूतमात्रवियकत्वादिति स्मृतेरबाधितविषयकत्वरूपं[1] प्रामाण्यमनुभवीयं तदधीनम् अतएव अबाधितविषयकधीजन्यस्मृतित्वरूपविशेषदर्शनेनाबाधितविषयकत्वाभावधीनिरास इति स्मृतेः स्वजनकधीरुपजीव्येत्याह—**यथा स्मृतेरिति। दर्शनादिति**। परामर्शादिप्रमात्वं विनाप्यनुमित्यादेः प्रमात्वस्वरूपस्य सिद्धेः। अतएव प्रमापरामर्शादिजन्यत्वज्ञानस्य[2] अनुमित्यादौ प्रमात्वाभावधीनिरासं प्रति सर्वत्रा[3]प्रयोजकत्वात् प्रमापरामर्शादिजन्यस्य गन्धप्रागभाववद्घटो गन्धवानित्यनुमित्यादेः प्रमात्वाभावेन प्रमाजन्यानुमितित्वादेः प्रमात्वव्याभिचारित्वाच्चापवादानिरासकत्वात् प्रत्यक्षस्य परामर्शादेः नानुमित्यादावुक्तोपजीव्यतेति भावः—**सजातीयेत्यादि**। सजातीयः संवादः स्वसमानविषयकप्रमात्वेन निश्चितं ज्ञानान्तरं, विजातीयः संवादः स्वसमानविषयकप्रवृत्त्यादिरूपं कार्यं, विरुद्धविषयकज्ञानं सजातीयविसंवादः, विरुद्धविषयकप्रवृत्त्यादि-

---

[1] त्वादिरूपं. [2] जन्यस्य ज्ञानस्य. [3] सर्वत्र.

अस्ति हि 'सन् घटः' इति विशेषदर्शनजन्यज्ञानानन्तरं घटार्थक्रियाप्रत्यक्षे क्लृप्तदूरादिदोषाभावाच्च । एवमेव जीवेशाभेदश्रुतौ निषेध्यार्पकभेदश्रुतिः, साक्षिप्रत्यक्षं चादोषत्वात् परीक्षितमिति तदबाध्यम् । [1]एवमेव च दोषाभावादिज्ञानरूपपरीक्षायामपि अनाश्वासे वेदे पौरुषेयत्वाभावज्ञाने त्वदुक्तानुमाने च योग्यानुपलब्ध्यादिना हेत्वाभासादिराहित्यज्ञाने ब्रह्ममीमांसायां प्रत्यधिकरणं सिद्धान्त्यभिप्रेतार्थे उपक्रमाद्यानुगुण्यज्ञाने च अनाश्वासः स्यादिति प्रमाणतदाभासव्यवस्था न स्यात्—इति; परीक्षा हि प्रवृत्तिसंवादविसंवादाभावदोषाभावादिरूपा। तया च स्वसमानदेशकालीनविषयाबाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यते धूमेन स्वसमानदेशकालीन

कार्यं विजातीयविसंवादः, ज्ञानान्तरं घठार्थक्रियेति पाठः । दूष्यन्यायामृतग्रन्थे तथा सत्त्वात् । ज्ञानानन्तरं घयार्थक्रियेति पाठेऽपि ज्ञानरूपसजातीयसंवादानन्तरं विजातीयसंवादरूपजलाहरणादिरूपार्थक्रियेत्यर्थः । प्रमात्वेन निश्चितत्वलाभाय ज्ञाने जन्यान्तं विशेषणं विसंवादाभावेऽपि वर्तते । श्रुत्यादेरन्यविषयत्वादिकल्पनादित्यभिमानः । चन्द्रप्रादेशिकत्वादौ सजातीयविजातीयविसंवादव्यापको दूरत्वादिदोषः, तदभावादुक्तप्रत्यक्षे उक्तविसंवादाभाव इत्याशयेनाह—**प्रत्यक्षे क्लृप्तेति** । ननु दूरत्वाद्यागन्तुकदोषाभावेऽपि अविद्यारागपापविशेषरूपदोषयोगादुक्तप्रत्यक्षादीनां कथं परीक्षितत्वं? प्रसिद्धं हि श्रुत्यादौ तेषां दोषत्वं—"न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृताः, अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति, इतिनुकामयमानः आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा कामरूपेण, विवदिषन्ति यज्ञेन, 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः, जनैः स्वकर्मस्तिमितात्मनिश्चयैः" इत्यादौ, तत्राह—**एवमेव च दोषेति । कालीनेति । प्रामाण्यस्येति च ।** विषयाबाध्यत्वे

वह्निरिव। तथा च व्यवहारदशामात्रावाध्यत्वं देहात्मैक्यसाधारणं परीक्षितप्रमाणे व्यवस्थितमिति कथमत्यन्ताबाध्यत्वाभावग्राहकागमानुमानयोः प्रवृत्तिः न स्यात्? तस्माद्विश्वासप्रमाणतदाभासव्यवस्था जीवेशभेदादिकं च व्यावहारिकमित्युपपन्नमेव सर्वं जगन्मिथ्येति। ननु—प्रत्यक्षाप्रामाण्ये तात्सिद्धस्य व्याप्त्यादेर्बाधेनानुमेयादेः अनुमित्यादिप्रामाण्यस्य च बाधः अनुमेयादेर्व्याप्त्यादिना अनुमितिप्रामाण्यादिना च समानयोगक्षेमत्वात्। अन्यथा प्रातिभासिकव्याप्त्यादिमता बाष्पाध्यस्तधूमेन तात्त्विको व्यावहारिको वाऽग्निः व्यावहारिकव्याप्त्यादिमता धूमेन तात्त्विकोऽग्निः व्यावहारिकेणाबाधेन विरुद्धधर्माधिकरणत्वेन च विश्वस्य

अन्वितं देशः तत्तद्विषयरूपः। तथाच परीक्षया स्वदेशस्वकालकालीनं[1] प्रामाण्यघटकमबाध्यत्वं व्यवस्थाप्यत इत्यर्थः। **वह्निरिवेति।** यथोदयनादिमते धूमलिङ्गकवह्न्यनुमितौ धूमकालीनवह्निर्विषयः तथा परीक्षालिङ्गकप्रामाण्यघटकाबाध्यत्वानुमितौ परीक्षाकालीनमबाध्यत्वमित्यर्थः। अथवा सजातीयसंवादविसंवादावबाधितविषयकत्वेन निश्चितज्ञानस्य समानविषयकत्वविरुद्धविषयकत्वरूपौ। तत्र बाधितत्वसामान्याभावस्याशक्यग्रहत्वेन उक्तत्वात् तत्तत्कालीनबाधितत्वाभावो निवेश्यः। तथाच तद्घटितेन संवादेन तद्घटितमेवानुमेयम्। न तु बाधितत्वसामान्याभावघटितं, अनुमितिविधेयतावच्छेदकस्यैव व्याप्तिनिरूपकतावच्छेदकत्वात्। व्यभिचर्यमाणत्वादशक्यग्रहत्वाच्च। एवं तत्तत्काले तथा निश्चितं यदद्वैतश्रुत्या जघन्य[2] ज्ञानं तद्विरुद्धविषयकत्वाभावेना प्युक्तप्रमात्वं अनुमेयं तत्तत्काले दोषत्वेन गृह्यमाणं यत् तदभावेनापि तदेवानुमेयमित्यर्थः। **प्रमाणे** प्रमाणविषये। **व्यावहारिकेणेति।** व्यावहारिकेण अबाधेन विश्वस्य तात्त्विकं सत्त्वम्। व्यावहारिकेण

---

[1] स्वदेशकालगतं. [2] श्रुत्याद्यजन्यं.

जीवेशभेदस्य च तात्त्विकं सत्त्वं सिद्ध्येत्—इति चेन्न; एतावता हि व्याप्त्यादिसमानसत्ताकमनुमेयं सिद्ध्यत्वित्यापत्तेः फलितोऽर्थः। स चास्माकमिष्ट एव। न हि ब्रह्मभिन्नं क्वचिदत्यन्ताबाध्यमस्ति न चायमनुमेयादेः व्याप्त्यादिना समसत्ताकत्वनियमोऽप्यस्ति; व्यभिचारिणापि लिङ्गेन साध्यवति पक्षे अनुमितिप्रमादर्शनात्, ध्वनिधर्महृस्वत्वदीर्घत्वादिविशिष्टत्वेन मिथ्याभूतैरपि नित्यैर्विभुभिर्वर्णैः सत्या शाब्दप्रमितिः क्रियत इति मीमांसकैरभ्युपगमात्, गन्धप्रागभावावच्छिन्ने घटे तात्त्विकव्याप्त्यादिमतापि पृथिवीत्वेनातात्त्विकगन्धानुमितिदर्शनात्, प्रतिबिम्बेन च बिम्बानुमितिदर्शनात्। न च तत्रापि बिम्बरहितावृत्तिरूपा व्याप्तिस्तात्त्विक्येवेति वाच्यम्; एवंसत्यवृत्तिगगना-

---

विरुद्धधर्मवत्त्वेन जीवेशभेदस्य तात्त्विकं सत्त्वमित्यर्थः। वर्णानां ह्रस्वत्वाद्यभावे हेतुः—**नित्यैर्विभुभिरिति**। आकाशादिवत्. नित्यैः देशकालानवच्छिन्नैश्चेत्यर्थः। अकारस्य ह्रस्वत्वे सर्वदा सर्वदेशे तथोपलभ्येत, तस्यैकत्वात्। **मिथ्याभूतैः** बाधितत्वयोग्यैः। **क्रियते** प्रयुज्यते वर्णज्ञानत्वेन कारणत्वात्। **अतात्त्विकेति**। विशिष्टघटस्य केवलघटातिरेकात्तत्र गन्धोऽतात्त्विकः, तस्य तदनतिरेके प्रागभावस्य विशेषणत्वात् तत्र कालिकसम्बन्धेन प्रकारीभूतो गन्धोऽतात्त्विकः यदिच गन्धांशे प्रागभाव एव विशेषणमुच्यते, तथापि गन्धे प्रागभावस्येव प्रागभावेऽपि गन्धसंसर्गस्यारोपो वाच्यः; परस्पराध्यासात्। तथा च संसृष्टरूपेणातात्त्विक[1] एव गन्ध इति भावः। ननु—प्रयुक्तत्वं क्षेमसाधारणजन्यता, अन्यथा गगनाभावो बिम्बाभावादिति[2] व्यवह्रियत इत्याशङ्क्य यावतीषु स्वेतरव्यक्तिषु सतीषु यत्सत्त्वे उत्तरक्षणे यत्सत्वं तावतीषु सतीष्वपि तदभावे उत्तरक्षणे अवश्यं तदभाव

---

[1] तात्त्विक. [2] बिम्बाभाव इति.

देरपि व्याप्यतापत्तेः । न च तत्र बिम्बपूर्वकत्वमेवानुमीयते, बिम्बव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपेणाप्रातिभासिकेन हेतुनेति वाच्यम्; प्रयुक्तत्वं हि न तज्जनकत्वजन्यत्वादिरूपम्; व्यतिरेकयोः परस्परं तदभावात् । किन्तु व्याप्यव्यापकभावः । तथाच बिम्बव्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वं हेतुः । स चाकाशादौ व्यभिचार्येव । तस्मात्तत्र प्रतिबिम्बेनैव बिम्बानुमानम्; अनुमेयस्य लिङ्गव्याप्यत्वादिसमानसत्ताकत्वनियमस्यापास्तत्वात् । एतेन शब्देऽपि योग्यतासमानसत्ताकेन शब्दार्थेन भवितव्यम् । योग्यतावाक्यार्थयोः समानसत्ताकत्वनियमादिति कथं वेदान्तवाक्यार्थयोः समानसत्ताकत्वनियमादिति कथं वेदान्तवाक्यार्थो योग्यताबाधेऽप्यबाधितः स्यादिति परास्तम् । वेदान्तवाक्ये अखण्डार्थरूपवाक्यार्थाबाधरूपायाः योग्यतायाः अप्यबाधाच्च । न च तथापि वेदान्ततद्ज्ञानप्रामाण्यमिथ्यात्वे कथं तात्त्विकाद्वैतसिद्धिरिति वाच्यम्; शब्दतद्ज्ञानतात्त्विकत्वं हि न विषयतात्त्विकत्वे तन्त्रम्; इदं रजतमित्यनाप्तवाक्यस्य तज्जन्यभ्रमस्य च त्वन्मते तात्त्विकत्वेऽपि तद्विषयस्यातात्त्विकत्वात् ।

इति रीत्या क्षेमसाधारणजन्यत्वस्य प्रतिबिम्बाभावनिष्ठस्य प्रतिबिम्बघटितत्वेन अतात्त्विकत्वावश्यकत्वात् प्रतिबिम्बेतरभागस्य व्यर्थत्वाच्च । प्रतिबिम्बमेव बिम्बपूर्वकत्वेऽपि तादात्म्येन हेतुरित्याशयेन आह— **तस्मादिति** । अनुमेयमनुमितिविधेयतावच्छेदकं यदिच क्षेमसाधारणं जन्यत्वमखण्डं, तथापि प्रतिबिम्बा[1]भावत्वरूपावच्छेदकमिथ्यात्वात्तदपि मिथ्या, तस्य स्वसमानसत्ताकधर्मावच्छिन्नत्वनियमात् । अतएव शुक्तिरूप्याभावनिष्ठाज्ञानाभावजन्यतापि मिथ्या। चैतन्यस्य तु घटाद्यवच्छिन्नत्वं न स्वाभाविकमिति भावः **तद्ज्ञानेति**। तज्जन्यज्ञानेत्यर्थः । **तन्त्रं**

---

[1] प्रतिबिम्ब.

न च ज्ञानप्रामाण्यस्य मिथ्यात्वे विषयस्यापि मिथ्यात्वं शुक्तिरूप्यज्ञाने दृष्टमितिप्रकृतेऽपिज्ञानप्रामाण्यमिथ्यात्वे विषयस्यापि मिथ्यात्वं स्यादिति वाच्यम्; प्रामाण्यमिथ्यात्वं हि न विषयमिथ्यात्वे प्रयोजकम्; भ्रमप्रमाबहिर्भूते निर्विकल्पके विषयबाधाभावात्। किन्तु तदभाववति तत्प्रकारकत्वादिरूपमप्रामाण्यमेव तथा। तच्च प्रकृते नास्त्येव। न चार्थाबाधरूपप्रामाण्यस्य मिथ्यात्वादर्थस्यापि मिथ्यात्वं स्यादिति वाच्यम्। अबाधितार्थविषयत्वं हि यत् प्रामाण्यं तस्य मिथ्यात्वम्। प्रकृते नार्थाबाधात् तद्बाधकप्रमाणासम्भवात् तस्य सर्वबाधावधित्वात्। किन्तु तद्विषयत्वरूपसम्बन्धबाधात्तथा। तथाचाबाधितार्थविषयत्वरूपप्रामाण्यमिथ्यात्वेऽपि नार्थो मिथ्या। विशिष्टस्यैकांशमिथ्यात्वेऽप्यपरांशसत्यत्वात्, यथा दण्डबाधनिबन्धनदण्डिपुरुषबाधेऽपि पुरुषो न बाधित एवेति॥

इति प्रत्यक्षस्योपजीव्यत्वभङ्गः.

समव्यापकम्—**प्रयोजकं** व्याप्यम्। **भ्रमप्रमाबहिर्भूत इति**। तार्किकादिरीत्या स्वमते त्वबाधितविषयकत्वे प्रमात्वं तत्रास्त्येव। नन्वबाधितविषयकत्वरूपं प्रमात्वं यत्र मिथ्या तद्विषयकत्वं मिथ्यात्वव्याप्यमिति शङ्कते—**न चार्थेति। रूपेति**। घटितेत्यर्थः। **सर्वबाधावधित्वात्**। सर्वबाधकप्रमाविषयत्वात्। तद्बाधे तदृशप्रमा अनुपपन्नेति भावः। **सत्यत्वादिति**। त्वन्मतेऽपि सर्वदेशकालगताभावस्य सत्यत्वेऽपि तत्प्रतियोगिनः शुक्तिरूप्यादेः मिथ्यात्वादिति भावः। ननु ज्ञानविषयत्वविशिष्ट[1]रूपेण ब्रह्म मिथ्येत्याशङ्क्य, तथापि केवलरूपेण न मिथ्येति सदृष्टान्तमाह—**यथेति**। यत्तु—"अनुमेयं व्याप्तयादिसमसत्ताकमेव[2]। अन्यथा त्वदनुमेयमिथ्यात्वमतात्त्विकं स्यात्। उक्त-

[1] विशिष्टत्व. [2] व्याप्तयादिविषयाबाधसमसत्ताकमेव.

नियमे व्यभिचारिलिङ्गकप्रमानुमितौ व्यभिचारोक्तिरयुक्ता; व्याप्त्यादिशब्देन विषयाबाधस्योक्तत्वात् । तथाचानुमेयमात्रस्य तत्समसत्ता; अस्त्येवेत्यव्यभिचारात् । गगनस्य व्याप्यत्वापत्तिस्तु इष्टैव; पक्षधर्मताधीविलम्बादेवानुमित्यभावात् । ध्वनिधर्मेत्याद्ययुक्तं; दीर्घत्वादिज्ञानस्यैव कारणत्वात्, तार्किकादिमते दीर्घत्वादेर्वर्णेषु सत्यत्वाच्च[1] । अखण्डवाक्यार्थेत्याद्ययुक्तम्; संसर्गस्यैव वाक्यार्थत्वात् । ज्ञानप्रामाण्यं मिथ्येत्ययुक्तं; मिथ्यात्वानुमितेरपि मिथ्यात्वांशे प्रामाण्ये मिथ्यात्वापत्तेः, जरद्गवादिवाक्यस्यापि मिथ्यात्वांशे प्रमात्वापत्तेश्च । यत्स्वरूपमुपजीव्यते तन्न बाध्यत इत्याद्ययुक्तम्; विषयाबाधस्यातात्त्विकत्वेऽनुमित्यादेरप्रामाण्यापत्तेः । अपेक्षितग्राहित्वमात्रेण चेदुपजीव्यतेत्याद्ययुक्तं; यद्धी प्रमात्वं यद्धीप्रमात्वे प्रयोजकं सा तस्या उपजीव्येत्यत्रादोषात् । प्रयोजकत्वं च योगक्षेमसाधारणम् । तत्र योगांशः स्वरूपसिद्ध्यर्थमित्यनेनोक्तः । क्षेमांशस्तु अपवादनिरासार्थमित्यनेनेति । परीक्षया स्वसमानदेशकालीनो विषयाबाधः सिद्ध्यतीत्याद्ययुक्तम्; मिथ्यात्वानुमितेः स्वदेशकालयोरपि घटादिनिषेधविषयकत्वेन उपजीव्यविरोधापरिहारात् । मिथ्यात्वप्रमाणेन घटादिस्वरूपस्यापि बाध्यमानत्वेन धर्मिग्राहकमानबाधात्" इत्यादि पलपितं, तन्न; मिथ्यात्वस्यातात्त्विकस्यैवानुमेयत्वात् । व्याप्त्यादिपदेन विषयाबाधोक्तिस्तु तवैवोचिता; प्रतिवादिना विचारे आधुनिकलक्षणया पण्डितेन शब्दाप्रयोगात् । विषयाबाधशब्दं प्रायः त्वद्गुरुः प्रस्मृतवान् । अन्यथा शतवारं व्याप्त्यादीति लाक्षणिकशब्दं न ब्रूयात् । किंच विषयाबाधरूपप्रामाण्यमिथ्यात्वे विषयो मिथ्या स्यादिति पश्चात् शङ्कितवान् । तदपि प्रायः विस्मृत्या । अन्यथा पूर्वोक्तं वदन्नुन्मत्तकल्पः स्यात् । अपि च विषयाबाधसमसत्ताकमनुमेयमस्मत्सम्मतमेव । गगनादेर्व्याप्यत्वं तु न युक्तम् । यद्यपि हि गगनादेरवृत्तित्वधीकाले व्याप्यतया

[1] असत्यत्वाच्च.

गगनादिप्रकारकधीः पक्षे न जायते । तत्रावृत्तत्वधीः या तस्याः तत्प्रकारकधीविरोधित्वस्य क्लृप्तत्वात्। तथापि व्याप्यगगनादिविशेष्यक-पक्षप्रकारकज्ञानादनुमित्युपपत्तिः । न च तद्वारणाय व्याप्यप्रकारकधीरे-वानुमितिहेतुर्वाच्येति वाच्यम्; व्याप्यापेक्षया पक्षस्य लघुत्वेन पक्ष-प्रकारकनिश्चयत्वेनैव हेतुत्वात्। अन्यथा गुरुभूतव्याप्याभावाप्रकार-त्वादिगर्भनिश्चयत्वेन हेतुत्वे गौरवात्, अवृत्तित्वज्ञानाभावकाले व्याप्य-प्रकारकज्ञानसामग्र्या असत्त्वे गगनादिव्याप्यविशेष्यकज्ञानादनुमितेरप-लापापत्तेश्च। न च व्याप्यगगनादिविशेष्यकज्ञानादनुमितिरिष्टेति वाच्यम्; अवृत्तित्वेन ज्ञायमानहेतुकानुमितिस्वीकारे सर्वत्रैव गगनादिहेतुकानुमि-त्यापत्तेः। साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानासम्भवात्। अपिच पक्ष-धर्मतापि गगनादौ कुतो न ज्ञायते? अवृत्तित्वाधियः प्रतिबन्धकत्वा-दिति चेन्न; तादृशधीसत्त्वेपि गगनीयो घट इत्यादिधीदर्शनात् तस्या-सम्भवात्; अन्यथा वृत्तिमत्त्वसामान्याभावधीः तत्प्रकारकज्ञान इव स्वामित्वादिसम्बन्धो धनादिवृत्त्यनवच्छेदक इति धीरप्यौचित्येन तत्सम्बन्धेन धनादिप्रकारकज्ञाने प्रतिबन्धिका स्यात् । तथाच तत्काले धनादिलिङ्गकानुमितिलोपापत्तिः । किंचोक्तव्याप्त्यादरे गग-नादौ जगद्व्याप्यत्वं व्यवह्रीयेत। इष्टापत्तौ च अनुभवविरोधः। अत-एव गगनादौ व्याप्यत्वमुक्त्वा वृत्तिमत्त्वं हि विशेषणमिति दीधित्यादा-वुक्तम्। ध्वनिर्धर्मेत्यादि युक्तं; दीर्घत्वादेर्ज्ञानस्य कारणत्वेऽपि यथा कारणीभूतधीविषयदीर्घत्वादिविषय[1]सत्ताकं शाब्दबोधस्य विषयप्रामा-ण्यम्, तथा व्याप्त्यादिविषयसत्ताक[2] मनुमेयादीत्यत्र तात्पर्ये बाध-काभावात्। मीमांसकमते दृष्टान्ते ताकिकोक्तिस्तु शोभते। वेदान्त-वाक्ये ससर्गो नार्थ इति तु वक्ष्यते। मिथ्यात्वानुमितिप्रामाण्यस्य व्याव-हारिकत्वात् मिथ्यात्वमिष्टमेव। जरद्गवादिवाक्यस्य मिथ्यात्वप्रामाण्यं

[1] विषम. [2] मसत्ताक.

प्रत्यक्षस्यानुमानबाध्यत्वविचारः

किञ्च विपक्षबाधकसाचिवमनुमानमपि प्रत्यक्षबाधकम्। नन्वेवमपि "औदुम्बरीं स्पृष्ट्वोद्गायेत्," ऐन्द्र्या गार्हपत्यमुपतिष्ठते, शरमयं बर्हिर्भवति" इति श्रुतित्रयग्राहि प्रत्यक्षं यथाक्रमं 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिरूपेण

न व्यावहारिकम्। यत्स्वरूपमित्यादिकं युक्तमेव; अनुमित्यादेस्तात्त्विकप्रामाण्याभावस्येष्टत्वात्। स्वरूपसिद्ध्यर्थमित्यादेः अर्थवर्णनं तु शोभते; अनुभवादिप्रामाण्यस्य स्मृत्यादिप्रामाण्यं प्रति योगक्षेमसाधारणकारणत्वे मानाभावात्, अस्मदुक्तरीत्या स्वरूपसिद्ध्यादिशब्दार्थसम्भवात्। परीक्षयेत्याद्यपि युक्तम्; मिथ्यात्वानुमितेः घटादिनिषेधस्य बोधक[1]त्वेऽपि तस्य तात्त्विकत्वेन अतात्त्विकघटादिस्वरूपज्ञानस्य उपजीव्यस्याविरोधात्, घटादिदेशकालयोस्तत्समानसत्ताकतन्निषेधबोधन एव[2] विरोधात्। अन्यथा रूप्यादिमिथ्यात्वबोधेऽपि तदापत्तेः। मिथ्यात्वग्राहकमानेन घटादिज्ञानस्योपजीव्यत्वेऽपि तदीयतात्त्विकप्रामाण्यस्य अनुपजीव्यत्वात्, उपजीव्यस्यापि परीक्षितस्यैव प्राबल्यात्। परीक्षायाः[3] स्वसमानकालीनाबाध्यमात्रव्यवस्थापकत्वस्य त्वदीयरोदनसहस्रेणाप्यपारिहारादिति। तस्माद्यत्किञ्चिदेव प्रलपन् स्वकीयानामेव मान्योऽसि॥

सारस्वत्तैस्तर्करत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तखण्डानामखण्ड्यक्षोपजीव्यता॥

इति प्रत्यक्षस्योपजीव्यत्वभङ्गः.

औदम्बरीम्। उदुम्बरवृक्षविकाररूपां स्थूणाम्। **ऐन्द्र्येति**। 'कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इत्यादिऋचेत्यर्थः। **गार्हपत्यं** त्रेतान्तर्गतमग्निविशेषम्। **वेष्टनश्रुत्यनुमानेनेति**। ज्ञाय-

---

[1] बाधक. [2] तन्निषेधत एव. [3] परीक्षया.

सर्ववेष्टनश्रुत्यनुमानेन 'कदाचन स्तरीरसि नैन्द्र सश्चसि दाशुषे' इति मन्त्रसामर्थ्यलक्षणेन इन्द्रशेषत्वश्रुत्यनुमानेन चोदनालिङ्ग-

---

मानहेतोः अनुमानत्वमते। हेतुज्ञानस्यानुमानत्त्वमतेतु **स्मृतिरूपेणेत्यस्य**। स्मृतिविषयकेणेत्यर्थः । औदुम्बरीसर्ववेष्टनस्मृतिः तादृशश्रुतिमूलिका, बाधकाभावे सति शिष्टपरिगृहीतस्मृतित्वात् ; या बाधकाभावे सति यदर्थक शिष्टपरिगृहीतस्मृतिः, सा तदर्थकश्रुतिमूलिका, यथा प्रत्यक्षश्रुतिमूलकस्मृतिरित्यनुमानरीतिः । **नेन्द्रेत्यादि** । कदाचनेत्यादिमन्त्रगतेनेन्द्रेत्यादिभागस्थेन्द्रादिपदानामिन्द्रादिप्रकाशनसामर्थ्यलक्षणेनेत्यर्थः । **शेषत्वश्रुतीति** । उक्तमन्त्रस्य उक्तसामर्थ्यम् उक्तमन्त्रस्य इन्द्रशेषत्वबोधकश्रुतियुक्तम्, उक्तसामर्थ्यत्वात् ; यद्यन्निष्ठं यदर्थप्रकाशनसामर्थ्यं तत्तन्निष्ठस्य तदर्थप्रकाशनशेषत्वस्य बोधकश्रुतियुक्तं, प्रत्यक्षश्रुतिविनियुक्तमन्त्रसामर्थ्यवदिति बोध्यत् । **चोदनालिङ्गेति** । विधिवाक्यसादृश्येत्यर्थः । सोमारौद्रश्चरुः श्रुतिबोधितकुशबर्हिश्शेषताकः; तादृशपौर्णमाससदृशचोदनाकत्वात्, यद्यच्छ्रुतिबोधितयच्छेषताकयदीयचोदनासदृशचोदनाकं तत्तच्छ्रुतिबोधिततच्छेषताकं, यथा 'यद्ब्राह्मणानि पञ्च हवींषि तद्ब्राह्मणानीतराणि समानमितरच्छ्यैनेनेत्यादिप्रत्यक्षवचनातिदेशबोधितशेषताकामिति सामान्यतोऽनुमानं बोध्यम्। सादृश्यं च निर्वपतिधातुद्विदैवत्यत्वादिघटितं बोध्यम्। अधिकरणं तु लिख्यते प्रथमतृतीये चिन्तितं—ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये औदुम्बरी निखन्य स्थाप्यते। तस्याः सर्ववेष्टनं 'सर्वा औदुम्बरी वेष्टयितव्या' इति स्मृत्या विहितं "औदुम्बरीं स्पृष्ट्वोद्गायेद्" इति प्रत्यक्षश्रुत्या च तस्याः स्पर्शनं विहितम्। तदेवं प्रत्यक्षश्रुतिविरुद्धार्थास्मृतिः प्रमाणं न वेति संशये शिष्टप्रणीतस्मृतित्वादविरुद्धार्थकस्मृतिवत् श्रुतिमूलकत्वसम्भवात् प्रमाणमेव सा । श्रुतिविरुद्धार्थकत्वेऽपि व्रीहियवादिश्रुतिवत्तन्मूलश्रुतेरुपपत्तेः। न चैवं श्रुतिलिङ्गादिषु पूर्वपूर्वेणो-

त्तरोत्तरबाधो न स्यादिति वाच्यम्; तेषु पूर्वेणाङ्गाङ्गित्वे बोधिते तदाकांक्षोच्छेदेनोत्तराप्रवृत्तावपि प्रकृतस्मृतेः स्वमूलश्रुत्याकांक्षायाः प्रत्यक्षस्मृत्योच्छेदाभावेन तदनुमानसम्भवादिति प्राप्ते, कारणान्तरसत्त्वेऽपि जिज्ञासां विना अनुमित्यादेरनुत्पत्त्या परोक्षज्ञानमात्रे अनुमित्यर्थापत्त्योर्वा जिज्ञासा हेतुः । अतो वेष्टितत्वाभावेन स्पर्शश्रुतिलब्धेनौदुम्बर्याः परिच्छिन्नत्वात् वेष्टनजिज्ञासाविरहेण वेष्टनस्मृत्या न मूलीभूतश्रुत्यनुमितिः । किंच व्रीहियवादिशास्त्रयोस्तुल्यबलत्वेन विकल्पसम्भवाद्विरोधपरिहारेऽपि प्रकृते अनुमेयश्रुतेः सापेक्षत्वकल्प्यत्वादिना दुर्बलत्वान्न तथेति सा न प्रमाणम् । न च वस्त्रस्पर्शने स्पर्शश्रुत्यर्थसिद्धिः सम्भवतीति वाच्यम्; स्पार्शनप्रत्यक्षस्य स्पृशधात्वर्थत्वात्, वेष्टिते तु त्वक्संयोगाभावेन तदसम्भवात् । एवं प्रत्यक्षश्रुत्यविरुद्धायामपि यस्यां स्मृतौ लोभादिदृष्टमूलत्वसम्भवः साऽप्यप्रमाणम्। यथा 'वैसर्जनहोमीयं वासोऽध्वर्युः प्रतिगृह्णाति, यूपहस्तिनो दानमाचरन्ति' इति । यूपहस्ती यूपपरिव्यानवस्त्रम् । अत एव 'अपिवा कारणाग्रहणे प्रयुक्तानि' इत्यत्र लोभादिदृष्टकारणासम्भव एवाचारे श्रुतिमूलकत्वं वक्ष्यत इति भाष्यम् । नेदं युक्तम् । तथाहि— प्रत्यक्षश्रुतिविरोधे स्मृतिमूलश्रुतेः अभावः साधकाभावात्, बाधकाद्वा । नाद्यः; मन्वादिस्मृताविव शिष्टपरिग्रहादेः साधकत्वात्, जिज्ञासां विनाऽप्यनुमित्यादिदर्शनेन तस्या असाधकत्वात्, अवेष्टितत्वेनौदुम्बर्याः परिच्छेदेऽपि स्मृते मूलजिज्ञासासम्भवाच्च । नान्त्यः; बाधकं हि स्पर्शश्रुतिर्वा, वेष्टनश्रुत्यदर्शनं वा । नाद्यः; व्रीहियवादिवत्तदुपपत्तेः । नान्त्यः; मन्वादीनां तद्दर्शनसम्भवात् । किञ्च उक्तस्मृतिमूलश्रुतिः प्रत्यक्षैव 'तामूर्ध्वदेशेन परिवेष्टयति' इति साङ्ख्यायन[1]शाखाज्ञानादित्युदाहरणमपि दुर्लभम् । अपिच स्मृतेरु-

[1] साङ्ख्यायनि.

द्यातृस्पर्शविषयमध्यमोत्तरभागान्यभागविषयकत्वेनाप्युपपत्तेः न स्पर्श-श्रुतिविरोधः । एवं शिष्टपरिगृहीतस्मृतेर्लोभादिमूलकत्वे मन्वादिस्मृते-रपि तदापत्तिः । 'अपिवा कारणाग्रहणे' इत्यादि वक्ष्यमाणाधि-करणे तु शिष्टपरिग्रह एव मुख्यहेतुः । दृष्टमूलासम्भवस्त्व-न्वाचयमात्रम् । तस्मात् प्रत्यक्षश्रुतिविरुद्धस्मृतिमूलश्रुतिर्यद्यपि पर-प्रत्यक्षा सम्भवति । परप्रत्यक्षं च आत्मप्रत्यक्षतुल्यमेवेतिं सा स्मृतिः प्रमाणमेव । तथापि सा श्रुतिः यावन्न स्वप्रत्यक्षा तावत्प्रत्यक्षश्रुत्यर्थ एवानुष्ठेयो न तु तादृशस्मृत्यर्थः; अर्थवादादिना विधिमुन्नीयापि स्मृतिं प्रमाणयन्ति यथा स कृताकृत इत्यादिः सवनीयपुरो-डाशविकल्पबोधकस्मृतिः । सा हि सवनीयपशौ देवतासंस्कारार्थ-प्राकृतपशुपुरोडाशस्य सोमं प्रत्यारादुपकारकसवनीयपुरोडाशस्य च छिद्रापिधानार्थत्वमर्थवादाभ्यां भ्रान्त्या रचिता । अत एव "सवनीये छिद्रापिधानार्थत्वात् पशुपुरोडाशो न स्यात् अन्येषामेवमर्थत्वात्" इति तादृशद्वितीयस्थाधिकरणे छिद्रापिधानरूपैकार्थत्वे विकल्पमाशङ्क्य निराकृतम् । "सुषिरो ह वा एतर्हि पशुर्यर्हि वपामुत्खिदातीति यद्व्री-हिमयः पुरोडाशो भवति अपिहित्या अछिद्रतायै, अनुसवनं सवनीया-पुरोडाशा निरूप्यन्ते अपिहित्या अछिद्रतायै" इत्यर्थवादयोः स्तुति-मात्रपरत्वेन उक्तैकार्थत्वाप्रापकत्वात् । तथाच तद्वदेव यद्यर्थवादाद्युन्नीतः विधिमूला स्मृतिः, तथा प्रत्यक्षश्रुतिसन्न्याययोः विरोधे अर्थवादन्याया-भासादिमूलकस्मृतेरप्रामाण्यात् सा न प्रमाणमिति शङ्कासम्भवात् । एवंच-'विरोधेत्वनपेक्षं स्यादसति ह्यनुमानम्, इति सूत्रे अनपेक्षं उक्त-शङ्कानिरासकानपेक्षं प्रत्यक्षश्रुतिचोदितमनुष्ठेयं स्यात् । असति उक्त-शङ्काबीजे हि अनुमानं प्रत्यक्षश्रुत्यविरुद्धश्रुत्यनुमापकस्मृतिबोधितमनुष्ठेय-मित्यर्थः । एवमाशङ्क्यमाने प्रत्यक्षश्रुत्यविरुद्धस्मृतावपि तथा शङ्केत । तस्माच्छाक्यादीनां त्रयीबाह्यानामपि त्रयीप्रोक्ताहिंसादिधर्मवक्तृत्वेन क्षत्रि-

रूपेण कुशश्रुत्यनुमानेन च बाध्यत इति सर्वमीमांसा उन्मृदिता स्यादिति चेन्न; वैषम्यात् । तथाहि—किमिदमापाद्यते श्रुतित्रयग्राहिप्रत्यक्षं ? अनुमानैः बाध्येतेति वा ? प्रत्यक्षविषयीभूतश्रुतित्रयमिति वा ? नाद्यः; विरोधाभावेन तद्बा-

---

यत्वप्रसिद्ध्या च शिष्टत्वशङ्कया तदीयस्मृतेरपि वेदमूलकत्वमिति प्राप्ते, तेषामशिष्टत्वेन त्रयीतद्विदोः प्रसिद्धेः शिष्टत्रैवर्णिकानां धर्मतया परिग्रहस्य पूर्वाधिकरणमुख्यहेतोरभावात् वेदाप्रामाण्यवादिभिरेव तत्परिग्रहाच्च न सा प्रमाणम् । सूत्रं तु तथा व्याख्येयमिति वार्तिकम् । तदेवं सापेक्षत्वात् कल्प्यश्रुतिमूलकत्वाच्च निरपेक्षकल्पश्रुत्यपेक्षया दौर्बल्यात् तद्विरुद्धार्थकस्मृतिरप्रमाणमिति भाष्ये उक्तम् । वार्तिके तु स्वपरप्रत्यक्षयोः श्रुत्योः तुल्यत्वेन तादृशस्मृतेः प्रमाणत्वेप्युक्तशङ्कया तदर्थाननुष्ठानमुक्तम्; शिष्टपरिगृहीततादृशस्मृतावुक्तशङ्काया अप्यसम्भवात्, पश्चाद्वर्णकान्तरमुक्तम् । अनुमानाद्यपेक्षया प्रत्यक्षस्य तत्त्वेन प्राबल्यं तु न कुत्राप्युक्तम् । तथाप्युक्ताधिकरणे तदुक्तमिति भ्रान्त्या प्रत्यक्षापेक्षया अनुमानबलत्वे उक्ताधिकरणविरोधः स्यादित्याशयेन परेण वेष्टनश्रुत्यनुमानेनेत्युक्तम्[1] । यद्यपि सामर्थ्यरूपालिङ्गापेक्षया श्रुतेः प्राबल्यं तत्प्रवृत्तिपूर्वमाकांक्षोच्छेदकत्वात्। न तु प्रत्यक्षविषयत्वात्प्रत्यक्षविषयलिङ्गादीनामपि, वाक्याद्यपेक्षया प्राबल्यात्! अतएव 'पारदौर्बल्यमर्थविप्रकर्षात्' इति सूत्रोक्तोच्छेदकत्वं हेतूकृतम् । तथाच श्रुत्यपेक्षया लिङ्गस्य तथा प्राबल्यं न शङ्कास्पदम् । तथापि प्रत्यक्षविषयत्वात् तत्प्राबल्यमिति भ्रान्त्या शेषत्व[2]श्रुत्यनुमानेनेत्याशङ्कितं परेणेति चोध्यम्। श्रुतिलिङ्गविरोधस्तु पूर्वमेवोदाहृतः। **चोदनेति** । 'सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणामभिचरन्' इति विहितेष्टौ 'शरमयं बर्हिः' इति श्रुताश्शराः चोदकेन प्राप्तयर्हं कुशमयबर्हिः बाधन्ते

---

[1] त्यनुमानेनाप्युक्तम्. [2] शेष.

न वेति संशये न बाधन्ते, पाषाणमयी भूरित्यत्रेवमयटा बहुशर-संयोगमात्रस्य प्राकृतकुशबर्हिषि विधानसम्भवात्। बर्हिःकार्योद्देशेन शरविधाने मयटो वैयर्थ्यापत्तेः, बर्हिः पदे लक्षणापत्तेश्चेति प्राप्ते, उक्त-संयोगाविधानस्य अदृष्टार्थत्वापत्तेः दृष्टं स्तरणरूपं बर्हिःकार्यमुद्दिश्यशरा विधीयन्ते बर्हिःपदस्योद्देशवाचकत्वेन तवापि मते तत्रापूर्वसाधन-लक्षणावश्यकत्वेन मन्मते उक्तकार्यद्वाराऽपूर्वसाधनलक्षणायास्तत्रादोष-त्वात्। मयट्श्रुतिस्तु स्थानापत्त्यतिदेशप्राप्तलवनादिसंस्कारविशिष्टस्य शरविकारद्रव्यस्यानुवादः। न च चोदकेन कुशतत्कार्ययोः पूर्वं प्राप्ततयानुवादः। न च चोदकेन कुशतत्कार्ययोः पूर्वं प्राप्ततया पश्चात् स्वमात्रा[1]कांक्षयाऽन्वयभाजां शराणां कुश[2]विरोधेनैव अन्वयौ चित्यात् कुशाभावे प्रतिनिधित्वेन अन्वयोपपत्तेः न शराणां कुशबा-धकत्वामिति वाच्यम्; पदार्थविशिष्टोपकारविषयिण्याकांक्षया पदार्थ विशिष्टोपकारस्याऽतिदेशपक्षे तस्य शरविधिपर्यालोचनेन पदार्था[3]विशेषितो-पकारविषयकत्वकल्पनात्। अन्यथा शरविध्यानर्थक्यात् विकृत्याकांक्ष-यैव शराणां ग्रहणमिति कुशप्राप्तेरेवाभावात् तार्किकप्राप्त्या च प्राप्त-बाधव्यवहारः। अथवा उपकारस्यैव प्रथममाकांक्षयाऽतिदेशः पदार्थस्य पश्चात्। अतः पदार्थाकांक्षायां शरविधिनैव तच्छान्तेः न कुशाति-देश इति दशमचतुर्थे 'चोदनालिङ्गसंयोगेन तद्विकारः प्रतीयते' इत्यधि-करणे स्थितम्। चोदनाया लिङ्गं[4] निर्वपतियजत्यादिधातुः। अष्टाक-पालादिसङ्ख्या एकद्विदैवत्यत्वादिसम्बन्धघटितसादृश्येन तद्विकारः पौर्ण-मासधर्मकुशाद्यतिदेशे इति पूर्वपक्षसूत्रार्थः। अत्रापि क्लृप्तत्वनिरव-काशत्वादिना शरादिशास्त्रं कल्प्यसावकाशादिरूपकुशाद्यतिदेशापेक्षया प्रबलम्। न तु प्रत्यक्षविषयत्वेन, प्रत्यक्षाविषयस्यापि वैकृतमन्त्रलिङ्गादि-कल्प्यश्रुतेः प्राकृतमन्त्रादिप्रापकातिदेशबाधकत्वात्। तथाच प्रत्यक्षत्वेन

---

[1] अङ्गमात्रा. [2] कुशा. [3] पदार्था. [4] चोदनालिङ्गं.

ध्यबाधकभावस्य शास्त्रार्थत्वाभावात् अस्माभिरनभ्युपगमाच्च अनुक्तोपालम्भमात्रत्वेन निरनुयोज्यानुयोगापत्तेः । अतएव न द्वितीयः; प्रत्यक्षविषयीभूतश्रुतित्रयस्य लिङ्गबाधकत्वपरेऽपि शास्त्रे प्रत्यक्षस्य लिङ्गबाध्यत्वे विरोधाभावात् । न हि शब्द-प्रत्यक्षयोरैक्यमस्ति । शब्दस्य च सर्वप्रमाणापेक्षया बलवत्त्व-मवोचाम । तस्मात् मौढ्यमात्रमेतन्मीमांसाविरोधोद्भावनम् ॥

दुर्बलत्वस्वीकारेऽपि प्रत्यक्षविषयस्य शरादिशास्त्रस्य अनुमानरूपातिदेश-बाध्यत्वे आनर्थक्यापत्त्या 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इत्यादिन्यायेन अनुमानस्यैव बाध्यत्वम् प्रपञ्चसत्वप्रत्यक्षस्य तु त्रिकाला-बाध्यत्वरूपसत्ता[1]ग्राहित्वस्य उक्तत्वात्, व्यावहारिकसत्वाधिष्ठानसत्व-विषयकत्वेन सावकाशत्वाच्च । नोक्तन्यायेनानुमानबाधकत्वमिति । तथा-प्यनुमानत्वेनोक्ताधिकरणे प्रत्यक्षबाध्यतोक्तेति भ्रान्त्या कुशश्रुत्यनुमाने-नेत्यादि परेणाशङ्कितमिति ध्येयम् ॥

ननु प्रत्यक्षविषयकश्रुतेर्विरुद्धविषयकत्वात् प्रत्यक्षस्यापि तदि-त्यत आह—**अस्माभिरिति** । विरुद्धविषयकप्रमाणविषयकप्रत्यक्षे अनुमानबाध्यत्वस्येति शेषः । साक्षादनुमानविरुद्धार्थविषयकप्रत्यक्षस्यै-वानुमानबाध्यत्वस्य श्रुतेरन्यमानापेक्षया बलवत्त्वस्य चास्माभिः स्वीका-रात् स्वविषयश्रुतिद्वारा विरुद्धविषयकप्रत्यक्षस्य नानुमानापेक्षया दौर्बल्य-मस्मत्सम्मतमिति भावः । **मौढ्येति** । यत्तु—'श्रुतित्रयग्राहिप्रत्यक्षं बाध्येतेत्यापत्तिर्युक्ता प्रत्यक्षविषयश्रुतिः स्वविषयस्पर्शोपपादिका सर्व-वेष्टनादि बोधयति । अनुमानं तु सर्ववेष्टनादिति[2] विषयीभूतश्रुतिद्वारा प्रत्यक्षस्य विरुद्धविषयकत्वात् श्रुतित्रयं बाध्येतेत्यापत्तिरपि युक्ता; प्रत्यक्षविषयत्वेन हि श्रुतित्रयं बाधकं, न श्रुतित्वेन; अनुमितश्रुतेरपि प्रत्यक्षश्रुतिबाधकत्वापत्तेः' इति प्रलपितम्, तत् उक्तव्याख्याने निरव-

---

[1] रूपसत्त्वा. [2] वेष्टनादीति.

ननु प्रत्यक्षस्य लिङ्गबाध्यत्वे वह्नौष्ण्यप्रत्यक्षं शैत्यानुमान स्यात्मस्थायित्वप्रत्यभिज्ञानं च क्षणिकत्वानुमानस्य बाधकं न स्यात्। प्रत्युतानुमानमेव तयोर्बाधकं स्यादिति चेन्न; अर्थक्रियासंवादेन श्रुत्यनुग्रहेण च तत्र प्रत्यक्षयोः प्राबल्येनानुमानबाधकत्वात्। अपरीक्षितप्रत्यक्षं हि परीक्षितानुमानापेक्षया

काशम्। स्वविषयश्रुतिद्वारा विरुद्धविषयकप्रत्यक्षस्यास्माभिरनुमानबाध्यत्वास्वीकारात् प्रत्यक्षविषयत्वेन श्रुतिर्बाधिका; वैकृतमन्त्रलिङ्गादिकल्प्यश्रुतेरतिदेशा[1]बाधकत्वापत्तेः। किन्तु निरवकाशत्वादिनेत्युक्तम्। अनुमितश्रुतेः प्रत्यक्षश्रुतिबाधकत्वापत्तिस्तु शोभते; उभयोः श्रुतित्वाविशेषात् बाध्यबाधकत्वानुपपत्तेः। किञ्च अनुमित[2]श्रुत्यपेक्षया प्राबल्यं प्रत्यक्षविषय[3]श्रुतित्वेन प्रकृते कथम्? प्रत्यक्षश्रुतेः स्वविषयस्पर्शनं सर्व[4] वेष्टनं विनानुपपन्नमित्यर्थापत्तिस्वरूपस्योत्थापनीयमानद्वारा अनुमेयश्रुतिविरुद्धविषयकत्वात् साक्षात् तत्प्रतिबन्धा[5]क्षमत्वात्। प्रत्युत प्रत्यक्षश्रुतिकल्प्यार्थापत्त्यपेक्षया अनुमानकल्प्यश्रुतिरेव प्रबला स्यात्, श्रुतित्वात्, कल्पकप्रमाणयोः बलाबलापेक्षया कल्प्यरूपप्रमेयबलाबलस्य प्रबलत्वात्। अथापि केनचिद्विशेषेणप्रमाणबलाबलमेव ग्राह्यम्; तथापि श्रुतित्वेनैव श्रुतिः प्रबला सम्भवत्यनुमानापेक्षयेति प्रत्यक्षविषयत्वविशेषणं व्यर्थमेवेति ध्येयम्— **अर्थक्रियेति**। दाहादिकार्येत्यर्थः। श्रुत्यनुग्रहेण 'अजो नित्यः' इत्यादिश्रुत्यनुग्रहेण। यत्तु—"फलपर्यन्तपरीक्षाया जगत्सत्यत्वबोधकश्रुत्यनुग्रहस्य च सन् घट इत्यादिप्रत्यक्षेपि सम्भवात् तस्यापि औष्ण्यादिप्रत्यक्षवदनुमानापेक्षया प्राबल्यमुचितम्। किंच त्वन्मतेअस्तीत्येवोपलब्धव्यः' इत्यादेरप्यखण्डार्थत्वेनात्मनि स्थायित्वसंसर्गप्रमित्यसम्भवः। अयोग्यशृङ्गेत्यादि न युक्तम्। शृङ्गस्य योग्यत्वानियमात्, शृङ्गानुमानं प्रति प्रत्यक्षबाधोद्भावनसम्भवात्।

[1] रतिदेश. [2] अनुमेय. [3] प्रत्यक्षश्रुतिविषय. [4] सर्वा. [5] साक्षात्प्रतिबन्धा.

दुर्बलम्! 'नीलं नभः' इति प्रत्यक्षमिव नभोनिरूपत्वानुमानापेक्षया अतो न सामान्यतो दृष्टमात्रेण सर्वसङ्करापत्तिः। नन्वेवं पशुत्वेन शृङ्गानुमानमपि स्यात्। लाघवात् पशुत्वमेव शृङ्गवत्त्वे तन्त्रम्। न तु तद्विशेषगोत्वादिकम्, अननुगतत्वेन गौरवादित्येतत्तर्कसभ्रीचीनत्वेन प्रत्यक्षापेक्षया प्राबल्यात्। अनुकूलतर्कसाचिव्यमेव हि अनुमाने बलम्। एवंच येनकेनचित्सामान्यधर्मेण सर्वत्र यत्किञ्चिदनुमेयम्, लाघवतर्कसाचिव्यस्य सत्त्वात्। तावतैव प्रत्यक्षबाधकत्वादिति व्यावहारिक्यपि व्यवस्था न स्यात्। न ह्यत्र प्रत्यक्षबाधादन्यो दोषोस्तीति चेन्न; अयोग्यशृङ्गादिसाधने प्रत्यक्षबाधस्यासम्भवेन तत्र व्याप्तिग्राहकतर्केष्वाभासत्वस्य त्वयापि वक्तव्यत्वेन व्यव-

---

अन्यथा शैत्यस्याप्ययोग्यस्य सम्भवेन तदनुमाने प्रत्यक्षबाधोद्भावनानुपपत्तेः" इति, तत्तुच्छम्; व्यावहारिकपरीक्षया तात्त्विकत्वासिद्धेरनुपदमुक्तत्वात्, जगत्सत्यत्वश्रुतेरन्यपरत्वादेः वक्ष्यमाणत्वात्तात्त्विकत्वाविषयकत्वात् 'अस्तीत्येवोपलब्धव्यः, अजो नित्यः' इत्यादीनामखण्डार्थत्वेऽपि नित्यत्वाद्युपाधिपरामर्शपूर्वक[1]खण्डप्रमितेरेव अनित्यत्वादिभ्रमनिवर्तकत्वसम्भवात्, सामग्रीविशेषजन्यज्ञानस्यैव विजातीत्यवेन उक्तभ्रमनिवर्तकत्वं[2] न तु नित्यत्त्वादिसंसर्गविषयकत्वादिना गौरवादित्यस्मत्सिद्धान्तस्य त्वादृशैः दुर्बोधत्वात्। शृङ्गयोग्यतानियमस्तु शृङ्गिणामेव युक्तः; पिशाचादिशरीरस्येव शृङ्गिशरीरस्यापि अनुद्भूतरूपस्य सम्भवेन तदीयशृङ्गस्य तादृशत्वेन अयोग्यत्वसम्भवात्, तदसम्भवेऽपि तादृशशृङ्गत्वेन सन्दिग्धस्यानुमानसम्भवाच्च। अयोग्यशैत्यस्य वह्न्यादावनुमाने प्रत्यक्षबाधो नोद्भाव्यत एव, किन्त्वप्रयोजकत्वमेव व्याप्तिग्राहकतर्काभावरूपमिति। अत्र नभसि नैल्यप्रत्यक्षस्य नलिरूप[3]त्वानुमा-

---

[1] मर्शकापूर्व. [2] निवर्तकत्वात्. [3] नीरूप.

स्थाया उभयसमाधेयत्वात्। न हि तर्काभाससमधीचीनमनुमानं प्रमाणमिति केनाप्यभ्युपेयते। अत उपपन्नं सत्तर्कसचिवमनुमानं प्रत्यक्षस्य बाधकमिति ॥

इति प्रत्यक्षस्यानुमानबाध्यत्वसिद्धिः

आगमबाध्यत्वविचारः.

किञ्च परीक्षितप्रमाणभावशब्दबाध्यमपि प्रत्यक्षम्। ननु प्रत्यक्षं यदि शब्दबाध्यं स्यात् तदा जैमिनिना 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः' इत्यद्यर्थवादस्य 'अदितिर्द्यौः' इत्यादिमन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते 'गुणवादस्तु' 'गुणादविप्रतिषेधः स्यात्' इत्यादिना गौणार्थता नोच्येत।

नेन बाध्यत्वं यन्मूले उक्तं तत् तज्जन्यमिथ्यात्वधीविषयविषयकत्वम्। यदि तु प्रमात्वेनैव अभानापादकाज्ञानं प्रत्यपि निवर्तकता, दोषविशेषाणां प्रतिबन्धकत्वात् न चन्द्रप्रादेशिकत्वादिभ्रमनिवृत्तिः। ज्ञाननिवर्त्यत्वरूपमिथ्यात्वलक्षणे साक्षात्कारत्वेन आचार्याणां दृश्यनिवर्तकतोक्तिस्तु नैतन्मते तदा तज्जन्याप्रमाजन्याज्ञाननिवृत्तिप्रयुक्तनिवृत्तिप्रतियोगित्वमेव। तदेवं शब्दबाध्यत्वं वक्ष्यमाणं बोध्यम् ॥

तर्कैः सारस्वतै रत्नैः चन्द्रिकाचन्द्रभूषणैः।
दुरन्धध्वान्तहन्त्रीयमनुमित्याऽक्षबाध्यता ॥

इति प्रत्यक्षस्यानुमानबाध्यत्वम्.

तस्माद्धूम इत्यादि। तस्मादित्याद्यर्थवादस्य 'गुणवादस्तु' इति सूत्रेण 'अदितिः' इत्यादिमन्त्रस्य च 'गुणादपि प्रतिषेधः' इति सूत्रेण गौणार्थता सिद्धान्तत्वेन नोच्येतेत्यर्थः। **दृष्टविरोधेनेति।**

प्रथमद्वितीये अर्थवादाधिकरणे 'वायुर्वै क्षेपिष्ठा' इत्यादेः धर्मप्रमानुत्पादकत्वं स्वार्थेचानुवादकत्वमित्येतावन्मात्रं 'स्तेनं मनोऽनृतवादिनी वाक्' इत्यादौ मनस्स्तेनत्वस्य वागनृतमात्रवादिनीत्वस्य च बाधितत्वात् मनः स्तेनसदृशं वागनृतप्रायवादिनीत्यर्थो वाच्यः । तथाच अनुवादत्वापत्त्या विधिकल्पकत्वं वाच्यम् । वाङ्मनसयोरनृतादियोगादन्येनापि तत्सेव्यमिति[1] तत्रापि नायमपूर्वविधिः; प्राप्तार्थत्वात्, 'नानृतं वदेत्' इत्यादिशास्त्रबाधापत्तेश्च । नापि अनृतान्येन कार्यं न साधयेत् स्तेयान्योपायेन न द्रव्यमर्जयेदित्यादिपरिसङ्ख्या, त्रैदोष्यात्, सत्यमेव वदेत् प्रतिग्रहादिना द्रव्यमर्जयेदित्यादिशास्त्रबाधाच्च । अतएवानृतं वदेदेवेत्यादिर्न नियमविधिरपि । नापि विकल्पः, कल्प्यत्वेनास्य दुर्बलत्वात् । तस्माच्छास्त्रविरोधेन विधिकल्पकत्वाभावादप्रामाण्यम् । एवं 'तस्मान् धूम एवाग्नेर्दिवा दृष्टे नार्चिः, अर्चिरेवाग्नेर्नक्तं दृष्टे न धूमः तस्माद्दिवाऽग्निरादित्यं गतो रात्रावादित्यस्तम्' इत्यादेः दृष्टविरोधादप्रामाण्यमिति 'शास्त्रदृष्टविरोधाच्च' इति सूत्रेणाशङ्क्य अन्येषामप्यर्थवादानामन्यप्रकारेणाप्रामाण्यमाशङ्क्य 'गुणवादस्तु' इति सूत्रेण बाधितार्थानां गौणार्थकत्वं प्रतिज्ञाय 'रूपात् प्रायात्' इत्यनेन 'दूर भूयस्त्वात्' इत्यनेन च अन्येन च सूत्रेण उपपाद्य, सर्वेषामर्थवादानां विध्यपेक्षितस्तुतिनिन्दाबोधकत्वेन प्रामाण्यमिति समाहितम् । तत्र 'हिरण्यं हस्ते भवत्यथ गृह्णाति' इति विधेः शेषभूते 'स्तेनं मनोऽनृतवादिनी वाक्' इत्यत्र स्तेनशब्दः प्रच्छन्नकारित्वेन स्तेनसादृश्यात्मकात् रूपात् स्तेनसदृशे गौणः; अनृतशब्दोऽनृतवाक्यबाहुल्यरूपात् प्रायाद्गौणः । वाङ्मनसयोः[2] स्तेनसदृशत्वादिना हिरण्यादूनत्वप्रत्ययात् नहिनिन्दान्यायात् हिरण्यस्तुतिः । न तु निन्दया निषेधोन्नयनं,

[1] तथा यवर्हतव्यमिति. [2] स्तेनसदृशत्वादेर्हिरण्यविधिस्तुत्यर्थत्वान्नहिनिन्दान्यायात्—पा.

क्लृप्तविध्येकवाक्यतासम्भवे तदयुक्तत्वात् । तस्माद्धूम एवेत्यादौ तु दृशिर्गौणो दूरभूयस्त्वात् गुणात्, तच्च भूयस्त्वेन दूरस्थैः दृश्यमानत्वम् । दिवा हि दूरस्थैः भूयस्त्वेन धूम एव दृश्यते नार्चिः, नक्तं च तैस्तेनार्चिरेव दृश्यते न धूम इति । तथाच "सूर्यो ज्योतिर्ज्योतिरग्निस्स्वाहेति प्रातर्जुहोति, अग्निर्ज्योतिस्सूर्यस्स्वाहेति सायं जुहोति" इति मिश्रलिङ्गकमन्त्रविधेः शेषभूतं तस्माद्दिवेत्यादिकं तदुपपादकम् । तस्माद्धूमेत्यादिकं उभयोर्दैवतयोः मिलनादुभयदैवत्यहोमस्तुतेरुपपत्तिः । वस्तुतस्तु केवललिङ्गकमिश्रलिङ्गकमन्त्रविध्योर्मध्ये पठितमप्युक्तवाक्यद्वयं "अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोति, सूर्यो ज्योतिर्ज्योतिस्सूर्यस्स्वाहेति प्रातर्जुहोति" इति केवललिङ्गकमन्त्रविधेः शेषः; 'उभाभ्यां सायं हूयते उभाभ्यां प्रातः न देवताभ्यस्समदं दधाति' इत्युभयलिङ्गकमन्त्रविधेः अर्थवादान्तरस्यान्नानात् यस्माद्दिवाग्निरादित्यान्तर्गतिः तस्मादादित्यस्यैव ज्योतिष्ट्वात्तन्मात्रलिङ्गकमन्त्रः प्रशस्त[1] इत्युपपत्तिः । एवमर्चिरेवाग्नेर्नक्तमिति तत्रापि बोध्यमिति । प्रथमद्वितीये मन्त्राधिकरणे "तदर्थशास्त्रात् वाक्यनियमात् बुद्धि[2]शास्त्रात् अविद्यमानवचनात् अचेतनार्थबन्धनात् अर्थविप्रतिषेधात् स्वाध्यायवदवचनात् अविज्ञेयादानित्यसंयोगात् मन्त्रानर्थक्यम्" इति सूत्रे मन्त्रा अनर्थकाः 'बर्हिर्देवसदनं दामि' इत्यादौ शास्त्रविहितार्थकत्वेन अविधेयकत्वात् 'अग्निर्मूर्धा' इत्यादौ वाक्यक्रमनियमस्य स्वार्थबोधे अनुपयोगात् अदृष्टार्थत्वस्य सिद्धान्तेऽनङ्गीकारात्[3] अग्नीन् विहर' इत्यादिप्रैषमन्त्रे बुद्धार्थत्वात् 'चत्वारि शृङ्गा त्रयोऽस्य पादाः' इत्यादौ चतुश्शृङ्गत्वादियुक्तकर्मणोऽविद्यमानस्य वचनत्वात्[4] 'ओषधे त्रायस्वैनम्' इत्यादावचेतनार्थसम्बोधनात् 'अदितिर्द्यौरदितिरन्तरिक्षं' इत्यादौ अदितिशब्दरूपदेवताया द्युलोकाद्यभेदरूपार्थसम्भवात् मन्त्रमात्रेऽध्ययनाभास्येवार्थज्ञानाभ्यासस्यावचना-

---

[1] प्रसक्त. [2] बुद्ध. [3] दृष्टार्थत्वस्य सिद्धान्तेऽङ्गीकारात्. [4] वचनात्.

तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति

दर्थज्ञानार्थत्वाभावात् 'अम्यक् सात इन्द्रस्तुष्टिरस्मे' इत्यादौ अम्यगादिपदार्थस्य 'सृण्येव जर्भरी तुर्फरी जुषाणा' इत्यादौ वाक्यार्थस्याविज्ञेयत्वात्। 'किं ते कृण्वन्ति कीकटेषु गावः' इत्यादौ कर्मानङ्गकीकटाद्यनित्यार्थबोधकत्वात्। न चार्थवादस्येव मन्त्राणां स्तुतिपरत्वेन विधिना पदैकयवाक्यतेति वाच्यम्; प्रदेशान्तरस्थमन्त्राणां तदसम्भवात्। तस्मान्मन्त्राणामप्रामाण्यमित्याशङ्क्य 'अविशिष्टस्तु वाक्यार्थः' इत्यनेन वाक्यान्तरस्येव मन्त्राणां वाक्यार्थधीजनकत्वात् कर्मसम्बन्ध्यर्थ[1]प्रकाशनरूपदृष्टार्थसम्भवे नादृष्टार्थत्वं, किन्तु तदसम्भव इति अधीतवेदेन यत्सम्भवति तत्कुर्यादित्यस्य सिद्धान्तसिद्धप्रयोजनत्वसम्भवान्नानर्थक्यं स्वविनियोजकविधौ पदार्थविधया प्रामाण्यसम्भव इति समाधाय सूत्रान्तरैरुक्तशङ्का निराकृताः। तत्र मन्त्रवाक्ये क्रमनियमोऽदृष्टार्थ एव, बुद्धेर्विस्मरणादिसम्भवात्प्रैषमन्त्रसार्थक्यं, 'चत्वारि' इत्यादेः सूर्यप्रकाशकत्वाद्दिनयामरूप[2]शृङ्गचतुष्टयं विद्यमानार्थ[3] एव, ओषध्यादिसम्बोध्यता चैतन्यारोपात्, अदितिरित्यादेः गौणार्थकत्वाविरोधः,[4] अर्थज्ञानस्य अभ्यासावचनेऽपि प्रयोजनत्वमविरुद्धम्। अप्रसिद्धार्थस्तु निगमनिरुक्तादिना ज्ञेयः। कीकटादिपदानां कृपणादिगौणार्थपरतया कर्मसमवेतार्थकत्वमिति संक्षेपः॥

तत्सिद्धीति। 'यजमानः प्रस्तरः' इत्यादावपि यजमानादिपदं प्रस्तरादिनामधेयं स्यात्, सोमादिपदवत् रूढत्वात्; तदसम्भवेपि जघन्यप्रस्तरपदे स्रुग्धारणादिरूपप्रस्तरकार्यलक्षणया तदुद्दिश्याधारत्वेन यजमानो विधीयत इति प्राप्ते प्रत्यक्षविध्यश्रवणात् 'प्रस्तरमुत्तरं बर्हिषस्सादयति' इत्यादिविध्येकवाक्यत्वाच्च तद्विधेयप्रस्तरादिस्तुतिपरं यजमानेत्यादिकमित्यौदुम्बराधिकरणसिद्धम्। यजमानादिपदं तु गौणस्वार्थपरमिति

[1] सम्बद्धार्थ. [2] त्वादिनियमरूप. [3] विद्यमानाङ्ग. [4] त्वादिविरोधः.

तद्घटितवाक्यार्थधीद्वारा स्तुतिः। गौणत्वं च मुख्यार्थगतगुणघटितत्वम्। अस्ति च 'सिंहो देवदत्तः' इत्यादौ क्रूरादिरूपेऽर्थे। तत् 'खपुष्पं त्वत्सिद्धान्तः' इत्यादौ च बाधितार्थकत्वरूपो गुणः सिद्धान्तरूपे वाक्ये खपुष्पपदस्य स्वरूपात्मकमुख्यार्थगतो बोध्यः; सर्वेषां पदानां स्वरूपे निरूढलक्षणासत्त्वात्, खपुष्पपदे च समुदायशक्त्यभावेऽपि वाक्ये मीमांसकमते लक्षणासम्भवात्। एवंच तत्र प्रकारान्तरप्रलापः परेषां हेयः। चन्द्रो मुखमित्यादौ चन्द्रादिपदस्य चन्द्रसदृशार्थकत्वे गौणार्थकत्वं नोचेत् भाक्तस्तद्व्यवहारः। तथाच यजमानकार्यसिद्धिहेतुर्यजमानपदस्य गौणार्थः, गौणार्थगतस्य मुख्यार्थसम्बन्धस्य गौणीवृत्तित्वात् गौणार्थभिन्नगतस्य मुख्यार्थसम्बन्धस्यैव लक्षणात्वात् गौणीलक्षणयोर्भेदो बोध्यः। न्यायसुधायां तु—

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता॥

इति वार्तिकोक्तौ शक्यघटितरूपेण बोधे लक्षणा, शक्याघटितशक्यनिष्ठगुणवत्त्वरूपेण बोधे गौणीति तयोर्भेद उक्तः। 'अग्निर्वै ब्राह्मणः' इत्यादावपि पूर्ववद्विधित्वे प्राप्ते अग्न्यादिशब्दस्य जननघटितोग्निजननस्थानजातरूपो गौणोऽर्थः; सृष्टिकाले ब्रह्मणो मुखादग्निब्राह्मणयोर्जननस्य श्रुत्युक्तत्वात्। एवं 'आदित्यो यूपः' इत्यादौ सारूप्यघटित आदित्यादिसदृशो गौणोऽर्थः। आदित्यादिपदस्य यद्यपि सारूप्यं सादृश्यं; तच्च तद्गततेजस्वित्वादिजातीयवत्त्वम्[1]। तथाच जननादिघटित[2]गुणोपि सारूप्यमिति न विशेषो भाति। तथापि सारूप्यस्य सादृश्यरूपत्वेन भेदघटितत्वं तत्सिद्ध्यादिस्तु तदघटितत्वम्। अथवा सारूप्यस्थले भेदांशस्य अधिकस्या[3]भानेपि जननाद्यघटितगुणभानमेव विशेषः। यत्तु चक्षुर्ग्राह्यसारूप्यमत्र भाति अन्यत्र तदन्यदिति, यदपि अत्र प्रकारतया आदित्यतेजस्विता सदृशतेजस्विता भाति मुख्या-

---

[1] तद्गततेजस्वित्वादिना सजातीयत्वम्. [2] जननाघटित. [3] अधिकरणस्या.

र्थस्य। 'अग्निर्ब्राह्मणः' इत्यादौ तु सादृश्यसम्बन्धेन अग्निजननसम्बन्धि-जननं भातीति भेद इति तयोः मतयोर्विनिगमकाभावः। यजमानकार्य-कारित्वादेरपि चक्षुर्ग्राह्यत्वसम्भवात्सम्बन्धविधया आदित्यतेजस्वितासा-दृश्यं भाति। अग्निजननादिसादृश्यं तु प्रकारतयेत्यस्यापि सम्भवात् अग्निजननस्थानजातत्वेन आदित्यवृत्तितावच्छेदकवैलक्षण्यविशिष्टतेज-स्वितात्वेन च भानादुभयत्रापि गुणघटकसादृश्यभाने मानाभावाच्च। 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः' इत्यादावजादीनां तत्रतत्र विहितत्वात् पशुकार्ये प्रतिषेधस्य पर्युदासस्य वा न सम्भवः। नापि 'अयज्ञिया वै माषाः' इत्यादाविव प्रतिनिधिनिषेधकत्वं, विध्ये-कवाक्यताभङ्गापत्तेः। अतः 'पुरस्तात्प्रतीचीनमश्वस्योपदधाति पश्चा-त्प्राचीनमृषभस्य' इति विध्यपेक्षितगवाश्वस्तुतिपरत्वं समासगतपशुपदस्य गवाश्वगतप्राशस्त्यजातीयविशिष्टरूपः प्रशंसाघटितो गौणार्थः। 'सृष्टी-रुपदधाति' इत्यत्र तु प्रत्यक्षविधिश्रवणाद्विधित्वम्। तत्र यद्यप्युपधान-मिष्टकानां चयनाङ्गत्वेनैव आक्षिप्येत,[1] तथाप्याक्षेपप्रवृत्तेः पूर्वमनेन प्रत्यक्षविधिना विधीयते। तत्फलं प्रतीष्टकमुपधानस्य तत्र चयनसमान-कर्तृकत्वस्य च सिद्धिः। अन्यथा समुदितेष्टकोपधानं तस्य चयनभिन्न-कर्तृकत्वं च स्यात्, आर्थिकत्वात्। सति त्वस्मिन् इष्टकासंस्कारद्वारा उपधानस्य चयनाङ्गताबोधकविधौ प्रतिप्रधानं गुणावृत्तिन्यायादङ्गप्रधान-यारेककर्तृकत्वाच्च उक्तफलयोस्सिद्धिः। सृष्टिपदस्य तु लिङ्गप्रकरण-प्राप्तसृष्टयसृष्टिमन्त्रसमूहरूपो गौणसृष्टिमन्त्रबाहुल्यरूपभूमघटितोऽर्थ इति भाष्यम्। उपधानमात्रे विधेये एकेन विधिना निर्वाहे 'प्राणभृत उपदधाति' इत्याद्यनेकोपधानविधीनां वैयर्थ्यापत्तेः। उपधानानुवादेन मन्त्रो मन्त्रविशिष्टोपधानं वा इष्टकासंस्कारार्थत्वेन विधीयते। तत्रोपधान-विधिफलं पूर्वोक्तम्। मन्त्रविधिफलंत्वपधाने मन्त्रनियमादिः। अन्यथा

1 आक्षिप्यते.

तत्सिद्धिपेटिकायां 'यजमानः प्रस्तरः' इत्यादेः गौणार्थता च नोच्येत । त्वयापि प्रत्यक्षाविरोधाय तत्त्वंपदयोर्लक्षणा नोच्येत ।

मन्त्राणामिष्टकामात्रप्रकाशकत्वात्तदुपधान इव तद्ग्रहणादिष्वपि प्राप्तिस्स्यात् । अत उपधाने नियमो ग्रहणादिपरिसङ्ख्या वा फलम् । मध्यमचितिसम्बन्धोऽपि तत्फलं 'यो वै काञ्चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यात्' इत्यनेन प्रत्यक्षब्राह्मणवतीनामिष्टकानां मध्यमचितिसम्बन्धविधानात् । अन्यथा तत्तच्चित्यवान्तरप्रकरणपठितानां मन्त्राणां चयनमहाप्रकरणेन सर्वस्यामन्त्यायां वा चितावेव निवेशः स्यात् । इष्टकानां प्रत्यक्षब्राह्मणवत्त्वं च प्रत्यक्षब्राह्मणगतपदाविधेयमन्त्रकत्वम् । सृष्टिपदं हि सृष्टिप्रकाशकमन्त्रकरणकोपधानकर्माणि मुख्यमपि गौण्या वृत्त्या सृष्टिप्रकाशकप्रायसमूहान्तर्गतमन्त्रकरणकोपधानकर्मेष्टकापरमिति करणविनियुक्तलोकंपृणामन्त्रकेष्टकाया अपि मध्यमचितिमात्रसम्बन्धापत्तेरिष्टकावाचीति पदविशेषणं वाच्यम् । सृष्टिप्रकाशकप्रायमन्त्राः सप्तदश, 'यत्सप्तदशेष्टका उपदधाति' इत्यर्थवादानुसारात् । तत्र सृष्टिप्रकाशकाः चतुर्दश, तेषु 'ब्रह्मासृज्यत' इत्यादिरूपेण सृजधातुप्रयोगात् । त्रयोऽन्येऽतो भूमघटितो गौणार्थ इति तु वार्तिकम् । 'प्राणभृत उपधाति' इत्यादौ तु प्राणभृत्पदाघटितमन्त्रापेक्षया स्वल्पेन प्राणभृत्पदघटितमन्त्रेण तत्पदाघटितमन्त्रैश्च घटितो यस्समुदायः तदन्तर्गतमन्त्रकरणकोपधानकर्मेष्टकारूपोऽल्पत्वरूपलिङ्गघटितो गौणार्थः ।[1]सर्वमन्यत्पूर्ववदिति प्रथमचतुर्थे 'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः' इत्यधिकरणे स्थितम्। शब्दस्य प्रत्यक्षात्प्राबल्ये तत्सिद्ध्यादिघटितगौणार्थकथनं तत्रत्यं विरुद्ध्येतेत्यर्थः । **तत्सिद्धिपेटिकेति** । तत्सिद्धिशब्दयुक्तं सूत्रं पेटिका,

---

[1] अल्पत्वं च अनधिकत्वम् । तेन समसंख्याकस्थलस्यापि लिङ्गसमवायेन ग्रहः । सर्वमन्यत्. (इत्यधिकः कोशान्तरे पाठः.)

श्रुतिविरोधे प्रत्यक्षस्यैव प्रामाण्यसम्भवात् । न च तात्पर्यलिङ्गानां उपक्रमादीनामत्र सत्त्वान्नाद्वैतश्रुतीनामगुरुख्यार्थत्वमिति वाच्यम् । 'यजमानः प्रस्तरः' इत्यादावपूर्वत्वाद्येकैकलिङ्गस्य तात्पर्यग्राहकस्य विद्यमानत्वात् । एकैकलिङ्गस्य तात्पर्यनिर्णायकत्वे लिङ्गान्तरमनुवादकमेव । त्वन्मते प्रत्यक्षासिद्धे भेदे श्रुतिरिव किं बाहुल्येनेति चेन्न ; वाक्यशेषप्रमाणान्तरसंवादार्थक्रियादिपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्राबल्येन व्यवहारदशायामेव एतद्विरुद्धार्थग्राहिणः "धूम एवाग्नेर्दिवा ददृशे, अदितिर्द्यौः, यजमानः प्रस्तरः" इत्यादेः तद्विरोधेनागुरुख्यार्थत्वेऽप्यद्वैतागमस्य परीक्षितप्रमाणविरोधाभावेन गुरुख्यार्थत्वोपपत्तेः । प्रत्यक्षादेर्हि परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धम् । तच्च नाद्वैतागमेन बाध्यते । बाध्यते तु तात्त्विकं प्रामाण्यम् । तत्तु परीक्षया न सिद्धमेव । अतो न विरोधः । धूम एवाग्नेरित्यादेस्तु गुरुख्यार्थत्वे प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं व्याहन्येत । अतो विरोधात्तत्रागुरुख्यार्थत्वमिति विवेकः । यत्तु प्रत्यक्षाविरोधाय तत्त्वंपदयोर्लक्षणा नाश्रीयेतेति, तन्न ; षड्विधलिङ्गैर्गतिसामान्येन च अखण्ड एव अवधार्यमाणस्य तात्पर्यानुपपत्तेः, जीवेशगत-

---

संक्षेपेण सर्वेषां गोणार्थानां निर्णायकत्वादिति भावः । अपूर्वत्वादीति । प्रत्यक्षविरुद्धार्थस्य मानान्तराज्ञातवत्रूपमपूर्वत्वमित्यर्थः । वाक्यशेषेति । विधिवाक्यरूपेण वाक्यशेषेण सह अर्थवादानामेकवाक्यत्वानुरोधात् स्तुतिपरत्वनिश्चयादन्यपरैः तैर्न प्रत्यक्षादिविरुद्धार्थसिद्धिरिति प्रत्यक्षादिप्रबलमित्यर्थः । अथवा तस्माद्भूमेत्यादिवाक्यस्य शेषो मन्त्रादिविधिः । तेन दिवादृष्टाग्न्यधिकरणकहोमे मन्त्रविधानात् अग्न्यर्चिरादीनां दिवादर्शनादिप्रत्यक्षं वाक्यशेषपरीक्षितमिति भावः । जीवेशगतेति । ब्रह्मपदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्याहंपदवाच्यस्य अहंकाराद्युपहितचित्त्व

सर्वज्ञत्वकिञ्चिद्ज्ञत्वादीनामैक्यान्वयानुपपत्तेश्च । तात्पर्यविषयीभूताखण्डप्रतीतिनिर्वाहाय लक्षणाङ्गीकरणस्यैव उचितत्वात्, तात्पर्यविषयीभूतान्वयनिर्वाहाय लक्षणाश्रयणस्य सर्वत्र दर्शनात्। न चैवं सति अमुख्यार्थत्वं स्यादिति वाच्यम्; तद्धि प्रतीय-

---

रूप[1]किञ्चिज्ज्ञत्वविशिष्टस्य च ऐक्यबोधे उक्तविशेषणयोरपि ऐक्यमवश्यं बोध्यमित्यन्वयानुपपत्त्या लक्षणया शुद्धयोरैक्यबोध इति भावः । न चोपहितयोरेव ऐक्यं घटो द्रव्यमित्यादाविव बुध्यतामिति वाच्यम्; विशिष्टान्वयधीत्वेन मुख्यवृत्तिज्ञानकार्यता, उपहिता[2]न्वयधीत्वेन अमुख्यवृत्तिज्ञानकार्यता । अतएव 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादौ सर्वत्र विशिष्टान्वय एवौत्सर्गिकः । अतएव च घटो द्रव्यमित्यादावमुख्यवृत्त्यैव उपहितान्वयः । मुख्यवृत्तिश्च विशिष्टशक्तिः, निरूढलक्षणा च । यदिच लाघवादुपहित एव शक्तिरिति नव्यमतमाश्रीयते, तदा उपहितशक्तिर्निरूढलक्षणा च मुख्यवृत्तिः । एवंच विशिष्टे उपहिते वा शक्तस्यापि ब्रह्मादिपदस्य विशेष्यमात्रशक्तत्वेन ज्ञानात् विशेष्यमात्रधीः वक्ष्यमाणा युज्यत एव; विशेष्यमात्रीयत्वेन ज्ञायमानशक्तेरमुख्यवृत्तित्वात् । न च विशिष्टे उपहिते वा शक्तस्य पदस्य विशेष्यमात्रे शक्तिज्ञानं तच्छाब्दबुद्धौ न कारणं, किन्तु तस्य तत्र लक्षणाज्ञानमेवेति वाच्यम्; उपहितशक्तेर्विशेष्येऽपि सत्त्वात् लक्षणाया अन्याय्यत्वात् । अतएव बलवदनिष्टाजनकत्वविशिष्टेष्टसाधनत्वशक्तस्यापि विधेः केवलेष्टसाधनत्वबोधकत्वम् । 'श्येनेनाभिचरन् यजेत' इत्यादौ शक्तयैवेति तार्किकाः । मुख्यवृत्त्योपस्थितानामेकदेशान्वयबोधानुपधायकत्वादेवामुख्यवृत्तित्वमुक्तमुख्यवृत्त्वन्यवृत्तेरुपपद्यते । एवंच उपहितान्वयधीः लक्षणया । अथवा उपहितशक्तिज्ञानस्यैव यदा विशेषणान्वये तात्पर्यज्ञानादिसहकारिसमवहितत्वं, तदा मुख्यवृत्तित्वं;

---

[1] व्युपलक्षितत्वरूप. [2] तदुपहिता.

मानार्थपरित्यागेन अर्थान्तरपरत्वं वा? अशक्यार्थत्वं वा? नाद्यः; सामानाधिकरण्येन प्रतीयमानस्यैक्यस्यात्यागात्। नान्त्यः; जहदजहल्लक्षणाश्रयणेन शक्यैकदेशपरित्यागेऽपि 'सोऽयं देवदत्तः' इत्यादिवाक्य इव शक्यैकदेशस्यान्वयाभ्युपगमात्। विशेषणबाधेन विशेष्यमात्रान्वयस्यैवात्र लक्षणाशब्देन व्यपदेशात्। तथाचोक्तं वाचस्पतिमिश्रैः—"प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्। अद्वैतवाक्यं त्वनन्यशेषत्वान्मुख्यार्थमेव। उक्तं हि शाबरभाष्ये—'न विधौ परशब्दार्थः' इति"। यथाचापूर्वत्वाद्येकैकतात्पर्यलिङ्गेन 'यजमानः प्रस्तरः' इत्याद्यर्थवादवाक्यानां न स्वार्थपरत्वं तथा वक्ष्यामः। नन्वन्यशेष-

---

यदा न तत्तदा न तदिति सर्वमुपपद्यत इति ध्येयम्। **प्रतीयमानस्येति**। नन्वखण्डमैक्यं प्रतीयत एव; नेत्यत आह—**सामानाधिकरण्येनेति**। अकार्यकारणद्रव्यबोधकसमानाधिकरणनामद्वयत्वावच्छेदेन अखण्डार्थत्वमानुभविकमिति विवरणाद्युक्तत्वात् अखण्डार्थता। अधिकं तु अग्रे वक्ष्यते। **विशेष्यमात्रान्वयस्येति**। विशेष्यमात्रान्वयबोधोपधायकधीविषयशक्तेरित्यर्थः। नन्वेवममुख्य[1]वृत्तिज्ञानाधीनवाक्यार्थधीजनकत्वाद्वाक्यममुख्यार्थं[2] स्यादित्याशङ्क्य वाक्यस्यामुख्यार्थत्वं नोक्तरूपं, किन्तु वक्ष्यमाणमित्याशयेनाह—**तथाचोक्तमिति। वक्ष्याम इति**। उपक्रमोपसंहारयोरेकार्थनिष्ठत्वमभ्यासार्थवादौ चेति त्रयं शब्दगतम्। अज्ञातत्वरूपापूर्वत्वं फलं अबाधितत्वरूपोपपत्तिश्चेति षट्सु लिङ्गेषु अन्त्यत्रयमर्थनिष्ठम्। प्रामाण्यशरीरनिर्वाहद्वारा तात्पर्यज्ञापकमवश्यमपेक्षणीयं; मानान्तरेण ज्ञाने[3] निष्फले बाधिते वा प्रमात्वासम्भवेन तात्पर्यासम्भवात्, आद्यत्रयेष्वर्थवादस्याप्यावश्यकत्वमन्यथा विधेयप्राशस्त्यबुद्ध्यसम्भवेन विधिपर्यव-

---

[1] नन्वेवं मुख्य. [2] वाक्यं मुख्यार्थं. [3] ज्ञाते.

त्वानन्यशेषत्वे नामुख्यार्थत्वमुख्यार्थत्वयोः प्रयोजके, किन्तु मानान्तरविरोधाविरोधौ। अन्यशेषेऽपि मानान्तराविरोधे 'इयं गौः क्रय्या बहुक्षीरा' इत्यादौ च वेदे प्रस्तरादिवाक्यवद-मुख्यवृत्तेरनाश्रयणात्। अनन्यशेषेऽपि 'सोमेन यजेत' इत्यादौ वैयधिकरण्येनान्वये विरुद्धत्रिकद्वयापत्त्या सामानाधिकरण्ये-नान्वये प्रत्यक्षाविरोधाय सोमवता यागेनेति मत्वर्थलक्ष-

---

सानासम्भवात् । इतरयोस्तु तात्पर्यस्य सन्देहे तन्निर्णायकतया उप-योगः । एवंचापूर्वत्वाद्येकैकमात्रेण न तात्पर्य[1]सिद्धिरिति प्रथमपरिच्छेद एव विशेषतो मिथ्यात्वानुमाननिरूपणोत्तरमक्षरतात्पर्याभ्यां वक्ष्यति । सत्यकामत्वादिगुणाः तत्त्वावेदकश्रुतिबाध्यत्वात् व्यावहारिकाः । यद्यपि सा श्रुतिः शुद्धस्वरूपमात्रपरा; तथापि तत्परत्वस्य निर्गुणत्वधीद्वारक-त्वात् निर्गुणत्वेऽप्यवान्तरतात्पर्यस्वीकाराद्वा सगुणत्वबाधिका । 'यज-मानः प्रस्तरः' इत्यादौ तु स्तुतिधियो द्वारं यजमानकार्यकारी प्रस्तर इति वाक्यार्थधीरपि सम्भवतीति न यजमानप्रस्तराभेदे तात्पर्यं; येन विना हि महातात्पर्यं न पर्यवस्यति तत्रैवावान्तरतात्पर्यमिति द्वितीय-परिच्छेदे सत्त्वादिवाक्यानामखण्डार्थत्व[2]प्रकरणे वक्ष्यति । न चापूर्व-त्वात्सत्यकामत्वादौ श्रुतेस्तात्पर्यं, आरोपेणाप्युपास्यतासम्भवेन तात्पर्यं विनाऽप्युपपाद्यमानेऽन्यशेषे वाक्यार्थे अपूर्वेऽपि तात्पर्यास्वीकारात् । अतएव 'अजक्षीरेण जुहोति' इति विधेः शेषभूते जर्ति-लादिवाक्यार्थे तात्पर्यं न स्वीकृतमिति द्वितीयपरिच्छेदे आत्म-निर्गुणत्वप्रकरणेऽन्यत्र च वक्ष्यति । **वैयधिकरण्येनेति** । 'वाजपे-येन स्वाराज्यकामो यजेत, उद्भिदा यजेत पशुकामः' इत्यादौ वाजपेयादिपदं गुणपरम् । यद्यपि यागे वाजपेयादिगुणस्य नान्वयः, कारकाणां क्रियां प्रति गुणत्वेन मिथोऽनन्वयात् । आख्यातार्थक्रियां

---

[1] मात्रेण तात्पर्य. [2] वाक्यखण्डार्थत्व.

प्रति हि धात्वर्थः कारकमेव । 'पचति, ओदनं पचति' इत्यादौ पाकं करोति पाकेनौदनं साधयतीत्यादिविवरणात् । नापि क्रियायामेव करणत्वेन तस्यान्वयः ; समानपदोपात्तत्वेन यागे करणत्वेन प्रथममन्विते आकांक्षाविरहात् । नापि कारकतया क्रियान्वयनियमेप्यकारकतया यागे तस्यान्वयः ; भेदान्वयस्य बाधितत्वात् । धात्वर्थनामार्थयोः भेदान्वयस्याव्युत्पन्नत्वात् । नापि गुणपदस्य वाजपेयादिसम्बन्धिलक्षणया तदुत्तरतृतीयार्थाभेदस्य[1] यागेऽन्वयः, यागगतकरणत्वस्यैव वा तृतीयार्थस्य क्रियायामन्वयः, लक्षणाकल्पनापेक्षया गुणपदस्य यौगिकत्वेन नामधेयत्वस्योचितत्वात् । नापि स्वाराज्यादिकर्मिकायां क्रियायां यागस्य करणत्वेऽपि यागकर्मिकायां गुणस्य करणत्वम् ; एकेनाख्यातेन क्रिययोः बोधने आवृत्त्यापातात् एकक्रियायां कर्मद्वयस्यान्वयासम्भवात् । तथापि क्रियायां यागस्य न करणत्वेनान्वयः, किन्तु करणकर्मसाधारणसम्बन्धित्वमात्रेण । तथाच करणत्वरूपं सम्बन्धमादाय स्वाराज्यादिकर्मणः कर्मत्वरूपं तमादाय गुणरूपकरणस्यान्वयः यागेन स्वाराज्यं वाजपेयेन यागं कुर्यादिति ; इति प्राप्ते—क्रियया करणत्वादिरूपेणैव कारकस्य आकांक्षितत्वात्तद्रूपेणैव तस्यामन्वयो न सम्बन्धित्वमात्रेण । अतः प्रथमतः करणत्वेन यागे अन्विते अनाकांक्षत्वात् न गुणस्य करणत्वेनान्वय इति यागान्वयाय गुणपदस्य सम्बन्धिलक्षणादोषात् वाजमन्नं सुरारूपं यस्मिन्निति व्युत्पत्त्या नामत्वमेवोचितं, सुराग्रहविधानात् । न चैकक्रियायां यागस्य करणत्वेन कर्मत्वेन चान्वयस्सम्भवतीत्युक्तम् ; यजेरावृत्तिप्रसङ्गाच्च, विरुद्धयोस्त्रिकयोर्बोधकृतवैरूप्यापत्तश्च । विधेयत्वं गुणत्वमुपादेयत्त्वमित्येकम्, अनुवाद्यत्वं प्रधानत्वमुद्देश्यत्वमित्यन्यदिति त्रिकद्वयम् । फलानुवादेन यागस्य, यागानुवादेन गुणस्य चोत्पत्तिविधौ यागस्याज्ञातज्ञाप्यत्वरूपे विधेयत्वानुवाद्यत्वे फलो-

[1] र्थभेदस्य.

णाया आश्रयणात्। एवं विचारविधायके 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे 'तद्विजिज्ञासस्व' इति श्रुतौ च मानान्तराविरोधेन विध्यन्वयाय जिज्ञासाशब्देन विचारलक्षणायाः 'सर्वं खल्विदं

द्देशेन यागस्य तदुद्देशेन गुणस्य च विनियोगविधौ यागस्य शेषशेषित्वरूपे गुणत्वप्रधानत्वे तादृशप्रयोगविधौ प्रकृतविधिप्रयुक्तकृतिसाध्यताधीविशेष्यत्वतदभावरूपे उपादेयत्वोद्देश्यत्वे। न च स्वाराज्यादिफलनिरूपितकरणत्वेन यागे प्रथममन्वितेऽपि यागनिरूपितकरणत्वेन गुणस्यान्वयोस्त्विति वाच्यम्; निरूपकविशेषस्य पश्चादेव ज्ञेयत्वेन करणत्वसामान्याकांक्षाविरहात्, तावतापि विशिष्टविधिगौरवरूपदोषानुद्धाराच्च। किंच भावनायां प्रथमतः फलान्वये बुद्धे फलविशिष्टभावनानिरूपितत्वेन फलनिरूपितत्वपर्यवसितेन करणत्वस्यादावाकांक्षितत्वेन बोधे च सति पश्चादेव तदाश्रययागनिरूपितकरणत्वस्य आकांक्षितत्वं वाच्यम्। उक्तबोधे च सोमादिभानाभावे सहोच्चरितानामेकधीजनकत्वनियमस्य[1] भङ्गापत्तेः। तद्भाने च सोमेन यजेतेत्यादावगत्या सोमादिपदेष्वपि मत्वर्थलक्षणाश्रयणं, तेषां कर्मणि योगाभावात् अप्रसिद्धार्थकरूढिकल्पनाया अन्याय्यत्वादिति प्रथमचतुर्थे 'नामधेये गुणश्रुतेः स्याद्विधानमितिचेत्' इत्यधिकरणे स्थितम्। तथाच फलकर्मिकायां भावनायां यागस्य तत्कर्मिकायां गुणस्यान्वयो[2] वैयधिकरण्येनान्वयः। सामानाधिकरण्येनान्वयस्तु तृतीयार्थभेदस्य यागेऽन्वयः, अभेदसम्बन्धेन तत्रान्वयो वा, मीमांसकमते धात्वर्थक्रियायां कर्मत्वेनैव करणत्वेनाप्यन्वयात्, धात्वर्थे द्वितीयान्तेनेव तृतीयान्तेनापि नाम्नोपस्थितार्थस्यान्वयसम्भवात्। यागगतस्य यजिबोधितस्य करणत्वस्य तृतीयान्तनाम्नापि क्रियायामन्वयबोधो वेति भावः। **मानान्तरेति।** जिज्ञासायाः कृतसाध्यत्वग्राहकमानेत्यर्थः। **विध्यन्वयाय** विध्याक्षिप्त-

---

[1] मेकत्वनियमस्य. [2] स्यान्वये च.

ब्रह्म' इत्यादौ चामुख्यार्थतायाः स्वीकृतत्वात् सर्वस्यापि वाक्यस्यावाच्ये ब्रह्मणि लक्षणाया एवेष्टत्वेन अमुख्यार्थत्व-निषेधायोगाच्च अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारणत्वाच्च । शाबरं तु वचनमर्थवाद-मुख्यत्वाय विधौ न लक्षणेत्येवंपरम् । तस्मान्न प्रत्यक्षं शब्दबाध्यमिति चेन्न; भावानवबोधात् । तात्पर्यविषयीभूतार्थबोधकत्वं हि मुख्यार्थत्वम्; न शक्यार्थमात्रबोधकत्वम् । अन्यार्थतात्पर्यकत्वाच्च अमुख्यार्थत्वम् । न लाक्षणिकत्वमात्रम् । तथाचाद्वैतागमस्य स्वतात्पर्यविषयीभूतार्थबोधकत्वनिर्वाहाय लक्षणाश्रयणेऽपि मुख्यार्थत्वमुपपन्नमित्यवोचाम । एवं च 'सोमेन यजेत' इत्यादिविशिष्टविधेर्विशेषणे तात्पर्याभावात्

कृतिसाध्यत्वान्वयाय । **वाक्यस्य** अद्वैतवाक्यस्य । **इष्टत्वेनेति** । 'अद्वैतवाक्यं तु अनन्यशेषत्वान्मुख्यार्थमेव' इत्युक्तवाचस्पतिवाक्येनेति शेषः । **तात्पर्यविषयीभूतेत्यादि** । स्वकीयमुख्यतात्पर्यविषयवाक्यार्थप्रतिपादकत्वमित्यर्थः । अर्थवादानां प्रतिपाद्यः प्राशस्त्यधीद्वारीभूतो वाक्यार्थोऽवान्तरतात्पर्यस्य विषयो न मुख्यतात्पर्यस्य प्राशस्त्यं मुख्यतात्पर्यविषयोऽपि न वाक्यार्थः । वाचस्पतिमते तु मुख्यपदं न देयं, प्राशस्त्यधीद्वारा वाक्यार्थे तात्पर्यानङ्गीकारात् । **विशेषणे तात्पर्याभावादिति** । विशेष्यविशेषणयोः तात्पर्यभेदे वाक्यभेदापत्तिः । विशिष्टविध्यन्यथानुपपत्त्या विशेषणविधिकल्पनाद्वारा विशेषणे तात्पर्यमिति न सम्भवति विशेषणविधिना विशेषणे प्रमिते विशिष्टविधिः, विशिष्टविधौ च सति तदन्यथानुपपत्त्या विशेषणविधेः कल्पनमित्यन्योन्याश्रयात् । अतो रेवत्यधिकरणकवारवन्तीयरूपविशेषण इव तात्पर्या[1]विषयेऽपि सोमादौ विशिष्टविधेः प्रामाण्यमिति भावः[2] ।

---

[1] तात्पर्य. [2] विशिष्टविधेः प्रामाण्याभावः.

मत्वर्थलक्षणायामपि स्वार्थापरित्यागाच्च नामुख्यार्थत्वम्। जिज्ञासापदे तु ज्ञाधातुना इष्यमाणज्ञानलक्षणाङ्गीकारानङ्गीकारमतभेदेऽपि सन्पदस्य विचारे जहल्लक्षणाभ्युपगमस्योभयत्र तुल्यत्वात्।

एतस्यैव 'रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' इत्यादावुक्तविशेषणस्य लौकिकप्रमाणाज्ञातत्वेन विशिष्टविधेः तद्धी[1]सापेक्षत्वादुक्तान्योन्याश्रयः । सोमेनेत्यादौ तु सोमादेः लौकिकमानज्ञातत्वान्न स इत्यत आह—**मत्वर्थलक्षणायामपीति** । सोमादिपदे सोमादिरूपस्वार्थसम्बन्धलक्षणायामपीत्यर्थः । यद्यपि पदमात्रस्य स्वार्थपरित्यागेऽपि तात्पर्यविषयवाक्यार्थबोधकत्वान्मुख्यार्थत्वमव्याहतमिति वक्ष्यते; तथापि पदस्य मुख्यार्थत्वात् वाक्यस्याप्ति तदिति कुचोद्यं परस्यानवकाशमित्याशयेनेदमुक्तम् । अमुख्यार्थपदघटितत्वेन वाक्यस्यामुख्यार्थत्वे पदमात्रस्य संसर्गलाक्षणिकत्वमते वाक्यमात्रम् । मतान्तरेऽपि सोऽयमित्याद्यखण्डार्थवाक्यं तथा स्यात् । अतः शक्याघटितार्थकपदघटितत्वमेवामुख्यार्थत्वं वाक्यस्य परेणापि वाच्यमिति तद्वीत्यापि प्रकृते न दोष इति भावः । **इष्यमाणज्ञानेत्यादि** । इष्यमाणत्वेन पदादनुपस्थितस्य साधनाकांक्षाविरहेण साधनत्वेन सम्बन्धेन विचारे तदन्वयासम्भवात्तेन रूपेण धातौ लक्षणेति श्रीमदाश्रमप्रभृतयः केचित्। तथा सति विचारस्यापि साधनत्वेन अनुपस्थितस्य साध्याकांक्षाविरहेण तेन रूपेण लक्ष्यत्वापत्तिः । अथ तथाऽनुपस्थितस्यापि विचारस्यान्वयार्हत्वे बाधकाभावः, अन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वानभ्युपगमात्, तर्हि धातौ लक्षणा व्यर्थेत्यपरे । **सन्पदस्येति** । यद्यपि प्रत्ययार्थस्य विचारस्य प्रकृत्यर्थज्ञानोद्देशेन विधानं न सम्भवति, एकपदोपस्थाप्ययोः 'वषट्कर्तुः प्रथमभक्षः' इत्यत्र भक्षप्राथम्ययोरिव उद्देश्यविधेयभावासम्भवात्; तथापि कर्तव्येत्यध्या[2]हृतपदार्थभावनायां

[1] तव. [2] कर्तव्य इत्यध्या.

शक्यार्थपरित्यागेऽपि विधितात्पर्यनिर्वाहात् नामुख्यार्थत्वम्। न हि वाक्यार्थप्रतीत्यन्यथानुपपत्त्या पदमात्रे लक्षणायामपि वाक्यस्यामुख्यार्थत्वम्। प्रतीतस्यार्थस्यानन्यशेषत्वेन मुख्यत्वात्। यत्र पुनः प्रतीत एवार्थोऽन्यशेषत्वेन कल्प्यते, तत्र वाक्यस्यामुख्यार्थत्वमेव। अन्यद्धि पदतात्पर्यं, अन्यच्च वाक्यतात्पर्यम्। 'सैन्धवमानय, गङ्गायां वसन्ति' इत्यादौ वाक्यतात्पर्यैक्येऽपि पदतात्पर्यभेदात्

ज्ञानसाधनविचारस्य करणत्वेनाथशब्दोपस्थितेष्यमाणमोक्षस्य कर्मत्वेना[1]-न्वय इति भाट्टमतरीत्या न दोषः। अस्मन्मते तु कर्तव्येत्यपि नाध्याहार्यं, ज्ञानरूपेष्टसाधनत्वस्य विचारे जिज्ञासापदेनैव लाभाद्विचारा-न्वितमुमुक्षानन्तर्यार्थका[2]थशब्दोपात्तमोक्षसाधनत्वस्य ज्ञाने पश्चाल्लाभ-सम्भवादिति। **अर्थस्य** वाक्यार्थस्य। **अनन्यशेषत्वेन** स्वप्रति-पादकवाक्यतात्पर्यविषयत्वेन। **अन्यशेषत्वेन** स्वप्रतिपादकवाक्यतात्पर्य-विषयप्राशस्त्याद्युपपादकत्वेन। द्वारभूते वाक्यार्थे तात्पर्य[3]स्वीकारात् विवरणकारादिमतेऽपि मुख्यतात्पर्यास्वीकारात् उक्तमुख्यार्थलक्षणं नास्ती-त्यर्थः। ननु स्वप्रतिपाद्यवाक्यार्थभिन्नतात्पर्यकत्वरूपमुख्यार्थकत्वं नार्थ-वादेषु सम्भवति, पदविधया तेषां प्राशस्त्याप्राशस्त्यबोधकत्वेन तत्ता-त्पर्याभावात्। प्राशस्त्यादिघटितविध्यर्थे तु सार्थवादविधेस्तात्पर्यं, न तु केवलार्थवादस्य। यदि प्राशस्त्यादावप्यर्थवादस्य तात्पर्यमुच्यते; तथापि तात्पर्यविषयार्थप्रतिपादकत्वरूपं मुख्यार्थत्वं स्यात्। न चार्थपदेन[4] वाक्यार्थनिवेशात् तद्दोष इति वाच्यम्; प्राशस्त्यादेरप्यर्थवादात्मक-वाक्यार्थत्वात्, अत आह—**अन्यद्धीति। वाक्यतात्पर्यैक्य इति।** लवणतुरगयोः सैन्धवपदतात्पर्यभेदेऽपि 'सैन्धवमानय' इति वाक्यस्य स्वघटकपदार्थयोः संसर्गे तात्पर्यैक्यमित्यर्थः। यद्यपि पदतात्पर्य इव वाक्यतात्पर्येऽपि लवणादिपदार्थभेदनिवेशः, तथापि वाक्यार्थस्यापूर्वत्वा-

[1] कर्तव्यत्वेना. [2] र्थात्मका. [3] तात्पर्या. [4] चार्थवादेन.

'विषं भुङ्क्ष्व' इत्यादौ पदतात्पर्याभेदेऽपि वाक्यतात्पर्यभेदात् । अतएव 'इयं गौः क्रय्या बहुक्षीरा' इत्यादिवाक्यार्थस्यावश्यं क्रेतव्येति विधिशेषत्वेन तत्प्राशस्त्यलक्षणकत्वात् 'सोऽरोदीत्' इत्यादिवाक्यार्थस्य च 'बर्हिषि रजतं न देयं हिरण्यं दक्षिणा' इति विधिशेषत्वेन रजतनिन्दाद्वारा तत्प्राशस्त्यलक्षकत्वात् 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति वाक्यार्थस्य 'शान्त उपासीत'

लवणकर्मतात्वेन[1] निवेशासम्भवात् सैन्धवपदार्थकर्मतात्वेन निवेशात् वाक्यतात्पर्यैक्यम् । अथवा ऐक्येपीत्यादेः पदार्थविषयकत्वेन ऐक्येऽपि पदतात्पर्यभेदात् संसर्गविषयकान्यत्वादित्यर्थः । **विषमित्यादि** । विष-भोजनेष्टसाधनत्वे तद्धीद्वारा द्विषदन्नभोजनानिष्ट[2]साधनत्वे च तात्पर्य-योर्भेदेऽपि विषादिपदानां विषादावेव तात्पर्यमित्यर्थः । तथाच स्वतात्पर्यविषयो यः स्वघटकपदार्थसंसर्गः तत्प्रतिपादकत्वं मुख्यार्थत्वं नार्थवादेषु, स्वघटकपदार्थसंसर्गभिन्नतात्पर्यकत्वममुख्यार्थत्वम्[3] तेषु प्राशस्त्यादितात्पर्यकत्वादस्त्येवेति भावेनाह—**अत एवेत्यादि। लक्षण-कत्वादिति** । तथाच पुरुषेच्छाघटिततात्पर्यस्य वेदे अभावेऽपि तत्प्रतीतिशक्तत्वरूपं पदतात्पर्यं अर्थवादेष्वव्याहतामिति भावः । **सोरोदीदित्यादीति** । " सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रुशीर्यत तद्रजतꣳहिरण्यमभवत्तस्माद्रजतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हि यो बर्हिषि ददाति पुराऽस्य संवत्सराद्गृहे रुदन्ति तस्माद्बर्हिषि रजतꣳ न देयम् " इत्यत्र बर्हिश्शब्दितयज्ञे रजतदानं निषिध्यते । ' यथाश्रद्धं दक्षिणां ददाति ' इत्यादिना सामान्यविहितदक्षिणादाने रजतस्य स्वेच्छाप्राप्तत्वेन शास्त्राप्राप्तत्वान्न विकल्पः । ' हिरण्यं दक्षिणा ' इति विधिशेषोप्य-भवदित्यन्तपूर्वोक्तस्य पश्चात् ' तस्माद्रजतमदक्षिण्यमश्रुजम् ' इत्यादि-वाक्य नहिनिन्दान्यायेन हिरण्यस्तुतिपरत्वात्तद्द्वारा तत्प्राशस्त्यलक्षकमिति

---

[1] कर्मतात्पर्यत्वेन. [2] भोजनादिष्ट. [3] कत्वं मुख्यार्थत्वं.

इति शमविधिशेषत्वेन अत्यनायाससिद्धत्वरूपतत्प्राशस्त्यलक्षकत्वादमुख्यत्वमेव। अतएव मानान्तरविरोध एव लक्षणेत्यपास्तम्। 'इयं गौः क्रय्या बहुक्षीरा' इत्यादिना प्राशस्त्यलक्षणायां व्याभिचारात्। परमतात्पर्यविषयीभूतार्थप्रतीतिनिर्वाहायैव सर्वार्थवादेषु लक्षणा। एतावांस्तु विशेषः—विधिप्राशस्त्ये लक्षणातः प्रागर्थवादवाक्यार्थज्ञानम्। तस्य प्रमाणान्तरविरोधे बाध एव। यथा 'प्रजापतिरात्मनो वपामुदक्खिदत्' इत्यादौ। अतएव तत्र गुणवादमात्रम्। प्रमाणान्तराप्राप्तौ तु अनुवादमात्रं 'अग्निर्हिमस्य भेषजम्' इत्यादौ। अतएव तदुभयत्रावाधिताज्ञातज्ञापकत्वरूपप्रामाण्यानिर्वाहादप्रामाण्यम्। यत्र पुनः प्रमाणान्तरप्राप्तिविरोधौ न स्तः तत्र प्रामाण्यशरीरनिर्वाहात् भूतार्थवादत्वम्।

हिरण्यदानविधिशेषः प्राशस्त्यलक्षकः। रजतदाननिषेधशेषवाक्यं तु अप्राशस्त्यलक्षकं बोध्यम्। **शमविधीति**। 'स क्रतुं कुर्वीत मनोमयः प्राणशरीरः' इति विहितक्रतुशब्दितध्यानाङ्गशमविधित्यर्थः। **आनायासिद्धत्वेति**। बलवदनिष्टाजनकत्वेत्यर्थः। **गुणवादमात्रमिति**। गौणार्थघटितमेव वाक्यार्थं द्वारीकृत्य प्राशस्त्यादिबोधकत्वम्, न तु बाधितं वाक्यार्थं द्वारीकृत्येत्यर्थः। **तदुभयत्रेति**। बाधितप्राप्तयोर्वाक्यार्थयोरित्यर्थः। **भूतार्थवादत्वमिति**। प्राशस्त्यादिधीद्वारा वाक्यार्थप्रमापकत्वमित्यर्थः। तात्पर्यविषय एव श्रुतेः प्राबल्यात् बाधिते च वाक्यार्थे द्वारभूते वाक्यस्य तात्पर्यास्वीकारात् वाचस्पतिमते तस्य न सिद्धिः। मतान्तरे द्वारीभूतवाक्यार्थे अवान्तरतात्पर्यस्वीकारेऽपि प्राप्त इव बाधिते तत्र न तत्स्वीकारः बाधकप्रमाणस्य व्यावहारिकप्रामाण्यावश्यकतया तद्विरोधेन 'यजमानः प्रस्तरः' इत्यादेः तादृशप्रामाण्यासंभवात् अनन्ताद्वैतश्रुतीनां परमतात्पर्यवतीनां तात्त्विकप्रामाण्यविरोधेन तादृशप्रामाण्यस्याप्यसम्भवात् मुख्यतात्पर्यविषयवाक्यार्थान्विते

यथा 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादौ। अयमेव देवताधिकरणन्यायः। ननु तर्हि 'आदित्यो यूपः' इत्यादौ वाक्या-

---

वाक्यार्थ[1] एव श्रुतेः मानान्तरापेक्षया प्रावल्याङ्गीकारात् प्रस्तरादिवाक्ये तदसम्भवात् गौणार्थघटितवाक्यार्थेनैव प्राशस्त्याद्युपपादनसम्भवात् बाधितार्थस्यानन्यथासिद्धप्रयोजनवत्त्वाभावात् तादृशप्रयोजनवत्त्वेव[2] श्रुतेस्तात्पर्यात्। अतएव तत्सिद्ध्यधिकरणे बाधितार्थकस्थले गौणार्थव्यवस्थापनात् न श्रुत्या[3] बाधितार्थसिद्धिः। यद्यपि मतान्तरे संसर्गप्रमितिशक्तत्वं वाक्यतात्पर्यं, तथापि वाचस्पतिमते निराकांक्षप्रमितिशक्तत्वस्यैव तत्त्वान्न भूतार्थवादानां वाक्यार्थीभूत[4] संसर्गतात्पर्यम्। यदि च समिदाद्यङ्गवाक्यानां स्वार्थे तात्पर्यमावश्यकी च मुख्यार्थता, तदा प्रयोजनवद्वाक्यार्थान्वयिसंसर्गो निवेश्यः। प्रयोजनं च इष्टत्वेन प्रतीयमानं स्वर्गादि। अस्ति च तादृशसंसर्गप्रमितिशक्तत्वं समिदादिवाक्ये; स्वर्गाद्यन्वितप्रधानकरणकभावनारूपवाक्यार्थे समिदादिवाक्यप्रमितसमिदाद्युपकारसंसर्गान्वयात्। नास्ति च भूतार्थवादे; 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादिवाक्यार्थस्य अन्यत्रानन्वयात्। निराकांक्षत्वं वा प्रयोजनवत्त्वं प्रकृते वाक्यार्थस्य बोध्यम्। संसर्गश्च सर्वमतेषु स्वघटकपदार्थप्रतियोगिको वाक्यतात्पर्यलक्षणे निवेश्यः। अन्यथा पदे अतिव्याप्तेः। वस्तुतस्तु संसर्गस्य तादृशस्य निवेशे अखण्डार्थके सोऽयमित्यादिवाक्ये अव्याप्त्यापत्तेः प्रयोजनवद्वाक्यार्थघटको यः पदवृत्तिद्वयप्रतिपाद्योऽर्थस्तत्प्रमाशक्तत्वं वाक्यतात्पर्यं वाच्यम्। अखण्डार्थवाक्ये अखण्डस्यैवार्थस्य प्रयोजनवतो वाक्यार्थस्य घटकः। स एव प्राशस्त्यान्वितवाक्यार्थस्य घटकः। प्राशस्त्य[5]मेकयैवार्थवादवाक्यलक्षणया[6] प्रतिपाद्यते, न तु पदवृत्तिद्वयेनेति न भूतार्थवादे मुख्यत्वापत्तिरिति ध्येयम्। **देवताधिकरणेति।** चतुर्लक्षणीस्थेत्यादिः। तेन द्वादशलक्षण्या-

---

[1] तात्पर्यविषयवाक्यार्थ. [2] प्रयोजनवत्त्वं च (वा). [3] स्थापनात् श्रुत्या. [4] वाक्यार्थे भूत. [5] प्राशस्त्यान्वित. [6] वादलक्षणया.

र्थप्रतीत्यर्थमेवं लक्षणाङ्गीकारादमुख्यार्थत्वं न स्यात् । न स्याद्यद्यादित्यसदृशो यूप इति वाक्यार्थपर्यवसानं स्यात् । किन्तु गुणवृत्त्या प्रतीतस्यापि वाक्यार्थस्य 'यूपे पशुं बध्नाति' इति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वमस्त्येव । तेनैव नामुख्यत्वमत्रैवादित्यपदगौणतयेति तत्सिद्धिपेटिकायां सर्वोदाहरणेष्ववान्तरवाक्यार्थप्रतीतये गुणवृत्तिप्रकाराः प्रदर्शिता इति द्रष्टव्यम् । कर्मप्राशस्त्यलक्षणा च सर्वार्थवादसाधारणी तत्रास्त्येवेति नामुख्यार्थत्वानुपपत्तिः । अत उपपन्नं प्रस्तरादिवाक्यवैषम्यमद्वैत-

---

मुक्तन्यायाभावेऽपि न क्षतिः । अध्वरमीमांसकैः भूतार्थवादानामपि स्वार्थे प्रामाण्यं न स्वीक्रियते । तन्मते 'यन्न दुःखेन' इत्यादिस्वर्गादिफलप्रतिपादकवाक्यानामपि प्रामाण्यं न स्यात्, अर्थाधियः प्रमात्वं विनापि स्वर्गस्तुतिधीद्वारा महावाक्यार्थोपकारकत्वसम्भवात् । अथ मानान्तरप्राप्तिविरोधहीनार्थविषयकत्वेन यन्न दुःखेनत्यादौ प्रमात्वं बलादायातीति वाच्यम्; तत् 'इन्द्रो वृत्राय' इत्यादावपि समानमित्याशयेनाह— **अयमेवेति । पर्यवसानं** तात्पर्यम् । वाचस्पत्यन्यमतेऽपि मुख्यार्थत्वं निरस्यति—**किन्त्वित्यादि । तेनैवेति ।** तथाच स्वार्थे मुख्यतात्पर्याभावात् मतान्तरेऽपि न मुख्यार्थतेति भावः । **कर्मप्राशस्त्येति ।** इष्टसाधनत्वविध्यर्थमते बलवदनिष्टाजनकत्वरूपप्राशस्त्यं धात्वर्थे कर्मण्येवान्वितम्; तस्यैव प्रवृत्तिविषयत्वात्, शब्दभावनाया विध्यर्थत्वेऽपि[1] करणेतिकर्तव्यताविशिष्टार्थभावनायां प्राशस्त्यस्यान्वयात् । उक्तभावनाकरणे धात्वर्थेपि तदन्वयोऽस्त्येव । उक्तार्थभावनायां प्राशस्त्यप्रकारशाब्दबोधस्य परं इतिकर्तव्यतात्वेन शब्दभावनायामन्वयः । विवेचितं चेदमस्माभिः सिद्धान्तबिन्दुटीकायाम् । **अस्त्येवेति ।** अन्यथा 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' इत्यर्थवादाधिकरणोक्तं विध्याकांक्षिता-

---

[1] विध्यर्थत्वमतेऽपि.

वाक्यस्य। यच्चोक्तमर्थवादमुख्यार्थत्वाय विधौ न लक्षणेत्येवं-परं शबरस्वामिवचनमिति, तन्न; अश्वप्रतिग्रहेष्टौ 'प्रतिगृह्णीयात्'

र्थबोधकत्वं न स्यात्। न वा अध्ययनविधिविषयत्वं स्यात्, प्रयोजनवदर्थापर्यवसानात्। न हि द्वारभूतो वाक्यार्थो विध्याकांक्षितोऽनाकांक्षितो वा प्रयोजनवान्। न च निष्प्रयोजने साकांक्षे श्रुतेर्मुख्यतात्पर्यम्। अतएव 'अर्थेऽनुपलब्धे तत्प्रमाणम्' इत्यनेन अर्थशब्दितसत्प्रयोजनेऽनधिगत एव तत्तात्पर्यमुक्तमिति भावः। **अश्वप्रतिग्रहेत्यादि।** "प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्छत् सपर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वंप्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत्" इत्यनारभ्यश्रुतेष्टिरग्निमत्कर्मसम्बन्ध्यश्वदाननिमित्तिका तादृशाश्वदानाङ्गं वेति पूर्वाधिकरणेन निर्णीतापि दातुः प्रतिग्रहितुर्वेति संशये, यद्यप्युपक्रमाधिकरणन्यायेन दातुरेव सम्भवति, "अनयत् प्रापयत्, देवतां दानसंप्रदानवरुणरूपां जलोदररूपेण परिणतां, आर्छत् प्राप्तवान्, वरुणपाशात् जलोदरात्, गृह्णाति जलोदररूपेण प्राप्नोति" इत्यर्थात्; तथापि मैत्रायणीयशाखायां—"अथैषोऽश्वः प्रतिगृह्यते स वा उभयतोदन्प्रतिगृह्यते निर्बभस्त्यस्येन्द्रियं च पशूंश्च वरुणो वा अश्वो वरुणदैवत्यो यो वा अश्वं प्रतिगृह्णाति वरुणं स प्रदीति तदश्वहविषा यष्टव्यं निर्वरुणत्वाय चतुष्कपाला भवन्ति चतुष्पाद्धयश्वः कपालैरेवैनमाप्नोति यावन्तोऽश्वास्तावन्तः पुरोडशा भवन्ति सर्वत एवैनं मुञ्चति" इति वाक्ये प्रतिग्रहोपक्रमाया एवैतदिष्टेराम्नानात् तदनुरोधेन शाखान्तरीयोक्तवाक्यीयोपक्रमस्थेऽनयदित्यादिपदे प्रतिग्रहलक्षणेति प्रतिग्रहीतुरेवेयमिति प्राप्ते, दातुरेवेयम्, मैत्रायणीयवाक्ये तथावगमेऽपि उक्तवाक्ये प्रबलोपक्रमे लक्षणायां मानाभावात् तद्बलेन

इति विधौ प्रतिग्राहयेदिति व्यवधारणकल्पनया अर्थवादानुसारेण प्रयोजकव्यापारलक्षणाया अङ्गीकरणात् । तस्माद्विधौ

दातुरिष्टिरित्यत्र बाधकाभावात् मैत्रायणीयवाक्योक्तदूरस्थ[1] कर्मानुवादेन अश्वदानरूपोद्देश्यसम्बन्धबोधनानुपपत्तेः अस्य वाक्यस्य कर्मान्तरविधायकत्वसम्भवात् नामादीनामुपस्थापकानामभावेन शाखान्ताराधिकरणन्यायासम्भवात् एतद्वाक्यीयदातुरुपक्रमानुरोधेन[2] मैत्रायणीयवाक्यीयोपक्रमस्यापि प्रयोजककर्तृत्वपरत्वव्याख्यानेन मैत्रायणीयवाक्योक्तकर्मण एव उक्तवाक्ये विधानसम्भवात् मैत्रायणीयवाक्योपक्रमस्यापि दातुरिष्टिपरत्वस्य वक्ष्यमाणत्वाच्च । तस्मादुपक्रमानुरोधेन विधिस्थे प्रतिगृह्णातौ प्रतिग्रहप्रयोजकव्यापारे दाने लक्षणा । अथवा आख्यातेन साक्षात् परम्परासाधारणकर्तृसामान्यमाक्षिप्यते । अन्यत्र साक्षात् तदाक्षेपेऽपि प्रकृते उपक्रमानुरोधेन तदसम्भवात् परम्परया तदाक्षेपः । अथापि साक्षात्कर्तुरौत्सर्गिकापेक्षस्य त्यागेन परम्पराकर्तुराक्षेपो न मुख्य इति लक्षणेति व्यवह्रियते इति तृतीयचतुर्थे चिन्तितम् । **व्यवधारणेति** । प्रयोजकीभूतदातृपरत्वेत्यर्थः । प्रयोजकव्यापारो दानं लक्षणाशब्दस्याक्षेपार्थ[3] कत्वपक्षे बहुव्रीहिणा आदातेति[4] तदर्थः । **विधावित्यादि** । मुख्यतात्पर्यविषयो वाक्यार्थो नान्यशेष इत्यर्थः । नन्वेवं—न चानन्यपरं वाक्यमुपचरितार्थं युक्तम्; उक्तं हि—'न विधौ परश्शब्दार्थः' इतीति भामत्यां 'विधौ विधायकशब्दे परो लक्ष्यश्शब्दार्थो न भवति' इति कल्पतरुव्याख्यानं न युज्यत इति चेन्न; भावानवबोधात्, उपचरितार्थत्वं हि तात्पर्यविषयीभूतब्रह्मात्माभेदान्यार्थबोधकत्वम् । तच्च कर्मविध्यपेक्षितकर्तृस्तुतिबोधकतया उपासनाबोधकतया वा तत्रोक्ताभेदसिद्ध्यननुकूलो लक्ष्योऽर्थो महावाक्ये न सम्भवति; तस्योक्ताभेदपरत्वादित्याशयेन लक्ष्यो नार्थ इत्यनेन

[1] वाक्योक्तरूपस्य दूरस्थ. [2] क्रमानुबोधेन. [3] स्यापेक्षार्थं. [4] दातेति.

तात्पर्यवृत्तिवाक्ये प्रतीयमानवाक्यातिरिक्तोऽन्यः शेषी नास्तीत्येवंपरमेव तद्वचनम् । अतस्सिद्धमद्वैतागमस्य लाक्षणिकत्वेऽपि मुख्यार्थत्वात् प्रत्यक्षबाधकत्वमिति शिवम् ॥

इति प्रत्याक्षस्यागमबाध्यत्वम्.

तात्पर्यविषयसिद्ध्यननुकूललक्ष्यो नार्थ इत्युक्तम् । विधायकवाक्ये अन्यशेषो नार्थ इत्युक्ते तु उपासनापरत्वखण्डनं न स्यात् । अतस्तथा नोक्तम् । लक्ष्यमात्रनिषेधे तु स्वसिद्धान्तविरोध एव; महावाक्ये भागत्यागलक्षणास्वीकारात्, प्रतिगृह्णीयादित्यादौ दाने, 'उच्चै ऋचा क्रियते' इत्यादौ ऋगादिपदे ऋग्वेदादौ लक्षणायाः सर्वसम्मतत्वाच्च । **मुख्यार्थत्वात्** । मुख्यतात्पर्यविषयबोधकत्वात् । **बाधकत्वमिति** । मुख्यतात्पर्यविषये श्रुतेः प्राबल्यस्य सर्वसम्मतत्वात् वाचस्पतिमत इव मतान्तरेऽपि बाधकत्वमित्यर्थः । यत्तु—"वाक्यशेषप्रमाणान्तरसंवादेत्याद्ययुक्तम्; परीक्ष(क्षा)या[1] अद्वैतश्रुतिसमानप्रामाण्यस्य प्रत्यक्षादिषु सिद्धत्वेन विरोधात् । षड्विधलिङ्गैः गतिसामान्येन चेत्याद्ययुक्तं; अन्योन्याश्रयात् । सिद्धेऽखण्डतात्पर्ये तन्निर्वाहाय अखण्डलक्षणया मानान्तरा[2]विरोधः । मानान्तरविरोधे च सति अखण्डतात्पर्य[3] सिद्धिः । लौकिकवाक्यस्य मानान्तरविरुद्धतात्पर्यकत्वेऽपि वेदवाक्यस्य न्यायगम्यतात्पर्यस्य मानान्तराविरुद्ध एव कल्पनात्तात्पर्यविषयार्थबोधकत्वं मुख्यार्थत्वमित्याद्ययुक्तम्, प्रत्यक्षस्यागमवाक्यबाधकत्वाभावे तत्त्वमस्यादौ भागत्यागलक्षणा, सोमेनेत्यादौ मत्वर्थलक्षणा च न स्यात् । न हि तत्त्वंपदवाच्ययोः सोमयागाद्योश्चाभेदबोधने प्रत्यक्षविरोधात् अन्यदोषः[4] । एवं सन्पदे[5]

---

[1]पररीत्या. [2]लक्षणाया मानान्तर. [3]अखण्डार्थत्व. [4]अन्यशेषः [5]एवमन्यदेव.

विचारलक्षणापि न स्यात् । न च तात्पर्यानुरोधात् तत्त्वमादिपदेषु लक्षणा, मानान्तरविरुद्धे तात्पर्यस्यैवाभावात् । किञ्च अन्यशेषत्वस्य अमुख्यत्वरूपत्वे प्रस्तरादिवाक्यमन्यशेषत्वात् अमुख्यमिति हेतुहेतुमत्त्वयोरसङ्गतिः; अन्यशेषवाक्यार्थबोधके समिधो यजतीत्यादिवेदे तण्डुलान् पचतीत्यादिलौकिकवाक्ये च मुख्यार्थत्वव्यवहारो न स्यात् । अश्वप्रतिग्रहेत्याद्ययुक्तम्; न हि तत्रार्थवादानुसारेण विधौ लक्षणा, किन्तु उपक्रमप्राबल्यात् । किञ्च तन्त्रसारे मैत्रायणीयशाखायां दात्रुपक्रमतोऽग्निमत्कर्माङ्गत्ववशादेव दातुरिष्टिः प्रतीयत इत्युक्तत्वेन वचनात् अग्निमत्कर्मदानाङ्गत्वात् दातुरिष्टिर्नार्थवादप्राबल्यात्" इति प्रलपितम्; तत् परवाक्यार्था[1]नवबोधादेव । तथाहि—अद्वैतश्रुतिप्रत्यक्षयोः प्रामाण्ये मिथ्यात्वेन यदि समे, तदेष्टापत्तिरुक्तैवाचार्यैः । अथ विषयतात्त्विकत्वेन, तदापि तन्निराकृतमेव । षड्विधलिङ्गैरित्यादि युक्तमेव, न्यायाधीनस्य प्रबलश्रुतितात्पर्यनिर्णयस्य दुर्बलमानान्तराविरोधनिरपेक्षत्वात् । श्रुतितात्पर्यनिर्णायकोपक्रमादीनामपि प्राबल्यप्रयोजकं निरवकाशत्वादिकमुक्तं, वक्ष्यते च । अतएव तात्पर्यविषयार्थेत्यादि युक्तमेव; निर्णीततात्पर्यानुरोधेन तत्त्वमादिपदानामखण्डलक्षणाभ्युपगमात् सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविशेषणयोः सोमयागाद्योरभेदे च निर्णीतश्रुतितात्पर्याभावेन तदंशे प्रत्यक्षाद्यविरोधस्य अपेक्षणीयत्वात् तात्पर्यविषये हि श्रुतिः प्रबलेत्याद्युक्तम् । दर्शनरूपफलसाधनत्वाद्यनुरोधेन 'द्रष्टव्यः श्रोतव्य' इत्यादेर्विचारविधायकत्वनिर्णयात् तदेकवाक्यतया 'तद्विजिज्ञासस्व' इत्यादेः तन्मूलक—'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्य च धात्वर्थनिर्णयात्तदनुरोधाज्जिज्ञासापदे विचारलक्षणा युक्ता । अन्यशेषत्वममुख्यत्वमिति[2] तु परस्य भ्रमः; अन्यार्थतात्पर्यकत्वममुख्यार्थकत्व[3]मित्यनेन स्वप्रतिपाद्यवाक्यार्थभिन्नतात्पर्यकत्वस्यैव अमुख्यार्थकत्वरूपत्वेना-

[1] तच्छाखावाक्यार्था. [2] शेषत्वं मुख्यत्व. [3] कत्वं मुख्यार्थ.

चार्यैरुक्तत्वात् । अतएव यत्र वाक्यार्थोऽन्यशेषत्वेन कल्प्यते, तत्रामुख्यत्वमित्यनेनोक्तामुख्यार्थकत्वे स्वतात्पर्यविषयप्रतीत्युपपादकवाक्यार्थप्रतिपादकत्वरूपमन्यशेषार्थकवाक्यत्वं हेतुतयोक्तमाचार्यैरपीति अन्यशेषवाक्यार्थेत्याद्युक्तम्[1] । न ह्यंगवाक्यमुख्यार्थत्वे व्यवहारः सम्प्रतिपन्नः । तण्डुलान् पचतीत्यादिकं तु अनन्यशेषत्वात् मुख्यार्थमेव । न हि वाक्यार्थस्यान्योपकारकत्वमन्यशेषत्वं; येन तण्डुलपाककृतेः भोजनाद्युपकारत्वेन अन्यशेषता स्यात् । किन्तु स्वप्रतिपादकतात्पर्यविषयप्रतीत्युपपादकधीविषय[2]त्वम् । तथाच किं पचतीति प्रश्नोत्तरोक्तवाक्यस्य स्वार्थ एव तात्पर्यात् नान्यशेषत्वम् । यदिचोक्तरूपान्यशेषत्वं तत्रास्ति, तदा तत्रामुख्यार्थत्वमिष्टमेव । समिदादिवाक्यानां मुख्यार्थत्वप्रकारोऽपि दर्शित एव । न हि तत्रार्थवादेत्यादिकं तु शोभते । अर्थवादानुसारेण विधौ यत्र लक्षणाप्रसक्तिः तत्रैव हि त्वया निषिध्यते । सा चार्थवादस्थोपक्रमाद्यनुरोधेनैवेति तत्र तन्निषेधोसङ्गत एव । तदभावे तन्निषेधस्तु उन्मत्तप्रलापः । मन्मते च मुख्यतात्पर्यविषयस्य वाक्यार्थस्यातादृशत्वेन भ्रान्तिमत्पुरुषं प्रति तादृशहेतुना अन्यशेषत्वप्रतिषेधकं न विधावित्यादिवाक्यं युज्यते । न च 'वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति' इत्युक्तवाक्यान्तर्गतार्थवादस्य[3] प्रतिगृह्णातीत्युपसंहार एव लक्षणा, न तु विधाविति वाच्यम्; विधौ लक्षणां विना दातुरिष्ट्यसिद्धेः । मैत्रायणीयवाक्यगतिस्तूक्तैव । वचनाद्दातुरिष्टौ त्वधिकरणमेव व्यर्थं स्यात् । तन्नसारोक्तवाक्यं तु न युक्तम् । तथाहि—मैत्रायणीयोक्तवाक्ये 'यो वा अश्वं प्रतिगृह्णाति वरुणं स प्रदीति तदश्वहविषा यष्टव्यं निर्वरुणत्वाय' इत्यनेनाश्वग्रहीतुरश्वदं प्रति वरुणरूपजलोदरदातृत्वोक्तेः अश्वदातुरेव सवरुणत्वप्रतीतोर्निर्वरुणत्वाय तस्यैव यष्टृत्वं प्रतीयते । एवञ्च पूर्ववाक्ये प्रतिगृह्यत इति षष्ठ्यनादरे ग्रहीतारमनादृत्य सोऽश्वोऽस्य

[1] त्याद्युक्तम्. [2] पादकशब्दविषय. [3] वादस्थ.

अपच्छेदन्यायवैषम्यभङ्गः

किञ्चापच्छेदन्यायेनाप्यागमस्य प्राबल्यम् । यथा हि 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इत्यधिकरणे उद्गात्रपच्छेद-

---

दातुरिन्द्रियादीनि निर्बभस्ति भर्त्सयतीत्यर्थः । किञ्च वेदोपक्रमाधिकरणादावग्नेर्ऋग्वेद इत्याद्यर्थवादस्थग्वेदादिरूपोपक्रमाद्यनुरोधेन 'उच्चैर्ऋचा क्रियते' इत्यादिविधिस्थगर्गादिपदेषु ऋग्वेदाद्यर्थलक्षणा सर्वसम्मतैवेत्यर्थवादानुरोधेन विधौ न लक्षणेति प्रलाप एव ॥

तर्कैस्सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
अक्षस्यागमबाध्यत्वं द्योतितं ध्वान्तनाशकम् ॥

इति प्रत्यक्षस्यागमबाध्यत्वम्.

किञ्चापच्छेदेति । "अध्वर्यु विनिष्क्रामन्तं प्रस्तोता सन्तनुयात्तं प्रतिहर्ता, तमुद्गाता, तं ब्रह्मा, तं यजमानः" इति अध्वर्य्वादिकच्छं धृत्वा प्रस्तोत्रादीनां बहिष्पवमानस्तोत्रार्थं ज्योतिष्टोमे गमनमुक्तम् । तत्र विच्छेदे प्रायश्चित्तं–यदि प्रस्तोता अपच्छिन्द्यात् ब्रह्मणे वरं दद्यात्, यदि प्रतिहर्ता सर्ववेदसं दद्यात्, यद्युद्गाता अदक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्यात् यत्पूर्वस्मिन् दास्यन् स्यात् । तत्रोभाभ्यां क्रियमाणे विच्छेदे प्रायश्चित्तमस्ति न वेति संशये, उभाभ्यां क्रियमाणस्य एकैककर्तृकत्वेन निर्देशासम्भवात् निमित्ताभावात् तत्र तच्चास्तीति प्राप्ते, क्रियानुकूलकृतिरूपकर्तृत्वस्य प्रत्येकपर्याप्तत्वात् उभयकर्तृकविच्छेदेऽपि निमित्तसत्त्वात्[1] तदस्त्येवेति युगपदुभाभ्यां क्रियमाणविच्छेदेऽपि प्रायश्चित्तमावश्यकमिति 'विभागश्रुतेः प्रायश्चित्तं यौगपद्येन विद्यते' इत्यधिकरणे षष्ठपञ्चमे स्थितम् । तदुत्तरं च 'विप्रतिषेधाद्विकल्पः स्यात्' इत्यधिकरणे स्थितम् । प्रतिहर्त्रुद्गात्रोः

---

[1] तत्सत्वात्.

युगपदपच्छेदे प्रायश्चित्तद्वयं समुच्चीयते, सर्वस्वदानस्य पुनः प्रयोगे कर्तुं शक्यत्वात्। अथवा दक्षिणोत्कर्षविशिष्टपुनःप्रयोगमात्रमुद्गात्रपच्छेद-निमित्तकं, न[1] त्वदक्षिण्यमपि; तस्यार्थिकत्वेनानुवाद्यत्वात् । अतः पूर्वप्रयोगे सर्वस्वदानेऽपि न विरोध इति प्राप्ते, अदक्षिण्यस्य[2] नैमित्ति-कत्वाभावेऽपि पूर्वप्रयोगे सर्वस्वदाने दक्षिणोत्कर्षस्याप्यनुपपत्तेः प्रथम-प्रयोगे न सर्वस्वदानम् । नापि पुनःप्रयोगे, प्रतिहर्त्रपच्छेदवति प्रयोग एव तद्विधानात् । अन्यथा एकस्मिन् प्रयोगे प्रतिहर्तुरपच्छेदे कृतो-स्तद्वत्त्वाविशेषादुत्तरसर्वप्रयोगेषु पाक्षिकतया तदापत्तेः । निमित्तवति प्रयोगे[3] नैमित्तिकस्य दैवादकरणे प्रयोगान्तरेऽपि तदापत्तेः । अतो विरोधाददाक्षिण्य[4]सर्वस्वदानयोर्विकल्पः । पुनःप्रयोगमात्रं त्वविरोधाद-दाक्षिण्येन[5] समुच्चीयते । तदपि विकल्प्यत इत्यन्ये । तदुत्तराधि-करणे—'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इत्यत्र स्थितम् । यदा क्रमेणापच्छेदस्तदा तन्निमित्तकयोः विरोधे पूर्वनिमित्तकमेव कार्यं, असञ्जातविरोधित्वात् । अथवा विकल्पः, नैमित्तिकशास्त्रयोः सामान्य-विशेषविषयकत्वादेः अभावेन समबलत्वात्, अनुष्ठानवेलायां पौर्वा-पर्यस्य शास्त्रार्थानिर्णायकत्वादिति प्राप्ते, नैमित्तिकेन सर्वस्वदानेन नित्यस्य द्वादशशतादेरिव परापच्छेदनिमित्तकेन पूर्वापच्छेदनिमित्तकस्य बाधः । नित्यनैमित्तिकशास्त्रयोः पूर्वपरकालप्रवृत्तत्वं पूर्वप्रवृत्तस्य पश्चात्प्रवृत्तिरहितप्रयोगविषयकत्वकल्पना[6]सम्भवश्चेति हि द्वयं पूर्व-परापच्छेदनिमित्तकप्रायश्चित्तशास्त्रयोरप्यविशिष्टम् । तथाच शास्त्रार्थाव-धारणवेलायामेव पश्चात्तनानुष्ठानकालीनयोः पूर्वापरनिमित्तकप्रायश्चित्त-कर्तव्यताबुद्ध्योः[7] पौर्वापर्यमालोच्य व्यवस्थितविषयकत्वकल्पना युक्तैव । न च सञ्जात[8]विरोधित्वेन परविज्ञानस्यानुपपत्तिरिति वाच्यम्; इदं

---

[1] त्वदाक्षिण्य. [2] अदाक्षिण्यस्य. [3] निमित्तप्रतियोगे. [4] ददाक्षिण्य. [5] ददाक्षिण्येन. [6] त्वस्य कल्पना. [7] बुद्धेः. [8] असञ्जात.

रजतमिति ज्ञानं बाधित्वा नेदं रजतमिति ज्ञानस्योत्पत्तेः यत्र पूर्वोत्तर-ज्ञानयोः मिथोपेक्षणीयता, तत्रैव पूर्वस्य परेण बाधनासम्भवात् पूर्वा[1]-विरुद्धविषयकतया अपरस्योत्पत्तेः पूर्वस्य परोपमर्द[2]कत्वात्; यत्र तु न सा, तत्र पूर्वं बाधित्वाऽपि परोत्पत्तिसम्भवात्, बाधितस्य सज्ञा-तस्याविरोधि[3]त्वात् परोत्पत्तेर्निर्विघ्नत्वात्। अतएव उत्पन्ने परज्ञानेऽपि न पूर्वज्ञानं भ्रमत्वज्ञापकं,[4] बाधितत्वात्। न च पूर्वस्य प्रथमतः कल्पितमपि भ्रमत्वं पश्चात्परबाधकल्पनया त्यज्यत इति वाच्यम्; परस्य बाधकान्तराभावात् प्रथमकल्पितत्यागे बीजाभावात्। न च पूर्वमेव परं बाधित्वा जायत इति वाच्यम्; पूर्वज्ञानोत्पत्तेः पूर्वं पर-स्यैवाभावात्, तद्बाधं विनापि पूर्वोत्पत्तिसम्भवेन अन्यथानुपपत्त्यभावात्। यत्तु—"पूर्वज्ञाने विस्मृते तेन परस्य भ्रमत्वकल्पनार्थं पूर्वज्ञानस्मरणं कल्प्यमिति परभ्रमत्वकल्पने गौरवम्; पूर्वभ्रमत्वकल्पनापक्षे तु पूर्व-स्मिन् विस्मृतेऽपि न क्षतिः, उत्तरज्ञानविषयस्यैव अनुष्ठानसम्भवात्" इति, तन्न; परज्ञाने विस्मृतेऽपि च तेन पूर्वभ्रमत्वकल्पनाय तद्विषयानु-ष्ठानाय च परज्ञानस्मृतिकल्पनागौरवं तुल्यम्। तदुत्तरं च—'यद्युद्गाता जघन्यः स्यात् पुनर्यज्ञे सर्ववेदसं दद्याद्यथेतरस्मिन्' इत्यधिकरणे स्थितम्। यदा प्रतिहर्त्रपच्छेदोत्तरमुद्गात्रपच्छेदः, तदा पुनःप्रयोगे सर्वस्वदानं द्वादशशतं वेति संशये 'यत्पूर्वस्मिन् दास्यन्' इत्यनेन क्रतुस्वभावतो यद्देयं तदुच्यत इति द्वादशशतमेव देयम्। यदा स्वाभाविकं द्वादशशतं प्रतिहर्त्रपच्छेदनिमित्तकंच सर्वस्वं दास्यन्नासीदित्युभयस्यैव प्राप्तत्वाद्विकल्प इति प्राप्ते—द्वादशशतं न दास्यन्नासीत्तस्य[5] सर्वस्वेन बाधितत्वात्। यद्यपि सर्वस्वमप्यदाक्षिण्येन दक्षिणोत्कर्षेण वा बाधितं पूर्वप्रयोगे, तथापि परनिमित्तात् पूर्वं यद्देयत्वेन प्रसक्तं तत्सर्वस्वमेवेति तदेव परनिमित्तो-

[1] पूर्व. [2] परानुपमर्द. [3] संजाताविरोधि. [4] व्यापकं. [5] द्वादशशतं दास्यन्नासीदित्यस्य.

त्तरमपि देयम् । यदा तु प्रतिहर्त्रपच्छेदो जघन्यः तदा पूर्वप्रयोग एव सर्वस्वं देयम्, न तु पूर्वापच्छेदनिमित्तकः पुनःप्रयोगः कार्यः । यद्यपि सर्वस्वदानेन सहादाक्षिण्यस्यैव विरोधः, तथाप्यदाक्षिण्यपुनःप्रयोगयोः समुच्चितयोरेव नैमित्तिकत्वेन एकाभावे इतरस्याप्यभावौचित्यात् 'केशश्मश्रु वपते' इत्यादौ श्मश्रुभावात् पत्न्याः[1] केशवपनाभाववत् । यद्यपि च दक्षिणोत्कर्षस्य पुनःप्रयोगाङ्गतया विधानावश्यकत्वादेव पूर्वप्रयोगे निर्दक्षिणत्वस्यार्थिकत्वाददक्षिणं [2]तमिष्ट्वेत्यनुवादः, तथाप्यनुवादस्य पाक्षिकत्वभयात् निर्दक्षिणत्वलोपे पुनःप्रयोगलोपः । वस्तुतस्तु स नानुवाद; 'तत्र तद्दद्यात्' इत्यनेन पूर्वप्रयोगे दातव्यदक्षिणयोः पुनःप्रयोगाङ्गतया विधानेऽपि पूर्वप्रयोगाङ्गकत्रानत्यर्थं पूर्वप्रयोगेऽपि दक्षिणाया आवश्यकत्वेन अदाक्षिण्यस्याप्राप्तत्वात्तद्विधानस्यावश्यकत्वात् । यद्यप्येवमुद्गातृमात्रापच्छेदेन पुनःप्रयोगे ज्योतिष्टोमत्वादेव द्वादशशतादिप्राप्तया 'तत्र तद्दद्यात्' इति तत्प्रापकतया न सार्थकम्; तथापि तत्र पूर्वप्रयोगे एकविंशत्यादिदक्षिणापक्षकरणेपि पुनःप्रयोगे द्वादशशतादिप्राप्तया तन्निवर्तकत्वेन प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे पुनःप्रयोगे द्वादशशतादिनिवर्तकत्वेन च तत् सार्थकमेव । तथाच पश्चात् प्रतिहार्त्रपच्छेदे पुनःप्रयोगस्य न बाधः । 'केशश्मश्रु वपते' इत्यत्र तु द्वन्द्वसमासेन उपादेयगतत्वेन साहित्यस्योक्तत्वात् तद्विशिष्टमङ्गं; प्रकृते तु अरुणैकहायन्योरिव प्रकृतदेवतापनयदेवतान्तरसंयोगयोरिव प्रत्येकमेव क्रियान्वयान्नैकलोपे परलोपः । न ह्यारुण्यस्य उपांशुयाजे देवतान्तरसंयोगस्य वा अभावे एकहायन्या सोमक्रयस्य नानुष्ठानम् । अपनयस्य लोपेन उपांशुयाजस्य वा अनुष्ठानम्।[3] 'तण्डुलान् विभजेत्'इत्यपनयवाक्ये हि [4]दर्शहविर्मात्रस्य पूर्वदेवतापनयो विधीयत इत्युपांशुयाजहविषोऽपि तदपनयात् 'अग्नये

[1] श्मश्रुभावापत्त्या. [2] कत्वाद्दक्षिणान्त. [3] उपांशुयाजसवनानुष्ठानम्. [4] दार्शिक.

निमित्तकादक्षिणयागेन परेण प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणयागस्य पूर्वसिद्धनिमित्तकस्य बाध इति स्थितम्, तथेहापि उदीच्यागमेन पूर्वस्य प्रत्यक्षस्य बाधः । ननु प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणयागस्य प्रतिहर्त्रपच्छेदे युगपदपच्छेदे क्रमेणापच्छेदेऽपि प्रतिहर्त्रपच्छेदस्य पश्चात्त्वे च सावकाश इति युक्तः उद्गात्रपच्छेदनिमित्तकादक्षिणयागेन बाधः । अन्यथा 'यदि प्रतिहर्त्रा अपाच्छिद्येत सर्ववेदसं दद्यात्' इति शास्त्रमप्रमाणं स्यात् । अतएव 'विप्रतिषेधाद्विकल्पः स्यात्' इत्यधिकरणे द्वयोः युगपदपच्छेदे विकल्प उक्तः । किंच 'यद्युद्गाता

दात्रे' इत्यादिना उपांशुयाजान्यहविषामेव देवतान्तरसंयोगविधानादुपांशु[1] याजस्याननुष्ठानमुक्तं षष्ठपञ्चमे । दर्शेष्युपांशुयाजमङ्गीकृत्य तस्मात्प्रतिहर्तुः पश्चादपच्छदे पूर्वप्रयोगे सर्वस्वं दत्वा पुनःप्रयोगेऽपि सर्वस्वं देयम् । यदा तु आद्यप्रयोगे उद्गातुरपच्छेदः, तन्निमित्तकपुनःप्रयोगे च प्रतिहर्तुरपच्छेदः, तदा तत्र सर्वस्वं देयम्; नैमित्तिकत्वेन नित्यदक्षिणा[2]बाधकत्वात् । न च पुनःप्रयोगस्य प्रायश्चित्ततया पूर्वप्रयोगाङ्गत्वात् 'तत्र तद्द्या' दित्यनेन पूर्वप्रयोगाङ्गदक्षिणाया एव उत्तरप्रयोगवृत्तित्वमात्रविधानात् अङ्गगुणविरोधन्यायेन अङ्गभूतपुनःप्रयोगाङ्गसर्वस्वदक्षिणाबाधेन प्रधानभूतपूर्वप्रयोगाङ्गद्वादशशतादि देयमिति वाच्यम्; अपूर्वविधित्वात् दृष्टार्थत्वादिप्रसङ्गेन पूर्वप्रयोगाङ्गदक्षिणाया उत्तरप्रयोगवृत्तित्वविधानानुपपत्तेः पुनःप्रयोगाङ्गदक्षिणाया एव पुनःप्रयोगवृत्तित्वात् । **परेणेति** । परसिद्धनिमित्तकेनेत्यर्थः । **अन्यथेति** । निरवकाशत्वेपि बाध्यत्व इत्यर्थः । **इतरस्मिन्नित्याधिकरण इति** । इत्युक्तमित्यत्रान्वेति । निमित्तकपूर्वप्रयोगस्थेति[3] पाठः । निमित्तकान्तं सर्वस्वविशेषणम् । प्रयोगस्येति पाठे तन्निमित्तकसर्वस्वयोगात्

---

[1] संयोगे विधिना उपांशु. [2] कत्वेन दक्षिणा. [3] प्रयोगस्येति.

जघन्यः स्यात् पुनर्यज्ञे सर्ववेदसं दद्यात् अथेतरस्मिन्' इत्यधिकरणे उद्गात्रपच्छेदस्य प्रतिहर्त्रपच्छेदात्परत्वे उद्गात्रपच्छेदनिमित्तं पूर्वं प्रयोगं दक्षिणाहीनं सम्पाद्य कर्तव्यज्योतिष्टोमस्य द्वितीयप्रयोगे 'तद्दद्यात् यत्पूर्वस्मिन् दास्यन् स्यात्' इति श्रुत्युक्ता या दक्षिणा सा पूर्वभाविप्रतिहर्त्रपच्छेदनिमित्तकपूर्वप्रयोगस्य सर्वस्वदित्साया अबाधेन सर्वस्वरूपैव। न तु या ज्योतिष्टोमे नित्या द्वादशशतरूपा। तस्मान्न प्रतिहर्त्रपच्छेदस्य सर्वथा बाधः, किन्तु प्रयोगान्तरे निक्षेप इत्युक्तम्। उक्तं हि टुप्टीकायां 'तस्य प्रयोगान्तरे निक्षेपः' इति। अपिच क्रमिकनिमित्तद्वयेन क्रमेणादक्षिणसर्वस्वदक्षिणयोः प्रयोगयोः सम्भवेन विरोध एव नास्ति। यथा बदरीफले क्रमिकनिमित्तवतोः श्यामरक्तरूपयोः। उक्तं ह्यपच्छेदाधिकरणे 'नैमित्तिकशास्त्रस्य ह्ययमर्थः निमित्तोपजननात् प्रागन्यथाकर्तव्योऽपि क्रतुर्निमित्तेऽसति एवं कर्तव्यः' इति। तस्मादपच्छेदन्यायः सावकाशविषयः। अद्वैतागमेन प्रत्यक्षबाधे तु न प्रत्यक्षप्रामाण्यस्या-

---

प्रयोगस्य तन्निमित्तकतोक्तिः। **निक्षेप इति**। यद्यप्युक्तरीत्या प्रयोगान्तरे निक्षिप्ता तदङ्गमेवेति पूर्वप्रयोगाङ्गत्वं तस्यास्सर्वथा बाधितमेव, तथापि भ्रान्त्यैव परेणेदमुक्तम्। **एवं कर्तव्य इतीति**। यद्यपि नानेन वाक्येनाविरोधः[1] प्रतिपाद्यते, किन्तु बाध्यबाधकभाव एव। पूर्वं परस्य बाध्यं न तु परं पूर्वस्येति सयुक्तिकमुपपाद्य तस्मात्पूर्वदौर्बल्यमिति सौत्रपदेन तत्र सूत्रकारस्वारस्य[2] मुक्त्वा नैमित्तिकेन नित्यबाधं दृष्टान्त[3]यितुं शास्त्रदीपिकादौ प्रकृतवाक्यस्य उक्तत्वात्। अतएव नित्यमित्याद्यग्रिमग्रन्थो दृष्टान्तबोधकः। तथाच निमित्तं यत्र न जातं[4] तत्रान्यथा कर्तव्योपि यत्र यज्जातं तत्र अन्यथा

---

[1] वाक्येन विरोधः. [2] कारस्याशय. [3] सदृष्टान्त. [4] यत्र जातं.

वकाशोस्तीति चेन्न; उद्गात्रपच्छेदाभावे युगपदुभयापच्छेदे प्रतिहर्त्रपच्छेदस्य पश्चात्त्वे च ज्योतिष्टोमद्वितीयप्रयोगे प्रतिहर्त्रपच्छेदनिमित्तसर्वस्वदक्षिणयागप्रतिपादकशास्त्रस्य सावकाशत्ववत् व्यावहारिकप्रामाण्ये प्रत्यक्षस्यापि सावकाशत्वात् तत्रैकप्रयोगे विरोधवदत्रापि तात्त्विकत्वांशे विरोधात् । अतएव सगुणसप्रपञ्चश्रुत्योः निर्गुणनिष्प्रपञ्चश्रुतिभ्यां अपच्छेदन्यायेन बाध इति सुष्ठूक्तम् । तदुक्तमानन्दबोधाचार्यैः—

तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम् ।
पूर्वस्य बाधकं नायं सर्प इत्यादिवाक्यवत् ॥

इति । ननु मानान्तरविरोधे श्रुतेस्तत्परत्वमसिद्धम्, परत्वं तु प्रमानन्तरभ्रमे व्यभिचारि दृश्यते । 'न क्त्वा सेट्' इति परं प्रति 'मृडमृदगुधकुषाक्लिशवदवसः क्त्वा' इति पूर्वमपि बाधकम् । निर्दोषत्वं त्वर्थान्तरप्रामाण्येनान्यथासिद्धम् । तदुक्तम्—

तत्परत्वमसिद्धत्वात् परत्वं व्यभिचारतः ।
निर्दोषताऽन्यथासिद्धेः प्राबल्यं नैव साधयेत् ॥

इति चेन्न; प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं, श्रुतेस्तु, तात्त्विक-

---

क्रियत इत्यर्थकोक्तवाक्ये नित्यनैमित्तिकशास्त्रयोः व्यवस्थितविषयकत्वसम्भव एव बाध्यबाधकभावप्रदर्शनायोक्तः । बदरफलदृष्टान्तस्तु विषमः; तत्र कालभेदावच्छेदेन श्यामरक्तत्वज्ञानयोः बाध्यबाधकत्वात् । प्रकृते चैकस्मिन् प्रयोगे एकदा सर्वस्वदक्षिणात्वादक्षिणात्वज्ञानयोः बाध्यबाधकत्वावश्यकत्वात् यदा दाक्षिणा प्रसक्ता तदा निर्दक्षिणत्वस्य शास्त्रार्थ[1]त्वात् तथापीदमपि भ्रान्त्यैव परेणोक्तम् । **पश्चात्त्वे चेति ।** चकारो द्वितीयप्रयोगे इत्यस्योत्तरं योज्यः । **द्वितीयेति ।** प्रतिहर्त्रपच्छेदोत्तरजातोद्गात्रपच्छेदनिमित्तकेत्यादिः । परोक्तिमभ्युपगम्येदम्,

---

[1] अशास्त्रार्थ.

मिति विरोधाभावेन तत्परत्वसिद्धेः । परशब्देन च मानान्तर-बाधितपरत्वं विवक्षितम् । तेन प्रमानन्तरभ्रमे न व्यभिचारः, तस्य तदुत्तरभाविमानबाधितत्वात् । 'न क्त्वा सेट्' इत्यस्य तु पाठतः परत्वेऽपि स्वभावसिद्धकित्त्वस्यानेन अपाकरणं विना पुनस्तत्प्रातिप्रसवार्थं मृडमृदेत्यादेः अप्रवृत्तेः तदपेक्षया अर्थतः

द्वितीयप्रयोगस्थदक्षिणायाः पूर्वप्रयोगाङ्गत्वे सर्वदा बाधस्योक्तत्वात्। **अर्थतः पूर्वत्वमिति ।** तथाच पाठलब्धादर्थलब्धस्य पौर्वापर्यस्य बल-वत्त्वात्तेनैव व्यवस्थेति भावः । यत्तु 'व्यावहारिकप्रामाण्यमादाय प्रत्य-क्षस्य सावकाशस्येक्ति[1]र्न युक्ता, प्रामाण्यमात्रस्य तात्त्विकस्य स्वीका-रात्, इति, तत्तुच्छम्; श्रुतिप्रत्यक्षयोः तात्त्विकप्रामाण्यविरोधे श्रुतेर-तात्त्विकप्रामाण्यस्यासम्भवात् प्रत्यक्षस्यैव तदित्युक्तत्वात्, तत्र प्रतिकूल-तर्कमप्रदर्श्य त्वदस्वीकारमात्रस्याप्रयोजकत्वात् । अतएव तत्परत्वादित्या-दावसिद्धिः, प्रत्यक्षबाधिते तात्पर्याभावात्, द्वितीयहेतावपि मानान्तर-बाधितेति विशेषणासिद्धिः । श्रुतेः प्रत्यक्षबाधिता[2]र्थकत्वादित्यपि तुच्छम्; प्रत्यक्षस्यानिश्चिततात्त्विकप्रामाण्यकत्वेन व्यावहारिकप्रामाण्ये सावकाश-त्वेन च तात्त्विकप्रामाण्यं विना निरवकाशत्वादियुक्तश्रुतावबाधकत्वस्योक्त-त्वात्। अन्यथा अन्यतरस्यैव तात्त्विकप्रामाण्यनिश्चयेन बाधकत्वनिश्चये तत्परत्वरूपापच्छेदन्यायानुसरणस्य वैफल्यात् । तस्मात्पररीत्या अन्य[3]-तरस्यापि तदनिश्चये मद्रीत्या श्रुतेः तन्निश्चयेऽपि प्रकारान्तरेणापि श्रुतौ तन्निश्चयाय तदनुसरणात्परप्रलापोऽनव[4]काशः । यद्यपि 'मृड मृद' इत्यादिना पूर्वेणाप्यपवादन्यायेन 'न क्त्वा सेट्' इत्यस्य बाध इति, तदपि तथा, मृडेत्यादेः पूर्वप्रवृत्तिवैयर्थ्यस्योक्तत्वात् । यत्र हि अपवादशास्त्रार्थः उत्सर्गशास्त्रं विनापि सिद्धस्तत्र अपवादशास्त्रं पूर्वं

---

[1] त्वोक्ति. [2] बाध्या. [3] तदन्य. [4] प्रलापानव.

पूर्वत्वमेव । अपवादापवादे उत्सर्गस्यैव स्थिरत्वादतो निर्दोषत्वमपि नैन्यथासिद्धम् । तात्पर्यविषय एव प्रामाण्यस्याभ्युपेयत्वादित्यबोधमात्रावेद्याम्बितमपच्छेदन्यायवैषम्याभिधानमिति॥

इत्यपच्छेदन्यायवैषम्यभङ्गः

मिथ्यात्वानुमितेः शैत्यानुमितिसाम्यभङ्गः

ननु यदि प्रत्यक्षबाधितमप्यनुमानं साधयेत् तदा वह्वयनौष्ण्यमपि साधयेत् । तथाच कालात्ययापदिष्टकथा सर्वत्रोच्छिद्येत। न चौष्ण्यप्रतियोगिकाभावे साध्ये पक्ष एव प्रतियोगिप्रसिद्धिरिति तत्र बाधस्सावकाशः । प्रकृते तु सत्त्वं व्यावहारिकं प्रत्यक्षसिद्धम्, तदविरुद्धं च मिथ्यात्वम्, तस्य पारमार्थिकसत्त्वविरोधित्वादतो न व्यावहारिकसत्त्वग्राहकेणाध्यक्षेण बाध्यत

प्रवर्तते । तत्रापि न नियमः, प्राकरणिकहोमादिबोधकत्वेन पदादिशास्त्रस्य अनारभ्याधीताहवनीयादिशास्त्रात्पूर्वप्रवृत्तत्वेप्यतादृशयोरुत्सर्गापवादशास्त्रयोः प्रवृत्तिक्रमे नियामकाभावेन युगपत्प्रवृत्तेः । तस्मात् सामान्यशास्त्रस्य सावकाशत्वादिकमेवानवकाशत्वादिमदपवादशास्त्रबाध्यत्वे बीजं, न तु पूर्वप्रवृत्तत्वमिति प्राकरणिकहोमादिबोधकत्वेन पदादिशास्त्रस्य यथा पूर्वप्रवृत्तिः, तथा मृडेत्यादेः कित्त्वनिषेधनिषेधरूपत्वात् कित्त्वनिषेधप्राप्तिसापेक्षतया 'न क्त्वा' इत्यादिप्रवृत्युत्तरमेव प्रवृत्तिरिति स्फुट एव ते परवाक्यार्थाबोधः ॥

तर्कैस्सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
अपच्छेदन्यायसाम्यं दुरन्तध्वान्तनाशनम् ॥

इत्यपच्छेदन्यायवैषम्यभङ्गः.

इति वाच्यम्; वह्निविशेषे औष्ण्याभावानुमाने शैत्यानुमाने वा तदभावात् । पक्षातिरिक्तस्य प्रतियोगिग्रसिद्धिस्थलस्य तत्र सत्त्वात्। न च यत्र प्रत्यक्षं प्रबलं तत्र बाधव्यवस्था, न चात्र तथेति न बाध इति वाच्यम्; प्रकृतेऽप्यौष्ण्यप्रत्यक्षसमकक्ष्यस्य प्राबल्यप्रयोजकस्य विद्यमानत्वात्, अनौष्ण्यानुमितेः मिथ्यात्वानुमितेश्च समानयोगक्षेमत्वात् । न च मिथ्यात्ववादिनां प्रतिपन्नोपाधावौष्ण्यनिषेधग्राह्यनुमानेन मिथ्यात्वानुमितेः समत्वमिष्टमेवेति वाच्यम्; औष्ण्यानौष्ण्ययोः भावाभावरूपतया तदनुमितिसाम्येऽपि शैत्यानुमितिसाम्यस्यानभ्युपगमात्, शैत्यस्यौष्ण्याभावरूपत्वाभावात् । तस्मात् बाधस्य दोषता वा त्याज्या, औष्ण्यप्रत्यक्षायजमानत्वप्रत्यक्षादेः सत्त्वप्रत्यक्षापेक्षया विशेषो वा वक्तव्यः । न चौष्ण्यप्रत्यक्षं परीक्षितोभयवादिसिद्धग्रामाण्यं, सत्त्वप्रत्यक्षं तु न तथेति विशेष इति वाच्यम्; सत्त्वप्रत्यक्षेऽपि प्रामाण्यासम्मतौ हेत्वभावात् । परीक्षायास्तुल्यत्वादिति चेन्मैवम्; विरुद्धार्थग्राहित्वेन विशेषात् प्रत्यक्षसिद्धायजमानत्वौष्ण्यादिवच्छब्दलिङ्गग्राह्ययजमानत्वानौष्ण्याद्यपि व्यावहारिकमिति समत्वात् प्रत्यक्षेण बाध्यते । प्रकृते तु सत्त्वं व्यावहारिकं प्रत्यक्षसिद्धं, तद्विरुद्धं च न मिथ्यात्वम्, तस्य पारमार्थिकसत्त्वविरोधात् । अतो न व्यावहारिकसत्त्वग्राहकेण अध्यक्षेण बाध्यते । नन्वेवं वदतस्तव को वा अभिप्रायः? किं तात्त्विकविषयत्वात् बाधकेनैव[1] मिथ्यात्वानुमानादेर्न बाध्यता? उत सत्त्वमिथ्यात्वग्राहिणोः व्यावहारिकतात्त्विकविषययोः परस्परविरुद्धविषयत्वा-

---

वह्निविशेष इति । यत्र वह्नौ नानुमात्रा औष्ण्यमुपलब्धं

---

[1] बाधकतैव.

भावात् न बाध्यबाधकभावः? अन्त्येऽपि किमध्यक्षसिद्धव्यावहारिकसत्त्वमगृहीत्वैव तदसिद्धस्य तात्त्विकसत्त्वस्यैव अभावं गृह्णात्यनुमानादि? उत प्रत्यक्षविषयीकृतस्यैव तात्त्विकमभावम्? नान्त्यः; प्रत्यक्षविषयाभावग्राहिणि तद्बाधकत्वोक्तययोगात्। न द्वितीयः; प्रत्यक्षागृहीतप्रतिषेधकत्वेन अप्रसक्तप्रतिषेधापत्तेः, प्रत्यक्षविषयस्य तात्त्विकत्वापत्तेश्च। न प्रथमः; उपजीव्यप्रत्यक्षविरोधेन अनुमित्यादिविषयस्य तात्त्विकत्वासिद्धेरिति चेन्न; प्रथमे द्वितीये च पक्षे अनुपपत्त्यभावात्। तथाहि—प्रथमे पक्षे न तात्त्विकत्वासिद्धिः, यस्मात् 'इदं रजतम्' इत्यनेन 'नेदं रजतम्' इत्यस्य बाधादर्शनात् परीक्षितमेव बाधकमभ्युपेयम्। परीक्षा च प्रवृत्तिसंवादादिरूपा व्यवहारदशायामबाध्यत्वं विना अनुपपन्ना तद्दशां बाधग्राहिणं बाधते नाद्वैतश्रुत्यनुमानादिकमित्युक्तमेव। द्वितीयेऽपि पक्षे नाप्रसक्तप्रतिषेधः, परोक्षप्रसक्तेस्सम्भवात्। यत्तु कैश्चिदात्मनि तात्त्विकसत्त्वप्रसिद्ध्या प्रसक्तिमुपपादयन्ति, तन्न; न हि प्रतियोगिज्ञानमात्रं प्रसक्तिः। किं तर्हि? निषेधाधिकरणकप्रतियोगिज्ञानम्। न चात्मा निषेधाधिकरणम्। तस्मात्परोक्षप्रसक्तिरेव दर्शनीया। अथवा मा भूत्प्रसक्तिः। अभावप्रत्यक्षे हि संसर्गारोपत्वेन सा उपयुज्यते। शब्दानुमानयोस्तु तस्याः क्वोपयोगः? न चाप्रसक्तौ निषेधवैयर्थ्यम्; अनर्थनिवृत्तिरूपस्य

तत्रेत्यर्थः। क्वोपयोग इति। ननु प्रसक्तिं विना प्रतिषेधे 'न तौ पशौ करोति न सोमे' इत्यादौ प्रतिषेधास्वीकारो न युज्यते; तथाहि—दशमाष्टमे 'अपूर्वे त्वर्थवादस्स्यात्' इत्यधिकरणे स्थितं—'आज्यभागावग्नीषोमाभ्यां यजति' इत्याज्यभागौ विधाय 'न तौ पशौ करोति न सोमेऽध्वरे' इति दर्शपूर्णमासप्रकरणस्थवाक्ये 'न तौ पशौ' इति न पर्युदासः; स हि पशुभिन्ने तौ करोतीत्येवंरूपो न। तथा सति

दर्शपूर्णमासोद्देशेन तयोर्विधायकवाक्येन प्रकृतवाक्यमवश्यमेकवाक्यतापन्नमिति व्यर्थं स्यात् । न हि तेन तयोरतिदेशः पशौ निवर्तते । अथ पशुप्रकरणस्थाज्यभागप्रापकातिदेशेन एकवाक्यतामङ्गीकृत्य 'आज्यभागान्यत् प्रकृतिवत्[1] कुर्यात्' इत्येवं पर्युदासो वाच्यः, भिन्नप्रकरणस्थयोः पदैकवाक्यत्वासम्भवेऽपि वाक्यैकवाक्यतासम्भवात्; सोऽपि न, अभावशक्तस्य नञो भिन्ने लक्षणाद्यापत्तेः प्रतिषेधस्यैव युक्तत्वात् । न च प्रतिषेधपक्षेऽपि विकल्पावश्यकत्वेन अष्टदोषतादोषः; फलमुखत्वात्, पर्युदासपक्षेपि तदावश्यकत्वाच्च । पशुप्रकरणे हि "अग्नये आज्यस्यावदीयमानस्य अनुब्रूहि, सोमायाज्यस्यावदीयमानस्यानुब्रूहि, अग्नय आज्यं प्रस्थितं प्रेष्य, सोमायाज्यं प्रस्थितं प्रेष्य[2]" इत्यादि प्रैषाणामुक्तत्वात्तेषां च लिङ्गा[3]दाज्यभागमात्राङ्गत्वादाज्यभागयोः पशावनुष्ठानं प्रतीयत इति विहितपर्युदस्तत्वात् विकल्पावश्यकत्वम् । तस्मात्प्रतिषेध एवासौ, तदर्थवादस्तु न सोम इति । यथा सोमे आज्यभागौ न कार्यौ तथा पशावित्याज्यभागयोः निन्दा । न च—यद्यपि सोमस्यापूर्वत्वेन आज्यभागयोः तत्राप्रसक्तया न सम्भवति प्रतिषेधः, तथापि तदङ्गदीक्षणीयादिद्वारा तत्प्रसक्तया सम्भवतीति वाच्यम्; तथा सति तत एव सोमाङ्गाग्नीषोमीयपशौ तद्विकृतिपश्वन्तरे च निषेधसिद्धया 'न पशौ' इत्यस्य वैयर्थ्यापत्तेः, पूर्वनिषेधैकवाक्यत्वे सम्भवति वाक्यभेदस्यान्याय्यत्वाच्च। तस्मान्नान्तरिक्ष इत्यादिवत् न सोम इत्यनुवाद इति तदिदं विरुद्ध्येत, प्रसक्तिं विनापि सोमे प्रतिषेधसम्भवात्—इति चेन्न; प्रतिषेधस्य मानान्तरप्राप्तत्वान्निष्प्रयोजनत्वाच्च तात्पर्याविषयत्वेन[4] विध्यपेक्षितस्तुतौ न सोम इत्यादेः तात्पर्येपि प्रपञ्चे तात्त्विकत्वाभावस्य[5] वादिविप्रतिपत्त्या सन्दिग्धत्वेनाप्रा[6]प्तत्वात् निष्प्रपञ्चब्रह्मज्ञानार्थत्वेन

---

[1] प्रकृताविव. [2] प्रैष्य. [3] देवतालिङ्गा. [4] र्याविषयत्वे निषेधनिन्दायां विध्यपेक्षित. [5] त्वभावस्य. [6] त्वेन प्रा.

सप्रयोजनत्वाच्च तत्रैव श्रुतेस्तात्पर्यसम्भवेन बोधकत्वात्। यदि हि निषेधधीः प्रसक्तिसापेक्षा स्यात्, तदा नान्तरिक्ष इत्यादि न सोम इत्यादि वा नित्यानुवादोऽपि न स्यादिति द्वारीभूतवाक्यार्थबोधे स्तुति-निन्दाबोधोपि न स्यात्। तदबोधेऽपि तद्बोधे 'गुणवादस्तु' इति सूत्रेण गौणार्थतापि बाधितार्थवादानां नोच्येत। तस्मान्निषेधतात्पर्य-मेव निषेधप्रयोजनवत्त्वाय प्रसक्तिसापेक्षम्। प्रयोजनवत्त्वं च प्रकृते तां विनापीति नानुपपत्तिः। न च 'तमेवं विद्वानमृतः' इत्यादिना सगुणस्यैव मोक्षहेतुज्ञानविषयत्वलाभान्निष्प्रपञ्चब्रह्मज्ञानं व्यर्थमिति वाच्यम्; 'प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते सोयमात्मा स विज्ञेयः' इत्यादिभिः शुद्धस्यैव तल्लाभात् तदनुसारेणैवंपदस्य शुद्ध-बोधकत्वात्। सगुणबोधकत्वेपि 'तमेव विदित्वाऽतिमृत्युमेति' इत्या-द्यनुसारेण तज्ज्ञानस्य स्वसाध्यचित्तैकाग्र्याधीनशुद्धज्ञानद्वारा मोक्ष-हेतुत्वपरमुक्तवाक्यमित्युपपत्तेः। वक्ष्यते चैतदाचार्यैरेव विस्तरेण द्वितीय-परिच्छेदे। एतेन—न पशावित्यादौ प्रतिषेधात् प्रसक्तेरावश्यकतया विकल्पस्थापनात् प्रसक्तिं विना ना भावधीरित्यपास्तम्। विकल्पो हि तत्र न निषेधबुद्धेः, प्रसक्तिसापेक्षत्वात्; किन्तु निषेधतात्पर्यस्य। अथ तस्य तत्सापेक्षत्वं, ततो विकल्पो वा कथमिति चेत्, प्रसक्तिर्हि यदि रागाधीना, तदापि रागविषयान्नित्यनिवृत्तिरूपप्रयो-जनवत्त्वेन निषेधे तात्पर्यम्; यदि शास्त्राधीना, तदापि तया तद्विषये जायमानप्रवृत्तेः पाक्षिकत्वसिद्धिरूपप्रयोजनवत्त्वेन निषेधे तात्पर्यम्। तादृशप्रयोजनवत्त्वनिश्चयेन निश्चीयमानं तात्पर्यं तत्सापेक्षमुक्तपाक्षि-कत्वसिद्ध्या च विकल्पस्यापि सिद्धिः। यद्यपि न तौ पशावि-त्यादिनिषेधशास्त्रं प्रत्यक्षं विशेषविषयकत्वादिमच्च; तथाप्यतिदेशादि-रूपस्य सामान्यविषयकत्वादिमतः प्रसञ्जकशास्त्रस्य न सर्वदा बाधकं, उक्तरीत्या तदुपजीव्यनिर्णीततात्पर्यकत्वात्। तस्यात्यन्तिकाबाधे च

स्व[1]मप्रमाणं स्यात् । अतस्तदांशिकबाधेनोक्तपाक्षिकत्वासिद्धिः । पदादिविशेषशास्त्रं तु आहवनीयादिसामान्यशास्त्रमनुपजीव्यैव प्रयोजनवदर्थशेषीभूतस्वार्थपरत्वेन निश्चीयत इति न तत्सापेक्षतया विकल्पः । न चाज्यभागाभाववाक्यस्यापि प्रयोजनवत्पश्वङ्गपरत्वेन ग्रहणसम्भवान्नोक्तरीत्या प्रसक्तिसापेक्षत्वमिति वाच्यम् ; आज्यभागाभावेऽपीतराङ्गैः पशूपकारस्सिध्यति, फलभूम[2] कल्पनाच्चाज्यभागयोरपि प्रवृत्तिः पाक्षिकीत्यस्यैवार्थस्य निषेधबलात्कल्पनोपपत्तौ उक्ताभावस्याङ्गत्वे मानाभावात्, तत्स्वीकारेऽपि निषेधे स्वतस्सिद्धप्राप्तेः[3] तात्पर्यविरोधिन्या हानाय[4] शास्त्रीयप्रसक्तेरवश्यमुपजीव्यत्वाच्च । यत्तु–"विधिस्थल इव निषेधस्थलेऽपि सकलकारकविशिष्टभावनाया मुख्यविशेष्यत्वात् विधिप्रयोज्याभावस्य प्रकारतया तत्रान्वयादाज्यभागकरणकपशुकर्मकभावनात्वेन प्राप्तिर्निषेध[5]स्योपजीव्यात् ; तथाच 'न कळञ्जं भक्षयेत्' इत्यादौ विशिष्टभावनाप्रसक्तेः मूलीभूतेष्टसाधनत्वज्ञानस्य लौकिकत्वेन श्रौतनिषेधबाध्यत्वेऽपि[6] न तौ पशावित्यादावुक्तभावनाप्राप्तिमूलीभूतेष्टसाधनत्वज्ञानं तथा सम्भवति, शास्त्रीयत्वादिति पाक्षिकबाधेन विकल्पः । 'न तौ सोमे' इत्यादौ तु सकलकारकविशिष्टभावनाया अप्रसिद्धत्वात् उक्तान्वयासम्भवादन्यथाऽन्वयः" इति मतं, तत्र क्वचिदन्यथान्वयावश्यकत्वे उक्तान्वयकल्पनया उपजीव्यत्वकल्पने मानं चिन्त्यम् । यत्तु—'परोक्षप्रसक्त्युक्तिरयुक्ता ; सा हि नानुमानेन, श्रुत्याद्यननुगृहीतस्यानुमानस्यार्थासाधकत्वात् । न श्रुत्या, विकल्पापत्तेः' इति, तन्न ; अर्थासाधकत्वं यद्यर्थाप्रमापकत्वं, तदा तदिष्टं ; निषेधश्रुतितदुपजीव्यानुमानाभ्यां बलवद्भ्यां बाध्यत्वात्, उपजीव्यस्यापि लौकिकप्रमाणस्य श्रुत्या बाधदर्शनात् । यद्यनुमित्यजनकत्वं, तदा

---

[1] कबाधे च स्वय. [2] फलभ्रम. [3] स्सिद्धत्वात्प्राप्तेः. [4] विरोधिनाहवनीय. [5] प्राप्तनिषेध. [6] वाच्यत्वेऽपि.

प्रयोजनस्य विद्यमानत्वात् । न च प्रत्यक्षविषयतात्त्विकत्वापत्तिः, तद्विषयाधिकरणस्यैव पारमार्थिकत्वव्यतिरेकस्य बोधनात् । तथाच न काप्यनुपपत्तिः । तदुक्तं खण्डनकृद्भिः—

पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः ।
विरोधादुपजीव्येन न बिभेति कदाचन ॥

इति। नन्वेवमप्यनौष्ण्यं तात्त्विकमिति तदनुमितिरपि न बाध्येत व्यावहारिकौष्ण्यग्राहिणा अध्यक्षेण । एवंच 'आदित्यो यूपः' इत्यादावपि—

तात्त्विकादित्यतां यूपस्याश्रित्य शरणं श्रुतिः ।
विरोधादुपजीव्येन न बिभेति कदाचन ॥

इत्याद्यपि स्यादिति चेन्न; अनौष्ण्यं तात्त्विकं स्यादिति कोऽर्थः? यदि तत्त्वत औष्ण्यं नास्तीत्यर्थः, तदा अद्वैते पर्यवसानादिष्टा-

---

तत्र बाधका[1]नवतारे तत्सम्भवात् श्रुत्या प्रसक्तिरप्यस्तीति न विकल्पः । 'विश्वं सत्यम्' इत्यादिवक्ष्यमाणश्रुतेस्स्तुतितात्पर्यानवधारणदशायामापाततो विश्वतात्त्विकताप्रसञ्जिकायाः तदवधारणे तात्पर्यविषयस्तुतिद्वारभूतविश्वव्यावहारिकसत्यताबोधकत्वनिश्चयेन निषेधश्रुत्यपेक्षया न्यूनबलत्वत्त्व[2]निश्चयादिति ध्येयम् । व्यतिरेकस्य बोधनादिति । ननु प्रातिभासिके व्यावहारिकत्वनिषेधे प्रातिभासिकत्वस्य व्यावहारिकत्ववत् व्यावहारिके प्रपञ्चे तात्त्विकत्वनिषेधे व्यावहारिकत्वं तत्र तात्त्विकं स्यादिति चेन्न; व्यावहारिकत्वस्यापि प्रपञ्चान्तःपातेन तत्रापि तात्त्विकत्वनिषेधात् । न चोपजीव्यप्रसक्तिविरोधात् श्रुतेर्निषेधाप्रमापकत्वमिति वाच्यम्, उक्तरीत्या प्रसक्तेरनुपजीव्यत्वादुपजीव्यत्वेऽपि लौकिकत्वेन सम्भावितदोषत्वात्, ज्ञानमात्रस्योपजीव्यत्वेन तात्त्विकप्रामाण्य-

[1] बाधा. [2] वत्त्वा.

पत्तिः । यदि व्यवहारतोऽपि नास्तीति, तदा व्यवहाराविसंवादादिरूपपरीक्षितत्वाविशिष्टमौष्ण्यप्रत्यक्षं बाधकमिति नानौष्ण्यस्य तात्त्विकत्वासिद्धिः । एतेन शैत्यानुमानं व्याख्यातम् । एवमादित्ययूपभेदस्य तत्त्वतो व्यवहारतो वा निषेधे योज्यम्; श्रुतेरन्यशेषतया आदित्ययूपाभेदपरत्वाभावेन परीक्षितप्रत्यक्षविरोधेन गौणार्थतया स्तावकत्वोपपत्तेश्च । अतएव 'तात्त्विकादित्यतां यूपस्य' इत्यादिना अद्वैतश्रुतेः 'आदित्यो यूपः' इत्यादिश्रुतिसाम्यापादनमपास्तम् । न चानुमितिसिद्धमिथ्यात्वग्राहकत्वे सत्यद्वैतश्रुतिरनुवादिका स्यात्, यथा 'अग्निर्हिमस्य भेषजम्' इत्यादिश्रुतिः प्रमाणान्तरगृहीतहिमनिवारणशक्तयनुवादिकेति वाच्यम्; स्वस्वचमत्कारानुसारिणोऽनुमानस्य सकलसाधारण्याभावेन तस्य श्रुत्यनुवादकत्वाप्रयोजकत्वात् । तदुक्तं 'तर्काप्रतिष्ठानात्' इत्यत्र वाचस्पतिमिश्रैः—

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥

विशिष्टस्यानुपजीव्यत्वान्निषेधबाध्यत्वसम्भवात् । श्रुतेस्तु निर्दोषत्वेन तदधीनप्रसक्तेर्व्यावहारिकप्रामाण्यस्यावश्यकत्वेन व्यावहारिकनिषेधबोधकेन 'न तौ पशौ' इत्यादिना नात्यन्तबाध[1] इत्युक्तप्रायत्वात् । **व्यवहारतोऽपीति** । तथाच व्यावहारिकौष्ण्यविरोधित्वं व्यावहारिकत्वपर्यवसन्नमनौष्ण्यस्य स्यादित्यर्थः । **तात्त्विकत्वसिद्धिः** व्यावहारिकौष्ण्यविरोधित्वासिद्धिः । **स्वस्वचमत्कारानुसारिण इति** । स्वस्वमात्रेण प्रमात्वेन गृह्यमाणस्येत्यर्थः । तथाच यस्य वादि[2]प्रत्यनुमानादिना अनुमानेष्वप्रामाण्यशङ्का, तं प्रति तन्निवृत्त्यर्थमपेक्षणीया श्रुतिः नानु-

---

[1] नान्त्यबाध. [2] वादिनः.

इति । दृष्टान्तीकृतश्रुतौ तु हिमनिवृत्तिकारणताया वह्नौ सर्वसाधारणप्रत्यक्षार्थापत्तिभ्यां अवसेयत्वाद्वैषम्यम् । तस्मान्मिथ्यात्वानुमानस्य न वह्निशैत्यानुमितिसाम्यम् ॥

इति मिथ्यात्वानुमानस्य शैत्यानुमितिसाम्यभङ्गः

प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकम्

किञ्च परीक्षितत्वेनैव प्राबल्यं, नोपजीव्यत्वादिना । अनुमानशब्दबाध्यत्वस्य प्रत्यक्षेऽपि दर्शनात् । तथाहि—इदं रजतमिति प्रत्यक्षस्य अनुमानाप्तवचनाभ्यां नभोनैल्यप्रत्यक्षस्य नीरूपत्वग्राहकानुमानेन 'गौरोऽहम्' इत्यस्य 'अहमिहैवास्मि सदने जानानः' इत्यस्य चन्द्रप्रादेशिकत्वप्रत्यक्षस्य च अनुमानागमाभ्यां 'पीतश्शङ्खस्तिक्तो गुडः' इत्यादेश्चानुमानाप्तवचनाभ्यां बाधो दृश्यते । ननु साक्षात्कारिभ्रमे साक्षात्कारिविशेष-

---

वादिका । श्रुतितात्पर्यं तु अन्यत एव निर्णीतमिति भावः । नन्वेवं परं प्रति नानुमानमुपन्यसनीयं, परस्याविश्वासादिति चेन्न; अविश्वस्य ब्रुवताऽपि[1]परेण दूषणानुपन्यासे विजयस्य जल्पकथास्थलीयानुमानफलस्याव्याहतत्वात्, वादकथायामपि शङ्काबीजाभावात् निर्दोषेऽनुमाने नाविश्वासः[2]। शङ्काबीजसत्त्वे तु नोपन्यस्यत एवानुमानम्, उपन्यस्यापि तच्छङ्कापसारणं श्रुत्या वा क्रियत इत्यदोषात् ॥

तर्कैस्सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
मिथ्यात्वशैत्यानुमयोरसाम्यं ध्वान्तभञ्जनम् ॥

इति मिथ्यात्वानुमतेः शैत्यानुमितिसाम्यभङ्गः.

---

[1] अविश्वसताऽपि. [2] कोऽविश्वासः ?

दर्शनमेव विरोधीत्यभ्युपेयम्, अन्यथा परोक्षप्रमाया अपरोक्षभ्रमनिवर्तकत्वोपपत्तौ वेदान्तवाक्यानामपरोक्षज्ञानजनकत्वव्युत्पादनप्रयासो व्यर्थस्स्यादिति चेन्न; 'नायं सर्पः' इत्यादिवाक्यादिना सविलासाज्ञाननिवृत्त्यभावेऽपि भ्रमगताप्रमाणत्वज्ञापनेन भ्रमप्रमाणत्वबुद्धेः तद्विषयसत्यतावुद्धेश्च निवर्तनात्, तावता च भ्रमनिवर्तकत्वव्यपदेशात्, भ्रमे प्रामाण्यविभ्रमस्य तद्विषये सत्यताविभ्रमस्य च परोक्षत्वेनापरोक्षबाधानपेक्षत्वात् । न हि दुष्टकरणाजन्यत्वमबाधितविषयत्वं वा प्रामाण्यं कस्यचित् प्रत्यक्षम् । न वा सर्वदेशसर्वकालसर्वपुरुषाबाध्यत्वरूपं विषयसत्यत्वम् । अतस्तयोः परोक्षप्रमाबाध्यत्वमुचितमेव । तयोश्च बाधितयोः रजतादिभ्रमः स्वरूपेण सन्नपि स्वकार्याक्षमत्वादसन्निवेति बाधित इत्युच्यत इत्यनवद्यम् । ननु 'इदं रजतम्' इत्यत्र सयुक्तिकं प्रत्यक्षं बाधकं, न युक्तिमात्रम्, 'गौरोऽहम्' इत्यत्रापि मम शरीरमिति बलवत्प्रत्यक्षमेव[1], 'अहमिहैवास्मि सदने जानानः' इति तु प्रमाणमेव, जीवस्याणुत्वादिति चेन्न; रजताभेदशरीराभेदप्रत्यक्षयोः जाग्रतोः रजते युक्त्या[2] प्रतिबन्धाक्षमत्वे तद्विषयप्रत्यक्षोत्पत्तेरेवानवकाशात् । न च तत्र परम्परासम्बन्धेन कर्दमलिप्ते वस्त्रे 'नीलं वस्त्रम्' इतिवत् 'गौरोऽहम्' इति गौणम्, कर्दमवस्त्रयोरिव शरीरात्मनोः भेदानध्यवसायेन दृष्टान्तदार्ष्टान्तिकयोः वैषम्यात् । तथाचात्रैक्याध्यास एवोचितः । एवंच 'उष्णं जलम्' इत्यत्रापि यदि

युक्त्या प्रतिबन्धाक्षमत्व इति । ननु युक्तिरपि नोत्पद्येत, प्रत्यक्षेण प्रतिबन्धादिति चेन्न; युक्तिर्हि न प्रत्यक्षग्राह्यस्य अभावमवगाहते, किंतु तद्व्याप्यम् । तथाचेदं रजतत्वाभावव्याप्यवदिति ज्ञानरूपयुक्तेः

---

[1] प्रत्यक्षमेव बाधकम्. [2] युक्त्याः.

कर्दमवस्त्रयोरिव तोयतेजसोर्भेदग्रहः; तदा गौणतैव । यदि च शरीरात्मवत् भेदानध्यवसायः, तदा अध्यास एव । तथाच युक्तिबाध्यमेवेति तदप्युदाहरणम् । यत्त्वहमिहैवेति प्रमाणमित्युक्तम्, तन्न; आत्मनः 'आकाशवत्सर्वगतश्च' इति सर्वगतत्वेन इहैवेति व्यवच्छेदस्याप्रामाणिकत्वात् । न च जीवोऽणुः, युगपदेव पादशिरोवच्छेदेन सुखदुःखानुभवात् । न ह्येकोणुरेकदा व्यवहितदेशद्वयावच्छिन्नो भवति । न च युगपत्प्रतीतिर्भ्रमः, उत्सर्गसिद्धप्रामाण्यापरित्यागे बीजाभावात् । विस्तरेण चैतदग्रे वक्ष्यामः । ननु—नभोनैल्यप्रत्यक्षस्य नीरूपत्वग्राहकानुमानेन न बाधः, लिङ्गाभावात् । न च परममहत्त्वद्रव्यानारम्भकत्वादेः लिङ्गत्वम्, त्वन्मते असिद्धेः । निस्पर्शत्वं तु तमसि व्यभिचारि । पृथिव्यादित्रयेतरभूतत्वादि चाप्रयोजकम् । तथाच नीरूपत्व-

---

इदं रजतमिति प्रत्यक्षाप्रतिबध्यत्वात्तदुत्तरोत्पत्तिसम्भवेन तया[1] रजतत्वाभावव्याप्यशुक्तित्वादिमति रजतत्वप्रकारकत्वहेतुना भ्रमत्वानुमितिरव्याहता । एतेन—'रजतादिप्रत्यक्षे विद्यमानेऽप्यरजतादिप्रत्यक्षं जायते स्वभावतो बलवत्त्वात् । अन्यथा क्वाप्यप्रामाण्यधीर्न स्यात्' इत्यपास्तम्; उक्तरीत्या भ्रमत्वधीसम्भवेन स्वभावतो बलवत्त्वकल्पने मानाभावात्, प्रतिबध्यतावच्छेदके तत्तद्व्यक्तिभेदकूटनिवेशे गौरवात् । अन्यथा विरोधिनिश्चयस्य क्वापि प्रतिबन्धकता न स्यादिति ध्येयम् । विस्तरेणेति । उत्क्रान्त्यादिकं तु अणुत्वा[2]भावेप्यौपाधिकपरिच्छेदादुपपद्यते । किञ्चात्मनो द्रव्यत्वे मानाभावस्योक्तत्वात् परिमाणमात्रे मानाभावः । दृश्यमात्रसम्बन्धस्तु सत्तास्फुरणरूपत्वादुपपद्यत इत्यादि वक्ष्यत इत्यर्थः । निस्पर्शत्वमिति । अनुद्भूतस्पर्शो नास्तीति भावः ।

---

[1] संभावत् । तथा. [2] अणुत्वा.

ग्राहकसाक्षिप्रत्यक्षमेव तद्बाधकं वाच्यम्; न च रूपग्रहणासमर्थस्य साक्षिणः कथं नीरूपत्वग्राहकत्वमिति वाच्यम्; पिशाचाग्राहकस्यापि चक्षुषः तदभावग्राहकत्ववदुपपत्तेः, परेणापि साक्षिणोपि रूपवत्तमोग्राहकत्वाभ्युपगमाच्च। अचाक्षुषेऽपि नभसि वायाविव चक्षुषैव रूपाभावग्रहणसम्भवेन चाक्षुषप्रत्यक्षबाधात्—इति चेन्न; 'नीलं नभः' इति प्रत्यक्षे जाग्रति रूपाभावग्रहणस्य चक्षुषा साक्षिणा चासम्भवात्। तथाच बलवती युक्तिरेव तद्बाधिका। न च लिङ्गाभावः, चक्षुरन्वयव्यतिरेकानुविधायिरूपाविशेषितप्रतीतिविषयत्वात्, (न) रूपवदिति लिङ्गसम्भवात्। न चाप्रयोजकत्वम्; नभो यदि सरूपं स्यात् तदा चक्षुरन्वयव्यतिरेकानुविधायिप्रतीतौ रूपासम्बन्धितया विषयो न स्यादिति तर्कोपपत्तेः। न चेष्टापत्तिः, सविधे रूपासम्बन्धितया नभसस्सिद्धेः सर्वजनसम्मतत्वात्। नभसः साक्षिवेद्यतायामपि चक्षुरन्वयव्यतिरेकानुविधानमवर्जनीयमेव। अन्यथा अन्धस्यापि तद्ग्रहणं स्यात्। न च

स्या

तदभावेति। तद्भेदेत्यर्थः। रूपवत्तम इति। 'नित्यानुभवग्राह्यं तमः' इति तत्त्वदीपनोक्तेः। तमस इव तदीयरूपादेरपि प्रातीतिकत्वात् साक्षिवेद्यत्वेऽपि व्यावहारिकस्य रूपादेरतत्त्वात्तदभावस्य नभसि साक्षिवेद्यत्वं परोक्तमयुक्तम्। न च तमसः प्रातीतिकत्वे गुहामध्यस्थमदृश्यमानं तमो न स्यादिति वाच्यम्; न हि[1] तादृशं तमस्त्वीक्रियते; अपितु जले वृक्षाधोऽग्रत्ववत् केनचिद्दृश्यमानमेव, अधिष्ठानज्ञानादिरूपनिमित्तनाशादेव तन्नाशसम्भवात्। आलोकं विनापि तन्नाशः, निमित्तनाशं विनाप्यालोकेन तन्नाश इत्यभिप्रायेण विवरणे आलोकनाश्यं तदुक्तमिति ध्येयम्। अवर्जनीयमिति। चक्षुस्संयोगावच्छिन्नालोकावच्छिन्नं नभः साक्षिवेद्यम्। यदितु महान्धकारेऽपि नभस्साक्षात्करोमीति व्यवहारः प्रामाणिकः,

[1] तर्हि.

पञ्चीकरणाद्रूपवदारब्धत्वेन नभसो नीरूपत्वं बाधितमिति वाच्यम्; त्रिवृत्करणपक्षे अस्य दूषणस्य अनवकाशात्। पञ्चीकरणपक्षेऽपि अपञ्चीकरणदशायां यस्मिन् भूते यो गुणः स पञ्चीकरणाद्व्यवहारयोग्यः भवतीत्येतावन्मात्राभ्युपगमात् नाकाशे रूपारम्भप्रसङ्गः। न च 'नायं सर्पः' इत्युक्तेऽपि किमेवं वदसि परमपि पुनः परामृश्य पश्यसीति प्रतिवचनदर्शनात् न शब्दमात्रं रज्जुसर्पादिभ्रमनिवर्तकम्, किन्तु प्रत्यक्षमेवेति वाच्यम्; प्रतिवचनस्थले भ्रमप्रमादादिशङ्काक्रान्तत्वेन 'नायं सर्पः' इत्यादेर्दुर्बलतया न भ्रमनिवर्तकत्वम्। यत्र तु तादृक्शङ्कानाक्रान्तत्वं, तत्र भ्रमनिवर्तकतैव। अतएव तादृक्शङ्कानाक्रान्तपित्रादिवचसि नेदृक्प्रतिवचनम्; किन्तु सिद्धवत्प्रवृत्त्यादिकमेव। ज्वालैक्यप्रत्यक्षमप्येवमेव युक्तिबाध्यम्। न च निर्वापितारोपितस्थले स्पष्टतरभेदप्रत्यक्षबाधितमित्यन्यत्रापि दीर्घेयं न ह्रस्वेति भेदप्रत्यक्षमेव तद्बाधकमिति वाच्यम्; निर्वापितारोपितातिरिक्तस्थले तावदयं विचारः। तत्र दीर्घेयं न ह्रस्वेति भेदप्रत्यक्षं वक्तुमशक्यम्। यैव ह्रस्वा सैवेदानीं दीर्घेति ह्रस्वत्व-

---

तदा चक्षुस्संयोगावच्छिन्नं नभ एव तथा। अन्यथा अन्धस्यापि तत् तथा स्यात्। एवंच निमीलितनेत्रस्य तथा व्यवहारस्वीकारेऽपि न क्षतिः, चक्षुरन्तरे तत्संयोगसम्भवात्। न च नभसि चक्षुस्संयोगे मानाभाव इति वाच्यम्; अन्धस्य नभस्साक्षात्करोमीति व्यवहारात्तादृशव्यवहारं प्रति चक्षुस्संयुक्तनभस्त्वेन[1] हेतुत्वावश्यकत्वात्, चक्षुस्संयुक्ते नभस्यावरणस्वीकाराद्वा तदावश्यकत्वात्। एतेन—'रूपवत्यपि नभसि चक्षुस्संयोगास्वीकारेण तत्र रूपाचाक्षुषोपपत्तेः नभो यदीत्याद्युक्ततर्कानव-

---

[1] मनस्त्वेन.

दीर्घत्वाभ्यां उपस्थितयोरभेदस्य साक्षात्क्रियमाणत्वात् । तथा च ज्वालाप्रत्यभिज्ञा युक्तिबाध्यैव । सर्वदा पित्तदूषितनेत्रस्य 'पीतश्शङ्खः' इति प्रत्यक्षे चन्द्रप्रादेशिकत्वप्रत्यक्षे च परोक्षातिरिक्तस्य बाधकस्य शङ्कितुमप्यशक्यत्वात् युक्त्यादिबाध्यतैव वक्तव्या । ननु सर्वत्रैवात्र प्रकारान्तरेणासत्कल्पे प्रत्यक्षे मानान्तरप्रवृत्तिः । तथाहि–द्विविधं ज्ञानं द्विकोटिकमेककोटिकं च । अन्त्यमपि द्विविधम्, अप्रामाण्यशङ्काकलङ्कितं तदकलङ्कितं च । तत्राद्यौ सर्वप्रमाणावकाशदौ, अर्थापरिच्छेदकत्वादप्रामाण्यशङ्काकलङ्कितत्वाच्च । अप्रामाण्यधीकलङ्कितत्वं च द्वेधा भवति, दुष्टकरणकत्वनिश्चयादर्थाभावनिश्चयाच्च । तथाच शैलाग्रस्थितविटपिनां प्रादेशिकत्वप्रतीतिर्दूरदोषनिबन्धना दृष्टेति दूरतरस्थस्य चन्द्रमसः प्रादेशिकत्वप्रत्ययो दोषनिबन्धन एवेति निर्णीयते । एवमाकाशे समीपे नीरूपत्वनिश्चयाद्दूरे रूपवत्त्वधीर्दूरदोषजन्येति प्रागेव निश्चीयते । 'पीतश्शङ्खः' इत्यादिप्रत्यक्षं तु प्राथमिकपरीक्षितप्रत्यक्षेण 'शङ्खो न पीतः' इत्यर्थाभावनिश्चयात् अप्रामाण्यज्ञानास्कन्दितमेवोत्पद्यते । एवं सवितृसुषिरादिप्रत्यक्षमपि । तथाच चन्द्रादिप्रादेशिकत्वप्रत्यक्षं दूरादिदोषानिश्चयात् 'पीतश्शङ्खः' इत्यादिप्रत्यक्षं प्राथमिकार्थाभावनिश्चयादेव

काशः' इति परास्तम् । वस्तुतस्तु नभो[1] यदि नीलं स्यात्तदा नीलत्वेन दूरस्थैः गृह्यमाणावच्छेदेन निकटस्थैरपि नीलत्वेन गृह्येतेत्यत्र तर्के नभो यदीत्यादेस्तात्पर्यम् । तथाच नीलत्वेन निकटस्थचाक्षुषाविषयत्वेन नभसि नैल्याभावानुमानं निर्विघ्नम् । एवं महान्धकारे शुक्लत्वेन चाक्षुषाविषयत्वादिना शौक्ल्याद्यभावोऽनुमेयः । न च शुक्लेऽपि नभसि शौक्ल्यं न गृह्यते, किंन्तु नैल्यं दोषादिति वाच्यम् ;

[1] तमो.

बाधितमिति पश्चादनुमानागमादिप्रसर इति न ताभ्यां तद्बाधः। येन हि यस्य भ्रमत्वं ज्ञायते तत्तस्य बाधकमित्युच्यते। न च चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्यागमादिना भ्रमत्वं ज्ञायते। भ्रमत्वज्ञानोत्तरकालमेव तत्प्रवृत्तेः। अप्रामाण्यज्ञानाकलङ्कितं तु स्वार्थपरिच्छेदकं निश्शङ्कप्रवृत्तिजननयोग्यम्। यथा 'वह्निरुष्ण एव' 'प्रस्तरो यजमानभिन्न एव' 'घटः सन्नेव' इत्यादि, तन्नान्यस्यावकाशदर्शनात् नान्येन बाध्यम्। न ह्यत्र प्रागिव दूरादिदोषधीर्वा अर्थाभावनिश्चयो वा कोट्यन्तरालम्बित्वं वा अस्ति। किञ्च क्वचित्प्रत्यक्षं प्रत्यक्षान्तरगौरवाद्युक्तिबाध्यं भवतु। क्वचिच्च लिङ्गादिकं श्रुतिगौरवात् श्रुत्यनुसारिप्रकरणादिबाध्यं भवतु। राजामात्य इव राजगौरवेण राजभृत्यबाध्यः। तथापि न युक्तिमात्रस्य प्रकरणमात्रस्य वा प्रत्यक्षलिङ्गादिबाधकत्वम्, प्रत्यक्षाद्यनुसारित्वस्य सर्वत्राभावात्। न हि प्रधान-

---

नीलेऽपि नभसि आलोकबाहुल्यदोषान्नैल्यं न गृह्यते, किन्तु शुक्लत्वं दोषादित्यस्यापि सम्भवात्। तस्माद्विनिगमकाभावात् नभसि रूपमात्रं प्रातीतिकं; अनुद्भूतरूपानङ्गीकारात्। अङ्गीकारेऽपि नभसस्तद्वत्त्वे मानाभावाद्योग्यनीलरूपाभावस्यैव साध्यत्वसम्भवान्न दोषः। **क्वचिच्च लिङ्गादिकमिति** दृष्टान्तत्वेन प्रकृतोपयुक्तम्। **प्रकरणमात्रस्य** प्रकरणादिमात्रस्य, **प्रत्यक्षाद्यनुसारित्वस्येति**। प्रत्यक्षसमानविषयकत्वस्य युक्तिमात्रे, श्रुतिसमानविषयकत्वस्य प्रकरणादिमात्रे चाभावादित्यर्थः। क्वचिद्बाधकजातीयत्वेन बाधकत्वे दोषमाह—**न हि प्रधानेत्यादि**। प्रथमतृतीये 'शिष्टाकोपेऽविरुद्धमिति चेन्न; शास्त्रपरिमाणत्वात्' इत्यधिकरणे स्थितम् स्मार्तानामाचमनादीनां श्रौतैः क्रमकालपरिमाणादिभिः विरोधे श्रौतत्वेन क्रमादीनामेव प्राबल्यादाचमनादिस्मृतीनामप्रामाण्यं; न हि 'क्षुत आचामेत्' इत्यादिना विहित-

भूताचमनादिपदार्थविषयया 'आचामेदुपवीती दक्षिणाचारः' इत्यादिस्मृत्या पदार्थधर्मभूतक्रमादिविषयया 'वेदं कृत्वा वेदिं करोति' इति श्रुतिर्वेदकरणानन्तरं श्रुतानिमित्तकाचमनोपनिपाते

माचमनादि वेदवेदिकरणयोर्मध्ये अनुष्ठितं चेत् 'वेदं कृत्वा वेदिं करोति' इत्यादिश्रुत्युक्तक्रमस्य प्रयोगविध्यवगतस्य अनुष्ठेयेयत्ता-रूपपरिमाणस्य पूर्वाह्णादिकालस्य च विरोध[1]स्सम्भवति । न च श्रौतत्वेऽपि क्रमादेः पदार्थधर्मत्वात् पदार्थेभ्य आचमनादिभ्यो दौर्बल्यमिति वाच्यम्; प्रमाणतत्त्वनिश्चयस्य प्रमेयतत्त्वनिश्चायकत्वेन प्रमाणबलाबलनिश्चयस्य प्रमेयबलाबलनिश्चयात्पूर्वप्रवृत्तत्वेन बलवत्त्वेन व्यवस्थापकत्वादिति प्राप्ते---यावत्प्रमाणगम्यपदार्थानां प्राप्तयुत्तरं युगपदनुष्ठानासम्भवेनाकांक्षितस्य क्रमादेः श्रुत्यादिना निर्णेयत्वात्पदार्थाविरोधेनैव कल्प्यत्वान्न पदार्थविरोधित्वम् । विरोधित्वेऽपि पदार्थानामेव प्राबल्यम् । प्रमाणानां हि न स्वरूपतो विरोधः; किन्तु विरुद्धविषयकत्वात् । तथाच प्रमाणबलाबलनिर्णयाय विषयविरोधालोचनकाले प्रमेयबलाबलाभ्यां शास्त्रार्थनिश्चये पाश्चात्यं प्रमाणबलाबलज्ञानमग्राह्यमित्युक्तश्रुत्या नोक्तस्मृतेर्बाध्यत्वरूपमप्रामाण्यम् । **वेदः** सम्मार्जनसाधनदर्भमुष्टिः, तस्य करणं बन्धनादिसंस्कारः । **वेदिः** गार्हपत्याहवनीययोर्मध्ये चतुरङ्गुलखाता भूमिः, तत्करणं वेदेन सम्मार्जनादिः । शिष्टस्य 'वेदं कृत्वा वेदिं करोति' इत्यादिश्रुत्युक्तस्य स्मार्ताचमनाद्यनुष्ठानात् अकोपे हान्यभावे सति अविरुद्धमेवंजातीयं स्मार्तमिति चेन्न, शास्त्रेण श्रुत्यादिना क्रमस्य प्रयोगवचनेन प्रयोगशीघ्रत्वादेश्च परिमितत्वात्प्रमितत्वादिति पूर्वपक्षसूत्रार्थः । सिद्धान्तसूत्रं तु अपिवेत्यादिकम् । वार्तिककारीयमधिकरणवचनं त्वन्यादृशं प्रकृतानुपयुक्तम् । **उपवीती दाक्षिणेति ।**

---

[1] अविरोध.

बाध्यत इति अन्यत्रापि तथा भवितव्यमिति चेन्नैवम्; यतो युक्तिरेवैषा। यद्यदूरस्थाल्पपरिमाणज्ञानं तत्तद्दूरदोषनिबन्धनमप्रमा, शैलाग्रस्थविटप्यल्पपरिमाणज्ञानवदिदमपि तथेति। तथा च एवंरूपया युक्त्यैव चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्य बाधं वदन् युक्त्या न प्रत्यक्षस्य बाध इत्यनेनाजैषीः परं मन्दबुद्धे मन्दाक्षं न तु परम्। एवं 'पीतश्शङ्खः' इति प्रत्यक्षेऽपि प्राचीनार्थाभावप्रत्यक्षं न बाधकम्, तस्येदानीमभावात्। न च तत्स्मृतिर्बाधिका; तस्या अनुभवाद्दुर्बलत्वात्। केवलं युक्त्युत्पादन एव सोपयुज्यते। तेन युक्त्यागमाभ्यामेव उदाहृतस्थलेषु बाधः। यत्तु क्वचिद्युक्त्यादेः बाधकत्वदर्शनमात्रेण सर्वत्र न बाधकत्वं वक्तुं शक्यम्, युक्त्यादिबाधकताया अनुस्त्रियमाणप्रत्यक्षगौरवनिबन्धनत्वादित्युक्तम्; एतदनुक्तोपालम्भनम्। न हि मया क्वचिद्दर्श-

---

उपवीतच्छेदे पुनरुपवीतान्तरग्रहणे क्रमादेः बाधः, वामपार्श्वस्थपदार्थस्य दक्षिणहस्तेनानुष्ठाने प्रयोगशीघ्रत्वादिबाधः। **तत्स्मृतिः** तज्जन्यस्मृतिः। **दुर्बलत्वादिति**। गृहीतग्राहकत्वनियतजातीयत्वादिना दौर्बल्यमिति भावः। स्मृतेर्बाधकत्वेऽपि सिद्धं नस्समीहितं परोक्षस्यापरोक्षबाधकत्वादित्यपि बोध्यम्। यत्तु—'दूरस्थतरुपरिमाणादिप्रत्यक्षे नोक्तरीत्या युक्त्या बाधः, किन्तु दूरादिदोष[1]जन्यत्वधीसहकृतेन साक्षिणैव' इति, तत्तुच्छम्; यदि हि भ्रमत्वे साक्षिणोऽनावृतः सम्बन्धः, तदोक्तधीः कोपयुज्यते? तेनैव भ्रमत्वे व्यवहार[2]सम्भवात्। अन्वयव्यतिरेकाभ्यां सापि व्यवहारे[3] आवरणनिवृत्तौ वा [4]कारणं इति चेन्न; अपूर्वकल्पनापत्तेः। अथोक्तधीविशिष्टज्ञानस्यैव भ्रमत्वमनावृतं[5], तदा भ्रमोत्पत्तिद्वितीयक्षणोत्पन्नया तया विशिष्टज्ञाने

---

[1] दूरत्वादिना दोष. [2] भ्रमव्यवहार. [3] संविद्व्यवहारे. [4] कारणं, येनोक्तकल्पनापूर्वकल्पनापत्तिः इति पा. [5] भ्रमत्वमावश्यकमित्यानावृतं.

नमात्रेण युक्तेर्बाधकता सर्वत्रोच्यते, अपितु चन्द्रप्रादेशिकत्व-शङ्खपीतत्वप्रत्यक्षादौ यावदागमादेः बाधकताप्रयोजकं दृष्टं तावत्सत्त्वेन । न च तत्रानुस्रियमाणं प्रत्यक्षमस्ति; यद्बौरवेण बाधकतायां अन्यथासिद्धिं ब्रूयाः । तस्माच्चन्द्रप्रादेशिकत्व-प्रत्यक्षस्य प्रपञ्चसत्त्वप्रत्यक्षस्य च तुल्यवदेव बाध्यता । युक्त्या-

---

द्वितीयक्षण इव प्रथमक्षणेऽप्यनावृतं तत्स्यात् । आवृतं वा द्वितीयक्षणेऽपि स्यात्, आवरणनिवर्तकाभावात् । अथाज्ञानैकत्वपक्षे तत्तद्विषयाकारवृत्त्यभावविशिष्टाज्ञानस्य तत्तद्विषयावारकत्ववदुक्तधीविरहविशिष्टाज्ञानं भ्रमत्वावारकमिति, तदप्यपूर्वकल्पनम् । तस्माद्दोषजन्यत्वादिलिङ्गकभ्रमत्वानुमित्यैव तदावरणाभिभव इति क्लृप्तरीतिरेव साध्वीति ध्येयम् । ननु नभोनैल्येनानुमानं बाधकं, सविधे नभसि नैल्यसत्त्वेऽपि तस्य नीहारावगुण्ठनस्येव सामीप्यदोषादग्रहसम्भवादुक्ततर्कानवतारेणानुमानासिद्धेरिति चेन्न; सामीप्यदोषात्तदग्रहो दूरत्वदोषात्तद्ग्रहो वेत्यत्र विनिगमकाभावात् । न च दोषग्राह्यत्वे नभोनैल्यस्य प्रातीतिकत्वेन अनन्तोत्पत्तिध्वंसकल्पनागौरवमिति वाच्यम्; तस्य व्यावहारिकत्वेपि अनन्ततच्चाक्षुषोत्पत्तिनाशकल्पनात् । किंच सामीप्यदूरत्वयोः दुर्वचत्वाद्विजातीयसंयोगादिमत्प्रदेशावच्छिन्नं नभः स्वनिष्ठविषयतासम्बन्धेन नैल्यविशेषचाक्षुषत्वावच्छिन्नं प्रति हेतुर्वाच्यः । तथाच तदपेक्षया लाघवाद्विजातीयसंयोगत्वेन नैल्यविशेषहेतुत्वमेवास्तु । एतेन नभोनैल्यस्य व्यावहारिकस्य दैशिकाव्याप्यवृत्तित्वशङ्कापि प्रत्युक्ता । सर्वावच्छेदेन सन्निकर्षात्तत्प्रत्यक्षवारणाय उक्तहेतुत्वावश्यकत्वेन लाघवात् उक्तहेतुत्वेन तत्प्रातीतिकत्वसिद्धेः । अतएव किन्त्वागमादिना बाधानन्तरमिति ग्रन्थे उक्तयुक्तिराचार्याणामभिप्रेतेति ध्येयम् । यत्तु 'रूपवदवयवारब्धत्वादाकाशे रूप-

गमयोश्च तुल्यवदेव बाधकतेति। न हि चन्द्रप्रादेशिकत्वप्रत्यक्षेऽपि प्रागेव दुष्टकरणत्वनिश्चयः। नैकद्रव्यस्यापि क्वचिद्दोषत्वेन सर्वत्र परिमाणज्ञानाविश्वासप्रसङ्गात्। किन्तु आगमादिना बाधानन्तरमेव। तद्वत् प्रकृतेऽपि मिथ्यात्वसिद्ध्यनन्तरमेव अविद्यारूपदोषनिश्चयः। तथाच सर्वात्मना साम्यम्। यत्तु दृष्टस्य वस्तुनो बलवद्दृष्टं विना अन्यद्बाधकं नास्तीत्युक्तम्, तदुर्बलशब्दलिङ्गादिविषयम्। यदप्युक्तं विवरणे—'यत्राविचारपुरस्सरमेव प्रत्यक्षावभासमप्यनुमानादिना बाधितमुच्छिन्नव्यवहारं भवति, तत्र तथा भवतु। यत्र पुनः विचारपदवीमुपारूढयोः ज्ञानयोर्बलावलचिन्तया बाधनिश्चयः, तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिः'—इति, तदपि गृहीतप्रामाण्यकशब्दतदुप-

---

मुत्पद्यताम्' इति, तन्न; अस्मन्मते हि नारम्भवादप्रक्रियया रूपादिकं स्वाश्रयसमवायिरूपादिजन्यम्; जलादेः पञ्चीकृतस्य[1] गन्धाद्यापत्तेः, घटरूपाद्युत्पत्त्यव्यवहित[2] पूर्वक्षणे घटाद्यात्मना परिणतस्य कपालादेरेवाभावेन तदीयरूपादेः दूरत एवाभावात् घटरूपाद्युपधायकत्वासम्भवाच्च। किन्तु शक्तिविशेषविशिष्टस्यैव कारणत्वं तत्र स्वीक्रियते। सा च शक्तिः तेजस्संयोगविशेषे पाकजरूपादिजनक इवाकाशवायुव्यावृत्तपाञ्चभौतिकसंयोगेऽपि स्वीक्रियते। तथाच येषु येषु भूतेषु यादृशयादृशरूपादि अनुभवसिद्धं, तादृशतादृशकारणतावच्छेदकशक्त्याश्रयसंयोगानां तेषु तेष्वेव स्वीकारात् न दोषः। एष एव न्यायो 'वैशेष्यात्तु तद्वादः' इति सूत्रेभिप्रेतः। रूपादिमात्रस्यानादित्वे तु न कापि शङ्का, पृथिव्यादिजनकसामग्रीव्याप्यसामग्र्या एव नीलादिविशिष्टजनकत्वस्वीकारेणाकाशादेर्नीरूपत्वादिसम्भवात्। **दृष्टस्य** प्रत्यक्षविषयस्य। **दृष्टं** प्रत्यक्षम्। **गृहीतप्रामाण्येति**। मिथ्यात्वश्रुति-

---

[1] पञ्चभूतस्य. [2] द्युत्पात्तिव्यवहित.

जीव्यनुमानातिरिक्तयुक्तिविषयम् ; एकत्र प्रामाण्यनिश्चये बलाबलचिन्ताया एवानवकाशात् ॥

इति प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकम्.

भाविबाधोद्धारः

एवंच 'भाविबाधनिश्चयाच्च' इति यदुक्तं, तदप्युपपन्नमेव ; प्रकारान्तरेणाबाधितस्य चन्द्रप्रादेशिकत्वप्रत्यक्षस्य यथा आगमेन बाधः, तथा प्रकारान्तरेणाबाधितस्य 'सन् घटः' इत्यादिप्रत्यक्षस्य मिथ्यात्वबोधकागमेन बाध इति निर्णयात् । एवंच भाविबाधशङ्कामादाय यत्परैर्दूषणमुक्तं तदनुक्तोपालम्भनतया अपास्तम् । वस्तुतस्तु बाधशङ्कामादायापि प्रत्यक्षस्य बाधकतोद्धारः समीचीन एव । प्रत्यक्षशब्दयोः बलाबलविचारात् प्राक् किमयं शब्द उपचरितार्थः ? आहोस्वित् प्रत्यक्षमप्रमाणम् ? इति शङ्कायामुभयोरबाधकत्वप्राप्तौ तात्पर्यलिङ्गैः श्रूयमाणार्थपरतया निश्चितस्यागमस्य उपचरितार्थत्वशङ्काव्युदासेन लब्धावकाशत्वसम्भवात् । न च शब्दलिङ्गयोः प्रत्यक्षाबाधकतया प्रत्यक्षान्तर-

---

र्निरवकाशत्वश्रुतित्वादिना तादृशौ, तदुपजीवित्वाद्दृढतर्कयुक्तत्वाच्च तदनुमानमपि तादृशमिति भावः ॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
अक्षे लिङ्गाद्यबाध्यत्वे बाधकं ध्वान्तनाशकम् ॥

इति प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकम्.

लब्धावकाशत्वसम्भवादिति। प्रत्यक्षे बाधशङ्काया इत्यादिः।

स्याप्रमाणतया शङ्क्यमानत्वेनाबाधकतया च बाधकसामान्याभावे निश्चिते बाधशङ्का न युक्तेति वाच्यम्; शब्दलिङ्गयोः प्रत्यक्षबाधकत्वस्य व्यवस्थापितत्वात्, प्रत्येकं विशेषाभावनिश्चयेऽपि विशेषाणामियत्तानवधारणदशायां संशयसम्भवात्, प्रत्यक्षस्याप्रमाणतया शङ्क्यमानत्वेन शङ्काविरहोपपादनस्यासम्भवदुक्तिकत्वाच्च । अथैवं जाग्रदादिज्ञानस्याप्रमात्वे स्वप्नदृष्टस्य शुक्तिरूप्यादेश्च बाधासिद्धौ कथं दृष्टान्तासिद्धिः स्यादिति चेन्न; आरोप्यसत्ताधिकसत्ताकविषयत्वेनापेक्षिकप्रमाणत्वेन अन्यूनसत्ताकविषयत्वेन वा बाधकत्वात् । अतएव यदुक्तं बौद्धं प्रति भट्टवार्तिके—

प्रत्यक्षस्येति । प्रत्यक्षान्तरस्येत्यर्थः । यदि प्रत्यक्षान्तरत्वावच्छेदेनाप्रामाण्यशङ्का, तदा प्रत्यक्षमात्रे स्वविषयसत्त्वावगाहित्वस्य त्वयापि स्वीकारात्, विषयान्तरांश इव सत्त्वांशेऽप्यप्रामाण्यशङ्कासम्भवः । अथ तदवच्छेदेन सा न, तदा प्रत्यक्षान्तररूपस्य बाधकस्य शङ्कासम्भवादित्युभयथापि न शङ्काविरहोपपादनसम्भव इत्याशयः । **आरोप्यसत्ताधिकेति ।** प्रातीतिकव्यावहारिकपारमार्थिकसत्तानां पूर्वपूर्वापेक्षया उत्तरोत्तरस्याधिक्यम् । तत्र पल्लवाविद्यावच्छिन्नं चैतन्यमाद्या, मूलाविद्यावच्छिन्नं तत् द्वितीया, शुद्धं तत्तृतीया । अथवा अज्ञानविषयतावच्छेदकत्वं द्वितीया, शुद्धचिदन्यत्वे[1] सति तदभाव आद्या, सुखादेर्व्यावहारिकत्वपक्षे विशेषणान्तरं देयम् । प्रातीतिकस्येव शुद्धचितोपि तदभावात्तदन्यत्वनिवेशः । बाध्य[2]धीविषयसत्तापेक्षया उक्ताधिकसत्ताकविषयकत्वरूपमापेक्षिकप्रमाणत्वं विनापि स्वाप्नधियः स्वाप्नधीबाधकत्वस्य स्वयमुक्तत्वादाह—**अन्यूनेति ।**

---

[1] शुद्धचैतन्यत्वे. [2] साध्य.

प्रतियोगिनि दृष्टे च जाग्रद्बोधे मृषा भवेत् ।
स्वप्नादिदृष्टिरस्माकं तव भेदोऽपि किंकृतः ॥

इति, तत्सङ्गच्छते । ननु भ्रमकालीनापरोक्षबुद्ध्यविषयविशेष-

प्रतियोगिनि दृष्ट इति । प्रतियोगित्वेन मानसिद्धे जाग्रद्बोधे इत्यर्थः । प्रतियोगित्वं च उक्तसत्ताक[1]विषयकत्वम् । अथवा जाग्रद्बोधेन प्रतियोगिनि दृष्टे विषयीकृते इत्यर्थः । प्रतियोगित्वं च उक्तसत्ताश्रयत्वम् । **अस्माकं** ज्ञानातिरिक्तज्ञेयस्य उक्तसत्तावादिनाम् । **स्वप्नादीति** । आदिना शुक्तिरूप्यादिप्रातीतिकस्य व्यावहारिकस्य च सङ्ग्रहः । **मृषा** बाध्या । **तव** ज्ञानातिरिक्तं ज्ञेयं सर्वमलीकमिति वादिनो योगाचारस्य । **भेदः** बाध्यबाधकभावादिः । **किंकृत इति** । ज्ञानान्यविषये उक्तसत्तानङ्गीकारात् ज्ञानात्मकविषयस्य ज्ञानेन सह विषयविषयिभावसम्बन्धानुरोधेन[2] ज्ञानाद्भिन्नत्वेनापि स्वीकार्यतया भेदाभेदयोस्साहित्यविरोधात्, अभेदादिसम्बन्धमात्रस्य च सम्बन्धान्तरसापेक्षत्वादिना दुर्वचत्वात् । ज्ञानज्ञेयसम्बन्धसापेक्षासिद्धिको ज्ञेयांश इव ज्ञानांशोऽपि त्वन्मते बाध्यः स्यात्, इदं ज्ञानमिदं ज्ञेयमिति बुद्ध्योरन्यूनसत्ताकविषयकत्वाविशेषात् । अथास्तु तथैव माध्यमिकस्य शून्यवाद इति चेन्न; ज्ञानस्य लाघवेन क्षणिकत्वाद्यस्वीकारात्[3], तत्स्वरूपमात्रे सन्देहाद्यभावेन प्रकाश्यत्वाकल्पनाच्च स्फुरणस्वरूपबाधस्य अनुपलब्धेः तद्बाध्यत्वे मानाभावात्, स्फुरणरूपस्य तदन्यबाधकतायोग्यधीविषयताकल्पनस्योचितत्वादिति । त्वन्मते बाधकताप्रयोजकं रूपं दुर्वचमिति किंशब्देनाक्षिप्यत इति भावः । परमते शुक्तिरूप्यादेः असत्त्वस्वीकारेण तत्सत्ताधिकसत्तादेः अप्रसिद्ध्या न बाध्यत्वं सम्भवति, मन्मते तु सम्भवत्येवेत्याशयेनाह—**तत्सङ्गच्छत इति** । **भ्रमकालीनेति** । तादृशबुद्धिः अधिष्ठानसामान्यांशधीः, तदविषयो विशेषः

---

[1] सत्ताकसंज्ञा. [2] भावानुरोधेन. [3] द्यत्स्वीकारात्

विषयैव धीर्बाधिका दृष्टा, न च विश्वबाधिका धीस्तथेति चेन्न; अधिष्ठानतत्त्वज्ञानत्वेनैव भ्रमनिवर्तकत्वात्, विश्वनिवर्तकब्रह्मज्ञानस्य तथात्वात्। न च सप्रकारिकैव धीः भ्रमनिवर्तिका, इयं तु निष्प्रकारिका कथं तथेति वाच्यम्; निवर्तकतायां सप्रकारकत्वस्य गौरवादप्रवेशात्। ननु आवश्यकः सप्रकारकत्वनियमः, व्यावृत्ताकारज्ञानत्वेनैव भ्रमनिवर्तकत्वात्, अन्यथा अनुवृत्ताकारज्ञानादपि तन्निवृत्त्यापत्तेरिति चेत्, सत्यम्; व्यावृत्ताकारत्वेन ज्ञानस्य भ्रमनिवर्तकता, न तु विशेषप्रकारकत्वनियमः। तथाहि—व्यावृत्ताकारता हि द्वेधा भवति, विशेषणादुपलक्षणाच्च। तत्राद्ये सप्रकारकत्वनियमः, द्वितीयेऽपि धर्मान्तरस्य यदुपलक्षणं तस्माद्व्यावृत्ताकारत्वे सप्रकारकतैव।

शुक्तित्वादिः। **धीस्तथेति**। तद्धीविषयस्य शुद्धस्य प्रपञ्चोपहितभानेप्यवश्यं भासमानत्वात्। अथवा विशेषो व्यावर्तकधर्मः, शुद्धं च न तथेति भावः। **अधिष्ठानतत्त्वज्ञानेति**। अन्यविषयत्वानिरूपिता या भ्रममूलाज्ञानविषयनिष्ठविषयता तच्छालिज्ञानेत्यर्थः। **व्यावृत्ताकारत्वेन**। व्यावृत्तविषयकत्वेन। ग्राह्याभावादिरूपो यो व्यावर्तकधर्मः तदाश्रयविषयकत्वेनेति यावत्। **विशेषणादिति**। व्यावृत्ताकारबुद्धौ भासमानं व्यावर्तकधर्ममादायेत्यर्थः। तादृशधर्माश्रयविषयकत्वरूपेति यावत्। **उपलक्षणादिति**। उक्तभासमानान्यव्यावर्तकधर्ममादायेत्यर्थः। तादृशधर्माश्रयविषयकत्वरूपेति यावत्। **धर्मान्तरस्येति**। उत्तृणत्वादिरूपस्य धर्मान्तरस्य तद्व्याप्येन काकादिना यत्रोपस्थितिस्तत्र तस्योत्तृणत्वादेः ज्ञापकरूपोपलक्षणकाकाद्याश्रयविषयकज्ञानस्योत्तृणत्वाभावादिभ्रमनिवर्तकस्य काकाद्यप्रकारकत्वेऽपि उत्तृणत्वादिप्रकारकत्वात्सप्रकारकतैवेत्यर्थः। न च—उत्तृणत्वव्याप्यकाकादिमत्ताज्ञानस्यैव तादृशभ्रमविरोधित्वसम्भवात् उत्तृ-

णत्वादिधर्मान्तरोपस्थितिः व्यर्था, यत्र तादृशकाकादिमत्ताज्ञानं गृहादौ नास्ति, तत्र तादृशभ्रमनिवृत्तये सम्बन्धि[1] ज्ञानविधया काकादिधी-जन्योत्तृणत्वादिस्मृतिजन्यतद्विशिष्टबुद्धेरुपयोगित्वेऽपि 'काकवन्तो गृहाः' इत्यादिवाक्यार्थबोधस्थले तादृशकाकादिमत्ताज्ञानस्यैव तादृशभ्रम-विरोधित्वसम्भवात्—इति वाच्यम्; 'इदानीं गृहा नोत्तृणाः' इत्यादिभ्रमे इदानीं तादृशकाकवन्त इत्यादिज्ञानस्यैव निवर्तकतया काकासत्त्व-दशायां तदसम्भवेन उत्तृणत्वाद्युपस्थित्यधीनतद्विशिष्टबुद्धेरावश्यकत्वात्। न चोत्तृणत्वव्याप्यतया काकादिज्ञानाय पूर्वमुत्तृणत्वाद्युपस्थित्यावश्य-कत्वात् तादृशज्ञानेन पुनः तदुपस्थितिकल्पना व्यर्थेति वाच्यम्; व्याप्य-त्वसंस्कारविशिष्टकाकादिज्ञानस्यैव उपस्थापकत्वात्। यद्यपि रजतादि-भ्रमनिवर्तकस्य शुक्तित्वादिप्रकारकज्ञानस्य व्यावर्तकतावच्छेदकीभूतेन रजतभेदव्याप्यत्वादिना न शुक्तित्वादिविषयकत्वम्; तथापि तस्य तादृशभ्रममूलाज्ञानसमानविषयकत्वेन उक्ताज्ञानोच्छेदकत्वेन भ्रमनिव-र्तकत्वम्। अतो वस्तुगत्या व्यावर्तकतावच्छेदकरूपविशिष्टं यत्त-त्प्रकारकज्ञानं भ्रमनिवर्तकं वाच्यम्। तथाच शुद्धब्रह्मणोऽपि तादा-त्म्येन द्वैताभावव्याप्यत्वात्[2] तादात्म्येन स्वसम्बन्धिनि तस्मिन् ज्ञाते[3] युक्तैव द्वैतभ्रमनिवृत्तिः। अतएव तादात्म्येन स्नेहाद्यभावव्याप्यत्वेन ज्ञाने[4] स्नेहादिभ्रमनिवृत्तिः तार्किकादिभिः स्वीक्रियते। न हि तैः स्नेहाद्यभावस्य तादात्म्येन व्याप्यः स्नेहवानिति भ्रमः स्वीक्रियते। अतएव वस्तुगत्या व्याप्यं यत् स्वं तादात्म्येन तदप्रकारकत्वेऽपि ब्रह्म-ज्ञानस्य भ्रमनिवर्तकत्वमव्याहतम्। यादृशस्य हि ज्ञानस्य तार्किका-दिभिः यादृशभ्रमप्रतिबन्धकत्वमुच्यते तादृशस्य तादृशभ्रमोच्छेदकत्व-मस्माभिरप्युच्यते। तथाच तादात्म्येन तदभावव्याप्यं तद्वदिति[5]

---

[1] काकादिसम्बन्धि. [2] द्वैताभावस्य व्यापकत्वात्. [3] ज्ञाने. [4] ज्ञाते. [5] व्याप्यं यत्तद्वदिति.

भ्रमेच्छाविरहविशिष्टं तदभावव्याप्यज्ञानं तादृशभ्रमे प्रतिबन्धकमुच्यत एव तैः । तत्र यद्यपीच्छाजन्यस्यास्मन्मते ज्ञानत्वाभावादुक्तेच्छाविरहो बाधकतावच्छेदके न निवेश्यते, अनुभवबलाच्च व्याप्यत्वानवगाहिज्ञानस्यापि बाधकत्वं ; तथापि व्याप्यत्वेन ज्ञातविषयकज्ञानस्य भ्रमविरोधित्वमविवादमेव । अथ तदभावादिव्याप्यत्वानवगाहिज्ञानस्य तद्भ्रमविरोधित्वं स्वविषये तदभावत्वाद्यवगाहित्वे तदभावा[1]दिव्याप्यत्वप्रकारकोद्बुद्धसंस्कारविशिष्टत्वे वा नान्यथेति परेषामाग्रहः, तथापि नास्माकं क्षतिः ; शुक्तित्वादौ रजतभेदादिव्याप्यत्वप्रकारकसंस्कारविशिष्टस्य तत्प्रकारकज्ञानस्य शुद्धब्रह्मणि द्वैताभावादिव्याप्यत्वप्रकारकसंस्कारविशिष्टस्य तज्ज्ञानस्य रजतस्य द्वैतस्य च भ्रमे विरोधित्वसम्भवात् । न चैवं द्वैताभावव्याप्यत्वविशिष्टविषयकज्ञानस्यापि द्वैतभ्रमविरोधित्वसम्भवेन शुद्धज्ञानस्यैव श्रुत्यादिना तद्बोधनं विरुद्धमिति वाच्यम् ; उक्तविशिष्टविषयकस्य शुद्धविषयकस्य वा चिरसञ्चितसद्वैतब्रह्मवासनाभिरप्रामाण्यज्ञानानास्कन्दितत्वाभावेन श्रवणादिपाटवोत्तरज्ञानविशेषस्यैव तत्सम्भवात्, तस्य चोद्बुद्धतादृशसंस्कारवैशिष्ट्यावश्यकत्वात् शुद्धविषयकत्वेऽपि तादृशभ्रमविरोधित्वसम्भवात् । शुद्धान्यविषये तत्त्वमस्यादिश्रुतेः तात्पर्ये प्रयोजनाभावात् शुद्धमात्रतात्पर्यग्राहकतयोपक्रमादिकं लिङ्गं प्रवृत्तमिति तदनुसारेण तमेव विदित्वेत्यादिश्रुत्या तथा बोधनस्य युक्तत्वात् । अथ तथाप्यनुपस्थितेन गिरिदर्यादिवर्तिवस्तुमात्रगतविशेषेणावच्छिन्नप्रतियोगिताकाभावव्याप्यत्वेन संस्काराभावात् तेन रूपेण द्वैतभ्रमनिवृत्तिः कथमिति चेत् स्वत एव, कारणाभावात् ; तादृशभ्रमस्य निवृत्तिर्हि विश्वसत्यत्वमतेऽनुत्पादः । कारणोच्छेदपूर्वकोच्छेदस्तु मन्मत एवोपस्थितरूपेण द्वैतं सदिति भ्रमं प्रति तेन रूपेण द्वैताभावव्याप्यत्वेन संस्कृतसद्रूपज्ञानस्य विरोधित्वमित्येतन्मात्रं सर्वसम्मतमित्युक्तम् ॥

[1] तादृशाभावा.

किञ्च ब्रह्मणि तादात्म्येन दृश्यप्रकारकभ्रममात्रस्य जडत्वादिभाननियमादनात्ममात्रं जडतया दुःखतया मिथ्यात्वेन च भाति, आत्मा तु चिद्रूपत्वादिनेति विवरणाद्युक्तेः दृश्यभ्रमं प्रति पूर्णानन्दस्वरूपज्ञानं विरोधीत्युक्तम्; जडत्वादिधर्मस्य पूर्णानन्दस्वरूपत्वात्। स्वीक्रियते हि परैरपि घटे तादात्म्येन घटान्यभ्रमे घटत्वादिविषयकज्ञानस्य विरोधित्वम्। अन्यथा घटो घटादन्य इति भ्रमापत्तेः। न चैवमपि निर्विकल्पकस्य ब्रह्मज्ञानस्य विरोधित्वानुपपत्तिरिति वाच्यम्; घटत्वावच्छिन्नप्रतियोगिताकभेदविशिष्टनिष्ठ[1]प्रकारतानिरूपितविशेष्यतावच्छेदकत्वसम्बन्धेन प्रत्यक्षं प्रति तदिच्छाविरहविशिष्टज्ञानत्वेन घटत्वनिष्ठेन अनवच्छिन्नविषयतासम्बन्धेन प्रतिबन्धकत्वं हि परैः स्वीक्रियते। जातिमान् घटान्य इत्यनाहार्यप्रत्यक्षोदयादनवच्छिन्नेति। घट इति ज्ञाने सत्यपि तादृशप्रत्यक्षोदयादवच्छेदकत्वेऽप्यनवच्छिन्नेति देयम्। तथाच पूर्णानन्दरूपतद्व्यक्तित्वावाच्छिन्नप्रतियोगिताकभेदविशिष्ट[2] प्रकारतानिरूपितविशेष्यतावच्छेदकत्वसम्बन्धेन प्रत्यक्षे तदिच्छाविरहविशिष्टज्ञानत्वेन[3] पूर्णानन्दस्वरूपनिष्ठेन अनवच्छिन्नविषयतासम्बन्धेन विरोधित्वस्यापि सर्वसम्मतत्वात्, चरमब्रह्मज्ञानकाले जडत्वादिरूपेण ज्ञाने मुमुक्षोरिच्छाविरहात् चरमस्य ब्रह्मनिर्विकल्पस्य सर्वसम्मतमेव तादृशज्ञानविरोधित्वम्। तथाच मन्मते ज्ञानस्येच्छाजन्यत्वास्वीकारेणोक्तेच्छाविरहविशिष्टरूपेण ब्रह्मज्ञानस्य विरोधित्वास्वीकारेऽप्यनात्मज्ञानं प्रत्य(क्ष)प्रामाण्यज्ञानानास्कन्दितब्रह्मज्ञानत्वेन विरोधित्वं स्वीक्रियते; जडत्वादेः प्रतिबध्यतावच्छेदके निवेशाभावेन लाघवात्। अपिचेच्छा(द्य)घटिताज्ञानसामग्री अनिच्छाविषयज्ञानविरोधिनीति परेषां सम्मतामिति ब्रह्मनिर्विकल्पस्य मोक्षहेतुत्वेन श्रुत्यादिसिद्धस्य तार्किकशिरोमण्यादिसम्मतस्य च मुमुक्षोरत्यन्तमिष्टतया अन्यज्ञानस्य तदभावेन

---

[1] विश्वनिष्ठ. [2] विशेष. [3] मानत्वेन.

यदि तु स्वरूपोपलक्षणाद्व्यावृत्ताकारता, तदा निष्प्रकारकतैव ; उपलक्षणस्य तत्राप्रवेशात्, स्वस्य च स्वस्मिन्नप्रकारत्वात्, न च प्रमेयत्वादिवत् स्वस्यैव स्वस्मिन् प्रकारत्वमिति वाच्यम् ; त्वयापि केवलान्वयिन्येव अगत्या तथा अङ्गीकारात् । न तु सर्वत्र । अथ आकारप्रकारयोः अभेदात् ब्रह्माकारतैव ब्रह्मबुद्धेः तत्प्रकारतेति चेन्न; विशिष्टबुद्धेः विशेष्याकारत्वेपि तदप्रकारकत्वात्, आकारप्रकारयोर्भेदात् । आकारश्च वृत्तिनिष्ठः कश्चिद्धर्मोऽसाधारणव्यवहारहेतुरिति वक्ष्यते । तस्माद्यथाकाशपदाच्छब्दाश्रयत्वोपलक्षितधर्मिस्वरूपमात्रं ज्ञायते, तद्वदत्रापि द्वितीयाभावाद्युपलक्षितब्रह्म-

---

प्रत्युत द्विष्टतया[1] च ब्रह्मनिर्विकल्पस्य अन्यधीमात्रविरोधित्वं सर्वसम्मतमित्यादिकमभिप्रेत्याह—**यदि तु स्वरूपेति । उपलक्षणस्येति ।** व्यावृत्ताकारबुद्धावविषयस्य व्यावर्तक[2] धर्मस्येत्यर्थः । **तत्र** व्यावृत्ताकारबुद्धौ **अप्रवेशात्** अप्रकारत्वात् । **स्वस्य चेति ।** ननु स्वं स्वस्य रूपमित्यादिव्यवहारात् 'आनन्दं ब्रह्मणो रूपं, तस्य भासा' इत्यादिश्रुत्यनूदितत्वाच्च स्वस्य स्वस्मिन्नपि कल्पितसम्बन्धोऽस्तीति कथं स्वस्य स्वस्मिन्नप्रकारत्व[3]मिति चेत्, न; ज्ञानविशेषविषयत्वादिरूपभेदविशिष्टाकारेण सम्बन्धप्रतियोगित्वानुयोगित्वयोः सम्भवेऽपि शुद्धस्वरूपेण तदसम्भवात्, सम्भवे वा तस्य प्रातीतिकत्वेन व्यावहारिकविषयकभ्रमविरोधिधीविषयत्वायोगात् । त्वयाऽपीत्यपिना प्रतिवाद्यन्तरसमुच्चयः । अस्मन्मते केवलान्वयित्वस्यैवानङ्गीकारात् । अङ्गीकारेऽपि प्रमेयत्वं प्रमेयमित्यादौ विशेष्यविशेषणयोः प्रमेयत्वयोः भेदस्वीकारात् । **कश्चिदिति ।** विषयता[4]शब्देन परैर्व्यवहार्य इति भावः । धर्मिस्वरूपमात्रस्योपलक्ष्यत्वं च परसम्मत्या[5] निर्णेतुं दृष्टान्तमाह—**तस्माद्यथेति ।**

---

[1] तद्विशिष्टतया. [2] अव्यावर्तक. [3] स्वस्मिन् प्रकारत्व. [4] विषयिता. [5] परसम्मतत्वात्.

स्वरूपज्ञानं व्यावृत्ताकारं द्वैतनिवर्तकमपरोक्षम् । यथाच शब्दात् तादृक्ज्ञानसम्भवः, तथा वक्ष्यते । न च बाधकधियां भ्रमतद्धेतुत्वज्ञान[1]दोषाध्यस्तदृष्टादीना[2]मबाधकत्वं दृष्टमिति कथं ब्रह्मज्ञानस्य तद्बाधकत्वं घटतामिति वाच्यम्; यथाहि स्वप्ने द्रष्टारं दुष्टकरणवन्तं कल्पयित्वा तस्य भ्रमं कल्पयति, तत्र जागरज्ञानेन सर्वेषां निवृत्तिदर्शनात् । जाग्रद्दशायामपि मनुष्यप्रतिकृतौ चैतन्यं कल्पयित्वा तत्समीपवर्तन्यनादर्श एव आदर्शत्वं कल्पयित्वा स्वप्रतिबिम्बमयं पश्यतीति कल्पयति, तदा नायं चेतनो न चायमादर्श इति प्रमया सर्वनिवृत्तिदर्शनाच्च नेयमदृष्टचरी कल्पना । तथाचेयं शुक्तिरित्याद्यधिष्ठानज्ञानं रज्जुं सर्पभ्रमामिव द्रष्ट्राद्यध्यासं मा निवीवृतत् । तत् कस्य हेतोः? तदधिष्ठानसाक्षात्कारत्वाभावात् । ब्रह्मज्ञानं तु आकाशादिप्रपञ्चभ्रममिव

उक्तं हि शब्दमणौ अपूर्ववादे आकाशस्मृतिजनकसंस्कारस्य शब्दाश्रयत्वविषयकत्वनियमकल्पनेन शब्दाश्रयत्वांशेपि संस्कारोद्बोधनियमसम्भवेनाकाशशब्दादशक्यस्यापि शब्दाश्रयत्वस्य भानं; अस्तु वा तदपि शक्यं, यदि नियतोपस्थितिः । वस्तुतः सैव नास्ति। अस्तु वा पदादपि निर्विकल्पकमिति निर्विकल्पकमाकाशनिष्ठानवच्छिन्नविषयताकम् । तेनाकाशांशे सुबर्थस्य सङ्ख्यादेः कर्मत्वादौ सुबर्थे चाकाशस्य प्रकारत्वेऽपि न क्षतिः । तथाच यत्र धर्मस्य नियतोपस्थितिः, धर्मिणामानन्त्येनानुवृत्तधर्मं विना शक्तिग्रहासम्भवश्च, तत्रैव धर्मेऽपि शक्तिरिति 'जात्याकृतिव्यक्तयः पदार्थः' इति न्यायसूत्राभिप्रेतं आकाशादिपदाद्धर्मिस्मृतिः[3] कदाचिददृष्टद्रव्यान्यद्रव्यत्वेनापीति शब्दाश्रयत्वेन उपस्थित्यनियमात् धर्म्यनानन्त्याच्च शुद्धाकाश एव तत्पदशक्तिः स्वीक्रियत इति कारणीभूतशक्तिग्रहे शब्दाश्रयत्वादिना धर्मीभूतेऽपि कार्यभूते

---

[1] तद्धेत्वज्ञान. [2] द्रष्ट्रादीना. [3] धर्मास्मृतिः.

द्रष्टुर्दोषादिभ्रममपि निवर्तयेदेव । तत्कस्य हेतोः? अशेषभ्रमाधिष्ठानतत्त्वसाक्षात्कारत्वात् । एवंच बाधबुद्धित्वं न दोषाद्यबाधकत्वे प्रयोजकम्, अपितु तद्भ्रमाधिष्ठानतत्त्वसाक्षात्कारभिन्नत्वमिति द्रष्टव्यम् । ननु कल्पितत्वादुक्तदृष्टान्तेन तत् बाध्यताम्, इह तु कथमिति चेत्, हन्त ब्रह्मव्यतिरिक्तस्य सर्वस्य कल्पितत्व-

---

स्मरणे शब्दानुभवे वा शुद्ध एव भातीति धर्मस्वरूपमात्रस्य ज्ञापकधीविषयत्वात् । शब्दाश्रयत्वादिकमुपलक्षणम्, तापसत्वविशिष्टस्य जटा इवेति यथा तार्किकैः स्वीक्रियते, तथा द्वितीयाभाववत्त्वादिविशिष्टब्रह्मज्ञानाधीनलक्षणज्ञानाधीनज्ञाने शुद्धब्रह्मणो भानात् द्वितीयाभावादिकमुपलक्षणमित्यस्माभिः स्वीक्रियत इति धर्मिमात्रस्योपलक्ष्यत्वम् । वृत्तिज्ञानाधीनज्ञानविषयत्वं वा नास्माकमेवेति भावः । न च तथापि एकनामार्थमात्रविषयकशाब्दबोधे परासम्मतिरिति वाच्यम्; एको द्वावित्यादौ तदभावात् तत्र शाब्दबोधानङ्गीकारे शृणोमीत्यनुभवबाधापत्तेः । अन्यथा शाब्दानुभवमात्रमपलप्येतेति भावः ॥

यत्तु—"प्रत्यक्षे बाधशङ्काया लब्धावकाशत्वमुक्तमयुक्तं; प्रत्यक्षविषयसत्त्वे फलपर्यन्तपरीक्षायाः श्रुतितात्पर्यग्राहकलिङ्गेभ्यो बलवत्त्वात्, श्रुतावेव शङ्काया लब्धावकाशत्वात् प्रत्यक्षविरुद्धार्थे लिङ्गानां तात्पर्य[1] ग्राहकत्वाच्च । अधिष्ठानतत्त्वज्ञानत्वेनैव भ्रमनिवर्तकत्वमित्याद्यपि न युक्तम्; स्वाश्रयान्योन्याभावासमानाधिकरणधर्मस्तत्त्वमिति द्रव्य[2] वर्धमानोक्तेः धर्मिस्वरूपस्य तत्त्वरूपत्वाभावात् । व्यावृत्ताकारता द्वेधेत्यादिकमप्ययुक्तम्; उपलक्ष्ये कञ्चिद्धर्मादधत एवोपलक्षणत्वात् । अतएव 'इत्थंभूतलक्षणे' इति सूत्रस्य कञ्चित्प्रकारं प्राप्त इत्थंभूतः, तस्य लक्षणे ज्ञापके तृतीयेत्यर्थ इति व्याख्यानम् । अस्तु वैतद्यथातथा । तथापि स्वरूपमात्रज्ञानं न बाधकं, भ्रमविषयीभूत-

---

[1] तात्पर्या. [2] नव्य.

मङ्गीकुर्वतां अस्माकमिदमनिष्टं महदापादितं देवानांप्रियेण । ननु साक्षिप्रत्यक्षं न बाध्यम्, दोषाजन्यत्वात्; प्रत्युत श्रुतिजनिताद्वैतज्ञानमेव बाध्यम्, तात्पर्यभ्रमरूपदोषजन्यत्वादिति चेन्न;

स्वरूपानपहारकत्वाद्विषया[1] पहारो बाध इति परैरपि स्वीकारात्"—इति, तत्तुच्छम्; फलपर्यन्तव्यवहारस्य तात्त्विकतानिर्णायकपरीक्षात्वस्य[2] पूर्वमेव निरासात्। अन्यथा इन्द्रजालस्यापि तदापत्तेः, बलवच्छ्रुत्याश्रितत्वेन तात्पर्यलिङ्गानां बलवत्त्वात्, तत्त्वं तु धर्मि[3] स्वरूपमपि वर्धमानोक्तौ स्वसम्बन्धिप्रतियोगिकभेदवदसम्बन्धि तत्त्वमिति विवक्षितत्वात्। अन्यथा धनादिकं धन्यादेर्वैशेषिकाभिमतविशेषादेः तत्स्वरूपं च तत्त्वं न स्यात्। तथाच स्वस्य स्वस्मिंस्तादात्म्याङ्गीकारे तादात्म्येन स्वसम्बन्धिस्वप्रतियोगिकभेदवति तदात्म्येनासम्बद्धत्वात् स्वमपि स्वस्य तत्त्वम्। तदनङ्गीकारे तु स्वभिन्ने तेन सम्बन्धेन असम्बन्धित्वे सति तेन सम्बन्धेन स्वसम्बन्धित्वं स्वभेदशून्यत्वं चेत्यन्यतरवत् स्वस्य तत्त्वमित्येव विवक्षितम्। वस्तुतस्तु अनारोपितं तत्त्वमिति लक्षणे सर्वस्यापि भ्रमप्रकारत्वरूपारोपितत्वेन अप्रसिद्धिमाशङ्क्य, वर्धमानेन तथोक्तत्वादस्मन्मते चाधिष्ठानतत्त्व[4] शब्देन अज्ञानविषयसम्बन्धिनोऽनारोपित[5] स्वरूपस्योक्तया तदज्ञानविषयस्य अवच्छेदकत्वभेदशून्यत्वान्यतररूपसम्बन्धवत्त्वे सति तदज्ञान[6] कार्यविलक्षणस्य पर्यवसितार्थस्य सुप्रसिद्धत्वात् परप्रलापानवकाश इति ध्येयम्। उपलक्ष्ये काञ्चिद्धर्ममादधत एवोपलक्षणत्वमिति त्वस्मदविरुद्धम्; [7]ज्ञानविषयत्वस्यैव तादृशधर्मत्वात्। कञ्चित्प्रकारमित्यादिसूत्रव्याख्याने च प्रकारशब्दः 'एकधैवानुद्रष्टव्यः' इत्यादिश्रुतौ एकधैव निर्विकल्पेन घटो ज्ञात

---

[1] कत्वादिति विषया. [2] परीक्षाक्षमस्य. [3] धर्म. ष्ठानत्व. [5] विषयस्यानारोपित. [6] तज्ज्ञान. [7] त्वस्मद्विरुद्धम्.

इत्यादिलौकिकव्यवहारे च धाप्रत्यय इव स्वरूपार्थको न धर्मार्थकः। तत्स्वरूपप्राप्तिश्च धर्मस्वरूपस्य सम्बन्धो धर्मिस्वरूपस्य स्वस्मिन् कल्पितं तादात्म्यं तद्भेदाभावोपहितत्वं वा धर्मि[1] सम्बन्धमात्रस्य प्रकारप्राप्तिरूपत्वे जटाभिस्तापस इतिवत् शब्दाश्रयत्वादिना गगनस्वरूपमिदं सत्तया घट इत्यादिप्रयोगस्य सर्वसिद्धस्य अपलापापत्तेः। न हि गगनघटत्वादिशुद्धस्वरूपस्योक्तरीत्या शब्दजन्यधीविषय[2]त्वं स्मृतिविषयत्वं वा बोधयदुक्तवाक्यगततृतीयापदमसाधु। अथानुमापकरूपोपलक्षण एव तृतीया उक्तसूत्रेण विधीयत इति उक्तविषयत्वबोधने तृतीया न साधुः। अतएव संक्षिप्तसारव्याकरणे 'हेतुविद्वोत्रादेः' इति सूत्रेणानुमापक एव ज्ञापके तृतीयां विधाय धूमेनाग्निमानित्युदाहृतामिति मन्यसे, तथापि गन्धसमनियतत्वादिना पृथिवीत्वरूपमिदमित्यादौ तृतीयाप्राप्तयर्थमुक्तरूप एव सूत्रार्थो वाच्यः। न हि तत्र किञ्चिद्धर्मविशिष्टस्य अनुमापकमुपलक्षणम्। अपितु तद्भदन्यावृत्तित्वरूपव्याप्तया शुद्धपृथिवीत्वस्य। तथा च द्वितीयाभावरूपत्वादिना ब्रह्मस्वरूपमिदमित्यपि प्रयोगस्संभवतीति द्वितीयाभावरूपत्वादिकमप्युपलक्षणमिति न किञ्चिदप्यनुपपन्नम्। किञ्चोक्तसूत्रे चिह्नशब्दितभेदकेपि तृतीया विवक्षिता। उदाहृतं च तत्र 'कमण्डलुना मैत्रः' इति। मुग्धबोधव्याकरणेऽपि साधनहेतुविशेषणभेदककर्तृषु तृतीयां विधाय 'नेत्रैः पुण्येन भूषाभिर्नाम्ना दृष्टश्शिवो जनैः' इत्युदाहृतम्। तथाच इत्थंभूतलक्षणशब्देन इतरभेदानुमापकरूपस्य भेदकस्यापि सङ्ग्राह्यतया इतरभेदस्य चाभावादौ ब्रह्मणि च तत्स्वरूपतया प्रकारं प्राप्त इति व्याख्याने प्रकारपदस्य धर्मार्थकत्वमसङ्गतमित्युक्तभेदरूपस्वरूपानुमापकस्य द्वितीयाभावरूपत्वादेः इत्थंभूतलक्षणत्वमव्याहतम्। वस्तुतस्तु अनुमापक एव उपलक्षणशब्दः

[1] धर्मि. [2] जन्यज्ञानविषय.

चैतन्यस्य स्वरूपतो दोषाजन्यत्वेऽपि तदवच्छेदिकाया अविद्यावृत्तेर्दोषजन्यत्वात्, तत्प्रतिबिम्बितचैतन्यस्यैव साक्षिपदार्थत्वात्। अद्वैततात्पर्यग्रहस्य च प्रत्यक्षाद्यविरोधेन प्रमारूपतया

प्रयुज्यते। उपलक्षणशब्दार्थ एव इत्थंभूतलक्षणेति सौत्रशब्दार्थ इति ते भ्रमः। स्वविशेष्यान्वितानन्वयि उपलक्षणमित्यपि हि व्यवहारस्तान्त्रिकाणाम्। अतएव गोत्वेनोपलक्षितं व्यक्तिस्वरूपं गोपदशक्यं धेनुपदशक्यवदित्याशङ्क्य गोत्वस्य व्यक्तिबोधे भानावश्यकत्वान्निराकृतं मणौ शक्तिवादे। उक्तं च तत्र—"गोत्वविशिष्ट एव कार्यान्वयात् गोत्वं विशेषणं नोपलक्षणं, तदन्येन कार्यान्वये उपलक्षणं, यथाऽयं वासस्वी देवदत्तशब्दवाच्य इत्यत्र वासः" तस्माद्विशेषणशब्दव्यवहार्यभिन्ने उपलक्षणशब्दप्रयोगात् व्यावृत्ताकारधी[1]विषये विशेषणपदस्य तदन्यत्र उपलक्षणशब्दप्रयोगो युक्त एवेति परवाक्यार्थबोधः स्वस्यास्तु वा यथातथेत्यनेन त्वयैव सूचितः। विषयापहारो बाध इत्यत्र तु विषयोऽज्ञानप्रयुक्तरूपो विवक्षितः। तथाच शुद्धस्य उपहितविषयकभ्रमविषयत्वेऽपि[2] न क्षतिः। नन्वविद्यावृत्तिं विनापि विषयेषु सुखादिषु साक्षिणः सम्बन्धसम्भवात् तदङ्गीकारो व्यर्थस्तत्राह—**तत्प्रतिबिम्बितचैतन्यस्येति।** शुक्त्याद्यवच्छन्नब्रह्मचैतन्याध्यस्तरजतादेः साक्षिसम्बन्धार्थं अविद्यावृत्तिरवश्यं वाच्या। तत्र चाविद्यैव कारणमिति सुखादिष्वपि सा आवश्यकी; विषयतासम्बन्धेन तदुत्पत्तौ अज्ञातविषयभेदस्य हेतुत्वात् घटादौ तदनुत्पत्तिरतीतावस्थसुखादौ उक्तभेदस्यासत्त्वात् तत्रापि तदनुत्पत्तिः। अविद्यासुखादौ[3] तत्कालीनमनोवृत्तौ च एकस्या एवाविद्यावृतेस्स्वीकारादविद्यावृत्त्यवच्छिन्नचैतन्यस्य साक्षिपदार्थता उपपद्यते। न च शुक्तिरूप्यादिभिन्नकालीनसुखादावनन्ताविद्यावृत्तिकल्पने गौरवात् शुक्तिरूप्यादिस्थलीयदोषविशेषाणामेव अविद्यावृत्तिहेतुत्वं न

---

[1] त्ताकारविधि. [2] उपहितविषयत्वेऽपि. [3] अविद्याधीनसुखादौ, नर्काधीन.

त्वविद्यामात्रदोषस्येति वाच्यम्; तथा सति सुखादि[1]स्मरणोपधायक-संस्कारानुपपत्तेः ज्ञाननाशस्यैव संस्कारत्वात्। न च सुखाद्यवच्छिन्नचैतन्यस्य सुखादिकालीनमनोवृत्तेर्वा नाशः सुखादिसंस्कार इति वाच्यम्; उक्तचिन्नाशस्य सुखादिसूक्ष्मावस्थारूपत्वात्, सुखाद्यभिन्नत्वेऽपि[2] उक्तविदभेदाभावेन सुखादिविषयकत्वासम्भवात्, चैतन्यनिष्ठतादात्म्यवृत्तिनिष्ठाकारसाधारणविषयतात्वप्रकारतात्वादेः अनुगतस्याभावाच्च। सुखाद्यनुभित्यादिवृत्तिनाशरूपसंस्कारसाधारण्याय स्मृतिहेतुतावच्छेदके आकाररूपविषयतानिवेशस्य आवश्यकत्वाच्चैतन्य[3]तादात्म्यमात्रनिवेशासम्भवात्। एवंच साक्षिरूपस्य अविद्याप्रतिबिम्बितचैतन्यस्य शुक्तिरूप्याद्यधिष्ठानशुक्त्याद्यवच्छिन्नचैतन्यरूपत्वं जीवस्यैव जगदुपादानत्वादिति पक्षेऽपि शुक्तिरूप्यादावविद्यावृत्तिसिद्धिः। एवंच सुषुप्तौ जीवस्येव प्रलये ईश्वरस्याविद्यावृत्तिसिद्धिः, अतीतप्रपञ्चस्मृतेरेव तत्र मानत्वात्। प्रपञ्चसूक्ष्मावस्थारूपप्रलयस्य तत्कालीनवृत्तिं विना पश्चात्स्मृतेरनुपपत्तेः, तां विना सदा सर्वज्ञत्वानुपपत्तेः। उक्तं च तथा विवरणादौ। यदि च अविद्यावृत्तिर्नास्तीत्याग्रहः, तदापि साक्षिणो विषयीभूतसुखमनोवृत्त्यादेः अविद्यारूपदोषजन्यत्वादेव बाध्यता; तत्पक्षे साक्षिण एव भ्रमत्वात्तस्य चाजन्यत्वाद्विषयेष्वेव दोषजन्यत्वस्य बाध्यत्वव्यवस्थापकत्वात्। अनादिपदार्थेष्वपि क्षेमसाधारणस्याविद्यारूपदोषजन्यत्वस्य सत्त्वात्। न चाविद्यावृत्तेरुक्तरीत्या सिद्धावप्यविद्योपहितचैतन्यस्यैव बिम्बप्रतिबिम्बरूपेशजीवानुगतस्य साक्षिपदार्थत्वसम्भवे तद्वृत्तिप्रतिबिम्बितस्य तदुक्तिरयुक्तेति वाच्यम्; वृत्तिप्रतिबिम्बितस्यैव भासकत्वेन तत्पदार्थत्वानपायाच्छुद्धचैतन्यस्य ईश्वरस्य वा जगदुपादानत्वपक्षे वृत्तिद्वारैव साक्षिणि जगत्सम्बन्धस्य वाच्यत्वात्। अन्यथा अनावृतविषयतादात्म्याश्रयतादात्म्यादिसम्बन्धत्वे

[1] शुक्त्यादि. [2] द्यवच्छिन्नत्वेऽपि. [3] कत्वाच्चेतर.

दोषत्वाभावात् न तज्जन्यमद्वैतज्ञानं बाध्यम्; भ्रमजन्यत्वस्य विषयबाधाप्रयोजनत्वाच्च। न च बाधकतुल्यमानताकैद्वैतश्रुति-संवादिद्वैतप्रत्यक्षं कथं बाध्यमिति वाच्यम्; द्वैतस्य प्रत्यक्षादि-लौकिकमानासिद्धत्वेन तद्बोधकश्रुतेरनुवादकतया फलवदज्ञातस्वा-र्थतात्पर्यकाद्वैतश्रुतिसाम्याभावात्। ननु बाधकधीबोध्यं न बा-ध्यम्, भेदश्च बाधकधीबोध्यः; तया स्वविषयस्य भिन्नत्वेनैव ग्रहात्, नेदं रजतमितिवदभिन्नतया उदासीनतया ग्रहणे बाध-

---

गौरवात्, ब्रह्मज्ञानान्यस्य आवरणा[1] नाशकत्वपक्षे तत्सम्बद्धत्वासम्भ-वाच्च, यदाकारवृत्तिप्रतिबिम्बितं यच्चैतन्यं तत्तत्साक्षिपदार्थ इत्यभि-प्रायाच्च, अविद्यावृत्तिद्वयस्य युगपदुत्पत्तिस्वीकारात् परस्पराकारकत्व मेकस्या एव वा वृत्तेः स्वस्वेतराकारकत्वमिति नानुपपत्तिः। एतेन शुद्धचिदेव साक्ष्यस्त्वित्यपि प्रत्युक्तम्। यदेव हि विषयसम्बद्धतया भासकं तदेव साक्षि, न च शुद्धं तथा, कैवल्येऽपि तत्त्वापत्तेः। यत्तु मनउपहितमेव चैतन्यं साक्षि, अन्यथा एकमनोवच्छिन्नस्य प्रमातुरन्य-मनस्तद्धर्मादिप्रत्यक्षत्वापत्तेरिति; तन्न रम्यम्; अहंपरमनआदिकं साक्षा-त्करोमीति व्यवहारे तत्तन्मनोवच्छिन्नसाक्षिणः परमनआदिविषयकस्य विषयत्वात्तस्य च बाधितत्वादविद्योपहितस्य साक्षित्वे बाधकाभावेन मनोभेदेन साक्षिपदार्थभेदे मानाभावात्। अन्यथा तत्तच्छरीरतत्तत्का-लावच्छिन्नेन चैतन्येन शरीरान्तरकालान्तरीयसुखादिकं प्रत्यक्षीक्रियेतेति तद्वारणाय तत्तच्छरीरकालावच्छिन्नस्यैव साक्षिपदार्थत्वापत्तेः। तत्तच्छ-रीरावच्छिन्नस्य शरीराद्यन्तरीयसुखाद्यसम्बन्धाच्चोक्तापत्तिश्चेत्तर्हि तत्तन्म-नोवच्छिन्नस्य मनोन्तरासम्बन्धोपि सम[2]इति विभावनीयमिति दिक्। पश्चाद्बाध्यतात्पर्यधीर्भ्रम एवेत्यत आह—**भ्रमजन्यत्वस्येति।** लिङ्गा-

---

[1] आवरण. [2] न सम.

कत्वायोगादिति चेन्न; बाधकधियो भेदविषयत्वानभ्युपगमात् इयं शुक्तिरित्येव बाधबुद्ध्युदयात्। तस्यास्तु नेदं रजतमिति भेदबुद्धिः फलम्। व्यावृत्ताकारतैव बाधधिय आवश्यकी। सा च स्वरूपोपलक्षणबलान्निष्प्रकारकब्रह्मज्ञानेऽपि अस्तीति न बाधकधीबोध्यत्वं भेदस्य। ननु—स्वप्नविलक्षणं फलपर्यन्तपरीक्षायामिति चेच्छङ्का स्यात्तदा अद्वैतश्रुतिप्रत्यक्षतत्प्रामाण्यशङ्कायामद्वैतश्रुतिरपि न सिद्ध्येत्। बाधेऽपि बाधशङ्कायामबाधितबाधप्रसिद्धिरपि न स्यात्। बाधितबाधशङ्कायाश्च अबाध्यत्वाविरोधि-

---

भासादिजन्यप्रमानुमित्यादिसाधारण्येनेति शेषः। मिथ्यात्वधीरूपे बाधे दृश्यत्वादेः स्वप्रयोजकाज्ञानसहितस्य विषयस्योच्छेदरूपे बाधे चाधिष्ठानतत्त्वज्ञानस्य प्रयोजकत्वमिति भावः। **बाधकधिय इति।** यावत्या इत्यादिः। तेन रजतभेदाज्ञानजन्यभ्रमबाधकबुद्धेः भेदविषयकत्वेऽपि न क्षतिः। **इत्येवेत्यादि।** एतावन्मात्राकाराया अपि बाधबुद्धेरुदयादित्यर्थः। **बाधकधीति।** बाधकधीमात्रेत्यर्थः। यथाश्रुते शुक्तित्वादिना ज्ञानेऽपि[1] रजतान्यत्वादिरूपेण अज्ञानाधिनभ्रमस्य तेन रूपेण ज्ञानादेव बाधादसङ्गतिरिति ध्येयम्। **शङ्का स्यादिति।** प्रत्यक्षे बाधकशङ्का स्यादित्यर्थः। किञ्च बाधकं बाधितं वा शङ्क्येत अबाधितं वा, नान्त्य इत्याह—**बाधेऽपीति।** बाधपदानि बाधकार्थकानि, प्रत्यक्षे यद्बाधकमाशङ्क्यं तत्रापि बाधकशङ्कासम्भवेन अबाधितबाधकरूपायाः शङ्काकोटेः **प्रसिद्धिः** ज्ञानमपि न स्यादित्यर्थः। आद्ये त्वाह—**बाधितेति।** बाधिते बाधकस्य तत्त्वज्ञानत्वाभावेन अबाधकत्वात् तच्छङ्कायामपि बाधकाबाध्यत्वरूपं सत्त्वं प्रत्यक्षविषये ज्ञातुं

---

[1] यथाश्रुते चाबाध्यशुक्तित्वादिना ज्ञाते तेनापि.

त्वात्। भाविबाधेऽपि बाधशङ्कापातेन स्वक्रियाव्याघातश्च स्यात्। शङ्काप्रत्यक्षेऽपि शङ्कायां शङ्कापि न सिद्ध्येत्। एवं सर्वत्र शङ्काप्रसरात् सर्वविप्लवापत्तिरिति चेत्-मैवं मंस्थाः। यतः समत्वेन प्रमाणान्तरे उपस्थित एव निश्चितेऽपि सत्त्वादौ शङ्का भवतीति ब्रूमः, न तु निश्चितमात्रे शङ्का भवतीति। तथाच यदुक्तं बौद्धं प्रति भट्टवार्तिके—

दुष्टज्ञानगृहीतार्थप्रतिषेधोऽपि युज्यते।
गृहीतमात्रबाधे तु स्वपक्षोपि न सिद्ध्यति॥

इति, तदपि न विरुद्ध्यते; गृहीतमात्रबाधस्य तच्छङ्कायाश्चानुक्तेः। ननु सत्त्वादिप्रत्यक्षे क्लृप्तदूरादिदोषाभावनिश्चये कथं शङ्कोदयः? न च क्लृप्तानामभावनिश्चयेऽपि अक्लृप्तस्य

शक्यत इत्यर्थः। **भाविबाधे** ब्रह्मतत्त्वज्ञाने। **स्वक्रियेति**। वेदान्तश्रवणादिप्रवृत्तीत्यर्थः। **शङ्काप्रत्यक्षे** बाधकविषयकशङ्कायाः प्रत्यक्षे। **शङ्कायां** अप्रामाण्यशङ्कायाम्। **शङ्कापि** बाधकस्य शङ्कापि। **सत्त्वादौ** प्रत्यक्षविषयगते सत्त्वादौ। **दुष्टज्ञानेति**। शुक्तिरूप्यादेरागन्तुकदोषयुक्तधीविषयत्ववत् दृश्यमात्रस्य अविद्यारूपदोषयुक्तधीविषयत्वात् **प्रतिषेधो** बाधो युज्यते। धीविषयत्वस्य दोषयुक्तत्वं च दोषप्रयुक्तनिष्ठत्वम्। तेन ब्रह्मधीविषयत्वस्यापि कस्यापि कथंचिद्दोषयुक्तत्वेऽपि न क्षतिः। दोषप्रयुक्तस्यैव अविद्याप्रयुक्तत्वेन बाध्यतायोग्यत्वमिति भावः। गृहीतमात्रं बाध्यमिति माध्यमिकमते तु **स्वपक्षोऽपि न सिद्ध्यति** स्फुरणस्वरूपस्य बाधानुपलम्भेन अविद्याप्रयुक्तत्वाकल्पनात् जन्यधीविषयरूपगृहीतमात्रस्य बाधासम्भवादिति भावः। यद्यपि प्रत्यक्षसमत्वेन श्रुत्यादिव्रातमुपस्थितं, तथापि प्रत्यक्षविषयसत्त्वादौ न बाधकशङ्का घटत इति शङ्कते—**ननु सत्त्वादीति**।

शङ्का स्यात्। शब्दे क्लृप्तवक्तृनिबन्धनदोषस्य नित्यत्वेन वेदे अभावेऽपि दोषान्तरशङ्कायाः सुवचत्वात्। न च स्वाप्न-प्रत्यक्षे तदा दूराद्यभावनिश्चयेऽपि अप्रामाण्यदर्शनेन तद्वदत्रापि शङ्केति वाच्यम्; शून्यमेव तत्त्वमिति स्वाप्नवेदेऽपि तदा भ्रान्त्या-दिदोषाभावनिश्चयेऽपि अप्रामाण्यदर्शनस्य वेदेऽपि समानत्वात्। स्वप्नवैषम्यानुभवस्तूभयत्रापि समान इति चेन्न; सत्त्वप्रत्यक्षा-द्वैतागमयोः क्लृप्तदोषाभावनिश्चयस्य समानत्वेन प्रामाण्य-शङ्कायामप्रतिबन्धकत्वात्। न हि सत्प्रतिपक्षे उभयत्र दोषा-भावनिश्चयः किमत्र तत्त्वमिति जिज्ञासां प्रतिबध्नाति; विरुद्ध-विशेषादर्शनकालीनस्यैव विशेषदर्शनस्य शङ्काप्रतिबन्धकत्वात्

किमत्रेति। अत्र अनयोः परामर्शद्वयविषयव्याप्तिपक्षधर्मतयोः किं तत्त्वमबाधितमित्यर्थः। जिज्ञासामिति। अनयोरन्यतरद्बाध्यमिति धीप्रतिबन्धद्वारेति शेषः। ननु दोषाभाववत्त्वावच्छेदेन अबाध्यत्व-निश्चयात् बाध्यत्वव्यावर्तकस्य दोषाभावस्योक्तान्यतरत्वावच्छेदेन निश्च-य उक्तधीप्रतिबन्धद्वारा उक्तजिज्ञासां कुतो न प्रतिबध्नातीत्यत आह— विरुद्धेति। विरुद्धघटितो यो विरुद्धार्थग्राहित्वरूपो विशेषः, तदनिश्चयकालीनस्यैव दोषाभावरूपबाध्यत्वव्यावर्तकनिश्चयस्य बाध्यत्व-धीरूपे शङ्कायां प्रतिबन्धकत्वादित्यर्थः। मिथो विरुद्धार्थग्राहित्वेन परामर्शयोर्ज्ञाने तद्विषयीभूतव्याप्तयादौ जातेऽपि दोषाभावनिश्चये भ्रमत्वग्रहात् न तस्य बाध्यत्वधीप्रतिबन्धकत्वमिति, तद्वदेव प्रत्यक्षश्रुत्या-दिमानयोः मिथो विरुद्धग्राहित्वेन ग्रहात् प्रत्यक्षविषयसत्त्वादौ जातेऽपि निर्दोषत्वनिश्चये भ्रमत्वग्रहात् न बाध्यत्वधीप्रतिबन्ध इति भावः। वस्तुतस्तु सत्त्वादिप्रत्यक्षे क्लृप्तदोषाभावनिश्चय एव न सम्भवति अधिष्ठानसत्त्वादेरेव सान्निध्यादिरूपेण प्रत्यक्षं प्रति दोषतया क्लृप्तेन घटादौ ज्ञेयत्वात्। तथाचाधिष्ठानसत्त्वसम्बन्धाकाराविद्यावृत्तेरुक्तस-

अवच्छेदकवृत्त्यनित्यत्वेन च साक्षिप्रत्यक्षस्य दोषजन्यत्वोक्तेः। अतएव यदुक्तं तार्किकैः-"तदेव ह्याशङ्क्यते; यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा न भवन्ति। उक्तं च भट्टवार्तिके बौद्धं प्रति—

'इह जन्मनि केषांचित् न तावदुपपद्यते।
योग्यवस्थागतानां तु न विद्मः किं भविष्यति॥'

इति। तथाच प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वादिह च उत्पत्तिस्वतस्त्वापवादस्य दोषस्य ज्ञप्तिस्वतस्त्वापवादस्य बाधस्य च अदर्शनात्। निर्मूलशङ्कायाश्च स्वक्रियादिविरोधेनानुत्थानाभ्युपगमात् स्वस्थं प्रत्यक्षस्य प्रामाण्यम्" इति, तदपि निरस्तम्;

म्बन्धस्य वा दोषजन्यत्वसम्भवात्तदवच्छिन्नसाक्षिणोऽपि दोषजन्यत्वेन बाध्यत्वमित्याशयेनाह—**अवच्छेदकवृत्तीति**। अवच्छेदकस्य उक्ताविद्यावृत्तेरुक्तसत्त्वस्य वा सम्बन्धेत्यर्थः। अतएव यदुक्तमित्यादि उक्तं तार्किकैः तदेवेत्यादि उक्तं च वार्तिके **इहेत्यादि**। तथाच प्रत्यक्षस्य प्रामाण्यं तत्त्वावेदकत्वरूपं सुस्थमित्यादि यत्तदप्यत एव निरस्तमित्यर्थः। **जन्मनि** जन्मावधि मरणपर्यन्तकाले उपपद्यते प्रत्यक्षादिबाध इति शेषः। **न विद्म इति**। प्रत्यक्षादेस्तात्त्विकप्रामाण्यप्रच्युतिपूर्वकं वेदान्ततात्त्विकप्रामाण्यस्थितिर्यद्यपि भविष्यतीति सम्भाव्यते, तथापि सर्वबाधो न भविष्यत्येवेति न बौद्धमतासिद्धिरिति भावः। शङ्काया एवत्येवकारेण स्वव्याघातिकायाः निर्मूलायाश्च शङ्काया अस्वीकारादित्यर्थः। श्रूयमाणार्थपरतया निश्चितत्वेनागमे शङ्काव्युदासात् प्रत्यक्ष एव बाधशङ्काया लब्धावकाशत्वोक्त्या श्रुतिजन्यज्ञाने बाधशङ्काविरहेण न श्रवणादिप्रवृत्तिरूपस्वरूपक्रियाव्याघातः। प्रत्यक्षे च बाधकशङ्काश्रुतिमूलकत्वात् न निर्मूलेति भावः। ननु

आगमादिप्रामाण्यमूलकशङ्काया एव स्वीकारात् । रूप्यादिनिषेधस्य तु 'नेदं रजतम्' इत्यादेरद्वैतश्रुत्यनुगुणत्वेन नाप्रामाण्यशङ्कास्कन्दनम् । अतो न वृद्धिमिच्छतो मूलहान्यापत्तिः । नापि सन् घट इत्यादेः नेदं रजतमित्यनेन समानयोगक्षेमता ; अद्वैतश्रुतिविरोधाविरोधाभ्यां विशेषात् । अतएव सौषुप्तिकानन्दानुभवस्याप्यप्रामाण्ये कथमात्मन आनन्दरूपता तात्त्विकी, आनन्दश्रुतेरनुभूतातात्त्विकानन्दानुवादकत्वोपपत्तेरित्यपास्तम् ; आनन्दस्य ब्रह्मरूपत्वेन अद्वैतश्रुतिविरोधाभावेन तदप्रामाण्यप्रयो-

---

नेदं रजतमित्यादिप्रत्यक्षस्यापि भ्रमबाधकत्वकाले भ्रमत्वशङ्कासम्भवः, तथाचाकाशादिमिथ्यात्वानुमितौ दृष्टान्ततया मूलीभूतशुक्तिरूप्यादिमिथ्यात्वहानिस्तत्राह—**रूप्यादीति** । सत्त्वप्रत्यक्ष इवाद्वैतश्रुतिविरुद्धार्थकत्वस्य बीजस्याभावात् नोक्तप्रत्यक्षे भ्रमत्वशङ्का, अद्वैतश्रुत्या द्वैतमिथ्यात्वं शुक्तिरूप्यादिबाधकाले न निश्चितं, श्रवणादिना तस्यास्तत्र तात्पर्यानिश्चयात् । अतो न मिथ्याविषयकत्वरूपभ्रमत्वनिश्चयः । तन्निश्चयेप्यज्ञानावच्छेदकविषयकत्वादिरूपव्यावहारिकप्रामाण्यस्य अन्यूनसत्ताकविषयकत्वस्य बाधकताप्रयोजकस्य न क्षतिः । इत्थंच श्रवणादिहीनया तया मिथ्यात्वसंशयेन उक्तभ्रमत्वसंशयेपि न क्षतिरिति भावः । **अनुगुणत्वेन** विरुद्धार्थकत्वाभावेन । **तदप्रामाण्येति** । यद्यपि सौषुप्तानुभवोऽज्ञानोपहितानन्दरूपत्वाविषयांशे भ्रम एवेत्येवं वक्तुं युक्तम् ; तथापि तदंशे भ्रमत्वे उपहितविषयकस्य शुद्धविषयकत्वनियमेन अवश्यविषयीभूतशुद्धांशेऽपि भ्रमत्वमिति पराभिप्रेतनिरासायेदमुक्तम् । शुद्धानन्दरूपतदंशे अप्रामाण्येति तदर्थः । **अतएव** शुद्धानन्दांशे अप्रामाण्यप्रयोजकाभावादेव । सौषुप्तानुभवस्य शुद्धानन्दविषयकत्वेऽपि तद्विरोध्युपहिताकारत्वेन व्यावृत्ताकारत्वाभावात् न व्यावृत्ताकारधीजनकानन्दश्रुत्यनुवादकमिति भावः । **अत्य-**

जकाभावात् । अतएव नानन्दश्रुतेरप्रामाण्यम् । तदुक्तं खण्डने—

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ॥

इति । उक्तं च सुरेश्वरवार्तिके—

अतोऽवबोधकत्वेन दुष्टकारणवर्जनात् ।
अबाधाच्च प्रमाणत्वं वस्तुन्यक्षादिवच्छ्रुतेः ॥

इति । अत्र चाक्षादिवदिति निदर्शनं व्यावहारिकप्रामाण्यमात्रे-

न्तेति । यद्यपि कलहादिस्थले अत्यन्तमसति विरोधिधीविषयीभूतेऽप्यर्थे शाब्दं ज्ञानमानुभाविकं भ्रमरूपं शब्दः करोति, तथाप्यत्र सद्वितीया[1]त्वादिधीविषयत्वेन तादृशेऽप्यद्वितीयशुद्धानन्दे प्रमामेव करोति; उत्पत्तौ स्वतस्त्वापवादकस्य वाक्यार्थभ्रमप्रमादादेः शब्ददोषस्य ज्ञप्तौ स्वतस्त्वापवादकस्य मानान्तरबाधितार्थकत्वग्रहस्य कलहादिस्थले सत्त्वेपि अद्वैतानन्दबोधकश्रुतौ **अबाधात्** उक्तापवादकाभावात् **स्वतः** प्रामाण्येन **निश्चलां** नियतसम्बन्धाम् । यत उत्पत्तौ ज्ञप्तौ चात्र ज्ञानप्रामाण्यस्य स्वतस्त्वमनपवादकं, अतः प्रमामत्र करोतीत्यर्थः । **अवबोधकत्वेनेति** । अज्ञातज्ञापकत्वेनेत्यर्थः । तथाचानुवादकत्वलक्षणमप्रामाण्यं निरस्तम् । उत्पत्तौ स्वतस्त्वापवादकं निरस्यति—दुष्टेति । ज्ञप्तौ तान्नरस्यति—**अबाधादिति** । **निदर्शनमिति** । यथा व्यावहारिकप्रामाण्ये आगन्तुकदोषाप्रयुक्तविषयकत्वं व्यवस्थापकं, तथा तात्त्विकप्रामाण्ये दोषसामान्याप्रयुक्तविषयकत्वमिति स्वापवादकदोषाप्रयुक्तविषयघटितप्रामाण्यपदार्थत्वेन साधारणधर्मेण दृष्टान्तदार्ष्टान्तिकतेति भावः ॥

यत्तु—"स्वप्ने द्रष्टारमित्याद्ययुक्तं; दुष्टकरणस्य कल्पितत्वेन अद्रष्टृत्वात्, यो यो यद्भ्रमद्रष्टा तस्य तद्बाधेऽप्यबाधनियमस्य

---

[1] सत्त्वद्वितीय.

णेति द्रष्टव्यम्। एवंच तात्त्विकप्रामाण्याभावेऽपि प्रत्यक्षा-

अक्षतेः। वृत्तिप्रतिबिम्बितस्य साक्षिताप्ययुक्ता; वृतेर्विषयित्वापत्त्या विषयत्वासम्भवात्, वृत्त्य[1]न्तरोपहितभास्यत्वेऽनवस्थापत्तेः। चिन्मात्रस्य साक्षितौचित्यात् भ्रमजन्यत्वस्य विषयबाधाप्रयोजकत्वादित्ययुक्तम्; बाध्यधीतत्कारणयोरेकविषयकत्वे भ्रमजन्यत्वस्य बाधप्रयोजकत्वसम्भवात्, योग्यताभ्रमजन्यशाब्दबोधे तथा दर्शनात्। द्वैतस्य प्रत्यक्षादिलौकिकमानेत्याद्यपि न युक्तम्; प्रत्यक्षादिगृहीतव्यावहारिकसत्त्वद्वैतान्यपारमार्थिकद्वैतग्राहकत्वेन द्वैतश्रुतेरनुवादकत्वात्। इयं शुक्तिरित्येवेत्याद्ययुक्तम्; रजतशुक्त्योरभेदग्रहे भ्रमानिवृतेः भेदग्रहे तन्निवृत्तेरानुभविकत्वात्। अतएव पीतश्शङ्ख इति भ्रमस्य शङ्खत्वप्रत्यक्षेऽप्यनुवृत्तिः, न तु पीतभेदप्रत्यक्षे। एवं समत्वेन प्रमाणान्तर इत्याद्ययुक्तम्; शब्दो ज्ञात एव प्रमाकरणमिति तत्प्रामाण्यं प्रत्यक्षोपजीवकं, इन्द्रियं तु न तथेति तत्प्रामाण्यं न ज्ञब्दोपजीवकमित्युपजीव्येन प्रत्यक्षेण शब्दस्यासमत्वात्। न हि सत्प्रतिपक्ष इत्याद्ययुक्तम्; सत्प्रतिपक्षन्यायेन प्रत्यक्ष इव श्रुतावपि शङ्कापत्तेः। अतएवागमादिप्रमाणमूलकेत्याद्ययुक्तम्। मूलहान्यापत्तिसमाधानमपि न युक्तम्; नेदं रजतमिति ज्ञाने शङ्कास्पदश्रुत्यानुगुण्यरूपस्य विशेषस्याप्रयोजकत्वात्"—इति, तत्तुच्छम्; मन्मते द्रष्टृ[2]मात्रस्य कल्पितत्वात्, तेन अद्रष्टृत्वादि[3]सिद्धेः। वृत्तस्तूपाधित्वेऽपि विशेषणत्वाभावेन न विषयित्वम्। यथाच विषयत्वेऽपि नानवस्था, तथोक्तम्। शुद्धचितः साक्षित्वं तु प्रत्युक्तम्। स्वविषयविषयकभ्रमजन्यत्वं न बाधप्रयोजकं, लिङ्गाभासधीजन्यानुमित्यादौ व्यभिचारात्। स्वविषयतापर्याप्त्यधिकरणविषयकभ्रमजन्यत्वादिकमपि प्रतियोगिता अभावीया इत्याकारायां लिङ्गाभासजन्यानुमितौ व्यभिचा-

[1] व्यक्तय. [2] दृष्ट. [3] अदृष्टत्वादि.

दीनां व्यावहारिकप्रामाण्याभ्युपगमात् न स्वक्रियाव्याघातः। न वा—

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥

रीत्यादि बोध्यम्। प्रत्यक्षादिसिद्धद्वैतेन लौकिकवैदिककार्यमात्रनिर्वाहे[1] पारमार्थिकद्वैतान्तरपरत्वं यत् श्रुतेः कल्प्यते तत्प्रायस्तद्वैतं[2] गले बद्धवा मरणाय लोकवेदबहिर्भूताय[3]। कथं च तर्हि द्वैतश्रुतिसंवादित्वेनाबाध्यं प्रत्यक्षमिति त्वद्गुरुणोक्तं त्वयोपपादितम्? कथं वा प्रत्यक्षाद्यगृहीतं श्रुतिघटकपदैरुपस्थाप्यं ब्रह्म तु उपहितरूपेण प्रत्यक्षादिगृहीतमुपाध्यंशानुद्भुद्धसंस्कारविषयः तैः स्मारयितुं शक्यम्? न च पारमार्थिकद्वैतमपि व्यावहारिकद्वैतोपहितरूपेण प्रत्यक्षादिगृहीतं तद्रूपानुद्भुद्धसंस्कारविषयः तदनुपहितरूपेण पदैरुपस्थाप्यत इति वाच्यम्; उक्तोपहितरूपेण प्रत्यक्षादिना तद्ग्रहणे मानाभावात्। सत्ताम्फुरणरूपस्य ब्रह्मणः प्रपञ्चोपहितरूपेण तेन ग्रहणं त्वविवादम्। रजतशुक्त्योरभेदग्रहेप्यनुवर्तमानभ्रमस्तु रजतभेदाज्ञानकार्यत्वात् तद्भेदज्ञानान्निवर्तते, बाधकमात्रं न भेदविषयकमित्याचार्याभिप्राय इत्युक्तम्। न च शुक्तित्वज्ञानस्यापि शुक्तित्वं रजतभेदव्याप्यमित्याकारोद्भुद्धसंस्कारविशिष्टस्यैव बाधकत्वात् बाधकमात्रं भेदविषयकमेवेति वाच्यम्; प्रमाया एव बाधकत्वादुक्तसंस्कारस्य तदुपाधित्वेन बाधककोट्यप्रवेशात्, अनुभवानुरोधेन उक्तसंस्काराविशेषितज्ञानस्यापि बाधकत्वाच्च। किंच यद्विशिष्टाधिष्ठानधीत्वेन बाधकता, तन्न बाधकधीबाध्यमित्येव त्वया वाच्यम्। अन्यथा रजतादेः बाध्यस्यपि भेदप्रतियोगित्वेन बाधकधीविषयत्वेन व्यभिचारात्। तथाच न नः क्षतिः।

---

[1] निर्वाहात्. [2] तत्प्रशस्तद्वैतं. [3] गर्ह्यभूताय.

इत्यादिस्मृतिविरोधः। तस्मात् सिद्धं बाधनिश्चयेन तच्छङ्कया च प्रत्यक्षादेः अद्वैतागमानुमानाद्यविरोधित्वम्॥

इति भाविबाधोपपत्तिः.

न हि यद्भेदप्रकारकत्वेन या धीः बाधिका स भेदस्तद्बाध्य इति नस्सम्मतम्। न च 'नेह नानास्ति किञ्चन, शिवमद्वैतम्' इत्यादिश्रुतिजन्यज्ञानस्य द्वैताभावविशिष्ट[1] विषयकत्वेन द्वैताभावबाधकत्वात् व्यभिचार इति वाच्यम्; न हि द्वैतत्वावच्छिन्नाभावस्य स्वविशिष्टब्रह्म विषयकत्वेन बाधकं तत्; किन्तु तादृशाभावाभावविशिष्ट[2] ब्रह्मज्ञानत्वेन। किंचनेतिसर्वनाम्ना तत्तदसाधारणरूपावच्छिन्नाभावानां बोधनात् तद्विशिष्टाधिष्ठानधीत्वेन बाधकत्वं यत्तन्निरूपितं बाध्यत्वं न तस्येति द्वैताभावाभावस्यापि बाध्यत्वं नानुपपन्नम्। शिवमद्वैतमित्यादिश्रुतिजन्यधीस्त्वखण्डविषयकत्वेनैव बाधिकेति ध्येयम्। पीतभेदप्रत्यक्षानेवत्यों भ्रमः पीतभेदाज्ञानकार्य इति नोक्तरीतिक्षतिः[2]। शब्दस्य यद्यपि प्रत्यक्षमुपजीव्यं, तथापि न तत्तात्त्विकप्रामाण्यमुपजीव्यमित्युक्तम्। किञ्च चक्षुरादीन्द्रियनिष्ठं प्रमाकरणत्वमपि शाब्देष्टसाधनताज्ञानाधीनप्रवृत्तिजन्यघर्षणाद्यधीनचक्षुरादिसापेक्षमिति कथं न शब्दोपजीवकम्, इन्द्रियत्वावच्छेदेनातथात्ववत् शब्दज्ञानत्वावच्छेदेनापि न प्रत्यक्षोपजीवकत्वम्। सत्प्रतिपक्षन्यायेन श्रुतावपि शङ्कापत्तिस्तु प्रत्यक्ष एव शङ्काया लब्धावकाशत्वेनैव पूर्वमेव प्रत्युक्ता; पूर्वं सत्प्रतिपक्ष[3]वदन्यतरत्वेन बाध्यत्व[4] शङ्कायामपि पश्चाच्छ्रुतेर्बलवत्त्वप्रतिसन्धानेन प्रत्यक्ष[5] एव शङ्कावकाशात्। किञ्च श्रुतौ शङ्कायामपि नास्माकं क्षतिः; बाध्यज्ञानापेक्षया अन्यूनबलत्वस्यैव बाधकतायां प्रयोजकत्वसम्भवात्।

---

[1] द्वैतभावविशिष्टब्रह्म. [2] तादृशाभावे विशिष्ट. [3] रीतिरिति भावः. [4] सपक्ष. [5] बाधकत्व. [6] प्रत्यक्षत्व.

विश्वसत्यत्वानुमानभङ्गः

स्यादेतत् । अध्यक्षस्य भिन्नविषयत्वादिना बाधाक्षमत्वेऽपि अनुमानमेव बाधकं स्यात् । तथाहि—ब्रह्मप्रमान्येन वेदान्ततात्पर्यप्रमितिजन्यज्ञानान्येन वा मोक्षहेतुज्ञानान्येन वा अबाध्यत्वे सति असत्त्वानधिकरणत्वे सति ब्रह्मान्यत्, विमतं वा सत्, पारमार्थसद्भा, प्रातिभासिकत्वानधिकरणत्वे सति असद्विलक्षणत्वात्, ब्रह्मवत्, व्यतिरेकेण शशशृङ्गवद्वेति चेन्न ।

सूचितं चेदमाचार्यैः स्वाप्नगजादिज्ञानस्य स्वाप्नगजाद्यभावधीबाध्यत्वं वदद्भिः । पूर्वं स्फुरणरूपस्य कदापि बाधानुपलम्भपराहता च श्रुतौ शङ्काबाध्यता । अतएवान्यूनबलत्वेन बाधकत्वे न्यूनवादापत्तिः प्रत्युक्ता । अपिच श्रुतिविषये ब्रह्मणि बाध्यत्वं ज्ञानोच्छेद्यकारणत्वं ज्ञानोच्छेद्यप्रयोजनकत्वं वा स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वादिकं वा शङ्कनीयम् । न च तत्सम्भवति, ब्रह्मण्यकारणकत्वाप्रयोजककत्वानधिकरणकत्वानां त्वयापि स्वीकारात् । अतएव स्वात्यन्ताभावसामानाधिकरण्यादिकमपि न तथा, तत्रात्यन्ताभावप्रतियोगित्वस्य मानाभावादिना पूर्वं निरस्तत्वाच्च । यत्तु परैः प्रत्यक्षस्य पारमार्थिकसत्त्वग्राहित्वमत्रोपपादितं, तत्पूर्वमेव 'न तावत्प्रमाविषयत्वं तद्योग्यत्वं वा' इत्यादिना आशङ्क्य दूषितत्वान्नेह दूषितम् ॥

रत्नैः सारस्वतैस्तर्कैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तनाशाय भाविबाधोपपादनम् ॥

इति भाविबाधोद्धारः.

भिन्नविषयत्वादिनेति । श्रुत्यनुमानविषयमिथ्यात्वाविरोधिव्यावहारिकसत्त्वविषयत्वादिनेत्यर्थः । आदिपदात्त्रिकालाबाध्यसद्रूपतादा-

त्वन्मते प्रातिभासिकस्याप्यसत्त्वेन व्यर्थविशेषणतया व्याप्यत्वासिद्धेः। अस्मन्मतमाश्रित्य हेतूकरणे च देहात्मैक्ये ब्रह्मज्ञानेतरबाध्ये व्यभिचारात्। न हि प्रातिभासिकत्वं ब्रह्मज्ञानेतरबाध्यत्वादन्यत्। त्वया हि प्रातिभासिकस्य शुक्तिरूप्यादेरपक्षत्वाय सत्यन्तमाद्यं विशेषणत्रयं विकल्पेन पक्षे प्रक्षिप्तम्। तत्र ब्रह्म वृत्तिव्याप्यमिति मतेनाद्यम्। तदनभ्युपगमे तु शाब्दप्रमां प्रति तात्पर्यप्रमा हेतुरिति मतेन द्वितीयम्। अन्योन्याश्रयात् न सा हेतुरिति मतेन तृतीयम्। तथाच

त्म्यस्य विषयत्वेऽपि [1] सद्रूपकल्पिततादात्म्यविषयकत्वपरिग्रहः। **व्याप्यत्वासिद्धेरिति**। व्याप्यत्वलक्षणे व्याप्यतावच्छेकान्तराघटितहेतुतावच्छेदकनिवेशाभिप्रायेणेदम्। अशक्तिविशेषस्व्यापकतया व्यर्थविशेषणत्वस्य पुरुषनिग्राहकत्वं न तु हेत्वाभासत्वमिति मते तु व्याप्यत्वे प्रयोक्तृनिग्राहकान्यहेतुनिष्ठत्वासिद्धेरित्यर्थः। **अस्मन्मतमिति**। देहात्मैक्यस्य त्वन्मते अनङ्गीकारेऽपि अस्मन्मतानुसारिहेतुप्रयोगे अस्मन्मतसिद्धदेहात्मैक्ये व्यभिचारवारणमावश्यकमिति भावः। ननु प्रतिभासमात्रशरीरत्वादिरूपं प्रातिभासिकत्वं हेतौ निवेश्यं, तस्य च देहात्मैक्ये सत्त्वान्न व्यभिचार इत्यत आह—**त्वया हीति**। **अन्योन्याश्रयादिति**। शब्दैकगम्यार्थे तात्पर्यप्रमा शाब्दधीपूर्वमसिद्धा। न च शाब्दधीजननानुकूलशक्तिरूपतात्पर्यं तत्पूर्वमपि प्रमातुं शक्यत इति वाच्यम्; शाब्दभ्रमशक्तत्वस्यातात्पर्यत्वात्, शाब्दप्रमाशक्तरूपस्य तस्य वाक्यार्थाबाधरूपप्रमात्वघटितत्वेन शाब्दप्रमापूर्वं प्रमातुमशक्यत्वात्। तथाच शाब्दप्रमातात्पर्यप्रमयोः परस्पराधीनत्वादुत्पत्तावन्योन्याश्रयादित्यर्थः। कर्मप्राशस्त्यादौ वेदान्ततात्पर्यभ्रमजन्यो यश्शाब्दबोधः तदन्याबाध्यं कर्मा[2] प्राशस्त्यादि, तत्र बाधवारणाय प्रमितिस्थले ज्ञानं निवेशितम्। **तृतीयमिति**। स्वग्रन्थे त्वयैव तथोक्तत्वादिति शेषः। **तथाच**

---

[1] विषयत्वेन. [2] कर्म.

प्रातिभासिकस्यात्तत्त्वानधिकरणत्वमङ्गीकृतमेव; अन्यथा तुच्छवारकासत्वानधिकरणत्वविशेषणेनैव तद्व्यावृत्तावेतावत्प्रयासवैयर्थ्यापत्तेः। एवंच देहात्मैक्यस्यापि पक्षत्वे बाध एव। बाधे च सति पक्षविशेषणस्य पक्षत्वस्यासिद्ध्याश्रयासिद्धिरपि। अतएव स्वबाधकाभिमताबाध्यदोषजन्यज्ञानाविषयत्वे सतीति वा, स्वबाधकाभिमतबाध्यबाध्यविषयत्वे सतीति वा, स्वसमानाधिकरणकर्मप्रागभावसमानकालीनज्ञानाबाध्यत्वे सतीति वा विशेषणप्रक्षेपेऽपि न निस्तारः। देहात्मैक्ये पूर्वोक्तदोषाव्यावृत्तेरेव।

पक्षतावच्छेदके ब्रह्मप्रमाना[1] बाध्यत्वादिनिवेशे च **अङ्गीकृतमेवेति**। तथाच देहात्मैक्यस्य असदन्यत्वब्रह्मप्रमेत्यादिविशेषणयोः सत्त्वेन पक्षत्वावश्यकत्वेन प्रतिभासमात्रशरीरत्वरूपप्रातिभासिकत्वस्य हेतौ निवेशे स्वरूपासिद्धिः। ब्रह्मज्ञानान्यबाध्यत्वरूपतन्निवेशे च व्यभिचारः। न च पक्षीयव्यभिचारो न दोष इति वाच्यम्; अनुकूलतर्कसत्त्वे पक्षीयव्याभिचारसंशयस्य अप्रतिबन्धकत्वेऽपि प्रकृते व्यभिचारनिश्चयसम्भवादिति भावः। **पक्षत्वे** पक्षत्वात्। **बाध एव** बाधोऽपि **पक्षत्वस्य** साधकबाधकमानाभावरूपस्य आश्रयासिद्धिमध्येऽसिद्धिबाधयोः प्राचीनैर्व्यवहारादित्युक्तम्। नव्यमते तु बाध एव; अनुमित्युद्देश्यतावच्छेदकप्रकारधीविषयस्यैव आश्रयासिद्धित्वात्। **स्वबाधकेत्यादि**। स्वं प्रातिभासिकं रूप्यादि, तद्बाधकाबाध्यः काचादिदोषः, तज्जन्यभ्रमज्ञानविषयः तदेव रूप्यादि, तदन्यत्वं व्यावहारिकमात्रे। **बाधाविषयत्व इति**। नेदं रूप्यमित्यादिबाधस्य रूप्यादिबाधकाबाध्यस्य निषेध्यत्वेन विषयो रूप्यादि, तदन्यत्वं व्यावहारिकमात्रे। **समानाधिकरणं** स्वसमानाधिकरणं यत्करणं यत्कर्म तत्प्रागभावसमानकालीनज्ञानं ब्रह्माविषयकं तद्बाध्यं रूप्यादि। **पूर्वोक्तेति**।

---

[1] प्रामाण्या.

यत्तु—प्रथमे साध्ये व्यावहारिकसत्त्वमादाय सिद्धसाधनम्, द्वितीयसाध्ये तु वादिनः परमार्थत्वविशेषणं व्यर्थम्; व्यावर्त्याप्रसिद्धेरिति, तन्न; व्यावहारिकसत्त्वं सत्त्वेन व्यवहारमात्रमिति मतेन प्रथमप्रयोगादनुगतम्। पृथग्व्यावहारिकं सत्त्वमिति तु मते द्वितीयः प्रयोगः। न च विशेषणं व्यर्थम्; परार्थानुमाने परं प्रति सिद्धसाधनोद्धारस्य तत्प्रयोजनत्वात्। ईश्वरानुमाने जन्यं कृतिजन्य-

---

स्वबाधकजाग्रद्बोधबाध्यस्वाप्नादिप्रातिभासिकदोषजज्ञानविषये स्वाप्नादिप्रातीतिकविशेषे बाधादिकं बोध्यम्। आद्ये द्वितीयेऽपि स्वाप्नगजादौ स्वबाधकजाग्रद्बोधबाध्यस्वाप्नगजाद्यभावबुद्धेः निषेध्यत्वेन विषये तद्बोध्यं, जाग्रद्बोधस्यापि तद्बाधनयोग्यत्वात्। स्वबाधनोपधायकं तु तत्तद्धीविश्रान्तमननुगतत्वान्न निवेश्यम्। तृतीये त्वसिद्धिः; ईश्वरनिष्ठज्ञानस्यैव स्वसमानाधिकरणेश्वरप्रसादकोपरूपकर्मप्रागभाव (वा) समानकालीनत्वेन तद्बाध्याप्रसिद्धेः, 'पूर्वं तु बादरायणो हेतुव्यपदेशात्' इति न्यायेनान्तःकरणानिष्ठकर्माप्रसिद्धेः। स्वत्वबाधकत्वदोषत्वादेरनुगतस्याभावेन तत्तत्प्रातिभासिकव्यक्तिभेदकूटपर्यवसानेन दुर्ज्ञेयत्वं तु पक्षत्रयेऽपि, ब्रह्मज्ञानबाध्यशुक्तिरूप्यादिप्रातीतिके बाधव्यभिचारादिकं तु पक्षषट्केऽपि बोध्यम्। परेणैव दूषणमाशङ्क्य यदुद्धृतं शिष्यव्युत्पादनाय तदनुमोदते—**यत्त्विति। व्यवहारमात्रमिति।** एकमेवाधिष्ठानीभूतं ब्रह्मसत्त्वं कल्पिततादात्म्येन सदाकारस्य दृश्यप्रतीतिमात्रे प्रकार इति मते सादिदमिति धीप्रकारस्वरूपैक्यादिसाधनेन सिद्धसाधनम्। त्रिकालाबाध्यत्वोपलक्षितस्वरूपात्यन्ताभेदस्य प्रपञ्चे प्रतिवादिना अनङ्गीकारादिति भावः। अनुगतं सादिदमिति धीप्रकारव्यावहारिकमात्रविशेष्यकधीप्रकारः पृथग्व्यावहारिकान्यविषयकसदिदमिति धीप्रकारादन्यद्व्यर्थमिति सादिदमिति धीप्रकारस्य वादिमते परमार्थत्वनियमेन तन्मा-

मित्यत्र मीमांसकं प्रति जन्यत्वस्येव विश्वपरमार्थत्ववादिनं प्रति परमार्थत्वस्य प्रमेयत्वादिवदुपरञ्जकत्वेन विशेषणत्वोऽपपत्तेश्च। तस्मात् पूर्वोक्त एव दोषः। हेतौ च व्यर्थविशेषणत्वदोषः। यद्यपि मतद्वयेपि अप्रामाणिकस्यापि निषेधप्र-

---

त्रैक्यस्य साधनसम्भवे परमार्थेति प्रकारविशेषणं व्यर्थमित्यर्थः। **जन्यत्वस्येवेति**। ईश्वरानङ्गीकारेण तदीयनित्यकृतेरनङ्गीकारिणं मीमांसकं प्रति जन्यत्व[1]मव्यावर्तकमिति भावः। **उपरञ्जकत्वेनेति**। अव्यावर्तकत्वेनेत्यर्थः। प्रतिवादिवादिनोस्सिद्धं व्यावर्तकत्वं नापेक्षते, किन्तु तयोरन्यतरसिद्धमिति भावः। उक्तं हि मण्यादौ—"अदृष्टद्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि, समवेतत्वे सति प्रागभावप्रतियोगित्वात्; यदेवं तदेवं यथा घटः। न च जन्यत्वव्यावर्त्याप्रसिद्धिः; प्रमेयो घट इतिवदव्यावर्तकत्वेऽपि तदुपरक्तबुद्धेरुद्धेश्यत्वेन तस्योपरञ्जकत्वात्" इत्यादि। ननु ब्रह्मज्ञानेतराबाध्यत्वमप्रसिद्धम्; मन्मते ज्ञानमात्रस्य सद्रूपब्रह्मावगाहित्वेन तदितरबाध्यत्वाप्रसिद्धेः। अथ ब्रह्ममात्रविषयकज्ञानं निवेश्यं[2], तदापि परमते तदप्रसिद्धम्। अतः पक्षहेत्वोरप्रसिद्धदोषः कुतो नोच्यते? किञ्च प्रातिभासिकस्य अप्रामाणिकत्वेन तदन्यत्वमप्रसिद्धम्; वेदान्ततात्पर्यप्रमाजन्यत्वस्य शुद्धब्रह्मशाब्दप्रमात्वरूपस्वावच्छेदकघटितत्त्वात्, मोक्षहेतुत्वस्य च विजातीयज्ञानत्वरूपस्वावच्छेदकघटितत्वात्तादृशावच्छेदकाप्रसिद्धेरप्रसिद्धिः परमते, तत्राह—**यद्यपीति। अप्रामाणिकस्येति**। अप्रसिद्धस्य प्रमाणाविषयस्य चेत्यर्थः। अहृदयवाचामहृदयमेवोत्तरमिति न्यायेन स्वमतासिद्धस्यापि पर[3]प्रसिद्धिमात्रेण निषेधप्रतियोगितया प्रयोगः। प्रमाणाविषयस्यापि

---

[1] अजन्यत्व. [2] निवेश्यते. [3] परमत.

तियोगित्वाभ्युपगमादारोपितत्वेन उभयसम्मतत्वरूपस्य वा प्रतिभासमात्रशरीरत्वरूपस्य वा प्रातिभासिकत्वस्य प्रसिद्धिरस्ति। अन्यथा सिद्धान्तेऽपि मिथ्यात्वानुमाने प्रातिभासिकान्यस्यैव पक्षीकर्तव्यत्त्वाद्दोषसाम्यं स्यात् तथापि हेतौ प्रातिभासिकत्वविशेषणं व्यर्थम्। अनधिकरणत्वे सति असत्त्वानधिकरणत्वमात्रस्यैव परमार्थसत्त्वसाधकत्वोपपत्तेः। शुद्धमेव हि ब्रह्म दृष्टान्तत्वेन अभ्युपेयम्। धर्मवतो दृष्टान्तत्वे साध्यवैकल्यापत्तेः। साध्यं तु बाधाभावरूपत्वादधिकरणस्वरूपमेव न धर्मः। धर्म्यतिरिक्ताभावानभ्युपगमस्योक्तत्वात्। तथाच चक्षुस्तैजसत्वानुमाने रूपादिषु मध्ये इत्यस्यासिद्धिवारकस्यापि व्याप्तिग्रहौपयिकत्वेन व्यभिचारवारकविशेषणतुल्यतया यद्यपि सार्थकत्वम्। व्यभिचारवारकस्यापि सार्थकत्वे व्याप्तिग्रहौपयिकत्वमात्रस्य तन्त्रत्वात्। तथापि 'क्षित्यादिकं न कर्तृजन्यं

भ्रमविषयत्वमात्रेण निषेधप्रतियोगित्वधीश्च मतद्वयेऽपि स्वीक्रियत इति भावः। अभ्युपगमात् प्रसिद्धिरस्तीत्येका योजना। पक्षहेत्वोः सत्यन्तस्य प्रसिद्धिरस्तीत्यर्थः। देहात्मैक्यादौ बाधव्यभिचारादिवारणाय प्रातीतिकव्यावर्तकसत्यन्तस्थले विशेषणान्तरमाह—**आरोपितत्वेनेति**। अभ्युपगमादित्यनुषज्यते तेनैतादृशप्रातिभासिकस्यापि प्रमाणाविषयत्वेऽपि न क्षतिः। प्रातिभासिकत्वस्य प्रसिद्धिरस्तीत्यपरायोजना। **अनधिकरणत्वेति**। अस्मद्रीत्या प्रातिभासिके व्यभिचारप्रसक्तेरिदम्। **साधकत्वेति**। व्याप्तिग्रहौपयिकत्वेत्यर्थः। ननु ब्रह्मण्यज्ञानविषयत्वाद्यधिकरणत्वसत्त्वादनधिकरणत्वाभावेन व्याप्त्यग्रहात् व्याप्तिग्रहौपयिकतया तत्सार्थकं, तत्राह **शुद्धमेवेति**। उक्ताधिकरणत्वं चोपहित एव, न शुद्धे ब्रह्मणीति भावः। **तैजसत्वानुमानेति**। चक्षु-

शरीराजन्यत्वात्' इत्यत्र शरीरस्येव व्याप्तिग्रहानुपयोगित्वेन प्रातिभासिकत्वस्य वैय्यर्थ्यमेव । आकाशादावजन्यत्वकर्तृजन्यत्वाभावयोरिव निर्धर्मके ब्रह्मणि अनधिकरणत्वपरमार्थसत्ययोर्व्याप्तिग्रहोपपत्तेः । तथा च एकामसिद्धिं परिहरतो द्वितीयासिद्ध्यापत्तिः । स्वरूपासिद्धिपरिहारार्थं विशेषणं प्रक्षिपतो व्याप्यत्वासिद्धिरित्यर्थः । व्याप्तावनुपयोगस्य दर्शितत्वात् ।

स्तैजसं रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वादालोकवदित्यत्र मध्यान्तानुपादाने दृष्टान्ते हेत्वभावेन साध्यहेत्वोः सहचाराग्रहात् मध्यान्तं व्याप्तिग्राहकमिति भावः । ननु व्याप्तेरिव पक्षधर्मताया अपि ग्राहकत्वेन सार्थक्यं कुतो न स्यात्, व्याप्तिग्राहकस्यापि सार्थकत्वेऽनुमितिप्रयोजकत्वस्यैव तन्त्रत्वसम्भवात्तत्राह—**व्याप्तावि**ति । एवेति शेषः । तथाच यद्विशेषणविनाकृतस्य व्याप्यतावच्छेदकत्वसम्भवः, तद्व्यर्थं, तद्घटितस्य गौरवेणानवच्छेदकत्वात् । न च व्याप्यतायाः स्वरूपसम्बन्धरूपस्य अतिरिक्तस्य वा अवच्छेदकत्वस्यानङ्गीकारादन्यूनानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य गुरावपि स्वीकारान्नोक्तरीत्या वैयर्थ्यस्य दूषणत्वमिति वाच्यम्; व्याप्यताया उक्तावच्छेदकत्वस्यानङ्गीकारे कारणतादेरपि तदापत्तेः दण्डः कारणमित्यादिधीरिव धूमो व्याप्य इत्यादिधीरपि ह्यवच्छेदकत्वावगाहिनी सम्भवत्येव । अतएव कम्बुग्रीवादिमत्त्वादिना व्याप्तिर्नेष्यत एव । तथाच स्वविशिष्टव्यापकसाध्यसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकादिरूपव्याप्तिधीविरोधित्वात् व्याप्यत्वासिद्धिविधयोक्तावच्छेदकत्वशून्यहेतुतावच्छेदकरूपस्य व्यर्थविशेषणत्वस्य हेत्वाभासत्वं स्वरूपासिद्धिमात्रवारकविशेषणघटितहेतावपि तदक्षतमिति भावः । स्पष्टश्चायमर्थो मण्यादावीश्वरवादादौ । तत्र हि—शरीराजन्यत्वे व्यर्थ-

किञ्च व्यावहारिकसत्त्वमात्रेणैव उपपत्तेः उक्तहेतोरप्रयोजकत्वम् । परमार्थसत्त्वे बाधानुपपत्तिलक्षणप्रतिकूलतर्कपरा-

---

विशेषणत्वं, लाघवेनाजन्यत्वस्यैव व्याप्यत्वात् । ननु व्यर्थत्वमसिद्धम्, पक्षधर्मतौपयिकत्वात्, व्यभिचारवारकस्यापि सार्थकत्वे अनुमितिप्रयोजकत्वस्यैव बीजत्वादित्याशङ्क्य, नीलधूमे नीलत्वमपि न व्याप्यतावच्छेदकं, गौरवात्, किन्तु धूमत्वमेव, दण्डत्वेन कारणत्वे रूपमिव । एवं शरीराजन्यत्वेऽपि न शरीरमवच्छेदकं, गौरवात् । येन विशेषणेन विना व्याप्तिः न गृह्यते, तस्यैव व्याप्यतावच्छेदकत्वनियमात् । अतएव गन्धस्यैव व्यञ्जकत्वादित्यत्र रूपादिषु मध्य इति विशेषणं विना व्याप्तग्रहात् तत्सार्थकमेवेत्यादि समाधानमुक्तम् । उक्तं च तत्र पक्षधरैः—'गौरवमेव तदहेतुतायां बीजम्' इति । किञ्च यद्विनापि यदवच्छेदेन व्याप्तिर्गृहीतुं शक्यते, तत्तत्राधिकत्वान्निग्रहस्थानम् । अतएव परं प्रति तेन रूपेण व्याप्तेरुपन्यासस्सम्भवेन अनुपयुक्तकल्पत्वात् उक्तविशेषणघटितहेतुतावच्छेदकघटितमेव व्याप्यत्वं वाच्यम् । तथाचोक्तविशेषणघटितत्वविशिष्टहेतुतावच्छेदकस्य व्याप्यत्वासिद्धिविधया हेत्वाभासत्वमिति सर्वथा व्याप्यत्वासिद्धिर्दुर्वारा । उक्तं च तत्त्वैव—यन्निष्ठा यन्निरूपिता व्याप्तिः येन विशेषणेन विना गृहीतुं न शक्यते, तत्र तद्विशेषणं तद्व्याप्यतावच्छेदकं; अकृतकत्वनिरूपिताभावनिष्ठव्याप्तौ[1] शरीरं विनैव प्रतियोगितया जन्यत्वमवच्छेदकं धूमे नीलत्वमिवेत्यादिपूर्वोक्तशङ्काग्रन्थेप्युक्तम् । न शरीराजन्यत्वे नीलधूमादौ च व्याप्तिरिति विशेष्यमात्रे सा । तथाच स्वरूपासिद्धिः; तद्वारणाय विशेषणोपादाने व्याप्यत्वासिद्धिरिति । अतएव स्वसमानाधिकरणव्याप्यतावच्छेदका-

---

[1] निरूपितजन्यत्वाभाव.

धाताच्च ननु ब्रह्मण्यसत्प्रातिभासिकव्यावृत्तिरूपं हेतुं प्रति व्यावर्तकतया प्रयोजकत्वेन परमार्थसत्त्वं क्लृप्तम् । अपृथिवीव्यावृत्तिं प्रति पृथिवीत्वस्येव असद्व्यावृत्तिं प्रति तद्विरुद्धसत्त्वस्यैव प्रयोजकत्वात् । ज्ञानत्वानन्दत्वादिकं तु न तत्प्रयोजकम् । साक्षादसत्त्वाविरोधित्वात्, प्रपञ्चे तदभावाच्च । तथाच ब्रह्मविश्वसाधारणं परमार्थसत्त्वमेव तत्प्रयोजकम् । न च विश्वमिथ्यात्वात् परमार्थसत्त्वमपि न विश्वसाधारणम् । ज्ञानत्वानन्दत्वादिवदिति वाच्यम् । अन्योन्याश्रयापत्तेरिति चेत् । अयुक्तमेतत् न हि प्रातिभासिकासतोरेका व्यावृत्तिरुभयी वा समव्याप्ता । येनैकप्रयोजकप्रयोज्या भवेत् । किन्तु प्रातिभासिकव्यावृत्ति-

न्तरघटितत्वं व्यर्थविशेषणत्वं, तदभावविशिष्टहेतुतावच्छेदकं व्याप्तिघटकमिति दीधित्यादावुक्तमनादेयम् । ईश्वरवादीयपक्षधरीये 'अथ तादृशधर्माघटितत्वमपि विशेषणम्' इति वाक्ये पूर्वोक्तसाध्यसम्बन्धितावच्छेदकस्यैव तादृशपदेनोक्तत्वात् स्वसामानाधिकरण्यादिविशेषणस्य स्वकपोलमात्रकल्पितत्वेन निर्युक्तिकत्वात् । धूमप्रागभावादौ व्यर्थविशेषणत्वस्य उचितत्वात् यदि च निग्रहस्थानत्वरूपा[1] व्याप्यत्वासिद्धिरेव व्यर्थविशेषणस्य दोषत्वं न तु हेत्वाभासत्वमिति मतमाद्रियते, तथापि व्याप्तिग्रहानौपयिकमात्रस्य तत्तान्त्रिकसम्मतमित्यसिद्धिमात्रवारकस्यापि प्रातिभासिकत्वस्य प्रकृते तदावश्यकमिति ध्येयम् **प्रातिभासिकासतोरिति** । प्रातिभासिकत्वेन भेदः, असत्त्वेन च भेदः नैकः; न वा तौ समव्याप्ताविति्यर्थः । ननु प्रातिभासिकासतोरन्यतरत्वेन याव्यावृत्तिः[2] तत्प्रयोजकतया ब्रह्मणि सत्त्वं सिद्धमित्याशङ्क्य, क्लृप्तस्य ब्रह्मप्रपञ्चान्यतरत्वस्यैव तत्प्रयोजकत्वसम्भवात्, अन्यथा ब्रह्मासदन्यतरव्यावृत्तिप्रयोजकतया प्रातीतिके

[1] विशेषणत्वस्यानन्वितत्त्वात्तद्घटिते च निग्रह (पा). [2] व्याप्तिः.

प्रयोजकं ब्रह्म विश्वासत्साधारणमेव वक्तव्यम् । असत्यपि प्रातिभासिकत्वाभावात् । एवमसद्व्यावृत्तावपि प्रयोजकं ब्रह्म विश्वप्रातिभासिकसाधारणमेव वक्तव्यम् । प्रातिभासिकेष्य-सत्त्वाभावात् । तथाच तत्प्रयोजकद्वयसमावेशादेव ब्रह्म-ण्युभयव्यावृत्त्युपपत्तौ नीलत्वघटत्वरूपावच्छेदकद्वयसमावेशोप-पन्ननीलघटत्ववत् नातिरिक्तप्रयोजककल्पनायामस्ति किञ्चि-न्मानमिति कृतबुद्धय एव विदांकुर्वन्तु । नित्यत्वं चोपाधिः तुच्छप्रातिभासिकयोः नित्यत्वव्यतिरेके साध्यव्यतिरेकदर्शनात् ।

मिथ्यात्वं सिद्धमित्यस्यापि मया वक्तुं शक्यत्वादुभयमतक्लृप्तातिरि-क्तप्रयोजकसिद्धौ न मानमित्याशयेनाह---**अतिरिक्तप्रयोजकेति ।** **नित्यत्वव्यतिरेक इति** । सति सप्तम्या अवच्छिन्नत्वलाभात् नित्यत्वव्यतिरेकव्यापकस्य साध्यव्यतिरेकस्य लाभः । ननु---देहा-त्मैक्ये बाधाद्युक्तिरयुक्ता; मन्मते तस्यैवाप्रसिद्धत्वात्, सत्यत्ववादि-मिथ्यात्ववाद्युभयसिद्धमिथ्यात्वकं यत्तदन्यत्वस्य प्रातितिक[1]व्यावर्तकसत्य-न्तार्थत्वसम्भवाच्च । अनधिकरणत्वे सतीत्यादिहेतुसम्भवात् प्राति-भासिकत्वं व्यर्थमित्यपि न युक्तम्; ब्रह्मण्यनधिकरणत्वासिद्धेः, व्याप्त्यग्रहादधिकरणत्वसामान्याभावस्य हेतावप्रवेशेनोक्तवैयर्थ्यासम्भ-वाच्च । प्रातिभासिकव्यावृत्तिप्रयोजकं ब्रह्मविश्वासत्साधारणमित्याद्ययु-क्तम्; तव मते त्रिषु एकस्या व्यावृत्तेरसम्भवात् ब्रह्मणि हि तत्स्वरूपा सा विश्वस्मिन् व्यावहारिकभेदरूपा, असत्तु निर्धर्मकत्वात् न तद्वत्, किन्तु सैवासन्निष्ठा । अतएव न ब्रह्मादिष्वनुगतं प्रयोजकमास्ति,, ब्रह्मासतोर्निर्धर्मकत्वात् । ब्रह्मविश्वयोस्तु प्रातिभासि-कासद्व्यावृत्तिरेका सम्भवतीति तत्प्रयोजकं सत्त्व[2]मावश्यकम् । नित्य-

---

[1] प्रातिभासिक. [2] नित्य.

त्वमुपाधिरित्यपि न युक्तम्। सत्त्वाभावं विनापि नित्यत्वाभावसम्भवेन अनित्यत्वस्य साध्याभावासाधकत्वात्। उक्ततर्केण सत्त्वव्याप्तत्वेन गृहीतहेतोः अव्यापकत्वेन उपाधेः[1] साध्याव्यापकत्वग्रहाच्चेति" इति चेन्न; मन्मतमाश्रित्य प्रयोगे बाधाद्युक्तेः। त्वन्मते प्रयोगेऽपि निर्दोषत्वेनोभयसिद्धस्यैव हेतोस्त्वयामां प्रति प्रयोज्यत्वात्; अन्यथा अतिप्रसङ्गात्। उभयवादीत्याद्युक्तावपि न निस्तारः। न हि त्वया तार्किकेण वा सत्यत्ववादिना देहात्मैक्यस्य मिथ्यात्वमुच्यते, तार्किकेण तस्य भ्रमविषयत्वाङ्गीकारेपि मिथ्यात्वानङ्गीकारात्। भ्रमविषयत्वरूपमिथ्यात्वनिवेशे च स्वरूपासिद्धिः, साधनवैकल्यं च। किञ्च जीवगतेऽनणु[2]त्वादौ त्वयैव मिथ्यात्वस्वीकारेण तत्र त्वन्मते बाधव्यभिचारादि। एवमस्मान् प्रति जीवाणुत्वादौ तत्। न चाहं मनुष्य इत्यादिप्रत्यये मन्मते मम शरीरमिति विशेषदर्शनात् स्वामित्वादिदेहसम्बन्धस्यैव भानेन देहात्मैक्याभानेप्युक्तविशेषादर्शनकाले तद्भ्रमस्याङ्गीकारात् तन्मिथ्यात्वमुभयसम्मतमिति वाच्यम्। तथाप्येकस्य मिथ्यात्वस्य उभया[3]सम्मतत्वात् त्वया हि तत्र सर्वदेशकालव्यावृत्त्यत्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वमुच्यते, न तु सदसद्विलक्षणत्वादिरूपं, उक्तप्रतियोगित्वरूपमिथ्यात्वनिवेशे[4] चासदन्यत्वस्य वैयर्थ्यम् तदनुपादानेप्युभाभ्यां सिद्धत्वं ज्ञातत्वं प्रमितत्वं वा; आद्ये वस्तुमात्रस्यैव उक्तमिथ्यात्वेन ज्ञातत्वादप्रसिद्धिः, उभयज्ञातमिथ्यात्ववदन्यत्वनिवेशे ज्ञातान्तवैयर्थ्यं तुच्छस्योक्तमिथ्यात्वेनास्मद[5]ङ्गीकारात्तद्व्यावर्तनासम्भवः। असदन्यत्वनिवेशे त्वन्मते वैयर्थ्यमुक्तम्। द्वितीयेऽपि प्रमितत्वान्तं व्यर्थम्, तुच्छव्यावर्तनासम्भवश्च। उक्तमिथ्यात्ववदन्यत्वमात्रं निवेश्यं, न त्वसदन्यत्वमित्युक्तावपि सदोषोसदन्यत्वस्यापि सत्त्वेन प्रतीत्यर्हत्वरूपस्यास्मान् प्रति सार्थकत्वेन निवे-

---

[1] उपाधेः. [2] अणु. [3] उभय. [4] वेशाद्वा सत्पदस्य. [5] पा ॥ नङ्गीकारात्.

शेपि सन्दिग्धासिद्धिः । पक्षे उक्तमिथ्यात्वस्य सन्दिग्धत्वादिति दिक् । प्रातिभासिकत्वं व्यर्थमिति तु युक्तमेव, अभावरूपस्य हेतुप्रविष्टस्य ब्रह्मणि सत्त्वात् । अथा[1]भावरूपत्वनिवेशे स्वरूपासिद्ध्यापत्त्या भावाधिकरणमेव निवेश्यम् तच्च ब्रह्मणि नास्तीति चेन्न; तन्निवेशेऽपि साधनवैकल्यापत्तेः व्याप्तग्रहादभावरूपत्वस्यैव व्याप्तिग्राहकत्वेन सार्थक्यात् । अधिकरणत्वसामान्याभावेत्यादिकं तु न युक्तम् । शरीरा[2]जन्यत्वे शरीरांशवैयर्थ्यं हि न स्वसमानाधिकरणव्याप्यतावच्छेदकान्तर[3]घटितहेतुतावच्छेदकरूपं, जन्यत्वसामान्यत्वाभावत्वरूपव्याप्यताषच्छेदकान्तरस्य हेतुतावच्छेदकस्य शरीराजन्यत्वस्याघटकत्वादसमानाधिकरणत्वाच्च । किन्तु पूर्वव्याख्यातरूपम् । तथाच सामान्याभावस्य हेतावनिवेशेऽपि वैयर्थ्यमक्षतम् । न च शरीरांशोपि तत्र न व्यर्थ इति तादृशमेव व्यर्थत्वं वाच्यमिति वाच्यम्: तान्त्रिकसम्मतबीजसत्त्वे त्वदवचनाप्रयोजकत्वात्, विशेषाभावकूटस्यैव सामान्याभावत्वेन स्वसमानाधिकरणेत्यादेरपि सत्त्वाच्च । न च प्रातिभासिकत्वावच्छिन्नप्रतियोगिताकभेदस्यैव हेतौ निवेश्यत्वादधिकरणत्वसामान्याभावो न निविष्ट इति वाच्यम् तथापि ब्रह्मज्ञानान्याबाध्यत्वादिरूपस्य तस्य निवेशे कार्ये अबाध्यत्वादेरेव हेतुत्वसम्भवेन इतरवैयर्थ्यात् । न च सामान्याभावत्वस्य सामान्यावच्छिन्नप्रतियोगिताकाभावत्वरूपत्वे सामान्यघटितविशेषाभावबुद्धावपि तद्धीनियमः स्यात्, अतः सामान्यभिन्नावच्छिन्नसासान्यावच्छिन्नप्रतियोगिताकाभावत्वं तद्वाच्यम्, तथाच विशेषाभावे तस्याप्रवेशान्नोक्तरूपं वैयर्थ्यमिति वाच्यम्; विशेषाभावबुद्धौ सामान्याभावत्वधीनियमेऽपि सामान्याभावसंसर्गावगाहिबुद्धौ विशेषाभावकूटनिरूपितविशेषणताया भानस्वीकारेण अनतिप्रसङ्गात्, सामान्यभावत्वस्य

---

[1] अतथा. [2] शरीर. च्छेदकधर्मान्तर.

अतएवानिषेध्यत्वेन प्रमां प्रति साक्षाद्विषयत्वादित्यपि न हेतुः। किञ्च प्रमात्वं तद्वति तत्प्रकारकत्वं तत्त्वावेदकत्वं वा। आद्ये दृष्टान्तस्य साधनवैकल्यम्। न हि परमार्थसतः शुद्धस्य

सामान्यभिन्नानवच्छिन्नत्वघटितत्वे मानाभावात्, अन्यथा तादृशप्रतियोगितान्तरकल्पने गौरवात्। अथाभावरूपे ब्रह्मणि निर्धर्मके न हेतुतावच्छेदकं, किन्तु तत्प्रतियोगित्वमेव अन्यत्र, अतएव व्याप्यत्वमपि न तत्रेति मन्यसे; तर्हि व्यापिग्रहाभावात्तवैव विपत्तिः। ब्रह्मादित्रिषु एकं व्यावृत्तिप्रयोजकमित्यादि युक्तमेव। यद्यपि ब्रह्मणि तत्स्वरूपे अन्यत्र धर्मस्वरूपे व्यावृत्तिप्रयोजके, तथापि त्ययोक्तं तदैक्य[1]मङ्गीकृत्योक्तत्वात्। तथाच त्वयैव स्वविपद्बीजमिदं चिन्तितम्। अतएव ब्रह्मविश्वयोस्तु प्रातिभासिकासद्व्यावृत्तिरेकेति ते व्यामोह एव। एकैकव्यावृत्तेरिव तस्या अप्यनैक्यात्। अथ व्यावृत्तितत्प्रयोजकयोः अनैक्येपि ज्ञानविशेषविषयत्वेनानुगतरूपेण प्रयोज्यप्रयोजकत्वमिति चेन्न; एवमपि ब्रह्मप्रपञ्चोभयमात्रविषयकधीविषयत्वादेरेव प्रयोजकत्वसम्भवात् प्रपञ्चे सत्यत्वासिद्धेः। वस्तुतस्तु प्रयोजकाभावेऽपि न क्षतिः। न ह्येकधर्मविशिष्टे एव उक्तव्यावृत्तिधीरिति नियमे मानमस्ति। अतएव तर्काभावादुक्तहेतोः साध्यव्याप्यत्वाग्रहेण नित्यत्वस्य साध्यव्यापकताग्रहसम्भवात्। व्यापकीभूतोपाध्यभावे व्याप्यभूतसाध्याभावव्याप्यत्वग्रहः, नित्यत्वाभावो यदि सत्त्वाभावव्यभिचारीस्यात् तदा सत्त्वव्यापकप्रतियोगिको न स्यादिति तर्कात्। **अतएवेति**। बाधानुपपत्तिरूपप्रतिकूलतर्कपराघातात् नित्यत्वोपाधिमत्वाच्चैवेत्यर्थः। **अनिषेध्यत्वेनेति**। विषयत्वान्वयिस्वाधिकरणवृत्तिनिषेधप्रतियोगित्वविषयत्वानिरूपितत्वेनेति तदर्थः। **न हि परमार्थत्वेति**। **ब्रह्मणोऽज्ञानमित्यादि**

---

[1] प्रातिभासिकस्य तदैक्य,

ब्रह्मणस्सप्रकारकज्ञानविषयत्वम् । न च धर्मवतो दृष्टान्तते-त्युक्तम् । तस्य पक्षकुक्षिनिक्षिप्तत्वेन निश्चितसाध्यवत्त्वाभावात् । द्वितीये तत्त्वावेदकत्वस्य अबाधितविषयत्वरूपत्वेन साध्य-विशेषपर्यवसानात् हेतुग्रहे सिद्धसाधनम् । हेतुग्रहे तु स्वरूपा-सिद्धिः । यत्तु प्रमाविषयत्वमात्रेणैव परमार्थत्वोपपत्तौ विशेषणे व्यर्थे इति, तन्न; पुरोवर्तिनं रजततया जानामीत्याद्यनु-व्यवसायरूपप्रमाविषये प्रातिभासिके व्यभिचारवारकत्वात् । साक्षात्पदस्य तत्त्वे च मिथ्यात्वप्रमितेः साक्षाद्विषये व्यभिचार-वारकत्वात् । अनिषेध्यत्वेनेत्यस्य न ह्यनुव्यवसायमिथ्यात्वप्रमे न भवतः । नाप्यनिषेध्यत्वेन ईश्वरं प्रति साक्षादपरोक्षत्वं

ज्ञाने अज्ञानविषयत्वाद्युप[1]हितस्येव भानमिति भावः शुक्तिरूप्यादेरपि स्वाश्रये स्वप्रकारकधीविषयत्वात् मन्मते व्यभिचारः, परमतेऽपि यद्यपि तस्यासत्त्वेन तदाश्रयाप्रसिद्ध्या न व्यभिचारः, तथापि ब्रह्मणोऽप्याश्र-याप्रसिद्ध्या साधनवैकल्यम् । अथ स्वकीययत्सम्बन्धवति स्वप्रकारक-धीविषयत्वं हेतुः, तत्सम्बन्धावच्छिन्नप्रतियोगिताकसर्वदेशकालवृत्त्य-भावा[2]प्रतियोगित्वं साध्यम् । अतएव रजतादेस्तादात्म्यादिसम्बन्धेन मिथ्यात्वं, न तु विषयितादिसम्बन्धेनेति । तथाप्यधिष्ठानचैतन्ये रज-तस्य यः सम्बन्धः तेन तस्य मिथ्यात्वमवश्यं वाच्यम् अधिष्ठानचिदेव तस्याभावः । तथाच तदंशे तेन सम्बन्धेन रजतप्रकारके रजतमत्र नास्तीति ज्ञाने प्रमात्वाभावादनिषेध्यत्वेनेति व्यर्थम् । न ह्याधार एवाभाव इति प्राभाकरादिमते सुखादेः[3] स्वध्वंसादिरूपात्मनि समवायान्यसम्बन्धः कल्प्यते; क्लृप्तसम्बन्धेनैव निर्वाहात् । एवं रजततदाकारवृत्त्योरिव तयोस्सम्बन्धस्यापि कल्पितत्वात् साक्षादित्यपि व्यर्थम् । यत्त्वित्या-

---

[1] त्वाद्युप. [2] वृत्त्यन्ताभावा. [3] शुक्त्यादेः.

हेतुः। सत्यत्वसिद्धिं विना अनिषेध्यत्वेनेत्यस्य असिद्धेः। तथाचान्योन्याश्रयः। न चेश्वरज्ञानविषयस्य प्रपञ्चस्य मिथ्यात्वे तस्य भ्रान्तत्वप्रसङ्गः। मिथ्याभूतस्य मित्यात्वेनेव ग्रहणात्। ऐन्द्रजालिकवत् भ्रान्तत्वायोगात्। अन्यथा सविषयकभ्रमज्ञातृत्वेन भ्रान्तत्वस्य दुर्वारत्वापत्तेः। अथ निषेध्यत्वेन ज्ञाने तत्पालनार्थमीश्वरस्य प्रवृत्तिर्न स्यात् ऐन्द्रजालिकप्रवृत्तिवदीश्वरप्रवृत्तेरपि तथाविधत्वात्। नापि सप्रकाराबाध्यार्थक्रियाकारित्वं हेतुः; सप्रकारकजाग्रद्बोधाबाध्यस्वप्नजलावगाहन-

---

दिकं तु भाष्योक्तमनास्थयानूदितमिति ध्येयम्। **तस्य** तत्र। **भ्रान्तत्वप्रसङ्गः** विशेषदर्शिनां भ्रान्तत्वव्यवहारप्रसङ्गः। **मिथ्यात्वेनेति।** तथाच स्वसमानाधिकरणविशेषदर्शनाकालीनस्य बाधितविषयकज्ञानस्य आश्रयत्वं भ्रान्तव्यवहारे विषयकालीनान्तविशेषणानुपादाने उक्तविशेषदर्शनकालीनस्य सोपाधिकभ्रमस्याश्रये पुरुषेऽप्यहं भ्रान्त इति व्यवहारस्स्यादिति भावः। **अन्यथा** उक्तविशेषदर्शनकालीनभ्रममादाय भ्रान्तत्वव्यवहारे। **सविषयकभ्रमज्ञातृत्वेनेति।** विषयतापर्याप्त्यधिकरणं यन्मुखादिविशिष्टदर्पणादि तद्विशिष्टभ्रमस्य मिथ्यात्वेन यत् ज्ञातृत्वं तेनेत्यर्थः। **भ्रान्तत्वस्य।** भ्रान्तत्वव्यवहारस्य। यथाश्रुते बाधितविषयकज्ञानत्वरूपभ्रान्तत्वस्येष्टत्वादसङ्गतेः। **तथाविधत्वादिति।** विसंवादित्वेन ज्ञायमानत्वादित्यर्थः। संवादित्वेन ज्ञायमानप्रवृत्तौ प्रमातृत्वेन ज्ञायमानस्योपादानप्रत्यक्षादेः हेतुत्वेप्यतादृशप्रवृत्तावतादृशस्य तस्य हेतुत्वमविरुद्धमिति भावः। **सप्रकाराबाध्येत्यादि।** सप्रकाराबाध्यं यदर्थक्रियाकारि तत्त्वादित्यर्थः। जाग्रद्बोधेति। मनोवच्छिन्नचेतन्यादेराधिष्ठानत्वपक्षे जाग्रद्बोधाबाध्यत्वेपि

प्रियासङ्गमादिविशेषिताप्रमाणीभूतज्ञानस्यार्थक्रियाकारित्वदर्शनेन तद्विषये तत्र ज्ञानमेव सुखादिजनकं तच्चाबाध्यमेवेति मतं, तदसत्। ज्ञानमात्रस्य हि तादृक्सुखाजनकत्वेन किञ्चिद्विशेषितस्यैव तथात्वं वाच्यम्। ज्ञाने च विशेषो नार्थातिरिक्तः। तदुक्तम्—

'अर्थेनैव विशेषो हि निराकारतया धियाम्'।

इति। अर्थेनेति अर्थ एवेत्यर्थः। तथाच मिथ्याभूतविशेषितस्य

ब्रह्माधिष्ठानकत्वपक्षे तदबाध्या स्वाप्नधीरिति भावः। सङ्गमादीत्यादिना सोयमित्यादिवाक्यजन्यनिष्प्रकारकघटादिधीबाध्यभेदादिपरिग्रहः। विशेषितेत्यनेन सङ्गमादेरर्थक्रियाकारित्वं दर्शितम्। नन्वर्थस्य प्रियासङ्गत्वादिना कारणतावच्छेदकत्वे गौरवात् ज्ञाने जातिविशेष एव तथा कल्प्यताम्, तत्राह—सदुक्तमिति निराकारतयेति। ज्ञानगतविशेषाङ्गीकारे तेनैव ज्ञानाकारेण ज्ञानाभिन्नेन नीलादिरूपेण नीलं जानामीत्यादिव्यवहारोपपत्तौ नीलादिबहिरर्थमात्रलोपापत्तेः बहिरर्थाघटितस्य विशेषस्य ज्ञानेऽनुपलब्देश्च तादृशविशेषो ज्ञानेनाङ्गी[1]क्रियते। अतएवानुमितित्वादिकं नाखण्डो ज्ञानधर्मः, किन्तु व्याप्तिपक्षधर्मताधीजन्यत्वादिरूपः। इन्द्रियजन्यत्वाद्यनुपस्थितौ साक्षात्कारत्वादिकं न प्रतीयत एवेति भावः। किञ्च सुखादि[2]जनकतावच्छेदकत्वेन कल्प्यमाना जातिः ज्ञाने अर्थे वा स्वीकार्येत्यत्र न विनिगमकम्, स्वाप्नार्थस्य सुखादिसामानाधिकरण्यासम्भवात्। न च जाग्रदर्थस्य साक्षिसम्बन्धाभावकाले सुखादिसामानाधिकरण्याभावेन तस्याहेतुत्वमिति वाच्यम्; अर्थप्रत्यक्षमात्रस्य कारणतास्थले तस्य हेतुतासम्भवात्, ज्ञानमात्रस्य हेतुतास्थलेऽपि स्वाप्नार्थेषु जाग्रज्ज्ञानेषु

---

[1] ज्ञानेऽङ्गी. [2] श्रुत्यादि.

जनकत्वाभ्युपगमे मिथ्याभूतस्यापि जनकत्वाद्व्यभिचार एव। तथा चोक्तं शास्त्रदीपिकायां बौद्धं प्रति—"अथ सुखज्ञान मेवार्थक्रिया तच्चाव्यभिचार्येव। न हि क्वचिदप्यसति सुखे सुखज्ञानमस्तीत्याशङ्क्य सत्यमेतत् न तु तेन पूर्वज्ञानप्रामाण्याध्यवसानं युक्तम्। अप्रमाणेनापि प्रियासङ्गमविज्ञानेन स्वप्नावस्थायां सुखदर्शनात्"। इति। ननु विषयविशेषोपलक्षितस्यैव ज्ञानस्य सुखजनकत्वमस्तु, तत्कुतो विषयस्य जनकत्वमिति चेन्न; स्वरूपाणामननुगततया ज्ञानत्वादेश्च अतिप्रसक्ततया अनुगतानतिप्रसक्तोपलक्ष्यतावच्छेदकाभावादुपलक्षणत्वासम्भवात्। ननु विशेषणत्वमप्यसम्भवि अनागतज्ञानजन्ये तत्कालाविद्यमानस्य विषयस्य पूर्वभावित्वरूपजनकत्वासम्भवादिति चेन्न; स्वव्यापारजन्ये व्यापारिणोऽसतोजनकत्ववत् स्वज्ञानजन्येऽप्यसतोजनकत्वसम्भवात् अतीतानागतावस्थस्य असत्त्वधर्माश्रयत्वेनैव अभ्युपगमात्।

च सा जातिरिति वक्तुं शक्यत्वात्। स्वाप्नेन प्रियादिना[1] जाग्रत्कालीनेन व्यवहारिकप्रियादिज्ञानेन च सुखाद्युत्पत्तिसम्भवात्-जातिसाङ्कर्यस्यादूषकत्वात् दृष्टिसृष्टिवादे अर्थ एव तत्सम्भावाच्च स्वाप्नज्ञानस्याप्रमात्वे संवादमाह—**तथाचोक्तमिति**। यथा स्वव्यापारादिसम्बन्धेन कारणत्वं, तथा स्वज्ञानसम्बन्धेनेत्याह—**स्वव्यापारेति**। यद्यतीतादिकं सूक्ष्मरूपेण विद्यमानं न स्यात्, तदा वर्तमानध्वंसप्रतियोगित्वादिरूपासत्त्वस्य ज्ञानविशेषविषयत्वादेश्च वर्तमानकालावच्छेदेन आश्रयो न स्यात्; न ह्याश्रयासम्बद्धकालोऽवच्छेदकस्सम्भवतीत्याशयेनाह—**अतीतेति**। यदायदा यज्ज्ञानस्वरूपाबाधः, तदा तद्विषयाबाध इति नियमात् स्वाप्नज्ञानं बाध्य-

---

[1] प्रियादीनां.

अन्यथा ध्वंसप्रागभावप्रतियोगित्वतद्ज्ञानविषयत्वादीनामनाश्रयत्वापत्तेः। प्रमाणबलात् कारणत्वाभ्युपगमस्यात्रापि तुल्यत्वात्। किञ्च स्वरूपाबाध्यस्य विषयाबाध्यत्वदर्शनेन विषयबाधे स्वरूपबाध्यस्यावश्यकतया स्वप्नादिज्ञानं सदेवेत्यस्य वक्तुमशक्यत्वात्। अनादित्वस्य विषमव्याप्तस्योपाधित्वाच्च न चार्थक्रियाकारित्वं प्रति परमार्थसत्त्वस्य ब्रह्मणि प्रयोजकत्वेनावधारणादकारणककार्योत्पत्तिरूपविपक्षबाधकतर्केण हेतोस्साध्यव्यापकतया तद्व्यापकतया उपाधेः साध्याव्यापकत्वमिति वाच्यम्; प्रातिभासिकरज्जुसर्पादौ भयकम्पादिकार्यकारित्वदर्शनेन प्रातिभासिकसाधारणस्य तुच्छव्यावृत्तस्य प्रतीतिकालसत्त्वस्यैव अर्थक्रियाकारित्वं प्रति प्रयोजकत्वात्। प्रातिभासिकस्यार्थक्रियाकारित्वानभ्युपगमे सप्रकाराबाध्येति हेतुविशेषणवैय्यर्थ्यापत्तेः। कस्मिन्नपि देशे कस्मिन्नपि काले केनापि पुरुषेणाबाध्यत्वं हि परमार्थसत्त्वम्। तदपेक्षया प्रतीतिकालसत्वस्य लघुत्वाच्च। किञ्च शुद्धस्यार्थक्रियाकारित्वाभावात् साधनविकलत्वम्। उपहितस्य पक्षनिक्षेपात् साध्यविकलत्वम्। आरोपितमिथ्यात्वकत्वादित्यपि न हेतुः; आरोपितत्वं प्रातिभासिकत्वं चेत् प्रपञ्चे हेतोरसिद्धिः। तत्सिद्धेः पारमार्थिकसिद्ध्युत्तरकालीनत्वात्। व्यावहारिकत्वं चेच्छुक्तिरूप्यादौ व्यभिचारः। उभयसाधारण्येप्ययमेव दोषः। कल्पकरहितत्वादित्यपि न हेतुः। असति व्यभि-

---

मित्याह—**किञ्चेति**। **अकारणकेति**। सत्यकारणहीनेत्यर्थः। यदि मिथ्याभूतं कारणं स्यात् तदा सत्यं स्यात्, यन्नैवं, तन्नैवं, यथा नृशृङ्गम्। अथवा कारणं यदि सत्यं न स्यात् तदा कारणं न स्यात्, यथा नृशृङ्गमिति तर्को बोध्यः—**कालसत्वस्य**। काल-

चारात् । यथाश्रुतस्यासिद्धेश्च । ननु नासिद्धिः, शुद्धं हि चैतन्यं न कल्पकम्; अदृष्टत्वात् । नोपहितम्, कल्पितत्वादेवान्यथानवस्थानात् । तथा च यावद्विशेषाभावे कल्पकसामान्याभावसिद्धिरिति चेन्न; शुद्धस्याप्यनाद्यविद्योपधानवशेन कल्पकत्वोपपत्तेः । कल्पकत्वं हि कल्पनां प्रत्याश्रयत्वं विषयत्वं भासकत्वं वा; तच्च सर्वं कल्पनासमसत्ताकत्वेन शुद्धत्वाव्याघातकम् । तदुक्तं संक्षेपशारीरके—

आश्रयत्वविषयभागिनी निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥

इति । अस्तु वा उपहितस्य कल्पकत्वम् । न चानवस्था ।

सम्बन्धस्य । **शुद्धत्वाव्याघातकमिति** । शुद्धस्याविद्योपहितादिरूपानुगमात् । वस्तुतः शुद्धत्वेपि अविद्यादिरूपां कल्पनां प्रत्याश्रयादिरूपत्वाविरोधादिति भावः । शुद्धस्य कल्पनासम्बन्धाभावपक्षेऽपि न क्षतिरित्याशयेनाह—**अस्तुवेति** । यत्तु—"प्रमाविषयत्वहेतौ साधनवैकल्योक्तिरयुक्ता; विशेष्यावृत्तीत्यादि[1]प्रमात्वे दोषाभावात् । तत्त्वावेदकत्वरूपेऽपि न साध्याविशेषः; अर्थसत्त्वाग्रहेऽपि शब्दादिना सद्विषयकत्वग्रहसम्भवात् । अनिषेध्यत्वेनेत्यंशस्यासिद्धेरित्यादिकमयुक्तम्; निषेध्यत्वेन ज्ञातस्य पालनाय प्रवृत्त्यसम्भवात् । न ह्यैन्द्रजालिकः स्वमायाकृतं पालयति, किन्तु दर्शयति । ईशस्तु पालयति 'एष लोकपालः' इत्यादिश्रुतेः, 'सेयं देवतैक्षत' इत्यादिश्रुतेरनिषेध्यत्वेन सर्वज्ञतोक्तेः, 'यस्सर्वज्ञः सर्ववित्' इत्यादावुक्तस्य सामान्यविशेषाभ्यां ज्ञानस्य निषेध्यत्वविषयकत्वासम्भवाच्च । व्यापारिण इवासतो[2]ऽप्यतीतादेः जनकत्वोक्तिर्नयुक्ता; व्यापारपूर्वकाले हि

---

[1] वृत्तित्वादि. [2] इव सतो.

सतो व्यापारिणः तज्जनकत्वं, न तु व्यापारजन्यफलजनकत्वम् । अतीतादेस्तु मिथ्यात्वेन कालत्रयेऽप्यसतो न जनकत्वं, असद्वैलक्षण्या, पेक्षया [1] लाघवेन सत्त्वस्यैव कारणत्वप्रयोजकत्वात् । स्वज्ञानस्य कारणत्वमात्रेण मिथ्यार्थस्य कारणत्वं तु नोपपन्नम् । विद्यमानध्वंसप्रतियोगित्वादिकं तु अविद्यमानेऽपि स्वीक्रियते, विद्यमाने तदसम्भवात् । कारणत्वं तु नाविद्यमाने सम्भवति; पूर्वभावित्वरूपत्वात् । ज्ञानस्वरूपबाधाभावे विषयस्याप्यबाध इत्यप्ययुक्तम्; मिथ्यागजादेरसत्त्वेऽपि तज्ज्ञाने सत्त्वानुभवस्य तज्ज्ञानमासीदित्यस्य सत्त्वात्, साक्षिण्यबाधेऽपि तद्विषयस्य रूप्यादेः बाधाच्च । प्रतीतिकालसत्त्वमर्थक्रियाकारित्वे प्रयोजकमित्यपि न युक्तम्; तस्य सत्त्वेन प्रतीयमानरूपत्वेन तुच्छेऽप्यर्थक्रियापत्तेः । आरोपितमिथ्यात्वे च हेतौ नोक्तदोषः, आरोपितपदेन मिथ्यात्वेन उभयसम्मतत्वोक्तेः ब्रह्मजगतोर्मिथ्यात्वं तादृशं न तु रूप्यादेः" इति प्रलपितम्, तन्न; विशेष्या[2]वृत्तीत्यादिप्रमात्वनिवेशे हि स्वरूपासिद्धिः । न हि प्रपञ्चज्ञाने तादृशप्रमात्वं पूर्वं निर्णीतम्, किन्तु शुक्तिरूप्यादेरिव विशेष्यवृत्तित्वेऽपि तदभावसम्भवेन मिथ्यात्वसन्देहात् सान्दिग्धं सद्विषयकत्वमपि न निर्णीतम् । प्रपञ्चे सत्त्वसन्देहे तद्ज्ञाने तत्सन्देहस्याप्यौचित्यावर्जितत्वाच्छब्दादिना आपाततो निर्णयेपि तत्र प्रमात्वसंशयात् तद्विषयीभूते सद्विषयकत्वसंशयात्, ऐन्द्रजालिको न स्वकृतं पालयतीति तु चित्रम्; इन्द्रजालाधिष्ठाननिमित्तपालनस्य विरोध्यैन्द्रजालिकान्तरनिरसनस्य चेन्द्रजालपालनत्वात्, ईशस्यापि जगत्पालनस्य तादृशत्वात् । सेयमित्यादौ ईक्षणमात्रमुक्तम् । न त्वनिषेध्यत्वेन सामान्यविशेषाभ्यां ज्ञानं तु निषेध्यत्वेनापि सम्भवति, स्वाधिष्ठाने दृश्यं नास्तीति वियदादि नास्तीति[3] ज्ञानस्य तादृशत्वात् ।

---

[1] अद्वैतलक्षणापेक्षया. [2] ष्यावृत्तित्वादि. [3] नानास्तीति.

अविद्याध्यासस्य अध्यासान्तरानपेक्षत्वात् । स्वपरसाधारणसर्व-निर्वाहकत्वोपपत्तेः अकल्पितस्य कल्पकत्वादर्शनाच्च । कल्पित-

---

व्यापारिणस्तु व्यापारजन्याजनकत्वे कथं व्यापारव्यापारिता? तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापारतायास्तान्त्रिकोक्तत्वात् का वा तत्र तद्धेतुत्वेऽनुपपत्तिः? कार्यवति साक्षात्सम्बन्धेन असतोपि व्यापारिणो व्यापारसम्बन्धेन सत्त्वात् कार्याव्यवहितप्राक्कालावच्छेदेन कार्यवन्निष्ठो यो व्यापारसम्बन्धावच्छिन्नाभावः तदप्रतियोगित्वात् । अन्यथादृष्टादेः परस्परासम्बन्धेन रूपादिभोग्यजनकत्वानुपपत्तेः । यागादेश्च स्वर्गादि-जनकत्वान्यथानुपपत्त्या धर्मादिकल्पना तार्किकमीमांसकाद्युक्ता न स्यात् । स्वर्गकामो यजेतेत्यादेश्च अप्रामाण्यं स्यात् । न हीष्टप्रयो-जकत्वं विध्यर्थः, इष्टकारणकारणत्वरूपस्य तस्य इष्टकारणत्वापेक्षया गुरुत्वात् । अत एव 'अग्निकामः काष्ठमाहरेत्' इत्यादिलौकिक-वाक्ये 'पूर्णाहुत्या सर्वान् कामानवाप्नुयात्' इत्यादिश्रुतौ[1] चेष्ट-कारणकारणत्वे लक्षणैव । अत एव 'अविभागात्तु नैवं स्यात्, उत्पत्तौ विध्यभावात्' इति सूत्रयोर्व्याख्याने सप्तमे शाबरभाष्ये उक्तं यथा 'गोमयैः पचन्ति, तुषपक्वा भवन्ति इत्यादौ अग्निसाध्ये पाके गोमयादीनां करणत्वं, तथा यागस्यापूर्वद्वारा स्वर्गसाधनत्वम् । उक्तं च तत्र तन्त्ररत्ने अनेन भाष्येण यागस्य फलसाधनत्वमुपपादयता तस्य तदनुपपत्त्या यागसाध्यमपूर्वमेव यजेतेत्यादेरर्थ इति प्राभाकरमतं निरस्तम् । किञ्च तन्मते उक्तवाक्ये गोमयादिपदे तत्साध्याग्नाविव सर्वेभ्यो दर्शपूर्णमासावित्यादावपि दर्शादिसाध्यापूर्वे दर्शादिपदे लक्षणा स्यादित्यादिलाघवेन सत्त्वं कारणत्वे प्रयोजकमिति तु न युक्तम्; त्रिकालाबाध्यत्वरूपतदपेक्षया कालसम्बन्धस्यैव लाघवेन तत्त्वात्,

---

[1] श्रौते.

अतीतादावपि सूक्ष्मरूपे तत्सत्त्वात् । अतएव स्वज्ञानकारणत्वमात्रेण मिथ्यार्थस्य कारणत्वानुपपत्तिकरणं स्वाज्ञानादेव विद्यमान इव अविद्यमानेऽपि विद्यमानध्वंसप्रतियोगित्वादिकं यथा न सम्भवति[1] तथोपदिष्टम् । पूर्वभावित्व चोक्तरूपं यागादावस्त्येव, व्यापारादिसम्बन्धावच्छिन्नतदभावस्य तदीयव्यापारादिसम्बन्धविरुद्धत्वात् । अतएव संयोगेन गगनादेः पृथिवीत्वादिव्यापकत्वपरे तदभाववतोऽपि पृथिव्यादेर्वृत्त्यनियामकसंयोगेन तत्सम्बन्धित्वादित्यादिदीधित्यादिवाक्ये उत्पत्त्यादिकालावच्छेदेन पृथिव्यादौ गगनादेः वृत्त्यनियामकसंयोगेनाभाव इत्यर्थकत्वं व्याचक्षते । यदि च तत्र सर्वदा तदभाव इत्यर्थकत्वं, तथापि न क्षतिः । तद्वदेव प्रकृतेऽपि स्वप्रतियोग्यसम्बन्धि यत्कार्यसम्बन्धि तद्वृत्त्यभावाप्रतियोगित्वस्य सत्त्वादिति ध्येयम् । तज्ज्ञानमासीदित्यनुभवस्तु न बाध्यत्वविरोधी, बाध्येष्वेव मन्मते अतीतसत्तासम्बन्धात् । अन्यथा अत्रेन्द्रजालमासीत् अत्र गन्धर्वनगरमासीदिति धीर्नस्यात् । त्वन्मते परं तदनुपपत्तिः, प्रातीतिकस्यखपुष्यवदसत्त्वाभ्युपगमात् । न हि भवति खपुष्पमासीदिति । साक्षिस्वरूपबाधाभावस्तु न, उपहितस्य साक्षित्वेन तस्यापिबाधात् । जन्यज्ञानान्तर्भावे[2]नोक्तनियमो वा, विषयबाधकबाध्यतायोग्यत्वं हि तन्नियमे प्रयोजकम् । तच्च जन्यस्यैव,[3] ज्ञानस्य विषयोपादानाज्ञानोपादेयत्वात् । प्रतीतिकालसत्त्वं तु प्रतीतिकालसम्बन्ध इत्युक्तमिति तुच्छत्वानापत्तिः[4] । आरोपितमिथ्यात्वहेतावारोपितपदेन मिथ्यात्वेनोभयसिद्धोक्तावपि जीवानणुत्त्वादिमिथ्यात्वस्य त्वया मया च मिथ्यात्वेन सम्मतत्वात् तत्र व्यभिचारो मन्मतरीत्या दुर्वारः ; मन्मते तस्य सत्त्वाभावनिश्चयात् । किञ्च उक्तसिद्धत्वं यदि ज्ञातत्वं, तदा शुक्तिरूप्यादिमिथ्यात्वेऽपि कदाचित्वयामिथ्यात्वेन ज्ञेयत्वात् त्वन्मतेऽपि व्यभिचारः । यदि प्रमितत्वं, तदा-

[1] यथा संभवति. [2] र्भावेण. [3] ज्ञानविषयाज्ञानविषयोपादानत्वात्. [4] तुच्छे त्वनापत्तिः.

प्रतिबिम्बविशिष्टआदर्शादेरादर्शान्तरे प्रतिबिम्बकल्पकत्वदर्शनाच्च, बिम्बस्य द्वितीयादर्शसम्मुखत्वाभावेन तत्र कल्पकत्वायोगात्। अन्यथा अतिप्रसङ्गात्। विस्तरेणचैतदग्रे वक्ष्यामः। तदेवं निराकृताः परमार्थसत्त्वे साध्ये षडमी हेतयः। एवमन्येऽपि निराकार्याः। अथ विमतं न सद्विलक्षणम्, असद्विलक्षणत्वा-

---

तदसिद्धं; प्रपञ्चे सत्त्वसिद्धेः पूर्वं तन्मिथ्यात्वे मिथ्यात्वज्ञानस्य प्रमात्वासिद्धेः। नच व्यावहारिकप्रमात्वं निवेश्यं, न तु तात्त्विकं, तथाच तत्त्वावेदकत्वरूपप्रमात्वस्य तत्रासिद्धावपि मतद्वयेपि व्यवहारकालाबाध्यमिथ्यात्वकप्रकारकत्वरूपस्य व्यावहारिकप्रमात्वस्य निश्चयोऽस्त्येव; प्रपञ्चमिथ्यात्वं हि प्रातीतिकम्, यदि वा व्यावहारिकं, उभयथाऽपि तन्मिथ्यात्वं व्यवहाराकालाबाध्यमिति वाच्यम्; व्यवहाराकालाबाध्यमिथ्यात्वकप्रकारकत्वनिवेशे हि व्यवहारकालाबाध्यमिथ्यात्वाश्रयमिथ्यात्वं पर्यवसितहेतुः। तथाच यस्य प्रातीतिकस्य मिथ्यात्वे [1]ब्रह्मज्ञानाव्यवहितपूर्वं स्वप्नकाले वा मिथ्यात्वभ्रमः, तत्रापि हेतुसत्त्वात् व्यभिचारः। बाध्यपदेन बाधयोग्यत्वनिवेशेऽपि स्वाप्नभ्रमस्य मूलाविद्योपादानकत्वमते स्वाप्नमिथ्यात्वस्य व्यवहारकालबाधयोग्यत्वाभावात्। ततश्च तद्वारणाय तत्त्वावेदकरूपाया उभयवादिसिद्धप्रमाया निवेशे तात्त्विकमिथ्यात्वाश्रयमिथ्यात्वं पर्यवसितहेतुरिति हेतुविशेषणासिद्धिपर्यवसानम्। यदि च यद्यत्प्रातीतिकमिथ्यात्वं तद्ब्रह्मेदकूटवन्मिथ्यात्वं हेतुरुच्यते, तदा दुर्ज्ञेयता। अप्रयोजकत्वं तु स्फुटम्। यदपि शुद्धस्य कल्पकत्वोक्तिरयुक्ता, नित्यमुक्तिश्रुतीविरोधात्, तत्त्वतो नित्यमुक्तेः जीवेऽपि सत्त्वात्। अतएव कल्पकस्याभावादाश्रयत्वविषयत्वादिकमपि न शुद्धस्य। न च शुद्धमेव कल्पकं, देहाद्यभावात्। नाप्युपहितं, अविद्याध्यासस्य स्वपरनिर्वाहकत्वे मानाभावात्। आदर्शान्तरे प्रति-

---

[1] ब्रह्मज्ञानव्यवाहितपूर्वसत्त्वकाले.

दात्मवदिति अनुमानान्तरं भविष्यतीति मतम्, तन्न; प्रातिभासिके शुक्तिरूप्यादौ व्यभिचारात्। न च तत्रासद्विलक्षणत्वहेतुरेव नास्तीति वाच्यम्; असद्विलक्षणत्वाभावे हि अपरोक्षतया प्रतीतिरेव न स्यात्। ननु तर्ह्यसद्विलक्षणत्वे तद्विरुद्धसद्विलक्षणत्वायोगः। तथाच साध्यस्यापि विद्यमानत्वान्न व्यभिचार इति चेन्न; सत्त्वे सर्वजनसिद्धबाधविरोधात्। गजादौ गोवैलक्षण्येऽपि तद्विरुद्धाश्ववैलक्षण्ययोगवत् सद्वैलक्षण्येऽपि असद्वैलक्षण्ययोगोपपत्तेः प्रथममिथ्यात्वनिरुक्तावुक्तत्वात्। ननु विमतं न चैतन्याज्ञानकार्यम्। न तत्कार्यधीविषयः। न तत्कार्यसत्त्ववत्।

बिम्बं तु न कल्पितमिति वक्ष्यत इति, तदपि तुच्छम्; जीवेऽपि हि तत्त्वतो नित्यमुक्तिरिष्टैव। कल्पकत्वं तु देहाद्यभावेऽपि युक्तम्, तस्य तदव्याप्यत्वात्। उपहितस्यापि युक्तमेव तत्, तस्यानादित्वेन देहाद्यनपेक्षत्वात्। न च तस्य स्वान्यं प्रति कल्पकत्वसम्भवेऽपि स्वं प्रति कथमाश्रयत्वं भासकत्वं चेति वाच्यम्; घटाभावादेः कल्पितस्वाश्रयत्वस्येव तत्र तस्य सम्भवात्, तस्याश्रितत्वभास्यत्वाभावेऽपि क्षतिविरहाच्च। शुद्धस्येव तस्यापि स्वप्रकाशत्वसम्भवात् अस्वप्रकाशत्वरूपः मिथ्यात्वहेतुस्तु तत्साधारणः कार्यः। तदिदमुक्तं अविद्याध्यासस्य अध्यासान्तरानपेक्षत्वा[1]दित्यादि। **बाधविरोधादिति।** न च बाधोपपत्तये रूप्यादेरसत्त्वं प्रत्यक्षोपपत्तये च सत्त्वं कल्प्यतां, त्वन्मते सत्त्वासत्त्वयोः निषेधस्येव विधेरपि समुच्चयसम्भवादिति वाच्यम्; बाधोपपत्तये हि प्रतिपन्नाधिकरणवृत्त्यभावप्रतियोगित्वं स्वीकर्तुमुचितं, न तु सत्त्वेना[2]प्रतीयमानत्वघटितमसत्त्वं, तदघटितं तत्तु रूप्यादाविष्टम्। प्रत्यक्षोपपत्तये च साक्षि-

---

[1] न्तरापेक्षत्वा. [2] सत्त्वेन.

न तद्ज्ञानबाध्यसत्त्ववद्वा । तस्मिन्नपरोक्षेऽपि अनिषेध्यत्वेन साक्षाद्भासमानत्वात् । यदेवं तदेवं यथा घटे अपरोक्षेपि अनिषेध्यत्वेन साक्षाद्भासमानः पटो न घटाज्ञानकार्यादिः । विपक्षे च तदापरोक्ष्ये तदज्ञानव्याहातिरेव बाधिका । न चासिद्धिः, अधिष्ठानतया सुखादिसाक्षित्वेन तदानीमपि चैतन्यापरोक्ष्यादिति चेन्न; सामान्याकारेणापरोक्ष्येपि शुक्त्यादौ रजतादेरनिषेध्यत्वेन साक्षाद्भासमानतया तत्र व्यभिचारात् । अथ व्यावृत्ताकारेण यस्मिन् भासमाने यदनिषेध्यत्वेन साक्षात् भासते, तन्नतदज्ञानकार्यादीति व्याप्तिरिति मन्यसे, तर्ह्यसिद्धिः । न हि चैतन्यमिदानीं भ्रमनिवर्तकत्वाभिमतव्यावृत्ताकारापरोक्षप्रतीतिविषयः । तथा सति अधिष्ठानमेव न स्यात् । यदा तु

सम्बन्धो[1]ऽपेक्ष्यते न तु तात्त्विकत्वरूपं सत्त्वम् । सत्त्वासत्त्वयोर्भिन्नयोर्विरहत्वं[2] तु खण्डितमेव **व्यावृत्ताकारेण** भ्रमनिवृत्तिस्वरूपयोग्यज्ञानेन । यत्तु भ्रमनिवर्तकत्वाभिमतज्ञानान्यून[3]विषयकापरोक्षस्यहेतौ निवेशात् तादृशाधिष्ठानज्ञानस्येदानीमपि सत्त्वात् अज्ञानव्याहतिरिति तत्तुच्छम्; स्वरूपचैतन्यस्य स्वाविषयकत्वात्, स्वविषयकत्वेपि अज्ञानाविरोधित्वात् । उक्तान्यूनविषयकापरोक्षस्य अज्ञानविरोधित्वे प्रामाण्यशङ्कास्पदवृत्तेरपि तदापत्तेस्तद्व्यावृत्तविरोधितावच्छेदकत्वेन लाघवेन कल्प्यस्य जातिविशेषस्य मुक्त्यनुपधायकज्ञाने सत्त्वे[4] मानाभावात् अज्ञानविरोधितावच्छेदकविशिष्टापरोक्षस्य हेतौ निवेशनीयस्येदानीमभावात्, तदिदमुक्तं **न हि चैतन्यमिदानीमित्यादि** । **स हीति** । यत्तु 'नैकत्वसाक्षात्कारवतः प्रतिबिम्बदर्शने प्रवृत्तिः, किन्तु भेदज्ञानवतः, अतएव बालानां तत्र बालान्तरधीः' इति, तत्तुच्छम्;

---

[1] साक्षात्सम्बन्धो. [2] विरोधित्वं. [3] ज्ञानाज्ञान. [4] ज्ञानसत्त्वे.

वेदान्तवाक्यजन्यवृत्तौ व्यावृत्ताकारतया अपरोक्षं तदा अनिषेध्यत्वेन प्रपञ्चे आपरोक्ष्यशङ्कापि नास्ति । अतः प्रमाणजन्यासाधारणाकारभानस्यैवाज्ञानविरोधित्वान्नापरोक्षतामात्रेणाज्ञानपराहतिप्रसङ्गः । यच्चज्ञानपदेन ज्ञानाभावोक्तौ सिद्धसाधनम्, अनिर्वचनीयाज्ञानोक्तौ च तस्य खपुष्पायमाणत्वेन प्रतियोग्यप्रसिद्धिरिति; तत्तुच्छम्; असत्प्रतियोगिकाभावं स्वीकुर्वतः पराभ्युपगममात्रेणैव प्रतियोगिप्रसिद्धिसम्भवात् । ननु विमतं न आत्मन्यध्यस्तम्, आत्मसाक्षात्कारवत्प्रवृत्तिविषयत्वात्, यदेवं तदेवं यथा घटसाक्षात्कारवत्प्रवृत्तिविषयो घटो न तत्राध्यस्तः। न चासिद्धिः; ईशजीवन्मुक्तयोः आत्मसाक्षात्कारवतोरपि जगद्रक्षणभिक्षाटनादौ प्रवृत्तेः । शङ्के अध्यस्तमपि पीतत्वं न शङ्खश्वेतत्वसाक्षात्कारवत्प्रवृत्तिविषय इति न तत्र व्यभिचार इति चेन्न; प्रतिबिम्बे व्यभिचारात् । स हि मुखैक्यसाक्षात्कारवत् प्रवृत्तिविषयो मुखे अध्यस्तः, तद्व्यतिरेकेणोपलभ्यमानत्वस्योपाधित्वाच्च । एवंच विमतं नेश्वरमायाकल्पितम्,

---

बालानां विशेषादर्शनात् एकत्वानिश्चयेपि विशेषदर्शिनामेक[1]त्वजानतामेव तद्दर्शने प्रवृत्तेरानुभाविकत्वात् । अतएव दर्पणाद्युपाधिसन्निधानरूपदोषविशेषाजन्यभ्रमस्यैव विशेषदर्शनविरोधित्वमिति तार्किकादीनां सम्मतम् । उक्तं च दीधित्यादौ—'निर्णयात्मनि साधारणे वा दोषविशेषाजन्योपनीतभाने साधारणस्य निर्णयात्मनो वा विपरीतज्ञानस्य प्रतिबन्धकत्वात्' इति । **तद्व्यतिरेकेणोपलभ्यमानत्वस्येति** । तदविषयकोपलब्धिविषयत्वस्येत्यर्थः । प्रपञ्चोपलब्धिः सद्रूपब्रह्मविषयिकैवेति प्रपञ्चे साधनाव्यापकत्वमुपाधेर्बोध्यम् ।

---

[1] दर्शनादेक,

एतेन—उक्तोपाधिः सर्वपक्षवृत्तित्वेन साधनव्यापकः, व्यतिरेकेणेत्यस्य भेदेनेत्यर्थे शुद्धं ब्रह्म न जानामि घटस्फुरणमिति भेदेन प्रपञ्चोपलम्भात् । विनेत्यर्थेपि तदविषयकोपलब्धिविषयत्वपर्यवसानादासंसारमज्ञानानावृतस्य[1] ब्रह्मणो रूपादिहीनस्य घटाद्युपलम्भाविषयत्वादिति निरस्तम् । यथाच शुद्धं ब्रह्म घटादिधीविषयः, तथोपपादितं तद्व्यतिरेकेणानुपलभ्यमानत्वादिति मिथ्यात्वहेतूपपादने । किञ्च साक्षात्कारवत्त्वं विशेषणमुपलक्षणं वा आद्ये असिद्धिः; न हि यदाऽऽत्मसाक्षात्कारः तदा द्वैते ज्ञानं प्रवृत्तिर्वा । उक्तं हि विवरणादौ ज्ञानिनं प्रकृत्य 'कदाचिदद्वैतज्ञानं कदाचिद्वैतज्ञानम्' इति । उक्तं च पूर्वमाचार्यैः दृश्यत्वहेतूपपादने—'अज्ञानतत्कार्याविषयक ज्ञानस्यैव तदुभयनिवर्तकत्वात्' इति । यथाच द्वैता[2]विषयकज्ञानं जायते तथा तत्रैवोक्तम् । द्वितीये तु दृष्टशुक्तिताकेपि धर्मिणि वर्षाद्यन्तरे रजतादावध्यस्ते प्रवृत्तेर्व्यभिचारः । न चैवमीशस्य नित्यमद्वैतदर्शित्वात् द्वैते प्रवृत्तिर्ज्ञानं च न स्यादिति वाच्यम्; ईशस्य हि यदद्वैतज्ञानं तन्नाद्वैतदर्शनविरोधि, तत्त्वावच्छेदकजातिविरहात् । अतएव तदादाय नासिद्धयद्धारः, साक्षात्कारमात्रस्य अव्यावर्तकत्वेन स्वविरोधिसाक्षात्कारस्यैव हेतौ निवेश्यत्वात् । अथैवं प्रतिबिम्बे व्यभिचारोक्तिरसङ्गता, मुखैक्यसाक्षात्कारस्य तदनिवर्तकत्वादिति[3] चेन्न; यस्य हि साक्षात्कारस्य उपाध्यपगमक्षेण तन्निवर्तकत्वं तत्साक्षात्कारवत एव तत्र पूर्वक्षणे प्रवृत्तिसम्भवात् । न चैवमीशस्येव जीवस्यापि संसारावस्थायां भ्रमा[4]विरोधितत्त्वज्ञानाविशेषात् ईश्वरस्यैव तत्त्वदर्शित्वं श्रुतिबोधितं कुत इति वाच्यम्; ईशं प्रत्यावरणाभावात् । अतएव सर्वज्ञत्वेऽपि तत्र न भ्रान्तत्वव्यवहारः,

---

[1] मज्ञानावर्तितस्य (मज्ञानावृत्तस्य). [2] द्वैत. [3] दर्शननिवर्तक. [4] भ्रम.

तं प्रत्यपरोक्षत्वात् यदेवं तदेवं यथा चैत्रं प्रत्यपरोक्षो घटो न चैत्रमायाकल्पितः। विमतं न जीवकल्पितम्, तस्मिन् सुषुप्तेऽप्यवस्थितत्वात्, आत्मवत्। न चासिद्धिः, प्रत्यभिज्ञानात्। अदृष्टादेरभावे पुनुरुत्थानायोगाच्चेत्यपि निरस्तम्; आद्ये ऐन्द्रजालिकं प्रत्यपरोक्षे तन्मायाकल्पिते व्यभिचारात्। मायाविद्ययोरभेदेन देहात्मैक्यभ्रमे व्यभिचाराच्च। द्वितीयेत्वसिद्धेः। न च प्रत्यभिज्ञया प्रपञ्चस्य स्थायित्वसिद्धेर्नासिद्धिः। सुषुप्तिकालस्थायित्वासाधकत्वस्य प्रत्यभिज्ञाया दृष्टिसृष्टिसमर्थने वक्ष्य-

---

आवरणस्यैव तत्र प्रयोजकत्वादिति ध्येयम्। **ऐन्द्रजालिकमिति**। न च तत् मायाकल्पितं तेन न दृश्यत इति वाच्यम्; तथा सति तदुपादानकप्रवृत्तिः तस्य न स्यात्, तत्र तत्प्रत्यक्षस्यहेतुत्वात्। दृश्यते हि स स्वमायानिर्मिताम्रफलादानच्छेदनदानादौ प्रवृत्तः। अतएव मायायुद्धे स्वमायानिर्मितगजतुरगशस्त्रादिव्यापारे प्रवर्तन्ते। न हि तावत्पदार्थानां दर्शनं विना तेष्वसाधारणतत्तद्व्यापारे प्रवृत्तिर्घटते। किञ्च हरिवंशादौ प्रद्युम्नशम्बरयुद्धादौ—

ततो मायां परां चक्रे देवशत्रुः प्रतापवान्।
सिंहान् व्याघ्रान् वराहांश्च तरक्षून् ऋक्षवानरान्॥

मुमोच धनुरायम्य प्रद्युम्नस्य रथोपरि।
गन्धर्वास्त्रेण चिच्छेद सर्वांस्तान् खण्डशस्तदा॥

प्रद्युम्नेन तु सा माया हता तां वीक्ष्य शम्बरः।
अन्यां मायां मुमोचाशु दानवः क्रोधमूर्छितः॥

निहतां हस्तिमायां तु तां समीक्ष्य महासुरः।
सैन्यीं मायां महातेजाः सोऽसृजद्दानवेश्वरः॥

माणत्वात्, अदृष्टादेः कारणात्माना अवस्थितत्वेन पुनरुत्थान-सम्भवाच्च। मिथ्यात्वमात्मान्यसर्ववृत्ति न, मिथ्यामात्रवृत्तित्वात्। शुक्तिरूप्यत्ववदित्यपि न, मिथ्यात्वन्यूनवृत्तित्वस्योपाधित्वात्। मिथ्यात्वं च सदसद्विलक्षणत्वं सद्विलजणत्वमात्रं वा।

सिह्मान् विद्राविताञ् दृष्ट्वा मायया ष्टापदेन वै।
शम्बरश्चिन्तयामास कथमेनं निहन्मि वै॥

इत्यादौ स्वमायानिर्मितदर्शनं स्पष्टमेव। तस्मादैन्द्रजालिकेन स्वमायानिर्मितं न दृश्यत इति प्रलापमात्रम्। वदन्ति चैन्द्रजालिकाः—'मायानिर्मितं द्रक्ष्यामः' इति। ईशेन यद्दृश्यते तदपि तन्मायाकल्पितं सम्भवतीत्यप्रयोजकत्वमपि बोध्यम्। **कारणात्मनेति।** कारणगतसंस्कारात्मनेत्यर्थः। न च तर्हि तत्रैवोक्तसाध्यं साधनीयमिति वाच्यम्; अवस्थितत्वं हि स्थूला[1]वस्थावत्त्वं वाच्यम्। अन्यथा अवस्थितत्वेतरवैयर्थ्यापातात्, अबाधितशुक्तिरूप्यादिसूक्ष्मावस्थायां व्यभिचाराच्च। अत्रेदं बोध्यम्—ऐन्द्रजालिकेन द्वित्रिदिनस्थायि स्वमायानिर्मितमपि प्रदर्श्यते। तच्च तस्मिन् सुषुप्ते व्यवस्थितमेवेति व्यभिचारः। दृश्यते हि मायाविनि स्वमायोपसंहारमकृतवति दैवान्मृते तन्मायानुवर्तनं यथा गयाप्रदेशपूर्वप्रदेशे क्वचित्सदोष्णोदककुण्डं बदरिकाश्रमेऽपि तत्। अथ कस्यचित्तपोमाहात्म्यात्तत्, न तु मायात इति चेन्न; क्लृप्तकारणवह्न्यादिसंयोगं विना तपोमाहात्म्यमात्रेण तदसम्भवात्। **मिथ्यामात्रेति।** प्रतियोगित्वविषयत्वादौ व्यभिचारात् मात्रेत्युक्तम्। **न्यूनवृत्तित्वस्येति।** न च प्रमेयत्वे आत्मान्यसर्वान्तर्गततुच्छावृत्तौ मिथ्यात्वान्यूनवृत्तौ साध्याव्यापकत्वमिति वाच्यम्; प्रमेयत्वस्य मिथ्याभूते स्वस्मिन्नवृत्त्या मिथ्यात्वन्यूनवृत्ति-

---

[1] सकला.

आद्ये सिद्धसाधनम् । तस्यात्मान्यसर्वमध्यपतितासद्वृत्तित्वाभावात् । द्वितीये तु हेतौ मिथ्यापदस्य सदसद्वैलक्षण्यपरत्वे स्वरूपासिद्धिः । सद्वैलक्षण्यरूपे पक्षे तुच्छसाधारणे सदसद्विलक्षणेतरावृत्तित्वरूपहेत्वभावात् । तस्यापि सद्वैलक्षण्यमात्रपरत्वे सन्दिग्धानैकान्तिकता, साध्याभाववत्यात्मभेदे हेतुसन्दे-

---

त्वात् । प्रमेयत्वे प्रमेयत्वान्तरं तु न प्रमेयत्वत्वेन रूपेण, सम्बन्धप्रतियोगित्वानुयोगित्वविरहेणाधाराधेयभावविरहात् । न च प्रमेयत्वे मिथ्यात्वमसिद्धमिति वाच्यम्; घटः प्रमेयत्व मित्यारोपसत्त्वात् । तथाच येन रूपेण साध्ये वृत्तिर्निविष्टा, तेन रूपेणोपाधाविति न दोषः । न चैवं मिथ्यात्वस्यापि स्ववृत्तित्वेन मिथ्यात्वन्यूनवृत्तित्वात् साधनव्यापकत्वमिति वाच्यम्; व्यावहारिकमिथ्यात्वे मिथ्यात्वस्य पूर्वमसिद्धत्वात् । अतएवासदन्यत्वादावपि न साध्याव्यापकत्वम् । असदन्यत्वादिभिन्नत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादरे तु सुतरां न दोषः । किञ्च सदुपरागेण असतोऽपि प्रमाविषयत्वात्, अन्यथा आत्मान्यसर्वमध्यपतितासद्घटितसाध्यप्रमाया असम्भवात् प्रमेयत्वादेः स्ववृत्तित्वमतेऽपि साध्यव्यापकत्वमक्षतम्—**सर्वमध्येति** । न च सर्वपदेन असदन्यत्सर्वं[1] वाच्यमिति वाच्यम्; असत्त्वस्य त्वन्मते शुक्तिरूप्यादावपि स्वीकारेण सर्वपदवैयर्थ्यापत्तेः । मन्मतरीत्या सदसदन्यत्वस्य पक्षे निवेशेऽपि सदन्यत्वमात्मव्यक्तित्वावच्छिन्नभेद एव निवेश्यः । अन्यथा त्रिकालाबाध्यत्वरूपसत्त्वस्य गुरुत्वेन तेन रूपेण भेदाप्रसिद्धेः । तथाचात्मासद्व्यां भिन्नत्वं स्वाश्रयसर्ववृत्ति, नेत्यनुमाने बाध एव । गुरोरवच्छेदक[2] त्वपक्षेऽपि मन्मते सदन्यत्वस्य आत्मान्यत्वरूपतया माम्प्रति बाधएव । तथा च मन्मते दुष्टहेतोः मां प्रत्युपन्यासस्ते

---

[1] असदन्यसर्वं. [2] रसवच्छेदक.

हात्। अप्रयोजकत्वादिकं च पूर्वोक्तं दूषणमनुवर्तत एव। आत्मा परमार्थसदन्यः पदार्थत्वादनात्मवत्। न च कल्पितात्मप्रतियोगिकभेदेनार्थान्तरम्। कल्पितमिथ्यात्वेन मिथ्यात्वानुमानेऽपि सिद्धसाधनापत्तेरित्यपि न। व्यावहारिकपदार्थमादाय सिद्धसाधनेऽतिप्रसङ्गाभावात्, अनानन्दत्वस्योपाधित्वाच्च। अथ आत्मा यावत्स्वरूपमनुवर्तमानानात्मवान्, यावत्स्वरूपमनुवर्तमानभावरूपानात्मवान् वा, पदार्थत्वात् भावत्वाद्वा घटादिवत्। अत्र पञ्चमप्रकाराविद्यानिवृत्त्यभ्युपगमपक्षे सिद्धसाधनपरिहाराय साध्ययोः भावरूपपदमनात्मविशेषणमित्यपि मन्दम्। यावत्स्व-

---

शोभते। सत्यत्वं, प्रातिभासिकान्यसर्ववृत्ति न, सत्यमात्रवृत्तित्वादित्याभाससाम्यमप्रयोजकत्वं चेत्याह—**अप्रयोजकत्वादिकमिति। पदार्थमिति।** आत्मभेदपदार्थमित्यर्थः। न चात्मनि त्वन्मते तद्भेदस्यास्वीकारात् न सिद्धसाधनमिति वाच्यम्; जीवत्वाद्यवच्छेदेन शुद्धस्य तदनवच्छेदेनापि शुद्धे जीवादेः भेदसत्त्वात् 'तस्य भासा' आनन्दं ब्रह्मणो रूपम्, इत्यादिश्रुत्यनूदितस्य जीवत्वाद्यनवच्छेदेनैव शुद्धात्मनि तत्प्रतियोगिकभेदस्य व्यावहारिकस्य सिद्धान्ते स्वीकाराच्च। 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः, अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते' इत्यादिपञ्चपाद्याद्युक्तभेदस्य व्यवहारकालाबाध्यत्वात् **अनानन्दत्वस्येति**। न च परमार्थसदैक्यरूपं साध्याभावं विनाप्यानन्दत्वस्योपाध्यभावस्योपपन्नत्वान्न तस्य तद्व्याप्यताग्राहकस्तर्क इति वाच्यम्; खण्डनयुक्तिभिरेकस्य साक्षिस्वरूपस्य बाधासम्भवेन परमार्थसत्त्वेऽपि परमार्थसद्भेदस्य अवश्यं बाधात्, 'नाल्पे सुखमस्ति भूमैव सुखम्' इत्यादिश्रुत्या सद्वृत्त्यभावप्रतियोगित्वरूपस्य परिच्छेदस्यानन्दरूपताविरोधित्वोक्तेश्च। भावाद्वैतमते तात्त्विकस्याभावरूपानात्मनः स्वीकारादाह—**भावरूपेति।**

रूपामित्यस्य यत्किञ्चित्स्वरूपपरत्वे सिद्धसाधनात्, आत्मस्वरूपपरत्वे साध्याप्रसिद्धेः । न हि यावदात्मस्वरूपमनुवर्तमानोऽनात्मा प्रसिद्धोऽस्ति । तथा सति अनुमानवैयर्थ्यात् । अथ स्वरूपपदस्य समभिव्याहृतपरत्वात् व्याप्तिग्रहदशायां दृष्टान्तस्वरूपं पक्षधर्मताग्रहदशायां च आत्मस्वरूपमेव प्राप्यत इति न साध्याप्रसिद्धिः, न वा सिद्धसाधनमिति चेन्न; शब्दस्वभावोपन्यासस्यानुमाने अनुपयोगात् । स्वज्ञानबाध्येत्यत्र स्वशब्देऽपि तुल्योऽयं दोषः । अतएव वीमता बन्धनिवृत्तिः स्वप्रतियोगिविषयविषयकज्ञानाबाध्यानात्मसमकालीना, उक्तज्ञानाबाध्यभावरूपानात्मसमानकालीना वा, बन्धनिवृत्तित्वात्, निगलबन्ध-

---

उदाहरणवाक्यस्थस्वपदस्य दृष्टान्तपरत्वे पदार्थत्वस्य यावत्तत्स्वरूपानुवर्तमानानात्मवत्त्वव्यभिचारित्वेन[1] व्यापकता[2] ग्रहासम्भवः, स्वात्मकपदार्थत्वस्य हेतुत्वेन तद्वारणेऽपि स्वत्वान्यवैयर्थ्यं स्वरूपासिद्धिश्च । प्रतिज्ञाहेतुवाक्यस्थस्वपदयोः पक्षपरतया पक्षरूपस्वपदार्थघटितसाध्यहेत्वोः[3] प्रतिज्ञाहेतुवाक्यनिर्दिष्टयोः उदाहरणादिवाक्ये व्याप्यव्यापकत्वादिलाभासम्भवात् कुतोऽस्य गमकत्वमित्यादिजिज्ञासानिवर्तकत्वासम्भवः । तथाच उक्तशब्दस्वभावोऽनुमानानुपयुक्त इत्याशयेनाह—**शब्दस्वभावेति** । उक्तं च मणावीश्वरवादे – कार्यत्वहेतुस्वोपादानाभिज्ञजन्यत्वसाध्ययोः व्याप्तिग्रहः किं घटोपादानान्तर्भावेन? किं वा तत्तदुपादानान्तर्भावेन? किं वा उपादानमात्रान्तर्भावेन? आद्ये व्यभिचारः । द्वितीये तत्तदुपादानत्वस्य अननुगतत्वात् कथं व्यापकताग्रहः? अथ तच्छब्दस्य समभिव्याहृत परत्वान्न दोष इति चेन्न; अनुमाने शब्दस्वभावोपन्यासस्य अप्रयोजकत्वात् । तृतीये तु सिद्धसाधनमिति स्वपदस्य पक्षदृष्टान्तान्यतरपरत्वेऽपि सिद्धसाधनम् । स्वप्रागभावव्यतिरिक्ते-

---

[1] व्यभिचारे न [2] व्यावर्तक. [3] साध्यहेतुत्वेन.

निवृत्तिवादित्यपि निरस्तम्; पक्षदृष्टान्तयोः बन्धपदार्थस्यैकस्याभावेन स्वरूपासिद्धिसाधनवैकल्यान्यतरापातात् । स्वपदे चोक्तस्साध्याप्रसिद्धिदोषः । हेतौ च बन्धेतिविशेषणवैय्यर्थ्यान् व्याप्यत्वासिद्धिः । अप्रयोजकत्वं च कस्याश्चिन्निवृत्तेरनात्मसमानकालीनत्वदर्शनात् । निवृत्तिमात्रस्य तथात्वसाधने संसार-

---

त्यादिविवरणोक्तानुमानं तु पश्चात्परिष्कार्यमिति ध्येयम् । **बन्धपदार्थस्येति** । तत्तत्स्वातन्त्र्यविरोधिरूपनानार्थकं बन्धपदम् । अतएवाविद्यावतामपि निगडादिविमोके[1] निर्बन्धत्वं, व्यवहरन्ति । आत्मान्यनिवृत्तेर्हेतुत्वेऽपि व्यर्थ[2]विशेषणत्वं, अप्रकाशितार्थप्रकाशत्वादित्यविद्यानुमानहेतौ तु प्रकाशपदस्य आलोकप्रमान्यतरपरत्वेऽपि न क्षतिरिति भावः । यत्तु 'बन्धेति न व्यर्थम्, निवृत्तिविशेषलाभार्थत्वात्' इति; तत्तच्छम् । निवृत्तौ हि विशेषो न जातिः, किन्तु प्रतियोगिविशेषानुयोगित्वं तन्मात्रं हेतुः, तद्विशिष्टनिवृत्तित्वं वा; अन्त्ये विशेषणं व्यर्थमेव । आद्येऽपि यदि निगडादिबन्धरूपविशेषप्रतियोगिकत्वं हेतुः, तदा तदसिद्धम् । अज्ञानप्रतियोगिकत्वं यदि हेतुः, तदा साधनवैकल्यम्, सप्रतियोगिकत्वेतरवैयर्थ्यं च तद्व्यक्तित्वादिहेतुत्वेऽप्युक्तदोषः, अज्ञाननिवृत्तेः ब्रह्मरूपत्वपक्षे सिद्धसाधनं च तत्त्वधीपूर्वकालबाधित[3]शुक्तिरूप्यादिरूपानात्मकालीनत्वस्य ब्रह्मणि सत्त्वात्तस्या[4]ब्रह्मान्यत्वपक्षेपि नानाजीवपक्षे तत्साध्ये स्वप्रतियोगीत्यत्र तदज्ञाननिवृत्तेरेव स्वपदेन धार्यत्वात् एकजीवपक्षेऽपि जीवन्मुक्तिपक्षे तत् । सद्योमुक्तिपक्षे तु साध्याप्रसिद्ध्यादि । **स्वपद इति** । दृष्टान्तपरत्वे निगडरूपबन्धप्रतियोगिविषयाद्यप्रसिद्धिः, पक्षपरत्वे च अज्ञान[5]रूपबन्धविषयप्रसिद्धावपि तद्विषयकज्ञानाबाध्यानात्माप्रसिद्धिरिति भावः । **तथात्वसाधन इति** ।

---

[1] विमोच(क्ष)के. [2] कार्य. [3] तत्र पूर्वकालीनाबाधित. [4] तस्य. [5] ज्ञान.

कालीनायाः दुःखनिवृत्तेः समानाधिकरणदुःखप्रागभावकालीनत्वदर्शनमिव दुःखनिवृत्तिमात्रस्य तथात्वसाधने । नन्वेवं सामान्यानुमानेषु निराकृतेषु विशिष्यानुमानं भविष्यति । आत्मधीर्न स्वविषयविषयकधीबाध्या धीत्वात् शुक्तिधीवदित्यपि बालभाषितम्; स्वविरोध्यविषयकप्रत्ययविषयकत्वस्योपाधित्वात् । अन्धोऽयं रूपज्ञानवानित्यन्धस्य रूपविषयतया कल्पितं यत् ज्ञानं तस्य रूपं नान्धगम्यमिति स्वविषयविषयकप्रत्ययबाध्यत्वदर्शनेन व्यभिचारात् । कल्पितत्वात्तत्र तद्बाधने प्रकृतेऽपि वृत्तेः

यत्तु 'स्वकारणानात्मसहभावं विना निवृत्तिर्न जायेतेत्यनुकूलतर्कः प्रकृतानुमाने विशेषः' इति तत्तुच्छम्; चरमनिवृत्तेर्हि कारणमुपादाननाशादि । तच्चाभावरूपम् । अदृष्टं तु न तत्कारणं, तस्याभोगतत्साधनेतरत्वात् । उक्तं च तथा वर्धमानाद्यैः । तस्यान्यस्य वा भावस्य[1] तत्कारणत्वेऽपि तत्पूर्वसत्त्वमपेक्ष्यते न समकालत्वम् । अविद्यादिपरिणामि च न चरमनिवृत्तावुपादानं, भावाद्वैतमते स्वविशिष्टं भावं वा जन्यं प्रत्येव तस्योपादानत्वात् **रूपं नान्धगम्यमिति** । ननु स्वविषयमात्रविषयकधीबाध्यत्वाभावस्य साध्यत्वे नायं दोष इति चेन्न; इदं रूपं तन्नेतिभ्रमविषयीभूतस्यान्धप्रत्यक्षाविषयत्वाभावरूपतत्त्वाभावस्य अन्धप्रत्यक्षविषयत्वरूपस्येदं तदिति वाक्यजप्रमायाः कल्पितोक्तप्रत्यक्षविषयमात्राविषायिण्या बाधेन व्यभिचारे प्रकृतग्रन्थतात्पर्यात् । न ह्युक्तप्रमायां तद्रूपान्याद्विषयः, समानाधिकृतपदद्वयजन्यत्वेन मन्मते निर्विकल्पकत्वात् । स्वविषयताया अन्यूनानतिरिक्तविषयताकज्ञानाबाध्यत्वोक्तावपि बाध्यज्ञानस्यापीदं तदिति वाक्यजन्यत्वेन निर्विकल्पकत्वे तत्रैव स्थले व्यभिचारः; उपलक्षणविधया व्यावृत्ताकारत्वस्येवारोप्याकारत्वस्य सम्भवात्, बाधकत्वस्येव बाध्यत्व-

---

[1] (चिद्वि) चाभावस्य.

कल्पितत्वं समम्। धीपदेन चैतन्यमात्रविवक्षायां तु सिद्धसाधनमेव। आत्माधिष्ठानकभ्रमहेतुः न स्वकार्यभ्रमाधिष्ठानज्ञानबाध्यः, भ्रमहेतुत्वात्। यदेवं तदेवं यथा शुक्त्यधिष्ठानकभ्रमहेतुकाचादीत्यपि न साधु। व्यावृत्ताकाराधिष्ठानज्ञानानवधित्वस्य स्वकार्यभ्रमाधिष्ठानानारोपितत्वस्य वा उपाधित्वात्, दूरादिदोषादुपलादौ यत्र चाकचक्यकल्पना तेन चाकचक्यदोषेण शुक्ताविव रजतकल्पना, तत्राधिष्ठानज्ञानेन चाकचक्करूप्ययोरुभयोरपि

स्याप्युक्तवाक्यजन्यज्ञाने सम्भवात्। स्वपदस्य पक्षपरत्वे विशिष्टधर्मावच्छिन्नाभावाप्रसिद्धिश्च, लाघवेन बाध्यत्वत्वमात्रस्यावच्छेदकत्वात्। स्वविषयमात्रविषकत्वनिवेशे रूपं चाक्षुषं न वेति ज्ञानं रूपं चाक्षुषमिति धीबाध्यमिति तत्रापि व्यभिचारो बोध्यः—**धीपदेनेति**। आत्मव्यवहारप्रयोजकधीरात्मधीरिति भावः। काचादावंशतस्सिद्धसाधनात्—**आत्माधिष्ठानकेति**। **व्यावृत्ताकारेत्यादि**। यस्माद्व्यावृत्ततया ज्ञातं[1] स्वजन्यभ्रमाधिष्ठानं स्वजन्यभ्रमनिवर्तकं तदन्यत्वस्येत्यर्थः। अविद्यादिद्वितीयाभावोपलक्षितस्यब्रह्मणोधीर्भ्रमनिवर्तिकेत्यविद्यादौ तदस्तीति बोध्यम्। यद्यपि व्याप्यभ्रमस्य भ्रमानुमितिजनकस्य ह्रदो निर्वह्निरित्यादिज्ञानेन बाधात् स्फुटो व्यभिचारः; तथापि भ्रमत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणतानिवेशे[2] व्याप्यभ्रमस्य दोषविधया सर्वत्र व्यापकभ्रमेष्वकारणत्वाद्धेत्वभावादेव न व्यभिचार इत्याशयेन स्थानान्तरे तमाह—**दूरादीति** न च चाकचक्यज्ञानं हेतुः, तच्च न बाध्यं मन्मत इति वाच्यम्; ज्ञायमानचाकचक्यस्यापि हेतुत्वसम्भवात् न च चाकचक्यस्यैकस्याभावेन, भावेऽपि तद्धीमात्रेण भ्रमानुत्पादात् तत्तद्धीव्यक्तित्वेनैव तत्तद्भ्रमहेतुत्वमिति वाच्यम्; प्रातीतिकतत्तच्चाकचक्यव्यक्ति[1]त्वेनैव हेतुत्व-

---

[1] ज्ञानं. [2] निवेशेधर्मितावच्छेदकताप्रत्यासत्त्या कार्यकारणभावः इत्याधिकः पाठः.

बाधदर्शनेन व्यभिचाराच्च । ब्रह्मान्यानादि परमार्थसत् अनादित्वात् ब्रह्मवदित्यपि न भद्रम्। ध्वंसाप्रतियोगित्वस्योपाधित्वात्। ब्रह्म देशकालसम्बन्धं विना नावतिष्ठते पदार्थत्वात् घटवदित्यपि न। कालसम्बन्धं विना नावतिष्ठते इत्यस्य यदा ब्रह्म तदा अवश्यं

सम्भवात्। आरोपितं न हेतुरिति प्रलापस्तु प्रत्युक्त एव, शुद्धब्रह्माहेतुत्वपक्षे आरोपितस्यैव हेतुत्वाच्च । यत्तु—"व्यावृत्ताकारेत्यस्य पक्षमात्रव्यावर्तकत्वेन आद्यस्योपाधेः पक्षेतरत्त्वरूपता, द्वितीयोपाधौ तु साधनव्यापकता, तत्रारोपितस्य तदधिष्ठानकभ्रमा[2]हेतुत्वेन साधनाव्यापकत्वसन्देहस्याप्यभावात्" इति तत्तुच्छम्; स्वजन्यभ्रमाधिष्ठानं यस्माद्व्यावृत्तं तद्भेदरूपोपाधौ तत्प्रतियोगिरूपविशेषणस्य उक्तचाकचक्यादिरूपविपक्षादपि व्यावर्तकत्वेन पक्षमात्राव्यावर्तकत्वात्, साध्यव्यापकताग्राहकतर्कसत्त्वे पक्षमात्रव्यावर्तकत्वमदूषणमित्यस्यदीधित्यादौ प्रदर्शितत्वाच्च । द्वितीये च न साधनव्यापकतानिश्चयः; तत्रारोपितस्य तदधिष्ठानकप्रमा[3]-हेतुत्वे युक्तयभावादुक्तचाकचक्यादौ साधनाव्यापकत्वस्यैव[4] निश्चयात्, पक्षे चानारोपितत्वं साधयितुं त्वयाऽद्यापि यत्यते, न तु निश्चीयत इति व्यभिचारसन्देहाधायकतया सन्दिग्धोपाधित्वस्य निर्विवादत्वाच्च उक्तोपाधेरसत्त्वे उक्तसाध्यानुपपत्तेः साध्यव्यापकताग्रहादुक्तोपाध्यभावो यदिसाध्याभावव्यभिचारी स्यात्तदा साध्यव्यापकप्रतियोगिको न स्यादिति तर्कसत्त्वान्नाप्रयोजकतेति ध्येयम् । **ब्रह्मान्यानादीति** । अत्र पक्षे हेतौ चानादित्वं प्रागभावाप्रतियोगित्वं चेत्तदा तुच्छे बाधव्यभिचारौ, तद्वृत्त्भावत्वं चेत्तदापि भावत्वमभावभिन्नत्वं चेत्तदा स्वरूपासिद्धिः। अविद्यादेरपि पूर्णानन्दाद्यभावत्वात् सत्तादात्म्यं चेत्तदापि त्वन्मते तदन्यवैयर्थ्यम्, शुक्तिरूप्यादेस्त्वया तदनङ्गीकारात्, तन्मात्रहेतुत्वे च

---

[1] वृत्ति. [2] भ्रम. [3] भ्रम पा. [4] व्यापकत्वेऽस्यैव.

कालसम्बन्ध इत्येवंरूपा व्याप्तिरित्यर्थः । तथाच सिद्धसाधनम् । न हि यस्मिन् काले ब्रह्म तस्मिन् काले ब्रह्मणः कालसम्बन्धो नास्ति । एवं यत्रात्मा तत्र कालसम्बन्ध इति दैशिकव्याप्तावपि सिद्धसाधनम् । न हि देशकालासम्बन्धः कदाप्यास्ति । परममुक्तौ तु न देशो न काल इति सुस्थिरं सिद्धसाधनम् । ब्रह्मान्यद्वैकगम्यं धर्मादि परमार्थसत् श्रुतितात्पर्यविषयत्वात् ब्रह्मवदित्यपि न साधु । पारमार्थिकत्वेन श्रुतितात्पर्यविषयत्वस्योपाधित्वात् । साक्षिवेद्यं सुखादि परमार्थसत् । अनिषेध्यत्वेन

अविद्यायाः पञ्चमप्रकारनिवृत्तेरपि सत्तादात्म्याभावे दृश्यत्वानुपपत्तेः लाघवेन कार्यमात्रे सदुपादानकत्वात् तस्यां व्यभिचारः । अतएवध्वंसाप्रतियोगित्वं सर्व[1]पक्षवृत्तित्वेन साधनव्यापकमिति परास्तम् ; अभावान्यत्वस्य पक्षहेत्वोर्निवेशासम्भवात्, सत्तादात्म्यनिवेशे प्रागभावादौ साधना[2]व्यापकत्वात् पक्षेप्युपाधेः सन्देहे नसन्दिग्धोपाधित्वसम्भवाच्च । **सुस्थिरमिति**[3] । देशकालसम्बद्धं मन्मते सत्त्वेन प्रतीयमानं सर्वम् । ब्रह्मणोप्यविद्यादिदेशकालसम्बन्धात् । तथाच तदन्यभेदसाधने सिद्धसाधनम् । तुच्छान्यत्वाभ्युपगमात्, परममुक्तौ देशाद्यसम्बद्धस्यापि ब्रह्मणः तादृशभेदस्य देशकालसम्बन्धरूपस्य परममुक्त्यन्यकाले ब्रह्मणि स्वीकाराच्च देशादिद्वयवैयर्थ्यं च । अत एव देशकालासंसृष्टसत्ताया अत्यन्ताभावे साध्येऽपि तदुभयम् ; सत्तावत्त्वे न निश्चिते विशिष्टाभावस्य देशादिसम्बन्धरूपत्वात्? यत्किञ्चित्कालावच्छिन्नं देशकालासम्बद्धान्यत्वमादाय अर्थान्तरं च । तद्वारणाय यदायदा ब्रह्म तदा देशादिसम्बन्धमित्युक्तावाचार्य[4] दूषणं बोध्यम् । **पारमार्थिकत्वेनेत्यादि** । परमार्थं परमप्रयोजनमर्हति यत् तत्त्वेन विशिष्टा या श्रुतिस्तत्तात्पर्यविषयत्वस्येत्यर्थः ।

---

[1] असर्व. [2] साधन (बाधेन पा.) [3] सुस्थिरमित्यदेशकालसंबन्धित्वं
[4] वाचार्याय.

दोषाजन्यज्ञानं प्रति साक्षाद्विषयत्वात्, आत्मवदित्यपि न; शुक्तिरूप्यादिषु व्यभिचारात्। तेषां दोषजन्यवृत्तिविषयत्वेऽपि दोषाजन्यसाक्षिविषयत्वात्, शुद्धस्य वृत्तिविषयत्वानभ्युपगमे दृष्टान्तस्य साधनविकलत्वाच्च। दोषजन्यज्ञानाविषयत्वविवक्षायां वा असिद्धो हेतुः। साक्ष्यवच्छेदिकाया अविद्यावृत्ते र्दोष-

---

तथाच मोक्षोपधायकप्रमाविषयत्वं श्रुतिजन्यधीमात्रप्रयोजनरूपत्वं वोपाधिर्लभ्यते; तादृशविषयतायोग्यताया विवक्षितत्वात्। एतेन साधनविशेषितोऽयमुपाधिरिति ईश्वरानुमाने शरीरजन्यत्वबदाभास इति परास्तम्, वस्तुतस्तु साधनविशेषितत्वं नाभासताप्रयोजकं; उपाधेर्दूषकताबीजविघटकरूपस्यैव तत्त्वेन दीधित्यादावुक्तत्वात्। [1] साध्याव्यापकतादिग्राहकतर्कस्तु पूर्ववत्। **साक्ष्यवच्छेदिकाया इति।** न च दोषजन्यत्वेनोभयवादिसिद्धं यत् ज्ञानं तदविषयत्वं वाच्यम्, अविद्यावृत्तिस्तु न तथेति वाच्यम्; तथा सति जीवपरयोरैक्ये जविानणु[2] त्वे च तात्त्विकत्वसिद्ध्यापत्तेस्त्वन्मते व्यभिचारात्, शुक्तिरूप्यादौ व्यभिचाराच्च। न हि तज्ज्ञानमुभयसिद्धं तादृशमस्ति; मया अविद्यानिवृत्ते स्त्वया तदन्यस्य तत्वाङ्गीकारात्। पूर्वोक्तरीत्या उभयसिद्धत्वस्य दुर्वचत्वात्। अथोभयसिद्धो यो दोष स्तदजन्यज्ञानविषयत्वं वाच्यम्, शुक्तिरूप्यादिधीजनकदोषः उभयसिद्धः, न तु सुखादिधीजनकदोषः, मम मते सुखादेस्साक्षिमात्रवेद्यत्वादिति चेन्न; त्वन्मते सुखादेरिव मन्मते शुक्तिरूप्यादेस्साक्षिमात्रवेद्यत्वपक्षे व्यभिचारात्।दोषत्वेनोभयसिद्धकाच।दिजन्यप्रत्यक्षादिविषयकाचादौ व्यावहारिके स्वरूपासिद्धेश्च। अथ भ्रमविषयत्वेनो भयसिद्धं यद्यत्तदन्यत्वं हेतुः, तदा जीवानणु[3]त्वादावुक्तदोषः, दुर्ज्ञेयतासिद्धत्वस्य ज्ञातत्व प्रमितत्वरूपत्वविकल्पाद्युक्तदोषापत्तिश्चेति ध्येयम्।

---

[1] साध्यव्यापकेति पा॥ [2] जीवाणुत्वे. (जीवानन्यत्वे). [3] जीवाणु.

जन्यत्वात् । असद्गोचरशाब्दज्ञानात्मकविकल्पस्य दोषाजन्यत्वेन असति व्यभिचारश्च । आत्मनो वृत्तिविषयत्वाभ्युपगमे दोषजन्यदेहात्मैक्यभ्रमविषयत्वात् साधनविकलो दृष्टान्तः । तदनभ्युपगमे तु अविषयत्वमात्रस्यैव परमार्थसत्त्वसाधकत्वोपपत्तौ दोषजन्यज्ञानेति विशेषणवैयर्थ्यात् व्याप्यत्वासिद्धिः । तावन्मात्रं च पक्षे स्वरूपासिद्धमित्यन्यत्र विस्तरः । विमतं परमार्थसत् स्वविषयज्ञानात्पूर्वभावित्वात् आत्मवदित्यपि न; दृष्टिसृष्टिपक्षे असिद्धेः । विषमव्याप्तस्यानादित्वस्य उपाधित्वाच्च । अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभा—

भ्रमविषयत्वादिति । विशिष्टात्मगोचराया अहमाकारवृत्तेश्शुद्धात्माऽपि विषय इति भावः । **साधकत्वेति** । व्याप्तिग्रहयोग्यत्वेत्यर्थः । तथाच व्याप्तिग्रहानुपयुक्तत्वेन वैयर्थ्यमिति भावः । उक्तरीत्या ज्ञानमात्रस्यैव दोषजन्यत्वेन ज्ञानान्तविशेषणस्याव्यावर्तकतया विषयतात्वावच्छिन्नप्रतियोगिताकाभावत्वेन हेतुत्वं वाच्यम् । तथाच ज्ञानान्तविशेषणस्य प्रतियोगितानवच्छेदकत्वेऽपि प्रतियोग्यंशे विशेषणत्वं वाच्यम् । तथाच स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितत्वरूपमपि व्यर्थ[1] मिति ध्येयम् । **दृष्टिसृष्टीति** । न च प्रतिकर्मव्यवस्थाभावापत्त्या स पक्षो न युक्त इति वाच्यम् । तद्व्यवस्था हि केनचिदेव कदाचिदेव कश्चिदेव ज्ञायते इत्येवंरूपा । सा च तत्पक्षेऽप्यस्ति; तत्तन्मनोवच्छिन्नचैतन्येषु तत्तद्विषयाणां तत्तत्काल एवाध्यासादित्युक्तापत्तेर्मौढ्यमूलकत्वात् । अत्र विशेषानुमानेष्वाद्यद्वितीययो स्स्वपदस्य पक्षदृष्टान्तपरत्वविकल्पेन पूर्वोक्तसाध्यवैकल्यादिदोषः । द्वितीये भ्रमत्वस्यैकस्याभावात् तत्तद्भ्रमं प्रत्येव तत्तद्व्यक्तित्वेन दोषाणां हेतुत्वेन तन्निवेशेऽननुगमः । तावदन्यतमत्वेन हेतुत्वानां हेतुत्वेऽपि दृष्टान्तमात्रवृत्तिहेतुत्वस्यैव तत्त्वेन हेतु-

---

[1] वैयर्थ्यं.

त्वसम्भवेनेतरवैयर्थ्यम् । तच्च स्वरूपासिद्धम् । पदार्थत्वहेतुः पदशक्यत्वं चेत् स्वरूपासिद्धम् । पदलक्ष्यत्वं चेत् पदत्वलक्ष्यत्वयोरननुगतत्वात् पक्षदृष्टान्तयोरनुगतहेत्वभावात् स्वरूपासिद्धिसाधनवैकल्ये । अन्यतमत्वेन हेतुत्वेपि वैयर्थ्यासिद्ध्यादिकम् । तद्धीविषयत्वेन हेतुत्वे चाप्रयोजकत्वादिकम् । दोषाजन्येत्यादिहेतावपि दोषत्वस्य तत्तद्भ्रमजनकत्वरूपस्याननुगमादुक्तदोषः । किञ्चिद्भ्रमजनकत्वमात्रनिवेशे भ्रमान्तरविषये व्यभिचारः । दोषाणामन्यतमत्वेन निवेशेऽपि दोषाजन्यज्ञानाप्रसिद्धिः । वस्तुमात्रस्यैव किञ्चिद्भ्रमं प्रति दोषत्वात् । स्वज्ञानात्पूर्वभावित्वादित्यत्रापि पूर्वभावित्वस्य पूर्वकालवृत्तित्वरूपत्वात् यत्किञ्चित्ज्ञानपूर्वभावित्वं शुक्तिरूप्यादौ व्यभिचारि । यावत्स्वज्ञानपूर्ववृत्तित्वं घटादावसिद्धम् । यत्किञ्चित्स्वप्रत्यक्षपूर्ववृत्तित्वं शुक्तिरूप्यादावपि, सन्निकर्षादिना तत्रापि प्रत्यक्षोत्पत्तौ बाधकाभावात् । सुखादौ साक्षिमात्रवेद्यत्वे तत्रासिद्धिः । तस्य पक्षबहिर्भावेऽपि स्वप्रत्यक्षोत्पत्तिकालोत्पन्नपरिमाणविशेषादावसिद्धिः । संयु-[1]क्तसमवायमात्रेण तत्प्रत्यक्षानुदयेन तावदवयवावच्छिन्नसंयोगवत्समवायहेतुत्वे तत्तत्पुरुषीयत्वस्य कार्यकारणतावच्छेदके निवेशे गौरवात् । पुरुषनिष्ठपरम्परासम्बन्धेन तावदवयवावाच्छिन्नसंयोगस्यैव लाघवेन तत्प्रत्यक्षहेतुत्वेन तदुत्पत्तिकालेऽपि तत्प्रत्यक्षसम्भवात् । न चैवं तत्परिमाणोत्पत्तेः पूर्वमपि तत्प्रत्यक्षापत्तिः; तदवयवावच्छिन्नत्वस्य गुरुत्वेन विजतीयसंयोगत्वेनैव हेतुत्वात्तादृशस्य तत्पूर्वमसत्त्वात् । यावत्स्वप्रत्यक्षपूर्ववृत्तित्वं तु सुतरामसिद्धम्; ईशयोगिप्रत्यक्षाणां साक्षिणश्च स्वविषयपूर्वमपि सत्त्वात् । अयोगिजीवयावज्जन्यप्रत्यक्षनिवेशेऽपि व्याप्तिग्रहानौपयिकत्वेन यावज्जन्यपूर्ववर्त्तित्वेतरांशवैयर्थ्यम् । तदनुपादाने

[1] संयुक्तसमवेतसमवायेति पां.

वत्वं एतद्घटसमानाधिकरणावृत्ति अन्योन्याभावातिरिक्तैतद्घट-समानाधिकरणैतद्घटप्रतियोगिकाभावमात्रवृत्तित्वात् एतद्घट-प्रागभावत्ववत्। व्यधिकरणधर्मावच्छिन्नाभावपक्षे व्यधिकरण-धर्मानवच्छिन्नेत्यपि विशेषणीयम्। अत्र च स्वसमानाधिकरणः स्वसमानकालीनो योऽत्यन्ताभावस्तदप्रतियोगित्वलक्षणसत्त्व-सिद्धिरित्यपि न साधु। साधनावच्छिन्नसाध्यव्यापकस्यैत-द्घटप्रतियोगिकजन्यजनकान्यतरमात्रवृत्तित्वस्योपाधित्वात्। न च पक्षीभूतधर्मस्यात्यन्ताभाववृत्तित्वसन्देहे साधनाव्यापक-त्वसन्देह इति वाच्यम्; विपक्षसाधकतर्कानवतारदशायां

चासिद्धिरिति परोक्तिः प्रलापमात्रमिति ध्येयम्। **अन्योन्येत्यादि।** तद्घटभेदनिष्ठेऽभावत्वे बाधादतिरिक्तान्तं, समवायेन तद्घटात्यन्ताभाव-निष्ठाभावत्वे बाधात् **एतद्घटसमानाधिकरणेति।** सामानाधिकरण्यं समवायिवृत्तित्वं, कपालरूपादौ बाधात् **एतद्घटप्रतियोगिताकाभा-वेति।** हेतौ च तद्घटभेदत्वे समवायावच्छिन्नतद्घटात्यन्ताभावत्वे घटा-त्यन्ताभावत्वे मेयत्वादौ च व्यभिचारात् क्रमेण विशेषणानि सार्थकानि; प्रागभाववत्वादौ साधनवैकल्याद्दृष्टान्ते। **एतद्घटेति।** शुद्धसाध्य-मेतद्घटासमानकालीने तत्तद्व्यक्तित्वेपीति तत्रोपाध्यसत्त्वादाह —**साधना-वच्छिन्नेति। अन्यतरेति।** एतद्घटप्रतियोगिकं यदेतद्घटस्य जन्यं जनकं च तयोरन्यतरदेतद्घटस्य प्रागभावो ध्वंसश्च, तन्मात्रवृत्तित्वस्येत्यर्थः। साध्यसमव्याप्तिरक्षार्थं **मात्रेति।** विषमव्यापकस्याप्युपाधित्वं साध्य-व्याप्यत्वांशस्य दूषकताया मनुपयोगादिति निष्कृष्टमते तु तन्नोपादेयम्। **सन्देह इति।** एतद्घटे मिथ्यात्वसन्देहकाले तत्समवायिनि समवायेन तदत्यन्ताभावस्य सन्देहात् पक्षे अत्यन्ताभाववृत्तित्वसन्देहः। तद्घट-ध्वंसप्रागभावकाले च तद्घटवति तदत्यन्ताभावो नाभ्युपेयते। तत्काले

सान्दिग्धोपाधेरपि दूषणत्वसम्भवात्। घटात्यन्ताभावत्वे च व्यभिचारात्। संयोगसम्बन्धेन घटवत्यपि भूतले समवायसम्बन्धेन

तद्घटो नास्तीति बुद्धेस्तद्घटप्रागभावाद्यवगाहित्वेनोपपत्तेः, पूर्वापरघटध्वंसप्रागभाववति घटो नास्तीति धीस्तु नापाद्या, नास्तीत्याकारकबुद्धेः प्रतियोगिविशेषणीभूतघटत्वादिविशिष्टव्यधिकरणसंसर्गाभावविषकत्वात्। तत्तद्व्यधिकरणत्वं च तदवच्छेदकावच्छिन्नस्य तत्सामानाधिकरण्यस्य अभाववत्त्वादिरूपम्। अतस्संयोगादिमत्यपि सयोगो नास्तीत्यादिधीः। वस्तुतस्तस्यां घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वेनैवाभावभानात्। अन्यथा प्रतियोगिताया अवच्छिन्नत्वे मानाभावेनासिद्ध्यापत्तेः प्रागभावादिकालेऽप्यत्यन्ताभाव आवश्यकः। तथाच पक्षस्य तद्घटासमानकालीने तद्घटात्यन्ताभावे निश्चयेन पक्षे साधनवत्तानिश्चयादुपाध्यभावनिश्चयाच्च साधनाव्यापकत्वमुपाधेर्निश्चितमेव। न चान्यतरवृत्तित्वस्य मात्रार्थाविशेषितस्योपाधित्वकल्पे साधनाव्यापकत्वासम्भव इति वाच्यम्; तस्यापि तद्घटात्यन्ताभावत्वे साधनाव्यापकत्वसम्भवात्। न चैवं तद्घटसमानाधिकरणतद्घटात्यन्ताभावत्वतद्घटाभावत्वयोस्साध्या—व्यापकत्वमिति वाच्यम्; तयोस्साध्यवत्त्वानिश्चयादिति ध्येयम्। **सन्दिग्धेति।** यत्र व्यभिचारसंशयविरोधी तर्कोऽवतरति, तत्र व्यभिचारसंशयरूपस्वकार्याक्षमत्वात् सन्दिग्धोपाधिर्न दूषणम्। यत्र तु स नावतरति तत्रोक्तस्वकार्यक्षमत्वात् स दूषणमेवेति भावः। **संयोगेत्यादि।** न च समवायेन तद्घटवति वृत्तेर्निवेशान्नायन्दोष इति वाच्यम्, समवायेन घटवत्यपि सयोगेन घटात्यन्ताभावसत्वादित्यस्य प्रकृतग्रन्थार्थत्वात्। समवायेन तद्घटाभावस्य हेतौ निवेशे तु साधनवैकल्यमिति भावः। ननु समवायान्यसम्बन्धानवच्छिन्नप्रतियोगिताकघटात्यन्ताभावत्वं हेतौ निवेश्यं, तथाच नोक्तव्यभिचारो न वा साध-

घटात्यन्ताभावसत्त्वात् साध्याभाववति हेतोर्वृत्तेरित्यलमतिविस्तरेण ॥

इत्यद्वैतसिद्धौ विश्वसत्त्वानुमानभङ्गः.

अथविश्वमिथ्यात्वे विशेषतोऽनुमानानि

मिथ्यात्वे च विशेषतोऽनुमानानि—ब्रह्मज्ञानेतराबाध्य

नवैकल्यं, तत्राह—**साध्याभाववतीति**। समवायावच्छिन्नप्रतियोगिताकघटात्यन्ताभावस्य नित्यत्वात् तद्घटसमानकालीनत्वेन घटात्यन्ताभावत्वं मुक्तसाध्याभाववदिति भावः। ननु तद्घटसमवाय्यवच्छिन्नं यत्तद्घटकालवृत्तित्वं तद्वृत्तित्वाभावस्साध्यः, तथाच समवायेन तद्घटाभावो नोक्तवृत्तित्ववान्, तद्घटसमवाय्यन्यावच्छेदेनैव तस्य तद्वत्त्वादिति न व्यभिचारः, तत्राह—**अलमिति**। मन्मते मिथ्यात्वघटकात्यन्ताभावस्य प्रतियोग्यविरुद्धत्वेन देशकालावच्छिन्नवृत्तिकत्वाभावेन सिद्धसाधनम्। प्रातिभासिकतद्घटात्यन्ताभावमादाय व्यभिचारः। तदन्यत्वेन समानकालीनविशेषणेऽपि बाधव्यभिचारौ, पूर्वोत्तरकालीनात्यन्ताभावयोरेव प्रागभावध्वंसरूपतया स्वीकारसम्भवात्। एकया अत्यन्ताभावव्यक्त्यैव ध्वंसादिबुद्ध्युपपत्तेस्संसर्गाभावव्यक्त्यन्तराकल्पनात्, तद्घटात्यन्ताभावे तद्घटसमानकालीनत्वावश्यकत्वात् उक्तावच्छिन्नत्वानिवेशे बाधाद्यावश्यकत्वात्, तन्निवेशे सिद्धसाधनमिति भावः ॥

तर्कैस्सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
विश्वसत्त्वानुमानानां भञ्जनं ध्वान्तभञ्जनम् ॥

इति विश्वसत्यत्वानुमानभङ्गः.

ब्रह्मज्ञानेत्यादि। ब्रह्मज्ञानान्याबाध्यं[1] यद्ब्रह्मान्यत्तद्वृत्तिरस-

---

[1] ब्रह्मज्ञानेतरबाध्यं.

ब्रह्मान्यासत्वानधिकरणत्वं पारमार्थिकसत्त्वाधिकरणावृत्ति, ब्रह्मा-

त्त्वाभाव इत्यर्थः । **पारमार्थिकसत्त्वेति** । सामान्यानुमानोक्तरीत्या धीविषयत्वादिरूपं पारमार्थिकसत्त्वं बोध्यम् । अतो न सिद्धसाधनादि-पूर्वोक्तदोषः । [1]व्यावहारिकं पारमार्थिकसत्त्वाधिकरणवृत्तित्वमत्र निवेश्यम् । एतेन—"ब्रह्मस्वरूपस्य तस्या[2]धिकरणाप्रसिद्धिः कल्पितस्य तदधिकरणत्वस्य तत्रैव प्रसिद्धावपि शुक्तिरूप्यत्वे साध्याप्रसिद्धिः; तद्वृत्तित्वस्य मिथ्यात्वन्तु न सिद्धम्, येन तत्सत्वेऽपि तदभावसत्वान्ना-प्रसिद्धिः, पारमार्थिकसद्वृत्तित्वेऽपि किञ्चिदवच्छेदेन तदभावसत्त्वमादाय सिद्धसाधनापत्त्या पारमार्थिकसद्वृत्ति यद्यत्तदन्यत्वस्यैव साध्यीकार्यत्वात्, तस्य च शुक्तिरूप्यत्वे ब्रह्मनिष्ठे न प्रसिद्धिः" इत्यादि परास्तम् । अवच्छिन्नब्रह्मनिष्ठेऽपि शुक्तिरूप्यत्वे शुद्धब्रह्मावृत्तित्वानपायाच्च । अवृत्तित्वमात्रं न व्याप्तिग्राहकं, दृष्टान्तावृत्तित्वात् । अतो ब्रह्मावृत्तित्वं हेतूकृतम् । न च ब्रह्मण्यवृत्तित्वसत्त्वात्तत्रैव तस्या व्याप्तिग्राहकत्वं शंक्यम् । आनन्दत्वादिधर्मरूपत्वेन ब्रह्मणोऽपि स्ववृत्तित्वात्तस्य प्रातीतिकत्वात्तदभावोऽपि तस्येति चेन्न; तथापि ब्रह्मणि दृष्टन्ते साध्यवैकल्यापातात्, सद्रूपत्वेन ब्रह्मणः प्रपञ्चवृत्तित्वात् परमते पारमार्थिकसद्वृत्तित्वात् । अत एव साधनवैकल्यमपि, प्रपञ्चवृत्तित्वस्य ब्रह्मनिष्ठस्याद्यापि मिथ्यात्वासिद्धया ब्रह्मण्यवृत्तित्वासिद्धेः । यद्यपि केवलस्यासत्त्वाभावस्य पारमार्थिकसद्वृत्तित्वम्, तथाप्युक्तपक्षतावच्छेदकविशिष्टरूपेण तदभावरूपसाध्यवत्त्वमक्षतम् । अतएव ब्रह्मान्येति सार्थकम् । प्रातीतिकवृत्तित्वविशिष्टस्सन्नसत्त्वाभावः पारमार्थिकावृत्तिरिति परेषां सिद्धम् । अतोऽबाध्यान्तम् । न चैवमपि ब्रह्मज्ञानबाध्यप्रातीतिकवृत्तित्वविशिष्टस्य पारमार्थिकावृत्तित्वेन परेषां सिद्ध इति वाच्यम्; परैः प्रातीतिकमात्रस्य ब्रह्मज्ञानान्यबाध्यत्वाङ्गीकारात्, सर्वं प्रातीतिकं प्रतिपन्नोपाधौ

[1] व्यवहारिकपारमार्थिकरणे वृत्तीति पा. [2] ब्रह्मस्वरूपसत्त्वस्या.

वृत्तित्वात्, शुक्तिरूप्यत्ववत् परमार्थसद्भेदवच्च । विमतं मिथ्या, ब्रह्मान्यत्वात्, शुक्तिरूप्यवत् । परमार्थसत्त्वं स्वसमानाधिक-

---

नास्तीति बाधसम्भवाच्च, यथोक्तपक्षे साध्यस्य परेषामसिद्धत्वात् । **शुक्तिरूप्यत्ववदिति ।** शुक्त्यवच्छिन्नचैतन्यवृत्तेरपि शुक्तिरूप्यत्वस्य शुद्धब्रह्मावृत्तित्वमिति भावः । यद्युपहितवृत्तेश्शुद्धवृत्तित्वनियमः, तथापि न क्षतिरित्याशयेनाह—**परमार्थसद्भेदवदिति ।** न च परमार्थसद्भेदोऽपि ब्रह्मवृत्तिः, अन्यथा परमार्थसत्त्वस्य ब्रह्मस्वरूपस्य स्वधर्मत्वानुपपत्तेरिति साधनवैकल्यमिति वाच्यम् ; तत्र ब्रह्मवृत्तित्वस्य प्रातीतिकत्वेन तदभावस्य पररीत्यापि सम्भवात्, दृष्टान्तस्य परमार्थसत्त्वावच्छिन्नप्रतियोगिताकभेदस्य ब्रह्मण्यभावाच्च, तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदादिनैव धर्मतानिर्वाहात् व्यावहारिकस्य परमार्थावृत्तेर्वा भेदस्य दृष्टान्तत्वे निर्दोषत्वाच्च । अतएव भेदस्य विभागवत् प्रतियोगिवृत्तित्वेऽपि न क्षतिः । वस्तुतस्तु परमार्थसत्प्रतियोगिकत्वविशिष्टस्य दृष्टान्तत्वात्तादृशस्य ब्रह्मणि सत्त्वे मानाभावान्न साधनवैकल्यम् । अतएव च न साध्यवैकल्यम् । अतएव च शुक्तिरूप्याद्युपहितवृत्तित्वेऽपि नोक्तभेदस्य शुद्धब्रह्मवृत्तित्वशङ्का, तदतिरिक्तस्थल एव तथा नियमस्वीकारात् । अतएव महाकालान्यत्वविशिष्टघटादेः महाकालावृत्तित्वं पराभ्युपगतम् । **मिथ्या** । सद्विलक्षणम् । तेनासद्व्यावृत्तमिथ्यात्वस्यासम्भवेऽपि [1] नासति व्यभिचारः । **ब्रह्मान्यत्वादिति ।** उक्तरीत्या ब्रह्मणि व्यभिचारादिकं परिहार्यम् । **स्वसमानाधिकरणान्योन्येत्यादि ।** अन्योन्याभावो व्यावहारिकः प्रतियोग्यवृत्तिर्वा ग्राह्यः, तेन ब्रह्मनिष्ठं ब्रह्मभेदं प्रातीतिकमादाय न दोषः । स्वसमानाधिकरणतादृशभेदप्रतियोगिवृत्ति यद्यत्तावदन्यत्वकूटं साध्यम् । अथवा स्वप्रतियोगिवृत्तित्वं स्वसामानाधिकरण्यं

---

[1] त्वस्यासत्यभावेपि. (त्वस्याभावेपि पा.)

रणान्योन्याभावप्रतियोग्यवृत्ति; सदितरावृत्तित्वात्, ब्रह्मत्ववत्। ब्रह्मत्वमेकत्वं वा सत्त्वव्यापकम्, सत्त्वसमानाधिकरणत्वात्, असद्वैलक्षण्यवत्। व्याप्यवृत्तिघटादिः जन्याभावातिरिक्तसमानाधिकरणाभावमात्रप्रतियोगी, अभावप्रतियोगित्वात्,

---

चेत्युभयसम्बन्धेन उक्तभेदविशिष्टं यत्तदन्यत्वं साध्यम्। तेन स्वपदार्थस्य पक्षदृष्टान्तसाधारणस्यैकस्याभावेऽपि न क्षतिः। **सदितरेति**। परमार्थसदन्येत्यर्थः। **सत्त्वव्यापकमिति**। अबाध्यनिष्ठभेदप्रतियोगितानवच्छेदकमित्यर्थः। **एकत्वं**। यत्किञ्चिदेकत्वम् न सत्त्वव्यापकम् नानावस्तुषु सत्त्वस्वीकारात्। यद्वा पञ्चमप्रकाराविद्यानिवृत्तिपक्षे तस्या ब्रह्मान्यत्वादेकत्वमविनाशित्वादिरूपं पक्षीकृतमिति ध्येयम्। सयोगादिवदव्याप्यवृत्तित्वेनार्थान्तरं स्यादतो—**व्याप्यवृत्तिरिति**। दैशिकसम्बन्धावच्छिन्ना वृत्तिः किञ्चिदवच्छिन्ना यस्य तदन्य इत्यर्थः। घटगोत्वादेः कालिकसम्बन्धावच्छिन्नवृत्तेः कपालाद्यवच्छिन्नत्वादवच्छिन्नान्तम्। समवायेन घटादेरव्याप्यवृत्तित्वे त्वाह—**आदिरिति**। गोत्वादीत्यर्थः। घटादौ तु अवच्छिन्नवृत्तिकान्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वमेव शुक्तिरूप्यादिदृष्टान्तेन साधनीयमिति भावः। भेदप्रतियोगित्वमादाय सिद्धसाधनं स्यादतो। **मात्रेति**। अजन्यसमानाधिकरणान्यस्याप्रतियोगीति पर्यवसितं साध्यम्। कपालादिनाशनाश्यघटादौ समानाधिकरणान्यध्वंसप्रतियोगित्वेन बाधात्—**अजन्येति**। अन्यान्तविशेषणम्। **अभावप्रतियोगित्वादिति**। न चाभावेति व्यर्थमिति वाच्यम्; अभावसंयोगादिप्रतियोगितासु सम्बन्धावच्छिन्नत्वादितदभावाभ्यां विलक्षणासु प्रातियोगितात्वस्यैकस्याभावेनाभावीयप्रतियोगितागतरूपेण हेतुतालाभाय तदुपादानात्। अन्यथा सयोगादिप्रतियोगितारूपेण हेतुत्वे गुणादौ भागासिद्धेः। तासु तस्यैकस्य स्वीकारे तु प्रतियोगितासम्बन्धेन

अभिधेयत्ववत् । अभिधेयत्वं हि परमते केवलान्वयित्वादन्योन्याभावमात्रप्रतियोगी । स च समानाधिकरण एव । अस्मन्मते तु मिथ्यैवेति नोभयथापि साध्यवैकल्यम् । अत्यन्ताभावः प्रतियोग्यवच्छिन्नवृत्तिः,

---

अभावो[1] हेतुर्बोध्यः । **मते त्विति** । अभिधेयत्वमित्यनुषज्यते । **मिथ्यैवेति** । स्वसमानाधिकरणात्यन्ताभावप्रतियोग्यपीत्यर्थः । अत्र अजन्यो य स्स्वसमानाधिकरणान्याभावस्तत्प्रतियोगी, स्वमते खपुष्पवत्, तथापि परप्रसिद्धस्य खपुष्पस्येव भेद स्साधयितुं शक्यत एव । अथवा अजन्याभावसामान्यस्य स्वसामानाधिकरण्यं प्रतियोगित्वं चेत्युभयसम्बन्धेनाभावस्साध्यः । स्वसामानाधिकरण्यपदार्थस्स्वाधिकरणसंयुक्तत्वाभावादिः[2] गुणादौ प्रसिद्धो निवेश्य । तेन सामानाधिकरण्यसामान्याभावाप्रसिद्धावपि न दोषः । तथाच घटादौ पक्षे संयुक्तत्वाभावघटितेन, गुणादौ पक्षे समवेतत्वाभावादिघटितेन उभयसम्बन्धेनाभावसामान्याभावस्साध्य इति ध्ययेम् । **प्रतियोग्यवच्छिन्नवृत्तिरिति** । प्रतियोगी अवच्छिन्नो येन तत्प्रतियोग्यवच्छिन्नं, तेन तदवच्छिन्ना वृत्तिर्यस्य स इत्यर्थः । गोत्वादेरपि कालवृत्तित्वे गवादिदेशस्यावच्छेदकत्वात् न गोत्वाद्यवच्छेदकावच्छिन्नवृत्तिकत्वाप्रसिद्धिः । अथवा अवच्छिन्नवृत्तिकान्यत्वं साध्यम्; परमते गोत्वाद्यभावस्य का[3]लवृत्तित्वे गवादिभिन्नदेशस्यावच्छेदकत्वात् न तत्र सिद्धसाधनम् । ननु—"पूर्वकल्पो न युक्तः; त्वन्मतेऽत्यन्ताभावस्यावच्छिन्नवृत्तिकत्वस्यायुक्तत्वात् । द्वितीयकल्पोऽपि न युक्तः, कालिकसम्बन्धेन गोत्वाद्यभावस्य विशेषणतया कालवृत्तित्वस्य गवादिभिन्नावच्छिन्नत्वेन तत्र सिद्धसाधनाभावेऽपि समवायादिना गोत्वाद्यभावे सिद्धसाधनात्" इति चेन्न; कालत्रये कुत्रापि दृश्यं नास्तीत्यनुभवेन अत्यन्ताभावस्यावच्छिन्नवृत्तिस्वीकारेणाऽऽद्य-

---

[1] अभावे. [2] भावादिति. [3] भाववृत्तित्वे.

नित्याभावत्वात्, अन्योन्याभाववत् । अत्यन्ताभावत्वं –

दोषाभावात्, गवि तन्नाशकाले गोत्वं समवायेन नास्तीत्याद्यनुभवेन परमते समवायाद्यवच्छिन्नगोत्वाद्यभावस्याप्यवच्छिन्नवृत्तिकत्वेन द्वितीयदोषस्याप्यभावात् । अतएव ज्ञायमानसामान्यस्य प्रत्यक्षकारणत्वे भाविघटादौ घटत्वाद्यभावात् व्यभिचारेण सामान्यज्ञानस्य कारणत्वं दीधित्यादावुक्तम् । अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेन कुत्रचिदत्यन्ताभावे सिद्धसाध्यकत्वस्यादोषत्वाच्च । एवंच पूर्वकल्पेऽत्यन्ताभावे प्रतियोग्यवच्छेदकावच्छिन्नत्वस्य द्वितीयकल्पेऽनवच्छिन्नत्वस्य [1] च [2]साधर्म्यमव्याहतं, प्रतियोग्यवच्छेदकावच्छेदेनाभावस्याग्रहणात् प्रतियोग्यवच्छेदकावच्छिन्नत्वभ्रमः परेषामिति दिक् । **नित्याभावत्वादिति ।** सदातनाभावत्वादित्यर्थः । ध्वंसादौ व्यभिचारात्सदातनेति । अविद्यादेः पूर्णानन्दाद्यभावत्वात् पूर्णानन्दरूपप्रतियोग्यवच्छेदकाप्रसिद्ध्या व्यभिचारः । न च तत्त्वज्ञानोत्तरकालस्यैव तदवच्छेदकत्वेन कल्पितत्त्वान्नाप्रसिद्धिरिति वाच्यम्; तथाप्यविद्यादौ तत्कालावच्छिन्नत्वस्याभावात् तत्पूर्वकालावच्छिन्नत्वाच्च कल्पद्वयेपि व्यभिचारात्—अतोऽभावेति । भावविलक्षणेत्यर्थः । **अन्योन्याभाववदिति ।** आद्यसाध्ये गोत्वादिभेदस्य गोत्वाद्यवच्छेदकगवाद्यवच्छिन्नत्वात् गोत्वादितद्भेदयोः कालवृत्तित्वे गवादेरवच्छेदकत्वात् न साध्यवैकल्यम् । । द्वितीयसाध्ये तु तस्य किञ्चिदवच्छिन्नदैशिकवृत्तिकान्यत्वरूपस्य विवक्षितत्वे भेदमात्रं दृष्टान्तः । दैशिकेत्यस्यानिवेशे तु वाच्यत्वादिकं । तस्य कालिकवृत्तेरप्यनवच्छिन्नत्वात् । न चोक्तरीत्या घटादौ तन्नाशकालावच्छेदेन तद्भेदोऽपीति साध्यवैकल्यमिति वाच्यम्; भेदमात्रस्य व्याप्यवृत्तित्वमते तदभावात् मतान्तरे [3] सन्(त्)पदार्थभेदस्यदृष्टान्तत्वसम्भवाच्च ।

---

[1] नवच्छिन्नवृत्तिकत्वस्य. [2] साधनम्. [3] सनपदार्थभेदस्यामादृष्टान्तत्व.

प्रतियोग्यशेषाधिकरणवृत्तिमात्रवृत्ति, प्रतियोग्यवच्छिन्नवृत्तिमात्रवृत्तिवा, नित्याभावमात्रवृत्तित्वात्, अन्योन्याभावत्ववत् । घटात्यन्ताभाववत्त्वं प्रतियोगिजनकाभावसमानाधिकरणवृत्ति, एत-

---

आद्यसाध्यं स्वनिष्ठप्रतियोगितानिरूपकत्वस्वावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन विषयवत्वं[1] पर्यवसितं बोध्यम् । तेन किञ्चित्प्रतियोगिनिवेशे सिद्धसाधनादि, स्वप्रतियोगिनिवेशे पक्षदृष्टान्तसाधारणस्य स्वत्वस्याभावेन तदन्यतरनिवेशे साध्यवैकल्यबाधावित्यादिकं न दोषः । **प्रतियोग्यशेषेति** । अशेषप्रतियोगीत्यर्थः । पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्याभावरूपो यः प्रतियोगी तदधिकरणवृत्तिस्सर्वोप्यत्यन्ताभावस्तन्मात्रवृत्तित्वं पक्षे सिद्धम् । अतोऽशेषेति । तथाच स्वप्रतियोग्यधिकरणताव्यापकाधिकरणतानिरूपकं यद्यत्तद्भेदकूटवदवृत्तित्वं साध्यम् । स्वप्रतियोगिकत्वं स्वासामानाधिकरण्यं चेत्युभयसम्बन्धेन विषयविशिष्टं यत्तदवृत्तित्वं स्वावच्छेदकविशिष्टवदवृत्तित्वं स्वनिरूपकं चेत्युभयसम्बन्धेन प्रतियोगिताविशिष्टं यत्तदवृत्तित्वं वा पर्यवसितम् । तादृशविषयविशिष्टं च सर्वावयवनाशजन्यो घटादिनाशः । **प्रतियोग्यवच्छिन्नेत्यादि** । स्वप्रतियोग्यवच्छेदकावच्छिन्नभिन्नावृत्ति अवच्छिन्नवृत्तिकावृत्तीति वा र्थः । दृष्टान्त उक्तरीत्या बोध्यः, शेषं पूर्ववत् । **प्रतियोगिजनकेति** । स्वप्रतियोगिजनकेत्यर्थः । स्वसमानाधिकरणपदार्थोऽत्यन्ताभावस्तत्प्रतियोगिजनकाभावश्च तद्घटप्रागभावः । तत्सामानाधिकरण्यं चानवच्छिन्नं निवेश्यम् । तेन तादृशाभावकालेन तद्घटध्वंसकालेन वा अवच्छिन्नं तत्सामानाधिकरण्यं तद्घटात्यन्ताभावनिष्ठमादाय न सिद्धसाधनादि । तत्कपालनाशजन्यतद्घटध्वंसत्वे व्यभिचारात् कालीनान्तम् । कपालनाशनाश्यघट[2] व्यक्तिनिवेशे तु तन्नोपादेयम् । अनादिप्रतियो-

---

[1] विषयकत्वं. [2] घटवृत्ति.

त्कपालसमानकालीनैतद्घटप्रतियोगिकाभाववृत्तित्वात्, प्रमेयत्ववत्। एतत्कपालमेतद्घटात्यन्ताभावाधिकरणम्, आधारत्वात्, पटादिवत्। ब्रह्मत्वं, न परमार्थसन्निष्ठान्योन्याभावप्रतियोगि-

---

गिकाभावत्वादौ व्यभिचारात् **एतद्घटप्रतियोगिकेति**। तद्घटसंयोगत्वादौ व्यभिचारादभावेति। वस्तुतस्तु—एतद्घटेति। एतत्कपालनाशनाश्यघटेत्यर्थः, एवंच तत्सामानाधिकरण्ये अनवच्छिन्नत्वं विशेषणम् तद्घटप्रागभावकालावच्छिन्नं तत्समानाधिकरण्यमादाय सिद्धसाधनवारणाय। तद्घटध्वंसत्वे व्यभिचारात् कालीनान्तम्। येन तद्घटसमवायिनि तद्घटात्यन्ताभावो न स्वीक्रियते तं प्रत्यनवच्छिन्नत्वं न देयम्। ननु स्वप्रतियोगिसमानाधिकरणवृत्तित्वसाधनेऽपीष्टसिद्धौ किमिति जनकाभावनिवेश इति चेत्। अयं भावः—तद्बीजं घटाद्युत्पत्तेः पूर्वं तत्समवायिनि प्रतीयमानतदभावस्य परेणापि स्वीकारात् तस्य चात्यन्ताभावान्यत्वे तद्देशकालावच्छिन्नवृत्तिकत्वे च मानाभावात् गौरवाच्च। प्रतियोगिकाले तत्सत्त्वेपि औपनिषददर्शनापरिशीलिनं पुरुषं प्रत्यावृतत्वस्वीकारादेवाप्रकाशोपपत्तेः। प्रतियोगिजनकत्वेन पराङ्गीकृतोऽभावोऽत्यन्ताभाव एव। अन्यथा तस्य विनाशित्वे गौरवात्। न चैवं प्रतियोगिमति तत्कालावच्छेदेन तदत्यन्ताभाव इति धीः गवादौ गोत्वाद्यभाव इति धीश्च प्रमात्वेन व्यवह्रियेतेति वाच्यम्; अत्यन्ताभावे हि अवच्छिन्नत्वानङ्गीकारादेव आद्या, आवृतत्वाङ्गीकारादेव द्वितीया धीर्न प्रमात्वेन व्यवह्रियते। त्वयापि गवादौ तन्नाशादिकाले गोत्वाद्यभावोऽङ्गीक्रियत इत्युक्तम्। विवृतमधिकमेतत्सूत्रमुक्तावलौ नः। **अधिकरणमिति**। अनवच्छिन्नाधिकरणतावदित्यर्थः। तेन तद्घटानवच्छेदकावच्छिन्नतदत्यन्ताभाववत्त्वमादाय न सिद्धसाधनम्। **न परमार्थसदिति**। मिथ्यातुच्छविलक्षणवृत्तिभेदप्रतियोगितानवच्छेदकत्वं साध्यम्। तेनाबाध्यनिष्ठभेदघटितात् सत्त्वव्यापकमिति पूर्वसाध्याद्भेदः।

तावच्छेदकम्, ब्रह्मवृत्तित्वात्, असद्वैलक्षण्यवत्। परमार्थसत्प्रतियोगिको भेदो न परमार्थसन्निष्ठः, परमार्थसत्प्रतियोगिकत्वात्,

---

हेत्वन्तरेण पूर्वसाधितसाधनेऽपि न क्षतिरिति तदेव वा साध्यम्। **भेद इति**। स्वप्रतियोग्यवृत्तिरित्यादिः। तेन परमार्थतदन्योभयभेदादौ[1] न बाधः। न च तत्रापि मिथ्याभूतत्वात् परमार्थनिष्ठत्वं नास्तीति व्यर्थमुक्तविशेषणमिति वाच्यम्; तथापि ब्रह्माभिन्ने परमार्थत्वनिषेधस्य प्रकृतानुमानफलस्यानुरोधेन तदावश्यकत्वादन्यथा परमार्थनिष्ठत्वमात्रमिथ्यात्वेनैव ब्रह्मवृत्तिभेदे साध्यस्योपपाद्यतया प्रपञ्चवृत्तिभेदेऽपि तेनैव उक्तसाध्योपपत्त्या उक्तफलसिद्धेरुक्तविशेषणे दत्ते तु विनिगमकाभावाद्विशेषणीभूतस्य परमार्थत्वस्य प्रपञ्चेऽभावमादायापि साध्यं पर्यवस्यतीतिध्येयम्। **प्रतियोगिकत्वादिति**। न च परमते संयोगादौ घटत्वाभावादौ च व्यभिचार इति वाच्यम्; तस्य पक्षसमत्वात्परमार्थसन्निष्ठत्वेन हेतुना तत्र परमार्थप्रतियोगिकत्वाभावानुमानस्य वक्ष्यमाणतया हेत्वभावाच्च। अथैवं सप्रतियोगिकत्वस्यैव साधकत्वसम्भवेन परमार्थसदिति व्यर्थमिति चेन्न; तदभावे हि संयोगादेरभावस्य प्रतियोगितासु प्रतियोगितात्वरूपानुगतधर्माभावेन संयोगादिप्रतियोगिताया निवेशे संयोगादेरेव पक्षीकार्यतया तत्र साध्यसिद्धेः परमार्थ[2]निष्ठत्वमिथ्यात्वेनापि सम्भवात् ब्रह्मान्यस्यापरमार्थत्वालाभ स्यात्। सति च तस्मिन् विशेषणे सप्रतियोगिकत्वमभावनिष्ठमेव लभ्यते। मन्मते ह्यभाव एव परमार्थसत्प्रतियोगिकः, संयोगादेः ब्रह्मण्यनङ्गीकारात्तादात्म्यमपि तादृशं यद्यपि; तथाप्यभावीयप्रतियोगिताविशेषो निरूपकतासम्बन्धेन हेतुस्तद्विशेषणाल्लभ्यत इति न दोषः। यद्यपि परमार्थत्वावच्छिन्नप्रतियोगितायास्तत्वेन हेतुत्वे सिद्धसाधनम्, ब्रह्मत्वावच्छिन्नप्रतियोगितायाः

---

[1] तेन्योभयभेदाभेदौ. [2] न परमार्थ.

परमार्थसत्त्वावच्छिन्नप्रतियोगिकाभाववत् । **भेदत्वावच्छिन्नं, सद्विलक्षणप्रतियोग्यधिकरणान्यतरवत्, अभावत्वाच्छुक्तिरूप्यप्रतियोगिकाभाववत्। परमार्थसन्निष्ठो भेदो न परमार्थसत्प्रतियोगिकः, परमार्थसदधिकरणत्वात्, शुक्तिरूप्यप्रतियोगिकभेदवत्। मिथ्यात्वं ब्रह्मतुच्छोभयातिरिक्तत्वव्यापकम्, सकलमिथ्यावृत्ति-**

स्तत्त्वेन हेतुत्वे तु साधनवैकल्यम्; तथापि तयोरन्यतरत्वेन तद्बोध्यम्। यदि तु प्रतियोगितापदार्थमात्रेऽनुगतं प्रतियोगितात्वं स्वीक्रियते, तदा सप्रतियोगिकत्वस्यैव हेतुत्वे तात्पर्यम्। **परमार्थसत्त्वावच्छिन्नप्रतियोगिकाभाववदिति** । तादृशाभावश्च भेद एव, परमते परमार्थसत्त्वस्य मेयत्वादिवदत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् अलीकेऽपिवृत्तिविषयत्वरूपस्य परमार्थस्य सत्त्वात्, मन्मतेऽपि मिथ्यात्वग्राहकमानेन वियत्वादे[1]रत्यन्ताभावप्रतियोगितावच्छेदकत्वसिद्धावपि मानाभावेन तस्य तदसिद्धेर्गुरुत्वाच्च तत्तद्धीव्यक्त्यपेक्षयेति ध्येयम्। **सद्विलक्षणेति** । सद्विलक्षणं यत् स्वप्रतियोगिस्वाधिकरणयोरन्यतरत् तत्सम्बन्धित्वं साध्यम्। सद्विलक्षण [2]वृत्तिप्रतियोगितानिरूपकत्वं सद्विलक्षणवृत्त्यधिकरणतानिरूपकं चेत्येतयोरन्यतरत्वं पर्यवसितम् तेन स्वपदार्थाननुगमेऽपि न स्वरूपासिद्ध्यादि। **न परमार्थसत्प्रतियोगिक इति** । संयोगादेः पूर्ववत्पक्षसमत्वान्न व्यभिचारः। **परमार्थसदधिकरणकत्वादिति** । साधिकरणकत्वस्य हेतुत्वे तात्पर्यम्। यदि तु सर्वास्वधिकरणतासु अधिकरणतात्वन्नास्ति, तदा उक्तरीत्या अन्यतमत्वेनैव निरूपकतासम्बन्धेन हेतुता बोध्या। तच्च तावदधिकरणतामात्रविषयकतद्धीविषयत्वं तावदधिकरणताभिन्नभिन्नत्वेन हेतुत्वे तु दृष्टान्तीयाधिकरणताव्यक्तीतरांशवैयर्थ्यम्। **सकलमिथ्यावृत्तित्वादिति** । स्वविशिष्टव्याप्यमिथ्यात्वकत्वात् स्वावच्छिन्नाभाववद्वृत्तिमिथ्यात्वकं यद्यत्तद्भेदकूटवत्त्वादिति यावत्।

---

[1] विषयत्वाभावादेः. [2] तद्विलक्षण.

त्वात्, मिथ्यात्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वाद्वा; दृश्यत्ववत्। दृश्यत्वं परमार्थसदवृत्ति, अभिधेयमात्रवृत्तित्वात्,

मिथ्यात्वं मिथ्यात्वत्वम्। **व्यापकं** व्यापकतावच्छेदकम्। तेन मेयत्वादिरूपेण व्यापकत्वमादाय न सिद्धसाधनम्। **अत्यन्ताभावाप्रतियोगित्वादिति**। तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वे तात्पर्यम्। नचात्यन्ताभावप्रतियोगितानवछेदकत्वस्यैव साधकत्वसम्भवेनान्यवैयर्थ्यमिति वाच्यम्; साधनवैकल्यापत्तेः। न च मेयत्वं ब्रह्मत्वं वा दृष्टान्तोस्त्विति वाच्यम्; मन्मते मेयत्वस्यापि तदभावात् ब्रह्मत्वस्यापि परमते घटादिनिष्ठोक्तात्यन्ताभावप्रतियोगितावच्छेदकत्वात्। स्वरूपसम्बन्धावच्छिन्नाहि प्रतियोगिता हेतौ साध्ये च निवेश्या। अन्यथा स्वरूपासिद्धिबाधयोरापत्तेः। यदि तु ब्रह्मत्वेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगितायामपि मानाभावात् परमतेऽपि न ब्रह्मत्वमवच्छेदकं तदाऽस्तु तदेव हेतुः। न च स्वरूपासिद्धिः; मिथ्यात्वत्वस्य तत्तद्धीविषयत्वापेक्षया गुरुत्वेन उक्तावच्छेदकत्वाभावात्। न चैवं प्रपञ्चे मिथ्यात्वस्याभावेप्युक्तसाध्योपपत्तिरिति वाच्यम्। उक्तोभयान्यवृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकं यद्विशिष्टव्यापकतावच्छेदकं तदन्यत्वस्य साध्यत्वात्। प्रपञ्चे मिथ्यात्वाभावे च मिथ्यात्वत्वसमनियतलघुधर्मस्यावच्छेदकत्वात्तस्य च मिथ्यात्वव्यापकतावच्छेदकत्वेन मिथ्यात्वत्वे साध्यानुपपत्तेरिति ध्येयम्। **दृश्यत्वं परमार्थसदवृत्तीति**। दृश्यत्वं दृक्प्रतियोगिकत्वविशिष्टं व्यावहारिकं तादात्म्यम्। प्रपञ्चनिष्ठस्य ब्रह्मतादात्म्यस्य ब्रह्मण्यपि सत्त्वात् बाधः। अत आद्यम्। ब्रह्मणि ब्रह्मणः प्रातीतिकतादात्म्ये बाधादन्त्यं विशेषणम्। न च तयोर्ब्रह्मवृत्तित्वम्मिथ्येति साध्यसत्त्वान्न बाध इति वाच्यम्; तथाप्यनुमानफलस्य ब्रह्मान्यसर्वमिथ्यात्वसिद्धेस्तद्विशेषणफलत्वात् तदभावे परमार्थवृत्तित्वमिथ्यात्वेनैव साध्यसिद्धयोक्तफलालाभात् स्वरूपासिद्धेश्च। **अभिधेयमात्रवृत्तित्वात्**। अवाच्यावृत्तित्वात्

शुक्तिरूप्यत्ववत् । दृश्यत्वं परमार्थसद्भिन्नत्वव्याप्यम्, दृश्येतरावृत्तिधर्मत्वात्, प्रातिभासिकत्ववत् । उभयसिद्धमसद्विलक्षणं मिथ्यात्वासमानाधिकरणधर्मानधिकरणम्, आधारत्वात्, शुक्तिरूप्यवत् । प्रतियोग्यवच्छिन्नो देशः, अत्यन्ताभावाश्रयः, आधा-

---

[1]ब्रह्मावृत्तित्वादिति यावत् । पक्षभेदादाद्यानुमानाद्भेदः, ब्रह्मान्यवृत्तित्वविशिष्टत्वं वा हेतुः, रूप्यादिपदानां प्रत्येकाभिधेयवृत्तित्वानां तत्त्वेन हेतुत्वे वा तात्पर्यम् । एतेन शब्दार्थभेदाच्छक्तिरूपाभिधाया भेदात् सर्वाभिधेयसङ्ग्रहाभाव इत्यादि परास्तम् । **धर्मत्वादिति** । परमते गगनाद्यवृत्तिपदार्थे साध्यसामानाधिकरण्यघटितव्याप्यभावाद्धर्मेति । तदघटितव्याप्तेस्साध्यत्वे तु तन्नदेयम् । शुक्तिरूप्यादावंशतस्सिद्धसाधनात् **उभयसिद्धमिति** । उभयवादिसिद्धमित्यर्थः । उभयसिद्धं यदसत्तद्भिन्नत्वेन पक्षत्वेऽपि स दोषो ब्रह्मणि बाधश्च, अबाध्यत्वादिधर्मसत्त्वात् । अतस्तन्न कृतम् । तथाचासद्भिन्नत्वेनोभयसिद्धं पक्षः, शुद्धं ब्रह्म न परसिद्धमिति न दोषः । इत्थं च **आधारत्वात्** इत्यस्य ब्रह्मप्रतियोगिकतादात्म्यानुयोगित्वादित्यर्थः । वस्तुतस्तु अबाध्यत्वादेर्ब्रह्मस्वरूपत्वात् धर्ममात्रस्याभावो ब्रह्मण्यस्तीति हेतुर्यथाश्रुत एव, पक्षसमत्वेन ब्रह्मणि व्यभिचाराप्रसक्तेः । उक्तोभयसिद्धत्वं च सर्वदेशकालवृत्त्यत्यन्ताभावाप्रतियोगिकत्वेन उभयप्रमितत्वादि[2]रूपं यद्यप्यप्रसिद्धम्; ब्रह्मणः पराप्रमितत्वात्, प्रपञ्चस्यापि तथा मदप्रमितत्वात्[3] शुक्तिरूप्यादेरुभाभ्यां तथा प्रमितत्वाभावात्, तथापि ब्रह्मप्रातीतिकतुच्छेभ्यो भिन्नत्वादिरूपं तद्ग्राह्यम् । यदि तु ब्रह्मणः पक्षसमत्वात् परमतेपि साध्याभाववत्त्वेनानिश्चय इत्यालोच्यते तदा ब्रह्मेति न देयम् । **प्रतियोग्यवच्छिन्न इति** । घटादिः घटत्वाद्यभावस्यानवच्छिन्नाधिकर-

---

[1] ब्रह्मावृ. [2] संमतत्वादि. [3] परप्रमितत्वात्.

रत्वात्, कालवत् । आत्मत्वावच्छिन्नम्, परमार्थसत्त्वाधिकरण-प्रतियोगिकभेदत्वावच्छिन्नरहितम्, परमार्थसत्त्वात्, परमार्थसत्त्वा-वच्छिन्नवत् । परमार्थसति परमार्थसद्भेदाङ्गीकारवादिमतेऽपि सद्भेदो न परमार्थसत्त्ववन्निष्ठः, किन्तु घटत्वाद्यवच्छिन्ननिष्ठ

णतावानित्यर्थः । तेन घटादेः स्वनाशकालाद्यवच्छेदेन घटत्वाद्यभाव-वत्त्वेऽपि न सिद्धसाधनम् । समवायादिसम्बन्धेन घटत्वादेरत्यन्ता-भावस्य दैशिकविशेषणतया अधिकरणत्वं साध्यम् । **कालवदिति** । घटादिभिन्नकालवदित्यर्थः । **किन्तु घटत्वावच्छिन्नेति** । न च पर-मार्थस[1]द्भेदो नेत्यादिप्रतीतेः परमार्थसत्त्वोपहिते तद्भेदविषयकत्वान्नेदं युक्तमिति वाच्यम्; तस्य घटत्वाद्युपहितप्रतियोगिकभेदावगाहित्वेऽपि परमार्थत्वोपहितप्रतियोगिकभेदाविषयकत्वात् । न च परमार्थसत्त्वोप-हितनिष्ठां घटत्वाद्यवच्छिन्नां प्रतियोगितां विषयीकुर्वन्त्या परमार्थसत्त-त्त्वोपहितं नेति प्रतीत्या तदवगाहनमावश्यकमिति वाच्यम्; तादृश-प्रतीतेस्तार्किकसम्प्रदाया[2]सम्मतत्वात् । प्रतियोग्यंशे प्रकारतावच्छेदकता-पर्याप्त्यधिकरणमेव हि प्रतियोगितावच्छेदकतया भातीति तत्सम्मतम् । अतएव पर्वतवृत्तिधूमवन्निष्ठाभावप्रतियोगितावच्छेदकं न वह्नित्वमिति धीः पर्वतवृत्तित्वाविशेषितधर्मावच्छिन्नप्रतियोगिताकं भेदं नावगाहत इति व्यभिचारधीकालेपि तादृशधीसम्भवेन तस्या अनुमितिहेतुत्वं खण्डयन्ति । अथवा आत्मत्वम्, परमार्थप्रतियोगिकभेदकूटान्तर्गतया कयापि व्यक्त्या न व्याप्यम्, परमार्थवृत्तित्वात्, परमार्थत्ववदित्यत्र तात्पर्यम् । परमार्थत्वे परमार्थप्रतियोगिकभेदत्वावच्छिन्नव्याप्यतासत्त्वेपि तत्तद्भेदव्यक्तित्वावच्छिन्नं प्रति व्याप्यता नास्ति, स्वप्रतियोगिनि परमार्थे तस्याभावादिति । परमार्थभेदवृत्त्युभयावृत्तिधर्मावच्छिन्नं प्रति या व्याप्यता तदभावरूपसाध्यं तत्रास्त्येव । आत्मान्यपरमार्थस्वीकारे च

[1] सिद्धघ. [2] सम्मतत्वात्.

एव । शुक्तिरूप्यम्, मिथ्यात्वेन प्रपञ्चान्न भिद्यते, व्यवहारविषयत्वात्, ब्रह्मवत् । साध्यसत्त्वमत्र त्रेधा—स्वस्यामिथ्यात्वेनोभयोर्मिथ्यात्वेनोभयोरमिथ्यात्वेन वा । तत्रान्तिमपक्षस्यासम्भवात्पक्षे साध्यसिद्धिपर्यवसानं मध्यमपक्षेण । दृष्टान्ते तु

तद्भेदव्यक्तिव्याप्यमतत्त्वमिति[1] तत्र तत्त्वाभावसाधनं परस्यानिष्टमिति ध्येयम् । **मिथ्यात्वेन प्रपञ्चान्न भिद्यत इति ।** मिथ्यात्वहेतुकप्रपञ्चभेदवत्त्वस्य अभाववदित्यर्थः । उक्तभेदवत्त्वंच स्वविशेष्यिका या प्रपञ्चभेदव्याप्यमिथ्यात्वप्रमा तज्जन्यानुमितिविषयो यः प्रपञ्चभेदस्तद्वत्त्वम् । तद्धेतुकत्वस्य तत्प्रमाघटितत्वावश्यकत्वात् । न हि भवति निर्धूमो धूमेन वन्हिमानिति । यत्रोक्तभेदवत्त्वं स्थाप्यं स स्वपदार्थः । तथाच मिथ्यात्वव्यापकं यन्मिथ्यात्वसमानाधिकरणं तत्त्वेन रूपेण प्रपञ्चभेदस्याभावः पर्यवसितसाध्यम् । स्वमते उक्तरूपविशिष्टस्य प्रपञ्चभेदस्याप्रसिद्धावपि घटत्वेन पटस्येव उक्तरूपेण प्रपञ्चभेदस्याभावो नाप्रसिद्धः । व्यवहारेत्याविवक्षितम् । **स्वस्येति** । यत्र साध्यं स्थाप्यं तस्येत्यर्थः । **उभयोरिति** । स्वस्य प्रपञ्चस्य चेत्यर्थः । **अन्तिमपक्षस्येति** । आद्यपक्षासम्भवेनेत्यादिः । तेनाद्यपक्षासम्भवानुक्तया न न्यूनता । परमतेऽपि पक्षे मिथ्यात्वस्वीकारात् तत्राद्यान्त्यपक्षयोरसम्भवः । तयोरसम्भवे तु प्रपञ्चाभिन्नेऽपि पक्षे मिथ्यात्वरूपविशेषणाभावात् उक्तविशिष्टरूपेण प्रपञ्चभेदाभावसम्भव इति भावः । **मध्यमेति** । मिथ्यात्वसमानाधिकरणप्रपञ्चभेदाश्रयेऽपि पक्षे उक्तविशिष्टरूपेण न तादृशभेदः । मिथ्यात्वव्यापकत्वरूपविशेषणस्य तदभावात्[2], प्रपञ्चस्सत्यः[3] पक्षो मिथ्येति स्वीकारे तूक्तविशिष्टरूपेण पक्षे प्रपञ्चभेदस्य सत्त्वान्न साध्यपर्यवसानम् । अतएव स्वस्य मिथ्यात्वं प्रपञ्चस्य सत्यत्वमिति पक्षः साध्य[4]-

---

[1] मात्मत्वमिति [2] तत्राभावात्. [3] सत्यः तथाच सिद्धसाधनम्. इत्यधिकः पाठः. [4] साध्यपर्यवसितमिथ्यात्वं प्रपञ्चस्य सत्त्वे च पर्यवसानात्. इत्यधिकपाठः.

प्रथमपक्षेणेति विवेकः। विमतं मिथ्या, मोक्षहेतुज्ञानाविषयत्वे सत्यसदन्यत्वात्, शुक्तिरूप्यवत्। मोक्षहेतुज्ञानविषयत्वम् परमार्थसत्त्वव्यापकम्, परमार्थसत्त्वसमानाधिकरणत्वात्, पारमार्थिकत्वेन श्रुतितात्पर्यविषयत्ववत्। एतत्पटात्यन्ताभावः एत-

---

पर्यवसानानुपयुक्तत्वात् पूर्वं न विकल्पित इति भावः। **प्रथमेति**। दृष्टान्तस्योभयसम्मत्यपेक्षणे मन्मते अन्त्यपक्षस्यासम्भवात् उभयमतेऽपि मध्यपक्षासम्भवात् प्रथमपक्षेणैव तत्र साध्यसिद्धिः। दृष्टान्तस्य प्रतिवादिमात्रसम्मत्यपेक्षणे तु चरमपक्षेणापि तत्र सा सम्भवति। प्रथम इव चरमेऽपि मिथ्यात्वरूपविशेषणाभावात् उक्तरूपेणाभावस्य सम्भवादिति बोध्यम्। **परमार्थसत्त्वसमानाधिकरणत्वादिति**। न च परमार्थसत्त्वस्यैव तादात्म्येन हेतुत्वसम्भवादन्यांशवैय्यर्थ्यमिति वाच्यम्; तत्समानाधिकरणत्वनिष्ठव्याप्तेस्तत्त्वेनावच्छेदासम्भवात्। अस्तु वा तस्यैव हेतुत्वे तात्पर्यम्। न च स्वरूपासिद्धिरिति वाच्यत्; परमार्थसत्त्वस्याबाध्यत्वव्यापककिञ्चिद्बुद्धिविषयत्वरूपस्य पक्षीकृते मोक्षप्रयोजकत्वविशिष्टे स्वस्मिंस्तादात्म्यसत्त्वात्। **श्रुतितात्पर्यविषयत्वेति** श्रुतिनिष्ठशक्त्यधीनप्रमाविषयत्वेत्यर्थः। तादृशे ज्योतिष्टोमादिनिष्ठे 'सोमेन यजेत' इत्यादिश्रुतिजन्यधीविषयत्वे साध्यवैकल्यादाह— **पारमार्थिकत्वेनेति**। अबाध्यत्वव्यापकेति तदर्थः। स चोक्तविषयत्वविशेषणं, तादृशं च विषयत्वं परमते विश्वं सत्यमित्यादिश्रुतिजन्यधीविषयत्वम्। मन्मते तत्त्वमस्यादिश्रुतिजन्यधीविषयत्वमेव। पक्षदृष्टान्तयोरभेदेऽपि तत्त्वावच्छेदकभेदान्न दोषः; पक्षतावच्छेदकसामानाधिकरण्येनानुमितेरुद्देश्यत्वपक्षस्यापि प्रकृते वक्ष्यमाणत्वात्। पटान्तरप्रतियोगिकात्यन्ताभावे सिद्धसाधनात् **एतदिति** पक्षे दत्तम्। तन्त्वन्तरनिष्ठत्वस्य सिद्धत्वात्साध्ये **प्येतदिति**। पटान्तरप्रागभावे

न्तुनिष्ठः; एतत्पटानाद्यभावत्वात्, एतत्पटान्योन्याभाववत्। तन्तुनाशजन्यपटनाशस्य कदापि तन्तुवृत्तिता नास्तीति तत्र व्यभिचारवारणायानादिपदम्। यस्य पटस्याश्रयविभागेन नाशस्तदत्यन्ताभावस्य पक्षत्वेत्वनादिपदमनादेयमेव। अत्र चैतत्पटप्रतियोगिकात्यन्ताभावत्वावच्छिन्नस्य पक्षीकरणान्न सम्बन्धान्तरेणात्यन्ताभावमादाय अंशतस्सिद्धसाधनम्; पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्। समवायसम्बन्धावच्छिन्नो व्यधिकरणधर्मानवच्छिन्नश्च य एतत्पटात्यन्ताभावस्स एव वा पक्षः। तन्तुशब्देन च पटोपादानकारणमुक्तम्। तत्र च प्रागभावस्य सत्त्वान्न तेन व्यभिचारः। कार्यकारणयोरभेदेन सिद्धसाधनादिदूषणानि प्रागेव तत्त्वप्रदीपिकानुमानोपन्यासे निराकृतानि। यद्वा समवायसम्बन्धावच्छिन्नोऽयमेतत्पटात्यन्ता-

---

व्यभिचाराद्धेतौ—**एतादिति**। **पटेति**। व्यक्तिविशेषपरिचायकम्, न तु हेतौ प्रविष्टम्। **पक्षत्वे त्विति**। तस्य पक्षत्वे हेतावपि तत्पट एव निवेश्यः; अन्यथा स्वरूपासिद्धेः। तथाच अनादीति व्यर्थत्वान्न देयमिति भावः। **उद्देश्यत्वादिति**। न चैवं पक्षे एतदिति व्यर्थमिति वाच्यम्; तद्व्यक्तिप्रतियोगिकात्यन्ताभावत्वेनैवास्मिन् कल्पे पक्षत्वेन, पटत्वेन निवेशाभावात्। **व्यधिकरणेति**। एतत्पटत्वान्येत्यर्थः। तेनोभयत्वाद्यवच्छिन्नात्यन्ताभावमादाय न सिद्धसाधनम्। ननु तत्पटप्रागभावः तत्तन्त्ववच्छिन्नचैतन्याविद्ययोरेव वर्तते न तु तत्तन्तौ, सिद्धान्ते तस्य तत्पटानुपादानत्वादिति तत्र तत्तन्तुनिष्ठत्वाभावाद्व्यभिचारः, तत्राह—**तन्तुशब्देनेति**। तत्तन्तुशब्देनेत्यर्थः। **पटोपादानेति** तत्पटोपादानेत्यर्थः। **प्रागेवेति**। चित्सुखाचार्यास्त्वित्यादिग्रन्थ इति शेषः। समवायान्यसम्बन्धेन तत्पटात्यन्ताभावे सिद्धसाधनादयमिति तत्परिचायकमाह—**समवायेति**।

भावः, एतत्तन्तुनिष्ठः; एतत्पटप्रतियोगिकात्यन्ताभावत्वात्, सम्बन्धान्तरावच्छिन्नैतत्पटात्यन्ताभाववदिति विशिष्यानुमानम्। अव्याप्यवृत्तित्वानधिकरणत्वे सति उक्तपक्षतावच्छेदकवत् स्वसमानाधिकरणात्यन्ताभावप्रतियोगि, अनात्मत्वात्, संयोगवत्। न च विश्वात्यन्ताभावे व्यभिचारः, तस्य अधिकरणस्वरूपत्वे अनात्मत्वहेतोरेवाभावात्, अतिरिक्तत्वे तस्य

एतत्पटत्वान्यधर्मानवच्छिन्नप्रतियोगिताकेत्यस्याप्युपलक्षणम्। एतत्तन्तुनाशजन्यतत्पटनाशे व्यभिचाराद्धेतावत्यन्तेति। नाशानाश्य[1]पटव्यक्तिनिवेशे तु तन्न देयम्। वस्तुतस्तु अत्यन्ताभावे[2]त्वितरवैयर्थ्यम्, तत्तन्तुत्वात्यन्ताभावस्यापि पक्षसमत्वेन तत्राव्यभिचारात्। तथाचात्यन्ताभावत्वमेको हेतुः। तन्तुनाशानाश्यपटव्यक्त्यभावत्वमपरो बोध्यः। अव्याप्यवृत्तित्वमादाय सिद्धसाधनादिवारणाय सत्यन्तम्। **उक्तेति।** ब्रह्मप्रमान्याबाध्येत्यादिपरकीयाद्यानुमानीयेत्यर्थः। **स्वसमानाधिकरणेति।** सामानाधिकरण्यं प्रतियोगिता चेत्युभयसम्बन्धेन अत्यन्ताभावस्साध्यः, उक्तपक्षतावच्छेदकसमानाधि[3]करणप्रतियोगितावच्छेदकत्वं स्वाश्रयनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वं चेत्युभयसम्बन्धेनात्यन्ताभावस्साध्यमिति तु पर्यवसितम्। तेन स्वपदार्थस्य पक्षदृष्टान्तोभयसाधारणस्याभावेऽपि न बाधसाध्यवैकल्यादि, न वा उभयाभावादिप्रतियोगितामादाय सिद्धसाधनमिति ध्येयम्। **व्यभिचार इति।** तस्य ब्रह्मस्वरूपत्वेनाधिकरणाप्रसिद्ध्या नोक्तसाध्यम्, विश्वाभावत्वविशिष्टरूपेण तु हेतुसत्त्वमिति भावः। शुद्धब्रह्मणि व्यभिचारो विश्वाभावत्वोपहिते वा, नाद्यः; तत्र हेत्वभावात्। नान्त्यः, तत्र साध्यसत्त्वादित्याशयेनाह — **तस्येति। अभावादिति।** एवंचाभावमात्रस्य ब्रह्मणि व्यभि-

---

[1] तादृशनाश्य. [2] अत्यन्ताभावत्वेतर. [3] करणधर्मे स्वप्रति.

मिथ्यात्वेनात्यन्ताभावप्रतियोगितया साध्यस्यैव सत्त्वात्। न च अत्यन्ताभावस्यात्यन्ताभावे तत्प्रतियोगित्वलक्षणमिथ्यात्वासिद्धिरिति वाच्यम्; अभावेऽभावप्रतियोगित्वस्य भावगताभावप्रतियोगित्वाविरोधित्वात्। प्रागभावस्यात्यन्ताभावप्रतियोगित्वेऽपि तत्प्रतियोगित्वस्य घटादौ सर्वसिद्धत्वात्। उपपादितं चैतत् मिथ्यात्वमिथ्यात्वे। अत्र चाव्याप्यवृत्तित्वानधिकरणशब्देन एकदेशावच्छेदेनाविद्यमानत्वं पक्षविशेषणं विवक्षितम्। एतेन स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वोक्तौ बाधः, अवयववृत्तित्वानधिकरणत्वोक्तौ घटादीनामपक्षत्वापत्तिरिति दूषणद्वयमपास्तम्। अनात्मत्वहेतुस्तु जडत्वहेतुव्याख्यानेनैव व्याख्यातः। अतएव नित्यद्रव्यान्यद्रव्याप्यवृत्तित्वानधिकरणमुक्त-

---

चारित्वादात्मत्वप्रतियोगित्वं विशेषणमिति द्रष्टव्यम्। **मिथ्यात्वेन।** ज्ञाननिवर्त्यत्वेन। **अत्यन्ताभावप्रतियोगितया।** स्वाधिकरणब्रह्मनिष्ठात्यन्ताभावप्रतियोगितया। नन्वेवं विश्वस्य सत्यतापत्तिः, विरुद्धयोरेकनिषेधे अपरस्य सत्यतानियमादिति शङ्कते **न चेति। अत्यन्ताभाव इति।** बोध्ये इति शेषः। **मिथ्यात्वासिद्धिरिति।** निषेधस्यात्यन्ताभावस्य प्रतियोगिनि मिथ्यात्वासिद्धिरित्यर्थः। **भावगतेति।** प्रतियोगितेत्यर्थः। **मिथ्यात्व इति।** तत्र हि विरुद्धयोरेकमिथ्यात्वेऽपरसत्यत्वं यत्र मिथ्यात्वावच्छेदकमुभयवृत्ति न भवेदित्यादिग्रन्थे मिथ्यात्वस्य मिथ्यात्वप्रतिपादनपर इत्यर्थः। **एकदेशावच्छेदेनेति।** दैशिकसम्बन्धावच्छिन्ना किञ्चिदवच्छिन्ना वृत्तिर्यस्य तदन्यत्वं विवक्षितमित्यर्थः। घटादेः कपालाद्यवच्छेदेन कालवृत्तित्वादाद्यमवच्छिन्नान्तम्। **बाध इति।** उक्तप्रतियोगित्वाभाववति उक्तप्रतियोगित्वसाधने बाध इत्यर्थः। **अपास्तमिति।** न च कपाले अग्रे घटो न तु मूले, तन्तुषु दशान्यभागे पटो न तु दशास्विति प्रतीतेः घटादे-

पक्षतावच्छेदकवत्, केवलान्वय्यत्यन्ताभावप्रतियोगि, पदार्थत्वात्, नित्यद्रव्यवदित्यपि साधु। दृष्टान्तश्चायं पररीत्या। स्वमते तु

र्देशा[1]वच्छिन्नवृत्तित्वस्य उक्तरूपस्य सत्त्वादयुक्तमेतदिति वाच्यम्; समग्रमिदं कपालद्वयम्, घटस्समग्रः, एते तन्तवः, पटः कश्चिदप्यत्र, कपालादेरंशो न घटाद्यन्य इति प्रतीत्या अवच्छिन्नवृत्तिकत्वाभावसिद्ध्योक्तप्रतीतेरसिद्धेः, कपालाद्याधेयत्वविषयकतया उक्तप्रतीतेर्मन्मते भ्रमत्वाच्च। न चैवमपि कपालादौ स्वनाशकालावच्छेदेन घटादिसमवायाभावादन्यकालावच्छेदेनैव तत्समवायात् घटादीनामपक्षतापत्तेस्तादव स्थ्यमिति वाच्यम्; प्रपञ्चसत्त्वमते ध्वंसप्रागभावाभ्यामेव घटादिनाशकाले कपालादौ घटादिकं नास्तीति बुद्ध्युपपत्तेः, तत्र तदत्यन्ताभावसत्त्वे मानाभावात्, घटत्वावच्छिन्नव्यधिकरणध्वंसादिविषयकत्वस्वीकारादेव घटादिमति किञ्चिद्घटादिध्वंसादिकमादाय तादृशप्रतीत्यापत्त्यभावात्। एतेन नष्टकपालादौ घटादि नास्तीति धीरपि व्याख्याता; प्रतियोगितासम्बन्धेनेव विशेषणतासम्बन्धेन नष्टकपालेऽपि घटध्वंससत्त्वसम्भवात्। अत्यन्ताभावानवगाहितत्प्रतीत्या घटादेरवच्छिन्नवृत्तिकत्वासिद्धेः। **केवलान्वयीति**। वृत्तिमदत्यन्ताभावाप्रतियोगीत्यर्थः। गगने परमते साध्यवैकल्यवारणाय वृत्तिमदिति। गगनादेः परमते स्वाभा[2]वाभावत्वस्वीकारे तु तन्न देयम्। अधिष्ठानचिद्रूपात्यन्ताभावस्यात्यन्ताभावाप्रतियोगित्वात् तत्प्रतियोगित्वमनात्ममात्रेऽस्तीति बोध्यम्। **पदार्थत्वादिति**। ब्रह्माविषयकविषयत्वादित्यर्थः। ब्रह्मणि व्यभिचाराद्विशेषणम्। **स्वमते त्विति**। स्वमते आकाशादेर्वृत्तिमत्त्वस्वीकारात् साध्यस्य तत्रोक्तानुमानात्पूर्वमसिद्धत्वात्स न दृष्टान्तः। तथाच नित्य-

---

[1] दशा. [2] स्वाभाववत्व. स्वाववत्त्वास्वी.

शुक्तिरूप्यवदित्येव । न च स्वरूपेणात्यन्ताभावप्रतियोगित्वेऽत्यन्तासत्त्वापातः, तद्वैलक्षण्यप्रयोजकाभावादिति वाच्यम्; उत्पत्तिनिवृत्त्योरन्यतरप्रतियोगित्वेन परिहारात् । आत्मत्वावच्छिन्नधर्मिको भेदो न परमार्थसत्प्रतियोगिकः, आत्माप्रतियोगित्वात्, शुक्तिरूप्यप्रतियोगिकभेदवत् । न च घटपटसंयोगे व्यभिचारः, हेतुमत्तया निर्णीते अङ्कुरादाविव साध्यसन्देहस्यादोषत्वात् । एवमन्येऽपि प्रयोगा यथोचितमारचनीया विपश्चिद्भिरिति दिक् ॥

द्रव्यान्यादिति न देयमेवेति भावः । **इत्येवेति** । न च शुक्तिरूप्यात्यन्ताभावस्य शुक्त्यवच्छिन्नचिदात्मकतदधिष्ठानरूपत्वात्तस्य च घटादावत्यन्ताभावप्रतीतेर्नकेवलान्वयित्वमिति वाच्यम्; अवच्छिन्नचितोऽधिष्ठानत्वेन शुद्धचितोऽप्यधिष्ठानत्वात् तस्यापि तदत्यन्ताभाववत्त्वेन उक्तसाध्यस्य शुक्तिरूप्ये सत्त्वात् । शुक्तिरूप्यादेर्मूलाविद्योपादानकत्वपक्षे उक्तशङ्काविरहाच्च । **स्वरूपेणेति** । उक्तरूपेणेति शेषः । **तद्वैलक्षण्येति** । अत्यन्तासद्वैलक्षण्येत्यर्थः । **परिहारात्** । असद्वैलक्षण्यसिद्धेः, निवृत्तिप्रतियोगित्वमात्रस्यासद्वैलक्षण्य[1]साधकत्वे भावाद्वैतमते पञ्चमप्रकाराविद्यानिवृत्तेस्तदसिद्धिः उत्पत्तिप्रतियोगित्वमनादौ न तत्साधकम् । अतोऽन्यतरविशेषः । **आत्माप्रतियोगित्वादिति** । न चाप्रतियोगित्वमात्रस्य ब्रह्मनिष्ठस्य साधकत्वसम्भवादात्मेति व्यर्थमितिवाच्यम्; ब्रह्मणो दृश्याभावरूपत्वेन सप्रतियोगिकत्वात् । तन्मिथ्यात्वस्य पूर्वमसिद्धत्वात्परं प्रति दृष्टान्तत्वासम्भवात्,[2] स्वनिष्ठप्रतियोगित्वानिरूपकत्वसम्बन्धेन आत्मन एव हेतुत्वे तात्पर्यसम्भवाच्च । **अदोषत्वादिति** । साध्याभाववत्त्वांशे संशयात्मकव्यभिचारज्ञानस्य व्याप्तिधीविरोधित्वे सन्दिग्धसाध्यपक्ष-

---

[1] द्वैलक्षण्या. [2] परं प्रति तस्य हेतुत्वासम्भवात्. पा.

हेतवोऽभीष्टसिद्ध्यर्थं सम्यञ्चो बहवश्च नः ।
अल्पाः परस्य दुष्टाश्चेत्यत्र स्पष्टमुदीरितम् ॥
अभीष्टसिद्धावनुकूलतर्कबलाबलं चात्र परीक्ष्य यत्नात् ।
प्रवक्ष्यते दोषगणः परेषां न खेदनीयन्तु मनोऽधुनैव ॥

इत्यद्वैतसिद्धौ विश्वमिथ्यात्वे विशेषतोऽनुमानानि.

अथ विश्वमिथ्यात्वस्यागमबाधोद्धारः.

नन्वस्तु शब्दबाधः, तथाहि—"विश्वं सत्यं, यच्चिकेत सत्यमित्तन्न मोघं, याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यस्समाभ्यः" इत्यादिश्रुतिभिः, असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्' इत्यादिस्मृतिभिः, 'नाभाव उपलब्धेः, वैधर्म्याच्च न स्वप्नादिवत्' इत्यादिसूत्रैश्च विश्वस्य सत्यत्वप्रतिपादनादिति चेन्न; श्रुतेस्तत्परत्वाभावात् । तथा हि, "विश्वं सत्यम्मघवाना युवोरिदापश्च न प्रमिणन्ति व्रतं वाम् । अच्छेन्द्रा ब्रह्मणस्पती हविर्नो अन्नं युजेव वाजिना जिगातम्" इति ऋक्संहिताद्वितीय-

---

कानुमानमात्रलोपापत्तेः, नव्यैरपि व्याप्तिग्राहकाभावसहकृतस्यैव तादृशसंशयस्य तद्विरोधित्वस्वीकारात् प्रकृते चानुकूलतर्काणां भूयसां वक्ष्यमाणत्वात् न स विरोधीति भावः ॥

तर्कैस्सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तभङ्गाय विशेषा सत्यतानुमा ॥

इति विश्वमिथ्यात्वे विशेषतोनुमानानि.

जगदाहुरिति । सत्यमिन्नं जगदिति मतमासुरत्वेनोक्तम ।

याष्टकवाक्यस्यायमर्थः—हे इन्द्राब्रह्मणस्पती! मघवाना मघवानौ मघमिति धननाम, धनवन्तौ मखवन्ताविति वा, विश्वं सर्वं सत्यं कर्म सद्भूतत्वात् फलस्यावश्यं भावित्वाद्वा, तादृशं कर्म युवोरित् युवयोः इत् इत्थमवधारणे वा । युवामेवोद्दिश्य सर्वाणि कर्माणि अनुष्ठेयानीत्यर्थः । आपो व्यापनशीला देवताः, चनेत्येतत्पदद्वयसमुदायः, ऐकपद्यन्त्वध्यापकसम्प्रदायसिद्धम् । वां युवयोर्व्रतं सङ्कल्पं कर्म वा न प्रमिणन्ति न हिंसन्ति । 'मीङ् हिंसायाम्' क्रैय्यादिकः । किन्त्वनुमोदन्त इति यावत्, नोऽस्माकं हविर्दध्यादिकमन्नं च पुरोडाशादिकं च अच्छ अभिलक्ष्य वाजिना वेगवन्तावश्वाविव युजा युक्तौ सन्तौ जिगातं देवयजनमागच्छतम् । (जिगातिर्गतिकर्मा, जौहोत्यादिकः) अन्नं घासं प्रति अश्वाविवेति वा । यद्वा हे इन्द्राब्रह्मणस्पती! विश्वं सत्त्वेन

अतो जगत्सत्यमिति शिष्टमतमित्यभिमानः । कर्म सद्भूतत्वादिति । "यो वै धर्मस्सत्यं वै तत्तस्माद्धर्मं वदन्तमाहुस्सत्यं वदति" इति श्रुतौ धर्मस्य सत्यशब्दार्थत्वोक्तेः "ऋतं पिबन्तौ" इत्यादिश्रुतौ सत्यशब्दसमानार्थऋतशब्देन कर्मफलमात्रोक्तेश्च सत्यशब्देन प्रकृते धर्मरूपं कर्मोक्तम् । सतो ब्रह्मणो भव इति व्युत्पत्तेरिति भावः । अद्वैतश्रुतेरिव विश्वं सत्यमित्यादिश्रुतेरपि स्वार्थतात्पर्यग्राहकमस्ति । "आपश्च न प्रमिणन्ति" इत्यस्य वाक्यशेषस्य व्यापनशीला देवा अपि प्रमाविषयीकुर्वन्तीत्यर्थकत्वेन विश्वसत्यतायाः प्रमाविषयत्वरूपोपपत्तिबोधकत्वादिति पश्चात्परो वक्ष्यति, तदपि निरवकाशमित्याशयेन चनेत्येतत्पदद्वयतया व्याचष्टे—**चनेत्येतदिति** । यत्तु चनशब्दस्याखण्डस्याव्ययेषु पाठादेकपदत्वेन माधवीयभाष्ये वाक्यान्तरे व्याख्यातत्वात्, "नेह नानास्ति किञ्चिन" इत्यादौ त्वयापि तथा स्वीकाराच्च, पदद्वयत्वेन व्याख्या न युक्तेति, तत्तुच्छम्; क्वचिदेकपदत्वेन व्याख्यातत्वेऽपि सर्वत्र

परिदृश्यमानं जगत्, युवयोरित् युवयोरेव युवाभ्यामेव सृष्टम्। अथवा—युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थम्। यद्यद्गुणजातं स्तुत्या प्रतिपाद्यते तत्सर्वं युवयोर्विद्यमानमेव न त्वारोपितमित्यर्थः। आपो व्यापनशीला देवताः, अनुपलक्षितानि पञ्चभूतानि वा। युवयोर्व्रतं जगदुत्पादनाख्यं कर्म न हिंसन्ति इत्थं महानुभावौ युवां जिगातम्। शेषं पूर्ववद्व्याख्येयम्। तथाच स्तुतिपरतया नास्य विश्वसत्यत्वे तात्पर्यम्। 'शाक्मना शाको अरुणस्सुवर्ण आयो महश्शूरस्सनादनीलः। यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता' इत्यस्याप्यष्टमाष्टकस्थस्येन्द्रस्तुतिपरतया न विश्वसत्यत्वे तात्पर्यम्। तथाहि—शाक्मना शाकैव शाक्मा तेन शाक्मना बलेन। शाकः शक्तः, स्वशक्तयैव सर्वं कर्तुं शक्त इत्यर्थः। न हीन्द्रस्य सहायान्तरापेक्षाऽस्ति, इन्द्रत्वादेव। अरुणः अरुणवर्णः कश्चिच्छोभनवर्णः पक्षी

तथा व्याख्याने मानाभावात्। पदद्वयत्वेन व्याख्यातयोरपि बहुस्थलेष्वध्ययनसम्प्रदायसिद्धस्यैकपदस्य दर्शनात्। तथाहि—द्वितीयाष्टकप्रथमाध्यायीयैकादशवर्गीयायां षष्ठ्यां चतुर्थ्यामृचि "ददाति मह्यं यादुरि" इत्यत्र यादुरीत्यस्याध्ययनसम्प्रदायसिद्धे ऐकपद्येऽपि दुरी आदरवती या मह्यन्ददातीति पदभेदेन माधवीयभाष्ये व्याख्यातम्। एवं—न हि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आगहि" इत्यादौ ऐकपद्येनाधीयमानस्यापि नहीत्यादर्नैवेति पदभेदेन व्याख्यातम्। वामनसूक्ते सलिलमित्यस्यैकपद्येन पठ्यमानानामपि मकारलिकारलकाराणां परमात्मजीवतदैक्यपरतया पदभेदेन श्रुत्यन्तरप्रमाणोपन्यासपूर्वकं व्याख्यानं माधवीयभाष्ये कृतम्। "अरुणो मासकृद्व्रक" इत्यत्र अरुणो मा इत्यस्य पृथक्पदत्वेन पठ्यमानस्यापि मासकृदित्येकपदत्वेन निरुक्तकारैर्व्याख्यातम्। न त्वारोपितामिति। न प्रातीतिकमित्यर्थः।

आगच्छतीत्यध्याहारः; उपसर्गश्रुतेः। यो महो महान्, शूरो विक्रान्तः सनात्पुराणः अनीलोऽनीडः, नीडस्याकर्ता। न हीन्द्रो अग्निवत्कुत्रचिदपि यज्ञे वृक्षे निकेतनं करोति। एवं सुपर्ण इत्यादिरूपकेण इन्द्रमाह। स इन्द्र इदमिदानीं कर्तव्यमिति यच्चिकेत जानाति तत्सत्यमित्सत्यमेव। न मोघं न व्यर्थम्। स स्पार्हं स्पृहणीयं वसु निवासार्हं धनं जेता जयति शत्रुभ्यस्सकाशात्। उत अपि दाता ददाति च स्तोतृभ्यः। जेता दातेति तृजन्तेन 'न लोक' इत्यादिना षष्ठीप्रतिषेधः। एवमेवान्यदपि सत्यत्वप्रतिपादकमुच्चेयम्। 'याथातथ्यतोऽर्थान् व्यदधात्' इत्यपि वाक्यं न प्रपञ्चसत्यत्वे प्रमाणम्। तस्य पूर्वसृष्टप्रकारेण सर्जन-

---

आगच्छतीति। न चाभिव्याप्तिद्यर्थकत्वसम्भवादध्याहारो न युक्त इति वाच्यम्; अभिव्याप्तेः कर्मलाभेन साकाङ्क्षतापत्तेः। न च यच्चिकेत तदभिव्याप्य तत्सत्यमेव ज्ञेयं सर्वमित्यर्थ इति वाच्यम्; यद्योगप्राथम्यबलादेरभिव्याप्तिलाभात् "न तज्जलं यन्न सुचारुपङ्कजम्" इत्यादिवदाङ्शब्दानपेक्षणात्। स्पार्हं वसु अभिव्याप्य जेता दातेत्यर्थस्तु न सम्भवति, आसत्त्यभावात्। याथातथ्यतोऽर्थान्व्यदधादिति। यद्यपि "याथातथ्यतोऽर्थान्" इतीशावास्योपनिषदि पठ्यते, दूष्यपरग्रन्थेऽपि तथैव पाठो दृश्यते, तथापि श्रुत्यन्तरस्थयथातथार्थानित्यादिकमेवाविशेषाद्गृहीतम्। पूर्वसृष्टेति। ननु "यथार्थं तु यथातथम्" इत्यव्ययवर्गेऽमरोक्तेर्याथातथ्यशब्दस्य स्वार्थिकतद्धितान्तस्य सत्यार्थकत्वमेवोचितमिति चेत्, न; तथ्यशब्दस्यपि [1]सत्यार्थकत्वेन याथेत्यस्य त्वन्मते वैयर्थ्यापत्तिः;[2] "कविर्मनीषी परिभूस्स्वयंभूः" इति पूर्वभाग स्थकव्यादिपदानां क्रान्तदर्शित्वादिविशिष्टरूपार्थानां त्वन्मते वाक्यार्था-

---

[1] सत्यार्थकत्वे. [2] र्थ्यापत्तेः.

मर्थः । न तु जगत्सत्यत्वं जगत्सर्जनगतसत्यत्वं वा ।

नुपयोगात् । मन्मते तु—यतः क्रान्तमतीतं सर्वं दृष्टवान्, यतश्च मनीषी मनसा ईष्टे ऊहापोहकुशलः, यतश्च पूर्वसृष्टविरुद्धमिच्छतामसुराणां परिभवसमर्थः, यतश्च स्वयमन्यनैरपेक्ष्येण पूर्वसृष्टप्रकारेण जगद्भावनसमर्थः, ततो हेतोर्याथातथ्येन पूर्वं यथा तथा व्यदधादित्यर्थ उपपद्यतेतराम् । वस्तुतो न प्रत्ययस्स्वार्थो वैयर्थ्यात्, किन्तु यथातथाशब्दस्य यादृशतादृशार्थकतया तद्भावार्थकः, पञ्चम्यर्थस्तसिश्च ल्यब्लोपे, तथाच यादृश तादृशभावं प्रतिसन्धाय व्यदधादित्यर्थः । त्वन्मते तु प्रत्ययोऽपि व्यर्थः । यथातथार्थानित्यादिवाक्येऽपि त्वन्मते यथाशब्दो व्यर्थः, तथाशब्दस्यापि सत्यार्थकत्वात् । अतएव तथागतशब्दस्य बौद्धबोधकस्य सत्यज्ञानार्थकत्वममरटीकादावुक्तम् । 'धाता यथापूर्वमकल्पयत्' इति श्रुत्येकवाक्यतया मदीयार्थ एव युक्तः । किञ्च यथाशब्दस्य योग्यतावीप्सासादृश्यपदार्थानतिवृत्त्यर्थकत्वेन शाब्दिकोक्तत्वात् प्रकृते च अनतिक्रमरूपपदार्थानतिवृत्त्यर्थकत्वसम्भवात् त्वन्मतरीत्या तादात्म्येन तथा अनति[1]क्रमोक्तौ तथ्यतोऽर्थानित्यनेनैव विवक्षितार्थसिद्धया यथेत्यस्य वैयर्थ्यात् । उपादानतया[2] तथ्यानतिक्रमोक्तया सत्योपादानकान्सर्वानर्थान् व्यदधादित्यर्थलाभेन उपादानसत्यत्वाज्जगत्सत्यं भाति न तु वस्तुतस्सत्यमिति श्रुतितात्पर्यलाभात्त्वन्मतविरुद्धमेवेदं वाक्यमित्याशयेनाह—**न जगत्सत्यत्वमिति ।** न च त्वन्मतेऽपि तथ्यत इत्यनेनैव तथ्यहेतुलाभसम्भवेन याथेति व्यर्थमिति वाच्यम्; निमित्तहेतुमात्रभ्रान्तिनिरासाय कार्यतादात्म्याश्रयहेतुलाभार्थकत्वेन तदवैयर्थ्यात् । यत्तु परिभावयतीति परिभूरिति व्याख्यानं, तत्परिभवतेस्सकर्मकत्वाज्ञानात्। सकर्मकत्वं तु स्पष्टम्। 'परिभूतस्स नागरैः' इत्यादि-

[1] तथ्यानति. [2] उपादानयाथा.

यत्र च स्तुत्यादिपरत्वं नास्ति, तत्रापि प्रत्यक्षसिद्धानुवादकतया 'अग्निर्हिमस्य भेषजम्' इत्यादिवाक्यवन्न तत्परत्वम्। न च त्वन्मते सर्वत्र ब्रह्मसत्त्वस्यैव स्फुरणात्तदतिरिक्तस्य कालत्रयाबाध्यत्वरूपस्य घटादिसत्त्वस्य प्रत्यक्षेणाप्राप्तेस्तद्बोधकत्वेन श्रुतेर्नानुवादकत्वमिति वाच्यम्; इतरसत्त्वबाधपुरस्सरत्वाद्ब्रह्मसत्त्वस्फुरणाभ्युपगमस्य तत्रैव सत्यादिपदप्रवृत्तिस्वीकारेण तदतिरिक्तविश्वसत्यत्वस्य शाब्दबोधाविषयत्वात्तदादायानुवादकत्वापरिहाहारात्। अथ 'पृथिवी इतरभिन्ना, न हिंस्यात्सर्वा भूतानी'त्यादौ घटादावेकदेशे प्रत्यक्षेण, ब्राह्मणादावेकदेशे वाक्यान्तरेण, विधेयसिद्धावपि सर्वत्रासिद्धत्वाद्यथा नानुवादकत्वं, तथा विश्वमात्रसत्यत्वस्य प्रत्यक्षेणाप्राप्तत्वान्नानुवादकत्वमिति मन्यसे, मैवम्; दृष्टान्ते हि पृथिवीत्वं हिंसात्वं चैकोऽनुगतो धर्म इति

प्रयोगात्। ननूक्तवाक्येषु स्तुत्यादिपरत्वेऽपि विश्वसत्यताया देवताधिकरणन्यायेन सिद्धिरस्तु, वाक्यान्तरस्य च विश्वसत्यताबोधकस्य स्तुत्यादिपरत्वाभावस्य सम्भावितत्वात्तत्सिद्धिरस्तु, तत्राह—**यत्र चेति**। तत्रापीत्यपिना उक्तवाक्येष्विति समुच्चीयते। **अनुवादकतयेत्युपलक्षणम्**। अद्वैत[1] श्रुत्यनुमानादिविरुद्धार्थकतयेत्यपि बोध्यम्। **तत्परत्वमिति**। तत्प्रमापकत्वमित्यर्थः। मानान्तरेण प्राप्ते बाधिते चान्यपरत्वस्य देवताधिकरणेनापि प्रमापक[2]त्वाव्यवस्थापनात्, अप्राप्त एव च श्रुतितात्पर्यान्न तत्सिद्धिरिति भावः। एतेन यद्यपीशकृतजगदनुवादेन न सत्यत्वविधिस्सम्भवति, अनुमान[3]मात्रेण जगत ईशकृतत्वासिद्ध्याऽनुवादायोगात्तस्यापि विधाने वाक्यभेदापत्तिः; तथापि देवताधिकरणन्यायात्सत्यकामादिवाक्यात्सत्यत्वविशिष्टेशस्येव याच्चिकेतेत्यादि-

---

1 द्वैत. 2 देवताधिकरणेदेवताप्रमापक. 3 अनुवाद.

तदवच्छेदेन विधेयस्याप्राप्तत्वेन तत्र नानुवादकत्वं युक्तम्, इह तु विश्वत्वन्नाम नैको धर्मोस्ति। किन्तु विश्वशब्दस्सर्वनामत्वात्तेन तेन रूपेण घटपटादीनामुपस्थापकः। तेषु च प्रत्येकं सत्त्वं

वाक्येऽपि सत्यत्वविशिष्टजगत्स्रष्टृत्वस्यैशे सिद्धिरित्यपास्तम्। **सर्वनामत्वादिति।** [1]बुद्धिविषयविशिष्टसर्वशक्तत्वादित्यर्थः। तथाच यथा तथादेर्बुद्धिविषयविशिष्टशक्तत्वेऽपि घटत्वादिविशेषरूपेण शाब्दानुभवजनकत्वम्, अन्यथा तेन रूपेण संशयनिवृत्त्याद्यनुपपत्तेः, तथा विश्वादिपदानामपीति भावः। एतेन जगदादिशब्दवद्विश्वशब्दस्य सर्ववृत्तिधर्मप्रकारेण बोधकत्वमित्यपास्तम्। यथा हि सर्वशब्दस्य पुत्रत्वपशुत्वादिविशेषरूपेण बोधकत्वम्, अतएव सर्वेभ्यो दर्शपूर्णमासावित्यादिना तादृशरूपावच्छिन्नसाधनताबोधनात्तादृशरूपेणैव कामनया दर्शपूर्णमासानुष्ठानं, विधिबोध्यतावच्छेदकरूपेणैव हि कामनयाऽनुष्ठितं कर्म फलाय भवति। अत एव येनयेन रूपेण पुत्रत्वादिना कर्मान्तरफलमुपदिष्टम्, तेनतेन रूपेणैवोपहितं दर्शपूर्णमासयोः फलम् न त्वन्यरूपेणेति सिद्धान्तः। यत्तु—'हिंसात्वावच्छेदेन न किञ्चिद्विधीयते किन्तु भूतेषु हिंसाभाव इति हिंसात्वानुगमोक्तिर्व्यर्था' इति, तत्तुच्छम्; पृथिवीत्वावच्छेदेन इतरभिन्नत्वस्येव भूतहिंसात्वावच्छेदेन बलवदनिष्टसाधनत्वस्याप्राप्तत्वेन विधेयत्वात्। भूतेषु हिंसाभावो विधीयत इति तु स्वमौढ्यप्रकटनम्, अज्ञातज्ञाप्यत्वरूपाविधेयत्वस्य भूतहिंसानिष्ठे बलवदनिष्टसाधनत्व एव वाच्यत्वात्, भूतनिष्ठस्य हिंसाभावस्य मानान्तरज्ञातत्वात्, भूतोद्देशेन हिंसाभावविधायकत्वस्योक्तवाक्ये केनाप्यस्वीकाराच्च। **तेषु च प्रत्येकमिति।** न च प्रत्यक्षेण घटादिषु घटत्वादिना सत्त्वे गृहीतेऽपि परमाण्वादौ तत्त्वेन सत्त्वं न गृहीतमित्यगृहीत-

---

[1] विधि.

गृहीतमेवेति कथं नानुवादकत्वम्, प्रकारवैलक्षण्याभावात्। न चैकशाखास्थविधिवाक्यैकार्थशाखान्तरस्थविधिवाक्यस्य पुरुषान्तरं प्रतीव येन पुंसा वादिविप्रतिपत्त्यादिना घटादिसत्ता प्रत्यक्षेण न निर्णीता तं प्रत्यर्थवत्त्वेन नानुवादकत्वमिति वाच्यम्;

ग्राहित्वान्नानुवादकत्वमिति वाच्यम्; घटत्वाद्यवच्छेदेन प्रत्यक्षाभासस्येव परमाणुत्वाद्यवच्छेदेन लिङ्गाभासादेस्सत्त्वग्राहकत्वात्। न हि परमाण्वादि सदिति लोको न जानाति। मन्मते सर्वप्रत्ययवेद्य इति मण्डनोक्तेः 'अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः। अक्ष्यादीनाम्' इति वार्तिकोक्तेश्च धीमात्रस्य स्वविषयब्रह्मसत्त्वावगाहित्वस्वीकाराच्च। **एकशाखास्थेति**। एकवेदीयैकशाखास्थेत्यर्थः। **एकार्थेति**। समानार्थेत्यर्थः। एकवेदीयासु नानाशाखासु पठ्यमानानां 'अग्निहोत्रं जुहोति' इत्यादीनां समानार्थकवाक्यानां पुरुषभेदं प्रति प्रवृत्तत्वाद्यथा नानुवादकता, तथा विश्वसत्त्वग्राहकयोः प्रत्यक्षश्रुत्योरित्यर्थः। पुनःश्रुतिरूपाभ्यासादिभिश्शाखाभेदेनोक्तानां कर्मणां भेद इति प्राप्ते, अभ्यासादीनां स्ववाक्योक्तकर्मपरत्वमात्रज्ञापकत्वाद्धितविधानायोगादेव कर्मभेदकत्वम्। भिन्नशाखास्थवाक्यानां तु स्वस्वाध्येतृपुरुषान्प्रति एकस्यैव कर्मणोऽज्ञातज्ञाप्यत्वरूपविधेयत्वसम्भवान्न तद्भेद्यकर्मभेदः[1]। एकवेदस्था एका शाखा अध्येतव्येति हि शास्त्रार्थः। 'अध्वर्युं वृणीते' इत्यादावेकत्वस्येव 'स्वाध्यायोऽध्येतव्यः' इत्यादावपि स्वीयत्त्वैकत्वयोर्विनियोगदशायां विवक्षितत्वात्। 'वेदानधीत्य वेदौ वा' इति वचनानुरोधेन वेदान्तरस्थशाखान्तराध्ययनस्यापि शास्त्रार्थत्वादेकवेदस्थत्वनिवेशः। अत एव वेदभेदेऽपि पुरुषाभेदादेकत्रैव वाक्ये कर्मोत्पत्तिरपरत्र गुणाद्यर्थं श्रवणम्। अतएव च एकस्मिन्कर्मणि विरुद्धानामङ्गानां नानाशाखागतानां विकल्पः। स च तत्तत्पुरुषभेदेन न व्यवस्थितः, तेषां प्रकरणा-

[1] कर्मभेदस्य.

एवं सत्यनुवादस्थलस्यैवाभावप्रसङ्गात् । न च सर्वाविवादस्थलमेवोदाहरणम्, सर्वाविवादस्य निश्चेतुमशक्यत्वात् । पुरोवादपूर्वकत्वादनुवादस्यात्रायं पुरोवाद इत्यस्यैवाभावान्न शाखान्तरस्थवाक्यानुवादकत्वप्रसङ्गः । यत्तु—बृहदारण्यकभाष्ये देहभिन्नात्मबोधिकायाः 'अस्तीत्येवोपलब्धव्य' इत्यादिश्रुतेः प्रत्यक्षप्राप्तानुवादित्वमाशङ्क्य वादिविप्रतिपत्तिदर्शनादित्यादिना तत्परिहृतम् । तथाच प्रत्यक्षसिद्धसत्त्वग्राहकत्वेऽपि वादिविप्रतिपत्तिनिरासार्थकत्वेन नानुवादकत्वं प्रकृतेऽपीत्युक्तम्; तदयुक्तम्; भाष्यार्थानवबोधात् । तथाहि तत्र वादिविप्रतिपत्तिदर्शनेन देह-

---

दिना शुद्धकर्त्वर्थत्वावगत्याऽध्येतृतत्तत्पुरुषार्थत्वाभावात् । अविरुद्धानां तु समुच्चयः । 'बह्वल्पं वा स्वशाखोक्तं ग्राह्यम्' इत्यादिकं चानुकल्पविधानार्थमिति द्वितीयस्यान्त्याधिकरणे स्थितम् । **सर्वाविवादस्येति ।** न च 'अग्निर्हिमस्य भेषजम्, अस्यामोषधयो जायन्ते' इत्यादिवाक्यार्थे सर्वाविवाद इति वाच्यम्; अग्नेर्हिमनिवृत्तिजनकत्वरूपे वाक्यार्थे स्वभाववादयदृच्छावादयोर्विवादात्, अवयव्यनङ्गीकारमते ओषधिरूपस्थूलद्रव्योत्पत्तिरूपेऽर्थेऽपि विवादाच्च । **अत्रायं पुरोवाद इत्यस्येति ।** अत्र तद्वेदीयैकशाखाध्येतृपुरुषे अयमग्निहोत्रं जुहोतीत्यादितद्वेदीयशाखान्तरीयो वादो वाक्यं पुरः पूर्वमग्निहोत्रादेरज्ञातस्य ज्ञापक इत्यस्यार्थस्येत्यर्थः । यदि हि तद्वेदीयैकशाखावाक्यं तद्वेदीयशाखान्तरवाक्याध्येतारं प्रति ज्ञापकं स्यात्, तदा ज्ञातज्ञापकत्वेनानुवादकं स्यात् । न चैवमस्तीति भावः । यत्तु—"वेदद्रष्टृप्रथमव्यक्त्यपेक्षया पुरोवादस्य सम्भवात् सादिप्रत्यक्षस्यानादिवेदापेक्षया पुरोवादत्वासम्भवाच्च प्रतिपत्तृव्यवस्थया नानुवादकत्वं युक्तम्" इति, तन्न युक्तम्; प्रथमं वेदद्रष्टारं प्रति तद्वेदीयशाखान्तरवाक्यस्यानुवादकत्ववत्सत्त्वप्रत्यक्षवन्तं प्रति सत्त्वश्रुतेरनुवादकत्वानपायात्, प्रत्यक्षस्याप्यनादित्वेन वेदात्पुरोवादत्वसम्भवात्;

व्यतिरिक्तत्वेनात्मनः प्रत्यक्षतैव नास्ति । अन्यथा प्रत्यक्षप्रामाण्यवादिनश्चार्वाकादेस्तत्र विप्रतिपत्तिर्न स्यादित्युक्तम् । न तु वादिविप्रतिपत्तिनिरासेनास्तीत्यादेस्सार्थकत्वमननुवादकत्वं वा। तथाचोक्तं तत्रैव 'तस्माज्जन्मान्तरसम्बन्ध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारविशेषोपाये च शास्त्रं प्रवर्तत' इति । ननु चातुर्मास्यमध्यपर्वणोः 'द्वयोः प्रणयन्ति' इति वाक्यस्य

अन्यथा अग्निर्हिमस्य भेषजमित्यादेरप्यनुवादत्वासम्भवात् । **चार्वाकादेरिति** । न चैवं सत्त्वेन विश्वस्य प्रत्यक्षतापि नास्ति, अन्यथा तत्रावयोर्विवादो न स्यादिति वाच्यम् ; विश्वसत्त्वयोस्सम्बन्धे हि नावयोर्विवादः, त्वया सत्यस्य मया मिथ्याभूतस्य तस्याङ्गीकारात्, अधिष्ठानसत्तासम्बन्धो मिथ्या जायते जगतीति मया स्वीकारात् । **प्रवर्तत इति** । प्रमापयतीत्यर्थः । **चातुर्मास्यमध्यपर्वणोरिति** । वैश्वदेवं वरुणप्रघासाः साकमेधाः शुनासीरीयं चेति पर्वचतुष्टयात्मकस्य चातुर्मास्याख्यकर्मणो मध्यपर्वणोरित्यर्थः । **चातुर्मास्यप्रकरणे**—'द्वयोः प्रणयन्ति तस्मात् द्वाभ्यामेति, ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासाश्च साकमेधाश्च' इति श्रुतम् । तत्र सधर्मकं सौमिकं प्रणयनमुत प्राकृतमधर्मकमिति संशये प्राकृतस्य चोदकप्राप्तत्वेन वाक्यसार्थक्याय सौमिकं तदत्र विधीयते । अतएव तत्रोत्तरवेदेस्सत्त्वेन तत्प्राप्तौ 'न वैश्वदेवे उत्तरवेदिमु[1]पयन्ति न शुनासीरीये' इति तत्पर्युदासस्सङ्गच्छते । तेन तयोरुत्तरवेदिभिन्नास्सौमिकप्रणयनधर्माः कार्याः । यत्तु 'उपात्र वपन्ति' इत्युत्तरवेदेरुत्पत्तिवाक्यम्, यच्च उत्तरवेद्यामग्निं निदधाति' इति तस्या विनियोगवाक्यम्, तन्मध्यमयोः पर्वणोः प्राकृतप्रणयनकाल एवोत्तरवेदिमात्रविधायकमिति प्राप्ते, प्रकृतिवच्छब्देनोपस्थितत्वात्प्राकृतमेव प्रणयनमत्रातिदेशप्रवृत्तेः पूर्वं विधीयते अनूद्यते वा । ननु तत्र किं प्रयोजनम् ? नेतरयोः पर्वणोः

---

[1] पवपन्ति.

परिसङ्ख्या त्रैदोष्यापत्तेः, प्रणयनाभावेऽग्न्यभावेन तयोर्यागानुपपत्तेश्च ; नाप्यर्थवादत्वेन स्तुतिधीः[1], विध्यन्तराभावादिति चेदुच्यते—उत्तरवेदिरूपगुणप्राप्तिः प्रयोजनम् । एतद्वाक्याभावे हि पर्वचतुष्टयेऽपि प्राकृतप्रणयनप्राप्त्या देशापेक्षायामुत्तरवेदिविधानं चतुष्टयेऽपि स्यात् । एतद्वाक्यसत्त्वे तु पर्वद्वयीयप्रणयनस्यैव विशिष्योपदेशेनोपस्थितत्वात्त्रैवोत्तरवेदिस्तदीयाग्निनिधानमेव च द्वारं सिध्यति । अत इतरपर्वणोरुत्तरवेदिपरिसङ्ख्यैव प्रयोजनमिति । अथ तद्वाक्यस्य प्रथमोत्तमे मध्यमे वा पर्वणी विषय इति संशये[2] मध्यमविषयकत्वे तत्रैवोत्तरवेदिप्राप्तेः प्रथमोत्तमयोस्तत्पर्युदासानुपपत्तेः प्रथमोत्तमे विषयस्ततश्च तत्रैव प्राप्ताया उत्तरवेदेस्तत्रैव निषेधाद्विकल्पः । द्वाभ्यामेतीत्याद्यर्थवादस्तु लक्षणया प्रथमोत्तमपर इति प्राप्तौ, लक्षणाविकल्पयोरन्याय्यत्वान्मध्यम एव तद्विषयः । ततश्च प्रथमोत्तमयोरुत्तरवेद्यप्राप्त्या तयोस्तन्निषेधो नित्यानुवादः । तत्प्रयोजनं चोपात्रवपन्तीत्यादेर्वरुणप्रघासावान्तरप्रकरणबाधः । तद्बाधाभावे हि तदवान्तरप्रकरणपठिताया उत्तरवेदेस्तन्मात्राङ्गत्वप्रसक्त्या त्रिषु पर्वसु निषेधो नित्यानुवादस्स्यान्न द्वयोः । तद्बलात्तु अवान्तरप्रकरणबाधान्महाप्रकरणेन सर्वपर्वाङ्गत्वप्रसक्तौ मध्यमयोरुत्तरवेद्युपसंहारो युज्यते । न चैवं प्रथमोत्तमयोः पर्युदासेनावान्तरप्रकरणबाध इवोत्तरवेद्युत्पत्तिविनियोगविध्योर्मध्यममात्रविषयत्वमपि सिध्यतीति द्वयोः प्रणयन्तीति व्यर्थमिति वाच्यम् ; उत्तरवेद्यामग्निं निदधातीत्यनेन हि उत्तरवेदेर्विधिर्न निधानानुवादेन ; निधानमात्रे तत्प्राप्त्यापत्तेः । नाग्निनिधानानुवादेन, विशिष्टोद्देशासम्भवात् । नाग्निमात्रानुवादेन. गार्हपत्यादावपि उत्तरवेद्यापत्तेः । किन्तु अतिदेशप्रवृत्तेः पूर्वमुत्तरवेदिविशिष्टं प्राकृतनिधानमेवाग्न्युद्देशेन विधीयते । उत्तरवेदिप्राप्तिमात्रं तत्फलम् । अतश्चौपदेशिकप्रणयनविध्यभावे प्रणीताग्निनिधान इव कपालतापाद्यर्थाग्नि[3]निधानेऽपि-

[1] स्तुतिः. [2] इति विषयसंशये. [3] कपाले होमार्थमग्नि.

चोदकप्राप्ताग्निप्रणयनव्यतिरिक्ताग्निप्रणयनविधायकत्ववत् प्रत्य-

तदापत्तिः । औपदेशिकप्रणयनाविधिसत्त्वे तु तस्यैव पुरस्स्फूर्तिकस्य देशापेक्षायामातिदेशिकविधित पूर्वमुत्तरवेदिरूपदेशविधानान्न तापाद्यर्थाग्नि[1]निधाने उत्तरवेद्यापत्तिः । अत एवौपदेशिकप्रणयनाविधिसत्त्वेऽपीतरपर्वणोरातिदेशिकप्रणयने उत्तरवेदिस्स्यादित्यपास्तम् । औपदेशिकप्रणयनस्य पुरस्स्फूर्त्या तत्रैवोत्तरवेदिविधानादिति वार्तिकोक्तदूषणत्यागेन भाष्यानुसारी पन्थाः । वार्तिकानुसारी तु—प्राकृतं सौमिकं वा प्रणयनमिति प्राप्ते, न सौमिकम्, अनुपस्थितत्वात्; नापि प्राकृतम्, तस्याहवनीयोत्पादकत्वेन आहवनीयापादानकत्वासम्भवात् । 'आहवनीयाद्वावग्नी प्रणयतोऽध्वर्युश्च प्रतिप्रस्थाता च' इति शाखान्तरवचने प्राकृतप्रयणनोत्तरमाहवनीयापादानकप्रणयनान्तरविधित्वावगतेः, साकमेधेऽपि बोधायनादिकल्पसूत्रानुसारेण तादृशप्रणयनान्तरविध्यवगतेः, ताभ्यामेकवाक्यतया 'द्वयोः प्रणयन्ति' इत्यस्यापि तादृशप्रणयनविधायकत्वनिश्चयेन प्राकृतप्रणयनार्थकत्वानुपपत्तेः । तस्मादप्राकृतमपूर्वं प्रणयनमत्र विधीयमानं द्वाभ्यामित्याद्यर्थवादान्मध्यमयोरेव तस्य चापेक्षितो देश उत्तरवेदिरुक्त[2]वाक्याभ्यामुत्पत्तिविनियोगाभ्यां विधीयत इति तयोरपि मध्यमविषयत्वमेव । एवंच प्रथमोत्तमयोस्तत्प्रतिषेधो नित्यानुवादो भाष्यमत इवावान्तरप्रकरणबाधार्थः । याज्ञिकास्तु पशुबन्धवत् सौमिकानेव धर्माननुतिष्ठन्ति, उत्तरवेदिपरिमाणमात्रं शम्यामात्रमौपदेशिकं कुर्वन्ति । तन्मते प्रणयन्तीति बहुवचनमपि ब्रह्महोत्रादिसत्त्वादुपपद्यत इति सर्वमेतत्सप्तमतृतीये स्थितम् । एवंच वार्तिकोक्तिमाश्रित्याह—**प्रणयनविधायकत्ववदिति** । नेह नानेत्यादिश्रुत्या साक्षिस्वरूपे तदन्यसर्वनिषेधेन विश्वसत्त्वयोस्सम्बन्धस्यापि निषेधाद्विश्वसत्त्वश्रुतेर्न त्रिकालनिषेधाप्रतियोगित्वम्, तात्त्विकसत्त्वसम्बन्धो वा विश्वस्मिन्विषय इत्याशये-

[1] तादृशार्थाग्नि. [2] वेदिरुत्तर.

क्षप्राप्तव्यावहारिकसत्त्वविलक्षणत्रिकालनिषेधाप्रतियोगित्वरूपस-त्त्वप्रमापकत्वं प्रकृतेऽस्त्विति चेन्न; त्रैकालिकसत्त्वनिषेधकश्रुति-विरोधेन विश्वसत्यत्वश्रुतेः त्रैकालिकसत्त्वपरत्वाभावात् । न च वैपरीत्यमेव किं न स्यात् विनिगमकाभावादिति वाच्यम्; तात्पर्यान्यथानुपपत्तिगतिसामान्यानामेव विनिगमकत्वात् । अद्वै-तश्रुतिर्हि षड्विधतात्पर्यलिङ्गोपेता । तत्र त्रिविधं तात्पर्यलिङ्गम्— प्रामाण्यशरीरिघटकमर्थानिष्ठमज्ञातत्वं, अबाधितत्वं, प्रयोजन-

---

नाह—**न त्रैकालिकेति** । त्रैकालिको यस्सत्त्वनिषेधस्त्वसमानाधिक-रणात्यन्ताभावप्रतियोगित्वं तद्बोधकनेहनानेत्यादिश्रुतिविरोधेनेत्यर्थः । **तात्पर्येति** । तात्पर्यग्राहकलिङ्गषट्केत्यर्थः । अन्यथानुपपत्तिश्च वक्ष्य-माणा । गतिसामान्यमद्वैतावगतिरूपकार्येण सर्वेषां वेदान्तानां समा-नत्वं, षण्णां लिङ्गानां पञ्च स्वसामग्रीबलान्निर्णीयन्ते, उपपत्तिरूप[1]-मबाधितत्वं तु वक्ष्यमाणानुपपत्तिगतिसामान्याभ्यामिति षण्णां निर्ण-येन तात्पर्यनिश्चय इति वक्तुं लिङ्गानां तात्पर्योपयोगितां घटय-न्विवेकमाह—**तत्र त्रिविधमिति । प्रामाण्यशरीरेति** । ज्ञाते बाधिते निष्प्रयोजने वा विषये प्रमातृभिः प्रमाणं न व्याप्रियत इति याद्-शविषयकज्ञानमुद्दिश्य प्रमाणव्यापारे प्रवृत्तिः, तादृशविषयकज्ञानमेव प्रमेत्युच्यते । तथाच ज्ञाताद्यर्थे दैवात्प्रमाणजन्यमपि ज्ञानं न[2] प्रमा, प्रमाणध्वंससंयोगादिवत् । अतोऽज्ञाताबाधितसप्रयोजनार्थविषयकधीरूप-प्रमानुकूलशक्तिमत्त्वरूपे तात्पर्ये घटकत्वेनाज्ञातत्वादित्रयोपयोगः । इत्थं च ज्ञातत्वाद्येकैकलिङ्गमात्रेण यत्परेण 'यजमानः प्रस्तरः' इत्यादौ तात्पर्यमाशङ्कितम्, यच्चोपपत्त्याद्येकैकमात्रेण विश्वं सत्यमित्यादौ तच्छङ्किष्यते, तद्भ्रान्त्यैवेति बोध्यम् । अतएव "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्र-

---

[1] उपपत्तिसत्त्व. [2] प्रमा इति-पा.

वत्त्वं च । त्रिविधं तु शब्दनिष्ठमतिप्रसङ्गवारकं—उपक्रमोपसंहारयोरैकरूप्यं, अभ्यासः, अर्थवादश्चेति । तत्र शब्दनिष्ठलिङ्गत्रये तावन्न विवादः, सर्वासामेवोपनिषदामेवं प्रवृत्तत्वात् । मानान्तरासिद्धतया मोक्षहेतुज्ञानविषयतया च अज्ञातत्वं सप्रयोजनत्वं च निर्विवादमेव अबाधितत्वमात्रं सन्दिग्धम् । तच्चान्यथानु-

माणं बादरायणस्यानपेक्षत्वात्'' इति जैमिनीयसूत्रे प्रमात्वशरीरघटकविषयेऽबाधितत्वं प्रविष्टमित्याशयेन औत्पत्तिक इत्यनेन कारणदोषोऽव्यतिरेक इत्यनेन बाधक[1]ज्ञानाभावो विवक्षितः । अज्ञातत्वं प्रविष्टमित्याशयेन अनुपलब्ध इति, सप्रयोजनत्वं निविष्टमित्याशयेनार्थ इत्युक्तम् । उक्तं च शास्त्रदीपिकादौ । विशेषणत्रयेणाबाधितागृहीतार्थग्राहि ज्ञानं प्रमाणमिति [2]प्रमाणलक्षणं सूचितमिति भावः । एवंच लिङ्गशब्दस्तत्र विशेषणतया ज्ञापकत्वात्प्रयुज्यत इति बोध्यम् । **अतिप्रसङ्गवारकमिति** । यत्र पूर्वत्रिकं द्वयोरर्थयोरस्ति, अभ्यासादित्रयान्यतमच्च एकत्रैवार्थे, तत्राभ्यासाद्यन्यतमहीनार्थेऽपि तात्पर्यापत्तिरूपस्यातिप्रसङ्गस्य, अभ्यासादिहीनेऽर्थेऽपि तात्पर्येऽभ्यासादिवैयर्थ्यापत्त्या वारकमित्यर्थः । एवं चेदं वाक्यं यद्येतदर्थतात्पर्यकं न स्यात्तदा एतदर्थेऽभ्यासादि युक्तं न स्यात् । एतदर्थतात्पर्यकमिदं नार्थान्तरतात्पर्यकमेकवाक्यत्वेन गृहीतत्वादित्यादितर्कावतारे आपाद्याभावनिश्चयादिविधयाभ्यासादिनिश्चयस्य तात्पर्यनिश्चयोपयोगितेति । यत्रोक्तातिप्रसङ्गस्तत्रैवाभ्यासादेस्तद्वारकतयोपयोग इति ध्येयम् । ऐकरूप्यमेकार्थनिष्ठता । यथा 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रमस्य 'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' इत्युपसंहारस्य चाद्वैतनिष्ठता । अभ्यासोऽनन्यपरपुनश्श्रवणम् । यथा उक्तवाक्यस्य नवधा श्रवणम् । अर्थवादो 'येनाश्रुतं श्रुतम्' इत्यादिप्राशस्त्यबोधकं वाक्यम् अद्वैतब्रह्मप्राप्तिसाधनश्रवणादौ प्रवर्तकत्वादद्वैतब्रह्मतात्पर्यग्राहकम् । यद्य

[1] बाधकाज्ञान इति पा. [2] लक्षणं इति—पा.

पपत्तिगतिसामान्याभ्यां च निर्णीयते। न हि सर्वप्रपञ्चनिषेधरूपमद्वैतं व्यावहारिकम्। येन तत्र श्रुतेर्व्यावहारिकं प्रामाण्यं स्यात्। अतस्तत्र तात्त्विकमेव प्रामाण्यम्। द्वैतसत्त्वं तु व्यावहारिकम्। अतस्तत्र न श्रुतेस्तात्त्विकं प्रामाण्यम्, परस्परविरुद्धयोर्द्वयोस्तात्त्विकत्वायोगात्, वस्तुनि च विकल्पासम्भवात्, तात्त्विकव्यावहारिकप्रामाण्यभेदेन च व्यवस्थोपपत्तेः, अतत्परत्वेनावधारितस्य विश्वसत्यत्ववाक्यस्यैवान्यथा व्याख्यातुमुचितत्वात्। तथाहि चतुर्धा हि सामानाधिकरण्यम्; अध्यासे 'इदं रजतम्' इत्यादौ, बाधायां 'स्थाणुः पुमान्' इत्येवमादौ, विशेषणविशेष्य-

---

प्यज्ञातत्वादित्रयविशिष्टार्थप्रमापकत्वरूपं तात्पर्यमभ्यासादिहीनार्थेप्यज्ञातत्वादित्रयनिर्णये शक्यं निर्णेतुम्; तथापि तादृशार्थे प्रयोजनवत्त्वाद्यभावेनिर्णायकतयाऽर्थांतरीयाभ्यासादेरज्ञातत्वादित्रयाभावनिर्णयद्वारा उक्ततात्पर्याभावनिर्णायकत्वमिति ध्येयम्। अन्यथाऽनुपपत्तिं विवेचयति— **न हि सर्वेत्यादि**। द्वैतस्य तात्त्विकत्वे व्यावहारिकत्वे वा तद्बुद्धौ सत्यां व्यावहारिकाद्वैतबुद्ध्यसम्भवात्। न च तस्यामसत्योमेवाद्वैतबुद्धिरिति वाच्यम्; नाहं ब्रह्मेत्यादिधीरूपायास्तस्यास्सर्ववदा सम्भवात् तां बाधित्वा श्रुत्यादिबलवत्प्रमाणेन तदुत्पादे च द्वैतस्यातात्त्विकत्वं सिद्धमिति भावः। **सामानाधिकरण्यमिति।** समानविभक्तिकमिथस्साकाङ्क्षनामद्वयत्वरूपं पदयोस्सामानाधिकरण्यमित्यर्थः। **अध्यास इति।** भिन्नसत्ताकयोस्तादात्म्यबोधकाकाङ्क्षाघटितमित्यर्थः। **बाधायामिति।** बाध्यमानतादात्म्योपलक्षितस्याधिष्ठानस्य बोधकाकाङ्क्षाघटितमित्यर्थः। [1]स्थाणुः पुमानित्यादेः स्थाणुत्वेन ज्ञातः पुमानित्यर्थकत्वात्। [2]तत्स्थाणुतादात्म्येन बाध्यमानेनोपलक्षितः पुमानधिष्ठानं प्रतीयत इति भावः **विशेषणविशेष्यभावेनेति।** समानसत्ता-

---

[1] तत्रस्थाणुः. [2] स्थाणुतादा.

भावे 'नीलमुत्पलम्' इत्यादौ अभेदे 'तत्त्वमसि' इत्येवमादौ। अत्र च बाधायामध्यासे वा सामानाधिकरण्योपपत्तेर्न सत्यत्वबोधकश्रुतेः षड्विधतात्पर्यलिङ्गोपेताद्वैतश्रुतिबाधकत्वम्। नन्वात्मन आनन्दत्वबोधिका श्रुतिरपि 'सुखं सुप्तोऽस्मि' इति साक्षिप्रत्यक्ष-

---

कयोस्तादात्म्यबोधकाकाङ्क्षाघटितमित्यर्थः। **अभेदेनेति।** अखण्डार्थबोधकाकाङ्क्षाघटितमित्यर्थः। **अध्यासे वेति।** वाकारो व्यवस्थितविकल्पः। शुक्तिरूप्यादौ विश्वान्तर्गते बाधिते बाधायां अबाधिते वियदादौ त्वध्यासे सामानाधिकरण्यमित्यर्थः। यत्तु—"न हि सर्वेत्यादिना बाधिततया प्रतीयमानस्यापि वाक्यार्थत्वमर्थान्तरानुपपत्तेरित्युक्तम्, तथाच त्वन्मते तत्त्वमसीत्यादौ तत्त्वंपदवाच्ययोरैक्यमपि वाक्यार्थस्यात्, अर्थान्तरानुपपत्तेः। अथ लक्षणया शुद्धयोरैक्यरूपमर्थान्तरमुपपद्यत इत्युच्यते, तर्ह्यद्वैतवाक्येऽपि स्वतन्त्राद्वितीयमर्थोऽस्तु। अन्यथा 'यजमानः प्रस्तरः' इत्यादेर्यजमानप्रस्तरयोः व्यावहारिकाभेदोऽर्थोऽस्तु। प्रत्यक्षादेस्तु प्रातीतिकस्तयोर्भेदो विषयः, तत्त्वमसीत्यादेरपि वाच्ययोस्तात्त्विकाभेदः, प्रत्यक्षादेस्तु व्यावहारिकभेद इति स्यात्। गतिसामान्यं तु अभ्यासपर्यवसन्नमबाधितत्वासाधकम्, त्वन्मते सर्ववेदान्तवाक्यानामभ्यस्तानामप्यखण्डार्थत्वात्। व्यावहारिकतात्त्विकरूपविषयभेदेन श्रुत्योर्व्यवस्थोक्तिर्न युक्ता, अन्योन्याश्रयात्। विनिगमकाभावात् अध्यासे बाधायां वा सामानाधिकरण्यमयुक्तम्, तयोरद्याप्यसिद्धेः" इति तत्तुच्छम्, यदि हि वाच्ययोरैक्ये उपक्रमादिकं स्यात्, न स्याच्च 'प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते सोऽयमात्मा स विज्ञेय' इत्यादिश्रुतिः तदा तादृशैक्यं वाक्यार्थस्यात्। 'आत्मैवेदमग्र आसीन्नान्यत्किञ्चन मिषत्' इत्यादिनिष्प्रपञ्चात्मोपक्रमादिसत्त्वात्, उक्तश्रुतेर्मन्दमतिकृतायां 'विश्वं सत्यमित्यादिश्रुतिबाधितत्वशङ्कायाश्च व्यावहारिकतात्विकविषयभेदव्यवस्थया परिहारात्, अद्वितीयात्मैव तत्त्वमसीत्यादेरर्थः! अतएव

स्वतन्त्र एक एवेत्येवंरूपं स्वतन्त्राद्वितीयमपि न तदर्थः । यजमानप्रस्तरयोस्तु न व्यावहारिकाभेदो वाक्यार्थः, तं विनाऽपि गौणार्थद्वारा स्तुतिबुद्ध्युपपत्तेः । अन्यथा तयोर्धर्मसाङ्कर्यं व्यावहारिकं प्रतीयेत । एकनाशेऽप्यपरावस्थित्यनुपपत्तेश्च । गतिसामान्यं तु अबाधितत्वबोधकमेव, अद्वैतबोधकानि सर्वशाखागतानन्तवाक्यानि यद्यद्वैत[1]तात्पर्यकानि न स्युः, तदा लक्षणान्यशेष[2]त्वादिकल्पनादुष्टानि स्युरित्यादि तर्कोपस्थापकत्वात्, तादृशवाक्यानां मिथस्संवादविसंवादाभावरूपपरीक्षासम्पादकत्वाच्च । तथाच वाक्यानामखण्डार्थत्वाद्गतिसामान्यं नाबाधितत्वबोधकमित्युक्तिर्मौढ्यादेव । न ह्यबाधितत्वप्रकारेण प्रमापकं वाक्यमिति नस्सम्मतम् । तात्त्विकातात्त्विकविषयतया श्रुत्योर्व्यवस्था तु युक्तैव, अद्वैतश्रुतिः तात्त्विकप्रमाणम्, अव्यावहारिकप्रमाणत्वे सत्यज्ञातसप्रयोजनार्थकश्रुतित्वात्, तात्त्विकप्रमाणत्वेन पराभ्युपगतश्रुतिवत् । अन्यथा प्रामाण्यानुपपत्तिरनुकूलतर्कः । न च विरोधपरिहाराय 'विश्वसत्त्वश्रुतिः न तात्त्विकप्रमाणं ' तात्त्विकनिषेधप्रतियोगिविषयकत्वादित्यनुमानस्य अवश्यापेक्षणीयत्वं निषेधतात्त्विकत्वं च पूर्वानुमानादिति परस्पराश्रय इति वाच्यम्; विश्वसत्त्वश्रुतिविरोधो हि पूर्वानुमाने विश्वसत्त्वश्रुतेस्तात्त्विकप्रमाणत्वनिश्चयाधीनः, स च नास्त्येव, अद्वैतश्रुताविव तस्याम व्यावहारिकप्रमाणत्वानिश्चयेन उक्तहेत्वभावात् । उक्तप्रमाणत्वसंशयस्तु पूर्वानुमाने साध्यसंशयसम्पादको न विरोधी । तवाप्रामाण्य[3]संशयस्तु उक्ततर्कमूलकविशेषदर्शनादिना निरसनीय इत्यन्योन्याश्रयाभावात् । किंच्च अद्वैतं यदि प्रातीतिकं स्यात् व्यावहारिकं वा स्यात् तदा 'अदृश्यमव्यवहार्यम्' इत्यादिश्रुत्यर्थो न स्यात् मोक्षहेतुधीविषयो न स्यात् । व्यावहारिकबन्धनिवृत्तेर्व्यावहारिकतत्त्वज्ञानादनुपपत्तेः उप-

---

[1] तात्पर्यजनकानि स्युः. [2] दोष. [3] न विरोधी तत्र प्रामाण्य. न विरोधितयाप्रामाण्य. वा.

सिद्धानन्दानुवादिनी सत्त्वश्रुतिवद्भवेदिति चेन्न; साक्षिण उपहितानन्दविषयत्वेन श्रुतेश्च निरूपाधिकानन्दविषयत्वेन भिन्नविषयत्वादनुवादत्वायोगात्। तया हि स्वरूपानन्दो गृह्यते। स्वरूपं चाज्ञानोपहितमेव साक्षिविषयः। ननु तत्त्वमसीत्यादौ नवकृत्वोऽभ्यासवत् पिपासितस्य जलगोचरप्रमाणसम्प्लववदैक्ये षड्विधतात्पर्यलिङ्गवद्भावरूपाज्ञाने प्रत्यक्षासिद्धे 'तम आसीत्' इत्यादिश्रुतिवत् सत्त्वश्रुतिर्दार्ढ्यार्थेति चेन्न; अशेषविशेषग्राहिप्रत्य-

---

पत्तौ वा मोक्षहेतुधीविषयस्यापि बाधापत्तेः, बाध्यबाधकधीविषययोस्समानसत्ताकत्वेन विनिगमकाभावात्। तस्मान्ना[1]तात्त्विकम्। उक्तश्रुतिधीविषयत्वाभ्यां अद्वैतवाक्यार्थरूपमस्खण्डं ब्रह्म यदि व्यावहारिकं तदा बाध्येत। न च बाध्यते, साक्षिस्वरूपत्वादनुपलभ्यमानबाधकत्वात्। तस्मान्न व्यावहारिकमित्यादियुक्तिसचिवोक्तानुमानादद्वैतश्रुतेस्तात्त्विकं प्रमाण्यम्। द्वैते तु नैवं युक्तिः। प्रत्युत द्वैतं यदि तात्त्विकं स्यात् तदा दृश्यं न स्यात्, संसृष्टं न स्यात्; दृश्यत्वात्संसृष्टत्वाच्च न तात्त्विकम्, दृगादिसंसर्गस्य निर्वक्तुमशक्यत्वादित्यादियुक्तिसचिवानुमानादिना विश्वसत्यत्वश्रुतेरतात्त्विकविषयकत्वसिद्धिः। अतएवाध्यासबाधयोस्सामानाधिकरण्यमित्यपि निश्चेतुं शक्यमेव; प्रपञ्चस्य व्यावहारिकत्वनिश्चयेनाध्यासत्वादिनिश्चयात्। न च व्यवहारदशायामध्यासत्वादिनिश्चयाभावेन तादृशसामानाधिकरण्यानुपपत्तिरिति वाच्यम्; अध्यासत्वादिघटितरूपेण हि विश्वं सत्यमित्यादिवाक्यान्न बोधः, किन्तु वस्तुगत्या भिन्नसत्ताकयोस्तादात्म्यं बाध्यमानम्, तादात्म्यं वा तादात्म्यत्वेन बुध्यते विचारदशायामेव[2] अध्यासत्वादिनिर्णयेन उक्तसामानाधिकरण्यनि[3]रासः। अतएव शुक्तिरूप्याद्यंश एव उक्तवाक्यस्य बाधायां सामानाधिकरण्यमित्युक्तम्। **भिन्नविषयत्वादिति।** न चैवं विश्वं

---

[1] तस्मान्न. [2] इति. [3] निर्णयः.

क्षप्राप्ते तदार्ढ्यार्थमन्यानपेक्षणात् । पिपासितस्य शब्दालिङ्गानन्तरं जले प्रत्यक्षमपेक्षितम्, न तु प्रत्यक्षानन्तरं शब्दलिङ्गे । न च तर्हि 'तम आसीत्' इत्यादेर्न किञ्चिदवेदिषमिति प्रत्यक्षसिद्धाज्ञानादार्ढ्यार्थत्वं न स्यादिति वाच्यम्; 'तम आसीत्' इत्यस्य सृष्टिपूर्वकालसम्बन्धित्वेनाज्ञानग्राहितया सुषुप्तिकालसम्बन्धित्वे नाज्ञानग्राहकं प्रत्यक्षमपेक्ष्य भिन्नविषयत्वेनैव प्रामाण्यसम्भवात् ।

सत्यमित्यादिश्रुतेरपि प्रत्यक्षागृहीततात्त्विकसत्त्वग्राहकत्वमिति वाच्यम्। अन्यथानुपपन्नाद्वैतश्रुतिविरोधादिना निरस्तत्वात् । **दार्ढ्यार्थमिति** । फलपर्यन्तप्रत्यक्षे भ्रमत्वशङ्काविरहस्य सिद्धत्वात् तद्रूपदार्ढ्यसिद्ध्येऽन्यानपेक्षेति भावः । **सृष्टिपूर्वकालेति** । 'नासदासीन्नो सदासीत्तम आसीत्' इत्यादिश्रुतौ तदानीमिति पदसत्त्वात्तदर्थप्रलया[1]भिन्नातीतकालसत्त्वमासीदित्यनेनोक्तमिति भावः । यद्यपि सदसद्विलक्षणकार्यत्वादिति हेतुकानुमानादिनापि प्रपञ्चे सदसद्विलक्षणकारणपूर्वकत्वग्रहणात्सृष्टिपूर्वकालीनत्वेनाप्यज्ञानं गृहीतम्, तथाऽपि विपरीतानुमानादिना तादृशानुमानाद्यप्रामाण्यशङ्कावतामनिपुणपुरुषाणामननुवादिकैवोक्तश्रुतिः ॥

यत्तु 'एतावन्तं कालं ब्रह्म नावेदिषम्' इत्यनुभवेन ब्रह्मधीपूर्वकालमात्रगतत्वेनाज्ञानग्रहणादुक्तश्रुतिरनुवादिकेति, तत्तुच्छम्; ब्रह्मधीपूर्वकाल[2]वृत्तित्वेन ग्राहकानुभवेन प्रलयवृत्तिताग्राहकश्रुतेरनुवादत्वायोगात् । उक्तकाल[3]त्वप्रलयत्वरूपप्रकारभेदात् । किञ्चोक्तसाक्ष्यनुभवस्योक्तश्रुतिग्राह्यसदसद्विलक्षणत्वाग्राहकत्वात्, भ्रमप्रमासाधारणत्वेन भ्रमत्वशङ्कास्पदत्वेनोक्तश्रुतिसापेक्षत्वाच्च, नोक्तश्रुत्यनुवादकताप्रयोजकत्वम् । अत एव ब्रह्म न जानामीति साक्ष्यनुभवस्य तच्छङ्काप्यसङ्गतैवाभ्युपेत्याचार्यैस्समाहिता । सत्त्वप्रत्यक्षे तु न भ्रमत्वशङ्केति न दार्ढ्यार्थं श्रुतिसापेक्षता । एतेन प्रळयकालीनसाक्षिणा सृष्टिपूर्वकालीन-

---

[1] प्रलयभिन्नेति-पा. [2] काला. [3] उक्तकाले.

त्वेनाज्ञानं गृह्यत इत्यपि परास्तम् । तत्तत्कालत्वेन सुखादिकालस्य साक्षियोग्यत्वेऽपि सृष्टिपूर्वकालत्वप्रळयत्वादिरूपोक्तश्रुतिग्राह्यतावच्छेदकरूपेण कालस्य तद्योग्यत्वे मानाभावादिति ॥

'अश्वस्तूपरो गोमृगस्ते प्राजापत्याः' इत्यश्वमेधे पशुत्रयं विहितम् । तत्रैकप्रयोगत्वेन तत्रेणाध्रिगुप्रैषे पठनीये अश्वस्य चतुस्त्रिंशद्वङ्क्रिकत्वादितरयोः प्रत्येकं षड्विंशतिवङ्क्रिकत्वात् पूर्वाधिकरणरीत्या समस्यवचने षडशीतिरेषां वङ्क्रय इति प्राप्तम् । तत्र 'चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिस्समेति' इत्यौपदेशिकेन मन्त्रेण षड्विंशतिपदयुक्तस्याध्रिगुप्रैषान्तर्गतमन्त्रस्यातिदेशिकस्य बाधात् अश्वस्य चतुस्त्रिंशदित्यादिमन्त्रः, इतरयोस्तु द्विपञ्चाशदनयोर्वङ्क्रय इति समास इत्यपि प्राप्तम् । तत्र 'न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयात्' इति प्रकरणे समाम्नातवाक्ये किं विधीयत इति चिन्तायाम्, न तावत्प्रतिषेधः; स हि चतुस्त्रिंशत्पदमात्रस्य, तद्युक्तर्चो वा नोभयम्, विहितनिषेधेन विकल्पापत्तेः । अन्ते ऋग्लक्षणापत्तेः ऋक्प्रतिषेधे षडशीतिरिति समासस्यैव प्राप्तेष्षड्विंशतिपदयुक्ताध्रिगुप्रैषस्याप्राप्त्या तस्यापि विधाने वाक्यभेदापत्तेश्च । षड्विंशतिपदे षडशीतिसमासपदोपेताध्रिगुलक्षणयानुवादत्वोक्तौ लक्षणादोषात्, अतो न गिरा गिरेतिवत् न चतुस्त्रिंशदिति निषेधानुवादः षड्विंशतिपदस्य चतुस्त्रिंशत्पदस्थानीयत्वसिद्ध्यर्थः । षड्विंशतिरिति ब्रूयादिति च 'ऐरं कृत्वोद्धेयम्, इतिवद्विधिः । तद्बलादेव षड्विंशतिपदे अश्ववङ्क्रिसङ्ख्यालक्षणा । एवकारस्तु न विधिविरोधी, मानाभावात् । 'अत्र ह्येवावपन्ति' इत्यादौ [1]तस्यातत्त्वात्, षड्विंशतिपदायोगव्यावृत्तिरूपस्य चतुस्त्रिंशत्पदरूपान्ययोगव्यावृत्तिरूपस्य वा षड्विंशतिपदविधानफलस्यानुवादतया एवकारसार्थक्योपपत्तेश्च । तस्मादश्वे 'षड्विंशतिर्वाजिनो देवबन्धो' रित्यादिमन्त्रः, इतरयोस्तु

[1] तस्यतत्त्वात् इति पा.

प्राकृत एव 'द्विपञ्चाशदनयोर्वङ्क्रयः' इत्यादिमन्त्रस्समासेनेति प्राप्ते, निषेधेनैवान्ययोगव्यावृत्त्यनुवादसिद्धेरयोगव्यावृत्त्यनुवादस्यापि व्यर्थत्वात्, पदमात्रेण स्तुत्यनुपपत्तेश्च नैवकारोऽनुवादः 'नापि विधायकः; षड्विंशतिपदस्य पक्षे प्राप्तया तदयोगाप्रसक्तेरयोगव्यावृत्तिविध्यसम्भवात् षड्विंशति पदविधानावश्यकत्वेन तत एव तस्याः प्राप्तत्वात्। अतएवान्ययोगव्यावृत्तेरपि न विधायकः, तत्त्वेऽपि विकल्पापत्तेश्च। अतएव अत्र ह्येवावपन्तीत्यादावेवकारार्थविधौ 'न तौ पशौ' इत्यादिवद्विकल्पापत्तिरुक्ता कौस्तुभे !!

वस्तुतस्तु निषेधसमभिव्याहृतैवकारस्थले प्रतिप्रसवरूपताऽनुवादरूपता वा व्युत्पत्तिसिद्धा। न च वैशेषिकमन्त्रे षड्विंशतिपदस्य प्रतिप्रसवस्सम्भवति। न वा प्राकृत एवाध्रिगौ षडशीतिपदप्राप्तौ तत्प्रतिप्रसवः; तथात्वे 'न चतुस्त्रिंशदि' ति निषेधानुवादानुपपत्तेः, वैशेषिकमन्त्रेणाश्वांशे प्राकृताध्रिगुबाधेन तत्र षड्विंशतिपदप्रतिप्रसवानुपपत्तेश्च। तूपरगोमृगयोर्द्विपञ्चाशत्पदप्राप्तौ तत्र षड्विंशतिपदप्रतिप्रसवेऽपि निषेधानुवादानुपपत्तितादवस्थ्याच्च। तस्मादेवकाररूपतात्पर्यग्राहकानुरोधात् षड्विंशतिपदे षडशीतिपदयुक्ताध्रिगुप्रैषलक्षणया तस्यैव प्रतिप्रसवरूपोऽनुवादः 'षड्विंशतिरित्येव ब्रूयादि' ति। 'न चतुस्त्रिंशदि' त्यत्र तु चतुस्त्रिंशत्पदे तदादिकमन्त्रलक्षणया तन्निषेधो विधीयते, तत्पदमात्रनिषेधे षड्विंशतिरित्येवेत्यादेरनुवादत्वानुपपत्तेः। मन्त्रनिषेधे तु [1]विहितप्रतिषेधाद्विकल्पसिद्धेः, अभावपक्षेऽतिदेशप्राप्तस्य षडशीतिपदयुक्ताध्रिगोरेव न्यायप्राप्तत्वेन तदनुवादत्वमुपपद्यते। आश्वलायनमते तु षड्विंशतिः। 'षड्विंशतिश्चतुस्त्रिंशदेषां वङ्क्रयः' इत्यादिरूपस्याध्रिगुप्रैषस्य षड्विंशतिपदेन लक्षणयानुवादः। एतेन एवकारयुक्तवाक्येनोक्तप्रैषस्य प्रतिप्रसवविधिः। वाचनिकेन वाऽध्रिगुप्रैषेण पाठप्राप्तस्य[2] वैशेषिकमन्त्रस्य बाधात् 'न चतुस्त्रिंशदि' ति निषेधो नित्यानुवादः।

[1] विवक्षित. [2] वा प्राप्तस्य.

ननु 'षड्विंशतिरस्य वङ्क्रयः' इति मन्त्रस्याश्वमेधे चोदकप्राप्तस्य 'चतुस्त्रिंशद्वाजिनो देवबन्धोः' इति वैशेषिकमन्त्रेणापोदितस्य

वैशेषिकमन्त्रस्य च चतुस्त्रिंशदित्यादेर्वाचस्तोमादौ विनियोगान्न वैयर्थ्यम् । एवञ्च विकल्पोऽपि नाष्टदोषदुष्टो भविष्यति । एवकारश्चायोगस्यान्ययोगस्य वा व्यावृत्त्यनुवाद इत्यपास्तम् । निषेधपूर्वकैवकारस्य स्वसमभिव्याहृतार्थानुवाद्यताज्ञापकत्वात् । यच्छब्दादिवत् विधिविरोधित्वात् । अतएव 'उपवासाः पतन्ति' इत्युक्ते उपवासानेव कुरु न गच्छेत्यत्र गमननिवृत्तिरेव विधेया, न तूपवास इति सर्वसिद्धम् । यत्र तु न निषेधपूर्वकैवकारो यथा 'त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् अत्र ह्येवापतन्ति' इत्यादौ तत्रैवकारसम्बन्धस्य विधानेऽपि न क्षतिः । प्रकृते विकल्पस्तु बहुवचनान्तपाशमन्त्रवन्न विरुध्यते, तदभावे तु वैशेषिकमन्त्रस्य प्रकरणबाधो दोषः । न चाध्रिगुप्रैषस्याविधेयत्वेऽपि एवकारार्थस्य वैशेषिकमन्त्ररूपान्यनिवृत्ते[1] र्विधेयत्वसम्भवेन न चतुस्त्रिंशदित्येवानुवादः किं न स्यादिति—वाच्यम्; तावतापि शास्त्रप्राप्तस्य निवृत्तिविधानेन विकल्पानपायात् । अतएवात्र ह्येवावपन्तीत्यादावप्राप्तपरिसङ्ख्यैवाङ्गीकृता कौस्तुभे । तन्नरत्नकारस्य तु तत्रैवकारार्थविधिमङ्गीकुर्वतस्तत्र विकल्पापत्तिः । तद्वदेवेहापि तदभावापत्तिः । न चैवमपि विनिगमनाविरह इति वाच्यम्; एवकारस्य अयोगान्ययोगव्यावृत्तिरूपसन्दिग्धार्थकत्वेन तद्युक्तवाक्यस्य चरमत्वेन च न चतुस्त्रिंशदित्यस्यैव निषेधविधायकत्वादिति नवमचतुर्थे स्थितम् । तथाच वैशेषिकमन्त्रेणापोदितस्य[2] प्राकृतमन्त्रस्य न चतुस्त्रिंशदित्यादिना यथा प्रतिप्रसवः, तथा मिथ्यात्वश्रुत्याऽपोदितस्य जगत्सत्यत्वस्य 'विश्वं सत्यम्' इत्यादिश्रुत्या प्रतिप्रसव इति न साऽनुवाद इति शङ्कते—**ननु षड्विंशतिरित्यादि । इति मन्त्रेति । इत्यादिमन्त्रेत्यर्थः ।**

[1] न्ययोगनिवृत्तेः. [2] णापादितस्य.

षड्विंशतिरित्येव ब्रूयादिति वचनवत् प्रत्यक्षप्राप्तजगत्सत्त्वस्य मिथ्यात्वश्रुत्याऽऽपाततोऽपोदितस्य प्रतिप्रसवार्थं सत्त्वश्रुतिरिति चेन्न ; मिथ्यात्वश्रुतेः प्रत्यक्षबाधकत्वाभ्युपगमे तस्या बलवत्त्वेन तद्विरोधात् सत्यत्वश्रुतेरन्यपरत्वाद्देवताधिकरणन्यायासम्भवाच्च प्रतिप्रसवार्थत्वस्य वक्तुमशक्यत्वात् । ननु सत्त्वप्रत्यक्षप्रामाण्ये तेनैव मिथ्यात्वश्रुत्यनुमानादिबाधः, तदप्रामाण्ये न तेन सत्वश्रुतेरनुवादकत्वम्—इति चेन्न ; प्रत्यक्षाप्रामाण्येऽपि तत्सिद्धबोधकस्यानुवादकत्वसम्भवात् । न हि प्रमितप्रमापकत्वमनुवादकत्वम्, किन्तु पश्चाद्बोधकत्वमात्रम् । पश्चात्त्वं च प्रमाणावधिकमप्रमाणावधिकं चेति न कश्चिद्विशेषः । न च श्रुतेस्सर्वसिद्धप्रमाणभावायाः सदर्थत्वायाननुवादकत्वाय च प्रत्यक्षाप्राप्ततात्त्विकसत्त्वविषयत्वमवश्यं वक्तव्यम् । तथाचाप्रमाणेन प्रत्यक्षेण कथं श्रुतेरनुवादकत्वमिति वाच्यम् ; सत्त्वांशस्य प्रत्यक्षसिद्धत्वेऽपि वाक्यार्थस्य

षड्विंशतिरित्येवेति । न चतुस्त्रिंशदिति ब्रूयादित्यादिः । अन्यपरत्वात् स्तुतिपरत्वात् । ननु स्तुतिपरादपि विश्वसत्त्ववाक्यात् 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादितो द्वारभूतवाक्यार्थ इव विश्वसत्त्वं सिद्ध्यतु, तत्राह—देवतेति । मानान्तरबाध्यार्थे तन्न्यायासम्भवः, प्रमापकत्वासम्भवेन तद्व्यवस्थापकत्वासम्भवादिति भावः । ननु भ्रमप्रत्यक्ष[1]प्राप्तार्थस्य श्रुतिविषयत्वे श्रुतेरप्रामाण्यं स्यादित्यत्र मदुक्तदूषणपर्यवसानम्, न तु प्रमितबोधकत्व[2]रूपस्यानुवादकत्वस्यानुपपत्तौ, तथाच नेदं समाधानं युक्तमिति चेन्न ; देवताधिकरणन्यायसिद्धं प्रमाण्यं विश्वसत्त्वांशे[3] श्रुतेर्न सम्भवतीति पूर्वमेवोक्तत्वात्, क्रियादिसमभिव्याहारसिद्धवाक्यार्थरूपस्तुत्यांशे प्रामाण्यस्य व्यावहारिकस्य वक्ष्यमाणत्वाच्च, प्रामाण्याभावस्यास्मदिष्टत्वेन तत्र दूषणपर्यवसानोक्तेरुन्मत्तप्रलापत्वात् । वाक्यार्थस्येति ।

---

[1] ननु प्रत्यक्ष. [2] प्रमितिबाधकत्व. [3] विश्वसत्तादौ.

क्रियादिसमभिव्याहारसिद्धस्यापूर्वत्वेन तद्विषयतयैवाननुवादकत्वोपपत्तावद्वैतश्रुतिविरुद्धतात्त्विकसत्त्वाविषयत्वकल्पनायास्तदर्थमयोगात्। परमार्थसद्विषयता तु सर्वश्रुतीनां शुद्धब्रह्मतात्पर्यकत्वेनैव। अवान्तरतात्पर्यमादाय व्यावहारिकसद्विषयतेति

स्तुत्यादिरूपस्येत्यर्थः। **क्रियादीति**। क्रिया प्रमिणन्तीत्यादिपदसमुदायलभ्यवाक्यादिरूपा, [1]आदिपदात् व्यावहारिकसत्त्वबोधकविश्वं सत्यमित्यादिसङ्ग्रहः। क्रियादिपदसमुदायलभ्यवाक्यार्थद्वारकं स्तुत्यादिरूपमपूर्वं विधिसमभिव्याहृतविश्वसत्त्वादिवाक्यप्रमेयमित्यर्थः। अथवा स्तुतिधीद्वारीभूतो न प्रमिणन्तीति अपूर्ववाक्यार्थः तस्य विश्वं सत्यमित्यादिवाक्ये सत्त्वा[2]द्विश्वसत्त्वांशेऽनुवादत्वेऽपि न क्षतिरित्यर्थः। यद्वा क्रिया भावना, आदिना तदंशस्वर्गादिरूपसाध्यादितद्बोधकपदसमभिव्याहारेण स्तुत्यादिरूपापूर्वार्थ एवार्थवादाधिकरणन्यायेनोक्तवाक्यप्रमेय इत्यर्थः। सदर्थत्वायेति—यदुक्तं तत्र सत्त्वं तात्त्विकत्वं व्यावहारिकत्वं वा, अन्त्ये तात्त्विकविषयत्वमवश्यमित्यसङ्गतं, आद्ये त्वाह—**परमार्थसद्विषयतेति**॥

ननु—'सत्यं ज्ञानम्' इत्यादिवाक्यस्यापि ब्रह्मविदाप्नोतीत्यादिक्रियासमभिव्याहारसत्त्वात् क्रियाघटितवाक्यार्थमादाय प्रामाण्यसम्भवाद्ब्रह्मणोऽपि तात्त्विकत्वासिद्धिः; किंच सत्यं ज्ञानमित्यादिवत्सिद्धार्थकान्यपि विश्वसत्यताबोधकानि 'विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान्। जहि प्रतीचोऽनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु' इत्यादीनि सन्ति। किञ्च त्वन्मते जरद्वादिवाक्यस्यापि लक्षणया अखण्डब्रह्मपरत्वसम्भवेन तद्विलक्षणं प्रामाण्यं न कर्मकाण्डे सिद्ध्यति। अवान्तरतात्पर्यविषयस्य बाधितत्त्वेन तमादाय ब्रह्मणि प्रामाण्यं [3]पर्यवसितमिति चेत्, भ्रान्तोऽसि, ब्रह्मविदाप्नोतीत्यादिवाक्ये हि न क्रियाघटितवाक्यार्थे तात्पर्यम्, ब्रह्मविदो

[1] प्रमिणन्तीत्यादिरूपा. [2] न सत्त्वा. [3] अपर्यवसित.

ब्रह्माज्ञाननिवृत्तिरूपायां परायां ज्ञातत्वेन तदसम्भवात्। अपितु तद्बोधनद्वारा ब्रह्म स्तुत्वा[1] सत्यत्वाद्युपलक्षितं तदज्ञातं ज्ञाप्यते। तथाचोपलक्षणतया सत्यत्वादिव्यावृत्तब्रह्मज्ञानाद्ब्रह्मसत्यत्वादिभ्रमसंशयनिवृत्तेः कथं न ब्रह्मसत्यत्वादेरुक्तवाक्यात्सिद्धिः? विश्वमाप्रा इत्यादिवाक्यस्य तु सिद्धार्थकत्वम्, आख्यातान्तपदार्थाघटितार्थकत्वं विधिवाक्यार्थापर्यवसितार्थकत्वं वा। नाद्यः, आप्रा इत्यादेराख्यातान्तस्य स्फुटत्वात्। व्याख्यातं च माधवीयभाष्यादौ—"विश्वमन्तरिक्षं च त्वं स्वेन महित्वा महिम्ना आपूरितवानिति, अन्यस्त्वावान् त्वदाश्रयो नकिर्नेति च सत्यमित्यर्थ इति जहीत्यादेरपि ये प्रातिकूल्येनाञ्चन्ति, ये च ताननु, ये च पराञ्चन्ति, तान् विघ्नभूतान् हत्वा विश्वं स्वकार्यसमर्थतया सत्यं कुरु। ततस्तत्स्वकार्याय विष्टं आविष्टमस्त्वित्यर्थः" इति। नान्त्यः, मन्त्रार्थवादानां प्रयोजनवदर्थपर्यवसानाय समभिव्याहृतविधिवाक्यार्थपर्यवसितद्रव्यदेवतास्तुत्यादिप्रतिपादकत्वावश्यकत्वात्। तथाचोक्तवाक्यानामपि प्रत्यक्षादिसिद्धसत्त्वांशेऽनुवादत्वेऽपि स्तुत्यादौ तद्द्वारभूतापूर्ववाक्यार्थे च व्यावहारिकप्रमाऽसम्भवान्न सत्यत्वप्रमापकत्वम्। किञ्च तेषामालोच्यमानोऽर्थस्त्वत्प्रतिकूल एव। तथाहि विश्वमन्तरिक्षं चापरिच्छिन्नेन स्वस्वरूपमहिम्ना त्वमाप्रा अतोऽन्यस्सर्वोऽपि त्वावान् त्वत्सम्बन्धी सन् सत्यं अद्धा साक्षात् त्वत्सम्बन्धं विना तु न किः न सत्यमित्यर्थः। मा किं मा किर्न[2] किरिति त्रयोऽपि वर्जन इति शाब्दिकाः। तथा विघ्नभूतानसुरान् हत्वा अस्मदनुकूलं विश्वं कुरु। तद्यद्यपि मिथ्या, तथापि त्वयोपादानेन सत्येन विष्टं व्याप्तं सत् सत्यमस्त्वित्यर्थः कृतधीगम्यः। जरद्ववेत्याद्ययुक्तम्; न हि जरद्ववादिवाक्ये अखण्डब्रह्मपरताग्राहकमुपक्रमाद्यस्ति, न वा स्वार्थानुष्ठानाधीनचित्तशुद्धिद्वारा ब्रह्मबोधतात्पर्यकत्वं कर्मकाण्डस्येव तस्य सम्भवति। बाधितार्थद्वारा कर्म-

[1] ब्रह्मस्तुत्या. [2] मा किं न किं न किः.

कर्मकाण्डप्रामाण्योपपादने वक्ष्यते । न च—प्रत्यक्षं स्वप्रामाण्यनिर्णयार्थं श्रुतिसंवादमपेक्षत इति न तेन श्रुतेरनुवादकत्वम् । अन्यथा सत्यं ज्ञानं, नेह नानेत्यादिश्रुतिरप्यनुवादिनी स्यात् । ब्रह्मसत्त्वस्य लोकतो भ्रमाधिष्ठानत्वेन लिङ्गेन च, मिथ्यात्वस्य दृश्यत्वाद्यनुमानेनावेदमूलप्रवाहानादिविज्ञानवादादिना च प्राप्ते

काण्डस्य ब्रह्मप्रमापकत्वं तु सम्भवत्येव; परमतात्पर्यविषयस्य ब्रह्मणोऽबाध्यत्वात्, बाधितेऽप्यर्थे पूर्वमबाधात्, 'सत्यस्य सत्यं, प्राणा वै सत्यं, तेषामेष सत्यः' इत्यादिश्रुतिभिः प्रपञ्चस्य न्यूनसत्त्वावगमाच्च, न्यूनसदर्थविषयकत्वरूपं व्यावहारिकं प्रामाण्यं कर्मकाण्डस्य सम्भवत्येव । त्वन्मते तु 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यादौ हे वसन्त इत्याद्यर्थवत्, तत्त्वमसीत्यादौ अतत्त्वमसीत्याद्यर्थवच्च. जरद्गवादिवाक्येऽपि तादृशार्थस्सम्भवत्येव ॥

लोकत इति । अज्ञोऽहं सन्निति प्रत्यक्षादिनेत्यर्थः । ननु 'सत्यं ज्ञानमनन्तम्' इत्यादिवाक्येन ज्ञानस्य विनाशित्वादिरूपान्तशून्यत्वप्रतिपादनात्कथमुक्तप्रत्यक्षेण तस्यानुवादकत्वमिति चेत्, तथापि सत्यत्वज्ञानत्वांशे सन्नहं जानामीत्यादिप्रत्यक्षेणानुवादत्वसम्भवात्, निरवयवद्रव्यत्वादिनाऽनन्तत्वस्याप्यनुमानसम्भवाच्च । **मिथ्यात्वस्येति** । सर्वदेशकालवृत्त्यत्यन्ताभावप्रतियोगित्वस्येत्यर्थः । तेन विज्ञानवादे ज्ञानातिरिक्तार्थस्यालीकत्वात् स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वाबोधकत्वेऽपि नासङ्गतिः । विज्ञानवादशास्त्रस्य वेदमूलकत्वे तादृशानुमानादिनेव तेनापि वेदस्य नानुवादत्वमत उक्तं **अवेदमूलेति** । यदि विज्ञानवादशास्त्रमाधुनिकं स्यात्तदा प्रवाहानादिवेदानुवादकतायां न प्रयोजकं, प्रवाहानादित्वात्तु भवेत्प्रयोजकमित्याशयनोक्तं—**प्रवाहानादीति** । ननु विज्ञानवादे घटाद्याकारज्ञानस्य मिथ्यात्वाप्रतिपादनात् नेह नाने ति श्रुत्या च तत्प्रतिपादनान्न तेन सोऽनुवाद इत्यतो **वादादिनेति** । आदिना शून्यवादपरि-

रिति वाच्यम्; यदि हि दृष्टेऽप्यर्थे प्रत्यक्षं स्वप्रामाण्यनिर्णयाय श्रुतिसंवादमपेक्षेत तदा श्रुतिसंवादविरहिणि दृष्टे कुत्रापि निश्शङ्कप्रवृत्तिर्न स्यात्। न स्याच्चैवं 'अग्निर्हिमस्य भेषजम्' इत्याद्यप्यनुवादकम्। न चेष्टापत्तिः; मानान्तरगृहीतप्रमाणभावप्रत्यक्षनिर्णीते मानान्तरस्याननुवादकत्वे जगत्यनुवादकत्वकथोच्छेदप्रसङ्गात्। न च 'सत्यं ज्ञानं, नेह नाना' इत्यादेरप्यनुवादकतापत्तिः। अनुवादकता हि न तावत्प्रत्यक्षेण; ब्रह्मत्वसामानाधिकरण्येन सत्त्वादिकं हि अनेन प्रतिपादनीयम्, तच्च न प्रत्यक्षगम्यम्। नाप्यनुमानेन,

ग्रहः। **ब्रह्मत्वसामानाधिकरण्येनेति**। ब्रह्मत्वसत्त्वयोस्सामानाधिकरण्यधीद्वारेत्यर्थः। **तच्च** तादृशप्रतिपादनं च। **गम्यमिति**। लभ्य[1]मित्यर्थः। ब्रह्म न सदित्यादिभ्रमनिवृत्तिरुक्तधीद्वारा जायमानात्सत्यत्वाद्युपलक्षिताखण्डविषयकज्ञानादेव न तु सन्नहमित्यादि प्रत्यक्षात्, तत्सत्वेऽपि तादृशभ्रमानुवृत्तेरित्युक्तप्रत्यक्षं नोक्तश्रुतिसमानाकारं, न वा तत्समानप्रयोजनमिति, न तेन तस्यानु[2]वादकतेति भावः। अथ भिन्नाकारत्वेऽपि समानप्रयोजनकं ब्रह्म सत्यं भ्रमादिष्ठनत्वादित्यनुमानमनुवादकता[3]प्रयोजकमस्तु, तत्राह—**नापीति**। वस्तुतो ब्रह्म न सदित्यादिभ्रमनिवर्तकत्वेऽपि तत्त्वमसीत्यादिवाक्यगततत्पदलक्ष्यस्वरूपप्रमारूपप्रयोजनस्योक्तानुमानादसिद्धेः तदसिद्धौ च तत्स्वरूपाज्ञाननिवृत्त्या तत्र तज्ज्ञानप्रामाण्ये वा संशयेन तत्त्वमसीत्यादिवाक्यार्थे तज्ज्ञाने चाप्यौचित्यावर्जितस्य संशयस्य प्रामाण्यसंशयस्य वा दुर्वारत्वान्नानुमानेनोक्तश्रुतेरनुवादत्वशङ्केति ध्येयम्। न चोक्तस्वरूपे[4] लक्षणाज्ञानार्थं तद्धीः, असम्प्रज्ञातसमाधि[5]रूपविशेषणांशेऽनुद्बुद्धसंस्कारजन्यस्मरणरूपा वा वाच्येति तत एव

[1] लक्ष्य. [2] तस्या अनु. [3] दित्यनुमानं वादकथा. [4] स्वरूपलक्षणाज्ञानार्थं. [5] रूपा विशेषणांशे.

न हि तर्कस्सर्वदेशकालीनपुरुषसाधारण इत्यादिना प्रागेव निराकृतत्वात्। नापि प्रवाहानादिविज्ञानवादिमतेन; तस्यापौरुषेयश्रुत्यवधिकपूर्वत्वाभावात्। न च—सत्त्वश्रुतेस्सत्त्वप्रत्यक्षानपेक्षत्वान्न सापेक्षानुवादकत्वम्, निरपेक्षानुवादकत्वं तु धारावहनवन्नाप्रामाण्यहेतुः। उक्तं हि नयविवेके—'सापेक्षानुवादे हि न प्रमितिः। न तु दैवादनुवादे धारावहनवत् इति

तत्स्वरूपाज्ञाननिवृत्तौ किमुक्तप्रमयेति वाच्यम्; अप्रमया तद्धिया तदज्ञानानिवृत्तेः, निरुद्धमनस्साक्षिणस्स्मृतेर्वा प्रमात्वाभावात्। अतएव तत्त्वंपदलक्ष्यौ शास्त्रेणैव प्रमातव्यावलौकिकत्वादिति सिद्धान्तबिन्द्वादावाचार्यैरुक्तम्। यत्तु उक्तश्रुतिः, न ब्रह्मत्वसामानाधिकरण्येन सत्त्वबोधिका अखण्डार्थत्वादिति; तदुक्तार्थानवबोधात्। **न हि तर्क इति।** येषामनुमानाकौशलेन विरुद्धतर्काभासेन वा अनुमाने भ्रमत्वशङ्का, तेषां तच्छून्या ब्रह्मसत्त्वादिधीरुक्तश्रुतिभ्यामेवेति न तयोरनुवादकतेति भावः। विवरणादावविद्यादेर्भावरूपत्वाद्यनुमानं तु निपुणं पुरुषं प्रत्येव प्रवृत्तम्। अस्ति च तत्रापि 'नासदासीत्' इत्यादिश्रुतिरभावादिरूपासदन्यत्त्वबोधिका। यत्तु अहं सन्नित्यादिप्रत्यक्षं ब्रह्मसत्त्वानुमाने भ्रमत्वशङ्कानिवर्तकमिति, तत्साक्षिप्रत्यक्षस्य ब्रह्मत्त्वसामानाधिकरण्येन सत्त्वाविषयकत्वात् भ्रमसाधारण्यादेरुक्तत्वाच्च [1]परिदूनम्। **पूर्वत्वाभावादिति।** पूर्वं निश्चायकत्वाभावादित्यर्थः। अनिश्चायकत्वे हेतुं पौरुषेय[2]त्वं ज्ञापयितुं श्रुतौ तदभावं ज्ञापयति—**अपौरुषेयेति।** प्रतिसर्गं नास्तिकशास्त्राणां सत्त्वेपि सर्गादिकालीनवेदोत्पत्तेः पश्चादेव भ्रमप्रमादादिदोषयुक्तैर्नास्तिकैः क्रियमाणत्वात्, विज्ञानवादे घटादिज्ञानस्य मिथ्यात्वानङ्गी[3]कारात्, शून्यवादे च साक्षिसाधारणपक्षतावच्छेदेकावच्छेदेन

---

[1] परिहृतम्. [2] यकत्वे तु पौरुषेय. [3] मिथ्यात्वादङ्गी.

वाच्यम्; यतो लाघवादनुवादकत्वमेवाप्रामाण्ये प्रयोजकम्, न तु सापेक्षानुवादकत्वम्, अनधिगतार्थबोधकत्वस्य प्रामाण्यघटकस्य तावतैव गतार्थत्वात्। न च तर्हि धारावाहनबुद्धावप्रमाण्यम्; तस्या वर्तमानार्थग्राहकत्वेन तत्तत्क्षणविशिष्टग्राहकतयानुवादकत्वाभावात्। किन्तु श्रुतेरतत्परत्वे प्राप्तत्वमात्रमेव प्रयोजकम्। अन्यथा वैफल्येन स्वाध्याय-

---

मिथ्यात्वसाधकस्य धीविषयत्वादिहेतोस्साक्षिव्यावृत्तधर्मावच्छेदेन मिथ्यात्वबोधकश्रुत्यनुवादत्वाप्रयोजकत्वात्, नेह नानास्तीत्यनेन सत्तादात्म्यविशिष्टमनूद्य तत्र मिथ्यात्वस्योक्तश्रुत्या विधानात्, शून्यवादे च [1]सद्रूपस्यैव अनङ्गीकारेण तथा [2]बोधनाभावात्, न नास्तिकशास्त्रेण श्रुत्यनुवादतेति भावः। यत्तु—"वेदस्यापौरुषेयत्वेन मानान्तरापेक्षयाऽनुवादत्वाभावे 'उरु प्रथस्व' इत्यादिमन्त्राणां पुरोडाशप्रथनादिरूपस्वार्थप्रकाशनसामर्थ्यरूपलिङ्गेन विनियोगसिद्धेः 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयति' इति ब्राह्मणवाक्यमनुवादकमिति मन्त्राधिकरणोक्तं विरुध्येत' इति, तत्तुच्छम्; श्रौतलिङ्गादिषु श्रौतत्वादेरनादित्वात्, पौरुषेयशास्त्रेष्विवाप्रामाण्यशङ्काविरहाच्च। न हि मानान्तरमात्रापेक्षया श्रुतेरननुवादत्वं ब्रूमः। किंतु सादित्वपौरुषेयत्वादिनाऽवेदमूलकत्वसदोषत्वादिशङ्कायुक्तनास्तिकशास्त्रापेक्षया। अतएव यत्र फलपर्यन्तपरीक्षादिना नाप्रामाण्यशङ्का, यथा अवघातादेर्वैतुष्यादिसाधनग्राहकलौकिकमाने तेनानु[3]वादताप्रसक्तेः व्रीहीनवहन्तीत्यादेर्नियमतात्पर्यकत्वं स्वीकृतम्। **वर्तमानेति**। वर्तमानकालविशिष्टेत्यर्थः। न क्षणानामतीन्द्रियत्वान्न प्रत्यक्षतेति प्रत्यक्षमप्याद्युक्तम्[4] शङ्क्यम्, संयुक्तादिविशेषणतया स्थूलकालस्येव क्षणानामपि ग्रहणयोग्यत्वात्।

---

[1] तद्रूपस्यैव. [2] बाधनाभावात्. [3] मानेनानु. [4] प्रत्यक्षप्रामाण्याद्युक्तं.

विधिग्रहणानुपपत्तेः । अपिचेयं सत्त्वश्रुतिरपि सत्त्वप्रत्यक्षसापेक्षत्वात्सापेक्षानुवादिन्येव । न हि सत्त्वप्रत्यक्षं विना तन्मूलशक्त्यादिग्रहमूलकशब्दप्रवृत्तिसम्भवः । अतएव यत्र तु प्रमाणान्तरसंवादस्तत्र प्रमाणान्तरादिवार्थवादादपि सोर्थः प्रसिद्ध्यति ; द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकार्थप्रवृत्तेः, प्रमात्रपेक्षया त्वनुवादकत्वम् । प्रमाताह्यव्युत्पन्नः प्रथमं प्रत्यक्षादिभ्यो यथा अर्थमवगच्छति, न तथा आम्नायतः, तत्र व्युत्पत्त्यपेक्षत्वादिति वाचस्पतिमतमप्येतमर्थं संवादयति । तेनाम्नायस्य

क्षणानां तादात्म्येन प्रतिबन्धकत्वकल्पने मानाभावात् । उक्तं हि शास्त्रदीपिकादौ[1] घटोऽत्र दृष्टो न वेति पृष्टो वदति—सन्निहितक्षणे मया दृष्ट इतीति । यदिच क्षणानामतीन्द्रियत्वे तुष्यसि, तदा क्षणविशिष्टेत्यस्य क्षणव्यावर्तितो यस्तत्तद्बुध्युत्पत्तिद्वितीयक्षणविनाशिस्थूलकालस्तद्विशि[2](ष्टपरतया धारावाहिकबुद्धीनां स्वोत्पत्तिक्षणद्वितीयक्षणविनाशिस्थूलकालविशि)ष्टार्थग्राहकत्वेन अननुवादता बोध्या । वस्तुतस्तु 'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते' इति सिद्धान्ते स्वोत्पत्तिक्षणग्राहित्वं सर्वप्रत्ययानां न सन्निकर्षादिप्रयुक्तम्, किंतु ज्ञानसामान्यसामग्रीज्ञानोत्पत्तिक्षणविशिष्टार्थविषयकमेव ज्ञानं जनयतीति नियमप्रयुक्तम् । अतएवेच्छादेर्मदंशादिविषयकत्वं न कारणनियम्यमिति पक्षधरादयः । एवंच वेदजन्यबुद्ध्यनुमित्यादिधाराभ्युपगमेऽपि न द्वितीयादिबुद्धेरनुवादतेति ध्येयम् । **अन्यथा वैफल्येनेत्यादि** । अध्ययनस्याक्षरावाप्त्यर्थत्वपक्षे अनुवादत्वप्रयुक्तवै[3]फल्यस्यादोषत्वेऽपि क्रतुविध्य[4]पेक्षितवाक्यार्थज्ञानार्थत्वपक्षे तादृशज्ञानस्यान्यतस्सिद्धौ तदुद्देशेनानुवादकवाक्याध्ययने 'स्वाध्यायोऽध्येतव्यः' इति विधिना प्रवृत्त्यनुपपत्तेरित्यर्थः ।

---

[1] शास्त्रदीपिकोन्मेकटीकादौ. [2] अयं कुण्डलितः पाठः क्वाचित्कः [3] वैकल्य. [4] क्वचिद्विध्य.

व्युत्पत्त्यपेक्षत्वेन प्रत्यक्षसापेक्षत्वस्यैवोक्तेः । न च—वादिविप्रतिपत्तिनिरासप्रयोजनकत्वेन न निष्प्रयोजनानुवादकत्वम्, सप्रयोजनानुवादकत्वं तु न स्वार्थपरत्वविरोधि ; विद्वद्वाक्ये समुदायद्वित्वापादनरूपप्रयोजनवत्त्वेनानुवाद्यस्वार्थपरताया दृष्टत्वात् ।

प्रत्यक्षसापेक्षत्वस्येति । न चैवं सत्यं ज्ञानमित्यादिवाक्यस्यापि शक्यसम्बन्धरूपलक्षणाज्ञानापेक्षितशक्यज्ञानापेक्षणीयेन[1] सन्नहमित्यादिप्रत्यक्षेणानुवादस्स्यादिति वाच्यम् ; ब्रह्मत्वसामानाधिकरण्येन सत्त्वाग्राहकत्वादिना उक्तरोदनस्य परिहृतत्वात् ॥

विद्वद्वाक्य इति । "य एवं विद्वान् पौर्णमासीं यजते स यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति ; य एवं विद्वानमावास्यां यजते स यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति" इति वाक्य इत्यर्थः । उक्तवाक्यं अपूर्वकर्मणोर्विधायकं वा, 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यादिना पौर्णमास्यमावास्याकालयोगित्वेन श्रूयमाणानां षण्णामनुवादकं वेति संशये, अनुवादकत्वे वैयर्थ्याद्विधायकमेव । यदाग्नेय इत्यादौ यो दीक्षित इत्यादाविव च यच्छब्दस्य विधिविरोधित्वाभावात् । अत एव पौर्णमास्यमावास्यापदे अपि नामधेये । 'पौर्णमास्यां पौर्णमास्या यजते, अमावास्यायाममावास्यया' इति वाक्याभ्यामुक्तकर्मानुवादेन कालविधानात् । यद्यप्युक्तवाक्ये रूपं न श्रूयते तथापि 'वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायाम्' इति वचनेन आज्यभागक्रमाम्नातानामपि ऋचां क्रमं बाधित्वा उक्तकर्मद्वयाङ्गत्वेन विधानान्मान्त्रवर्णिकाग्नीसोमदेवताया ध्रौवाज्यरूपद्रव्यस्य च लाभसम्भवात्, यदाग्नेय इत्यादिवाक्यैरेव वोक्तकर्मणी पौर्णमास्यमावास्याशब्दाभ्यामनूद्य द्रव्यदेवताविधानसम्भवाद्रूपलाभः । एवञ्च 'दर्श-

---

[1] शक्यज्ञानमपि लक्षणीयेन.

पूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्येन आग्नेयादियागसाधारण्येन तदसाधारण्येन [1]वा उक्तकर्मद्वयप्रयाजादीनां फलसम्बन्धः, कालयोगिषु द्वित्वस्येव द्वित्वेन प्रसिद्धाज्यभागादिषु कालयोगस्याप्रसिद्धत्वेन यजिसङ्कोचे विनिगमकाभावात्, राजसूयन्यायेन प्रकरणात्सर्वेषामेव फलसम्बन्धौचित्यात्, न तु षण्णामेवेति प्राप्ते नोक्तवाक्यं विधायकम्, यदाग्नेय इत्यादौ यच्छब्दस्य कर्तृसामानाधिकरण्याभावादप्रसिद्धप्रस्तूयमानार्थकत्वेन विध्यविरोधित्वेऽपि प्रकृते कर्तृसामानाधिकरण्येन प्रसिद्धकर्तृपरामर्शकत्वसम्भवात्, श्रूयमाणतच्छब्दपर्यन्तवाक्यार्थविधिविरोधित्वस्यानपवादात्, एवं शब्दसमभिव्याहारेण प्रसिद्धार्थकत्वनिश्चयाच्च । उक्तं हि वार्तिके—

क्रियापदैकयोगित्वे यच्छब्दो न रुजेद्विधिम् ।
कर्तृयुक्तस्स एवान्यप्रापितार्थानुवादकृत् ॥ इति ।

रूपालाभाच्च, वार्त्रघ्नीवाक्यं हि आज्यभागाङ्गतया लिङ्गक्रमप्राप्तानां वार्त्रघ्नीवृधन्वतीमन्त्राणां कालद्वारा कर्मद्वारा वा व्यवस्थामात्रविधायकम्, न त्वपूर्वस्य कर्माङ्गत्वस्य बोधकम्, गौरवात् । यदाग्नेय इत्यादिकमपि न द्रव्यदेवताविधायकम्; प्राप्तकर्मानुवादेनानेकविधाने वाक्यभेदात् । यदि हि नानागुणविशिष्टा भावना विधीयेत, तदा तदन्यथानुपपत्त्या कल्प्येषु विशेषणविधिषु न श्रूयमाणविधेर्व्यापारः[2] । भावनायाः प्राप्तत्वे तु विशेषणेष्वेव विधिव्यापारादेकगुणविधाने गुणान्तराक्षेपासम्भवात् विध्या[2]वृत्तिलक्षणो वाक्यभेदः । उक्तं हि वार्तिके—

शब्दव्यापारनानात्वे शब्दानामतिगौरवम् ।
एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते ॥ इति

ननु अनेकगुणान्वितभावनायामप्राप्तायामिव प्राप्तायामपि प्रवर्तनारूपविध्यन्वयस्य सम्भवादनेकगुणानां प्राप्तकर्मानुवादेन विधाने को दोष

---

[1] चोक्तकर्म. [2] व्यापारः कल्प्यः. [3] विध्यन्तराबृत्ति.

इति चेत्, एकविधायकत्वस्य वाक्यस्वाभाव्यस्य भङ्ग एव दोषः। अन्यथा अनेकेषु प्रमापकत्वरूपतात्पर्यभेदेन वाक्यस्यावृत्त्यापत्तेः। न हि सकृत्प्रतिसंहितं वाक्यं नानार्थान्प्रमापयितुमीष्टे 'सकृदुच्चारितश्शब्दस्सकृदर्थं गमयती' ति व्युत्पत्तेः। किञ्च भावनायां विधिसम्भन्धस्य वाक्यान्तरेण लब्धत्वाद्गुणाविशिष्टभावनायां विध्यन्वये तात्पर्यं वाच्यम्। तथा चैकप्रतिसन्धानविषयेण विधिपदेन नानागुणेषु विध्यन्वयधीर्नसम्भवति। न हि घटः पटो रूपीत्यत्र सकृत्प्रतिसंहितरूपिपदेनोभयत्र रूप्यन्वयः; 'सकृदुच्चरितश्शब्दस्सकृदर्थं गमयती' ति व्युत्पत्तेः। भावनायास्तु क्रियास्वाभाव्येन सकृत्प्रतिसंहिताख्यातोपस्थिताया अपि नानागुणान्वयार्हत्वात् गुणान्वयानुरोधेन[1] प्रधानावृत्तेरन्याय्यत्वाच्च। न चाग्नेय इत्यादौ देवताविशिष्टद्रव्यस्य तद्धितेनोक्तत्वादेकस्यैव तस्य प्राप्तकर्मभावनानुवादेन विधिसम्भव इति वाच्यम्; कारकत्वेनोपस्थितदेवताया हि भावनायामेवान्वयो, न तु द्रव्ये, कारकत्वेनानुपस्थितानामेव वृत्तिशब्दैकदेशार्थानां 'अश्वाभिधानीम्' इत्यादौ मिथोन्वयात्। अथैवमनुवादत्वे वाक्यं व्यर्थमिति चेन्न; एकेन पौर्णमासीपदेनामावास्यापदेन च आग्नेयादित्रिकयोरुक्त्या साहित्यप्रतीत्या समुदायसिद्धौ तद्वतद्वित्वस्यैव दर्शपूर्णमासाभ्यामित्यधिकारवाक्ये बोधादाग्नेयादि[2]षण्णामेव फलसम्बन्धस्य विद्वद्वाक्यरूपानुवादप्रयोजनत्वात्। यथाहि विद्वद्वाक्ये पौर्णमासीमित्याद्येकवचनं पौर्णमास्यादिकालयोगित्वरूपसामान्यगत[3]स्यैकत्वस्य पाशाधिकरणन्यायेन बोधकं, तथा अधिकारवाक्ये द्विवचनमपि समुदायान्तर्गताग्नेयादिरूपनामार्थैकदेशसमुदायद्वयगतद्वित्वस्य बोधकम्। यत्तु द्विवचनस्य बहुत्वे लक्षणा, तस्यां च स्वशक्यद्वित्वाश्रयस[4]मुदायघटकाग्नेयादिपर्याप्तत्वरूपसम्बन्धरूपायां तात्पर्यग्राहकं विद्व-

---

[1] नानागुणान्वयानुरोधेन. नानागुणान्वयार्हत्वगुणान्वयानुरोधेन. [2] आग्नेयादियागानामेव. [3] सामान्यावगत. [4] ससुदिताग्ने.

अतएव तत्र वाक्यैकवाक्यतोक्ता। अन्यथा अर्थवादवत्पदैकवाक्यतैव स्यात्—इति वाच्यम्; प्रत्यक्षसिद्धे वादिविप्रतिपत्तिनिरासरूपप्रयोजनवत्त्वेन प्रमाणान्तरस्य सप्रयोजनतया स्वार्थपरत्वोक्तौ 'अग्निर्हिमस्य भेषजम्' इत्याद्यपि तेनैव प्रयोजनेन सप्रयोजनं स्वार्थपरं च स्यात्। तथाच न प्रत्यक्षसिद्धे वादिविप्रतिपत्तिनिरासार्थमन्यापेक्षा दृष्टान्ते तु समुदायानुवादेन द्वित्वसम्पादनस्योद्देश्यस्यान्यतो लब्धुमशक्य-

---

द्वाक्यमिति मतं; तत्र लक्षणाकल्पने मानाभावः। नामार्थतावच्छेदके समुदाये स्वाश्रयतद्घटकत्वसम्बन्धेनाग्नेयादिनामार्थे वा द्वित्वाश्रयत्वसम्भवात्। न चैवं 'पौर्णमास्यां पौर्णमास्या' इत्यादिवाक्यद्वयं व्यर्थमिति-वाच्यम्; त्रिकयोः प्रयोगद्वयविधायकत्वस्यैकादशे वक्ष्यमाणत्वात्। अन्यथा आग्नेयादीनां प्रत्येकमुत्पत्तिवाक्ये कालयोगात्प्रत्येकं प्रयोगापत्तेरिति द्वितीयद्वितीये स्थितम्॥

स्वार्थपरतां घटयति—**अत एवेति। वाक्यैकवाक्यतेति।** अधिकारवाक्यापेक्षितसमुदायप्रतीतिप्रयोजकतेत्यर्थः। सा चैकपदोपात्तत्वेन साहित्यप्रतीतिद्वारेत्युक्तम्। **द्वित्वसम्पादनस्येति।** अधिकारवाक्याधीनद्वित्वबोधनस्येत्यर्थः। ननु—प्रत्यक्षसिद्धेऽपि भावरूपाज्ञाने विप्रतिपत्तेस्त्वयाङ्गीकारात्तत्र श्रुत्यनुमानाद्युपन्यासाच्च, प्रत्यक्षविषयत्वादिना मीमांसकादिसिद्धेऽपि वाय्वादौ तार्किकादीनां विप्रतिपत्तेश्च, प्रत्यक्षे विप्रतिपत्त्याहितप्रामाण्यसंशयेन तद्विषयेपि संशयसम्भवात्तन्निरासरूपं प्रयोजनं सत्वानुवादश्रुतेस्सम्भवत्येवेति—चेत्, भ्रान्तोऽसि, नह्यज्ञानं भावरूपत्वेन कस्यापि प्रत्यक्षसिद्धम्? येन तत्र तद्रूपेण विप्रतिपत्तिर्न स्यात्। न वा प्रत्यक्षो वायुरित्यादौ तार्किकादीनामिव व्यवहारकालाबाध्यो घटादिरित्यत्र कस्यापि विप्रतिपत्तिः। त्रि[1]कालाबाध्य-

---

[1] त्रिकालबाध्य.

तया तेन प्रयोजनेन स्वार्थपरत्वस्य वक्तुं शक्यत्वात् ।

विषयकत्वं तु श्रुतेः पूर्वमेव निरस्तम् । अन्यथा प्रत्यक्षादिगृहीत-सत्वविलक्षणसत्वग्राहकत्वादननुवादत्वस्यैव सत्वात्सप्रयोजनानुवादत्वो-क्तिस्तव विरुध्येत । **तेन प्रयोजनेनेति** । एतेन—वादिविप्रतिपत्ति-निरासप्रयोजनेन न स्वार्थपरता, न हि तत्स्वतः पुरुषार्थः, न वा चित्रा-दिफलपश्वादिवत्सर्वेषामर्थिनां सुखप्रयोजकत्वेन काम्यम्, न वा विद्व-द्वाक्यीयसमुदायसिद्धिरिव स्वतः पुरुषार्थस्वर्गादिमद्वाक्यापेक्षितम् । न च—प्रपञ्चसत्त्वस्य विप्रतिपत्त्यभावेन निश्चये कर्मानुष्ठानात्स्वर्गादि-मत्कर्मवाक्यापेक्षित एव विप्रतिपत्तिनिरास इति—वाच्यम्; विधिषु श्राद्ध एवाधिकारीत्यनेन मिथ्यात्वनिश्चयाभावस्यैव कर्मानुष्ठानेऽपेक्षा भामत्यादावुक्ता न तु सत्वनिश्चयस्य । यदा तु विचारसहकृतबलवत्प्र-माणेन प्रपञ्चो मिथ्यात्वेन निश्चितः, तदा न कर्मानुष्ठानेऽधिकारः, नवा सत्यत्वनिश्चयस्य तदोपयोगः, पूर्वप्रवृत्तसर्वमानं बाधित्वैव मिथ्या-त्वनिश्चयस्य जायमानत्वादित्यादि सूचितम् ॥

यत्तु—"अग्निर्हिमस्य भेषजम्" इत्यादावपि द्वीपविशेषवर्तिनां विप्रतिपत्तेस्तन्निरासरूपेण प्रयोजनेन स्वार्थपरत्वमिष्टम्, पुरुषविशेषं प्रत्येव च तस्यानुवादकत्वमिति, तत्तुच्छम्; विधिसमभिव्याहृतानामर्थवादानां विध्येकवाक्यतानुरोधेन विध्यर्थान्वयिस्तुत्यर्थकत्वस्यावश्यकत्वात्तत्प्रयो-नेनैव सप्रयोजनार्थकत्वाच्च । न चैवं तादृशार्थवादेषु स्वार्थपरतापत्ति-स्तवा[1]सङ्गतति—वाच्यम्; यदि विश्वं सत्यमित्यादिश्रुतेस्तुतिपरत्वं विध्येकवाक्यतासम्पादकमुत्सृज्य विप्रतिपत्तिनिरासरूपप्रयोजनेन स्वार्थ-परता स्यात्, तदा अग्निर्हिमस्येत्यादावपि तथा स्यात्, अविशेषादि-त्यभिप्रायेण तदापत्तेराचार्यैरुक्तत्वात् । किञ्चानारभ्याधीतानां पर्णता-दीनामपूर्वसाधनीभूतजुह्वाद्यङ्गत्वं न स्यात्, जुह्वादीनां पर्णमयत्वादौ

[1] तवागतेति

एतदभिप्रायं च पूर्वोक्तं नयविवेकवाक्यम् । न चानुवादकत्वेऽपि नैष्फल्यमात्रं नत्वप्रामाण्यम्, याथार्थ्यमेव प्रामाण्यं न त्वनधिगतार्थगन्तृत्वे सति याथार्थ्यमिति–वाच्यम्? तात्पर्यविषये शब्दः प्रमाणम् । "यत्परश्शब्दः स शब्दार्थः" इत्यभियुक्ताभ्युपगमात् । अन्यथा स्वाध्यायविधिग्रहणानुपपत्तेरुक्त-

कस्यचिद्विप्रतिपत्तिसम्भवेन तन्निरासप्रयोजनकानुवादतायामपि स्वार्थपरतासम्भवात्, दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वस्यान्याय्यत्वात् । विप्रतिपत्तिनिरासस्य पुरुषमात्रप्रयोजनापर्यवसानं तु विश्वसत्यत्वश्रुतावपि तुल्यमित्युक्तम् । एवं पूषानुमन्त्रणमन्त्रादीनामुत्कर्षो न स्यात्, विप्रतिपत्तिनिरासार्थकस्वार्थपरत्वसम्भवे लिङ्गकल्प्यश्रुत्या विनियोगस्यान्याय्यत्वादित्याशयेन "अग्निर्हिमस्य भेषजम्" इत्यादीत्यत्रादिपदस्योक्तत्वात् । अग्निर्हिमस्येत्यादावुक्तापत्तौ नाचार्याणामास्था । **एतदभिप्रायमिति** । सापेक्षानुवादे हि न प्रमितिः, न तु दैवादनुवादे, धारावहनवदिति नयविवेकोक्तेर्निष्प्रयोजनानुवादे न प्रमितिः । प्रयोजनवदनुवादे तु प्रमितिः, यथा धारान्तःपातिद्वितीयादिबुद्धिः केवलघटाद्यंशेऽनुवादरूपापि तत्तत्क्षणविशिष्टविषयकाज्ञाननिवृत्तिरूपप्रयोजनसत्त्वेन प्रमितिरित्यर्थ इति भावः । एवंचान्यतोऽसिद्धप्रयोजनवदबाधित विषय एव प्रमात्वलक्षणे निवेश्यः, न तु तत्राज्ञातत्वमपि निवेश्यम् । औत्पत्तिकसूत्रस्थेनानुपलब्धिपदेनापि लक्ष्यभूतप्रमाज्ञानीयप्रकृतप्रयोजनवदुपलब्धेरविषयत्वविवक्षणान्न तदनुपपत्तिरिति बोध्यम् ॥

वस्तुतस्तु विद्वद्वाक्यादीनां न स्वार्थपरतायामुक्ताधिकरणस्यतात्पर्यम्? अपितु स्वार्थानुवादाधीनसमुदायसिद्धिद्वारा अधिकारवाक्य-[1]प्रमेये षण्णां फलसम्बन्धे तेषां तात्पर्यमित्यत्र तस्य तात्पर्यं, धूमोऽस्तीति वाक्यस्य वह्निमत्तायामिव । एवंचाधिगतार्थे प्रमात्वस्वीकारे बीजाभा-

[1] प्रमेयैः.

त्वाच्च । न ह्यन्यतोसिद्धेऽर्थे शास्त्रतात्पर्यम् । अतो न तत्र प्रामाण्यम् । यदाहुर्भट्टाचार्याः—'अप्राप्ते शास्त्रमर्थवत्' इति । नन्वयमनुवादो न 'वायुर्वै क्षेपिष्ठा देवता इत्यादिवत् स्तुत्यर्थ-न वा दध्ना जुहोतीत्यादिवदन्यविधानार्थः; अनुवाद्यत्वेऽप्यन्यविधानाय प्रमाणानूदितस्य तात्त्विकत्वनियमात् । न हि 'व्रीहीन् प्रोक्षति' इत्यादावारोपितव्रीह्यादेर्धीः, अनुवाद्यस्यासत्त्वे ह्याश्रयासिद्धौ धर्मधर्मिसंसर्गरूपानुमितिवेद्य इवानुवाद्यविधेयसंसर्गरूपवाक्यार्थो बाधितस्स्यादिति चेन्न; अस्यानुवादस्याप्राप्तान्यप्राप्त्यर्थत्वात् । न च प्रामाणानूदितस्य तात्त्वि-

---

वेन सौत्रमुक्तपदं यथाश्रुतार्थकम् । विश्वसत्वस्य च मानान्तराधिगतत्वान्न तत्र श्रुतेस्तात्पर्यम् । विप्रतिपत्तिनिरासाधीनतद्द्वारा कर्मानुष्ठानतात्पर्यकत्वं तु न तस्यास्सम्भवति । प्रपञ्चसत्यत्वविप्रतिपत्तावपि मिथ्यात्वनिश्चयाभावेन कर्माधिकारानपायादित्युक्तम् । तत्सम्भवेऽपि तस्या न विश्वसत्वपरता सिद्धा, किन्तु कर्मानुष्ठानपरतेति विश्वमिथ्यात्वं निर्विघ्नमेव । अत एव अथ[2] व्यावहारिकसत्वपरेत्यादिना आचार्यैरग्रे तस्याः कर्मानुष्ठानपरत्वं वक्ष्यत इति ध्येयम् ॥

न ह्यन्यत इति । यत्तु ज्ञातेऽपीष्टार्थे क्रियासमभिव्याहारेण तात्पर्यं वाक्यस्याविरुद्धं बालभाषितस्येवेति । तत्तुच्छम्? बालभाषितस्य हि अन्यतोऽसिद्धसुखविशेषजनकवाक्यार्थधीप्रयोजकत्वात्स्वार्थे धूमोऽस्तीति वाक्यस्य वह्न्यनुमितावि सुखसाक्षात्कारे वा तात्पर्यं युक्तम् । प्रकृते तु सत्वश्रुतेरन्यतोऽसिद्धप्रयोजनाभावान्न तदित्युक्तत्वात् । **स्तुत्यर्थ इति ।** स्तुतिधीद्वारमित्यर्थः । **इत्यादिवदिति ।** इत्यादौ जुहोतीत्याद्यंश इवेत्यर्थः । **अप्राप्तेति ।** अज्ञातनिषेधज्ञापनेत्यर्थः । तथा-

---

[1] अथवा.

कत्वानियमः, स्वप्नाध्याये नेदं रजतमिति वाक्ये च व्यभिचारात्। अथ तत्र ज्ञानविषयतया निषेध्यतया चानुवाद इति न तात्त्विकत्वम्, तर्हि प्रकृतेऽपि 'नेह नाना' इति निषेधार्थत्वादस्यानुवादस्य न तात्त्विकत्वमिति गृहाण। अतएव न वाक्यार्थस्यासत्त्वप्रसङ्गः, तात्पर्यविषयस्य सत्त्वात्। अथ 'किञ्चन' इत्यनेनैवानुवादस्य कृतत्वात्किमधिकेनेति चेन्न; सामान्यतो निषेधस्य हि किञ्चनेत्यनेन निषेध्यसमर्पणेऽपि

चान्यविधानायैवायमनुवाद इति भावः। **स्वप्नाध्याय इति**। स्वप्नफलोक्तिरूपे ग्रन्थ इत्यर्थः। **ज्ञानविषयतया**। भ्रमविषयतया। **निषेध्यतया** स्वसमानाधिकरणनिषेधप्रतियोगितया। इति **न तात्त्विकत्वमिति**। भ्रमविषयादेस्तात्त्विकत्वासंभवो विधानायानुवाद्यस्य ज्ञानमात्रमपेक्षितम्, न तु तात्त्विकत्वमिति भावः। **निषेधार्थत्वात्** स्वसमानाधिकरणनिषेधप्रतियोगिबोधकत्वात्। न **तात्त्विकत्वमिति** तद्विषयस्य विश्वसत्यत्वस्येत्यादिः। **अतएव** उक्तानुवादस्याज्ञातनिषेधज्ञापनार्थत्वादेव। **तात्पर्यविषयस्य** निषेधस्य **सत्त्वात्** तात्त्विकत्वात्। निषेधस्य मिथ्यात्वघटकस्य व्यावहारिकत्वपक्षे तदेव सत्त्वशब्दार्थः। तथाच तत्पक्षेपि कर्मकाण्डवद्व्यावहारिकप्रामाण्यं वाक्यस्याक्षतमिति भावः। यत्तु अनुवाद्यासत्त्वे तन्निष्ठो विधेयसंसर्गोप्यसन् स्यादिति परेणोक्तं, तदप्यत एव परास्तं बोध्यम्। नेदं रूप्यमित्यादावसत्यपि रूप्ये निषेधस्य विधेयस्य परेण तात्त्विकप्रतियोगित्वरूपसंसर्गाभ्युपगमात् 'व्रीहीन् पोक्षति' इत्यादौ प्रातीतिकव्रीह्यादिकं नोद्देश्यं, अपूर्वसाधनत्वात्, न हि सर्वमनुवाद्यं विधेयापेक्षया न्यूनसत्ताकमिति ब्रूम इति ध्येयम्। **सामान्यत इति**। आकाशत्वादिनानाधर्मैरित्यर्थः। **किंचनेत्यनेनेति**। सर्वनाम्नेति शेषः। **निषेध्यसमर्पणेऽपीति**। आकाश-

विशिष्य निषेधे विशिष्य निषेध्यसमर्पणस्योपयोगात्। अथ निषेधवाक्यस्य न निषेध्यसमर्पकवाक्यान्तरापेक्षा; अन्यथा 'न

त्वादिविशेषरूपैर्निषेध्यसमर्पणेऽपीत्यर्थः। **विशिष्य निषेध इति**। आकाशत्वादिप्रत्येकनिषेधांश इत्यर्थः। **विशिष्य निषेध्यसमर्पणस्य** आकाशत्वादिप्रत्येकरूपेण निषेध्यबोधकवाक्यस्य। **उपयोगात्** किंचनेति प्रक्रान्तपरामर्शिसर्वनाम्ना बोधनायोपयोगात्। तथाच विश्वसत्यतात्वादिप्रत्येकरूपेण विश्वं सत्यमित्यादिवाक्ये 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः' इत्यादिवाक्ये चाकाशत्वादिना यत्प्रक्रान्तं तदेव सर्वनाम्ना परामृश्य निषिध्यत इति सर्वनाम्ना परामर्शार्थं पूर्वं विश्वसत्त्वादिकं श्रुत्याऽनूद्यत इति भावः। अथवा किंचनेत्यनेन सामान्यतो निषेधाधिकरणा[1]नन्तर्भावेन निषेध्यसमर्पणेऽपि विशिष्य तत्तदधिकरणान्तर्भावेन निषेधं प्रति तत्तदधिकरणे निषेध्यसमर्पणस्य प्रतियोगिप्रसक्तेरुपयोगादित्यर्थः। निषेधाधिकरणविशेषे प्रतियोगिप्रसञ्जकतयोक्तवाक्यानामुपयोग इति भावः। विशिष्य प्रक्रान्तबोधकसर्वनाम्नो विशेषरूपबोधकवाक्यसापेक्षत्वात् ब्रह्मणि प्रपञ्चनिषेधवाक्ये तत्र प्रपञ्चप्रसञ्जकवाक्यस्येव 'विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सोम्य स आदेशः, तत्सत्यं स आत्मा, सत्यस्य सत्यम्, तेषामेष सत्यम्' इत्यादिवाक्येषु प्रपञ्चासत्यत्वबोधकेषु प्रपञ्चसत्यताप्रसञ्जकस्य विश्वं सत्यमित्यादिवाक्यस्योपयोगाच्च। एवं 'सोम्य सः' इत्यस्य यथा मृदेव सत्या न तद्विकारः, एवं ब्रह्मैव सत्यं न तद्विकार इत्यर्थकत्वम्, तत्सत्यमित्यस्य तदेव सत्यमित्यर्थकत्वम्। 'ऐतदात्म्यमिदं सर्वम् इत्येतत्पूर्ववाक्यपरिपोषणस्य तदैव सम्भवात्। एतेन किंचिनेत्यनेन सामान्यतो निषेध्यसमर्पणेऽपि विशिष्य निषेध्यसमर्पणस्य तदसाध्यत्वेन तत्र विश्वं सत्यमित्याद्युपयुक्तमित्यर्थोऽसङ्गतः, सर्वनाम्नः किंशब्दस्य विशेषरूपेण दृश्यत्वादिसामान्यरूपेण[2] वा उप-

[1] करणादप्तर्भावे निषेध्य. [2] चोपस्थापक.

कलञ्जं भक्षयेत्' इत्यादावपि निषेध्यसमर्पणार्थं 'कलञ्जं भक्षयेत्' इत्यादिवाक्यान्तरसापेक्षत्वप्रसङ्ग इति चेन्न ; सर्वत्रापेक्षानियमाभावात्, सति सम्भवे प्रकृते त्यागायोगात्, 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' इत्यादौ वाक्यान्तरप्राप्तस्य निषेधदर्शनाच्च । न च तद्वदेव विकल्पापत्तिः, सिद्धे वस्तुनि विकल्पायोगात्, ग्रहणाग्रहणवाक्ययोरुभयोरपि मानान्तराप्राप्तविषयत्वेन तुल्यबलत्ववदिह सत्त्वश्रुतेर्मानान्तरप्राप्तविषयत्वेन निषेधश्रुतेश्चाप्राप्तविषयत्वेन तुल्यबलत्वाभावाच्च । अत

स्थापकत्वसम्भवादिति परास्तम् । यद्यपि विश्वं सत्यमित्याद्यनुवादः स्तुत्यर्थ इत्यपि सम्भवति । उक्तं चाचार्यैस्तद्व्याख्यानावसरे तथा पूर्वम् । तथाप्यन्यविधानार्थताया अपि सम्भवात् परेणात्र तद्दूषणस्य कृतत्वाच्च तन्निरासपूर्वकं सापि व्यवस्थाप्यत इति बोध्यम् । **कलञ्जं भक्षयेदित्यादीति** । तथाच प्रतियोगिप्रसञ्जकवाक्याभावेऽपि विशेषरूपेण निषेधाधिकरणान्तर्भावेन च प्रतियोगिप्रसक्तेर्मानान्तरेण सम्भवाद्यथा निषेधोपपत्तिर्न कलञ्जमित्यादौ, तथा नेह नानेत्यादावपीति भावः । **सति सम्भव इति** । यथा प्रत्यक्षादिमानान्तरेण विशेषरूपेण प्रातियोगिप्रसक्तिस्सम्भवति, तथा उक्तवाक्येभ्योपीत्यर्थः । यद्यप्युक्तवाक्यानि विनापि प्रसक्तिरस्ति, तथापि निषेधवाक्यार्थतात्पर्यज्ञापकतया तेषामुपयोगः । लोकेऽपि हि मानान्तरप्रसक्तनिषेधवाक्यतात्पर्यं मानान्तरानुवादेन ज्ञापयन्ति—इदं रजतमिति दृष्टं परन्तु न तथेति, एवं विश्वं सत्यमिति प्रमिणन्ति, परन्तु न सत्यमिति निषेधतात्पर्यज्ञापको मानान्तरानुवादः । अतएव चनेत्यस्य [1] छेदेन व्याख्यानाभावेऽपि न क्षतिरित्यपि बोध्यम्! ननु सत्यत्वासत्यत्वयोरेकत्रासम्भवेऽपि क्वचिद्दृश्ये चासत्यत्वं क्वचिदृश्ये च सत्यत्वं स्यात्तत्राह—**षोडशीति** । आशङ्कते—

---

[1] भेदेन.

एव निषेधवाक्यप्राबल्यात्तदनुरोधेनेतरन्नीयते। अथाप्राप्तान्यप्राप्त्यर्थत्वेऽप्यलौकिकस्य 'आपश्च न प्रमिणन्ति' इत्यादिपदार्थसंसर्गस्य विधेयस्य सत्त्वान्न निषेध्यार्थानुवादकत्वमिति चेन्न; तदन्यपरत्वस्य प्रागेवोक्तत्वात्। ननु 'यत्तन्न' इति निषेधानुवादलिङ्गाभावान्नानुवादः, न; यत्किञ्चिल्लिङ्गाभावेन लैङ्गिकाभावस्य वक्तुमशक्यत्वात्। ननु तर्हि 'तत्सत्यम्' इत्याद्यपि 'न सत्तन्नासदुच्यते' इति 'असद्वा इदमग्र असीत्' इति च निषेधाय 'सन् घटः, सत् घटज्ञानं, सत् सुखस्फुरणम्' इत्या-

---

अप्राप्तान्येति। **अलौकिकस्य** लौकिकमानाविषयस्य। **आपश्चनेति**। व्यापनशीला देवाः चन अपि प्रमिणन्तीति देवप्रमेयत्वसंसर्गस्येन्द्रकर्तृकजगत्सर्जनादौ विधेयस्य सत्त्वादित्यर्थः। **अन्यपरत्वस्य** स्तुतिपरत्वस्य निषेधविधानपरत्वस्य वा। तथाच उक्तसंसर्गस्य न विधेयत्वम्। इन्द्रकर्तृकव्यावहारिकसत्यजगत्सर्जनस्य श्रुत्यादिना प्रमेयत्वस्य साक्षिसिद्धत्वात्, अस्मदादिकं प्रतीव देवान्प्रत्यपि श्रुत्यादिना तस्य प्रमेयत्वसम्भवात्, अनुमानादिना देवप्रमेयत्वस्यास्माभिर्ज्ञातुं शक्यत्वात्। एवं न हिंसन्तीत्यर्थोपि न विधेयः; तस्यापि मानान्तरेण ज्ञातत्वात्, निष्प्रयोजनत्वात् तद्धिंसाबोधकवाक्यान्तराविरुद्धत्वाच्च। किन्तु स्तुतौ निषेधे वा तात्पर्यमुक्तवाक्यस्येति भावः। **यत्तन्नेति**—निषेधार्थानुवादस्य यत्तदिति यल्लिङ्गं तदभावादित्यर्थः। न कलञ्जं भक्षयेदित्यादौ निषेधार्थेऽपि प्रतियोग्यनुवादे तादृशलिङ्गाभावान्न तदावश्यकमित्याह—**न यत्किञ्चिदिति। लिङ्गाभावेन** अनुवादत्वव्यञ्जकाभावेन। यत्तु एकमप्यनुवादलिङ्गं प्रकृते नेति, तत्तुच्छम्; रजतमिदं ज्ञातम्, परन्तु नेदं रजतमित्यादाविव ज्ञातार्थकत्वस्यैव तल्लिङ्गस्य सत्त्वात्। सन् घट इत्यादौ ब्रह्मणि सत्त्वसम्बन्धो न भातीत्यत आह—**सद्घटज्ञानमिति**। ज्ञानं वृत्तिरूपं सत्त्वेन भातीत्यत आह—**सत्सुखेति**। सुखस्फुरणं तु

दिसिद्धब्रह्मसत्त्वानुवादि स्यादिति चेन्न; ब्रह्मत्वसामानाधिकरण्येन सत्त्वस्य प्रत्यक्षादिभ्योऽप्राप्तेः, शून्यवादप्रसङ्गेन तस्य निषेधायोगाच्च, 'इदं सर्वं यदयमात्मा' इत्यत्र अनुवादलिङ्गसम्भवेन कल्पनाच्च। एवमानन्दश्रुतेरपि 'अदुःखमसुखं समम्' इति निषेधाय न प्रत्यक्षप्राप्तानन्दानुवादित्वम्, दुःखसाहचर्येण

चिदेव, सिद्धान्ते सुखादौ वृत्त्यनङ्गीकारात्। **ब्रह्मत्वेति।** ब्रह्मत्वसामानाधिकरण्येन या सत्त्वप्राप्तिर्ब्रह्म सत्यमिति धीः तस्याः प्रत्यक्षादिभ्योऽभावादित्यर्थः। तथाच उक्तप्रत्यक्षादिना तत्सत्यमित्यादिवाक्यं नानुवादः, उक्तप्रत्यक्षासिद्धं [1]यत्तद्ब्रह्म न सत्यमिति भ्रमनिरासरूपं प्रयोजनं, तत्साधकत्वात्। यदि ह्युक्तं प्रत्यक्षं ब्रह्मसत्यमित्याकारं स्यात्, तदा उक्तप्रयोजनसाधकं स्यात्। तत्सत्यमिति वाक्यजमखण्डज्ञानं तु ब्रह्म सत्यमित्याकारधीद्वारकत्वादुक्तप्रयोजनकमिति भावः। अथवा ब्रह्मत्वसत्त्वयोस्सामानाधिकरण्यं ताभ्यामुपलक्षितयोरैक्यम्, ब्रह्मत्वविशिष्टे सत्त्वसम्बन्धश्च चतुर्धा उक्तेषु सामानाधिकरण्येष्वभेदे सामानाधिकरण्यस्याखण्डैक्यपर्यवसानात्। विशेषणविशेष्यभावे सामानाधिकरण्यस्य च समानसत्ताकधर्मद्वयसामानाधिकरण्ये पर्यवसानात्तयोरप्राप्तेरित्यर्थः। तथाचोक्तप्रत्यक्षं नाखण्डविषयकम्। [2]न ब्रह्म न सत्यमिति भ्रमनिवर्तकमिति न तेन तत्सत्यमिति श्रुतिरनुवाद इति भावः। इदं सर्वमित्यादौ शाखान्तरीयवाक्ये निषेधार्थानुवादे यदिति लिङ्गस्य दृष्टत्वात्तदेकार्थतया विश्वं सत्यमित्यादावपि तत्कल्प्यत इत्याह—**इदं सर्वमिति।** न चैवमपि यत्तदिति लिङ्गाभावस्तदवस्थ इति वाच्यम्; नेह नानास्ति किञ्चनेत्यादौ किंशब्दस्य, नेतीत्यादौ चेतिशब्दस्य यत्पदार्थपरामर्शकत्वेन तच्छब्दतुल्यत्वात्, यत्तदोर्नित्यसम्बन्धेन यच्छब्दबलादेव तच्छब्दकल्पनसम्भवाच्च॥

[1] यत् ब्रह्म न सत्यमिति इति पा. [2] ब्रह्म सत्यमिति,

वस्तुतस्तु यत्तदोरेकतरेणोत्तरवाक्यस्थेनान्यतरस्य पूर्ववाक्यस्थस्य समभिव्याहारो नापेक्ष्यते । अतएव—

साधु चन्द्रमसि पुष्करैः कृतं
मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे
तेन साहसमनुष्ठितं पुनः ॥

इत्यादौ तथा दृश्यत इति मम्मटोक्तेस्तच्छब्दसमानार्थकिमितिशब्दयोरप्युत्तरवाक्यस्थयोर्यच्छब्दसमभिव्याहारानपेक्षत्वात् । प्रकृते यच्छब्दावश्यकत्वं परेण मौढ्यादेवाशङ्कितमिति ध्येयम् । अत्र सन् घट इत्यादौ घटाद्युपहितसद्रूपस्यैव भानेन[1] शुद्धब्रह्माभानात्तत्सत्यमिति श्रुत्यनुवादत्वं परस्यासम्भवदुक्तिकमेव । न च—

सर्वप्रत्ययवेद्येऽस्मिन्ब्रह्मरूपे व्यवस्थिते ।
प्रपञ्चस्य प्रविलयश्शब्देन प्रतिपाद्यते ॥

इति मण्डनोक्तेश्शुद्धं ब्रह्म सर्व[2]धीवेद्यमिति वाच्यम्; व्यवस्थिते घटाद्यवच्छिन्नसद्रूपेण विशेषेणावस्थिते ब्रह्मरूपे सर्वधी[2]वेद्येऽपि प्रपञ्चस्य प्रकृष्टो बाधरूपो विलयो यस्मा[3]ज्जातः तत्तादृशं ब्रह्म शब्देन श्रुत्यैव प्रतिपाद्यत इति तदर्थात्—

परागर्थप्रमेयेषु या फलत्वेन[4] सम्मता ।
संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥

इति वार्तिकोक्तेरपि वेदान्तमेयशुद्धब्रह्माणि घटाद्यवच्छिन्नस्फरणरूपफलतादात्म्यमर्थः । तेन घटस्फुरणं सदित्यादिप्रत्यक्षमपि नोक्तश्रुत्यनुवादताप्रयोजकम् । न चोपहितविषयकबुद्धौ शुद्धस्याभाने तदुत्तरं शुद्धसंशयादि स्यादिति वाच्यम्; शुद्धसंशयादावपि तस्याविरोधित्वात् । ब्रह्मणश्शुद्धस्योपस्थित्यभावेनोक्तापत्त्यसम्भवात् उपस्थितौ वा उक्तापत्तेरिष्टत्वाच्च ॥

[1] भाने इति, [2] सर्वधा. [3] ज्ञानात्तादृशं, ज्ञातादिति वा पा, [4] फलत्वेन हि.

सुखस्यापि वैषयिकस्यैव ग्रहणेन तन्निषेधाय ब्रह्मरूपसुखानुवादायोगात्। एतच्च सर्वमुक्तं विवरणे—निष्प्रपञ्चास्थूलादिवाक्यानुसारेण 'इदं सर्वं यदयमात्मा' इत्यादीनि निषेधसमर्पकत्वेनैक्यतां प्रतिपद्यन्ते। सुषुप्तौ निष्प्रपञ्चतायां पुरुषार्थत्वदर्शनात्'

वैषयिकस्येति। न च दुःखपदवाच्यस्येव सुखपदवाच्यस्यापि सर्वस्य ग्रहणौचित्येन आत्मसुखस्यापि निषेध्यतेति वाच्यम्; विषयसम्बन्धजन्यवृत्ति[1]विशेषावच्छिन्नात्मनस्सुखपदवाच्यत्वेन तस्य सर्वस्य निषेध्यत्वेऽपि तत्पदलक्ष्यसुखस्वरूपनिषेधासम्भवात्। **इदं सर्वं यदयमात्मेत्यादीनीति।** नेतिनेतीत्यात्मेत्यादौ निष्प्रपञ्चात्मबोधार्थमिदं सर्वमित्यादिना सप्रपञ्चात्मानुवाद इत्यर्थः। इदं सर्वमित्यादौ बाधायामपि सामानाधिकरण्यसम्भवादाह—**आदीति।** तेन 'मयि सर्वं प्रतिष्ठितं, सच्च त्यच्चाभवत्' इत्यादिसङ्ग्रहः। **ऐक्यतां** एकवाक्यतां। **पुरुषार्थत्वदर्शनादिति।** सुषुप्तौ भासमानं साक्षिसुखं यद्यपि जाग्रत्स्वप्नयोरपि भाति, मा न भूवं हि भूयासमिति परप्रेमदर्शनादन्येच्छानधीनेच्छारूपस्य परप्रेम्णः सुखरूपत्वेनाभासमाने आत्मन्यसम्भवात्। भासत एव परमप्रेमास्पदत्वलक्षणं सुखं जाग्रदादाविति विवरणोक्तेश्च; तथापि कष्टं कर्मेति लोकानुभवात्, जाग्रत्स्वप्नयोस्सदा स्थूलसूक्ष्मोपाधिक्रियाजन्य[2]दुःखसत्त्वात्, विषयसुखानामपि—

न तदस्ति सुखं लोके यन्न दुःखकरं भवेत्।
तदसम्प्राप्तिविच्छेदक्षयेष्वसुख[3]कृद्यतः॥

इति वार्तिकोक्तरीत्या तदप्राप्त्यादिप्रयुक्तदुःखमूलत्वाच्च सुषुप्त्यवच्छिन्नसुखं जाग्रदादिसुखापेक्षयाऽतिशयितम्। लोकानां च तथाऽननुभवो[4] विवेकाभावात्, नरकसुखासक्तसूकरादिवत्। तथाच दुःख-

---

[1] विषयाव. [2] जनक. [3] क्षयेऽप्यसुख. [4] अनुभवः.

इति । अथ—निष्प्रपञ्चता न पुरुषार्थः, मूर्छायां तत्त्वादर्शनात्; न च तदा तदज्ञानमात्रं न तु तदभाव इति वाच्यम्; समं सुषुप्तावपीति—चेन्न; मूर्छायां स्वरूपसुखस्फुरणाभावात् । तथा च सूत्रम्—'मुग्धेऽर्धसम्पत्तिः परिशेषात्' इति । सुषुप्तिमुक्ति-कालीननिष्प्रपञ्चतायां स्वरूपसुखानुभवेन तस्याः पुरुषार्थत्वात् । तथाच श्रुतिः—'द्वितीयाद्वै भयं भवति' इति । अथ 'तस्मा-

---

मिश्रितदुःखमूलजाग्रदादिप्रपञ्चशून्यत्वेन यथा जाग्रदादिसाक्षिसुखापेक्षया सौषुप्तसाक्षिसुखमतिशायितत्वेन पुरुषार्थ इति व्यवह्रियते, तथा तदपेक्षयापि मुक्तिसुखमतिशयितत्वेन व्यवह्रियते, तादृशप्रपञ्चतन्मूलाविद्याशून्यत्वादित्याशयः । सुषुप्तावपीत्यपिः हेतौ, तेन तदभावान्नासङ्गतिः । **सुखस्फुरणेति** । सुखस्यानावृतत्वेत्यर्थः । तदानीमुक्तप्रेमा[1]नुदयेन साक्षिण आवृतत्वम् । अतएव दुःखाभावोऽपि न तदा स्फुरतीति भावः । **मुग्धे** मूर्छावस्थारूपे मूढे आवृत इति यावत् । साक्षिणीति शेषः । **अर्धसम्पत्तिः** सुषुप्तिरूपसम्पत्तेरर्धं परिशेषात् ज्ञानेन्द्रियाणामुपरमेऽपि कर्मेन्द्रियाणामनुपरमात्पूर्णसम्पत्त्यभावात्, [2] कर्मेन्द्रियाणामनुपरमश्च मुखहस्तादिचेष्टाविशेषादिति सूत्रार्थः । सुषुप्तौ जाग्रदादिप्रपञ्चाभावः "सुषुप्तिकाले सकले विलीने पुनश्च जन्मान्तर कर्मयोगात् । ततस्तु जातं सकलं विचित्रं, एवमेवास्मादात्मनस्सर्वे प्राणास्सर्वे लोकास्सर्वे देवास्सर्वाणि भूतानि व्युच्चरन्ति" इति सुषुप्तौ लीनप्रपञ्चसृष्टिबोधकश्रुतिभ्यस्सिद्ध[3] इत्याशयेनाह—**सुषुप्तिमुक्तीति** । **पुरुषार्थत्वात्** जाग्रदादिस्वरूप[4]सुखानुभवापेक्षया अतिशयितपुरुषार्थत्वात् । ननु यत्किञ्चित्प्रपञ्चाभावस्सुषुप्ताविव जाग्रत्स्वप्नयोरप्यस्तीति कथं सौषुप्तसुखस्य जाग्रत्सुखापेक्षयाऽतिशयस्तत्राह—**तथाच श्रुतिरिति । द्वितीयादिति ।** विषयादिरूपात्स्वाभिन्नात् भयं भवतीति, देहेन्द्रियविषयरूपस्य सुखसाधनस्याप्युक्तरीत्या भयहेतुत्वमित्यर्थः।

---

[1] प्रमा. [2] कर्मेन्द्रियानुपरमश्च. [3] साध्य. [4] स्वरूपस्य.

देकाकी न रमते' इति श्रुतेस्सप्रपञ्चतापि पुरुषार्थः, न ; तस्या दुःखसाधनत्वेन पुरुषार्थत्वायोगात्, कर्मकाण्डवदस्याश्श्रुतेरविवेकिपुरुषपरत्वाच्च । ननु 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' इति भेदज्ञानस्य मोक्षहेतुत्वश्रवणात्कथं न सप्रपञ्चता पुरुषार्थ इति चेन्न; तत्वमतेः पूर्वं ममापि प्रेरकपृथक्त्वदृष्टेस्सगुणब्रह्मज्ञानवत् प्रेरकत्वेन ब्रह्मज्ञानस्यापि परम्परयोपकारकत्वात्, 'एकधैवानुद्रष्टव्यम्' इत्यादिवाक्यस्वार-

---

यद्यपि द्वितीयपदेनानात्ममात्रमुक्तम् ; तथापि जाग्रत्स्वप्नरूपभयहेत्वभावमात्रेण सौषुप्तसुखस्य जाग्रदादिसुखापेक्षया अतिशयः । मुक्तिसुखस्य तु भयहेतुसामान्याभावत्वेनावस्थात्रयसुखापेक्षयाऽतिशय इति भावः । **सप्रपञ्चतेति** । जाग्रत्स्वप्नसुखमित्यर्थः । **पुरुषार्थः** सुषुप्तिसुखतुल्यपुरुषार्थः । **तस्या** जाग्रत्स्वप्नसुखस्य । **दुःखसाधनत्वेनेति** । दुःखोपधायकक्रियाविशिष्टत्वेन, विषयाप्राप्त्यादिप्रयुक्तकालान्तरीण[1]दुःखत्वरूपयोग्यत्वेन चेत्यर्थः । **पुरुषार्थत्वायोगात्** सौषुप्तसुखतुल्यपुरुषार्थत्वायोगात् । **अविवेकीति** येषां विवेकाभावाज्जाग्रत्स्वप्नसुखे उक्तदुःखसाधनत्वाग्रहः, तेषां तत्र बलवद्द्वेषसाग्र्यभावादिच्छायां सत्यां तत्सम्पादकविषयाभावादेकाकित्वे रत्यभाव[2]स्यानुवादिका श्रुतिर्न तु तावता तत्सुखस्य सौषुप्तसुखतुल्यत्वं तच्छ्रुत्या लभ्यत इति भावः । **न मतेरिति** । प्रेरकत्वेन पृथक्त्वेन च मत्वा मुच्यत इति नोक्तश्रुत्यर्थः । किंतु तत्वमतेः पूर्वं प्रेरकत्वेन पृथक्त्वेन च स्थितमीशमात्मानमखण्डं ज्ञात्वा मुच्यत इत्यर्थ इति भावः । पृथक्त्वप्रेरकत्वाभ्यां मत्वेत्यर्थकत्वेऽपि न क्षतिरित्याशयेनाह—**सगुणेति** । दहराकाशादिरूपेत्यर्थः ! प्रेरकत्वादिना द्विधादिदर्शनमेकधादर्शनोक्त्या व्यावर्तितमित्याह—**एकधेति** । विषयरूपो ज्ञाननिष्ठप्रकारो धाप्रत्ययार्थः । एकपदमखण्ड-

---

[1] कालान्तरीय. [2] देकाकित्वाक्त्यभाव.

स्यादभेदज्ञानस्यैव साक्षान्मोक्षहेतुत्वात्। अत एव प्रेरकत्व-ज्ञानस्य जोषहेतुत्वमुक्तम्। तथोत्तरत्रापि 'वेदाविदो विदित्वा

रूपकेवलार्थकम्। अतएव नेह नानेत्यग्रिमवाक्येन कैवल्योपपादनं "अद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" "अन्योऽसावन्योऽह-मस्मीति न स वेद यथा पशुः,

प्रत्यस्तामितभेदं यत्सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्॥
तद्भावभावनापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्"॥

इत्यादिश्रुतिस्मृतिसहस्रं च सङ्गच्छत इति भावः। न च सङ्ख्यावा-चकादेकशब्दात् धाप्रत्ययविधानात् केवलार्थकोत्तर[1]स्सोऽसाधुरिति वाच्यम्; कैवल्यस्यापि बुद्धिविषयत्ववद्द्वौणैकत्वसङ्ख्यात्वात्। एको देव इत्यादौ नाम्ना, येन जातानि जीवन्तीत्यादावेकवचनेन च तस्यैव प्रत्ययात्। अन्यथा सद्द्वितीयत्वशङ्कानुपमर्दात्, तादृशसङ्ख्योपलक्षित-बोधकस्यापि सौत्रसङ्ख्याशब्देन ग्रहीतुं शक्यत्वात्, एकशब्दस्य सङ्ख्या-वाचकत्वेऽपि विषयितारूपैकप्रकारयुक्तदर्शनलाभेन निर्विकल्पकदर्शनला-भसम्भवात्, सविकल्पकस्य विशेष्यतादिरूपनानाप्रकारयुक्तत्वेन व्याव-र्तनसम्भवात्। **अभेदज्ञानस्येति**। चिन्मात्ररूपाखण्डाभेदज्ञानस्येत्यर्थः। **जोषेति**। ब्रह्मलोकाद्यवच्छिन्नप्रीतिविशेषरूपजुष्टशब्दार्थेत्यर्थः। अतएवाव्यवहितोत्तरत्वबोधकं तत इति पदमपि सङ्गच्छते। प्रेरकत्व-मतेर्मोक्षहेतुत्वे तु मध्ये जोषोक्तिरसङ्गता। तेनेति तृतीया तु अमृत-त्वासौ मननस्य प्रयोज्यतां ज्ञाप्यतां वा बोधयतीत्यपि बोध्यम्। यद्यपि जुष्टः शमादिसामग्र्या प्राप्तस्सन्नात्मानं क्षेत्रज्ञं प्रेरितारमीश्वरं च

---

[1] र्थकात्ततः.

लीना ब्रह्मणि तत्परा योनिमुक्ताः। तदात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः' इत्यभेद एव श्रूयते। अतो न भेदज्ञानस्य मोक्षहेतुत्वम्। एतेन नेह नानेति श्रुतिरेव विश्वं सत्यमित्यबाध्यत्वरूपबाधानिषेधाय विज्ञानवादिप्राप्तविश्वनिषेधानुवादिनी किं न स्यादिति निरस्तम्। भावाभावयोः परस्परविरहरूपत्वे समेपि भावग्रहो निरपेक्षत्वान्नाभावग्रहमपेक्षते, अभावग्रहस्तु सप्रतियोगितया भावग्रहमपेक्षते। अतो नेति श्रुतेरेव सत्वश्रुत्यपेक्षा,

---

पृथक् तदुभयविलक्षणाखण्डरूपेण मत्वा तेनामृतत्वमेतीत्यर्थ उक्तवाक्ये सम्भवति; तथाप्युत्तरवाक्येन पौनरुक्त्याद्यापत्त्या न तथार्थः। उत्तरं हि वाक्यं—'उद्गीथमेतत्परमं तु ब्रह्म तस्मिन्त्रयं स्वप्रतिष्ठाक्षरं च। अत्रान्तरं वेदविदो विदित्वा लीना' इत्यादिकं, प्रेरितारं मत्वा अमृतत्वमेतीत्युद्गीथमात्रमेतन्नत्वमृतत्वोपधायकहेतुनिर्णायकम्। तस्मिन्त्रयमित्यादिना सर्वान्तरत्वेनोच्यमानं 'परमं तु ब्रह्म वेदविदो विदित्वा' वेदने[1] करणेन साक्षात्कृत्य उक्तब्रह्मणि लीना उपाधिमात्रलयेनैकीभूताः योनिमुक्ता जन्महीना भवन्तीत्यर्थकामित्याशयेनाह—**तथोत्तरत्रेति**। श्वेताश्वतरीयोक्तवाक्योत्तरं द्वितीयाध्यायेऽपि तथोक्तमित्याशयेनाह—**तदात्मतत्त्वमिति**। वीतशोक इत्यस्योत्तरं 'यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्' इति वाक्यम्। तथाच युक्तः त्रिरुन्नतमित्यादिना पूर्वोक्तयोगविशिष्टस्सन् दीपोपमेन स्वप्रकाशेन, येनात्मनस्तत्त्वेनानारोपितरूपेणाभिन्नं ब्रह्मतत्वं प्रपश्येत्, तत्तु तदखण्डमेव प्रकर्षेण श्रवणाद्युत्तरं सम्यग्वेदान्तवाक्येन ईक्षित्वा साक्षात्कृत्य एको द्वितीयशून्यस्सन् कृतार्थो भवते भवति प्राप्नोति तदात्मतत्त्वमिति वेत्यर्थ इति जीवपरयोरैक्यधीरेव मोक्षहेतुरिति भावः। **एतेनेति**। पुरुषार्थभूतनिष्प्रपञ्चसुखबोधकवाक्यशेषत्वस्य सप्रपञ्चवाक्ये

---

[1] वेदनेनेति.

न तु सत्त्वश्रुतेर्नेति श्रुत्यपेक्षा ; अन्यथा अन्योन्याश्रयापत्तेः । ननु—उत्सर्गापवादन्यायोऽस्तु । यथा हि 'न हिंस्यात् सर्वा भूतानि' इति श्रुतिरविशेषप्रवृत्तापि हिंसात्वसामान्यस्य प्रत्यक्षादिप्राप्तत्वान्निषेध्योपस्थितौ नाग्नीषोमीयवाक्यमपि निषेध्यसमर्पणायापेक्षते, तथा 'नेति' इत्यादिश्रुतिरविशेषप्रवृत्ताऽपि

व्यवस्थापनेनेत्यर्थः । **न तु सत्त्वश्रुतेरिति** । न च सत्त्वश्रुतेरबाध्यत्वविषयकत्वाद्बाध्यताप्रसञ्जकनेति[1]नेतीत्यादिश्रुत्यपेक्षा युक्तेति वाच्यम्; सन् घट इत्यादिप्रत्यक्षगृहीतमबाध्यब्रह्मतादात्म्यं घटादौ सत्त्वश्रुतिर्बोधयति, न तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् । येन तादृशाभावप्रतियोत्वस्य घटादौ प्रसञ्जिकां नेतीत्यादिश्रुतिमपेक्षेत । उक्ततादात्म्यस्य भावरूपत्वान्न तदभावरूपप्रतियोगिप्रसञ्जिकामपि तामपेक्षते । ब्रह्माविशेषणत्वेनाबाध्यत्वज्ञानं प्रति बाध्यत्वज्ञानापेक्षणेऽपि विश्वबाध्यत्वयोस्संसर्गबोधनं श्रुत्यधीनं नापेक्षितम् । किञ्च सत्त्वश्रुतेर्यदि त्रिकालबाध्यत्वस्य यदिवाव्यवहारकालबाध्यत्वस्याभावो विषयः ; उभयथापि प्रतियोगितावच्छेदकेन कालाघटितबाध्यतात्वेन न बोधिकोक्तश्रुतिः; किंतु स्वसमानाधिकरणात्यन्ताभावप्रतियोतात्वरूपबाध्यतात्वमात्रेण । यादितु सन् घट इत्यादिप्रत्यक्षे मायावच्छिन्नचैतन्यसम्बन्धरूपं सत्त्वमेव विषयः, तस्यैव तत्त्वदीपनादौ व्यावहारिकसत्तात्वोक्तेः, तदा सत्त्वश्रुतेरपि तदेव विषयो न तु बध्यत्वाभावः । सर्वथा नेतीत्यादिश्रुतिर्न सत्त्वश्रुत्यपेक्षणीया । किञ्च सत्त्वश्रुत्या प्रपञ्चे बाध्यत्वाभावस्य बोध्यत्वेऽपि नेतीत्यादिश्रुत्या, 'एवं सौम्य स आदेश' इत्यदिश्रुत्या च तदभावस्य प्रपञ्चे बोधानात्तदंशेऽनन्यशेषत्वं[1]तस्या अव्याहतामिति भावः[2] । **नाग्नीषोमीयवाक्यमिति** । तथाचाग्नीषोमीयवाक्यमपवादशास्त्रं सदुत्सर्गशास्त्रस्य न हिंस्यादित्यस्य बाधकमित्युत्सर्गापवादन्याय इति भावः ।

---

[1] नित्यशेषत्वं. [2] भावात्.

प्रत्यक्षप्राप्तघटादिसत्त्वरूपनिषेध्यमादाय निराकाङ्क्षा सती न प्रत्यक्षाप्राप्तधर्माधर्मादिसत्यत्वबोधिकां 'विश्वं सत्यम्' इत्यादिश्रुतिमपि निषेध्यसमर्पणायापेक्षितुमर्हति। यत्र तु मानान्तरेण निषेध्यस्याप्राप्तिस्तत्र निषेध्यसमर्पणाय श्रुत्यन्तरमपेक्षत एव। यथा षोडशिग्रहणाग्रहणयोः मानान्तरेण निषेध्योपस्थितावपि वाक्यापेक्षणे अग्नीषोमीयहिंसाया अपि निषिद्धत्वेनाधर्मत्वं स्यात् इति चेत्, मैवम्; अग्नीषोमीयवाक्यस्य निषेधविषयन्यूनविषयत्वेनानन्यशेषतया स्वार्थतात्पर्यवत्त्वेन च न निषेध्यसमर्पण-

---

न प्रत्यक्षाप्राप्तेति। यद्यपि धर्माधर्मस्वर्गनरकादेर्न प्रत्यक्षादिना प्राप्तिरिति दूष्यग्रन्थे उक्तम्, नरकादेरित्यस्य नरकादिसत्यत्वस्येत्यर्थ इति तदीयैर्व्याख्यातम्; तथाच प्रत्यक्षादीत्यादिना धर्मादिसत्यत्वस्यानुमानादिनाप्यप्राप्तिरिति[1] पराभिप्रेतम्। तथापि धर्मादिकं, सत्, वेदविहितत्वादित,[2] इत्यनुमानेन मन्मते 'सर्वप्रत्ययवेद्ये' इत्यादिमण्डनोक्त्या धर्मादिग्राहकमानेन च धर्मादिसत्यत्वं[3] गृह्यत इति आदिपदं भ्रान्त्यैव परेणोक्तमित्याशयेन तद्विहाय प्रत्यक्षाप्राप्तेत्येव धृतम्। यद्यपि एवं धर्मादेरनुमानादिसिद्धं सत्त्वमिव घटादेः प्रत्यक्षसिद्धं सत्त्वमपि विश्वं सत्यमित्यादिश्रुतिर्नेतीत्यादिश्रुत्या निषेधायानुवदतीति नोत्सर्गापवादन्यायावकाश इति स्पष्टम्। न चानुमानाकुशलं प्रति धर्मादिसत्त्वबोधकत्वाद्विश्वसत्त्वश्रुतिर्नानुवाद इति वाच्यम्; धर्मिग्राहकमानेनैव धर्मादिसत्यतासिद्धेः। न हि धर्मादिप्रमाता तत्सत्यत्वं व्यावहारिकं न प्रमिणोतीति सम्भवति। तथा सति धर्मादिग्राहकशास्त्रादिमानस्य व्यावहारिकप्रामाण्यभङ्गापत्तेः। यत्र त्वर्थक्रियादिसंवादाभावः, तत्रानुमानाकौशलादियुक्तं पुरुषं बोधयन्ती मिथ्यात्वादिश्रुतिरनुवाद इत्याचार्यैरुक्तम्; तथापि परं लालयन् प्रकारान्तरेण समाधत्ते—**मैवम्; अग्नीषोमीयेति। न्यूनविषयत्वेति।**

---

[1] दिनाप्यर्थासिति. [2] वेदविहितत्वात्. [3] नित्यत्वं.

द्वारेण निषेधवाक्यशेषता । विश्वं सत्यमित्यादेस्तु निषेधविषय-समविषयत्वेन स्वार्थतात्पर्यरहितत्वेन च निषेध्यसमर्पणद्वारेण निषेधवाक्यशेषतोचितैव । अत एव प्रत्यक्षाप्राप्तधर्मादिसत्त्वोप-स्थापनेन वाक्यसाफल्यमपि । स्वार्थतात्पर्यरहितत्वेन च नाग्नी-षोमीयवाक्यतुल्यत्वमित्युक्तम् । अतो दृश्यत्वादिहेतोर्धर्माद्यं-शेऽपि श्रुत्या न बाधः । अथवा व्यावहारिकसत्त्वपरेयं विश्व-सत्यत्वश्रुतिः । न च व्यावहारिकसत्त्वे सर्वाविप्रतिपत्तेस्तत्प्रति-

---

अग्नीषोमीयहिंसाया निषेध्यत्ववादिनाऽवैधहिंसाया अपि निषेध्यत्वस्य वाच्यतया निषेध्यमात्रमग्नीषोमीयवाक्यस्य न विषय इति भावः । **स्वार्थतात्पर्यरहितत्वेनेति** । स्तुत्यादितात्पर्यकत्वाद्विश्वसत्वे स्वार्थे न तात्पर्यमिति भावः । **साफल्यमिति** परभ्रान्त्यनुसरणम्, धर्मादि-सत्त्वस्याप्युक्तरीत्या प्राप्तत्वात् । यत्तु विश्वं सत्यमित्यादिवाक्यमपि धर्मादिमात्रसत्त्वविषयकत्वान्नेतीत्यादि [1] श्रुतेः सर्वदृश्यनिषेधबोधकत्वेन निषेधन्यूनविषयकमिति, तत्तुच्छम्; नेति नेतीत्यादिश्रुतिर्हि इति-शब्दोपात्तनानाधर्मावच्छिन्नप्रतियोगिताकान्नानिषेधान् बोधयतीति वि-श्वसत्ववाक्यं यदि धर्मादेरेव सत्त्वं बोधयेत्, तथापि धर्मादौ सत्यतात्वा-वच्छिन्नाभावबोधकत्वांशे नेतीत्यादिश्रुतिसमानविषयकमेव, निषेध्यताव-च्छेदकरूपावच्छिन्नविषयताकत्वस्यैव समानविषयकत्वस्योपेक्षणीयत्वात् । तावतैव प्रतियोगितावच्छेदकविशिष्टप्रसक्तेर्निर्वाहात् न हिंस्यादिति वा-क्यस्य तु भूतहिंसात्वावच्छेदेन बलवदनिष्टाजनकत्वाभावबोधकत्वे [2] हिंसा-त्वावच्छेदेनोक्ताजनकत्वरूपप्रतियोगिप्रसक्तिसापेक्षत्वात् अग्नीषोमीयवाक्यं तादृशप्रसक्तिजनकमनपेक्षणीयमेव । **व्यावहारिकसत्त्वपरेति** । व्याव-हारिकसत्त्वानुवादद्वारा वाक्यबोध्यप्रवृत्त्यादिपरेत्यर्थः । द्वारीभूतार्थेऽ-वान्तरतात्पर्यस्वीकारमतेऽपि 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादौ

---

[1] श्रुतिर्निषेध्यसर्वदृश्योबोधकत्वन. [2] त्वेन.

पादनवैयर्थ्यम्; दशाविशेषे स्वर्गनरकादिसत्त्वप्रतिपादनेन तत्प्राप्तिपरिहारार्थं प्रवृत्तिनिवृत्त्योरेव तत्तत्प्रयोजनत्वात्। व्यावहारिकत्वं च ब्रह्मज्ञानेतराबाध्यत्वम्, न त्वबाध्यत्वम्, मिथ्यात्वबोधकश्रुतिविरोधात्। न चैवं दृढभ्रान्तिजनकत्वादत्यन्ताप्रामाण्यापत्तिः; स्वप्नार्थप्रतिपादनवदुपपत्तेः। एतावानेव विशेषः—

मानान्तरप्राप्तिबाधाभ्यां हीनार्थ एव तत्स्वीकारेण विश्वसत्यत्वादौ ताभ्यां युक्ते तदसम्भवात्। **दशाविशेष इति**। परलोकानङ्गीकर्तृवादिविप्रतिपत्त्या स्वर्गादौ सत्यतासन्देहदशायामित्यर्थः। यद्यपि सत्यं मिथ्येति सन्दिग्धमपि स्वर्गादिकं स्वप्नविषय इव भवति प्रवृत्त्याद्युद्देश्यम्; तथापि व्यावहारिकादि सत्यमलीकं वेति सन्दिग्धं तन्न तथेति व्यावहारिकसत्त्वप्रतिपादनेनोक्तसंशयनिवृत्तिद्वारा प्रवृत्त्यादौ तात्पर्यमिति भावः। श्रुतिविरोधादित्युपलक्षणम् व्यावहारिकसत्यत्त्वस्य प्रत्यक्षादिसिद्धस्यानुवादद्वारोक्तप्रवृत्त्यादिपरत्वे सम्भवति अपूर्वस्य बाध्यत्वसामान्याभावस्य विधायकत्वे[1] गौरवादित्यपि बोध्यम्। **दृढभ्रान्तीति**। श्रुतिजन्यभ्रान्तेर्मानान्तरबोधितार्थविषयकत्वेन संवादाद्भ्रमत्वशङ्कानास्पदत्वं दृढत्वमिति भावः। **अत्यन्ताप्रामाण्येति**। उक्तदृढभ्रान्तिजनकत्वव्यवहारेत्यर्थः। **स्वप्नार्थप्रतिपादनवदिति**। 'सधीः स्वप्नो भूत्वेमं लोकमनुसञ्चरति' इत्यादि शुद्धत्वं[2]पदार्थप्रतिपादनार्थानुवादरूपा, 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्' इति स्वप्नदर्शनफलप्रतिपादनार्थानुवादरूपा वा श्रुतिरिवेत्यर्थः। व्यावहारिके विश्वसत्त्वे चावान्तरतात्पर्याभावं स्फुटयति—**एतावानिति**। तत्स्वाप्न[3]मिथ्यात्वश्रुतिर्द्विधार्था, नेह नानेत्यादिरधिकरणाभावयोस्संसर्गबोधिका 'प्रपञ्चोपशमं शिवमद्वैतं, अस्थूलमनणु, इत्यादिस्त्वखण्डब्रह्मार्था समानाधिकरणनाम्नोस्सोऽयमित्यादाविवाखण्डार्थत्वस्य सिद्धान्ते स्वीकारात्, तत्राऽऽद्याया अख-

---

[1] न विधायकत्वम्. [2] शुद्धयर्थं. [3] तत्स्वाप्नं.

तत् प्रातिभासिकं इदं तु व्यावहारिकमिति। ननु मिथ्यात्वश्रुतेर्लक्षणया अखण्डचिन्मात्रपरत्वेन सत्त्वबोधनाविरोधित्वमेव, न ; अखण्डार्थबोधस्य द्वितीयाभावबुद्धिद्वारकत्वेन जगत्सत्यत्वविरोधित्वात्। न च प्रपञ्चसत्यत्वश्रुतेरप्रामाण्यप्रसङ्गः ; अतत्त्वावेदकत्वस्यावान्तरतात्पर्यमादायेष्टत्वात्। परमतात्पर्येण तु तत्त्वावेदकत्वं सर्वश्रुतीनामपि समम्। प्रातिभासिकव्यावृत्तस्य व्यावहारिकस्य तद्वति तत्प्रकारकत्वादिरूपस्य निराकर्तुमशक्यत्वादासां व्यावहारिकं प्रामाण्यमव्याहतमेव। 'असद्वा इदमग्र आसीत्' इत्यादिश्रुत्यनुरोधेनापि 'तत्सत्यम्' इत्यादिश्रुति र्न ब्रह्मणि व्यावहारिकसत्वपरा ; ब्रह्मणो व्यवहारातीतत्वात्। तस्यापरमार्थत्वे च निरधिष्ठानतया शून्यवादापत्तेः, किञ्चित्तत्वमगृहीत्वा च बाधानुपपत्तेः। अतएव सत्वश्रुतिविरोधेन

ण्डार्थधीकारणं अधिकरणे प्रपञ्चाभावसंसर्गबोधं प्रति जनकत्वात् प्रपञ्चसत्यताधीविरोधित्वं स्पष्टम्। द्वितीयाया अपि द्वितीयाभावोपलक्षिताखण्डब्रह्मरूपव्यावृत्ताकारत्वेन तद्विरोधित्वमुक्तं व्यावृत्ताकारता द्वेधेत्यादिग्रन्थेनेत्याशयेनाह—**न अखण्डेति। द्वारकत्वेनेति**। आद्यायाः श्रुतेः द्वितीयाभाववत्त्वेन बुद्धाववान्तरतात्पर्यम्। द्वितीयायास्तु द्वितीयाभावोपस्थितिद्वारा तदुपलक्षित[1]बोधपरत्वमिति भावः। **अवान्तरतात्पर्यमिति**। उक्तप्रवृत्त्यादावित्यादिः। **तत्प्रकारकत्वादीत्यादिना** व्यवहारकालाबाध्यविषयकत्वादेस्सङ्ग्रहः। **अगृहीत्वा चेति**। चकाराद्बाधानुपपत्तिमात्रस्य हेत्वन्तरस्य समुच्चयः। तेनाधिकसत्ताकवस्तुज्ञानस्यैव बाधकत्वपक्षे तात्त्विकविषयज्ञानं विना न व्यावहारिकप्रपञ्चबाध इति तात्त्विकं ब्रह्मावश्यकम्। बाध्यान्यूनसत्ताकविषयकज्ञानस्यैव बाधकत्वपक्षे तु साक्षिरूपं ब्रह्म न बाध्यम्, साक्षिणो बाधानुपपत्तेः। तद्बाधे साक्ष्यन्तर-

---

[1] बाध.

मिथ्यात्वश्रुतिरेवान्यपरेत्यपि न, षड्विधतात्पर्यलिङ्गोपेतत्वेन मिथ्यात्वश्रुतेरनन्यपरतया प्रबलत्वात्, वैदिकतात्पर्यविषयस्य च तात्त्विकत्वानियमेन तात्पर्यज्ञापकानामपि लिङ्गानामर्थतथात्व

स्वीकारापत्त्याऽनवस्थापत्तेरित्यर्थो लभ्यते । अत्रास[1]द्वेत्यादिवाक्यं नासद्बोधकम्; असतः प्रकृतवाक्यार्थानन्वयात्, तत्र मानाभावाच्च । किंतु स्वबोधकं 'तद्धैक आहुः' इत्यादिना स्व[2]बोधनद्वारा सत्त्वैव सोम्येदमित्येतत्तात्पर्यकत्वात् । अतएव कथं नु खल्वित्यादिनाऽर्थहीनत्वेनोक्तवाक्यमेवाक्षिप्यत इति न परकीयशङ्कावकाश इति ध्येयम् । यत्तु—'द्वितीयाभावस्य ब्रह्मातिरिक्तत्वेऽखण्डार्थविरोधित्वान्न तद्बोधे द्वारता, तस्य ब्रह्मरूपत्वे तु तद्द्वारिका धीरपि न जगत्सत्त्वविरोधिनी' इति, तत्तुच्छम्; द्वितीयरूपलक्षणादिज्ञानस्येव द्वितीयाभावरूपद्वितीयज्ञानस्याप्यखण्डार्थबुद्धौ प्रयोजकत्वेनाप्रतिबन्धकत्वात् । द्वितीयत्वेन सद्वैतत्वज्ञानस्यैवाद्वैतधीप्रतिबन्धकत्वात् । किञ्च अधिष्ठानज्ञानं भ्रमोत्पत्तौ विरोधि, न तु भ्रमोऽधिष्ठानज्ञानोत्पत्तौ, युक्त्या द्वैतस्य बाधितत्वादपि न तद्धीर्विरोधिनी, व्यावहारिकप्रामाण्यानपवादात्, अखण्डार्थधीप्रयोजिकेति द्वितीयाभावस्य ब्रह्मातिरेकेऽपि क्षतिविरहात् । ब्रह्मरूपत्वेऽपि द्वितीयाभावत्वेन ब्रह्मधीद्वारकधीर्विरोधिन्येवेत्यलं मूढविडम्बनेन । ननु यत्र तात्पर्यं त[3]स्याऽद्वैतस्य सिद्धावपि न तस्य तात्त्विकत्वं सिद्ध्यति, तस्य व्यावहारिकत्वेऽपि तद्बोधकश्रुतेः कर्मकाण्डवत् प्रामाण्योपपत्तेस्तत्राह—**वैदिकतात्पर्येति** । वेदपरमतात्पर्येत्यर्थः । **तथात्व इति** । तात्त्विकत्व इत्यर्थः । **पर्यवसानादिति** । अद्वैतवाक्यस्य पदार्थशोधनद्वाराऽखण्डवाक्यार्थमहातात्पर्यकत्वेऽपि अखण्डवाक्यार्थस्यैवाद्वैतरूपस्य तात्त्विकत्वसिद्धिरिति भावः । नन्वेवं निश्चसत्त्वेऽपि श्रुतेस्तात्पर्ये लिङ्गमस्ति 'आपश्च न प्रमिणन्ति' इति प्रामा-

[1] असदेवेत्यादि. [2] स्वबाधन. [3] द्वैतस्य.

एव पर्यवसानात् । सत्वश्रुतिवाक्यस्थपदानां चान्यपरत्वान्न सत्त्वे तात्पर्यलिङ्गाशङ्का । ननु यदि सत्त्वश्रुतिः प्रत्यक्षप्राप्तार्थत्वान्न स्वार्थपरा, तर्हि मिथ्यात्वश्रुतिरपि तद्विरुद्धार्थत्वात् स्वार्थपरा न स्यात्, तत्प्राप्तितद्विरोधयोस्तात्पर्याभावहेत्वोरुभयत्रापि समत्वादिति चेन्न; प्रत्यक्षापेक्षया चन्द्राधिकपरिमाणबोधकागमस्येव मिथ्यात्वबोधकागमस्यापि बलवत्त्वेन प्रत्यक्षप्राप्तानुवादिसत्त्वश्रुत्यपेक्षयाऽपि बलवत्वात्, प्राप्तार्थाप्राप्तार्थयोर्मध्ये प्राप्तार्थस्याप्राप्तविध्यर्थत्वेनान्यशेषत्वानियमात्, अप्राप्तार्थस्यानन्यशेषत्वेन बलवत्वाच्च । अन्यथोभयोरप्यप्रामाण्यापत्तेः । तदुक्तं संक्षेपशारीरके—'अतत्परा तत्परवेदवाक्यैर्विरुद्ध्यमाना गुणवाद एव' इति । अतएवानन्यशेषमिथ्यात्वश्रुतिविरोधान्न प्रत्यक्षागृहीतत्रिकालाबाध्यत्वरूपसत्यत्वपरा जगत्सत्यत्वश्रुतिरित्युक्तम्। अद्वैतश्रुतेश्च प्राबल्ये निरवकाशत्वतात्पर्यवत्त्वादिकमेव प्रयोज-

---

णिकत्वरूपायाः तन्न मोघमित्यर्थकियाकारित्वरूपायाश्चोपपत्तेर्वाक्यशेषे उक्तत्वादिति विश्वसत्त्वमपि तात्त्विकमस्तु, तत्राह—**सत्त्वश्रुतीति** । **अन्यपरत्वादिति** । अस्मन्मते श्रुतिमात्रस्य [2]ब्रह्मपरमतात्पर्यकत्वात् पररीत्यापि स्तुत्यादिद्वारा वादिविप्रतिपत्तिनिरासद्वारा वा कर्मप्रवृत्तिनिवृत्तिपरमतात्पर्यकत्वादित्यर्थः । चकारान्मानान्तरप्राप्तिबाधाभ्यां विश्वसत्त्वे तात्पर्यासम्भवः । **तद्विरुद्धेति** । प्रत्यक्षतदनुवादिश्रुतिविरुद्धेत्यर्थः । **प्रत्यक्षप्राप्तानुवादिसत्त्वश्रुतीति** । प्रत्यक्षं च तत्प्राप्तानुवादिश्रुतिश्चेत्युभयेत्यर्थः । प्रत्यक्षापेक्षया बलवत्त्वमागमत्वादिना विवेचितम् । श्रुत्यपेक्षयापि यद्यपि तत्तद्विवेचितम्; तथापि दूषणान्तरनिराचिकीर्षया भूयो विवेचयति—**प्राप्तार्थेति** । अतत्परा विश्वसत्त्वादिश्रुतिः । गुणवादः तत्परवाक्यार्थशेषीभूतार्थबोधकृत् । **अतएव** जगत्सत्त्वश्रुते र्गुणवादत्वा-

---

[1] प्राप्तार्थेति पा ।। [2] ब्रह्मतात्पर्य.

कम्, न, निषेधवाक्यत्वम्। एतेन निषेधवाक्यत्वेन प्राबल्ये किति तद्धिते वृद्धिविधायकात् 'किति च' इति सूत्रात्सामान्यतो गुणवृद्धिनिषेधकं 'क्ङिति च' इति सूत्रं बलवत्स्यात्, अग्नीषोमीयवाक्यादहिंसावाक्यं षोडशिनो ग्रहणवाक्यादग्रहणवाक्यं 'सत्यं ज्ञानम्' इत्यादिवाक्यात् 'असद्वा इदमग्र आसीत्' इत्यादिवाक्यं च बलवत्स्यादित्यपास्तम्, सामान्यविशेषभावादिना सावकाशत्वनिरवकाशत्वादिरूपबलवैपरीत्यात्, 'विश्वं सत्यम्' इत्यादेस्तु व्यावहारिकसत्यविषयतया अन्यशेषतया च सावकाशत्वादेः प्रागुक्तत्वात्। तस्मान्न सत्त्वश्रुतिविरोधः। नापि—

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
एतां बुद्धिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः॥

देव। सावकाशत्वेति। सावकाशत्वादिरूपं निरवकाशत्वादिरूपं च यद्बलं वैपरीत्यं च तत्तथेति समाहारद्वन्द्वो व्युत्क्रमेण [1]चान्वयः। अथवा सावकाशत्वेतिपदं सावकाशत्वादिपरम्। तथाच सावकाशत्वादिरूपं यन्निरवकाशत्वादिबलस्य वैपरीत्यं तस्मादित्यर्थः। 'क्ङिति च' इति निषेधस्तु इग्लक्षणगुणवृद्ध्योः। किति चेति विहिता वृद्धिस्तु नेग्लक्षणा। इग्लक्षणत्वं हीक्पदमुच्चार्य विहितत्वम्। तथाच भिन्नविषयत्वादत्र सामान्यविशेषन्यायोक्तिर्भ्रान्त्यैव परस्येत्यपि बोध्यम्। यत्तु दार्ढ्यादिप्रयोजकतया विश्वसत्त्वश्रुतिस्तत्परैवेति, तन्निरस्तमेव। यदपि 'यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि [2]तवेत्तत्सत्यमङ्गिरः, अजो न क्ष्मां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिस्सत्यैः' इत्यादिश्रुतिभिर्मन्त्रत्वादिविशेषरूपेणैव सत्यत्वबोधनात्सामान्यतो मिथ्यात्वबोधकनेतीत्यादिश्रुतिबाध इति, तदपि तुच्छम्; सर्वनाम्नेत्यादिपदेन दृश्यत्वादिरूपेणेव मन्त्रत्वादिविशेषरूपेणापि मन्त्रादेर्मिथ्यात्वबोधनात्। मन्त्रादिसत्त्वे स्तुत्यादि-

---

[1] व्युत्पत्तिक्रमेण. [2] तवेतत्सत्य.

इत्यादिस्मृतिविरोधः ; सद्विविक्तत्ववादिनो मम जगत्यसद्वैलक्षण्याङ्गीकारेण तत्प्रतिपादकस्मृतिविरोधाभावात् । ननु 'नाभाव उपलब्धेः, वैधर्म्याच्च न स्वप्नादिवत्' इति सूत्रद्वयेन जगतः पारमार्थिकसत्त्वबोधनेन विरोधः, न चानेन शून्यवादिनिरासार्थेनासद्वैलक्षण्यमात्रप्रतिपादनान्न विरोधः ; अर्थक्रियाकारित्वलक्षणस्यासद्वैलक्षण्यस्य शून्यवादिमतेऽपि सत्त्वेन तन्मतनिरासार्थत्वानुपपत्तेः, निषेधाप्रतियोगित्वरूपस्यासद्वैलक्षण्यस्य त्वयाप्यनङ्गीकारात्, असद्वैलक्षण्यमात्रस्य साधने सूत्रे स्वप्नवैलक्षण्योक्तयोगाच्च, व्यावहारिकसत्यत्वमात्रेण स्वप्नवैलक्षण्यस्य (त्वयाप्यङ्गीकारात्, असद्वैलक्षण्यमात्रस्य) तन्मतेऽपि सत्वाच्च । तदुक्तं बौद्धैः—'द्वे सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना' इति चेन्न ; सूत्रार्थानवबोधात् । तथाहि—सद्रूपाद्ब्रह्मणो जगत्सर्गं वदतस्समन्वयस्य सर्वमसदित्यनुमानेन विरोधसन्देहे—

न सन्नासन्न सदसन्न चानुभयतत्त्वकम् ।
विमतं तर्कपीड्यत्वान्मरीचिषु यथोदकम् ॥

परोक्तश्रुतेस्तात्पर्याभावाच्च । **तत्प्रतिपादकेति** । जगति सद्विविक्तत्वस्यासद्वैलक्षण्यस्य च प्रतिपादकेत्यर्थः । उक्तस्मृतौ हि यतोऽनीश्वरमीश्वरानुपादानकमतोऽसत्यं सत्योपादानशून्यं,[1] अतश्च बाधावधिरूपप्रतिष्ठाशून्यं जगदिति ये माध्यमिकादयो वदन्ति तान्निन्दया सत्येश्वरोपादानकं तत् स्वबाधावधिसहितमिति प्रतिपादितम् । तथाच सदुपादानकत्वाद्ब्राध्यत्वाच्च सदसद्विलक्षणमिति मन्मतमेव तदिति भावः । शास्त्रदर्पणोक्तामधिकरणरचनामाह—**तथाहीत्यादि** । **वदतः** प्रतिपादयतः । **समन्वयस्य** प्रथमाध्यायस्य । **तर्कपीड्यत्वादिति** । तर्कविरुद्धरूपादित्यर्थः । तथाच **न सत्** बाधयोग्यत्वात्, **ना सत्** कालादि-

---

[1] पादानजन्यं.

इति ब्रह्मसाधारण्यान्निस्तत्त्वतायां प्राप्तायां सूत्रेण परिहारः। सतो ब्रह्मणो नाभावः न शून्यत्वं, उपलब्धेः सत्त्वेन प्रमाणात्प्रतीतेः। तथाच किञ्चित्परमार्थसदवश्यं शून्यवादिनापि स्वीकार्यम्। अन्यथा बाधस्य निरवधिकत्वप्रसङ्गादिति सूत्रार्थः। स च न प्रपञ्चमिथ्यात्वविरोधी। तथाचोक्तम्—

बाधितोपद्रवो[1] मानैर्व्यावहारिकमानता।
मानानां तात्त्विकं किञ्चिद्वस्तु नाश्रित्य दुर्भणा॥

सम्बन्धात्, **न सदसत्** विरोधात्, **न चानुभयतत्त्वकम्** तात्त्विकयोः सदसद्भेदयोरभाववत् सदसद्भिन्नत्वाभ्यां निर्वक्तुमशक्यत्वादिति बोध्यम्। **विमतमिति** सत्त्वेन प्रतीत्यर्हमित्यर्थः। तेन तुच्छे न बाधासिद्धी। चरमसाध्यद्वये तु धीविषयत्वमात्रेण पक्षता, तुच्छेऽपि हेतुसाध्ययोस्सत्त्वात्। **ब्रह्मसाधारण्यादिति**। पक्षतावच्छेदकावच्छेदेनानुमितेरुद्देश्यत्वादित्यादिः। **न शून्यत्वमिति**। ब्रह्म न बाध्यं बाधायोग्यत्वादित्यत्र तात्पर्यम्। **निरवधिकत्वेति**। बाध्याधिकसत्ताकवस्तुशून्यत्वेत्यर्थः। न [2]च तदनुपपन्नमित्याशयेनाह—**तथाचोक्तमिति**। शास्त्रदर्पण इति शेषः। **मानैः** वस्तूनामपह्नवो **बाधितः**, तात्त्विकत्वं सिद्ध्यति। यदि तात्त्विकं न स्यात्तदा बाधशून्यप्रमेयं न स्यात्, शुक्तिरूप्यादिवत्, बाधशून्यत्वं चाग्रे व्यावहारिकेत्यादिना उपपादनीयमिति भावः। अथवा मानानामबाधितविषयकत्वरूपप्रामाण्यस्यौत्सर्गिकत्वात् वस्तूनामपह्नवो बाधो बाधितो न सम्भवति। ननु बाधकप्रमाणादौत्सर्गिकस्यापवादोऽस्तु, तत्राह— **व्यावहारिकेति**। बाधितविषयकेत्यर्थः। **अनाश्रित्य** बाधकविषयत्वेनास्वीकृत्य, । यद्यद्बाधकज्ञानं तद्बाध्यापेक्षयाऽधिकसत्ताकविषयं, अन्यथा समबलत्वेन बाध्यबाधकत्वानुपपत्तेः। अतस्तात्त्विकविषयकधीरेव व्यावहारिकमानबाधिकेति भावः। अथवा **अनाश्रित्य**

---

[1] बाधितापन्हवो. [2] तदनुपपन्नमिति.

इति। नापि स्वप्नवैधर्म्योक्तयोगः, तस्याः 'विमतं निस्तत्त्वम्, तर्कपीड्यत्वात्, मरुमरीचिकाजलवत्' इत्यनुमाने बाध्यत्वप्रमाणागम्यत्वदोषजन्यत्वाद्युपाधिप्रदर्शनपरत्वात्। विज्ञानवादनिराकरणपरेणापि नानेन सूत्रेण विरोधः। रूपादिरहितब्रह्मजगदुपादानत्वप्रतिपादकसमन्वयस्य नीलाद्याकारं विज्ञानं साधयताऽनुमानेन विरोधसन्देहे—

स्वप्नधीसाम्यतो बुद्धेर्बुद्ध्याऽर्थस्य सहेक्षणात्।
तद्भेदेनानिरूप्यत्वात् ज्ञानाकारोऽर्थ इष्यताम्॥

विमता धीः, न ज्ञानव्यतिरिक्तालम्बना, धीत्वात्, स्वप्नधीवत्,

साक्षित्वेनास्वीकृत्य, साक्षिणोऽपि बाधस्वीकारे साक्ष्यन्तरं तत्साधकं वाच्यम्; तद्बाधकसाधकमपि साक्ष्यन्तरमित्यनवस्थानात्स्फुरणं नास्तीति बाधानुपलब्धेश्च साक्षिरूपं ब्रह्म तात्त्विकमेव वाच्यमिति भावः। **उपाधिदर्शनेति।** बाध्यत्वादेस्स्वप्नधर्मस्य ब्रह्मादावभावप्रदर्शनेन स्वप्नादौ निश्चितसाध्यव्यापकत्वं ब्रह्मणि साधनाव्यापकत्वं च दर्शितमिति भावः। विमता नीलाद्यनुभवरूपा धीः, न ज्ञानव्यतिरिक्तालम्बना, न स्वात्यन्तविलक्षणविषयिका, नानुभवत्वशून्यविषयिकेति यावत्। [1]बाह्यरूपसमानसत्ताकनीलादितादात्म्ययुक्तेति वार्थः। आस्तिकमतेऽनुभवत्वशून्य एव नीलादिः, औपनिषदमतेऽपि नीलादितादात्म्यमनुभवनिष्ठं नानुभवस्वरूपसमसत्ताकमिति न सिद्धसाधनमिति भावः। **धीत्वात्।** अनुभवत्वात्। **स्वप्नधीवदिति।** अनुभवविषयकस्वप्नधीवदित्यर्थः। औपनिषदमते स्वप्नस्यावच्छिन्नानुभवस्य शुद्धानुभवविषयतारूपतादात्म्यान्न साध्यवैकल्यम्। न च तादृशानुभवविषयस्य जडस्यानुभवत्वशून्यत्वात्तदवस्थमेव तदिति वाच्यम्; अनुभवविषयकत्वावच्छेदेनानुभवाविषयकत्वसत्त्वात्। औपनिषदं प्रत्यनुभवत्वाश्रयविषयकत्वमेव वा साध्यम्।

---

[1] स्वस्वरूप.

विपक्षे च ज्ञानाभानेऽप्यर्थभानप्रसङ्गो बाधकः। न हि भिन्नयोरश्वमहिषयोस्सहोपलम्भनियमोऽस्ति। तस्मान्न ज्ञानातिरिक्तं सदिति प्राप्ते परिहारसूत्रं 'नाभाव उपलब्धेः' इत्यादि।

बाधेन सोपाधिकतानुमाने उपायभावेन सहोपलम्भः।

नीलाद्यनुभव[1] विषयकत्वावच्छेदेनानुभवविषयकत्वस्यास्तिकैरनङ्गीकारान्न सिद्धसाधनम्। योगाचारेण तु एकव्यक्तेरेवानुभवत्वनीलत्वादिस्वीकारेण नीलत्वाद्याश्रयविषयकत्वावच्छेदेनैवानुभवविषयकत्वं स्वीक्रियत इति न बाधः। एवं—नीलाद्यनुभवः स्वसमसत्ताकनीलत्वादिसंसर्गयुक्तः, अनुभवत्वात्, यो यद्विषयकानुभवस्स तद्वृत्त्यसाधारणधर्मस्य समानसत्ताकसंसर्गवान्, यथा अनुभवविषयकानुभवोऽनुभववृत्त्यनुभवत्वस्य स्वसमानसत्ताकसंसर्गवानिति सामान्यतो व्याप्तिरपि बोध्या। बुद्ध्याऽर्थस्य सहेक्षणादित्यादे रनुकूलतर्कप्रदर्शनपरत्वमाह—**न हीति**। तथाच सहोपलम्भ[2]नियमज्ञानभेदेनार्थानिरूपणम्। अतो ज्ञानत्वात् ज्ञानमर्थाकारकमिति बुद्ध्येत्याद्यर्थ इति भावः। ननु बौद्धमते तुच्छस्य ज्ञानत्वशून्यस्यापि ज्ञानविषयत्वाद्व्यभिचारस्तत्राह—**तस्मान्न ज्ञानातिरिक्तं सदिति**। ज्ञानत्वशून्यं न सत्[3] न तुच्छविलक्षणमित्यर्थः। तथाच तुच्छविलक्षणविषयकज्ञानत्वमेवानुभवत्वम्। तुच्छज्ञानं तु विकल्पो नानुभव इति न व्यभिचार्यनुभवत्वमिति भावः। **बाधेनेति**। सहार्थे तृतीया। ज्ञानादत्यन्तभेदेनार्थस्य मानैरुपलम्भात् ज्ञानज्ञेययोर्भेदाभेदवादिनोऽनुमानं बाधितार्थकं बाध्यत्वाद्युपाधियुक्तं चेत्यर्थः। **उपायेति**। यथा प्रभा उपायभूता रूपग्रहे विषयसन्निकृष्टत्वात् तावतापि न रूपं प्रभात्मकं, तथा ज्ञाने उपायभूतो विषयस्तज्ज्ञाने विषयीभवति, विषयोपरागेणैव ज्ञानग्रहात्। परोक्षज्ञानेऽपि गृह्यमाणे विषयज्ञानस्योपायत्वा

---

[1] वत्वावच्छेदेन. [2] नियमात् ज्ञानाभेदेनार्था. [3] सत्तुच्छविलक्षणमित्यर्थः.

सारूप्यतो बुद्धितदर्थभेदः स्थूलार्थभङ्गो भवतोऽपि तुल्यः॥

सूत्रार्थस्तु—नाभावः ज्ञानातिरिक्तस्यार्थस्य नासत्वम्; किंतु व्यवहारदशाबाध्यार्थक्रियाकारित्वरूपं सत्त्वमेव उपलब्धेः—ज्ञानातिरेकेण प्रमाणैरुपलब्धेः। स्वप्नवैधर्म्योक्तिर्बाध्यत्वाद्युपाधिप्रदर्शनाय। तेन बाधात्सोपाधिकत्वाच्च पूर्वानुमानं दुष्टमित्यर्थः। तस्मान्नैवमपि विरोधशङ्का। तदुक्तम्—"तस्मान्न ज्ञानाकारोऽर्थः,

---

द्विषयस्योपायत्वोक्तिः। अथवा उपायो ज्ञानग्रहस्य [1]विषयग्राहकतानियामकं ज्ञानविषयकत्वं, तस्य भावेन विद्यमानत्वेन, सर्वथापि सहोपलम्भो नोक्तसाध्यसाधक इति भावः। ननु ज्ञानमात्रेण सकलव्यवहारोपपत्तौ ज्ञानात्यन्त[2]भिन्नार्थकल्पने गौरवम्, तत्राह—**सारूप्यत इति**। अपिशब्दः काकाक्षिन्यायेनोभयसम्बद्धः। स्थूलार्थभङ्गेऽपि सारूप्यतो ज्ञानतदर्थयोरत्यन्तभेदः सौत्रान्तिकस्येव तव योगाचारस्यापि आवश्यकत्वेन तुल्यः। सौत्रान्तिको हि स्थूलमवयविनं पृथिव्यादिचतुष्टयान्यगुणादिकं चानङ्गीकुर्वन्नपि परमाणुसङ्घातमेवार्थमङ्गीकृतवान्। अन्यथा ज्ञाने विषयस्य प्रतिबिम्बरूपं सारूप्यं तदभ्युपगतं न स्यात्, त्वयाऽपि तथाऽनङ्गीकारशालिना तथाऽङ्गीकार्यम्। अन्यथा सारूप्यशब्दितं विषयात्मकरूपस्य साहित्यं तदभ्युपगतं न स्यात्। न च विषयतादात्म्यं स्वसमसत्ताकमेव ज्ञाने सारूप्यं ममेति वाच्यम्? तादात्म्य[3]स्वीकारेऽपि तस्य स्वसमसत्ताकत्वे मानाभावात्, एकस्मिन् ज्ञानस्वरूपे तात्त्विके सर्वविषयाणां तादात्म्यस्वीकारेण निर्वाहेऽनन्तज्ञानोत्पत्तिकल्पने गौरवात्। न चौपनिषदानामपि विषयाणामनन्तानामुत्पत्तिस्तुल्येति वाच्यम्; औपनिषदानामनादिविषयकज्ञानस्थले कस्याप्युत्पत्तेरकल्पनात्तव तत्रापि ज्ञानोत्पत्तिकल्पनादिति भावः। **बाध्यत्वाद्युपाधीति**। स्वप्नधीर्बाध्येति

---

[1] विषयग्रहता. [2] ज्ञानादत्यन्त. [3] तदार्थ.

किंतु बाह्यः, स चार्थक्रियाकारित्वसत्त्वोपेतोऽप्यद्वैतश्रुतिवशाद्ब्रह्मणि कल्पितो न परमार्थसन्निति सिद्धान्तस्य सुगतमताद्भेदः" इति। उक्तं चात्मतत्त्वविवेके—

न ग्राह्यभेदमवधूय धियोऽस्ति वृत्ति-
स्तद्बाधके बलिनि वेदनये जयश्रीः।
नो चेदनित्यमिदमीदृशमेव विश्वं
तथ्यं तथागतमतस्य तु कोऽवकाशः॥

इति। धर्मिग्राहकमानबाधश्च प्रागेव परिहृत इति शिवम्॥

इति विश्वमिथ्यात्वस्यागमादिबाधोद्धारः.

तत्र साध्यव्यापकता, जाग्रद्बीश्च न बाध्येति तत्र साधनाव्यापकतेति भावः। ननु मिथ्यात्वानुमाने मानसिद्धस्यैव पक्षीकार्यत्वाद्धर्मिग्राहकमानबाधस्यात्तत्राह—**धर्मीति**। धर्मिग्राहकमानगतं व्यावहारिकं प्रामाण्यमुपजीव्यम्। एतच्च न मिथ्यात्वानुमानेनापसार्यते। यच्च तात्त्विकं प्रामाण्यमपसार्यते, तन्नोपजीव्यमित्यादिना पूर्वं तत्परिहृतमित्यर्थः॥

तर्कैस्सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
मिथ्यात्वस्यागमाद्यैरप्यबाधाद्भ्रान्तभञ्जनम्॥

इति विश्वमिथ्यात्वस्यागमादिबाधोद्धारः.